पूर्णप्रज्ञसंशोधनमन्दिरम्
नवदेहलीस्थमानवसंसाधनविकासमन्त्रालयाधीन-
राष्ट्रियसंस्कृतसंस्थानेन सम्मानितम्

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं

श्रीमद्ब्रह्मसूत्रभाष्यम्

श्रीमज्जयतीर्थविरचिततत्त्वप्रकाशिकया
श्रीमद्रघुनाथतीर्थकृतशेषतात्पर्यचन्द्रिकाटिप्पण्या च समलङ्कृतम्
(तृतीयाध्यायस्य चतुर्थपादमारभ्य
चतुर्थाध्यायसमाप्तिपर्यन्तम्)

सम्पादकः
प्रा. के. हयवदन पुराणिकः
प्रांशुपालचरः, पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु

सहसम्पादकौ
वि. रङ्गनाथ कट्टिः वि. शङ्करनारायण अडिगः
उपनिदेशकौ, पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु-२८

पूर्णप्रज्ञसंशोधनमन्दिरम्
पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु - २८

२०१०

पूर्णप्रज्ञसंशोधनमन्दिरम्
नवदेहलीस्थमानवसंसाधनविकासमन्त्रालयाधीन-
राष्ट्रियसंस्कृतसंस्थानेन सम्मानितम्

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं

श्रीमद्ब्रह्मसूत्रभाष्यम्

श्रीमज्जयतीर्थविरचिततत्त्वप्रकाशिकया
श्रीमद्रघुनाथतीर्थकृतशेषतात्पर्यचन्द्रिकाटिप्पण्या च समलङ्कृतम्
**(तृतीयाध्यायस्य चतुर्थपादमारभ्य
चतुर्थाध्यायसमाप्तिपर्यन्तम्)**

सम्पादकः
प्रा. के. हयवदन पुराणिकः
प्रांशुपालचरः, पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु

सहसम्पादकौ
वि. रङ्गनाथ कट्टिः   वि. शङ्करनारायण अडिगः
उपनिदेशकौ, पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु-२८

पूर्णप्रज्ञसंशोधनमन्दिरम्
पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु - २८

२०१०

पूर्णप्रज्ञसंशोधनमन्दिरग्रन्थमाला-८१

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं

श्रीमद्ब्रह्मसूत्रभाष्यम्

श्रीमज्जयतीर्थविरचिततत्त्वप्रकाशिकया

श्रीमद्रघुनाथतीर्थकृतशेषतात्पर्यचन्द्रिकाटिप्पण्या च समलङ्कृतम्

सम्पादकः- प्रा. के. हयवदन पुराणिकः

प्रांशुपालचरः, पूर्णप्रज्ञविद्यापीठम् बेङ्गलूरु

प्रकाशनम्- पूर्णप्रज्ञसंशोधनमन्दिरम्,

पूर्णप्रज्ञविद्यापीठम् बेङ्गलूरु-२८

प्रथममुद्रणम् - २०१०

पृष्ठसङ्ख्या - ८० + ७६८

मुद्रितपुस्तकसङ्ख्या - १०००

मूल्यम् - ४०० रूप्यकाणि

वागर्थमुद्रणालयद्वारा मुद्रितम्।

Poornaprajna Samshodhana Mandiram

Recognised by Rashtriya Sanskrit Samsthan, Deemed University,
Ministry of H.R.D., Govt. of India, New Delhi

ŚRI BRAHMASŪTRA BHĀṢYAM

of

Sri Madhwācārya

with the Tatvaprakāśikā commentary of Sri Jayatīrtha & the ŚEṢATĀTPARYACANDRIKĀ sub-commentary of Sri Raghunāthatīrtha

(From the beginning of the Fourth Pāda of Third chapter to Fourth Pāda of Fourth chapter)

Editor

Prof. K. Hayavadana Puranik

Former Principal, Poornaprajna Vidyapeetha, Bangalore

Sub-Editors

Dr. Ranganatha Katti **Dr. K. Shankaranarayna Adiga**

Deputy Directors, Poornaprajna Samshodhana Mandiram, Bangalore

Publisher :

Poornaprajna Samshodhana Mandiram

Poornaprajna Vidyapeetha,

Bangalore - 560 028

2010

Poornaprajna Samshodhana Mandira Grantamālā - 81

Śri Brahma Sūtra Bhāṣyam of **Sri Madhwācārya**
with the Tatvaprakāśikā commentary of Sri Jayatīrtha and the ŚEṢATĀTPARYACANDRIKĀ sub-commentary of Sri Raghunāthatīrtha
(From the beginning of the Fourth Pāda of Third chapter to Fourth Pāda of Fourth chapter)

ISBN : 978-81-910246-9-2

Editor : **Prof. K. Hayavadana Puranik**

Published by :
Poornaprajna Samshodhana Mandiram
Poornaprajna Vidyapeetha, Bangalore - 560 028.

First Edition : 2010

This publication is brought out by the generous financial help of
Rashtriya Sanskrit Samsthan,
(Deemed University),
New Delhi

Copies : 1000

Pages : 80 + 768

Price : Rs. 400/-

Printed by :
Vagartha, Bangalore.

अनुग्रहसन्देशः

जगद्गुरुभिः श्रीमदानन्दतीर्थभगवत्पादाचार्यैः ब्रह्मसूत्राण्यधिकृत्य चत्वारः प्रबन्धा अनुगृहीताः । तत्र ब्रह्मसूत्रभाष्यम् श्रुतिस्मृतिसमुल्लेखनपुरस्सरं स्वगुरोर्वेदव्यासस्याशयविशेषं प्रद्योतयत् प्रचकास्ति । अस्य तु व्याख्या श्रीमट्टीकाकृत्पादैः प्रणीता तत्त्वप्रकाशिकेत्यन्वर्थाभिधा राजतेतमाम् । अस्याः पदवाक्यप्रमाणपारावारपारीणैः श्रीव्यासतीर्थश्रीमच्चरणैः प्रणीता तात्पर्यचन्द्रिकानाम्नी अपूर्वा काचन व्याख्या विनिर्मिता । अस्या अध्ययनं विना द्वैतवेदान्ते निष्कृष्टं पाण्डित्यं सम्पादयितुं न शक्यत इति सर्वेषां विदुषां विदितमेव । अत्र तु व्याससूत्रगतपदानामपि कृत्यं विचिन्तितम् अपाकृतं च परकीयव्याख्यानम् उपपादितं च माध्वव्याख्यानस्यासाधारणं वैशिष्टचम् । यद्यपीयं तात्पर्यचन्द्रिका द्वितीयाध्यायपर्यन्ताऽथापि तृतीय-तुरीयाध्याययोः तदीयपरम्परागतैः श्रीरघुनाथमुनिभिः प्रणीता शेषचन्द्रिकेत्यन्वर्थाभिधा राजतेतमाम् । अस्याः टिप्पण्याः शैली तात्पर्यचन्द्रिकामेव अनुसरति । प्रतिसूत्रमत्र परकीयव्याख्यानानामकौशलं माध्वव्याख्यानस्य महत्त्वं चोपपादितम् ।

अस्माभिः अप्रकाशिततालपत्रग्रन्थानां प्रकाशनार्थं स्थापितमिदं पूर्णप्रज्ञसंशोधनमन्दिरं शेषचन्द्रिकायाः संशोधनं विधाय एतावत्पर्यन्तं सम्पुटद्वयं विद्वत्करकमलयोः समर्पयत् । इदानीं तृतीयो भागः आन्तं यावत् प्रकाशितः विदुषां विद्यार्थिनां च महते उपकाराय कल्पत इत्यत्र न सन्देहगन्धः । प्रथमभागस्य संशोधकाः विद्वदग्रेसराः श्रीमन्तः

हयवदनपुराणिकमहाभागा एव अस्यापि ग्रन्थस्य संशोधका इति सामोदमुल्लिखामहे । अधुना अस्मच्छात्रप्रवरैः एभिर्विहितां शास्त्रसेवां समवलोक्य केन्द्रीयसर्वकारः राष्ट्रपतिपुरस्कारसमर्पणेन एतान् समभ्यनन्ददिति श्रुत्वा प्रमुदिता वयम् । नैकतालपत्रसमवलोकनेन शुद्धपाठप्रदानार्थं प्रयतितवन्तौ अस्मत्प्रियछात्रौ रङ्गनाथकट्टि-शङ्करनारायणाडिगौ । तृतीयस्य भागस्य उपसम्पादकाविमौ श्रद्धया शास्त्रसेवां व्यधत्ताम् । समेषामेषाम् अस्मदाराध्यः श्रीकृष्णः ज्ञानाद्यभिवर्धनेन समनुगृह्णात्विति प्रार्थयामहे ।

श्रीश्रीविश्वेशतीर्थश्रीपादाः

Director's Note

Jagadguru Sri Madhwacharya contributed four valuable commentaries on Brahma-sutras. One among the four commentaries is the Brahma-sutra-bhashya which throws new light on Brahma-sutras with the support of Vedas, Upanishads, Puranas and other texts. Sri Jayatirtha Muni (Teekacharya) wrote a commentary (Tattvaprakashika), where the five important points of every Adhikarana were discussed in lucid style. The five important issues of every Adhikarana are as follows :

विषयो विषयश्चैव पूर्वपक्षस्तथोत्तरम् ।
प्रयोजनं च पञ्चैते प्राञ्चोऽधिकरणं विदुः ॥

The Tatparya-chandrika is commentary of Sri Vyasatirtha on Tattvaprakashika which presents a critical study of interpretations of other schools and aptness of Madhwa Bhashya. This commentary is available for two chapters. In the same spirit and zeal, and on the same lines of logic, Sri Raghunathatirtha has continued his mission of establishing the doctrine successfully. He is known in the scholarly circle as Sheshachandrikacharya.

First edition of this monumental work was brought out three decades ago with a critical edition by K. Hayavadana Puranik. Due to the unavailability of this edition it was reprinted in 2007. Second volume of Shesha-chandrika was ably edited by renowned scholar Prof. D. Prahlada Char and published in 2004. Now the third and final volume is edited by Prof. K. Hayavadana Puranik, an eminent scholar of Dvaita Vedanta and author of more than 50 works. Prof. Puranik wrote a valuable introduction in Kannada and it is translated into English by eminent scholar

Dr. C.H. Srinivasamurthy, former Professor of Sanskrit, Sharada Vilas College, Mysore. I express my gratitude for these two senior scholars for their valuable service.

Two young scholars Dr. Ranganatha Katti and Dr. Shankaranarayana Adiga are co-editors of this volume and have taken pain in the editing and fixation of correct readings.

Our most respectful obeisances are also due to H.H. Sri Vishveshatirtha Swamiji, the founder of this Samshodhana Mandiram and the Chairman of our parent body, the Poornaprajna Vidyapeetha Pratishthana, for his sustained encouragement in our attempts.

I record my sincere gratitude to Prof. Radha Vallabh Tripathi, Vice-chancellor, Rashtriya Sanskrit Samsthan, New Delhi, for the continuous support in our academic activities. I also express my gratitude to Prof. Ramanuja Devanathan, the Registrar, Rashtriya Sanskrit Samsthan, New Delhi and Officers of Rashtriya Sanskrit Samsthan, New Delhi, for their encouragement in all aspects.

We offer our grateful thanks to Prof. D. Prahlada Char, Chairman of the Poornaprajna Samshodhana Mandiram, for his continuous encouragement at every step.

I also appreciate the effort of authorities of ???? Printers, who have brought out this book very neatly.

Sujanavidheya

Dr. A.V. Nagasampige
Director
Poornaprajna Samshodhana Mandiram

ಮುನ್ನುಡಿ

ಶ್ರೀವ್ಯಾಸರಾಜ ಮಠದ ಭವ್ಯ ಪರಂಪರೆಯಲ್ಲಿ ಬಂದ ಹತ್ತನೆಯ ಯತಿಗಳು **ಶ್ರೀರಘುನಾಥತೀರ್ಥರು**. ಶ್ರೀವ್ಯಾಸರಾಜ ಗುರುಸಾರ್ವಭೌಮರ ಮೇರು ಕೃತಿಯಾದ **ತಾತ್ಪರ್ಯಚಂದ್ರಿಕೆಯ** ಅವಶಿಷ್ಟಭಾಗವನ್ನು ಅವರ ಪರಮಾನುಗ್ರಹ ದಿಂದ. ಯಶಸ್ವಿಯಾಗಿ ಪೂರ್ತಿಗೊಳಿಸಿ **'ಶೇಷಚಂದ್ರಿಕಾಚಾರ್ಯರು'** ಎಂಬ ಅನ್ವರ್ಥನಾಮದಿಂದ ಇವರು ಪ್ರಸಿದ್ಧರಾದರು. 18ನೆಯ ಶತಮಾನಕ್ಕೆ ಸೇರಿದ ಅವರ **'ಶೇಷತಾತ್ಪರ್ಯಚಂದ್ರಿಕಾ'**ಗ್ರಂಥವು ಅವರ ವಿಶ್ವತೋಮುಖಿಪಾಂಡಿತ್ಯ ಹಾಗೂ ಪ್ರಖರಪ್ರತಿಭೆಗೆ ಸಾಕ್ಷಿಯಾಗಿದೆ. ದ್ವೈತವೇದಾಂತಪ್ರಪಂಚಕ್ಕೆ ಅವರು ನೀಡಿದ ಕೊಡುಗೆ ಅನುಪಮವಾದುದು. ಒಟ್ಟು ಆರು ಗ್ರಂಥಗಳನ್ನು ರಚಿಸಿ ದ್ವೈತವೇದಾಂತವನ್ನು ಶ್ರೀಮಂತಗೊಳಿಸಿದ ಸಂತರಿವರು. ಅವುಗಳನ್ನು ಹೀಗೆ ಸಂಗ್ರಹಿಸಬಹುದು- 1. ತತ್ತ್ವಕಣಿಕಾ, 2. ಬೃಹತೀಸಹಸ್ರಟೀಕಾ, 3. ಈಶಾವಾಸ್ಯೋಪನಿಷದ್ ಭಾಷ್ಯಟೀಕಾ, 4. ಕರ್ಮನಿರ್ಣಯಟೀಕಾ, 5. ಪದಾರ್ಥವಿವೇಕ ಮತ್ತು 6. ಶೇಷತಾತ್ಪರ್ಯಚಂದ್ರಿಕಾ.

ಇವುಗಳಲ್ಲಿ ಕೊನೆಯದಾದ ಶೇಷತಾತ್ಪರ್ಯಚಂದ್ರಿಕಾ ಗ್ರಂಥದ ಮೊದಲ ಎರಡು ಭಾಗಗಳು ಪೂರ್ಣಪ್ರಜ್ಞ ಸಂಶೋಧನ ಮಂದಿರದಿಂದ ಈಗಾಗಲೇ ಪ್ರಕಟವಾಗಿದ್ದು ಕೊನೆಯ ಸಂಪುಟವನ್ನು ಜಿಜ್ಞಾಸುಗಳ ಹಾಗೂ ವಿದ್ವಜ್ಜನರ ಅನುಕೂಲಕ್ಕಾಗಿ ಲೋಕಾರ್ಪಣೆ ಮಾಡಲಾಗುತ್ತಿದೆ.

ಈ ಗ್ರಂಥದ ಪ್ರತಿಯೊಂದು ಅಧಿಕರಣಗಳು ಅನೇಕ ವೈಶಿಷ್ಟ್ಯಗಳಿಂದ ಕೂಡಿದ್ದು ಅವುಗಳಲ್ಲಿ ಒಂದು ಅಧಿಕರಣದ ವೈಶಿಷ್ಟ್ಯವನ್ನು ಸ್ಥಾಲೀಪುಲಾಕ ನ್ಯಾಯದಂತೆ ಇಲ್ಲಿ ಕೊಡಲಾಗಿದೆ-

'ಸಮನಾ ಚಾಸೃತ್ಯುಪಕ್ರಮಾದಮೃತತ್ವಂ ಚಾನುಪೋಷ್ಯ' (ಬ್ರ.ಸೂ. 4.2.7) ಎಂಬ ಅಧಿಕರಣವಿಚಾರ ದ್ವೈತಭಾಷ್ಯರೀತಿಯಿಂದ ಸಂಕ್ಷೇಪವಾಗಿ ಹೀಗಿದೆ-

ಪೂರ್ವಪಕ್ಷಿ ಹೀಗೆ ಹೇಳುತ್ತಾನೆ. ಲಯಕಾಲದಲ್ಲಿ ಶ್ರೀತತ್ತ್ವವು ಪರತತ್ತ್ವದಲ್ಲಿ ಲಯ ಹೊಂದುತ್ತದೆ. 'ತೇಜಃ ಪರಸ್ಯಾಂ ದೇವತಾಯಾಂ' ಎಂಬ ಛಾಂದೋಗ್ಯಶ್ರುತಿ ಹಾಗೆ ಹೇಳುತ್ತಿದೆ. ಇದರಿಂದ ಸೃಷ್ಟಿಲಯವುಳ್ಳ ಜೀವರಂತೆ ಶ್ರೀತತ್ತ್ವಕ್ಕೂ ಸಂಸಾರಬಂಧವಿದೆ ಎಂದಂತಾಯಿತು. ಅದಕ್ಕೆ ನಿತ್ಯಮುಕ್ತತ್ವವನ್ನು

ಒಪ್ಪಬಾರದು. ಒಪ್ಪಿದರೆ ಪರತತ್ವವೂ ನಿತ್ಯಮುಕ್ತ, ಶ್ರೀತತ್ವವೂ ನಿತ್ಯಮುಕ್ತ. ಪರತತ್ವದಂತೆ ಶ್ರೀತತ್ವವೂ ಸರ್ವಗುಣಪೂರ್ಣವೆಂದು ಒಪ್ಪಬೇಕಾದೀತು. ಆದರೆ ಸರ್ವಗುಣಪರಿಪೂರ್ಣವಾದುದು ಪರತತ್ವ ಒಂದೆ. ಹೀಗಾಗಿ ಶ್ರೀತತ್ವಕ್ಕೆ ನಿತ್ಯಮುಕ್ತತ್ವವನ್ನು ಒಪ್ಪಬಾರದು.

ಸಿದ್ಧಾಂತಿ ಹೀಗೆ ಹೇಳುತ್ತಾನೆ-

'ಸಮಾವೇತೌ ಪ್ರಕೃತಿಶ್ಚ ಪರಮಶ್ಚ ನಿತ್ಯೌ ಸರ್ವಗತೌ ನಿತ್ಯಮುಕ್ತೌ ।'

ಎಂಬ ಸೌಪರ್ಣಶ್ರುತಿ ಸ್ಪಷ್ಟವಾಗಿ ಪರತತ್ವಶ್ರೀತತ್ವಗಳೆರಡೂ ನಿತ್ಯಮುಕ್ತತ್ವ ವಿಷಯದಲ್ಲಿ ಸಮವೆಂದು ಹೇಳಿದೆ. ಆದರೂ ಸರ್ವಗುಣಸಾಮ್ಯಪ್ರಸಕ್ತಿ ಇಲ್ಲ. ಏಕೆಂದರೆ ಪರತತ್ವದಲ್ಲಿ ಲಯಹೊಂದುವ ಜೀವರಿಗೆ ಮುಂದೆ ಪುನರ್ಜನ್ಮ ವಿರುವುದಿಲ್ಲ. ಶ್ರೀತತ್ವದಲ್ಲಿ ಲಯ ಹೊಂದುವವರಿಗೆ ಪುನರ್ಜನ್ಮವಿದೆ- ಎಂಬ ವ್ಯತ್ಯಾಸವಿದೆ.

ಶ್ರೀತತ್ವಕ್ಕೆ ಪರತತ್ವದಲ್ಲಿ ಲಯವಿದೆ ಎಂದ ಮಾತ್ರಕ್ಕೆ ಸಂಸಾರಬಂಧನವಿದೆ ಎಂದಾಗುವುದಿಲ್ಲ. ಏಕೆಂದರೆ ಶ್ರೀತತ್ವಕ್ಕೆ ಲಯ ಜ್ಞಾನಿಗಳಾದ ಜೀವರಿಗೆ ಹೇಳಿದಂಥ ಲಯವಲ್ಲ. ಪರತತ್ವದ ಅತ್ಯಂತ ಸಮೀಪದಲ್ಲಿರುವುದೇ ಶ್ರೀತತ್ವಕ್ಕೆ ಲಯವೆಂದು ಗೌಣವಾಗಿ ವ್ಯವಹರಿಸಲ್ಪಡುತ್ತದೆ. ಶಿಷ್ಯ ಗುರುವಿಗೆ ಅತ್ಯಂತ ಸಮೀಪದಲ್ಲಿ ವಾಸ ಮಾಡಿದರೆ 'ಗುರೌ ವಸತಿ' 'ಗುರುವಿನಲ್ಲಿ ವಾಸ ಮಾಡುತ್ತಾನೆ' ಎಂದು ಗೌಣವಾಗಿ ಹೇಳುವುದುಂಟು. ಹಾಗೇ ಇದು.

ಅದ್ವೈತ ವಿಶಿಷ್ಟಾದ್ವೈತ ಭಾಷ್ಯರೀತಿಯಿಂದ ಇಲ್ಲಿ ಸೂತ್ರಪಾಠ-

'ಸಮಾನಾ ಚಾಸೃತ್ಯುಪಕ್ರಮಾದಮೃತತ್ವಂ ಚಾನುಪೋಷ್ಯ'

ಅಜ್ಞಾನಿಗೆ ಪುನರ್ಜನ್ಮವಿದೆ. ಪುನರ್ಜನ್ಮದಲ್ಲಿ ಶರೀರಗ್ರಹಣಕ್ಕೆ ಪಂಚಭೂತಗಳ ಆವಶ್ಯಕತೆ ಇದೆ. ಅದಕ್ಕಾಗಿ ಸೂಕ್ಷ್ಮ ಪಂಚಭೂತಗಳೊಂದಿಗೆ ಉತ್ಕ್ರಾಂತಿ ಮಾಡಬೇಕು. ಜ್ಞಾನಿಗೆ ಪುನರ್ಜನ್ಮವಿಲ್ಲ. ಅವನಿಗೆ 'ಅಮೃತತ್ವಮೇತಿ' ಎಂದು ಮೋಕ್ಷವನ್ನು ಶ್ರುತಿ ಹೇಳುತ್ತಿದೆ. ಆದರಿಂದ ಉತ್ಕ್ರಾಂತಿ ಇಲ್ಲ. ಎಂದು ಪೂರ್ವಪಕ್ಷ.

ಜ್ಞಾನಿ ಅಜ್ಞಾನಿಗಳಿಗಿಬ್ಬರಿಗೂ ಉತ್ಕ್ರಾಂತಿ ಇದೆ ಎನ್ನುವುದು ಸಮಾನವೆ. ಅಜ್ಞಾನಿ ಕರ್ಮಾಧೀನವಾಗಿ ಶರೀರಗ್ರಹಣ ಮಾಡುವುದಕ್ಕಾಗಿ ಉತ್ಕ್ರಾಂತಿ ಮಾಡಿ

ಪುನರ್ಜನ್ಮರೂಪವಾದ ಸಂಸಾರವನ್ನೇ ಹೊಂದುತ್ತಾನೆ. ಜ್ಞಾನಿ ಮೋಕ್ಷನಾಡಿ ಯಿಂದ ಉತ್ಕ್ರಾಂತಿ ಮಾಡಿ ಮೋಕ್ಷ ಹೊಂದುತ್ತಾನೆ. ಇಷ್ಟೇ ವ್ಯತ್ಯಾಸ ಎಂದು ಸಿದ್ಧಾಂತ.

ಆದರೆ ಇಲ್ಲಿ ಪೂರ್ವಪಕ್ಷ ಸರಿಯಲ್ಲ. ಏಕೆಂದರೆ ಜ್ಞಾನಿಗಳು ಅದ್ವೈತಮತ ದಲ್ಲಿ ಎರಡು ಬಗೆ. ಪರವಿದ್ಯಾಜ್ಞಾನಿಗಳು, ಅಪರವಿದ್ಯಾಜ್ಞಾನಿಗಳು ಎಂದು. ಇಲ್ಲಿ ಜ್ಞಾನಿ ಎಂದರೆ ಪರವಿದ್ಯಾಜ್ಞಾನಿ ವಿವಕ್ಷಿತನಾಗಿದ್ದರೆ ಅವನಿಗೆ ಉತ್ಕ್ರಾಂತಿ ಸಿದ್ಧಾಂತರೀತಿಯಿಂದಲೂ ಇಲ್ಲ. ಪರವಿದ್ಯಾಜ್ಞಾನಿ ಅದ್ವೈತಸಾಕ್ಷಾತ್ಕಾರದಿಂದ ಪ್ರಪಂಚ ಲಯ ಹೊಂದಿರುವುದರಿಂದ ಅವನಿಗೆ ಶರೀರವೂ ಇಲ್ಲ, ಉತ್ಕ್ರಾಂತಿಯೂ ಇಲ್ಲ. ಮತ್ತು ಉತ್ಕ್ರಾಂತಿ ಎಂದರೆ ಬೇರೆ ಪ್ರದೇಶಕ್ಕೆ ಹೋಗುವುದು. ಅದ್ವೈತಜ್ಞಾನಿಗೆ ಬೇರೆ ಪ್ರದೇಶವೆಂಬುದಿಲ್ಲ. ಹೀಗಾಗಿ ಉತ್ಕ್ರಾಂತಿ ಇಲ್ಲ ಎಂದು ಸಿದ್ಧಾಂತಿಯೇ ಹೇಳುತ್ತಿರುವಾಗ ಪೂರ್ವಪಕ್ಷಿ ಅದೇ ಮಾತನ್ನು ಹೇಳುವಂತಿಲ್ಲ. ಅಪರವಿದ್ಯಾಜ್ಞಾನಿಯನ್ನೇ ಇಲ್ಲಿ ಜ್ಞಾನಿ ಎಂದಿಟ್ಟುಕೊಳ್ಳುವು ದಾದರೆ ಸಿದ್ಧಾಂತದಲ್ಲಿ ಅವನಿಗೆ ಉತ್ಕ್ರಾಂತಿ ಇದೆ. ಇಲ್ಲವೆಂದು ಪೂರ್ವಪಕ್ಷಿ ಹೇಳಬಹುದು, ಆದರೆ ಅಪರವಿದ್ಯಾವಿಚಾರ ಮಾಡುವುದು ಇಲ್ಲಿ ಸಂಗತವಲ್ಲ. ಪರವಿದ್ಯಾಜ್ಞಾನಿಗೆ ಮಾತ್ರ ಮೋಕ್ಷವನ್ನು ವಿಚಾರ ಮಾಡುವುದು ಇಲ್ಲಿ ಸಂಗತ. ಹಾಗೇ ಭಾಮತೀ ಹೇಳುತ್ತಿದೆ-

ಪರವಿದ್ಯಯೈವಾಮೃತತ್ವಪ್ರಾಪ್ತಿರತ್ರೋಚ್ಯತೇ ।

ವಸ್ತುತಃ 'ಕೊಳ್ಳೆಗಿಂತ ಕೊಳ್ಳೆ ಹೊಡೆಯುವವರೇ ಹೆಚ್ಚು' ಎಂಬ ಗಾದೆಯಂತೆ ಉಪನಿಷತ್ತಿನಲ್ಲಿ ಅಪರವಿದ್ಯೆಯ ವಿಚಾರವೇ ಹೆಚ್ಚು. ಪರವಿದ್ಯೆಯಿಂದ ಮೋಕ್ಷವೆಂಬುದು ಸೂತ್ರದಲ್ಲಾಗಲಿ ಅದಕ್ಕೆ ಮೂಲಭೂತವಾದ ಶ್ರುತಿಯಲ್ಲಾಗಲಿ ಕಾಣುವುದಿಲ್ಲ. ದಹರವಿದ್ಯೆ ಮುಂತಾದ ಅಪರವಿದ್ಯೆಯ ಫಲವಾಗಿ ಬ್ರಹ್ಮಲೋಕಪ್ರಾಪ್ತಿಯನ್ನೂ ಬ್ರಹ್ಮಲೋಕದಲ್ಲಿ ಸಿಗುವ ಸುಖಭೋಗಗಳನ್ನೂ ಉಪನಿಷತ್ತು ವರ್ಣಿಸಿದೆ. ಬ್ರಹ್ಮಲೋಕಪ್ರಾಪ್ತಿಗೆ ಹಿಂದಿನ ಶರೀರದಿಂದ ಬೇರೆ ಪ್ರದೇಶಕ್ಕೆ ಹೋಗುವ ಉತ್ಕ್ರಾಂತಿ ಅವಶ್ಯ ಬೇಕು. ಆದರಿಂದ ಅಪರವಿದ್ಯಾಜ್ಞಾನಿಗೆ ಉತ್ಕ್ರಾಂತಿ ಇಲ್ಲ ಎಂದು ಪೂರ್ವಪಕ್ಷ ಮಾಡುವುದು ಯುಕ್ತವಾಗಲಾರದು.

ಇಲ್ಲಿ 'ಕಲ್ಪತರು' ಎಂಬ ಭಾಮತೀವ್ಯಾಖ್ಯಾನ ಹೀಗೆ ಹೇಳುತ್ತದೆ- 'ಈ ಅಧಿಕರಣದಲ್ಲಿ ದಹರವಿದ್ಯಾಜ್ಞಾನಿಗೆ ''ಅಮೃತತ್ವಮೇತಿ'' ಎಂದು ಮೋಕ್ಷ

ಉಕ್ತವಾಗಿದೆ. ಮೋಕ್ಷವೆಂಬುದು ಪರವಿದ್ಯೆಯ ಫಲ. ಪರವಿದ್ಯಾಜ್ಞಾನಿಗೆ ಉತ್ಕ್ರಾಂತಿ ಇಲ್ಲ. ಆದರಿಂದ ಪೂರ್ವಪಕ್ಷಿ ಭ್ರಮೆಯಲ್ಲಿ ಸಿಲುಕಿ ದಹರವಿದ್ಯಾ-ಜ್ಞಾನಿಗೇ ಉತ್ಕ್ರಾಂತಿ ಇಲ್ಲ ಎನ್ನುತ್ತಿದ್ದಾನೆ ಎಂದು.

ಇದು ಸರಿಯಲ್ಲ. ದಹರವಿದ್ಯೆಯ ಫಲವನ್ನು ಹೇಳುವ ಸಂದರ್ಭದಲ್ಲಿ ಪೂರ್ತಿವಾಕ್ಯ ಹೀಗಿದೆ-

'ತಯೋರ್ಧ್ವಮಾಯನ್ನಮೃತತ್ವಮೇತಿ'

'ಬ್ರಹ್ಮನಾಡಿಯಿಂದ ಮೇಲೆ ಉತ್ಕ್ರಾಂತಿ ಹೊಂದಿ ಮೋಕ್ಷವನ್ನು ಪಡೆಯುತ್ತಾನೆ' ಇಲ್ಲಿ 'ಉತ್ಕ್ರಾಂತಿಯ ಅನಂತರ ಮೋಕ್ಷ'ವೆಂದು ಸ್ಪಷ್ಟ ಹೇಳಿರುವಾಗ, ಉತ್ಕ್ರಾಂತಿ ಇಲ್ಲವೆಂದು ಭ್ರಮೆಗೊಳಗಾಗುತ್ತಾನೆ ಎನ್ನುವುದು ಹೇಗೆ ಕೂಡುತ್ತದೆ ? ಉತ್ಕ್ರಾಂತಿ ಇಲ್ಲವೆಂಬ ಭ್ರಮೆ ಹೇಗೆ ಬರುತ್ತದೆ ?

'ವಸ್ತುತಸ್ತು ನಾಸ್ತಿ ಪೂರ್ವಪಕ್ಷಃ'

'ವಸ್ತುತಃ ಪೂರ್ವಪಕ್ಷವಿಲ್ಲ'

ಎಂದು ಕಲ್ಪತರುವಿನಲ್ಲಿಯೇ ಹೇಳಿದೆ. ಇದು ಸ್ವವ್ಯಾಹತ. ಅಧಿಕರಣವಿಚಾರವೆಂದರೆ ಅದರಲ್ಲಿ ಪೂರ್ವಪಕ್ಷಸಿದ್ಧಾಂತ ಎರಡೂ ಇರಬೇಕು. ಪೂರ್ವಪಕ್ಷವಿಲ್ಲದೆ ಕೇವಲ ಸಿದ್ಧಾಂತವನ್ನು ಹೇಳಿದರೆ ಅದು 'ಉಪದೇಶ'ವಾಗುತ್ತದೆ. ವಿಚಾರವಲ್ಲ.

'ಅಪರವಿದ್ಯಾಜ್ಞಾನಿಗೂ ಉತ್ಕ್ರಾಂತಿ ಇಲ್ಲ. ಏಕೆಂದರೆ ಅಪರವಿದ್ಯಾಜ್ಞಾನಿಗೆ ಸಿಗಬೇಕಾಗಿರುವ ಸಗುಣಬ್ರಹ್ಮ ಸರ್ವವ್ಯಾಪಿ. ಆಕಾಶದಂತೆ ಎಲ್ಲೆಡೆ ಇದ್ದಾನೆ. ಅವನನ್ನು ಪಡೆಯಲು ಉತ್ಕ್ರಾಂತಿ ಬೇಕಾಗಿಲ್ಲ. ಆದರಿಂದ ಅದಿಲ್ಲ' ಎಂದು ಪೂರ್ವಪಕ್ಷವನ್ನು ಕಲ್ಪತರುವಿನಲ್ಲಿ ಹೇಳಿದೆ. ಆದರೆ ಅದಕ್ಕೆ ಭಾಷ್ಯದ ವಿರೋಧ ಬರುತ್ತದೆ. ಭಾಷ್ಯದಲ್ಲಿ ಬೇರೆ ಶರೀರಗ್ರಹಣಕ್ಕಾಗಿ ಶರೀರಕ್ಕೆ ಮೂಲಕಾರಣವಾದ ಸೂಕ್ಷ್ಮ ಪಂಚಭೂತಗಳನ್ನು ಹಿಡಿದುಕೊಂಡೇ ಅಪರವಿದ್ಯಾಜ್ಞಾನಿ ಉತ್ಕ್ರಾಂತಿ ಮಾಡುತ್ತಾನೆ- ಎಂದಿದೆ.

'ಶರೀರಾಂತರಪ್ರಾಪ್ತ್ಯರ್ಥಂ ದೇಹಬೀಜಭೂತಾನಿ
ಭೂತಸೂಕ್ಷ್ಮಾಣಿ ಗೃಹೀತ್ವೈವ ಉತ್ಕ್ರಮಣಂ ಕರೋತಿ ।'

ಸಿದ್ಧಾಂತವೂ ಸರಿಯಲ್ಲ. ಏಕೆಂದರೆ 'ಸಗುಣಬ್ರಹ್ಮಸರ್ವವ್ಯಾಪಿಯಾಗಿರುವುದರಿಂದ ಅವನ ಪ್ರಾಪ್ತಿಗಾಗಿ ಉತ್ಕ್ರಾಂತಿ ಮಾಡಬೇಕಾಗಿಲ್ಲ' ಎಂಬ ಪೂರ್ವಪಕ್ಷದ ಆಕ್ಷೇಪಕ್ಕೆ ಸಿದ್ಧಾಂತದಲ್ಲಿ ಉತ್ತರ ನೀಡಿಲ್ಲ.

ಭಾರತೀತೀರ್ಥರು ಹೇಳಿದ ರೀತಿಯಲ್ಲಿ 'ಸಗುಣಬ್ರಹ್ಮಜ್ಞಾನಿ ಬ್ರಹ್ಮಲೋಕ ರೂಪವಾದ ಮೋಕ್ಷವನ್ನು ಹೊಂದುತ್ತಾನೆ. ಅಜ್ಞಾನಿ ಸಂಸಾರದಲ್ಲೇ ಇರುತ್ತಾನೆ. ಈ ಎರಡು ಫಲಗಳಲ್ಲಿ ವ್ಯತ್ಯಾಸವಿರಬೇಕಾದರೆ ಅವುಗಳ ಸಾಧನವಾದ ಉತ್ಕ್ರಾಂತಿಗಳಲ್ಲಿಯೂ ವ್ಯತ್ಯಾಸವಿರಬೇಕು. ಆದರಿಂದ ಜ್ಞಾನಿ-ಅಜ್ಞಾನಿಗಳ ಉತ್ಕ್ರಾಂತಿಗಳು ಸಮಾನವಲ್ಲ' ಎಂದು ಪೂರ್ವಪಕ್ಷ. 'ಜ್ಞಾನಿಗೆ ಸುಷುಮ್ನಾನಾಡಿ ಪ್ರವೇಶಾನಂತರ ಮುಂದಿನ ಮಾರ್ಗ ಹಿಡಿಯುವಲ್ಲಿ, ಮತ್ತು ಅಜ್ಞಾನಿಗೆ ಬೇರೆ ನಾಡಿಗಳಲ್ಲಿ ಪ್ರವೇಶಾನಂತರ ಬೇರೆ ಮಾರ್ಗ ಹಿಡಿಯುವಲ್ಲಿ ವ್ಯತ್ಯಾಸ ಸಹಜ. ಅದಕ್ಕಿಂತ ಮೊದಲು ಜನ್ಮ ಸುಖ ದುಃಖಾದಿಗಳು ಇಬ್ಬರಿಗೂ ಹೇಗೆ ಸಮವೋ ಹಾಗೇ ಅವರ ಉತ್ಕ್ರಾಂತಿಗಳೂ ಸಮವೇ. ಮಾರ್ಗ ಹಿಡಿದ ಮೇಲೆ ಫಲವ್ಯತ್ಯಾಸದಿಂದ ವ್ಯತ್ಯಾಸವಿದ್ದೇ ಇದೆ.' ಎಂದು ಸಿದ್ಧಾಂತ.

ಇಲ್ಲಿ ಪೂರ್ವಪಕ್ಷ ಬಹಳ ದುರ್ಬಲ. ಮೋಕ್ಷ ಮತ್ತು ಸಂಸಾರಗಳೆಂಬ ಫಲಗಳಲ್ಲಿ ವ್ಯತ್ಯಾಸವಿರಬೇಕಾದರೆ ಅವುಗಳಿಗೆ ಸಾಧನವಾಗಿರುವ ಉತ್ಕ್ರಾಂತಿಗಳಲ್ಲಿ ವ್ಯತ್ಯಾಸವಿರಲೇಬೇಕೆನ್ನುವುದು ಸರಿಯಲ್ಲ. ಎರಡು ಫಲಗಳಲ್ಲಿ ವ್ಯತ್ಯಾಸವಿರಬೇಕಾದರೆ ಅವುಗಳ ಎಲ್ಲ ಸಾಧನಗಳಲ್ಲಿಯೂ ವ್ಯತ್ಯಾಸವಿರಬೇಕೆಂದಿಲ್ಲ. ಕೆಲವೇ ಸಾಧನಗಳ ವ್ಯತ್ಯಾಸದಿಂದಲೂ ಫಲವ್ಯತ್ಯಾಸವಾಗಬಹುದು.

ವಸ್ತುತಃ 'ಸಮಾನಾ' ಎಂಬ ಪಾಠವೇ ತಪ್ಪು. ಅದನ್ನು ಹಿಡಿದು ವ್ಯರ್ಥವಾಗಿ ವ್ಯಾಖ್ಯಾನ ಮಾಡಲು ಹೊರಟು ವಿಫಲರಾಗಿದ್ದಾರೆ. 'ಸಮನಾ' ಎಂದೇ ಪಾಠ.

ದೇಶತಃ ಕಾಲತಶ್ಚ ವ್ಯಾಪ್ತ್ಯಾ ಸಮೋ ನಾ ಪರಮಪುರುಷೋ ಯಸ್ಯಾಃ ಸಾ ಸಮನಾ ।

'ದೇಶಕಾಲವ್ಯಾಪ್ತಿಗಳ ವಿಷಯದಲ್ಲಿ ಲಕ್ಷ್ಮಿಗೆ ನಾರಾಯಣ ಸಮಾನನಾಗಿದ್ದಾನೆ' ಎಂಬ ಅರ್ಥದಲ್ಲಿ 'ಸಮ' ಮತ್ತು 'ನೃ' ಎಂಬ ಶಬ್ದಗಳಿಗೆ ಬಹುವ್ರೀಹಿಸಮಾಸ. ಇಲ್ಲಿ ಹೀಗೆ ಆಕ್ಷೇಪ ಬರಬಹುದು-

ನದೀಸಂಜ್ಞೆಯುಳ್ಳ ಶಬ್ದ ಅಥವಾ ಋಕಾರಾಂತಶಬ್ದ ಕೊನೆಯಲ್ಲಿ ಬಂದರೆ ಬಹುವ್ರೀಹಿಯ ಕೊನೆಯಲ್ಲಿ ಕಪ್‌ಪ್ರತ್ಯಯ ಬರುತ್ತದೆ ಎಂದು 'ನದ್ಯೃತಶ್ಚ' ಎಂಬ ಸೂತ್ರ (5.4.153) ಹೇಳುತ್ತದೆ. ಆದರಿಂದ 'ಸಮನೃಕಾ' ಎಂದು ರೂಪ ಸಾಧು. ಸಮನಾ ಎಂದಲ್ಲ. ಯದ್ಯಪಿ 'ಶೇಷಾದ್ ವಿಭಾಷಾ' (8.4.154) ಎಂಬ ಸೂತ್ರದ ಪ್ರಕಾರ ಸಮಾಸಾಂತಪ್ರತ್ಯಯವಿಧಾನವಿಲ್ಲದ ಬಹುವ್ರೀಹಿಗಳಲ್ಲಿ ಕಪ್‌ಪ್ರತ್ಯ ವಿಕಲ್ಪವಾಗಿ ಬರುತ್ತದೆ. ಆದರಿಂದಲೇ 'ಮಹಾಯಶಾಃ' 'ಮಹಾಯಶಸ್ಕಃ' ಎಂದು ಎರಡೂ ಶಬ್ದಗಳು ಸಾಧುವೆನಿಸಿವೆ. ಪ್ರಕೃತದಲ್ಲಿಯೂ 'ಸಮನೃಕಾ' ಎಂಬಂತೆ 'ಸಮನಾ' ಎಂಬ ಶಬ್ದವೂ ಸಾಧುವೆನಿಸಬಹುದು. ಆದರೆ 'ನದ್ಯೃತಶ್ಚ' ಎಂಬ ಸೂತ್ರದ ಪ್ರಕಾರ ಕಪ್‌ಪ್ರತ್ಯಯ ಬರುವುದರಿಂದ 'ಸಮಾಸಾಂತಪ್ರತ್ಯಯವಿಲ್ಲದ ಬಹುವ್ರೀಹಿ' ಎಂದು ಇದನ್ನು ಪರಿಗಣಿಸುವಂತಿಲ್ಲ.

ಇನ್ನೊಂದು ಆಕ್ಷೇಪ- 'ನದ್ಯೃತಶ್ಚ' ಎಂಬ 'ಕಪ್'ಪ್ರತ್ಯಯ 'ಋನ್ನೇಭ್ಯೋ ಙೀಪ್' ಎಂಬ ಙೀಪ್‌ಪ್ರತ್ಯಯಕ್ಕೆ ಅಪವಾದ. ಆದರೆ ಈ ಅಪವಾದಕ್ಕೂ ಅಪವಾದವಾಗಿ 'ಋತಶ್ಛಂದಸಿ' 'ಋಕಾರಾಂತಬಹುವ್ರೀಹಿಗೆ ವೈದಿಕ ಪ್ರಯೋಗದಲ್ಲಿ ಕಪ್‌ಪ್ರತ್ಯಯ ಬರುವುದಿಲ್ಲ' ಎಂದು ಸೂತ್ರ ಹೇಳಿದೆ. ಆದರಿಂದ ಙೀಪ್‌ಪ್ರತ್ಯಯಕ್ಕೆ ತೊಡಕಿಲ್ಲ. 'ಸಮನಾರೀ' ಎಂದು ರೂಪಸಿದ್ಧಿಯಾಗಬೇಕು.

ಈ ಆಕ್ಷೇಪಗಳಿಗೆ ಹೀಗೆ ಸಮಾಧಾನ- 'ಋನ್ನೇಭ್ಯೋ ಙೀಪ್' ಎಂದರೆ, ಬಹುವ್ರೀಹಿಯಲ್ಲಿ ಋಕಾರ-ನಕಾರಗಳು ಕೊನೆಗೆ ಬಂದರೆ ಸಾಲದು, ಸ್ತ್ರೀವಾಚಕವಾಗಿರುವ ಋಕಾರನಕಾರಾಂತಶಬ್ದಗಳು ಕೊನೆಯಲ್ಲಿ ಬರಬೇಕು. 'ಸಮಃ ನಾ ಯಸ್ಯ' ಎಂಬ ಬಹುವ್ರೀಹಿಯಲ್ಲಿ ಋಕಾರಾಂತವಾದ ನೃಶಬ್ದ ಸ್ತ್ರೀವಾಚಕವಲ್ಲ. ಆದರಿಂದ ಬಹುವ್ರೀಹಿಗೆ ಙೀಪ್ ಬರುವುದಿಲ್ಲ.

'ನದ್ಯೃತಶ್ಚ' ಎಂಬ ಸೂತ್ರದಿಂದ ಬರಬಹುದಾಗಿದ್ದ ಕಪ್‌ಪ್ರತ್ಯಯವನ್ನು 'ಋತಶ್ಛಂದಸಿ' ಎಂಬ ಸೂತ್ರ ಬಾಧಿಸಿದ್ದರಿಂದ ಸಮಾಸಾಂತಪ್ರತ್ಯಯವಿಲ್ಲದ 'ಸಮನೃ'ಶಬ್ದಕ್ಕೆ 'ಶೇಷಾದ್ ವಿಭಾಷಾ' ಎಂಬ ಸೂತ್ರದಿಂದ ವಿಕಲ್ಪವಾಗಿ ಕಪ್ ಬರಬಹುದು, ಬಾರದಿರಬಹುದು. ಹೀಗಾಗಿ ಙೀಪ್ ಇಲ್ಲದ, ಕಪ್ ಕೂಡ ಇಲ್ಲದ 'ಸಮನಾ'ಶಬ್ದ ಸಾಧುವೇ ಆಗಿದೆ.

'ಘೃತಸ್ಯ ಧಾರಾ ಅರುಷೋ ನ ವಾಜೀ ಕಾಷ್ಠಾ ಭಿಂದನ್ನೂರ್ಮಿಭಿಃ ಪಿನ್ವಮಾನಃ । ......'

ಇತ್ಯಾದಿ ವೈದಿಕ ಪ್ರಯೋಗಗಳಲ್ಲಿ 'ಸಮನಾ'ಶಬ್ದ ಕಂಡಿದ್ದರಿಂದ ಅದು ಸಾಧು.

'ಪ್ರಾಣಸ್ತೇಜಸಿ' ಎಂದು ಶ್ರುತಿಯಲ್ಲಿ ಶ್ರೀತತ್ತ್ವವಾಚಕವಾದ ತೇಜಃಶಬ್ದ ನಪುಂಸಕಲಿಂಗದಲ್ಲಿದ್ದರೂ ಈ ಶಬ್ದ ಇಲ್ಲಿ ಪಂಚಭೂತಗಳಲ್ಲಿ ಒಂದಾದ ಅಗ್ನಿಯನ್ನು ಹೇಳುತ್ತಿಲ್ಲ. ನಿತ್ಯಮುಕ್ತಳಾದ ಶ್ರೀದೇವಿಯನ್ನು ಹೇಳುತ್ತದೆ.

'ತೇಜಃ ಪರಸ್ಯಾಂ ದೇವತಾಯಾಮ್ ।'

'ತೇಜಃಶಬ್ದದಿಂದ ಉಕ್ತಳಾದ ಶ್ರೀದೇವಿ ಪರದೇವತೆಯಾದ ವಿಷ್ಣುವಿನಲ್ಲಿ ಲಯ ಹೊಂದುತ್ತಾಳೆ' ಎಂದು ಉಪನಿಷತ್ತು ಹೇಳುತ್ತದೆ. ಇದನ್ನು ಸೂಚಿಸುವುದಕ್ಕಾಗಿ ಇಲ್ಲಿ ಉಕ್ತವಾದ 'ತೇಜಸ್ಸ'ನ್ನು 'ಸಮನಾ' ಎಂದು ಸ್ತ್ರೀಲಿಂಗಶಬ್ದದಿಂದ ಸೂತ್ರವು ಹೇಳುತ್ತಿದೆ.

ಪರಭಾಷ್ಯಕಾರರು ಸೂತ್ರದಲ್ಲಿ ಅಪಪಾಠವಿಟ್ಟುಕೊಂಡು ಸರಿಯಾದ ಭಾಷ್ಯವನ್ನು ಬರೆಯುವಲ್ಲಿ ವಿಫಲರಾದುದಕ್ಕೆ ಇನ್ನೊಂದು ಉದಾಹರಣೆ-

'ವಾಯುಶಬ್ದಾದವಿಶೇಷವಿಶೇಷಾಭ್ಯಾಂ' (ಬ್ರ.ಸೂ. 4.3.2)

ಈ ಅಧಿಕರಣದ ವಿಚಾರ ದ್ವೈತಭಾಷ್ಯಪ್ರಕಾರ ಹೀಗಿದೆ-

ಚರಮಶರೀರದಿಂದ ಉತ್ಕ್ರಾಂತಿ ಹೊಂದಿದ ಜ್ಞಾನಿ ಮೊದಲಿಗೆ ವಾಯು ಲೋಕವನ್ನು ಹೊಂದುತ್ತಾನೆ ಎಂದು.

'ಯದಾ ವೈ ಪುರುಷೋऽಸ್ಮಾಲ್ಲೋಕಾತ್ ಪ್ರೈತಿ ಸ ವಾಯುಮಾಗಚ್ಛತಿ ।'

ಎಂಬ ಶ್ರುತಿ ಹೇಳುತ್ತದೆ. 'ಮೊದಲಿಗೆ ವಾಯುಲೋಕವನ್ನು' ಎಂದು ಸ್ಪಷ್ಟ ಹೇಳಿಲ್ಲವಾದರೂ ಅಭಿಪ್ರಾಯ ಹಾಗೇ ಕಾಣುತ್ತದೆ. ಏಕೆಂದರೆ,

'ಅಥ ಯದು ಚೈವಾಸ್ಮಿನ್ ಶವ್ಯಂ ಕುರ್ವಂತಿ ಯದು ಚ ನ ಅರ್ಚಿಷ-ಮೇವಾಭಿಸಂಭವಂತಿ ।'

ಎಂಬ ಶ್ರುತಿಯಲ್ಲಿ 'ಅರ್ಚಿರ್ಲೋಕವನ್ನು ಮೊದಲಿಗೆ ಹೊಂದುತ್ತಾನೆ' ಎಂದು ಸ್ಪಷ್ಟ ಹೇಳಿಲ್ಲವಾದರೂ ಹಾಗೇ ಅಭಿಪ್ರಾಯ ಸ್ವೀಕೃತವಾಗಿದೆ. ಈ ಎರಡು

ಶ್ರುತಿವಾಕ್ಯಗಳಲ್ಲಿ ವಿಶೇಷವಿಲ್ಲ. ಆದರೆ ಶ್ರುತಿಸ್ಮೃತಿಗಳಲ್ಲಿ ಅರ್ಚಿರ್ಲೋಕವೇ ಮೊದಲಿಗೆ ಸಿಗುತ್ತದೆ ಎಂದಿದೆ. ಈ ಮಾರ್ಗ ಅರ್ಚಿರಾದಿ ಮಾರ್ಗವೆಂದೇ ಪ್ರಸಿದ್ಧವಾಗಿದೆ. ಆದರಿಂದ ವಾಯುವಿಗೆ ಮೊದಲನೆ ಸ್ಥಾನವನ್ನು ಬಿಡಬೇಕಾಗಿ ಬಂದರೂ ಎರಡನೆ ಸ್ಥಾನವನ್ನು ಹೇಳಲು ಬಾಧಕವಿಲ್ಲ. ಈಗ ಇನ್ನೊಂದು ಶ್ರುತಿ 'ಅರ್ಚಿಷೋಽಹಃ' ಎಂದು ಅಹರ್ಲೋಕಕ್ಕೆ ಎರಡನೇ ಸ್ಥಾನವನ್ನು ನೀಡಿದೆ. ಆದರಿಂದ ವಾಯುವಿನ ಸ್ಥಾನ ಏನೆಂಬ ಪ್ರಶ್ನೆ ಬರುತ್ತದೆ. ಅದಕ್ಕೆ ಪೂರ್ವಪಕ್ಷಿ ಹೇಳುತ್ತಾನೆ, ವಾಯಲೋಕದ ಸ್ಥಾನ ಎರಡನೆಯದು, ಅಹರ್ಲೋಕಸ್ಥಾನವೂ ಎರಡನೆಯದೆನ್ನೋಣ. ವಿರೋಧವಿಲ್ಲ, ಜ್ಞಾನಿಗಳಲ್ಲಿ ಕೆಲವರು ಅರ್ಚಿರ್ಲೋಕ ದಿಂದ ವಾಯುಲೋಕಮಾರ್ಗವಾಗಿ ಮುಂದೆ ಹೋಗಲಿ, ಇನ್ನು ಕೆಲವರು ಅಹರ್ಲೋಕಮಾರ್ಗವಾಗಿ ಮುಂದೆ ಹೋಗಲಿ. 'ವಾಯುಲೋಕವನ್ನೇ ಎಲ್ಲ ಜ್ಞಾನಿಗಳೂ ಪ್ರವೇಶಿಸಿ ಮೂರನೆಯದಾಗಿ ಅಹರ್ಲೋಕಕ್ಕೆ ಏಕೆ ಹೋಗ ಬಾರದು? ಎಂದರೆ ಅದು ಸರಿಯಲ್ಲ, ಅರ್ಚಿರ್ಲೋಕ ಪ್ರಥಮವೆಂದು ಪ್ರಸಿದ್ಧಿ ಇರುವಂತೆ 'ವಾಯುಲೋಕ ಎರಡನೆಯದು, ಅಹರ್ಲೋಕ ಮೂರನೆಯದು' ಎಂಬ ಪ್ರಸಿದ್ಧಿ ಏನಿಲ್ಲದಿರುವಾಗ ವಾಯುಲೋಕವೆ ಎರಡನೆಯದು ಅಹರ್ಲೋಕವೆ ಮೂರನೆಯದು ಎನ್ನಲು ಸ್ಪಷ್ಟವಾದ ಕಾರಣ ಏನೂ ಸಿಗುವುದಿಲ್ಲ. ಹೀಗಾಗಿ ಎರಡೂ ಲೋಕಗಳು ಎರಡನೆಯವೆಂದು ಒಪ್ಪಿ ವಿರೋಧವನ್ನು ಬೇರೆ ಬೇರೆ ಜ್ಞಾನಿಗಳ ಮಾರ್ಗವೆಂದು ಪರಿಹಾರ ಮಾಡಬಹುದು ತಾನೆ? ಪೂರ್ವಪಕ್ಷಿ ಏಕೆ ಹೀಗೆ ಹೇಳುತ್ತಿದ್ದಾನೆ ಎಂದರೆ ಕೆಲವರು ಜ್ಞಾನಿಗಳು ವಾಯುಮಾರ್ಗದಿಂದ, ಇನ್ನು ಕೆಲವರು ಅಹರ್ಮಾರ್ಗದಿಂದ ಹೋಗಬೇಕೆನ್ನುವಾಗ ಯಾರು ಕೆಲವರು ಎಂದು ನಿರ್ಣಯವಿಲ್ಲವಾಗುವುದರಿಂದ ಜ್ಞಾನಿಗಳು ತಾವು ಹೋಗಬೇಕಾಗಿರುವ ಮಾರ್ಗವಿದು ಎಂದು ಮನಸ್ಸಿನಲ್ಲಿ ನಿರ್ಧರಿಸಲು ಶಕ್ತರಾಗಲಾರರು. ಉತ್ಕ್ರಮಣ ಕಾಲದಲ್ಲಿ ಮಾರ್ಗನಿರ್ಧಾರವಿಲ್ಲದಿದ್ದರೆ ಮಾರ್ಗ ದೊರೆಯಲಾರದು ಎಂದು ಆಕ್ಷೇಪಿಸುವ ಅಭಿಪ್ರಾಯ ಪೂರ್ವಪಕ್ಷಿಗೆ ಇದೆ.

ಸಿದ್ಧಾಂತಿ ಹೇಳುತ್ತಾನೆ- ಹಿಂದೆ ಹೇಳಿದಂತೆ 'ಸ ವಾಯುಮಾಗಚ್ಛತಿ' ಎಂಬ ಶ್ರುತಿಯ ಅಭಿಪ್ರಾಯದಲ್ಲಿ ವಾಯುವಿಗೆ ಎರಡನೆ ಸ್ಥಾನ ಯುಕ್ತಿಯುಕ್ತವೇ ಆಗಿದೆ. ಆದರೆ ಅಹರ್ಲೋಕಕ್ಕೆ ಎರಡನೇ ಸ್ಥಾನ ಸರಿಯಲ್ಲ.

'ಸ ಇತೋ ಗತೋ ದ್ವಿತೀಯಾಂ ಗತಿಂ ವಾಯುಮಾಗಚ್ಛತಿ'

ಎಂಬ ಶ್ರುತಿವಾಕ್ಯ ಸ್ಪಷ್ಟವಾಗಿಯೇ ವಾಯುವಿಗೆ ಎರಡನೇ ಸ್ಥಾನ ಕೊಟ್ಟಿದೆ. ಆದರಿಂದ 'ಅರ್ಚಿಷೋಽಹಃ' 'ಅರ್ಚಿರ್ಲೋಕದ ಅನಂತರ ಅಹರ್ಲೋಕ' ಎನ್ನುವ ಶ್ರುತಿಗೆ ಅರ್ಚಿರ್ಲೋಕದ ಅನಂತರ ವಾಯುಲೋಕವಾದ ಬಳಿಕ ಅಹರ್ಲೋಕ. ಹೀಗೆ ಅಹರ್ಲೋಕಕ್ಕೆ ಮೂರನೇ ಸ್ಥಾನ ಎಂದು ಅಭಿಪ್ರಾಯವನ್ನು ಹೇಳಿದರೆ ಬಾಧಕವಿಲ್ಲ. 'ಸ ವಾಯುಮಾಗಚ್ಛತಿ' ಎಂಬ ಸಾಮಾನ್ಯವಚನಕ್ಕೆ 'ದ್ವಿತೀಯಾಂ ಗತಿಂ ವಾಯುಮ್' ಎಂಬ ವಿಶೇಷವಚನಾನುಸಾರ ಅರ್ಥ ಹೇಳಬೇಕು ತಾನೆ ?

ಈಗ ಅರ್ಚಿರಾದಿ ದೇವಯಾನದಲ್ಲಿ ವಾಯಮಾರ್ಗ ಅಹರ್ಮಾರ್ಗವೆಂದು ಭೇದವಿಲ್ಲದಿರುವುದರಿಂದ ಜ್ಞಾನಿಗಳು ತಮ್ಮ ಅರ್ಚಿರಾದಿಮಾರ್ಗವನ್ನು ನಿಸ್ಸಂದಿಗ್ಧವಾಗಿ ಅನುಸಂಧಾನ ಮಾಡಿಕೊಂಡು ಉತ್ಕ್ರಮಣ ಮಾಡಬಹುದು.

ಇಲ್ಲಿ ಅದ್ವೈತಭಾಷ್ಯಪ್ರಕಾರ ಸೂತ್ರಪಾಠ-

'ವಾಯುಮಬ್ದಾದವಿಶೇಷವಿಶೇಷಾಭ್ಯಾಮ್'

ಈ ಅಧಿಕರಣದಲ್ಲಿ ವಾಯುವಿಗೆ ಎರಡನೆ ಸ್ಥಾನವನ್ನು ಪೂರ್ವಪಕ್ಷವಾಗಿಟ್ಟು ಕೊಂಡು ಸಿದ್ಧಾಂತದಲ್ಲಿ ಏಳನೆ ಸ್ಥಾನವನ್ನು ಅದ್ವೈತಭಾಷ್ಯ ನೀಡಿದೆ.

'ಸ ಏತಂ ದೇವಯಾನಂ ಪಂಥಾನಮಾಪದ್ಯ
ಅಗ್ನಿಲೋಕಮಾಗಚ್ಛತಿ ಸ ವಾಯುಲೋಕಂ'

'ಜ್ಞಾನಿಯು ಉತ್ಕ್ರಮಣಾನಂತರ ಅಗ್ನಿಲೋಕಕ್ಕೆ ಹೋಗಿ ವಾಯುಲೋಕವನ್ನು ಹೊಂದುತ್ತಾನೆ' ಎಂದು ಕೌಷೀತಕಿಶ್ರುತಿ ಹೇಳುವುದರಿಂದ ವಾಯುವಿಗೆ ಎರಡನೆ ಸ್ಥಾನ ಎಂದು ಪೂರ್ವಪಕ್ಷ.

ಇಲ್ಲಿ ಒಂದು ಪ್ರಶ್ನೆ ಬರಬಹುದು-

'ಯದಾ ವೈ ಪುರುಷೋಽಸ್ಮಾಲ್ಲೋಕಾತ್ ಪ್ರೈತಿ
ಸ ವಾಯುಮಾಗಚ್ಛತಿ ತಸ್ಮೈ ಸ ತತ್ರ ವಿಜಿಹೀತೇ
ಯಥಾ ರಥಚಕ್ರಸ್ಯ ಖಂ ತೇನ ಸ ಊರ್ಧ್ವಮಾಕ್ರಮತೇ
ಸ ಆದಿತ್ಯಮಾಗಚ್ಛತಿ ।' (ಬೃ. 7.10.1)

ಉತ್ಕ್ರಾಂತಿ ಹೊಂದಿದ ಜ್ಞಾನಿ ವಾಯುಲೋಕಕ್ಕೆ ಹೋದಾಗ ಅವನಿಗೆ ವಾಯು ಮುಂದಿನ ಆದಿತ್ಯಲೋಕಕ್ಕೆ ಹೋಗಲು ಮಾರ್ಗ ನೀಡುತ್ತಾನೆ. ಜ್ಞಾನಿ ಅಲ್ಲಿಂದ ಮೇಲೇರುತ್ತಾನೆ' ಎಂದು ಬೃಹದಾರಣ್ಯಕ ಹೇಳುವುದರಿಂದ ಅರ್ಚಿರಾದಿಮಾರ್ಗದಲ್ಲಿ 'ಅರ್ಚಿ-ಅಹ-ಶುಕ್ಲಪಕ್ಷ-ಮಾಸ-ಸಂವತ್ಸರ-ದೇವಲೋಕ-ವಾಯು-ಆದಿತ್ಯ' ಎಂಬ ಕ್ರಮದಲ್ಲಿ ಏಳನೆಯದಾಗಿ ಸಂವತ್ಸರ ಆದಿತ್ಯರ ನಡುವೆ ವಾಯುಲೋಕ ಬರಬೇಕು ತಾನೆ ?

ಈ ಪ್ರಶ್ನೆಗೆ ಪೂರ್ವಪಕ್ಷಿ ಉತ್ತರ ನೀಡುತ್ತಾನೆ-

'ತೇನ ಸ ಊರ್ಧ್ವಮಾಕ್ರಮತೇ'

'ವಾಯು ಜ್ಞಾನಿಗೆ ಮೇಲೆ ಹೋಗಲು ದಾರಿ ಕೊಡುತ್ತಾನೆ' ಎಂದಿಷ್ಟೇ ಹೇಳಿದೆ. 'ಅದು ಆದಿತ್ಯಲೋಕಕ್ಕೆ ಮಾರ್ಗ'ವೆಂದು ಹೇಳಿಲ್ಲ. ಯಾವ ಕ್ರಮದಿಂದ ಮೇಲೆ ಹೋಗುತ್ತಾನೆ ಎಂಬುದನ್ನು 'ಅಗ್ನಿಲೋಕಮಾಗಚ್ಛತಿ ಸ ವಾಯುಲೋಕಮ್' ಎಂಬ ಕೌಷೀತಕಿಶ್ರುತಿಯ ಪಾಠಕ್ರಮವೇ ತಿಳಿಸುತ್ತದೆ. ಆದರಿಂದ ವಾಯುವಿಗೆ ಎರಡನೆ ಸ್ಥಾನವೇ ಯುಕ್ತ ಎಂದು ಪೂರ್ವಪಕ್ಷ.

ಸಿದ್ಧಾಂತ- 'ಊರ್ಧ್ವಮಾಕ್ರಮತೇ' ಮೇಲೆ ಹೋಗುತ್ತಾನೆ ಎಂದರೆ ಎಲ್ಲಿಗೆ? ಆದಿತ್ಯಲೋಕಕ್ಕೆ. ಹೀಗಾಗಿ ವಾಯು ನೀಡುವ ಮಾರ್ಗದಿಂದ ಆದಿತ್ಯಲೋಕಕ್ಕೆ ಹೋಗುತ್ತಾನೆ ಎನ್ನುವಾಗ, 'ಸಂವತ್ಸರದ ಅನಂತರ ದೇವಲೋಕಮಾರ್ಗವಾಗಿ ಏಳನೆಯದಾದ ವಾಯುಲೋಕವನ್ನು ಹೊಂದಿ ಆದಿತ್ಯಲೋಕಕ್ಕೆ ಹೋಗುತ್ತಾನೆ' ಎನ್ನುವ ಅಭಿಪ್ರಾಯ ಸಿಗುತ್ತದೆ.

ಸೂತ್ರದಲ್ಲಿ 'ವಾಯುಮಬ್ದಾತ್' 'ಸಂವತ್ಸರದ ಅನಂತರ ವಾಯುಲೋಕವನ್ನು ಹೊಂದುತ್ತಾನೆ' ಎಂದಿದೆ. ಇದು ಬೃಹದಾರಣ್ಯಕದಲ್ಲಿ ಬರುವ ಈ ಸೂತ್ರದ ವಿಷಯವಾಕ್ಯಕ್ಕೆ ಅನುಸಾರಿಯಾಗುವುದಿಲ್ಲ. ಆ ವಾಕ್ಯದಲ್ಲಿ

'ಮಾಸೇಭ್ಯೋ ದೇವಲೋಕಂ ದೇವಲೋಕಾದಾದಿತ್ಯಂ'

'ಮಾಸಗಳಿಂದ ದೇವಲೋಕಕ್ಕೂ ದೇವಲೋಕದಿಂದ ಆದಿತ್ಯಲೋಕಕ್ಕೂ ಜ್ಞಾನಿ ಹೋಗುತ್ತಾನೆ' ಎಂದಿದೆ. ಆದರೆ ಛಾಂದೋಗ್ಯದಲ್ಲಿ

'ಮಾಸೇಭ್ಯಃ ಸಂವತ್ಸರಂ ಸಂವತ್ಸರಾದಾದಿತ್ಯಂ'

'ಮಾಸಗಳಿಂದ ಸಂವತ್ಸರಲೋಕಕ್ಕೂ ಸಂವತ್ಸರಲೋಕದಿಂದ ಆದಿತ್ಯಲೋಕಕ್ಕೂ ಹೋಗುತ್ತಾನೆ' ಎಂದಿದೆ. ಈ ಅಭಿಪ್ರಾಯದಿಂದಲೆ ಸೂತ್ರದಲ್ಲಿ 'ಸಂವತ್ಸರದಿಂದ ವಾಯುವನ್ನು **ಹೊಂ**ದುತ್ತಾನೆ' ಎಂದು ಹೇಳಲಾಗಿದೆ. ಕೌಷೀತಕಿ ಹೇಳುವಂತೆ ಪಾಠಕ್ರಮದಿಂದ ಮಾರ್ಗವನ್ನು ನಿಶ್ಚಯಿಸಲಾಗದು. ಏಕೆಂದರೆ ಆ ಕ್ರಮ ಶ್ರುತಿಗೆ ವಿರುದ್ಧವಾಗುವುದು. ಬೃಹದಾರಣ್ಯಕದಲ್ಲಿ ಸಂವತ್ಸರವಿಲ್ಲ, ಛಾಂದೋಗ್ಯದಲ್ಲಿ ದೇವಲೋಕವಿಲ್ಲ. ಎರಡರಲ್ಲೂ ಎರಡನ್ನೂ ಇಟ್ಟುಕೊಂಡು ಮಾರ್ಗವನ್ನು ನಿರ್ಧರಿಸಬೇಕು. ಸೂತ್ರ ಛಾಂದೋಗ್ಯದ ಅಭಿಪ್ರಾಯವನ್ನು ಮಾತ್ರ ಹೇಳಿದೆ ಎಂದು.

ಅದ್ವೈತದ ಈ ಅಧಿಕರಣವಿಚಾರ ಸಮರ್ಪಕವಾಗಿಲ್ಲ.

ಈ ಅಧಿಕರಣದಲ್ಲಿ ಅರ್ಚಿರಾದಿಮಾರ್ಗದಲ್ಲಿ ಮೊದಲಿಗೇ ಬರುವ ಅರ್ಚಿ ಅಗ್ನಿಲೋಕಗಳಲ್ಲಿ ಯಾವುದು ಪ್ರಥಮ ಎಂಬ ವಿಚಾರ ಮಾಡಬೇಕಾಗಿತ್ತು. 'ತೇಽರ್ಚಿಷಮಭಿಸಂಭವಂತಿ' ಎಂದು ಛಾಂದೋಗ್ಯದಲ್ಲಿ ಅರ್ಚಿ ಪ್ರಥಮವೆನಿಸಿದೆ.

'ಸ ಏತಂ ದೇವಯಾನಂ ಪಂಥಾನಮಾಪದ್ಯ ಅಗ್ನಿಲೋಕಮಾಗಚ್ಛತಿ'

ಎಂಬ ಕೌಷೀತಕಿವಾಕ್ಯದಲ್ಲಿ ಅಗ್ನಿ ಪ್ರಥಮವೆನಿಸಿದೆ. ಅರ್ಚಿ ಅಗ್ನಿಶಬ್ದಗಳು ಪರ್ಯಾಯವಾದ್ದರಿಂದ ವಿರೋಧವಿಲ್ಲ ಎನ್ನುವಂತಿಲ್ಲ. ಭಗವದ್ಗೀತೆಯಲ್ಲಿ,

'ಅಗ್ನಿರ್ಜ್ಯೋತಿರಹಃ ಶುಕ್ಲಃ ಷಣ್ಮಾಸಾ ಉತ್ತರಾಯಣಮ್' (ಭ.ಗೀ. 8.24)

ಎಂಬಲ್ಲಿ 'ಅಗ್ನಿ' 'ಜ್ಯೋತಿ' ಎಂಬ ಪರ್ಯಾಯಪದಗಳಿಂದ ಬೇರೆ ಬೇರೆ ಲೋಕಗಳನ್ನು ಹೇಳಿದೆ. ಇಲ್ಲಿಯೂ ಬೇರೆ ಬೇರೆ ಲೋಕಗಳೆಂದಿಟ್ಟುಕೊಂಡು ಅರ್ಚಿಲೋಕ ಪ್ರಥಮವೇ ? ಅಗ್ನಿಲೋಕ ಪ್ರಥಮವೇ ? ಎಂದು ವಿಚಾರ ಮಾಡಬಹುದಿತ್ತು. ಆದನ್ನು ಬಿಟ್ಟು ಅರ್ಚಿರಾದಿಮಾರ್ಗದಲ್ಲಿ ದೂರದ ಸಂವತ್ಸರ ಆದಿತ್ಯಲೋಕಗಳ ಮಧ್ಯೆ ವಾಯುಸ್ಥಾನವನ್ನು ವಿಚಾರಿಸುವುದು ಅಸಂಗತ.

'ಯದಾ ವೈ ಪುರುಷೋಽಸ್ಮಾಲ್ಲೋಕಾತ್ ಪ್ರೈತಿ ಸ ವಾಯುಮಾಗಚ್ಛತಿ'

ಎಂಬ ಬೃಹದಾರಣ್ಯಕವಾಕ್ಯ ಹೇಳುವಂತೆ ವಾಯುವಿಗೆ ಪ್ರಥಮಸ್ಥಾನವೆಂದು ಇಟ್ಟುಕೊಂಡರೆ,

'ಅಗ್ನಿಲೋಕಮಾಗಚ್ಛತಿ ಸ ವಾಯುಲೋಕಂ'

ಎಂಬ ಕೌಷೀತಕಿಯಲ್ಲಿ ವಾಯುವಿಗೆ ದ್ವಿತೀಯಸ್ಥಾನವನ್ನು ಹೇಳಿದ್ದರಿಂದ ವಿರೋಧವೆಂದು ಪ್ರಥಮಸ್ಥಾನವನ್ನು ಬಿಡೋಣ. ಅನಂತರದ ದ್ವಿತೀಯ ಸ್ಥಾನವನ್ನು ಏಕೆ ಬಿಡಬೇಕು ? ಆದರಿಂದ ಕೌಷೀತಕಿಯ ಪಾಠಕ್ರಮದಿಂದ ವಾಯುವಿಗೆ ದ್ವಿತೀಯಸ್ಥಾನ ನಿಶ್ಚಯವಾಗಿರುವಾಗ ಸಂಶಯವೇ ಇಲ್ಲ. ವಿಚಾರಪ್ರವೃತ್ತಿ ಹೇಗೆ ?

ವಾಯುವಿಗೆ ದ್ವಿತೀಯಸ್ಥಾನ ನಿಶ್ಚಯವಾಗುತ್ತಿರುವಾಗ ಸಿದ್ಧಾಂತದಲ್ಲಿ ಏಳನೇ ಸ್ಥಾನ ಕೊಟ್ಟಿದ್ದೂ ಹೇಗೆ ?

'ಆದಿತ್ಯಲೋಕಕ್ಕೆ ಹೋಗಲು ವಾಯು ಮಾರ್ಗ ನೀಡುತ್ತಾನೆ' ಎಂದು ಶ್ರುತಿ ಹೇಳುವುದರಿಂದ ವಾಯು ಏಳನೆಯದು. ಆದಿತ್ಯ ಎಂಟನೆಯದು ಎಂದು ಹೇಳಿದರಾಯಿತು. ಆದರಿಂದ ವಾಯುವಿನ ಸ್ಥಾನ ಏಳನೆಯದೇ ಹೊರತು ಎರಡನೆಯದಲ್ಲ'-

ಹೀಗೆ ಹೇಳುವುದು ಸರಿಯಲ್ಲ. ಎಂಟನೆಯದಾದ ಆದಿತ್ಯಲೋಕಕ್ಕೆ ಮಾರ್ಗ ನೀಡುವುದು ಏಳನೆಯ ಲೋಕವೇ ಆಗಿರಬೇಕೆಂದಿಲ್ಲ. ಎರಡನೆ ಲೋಕದ ವಾಯುದೇವ ಜ್ಞಾನಿಗೆ ಮುಂದೆ ಆದಿತ್ಯಲೋಕಪರ್ಯಂತವೂ ಮಾರ್ಗದರ್ಶನ ಮಾಡಬಹುದು. ಜ್ಞಾನಿಗಳಲ್ಲಿ, ಅವರ ಅಂತರ್ಗತನಾದ ಭಗವಂತನಲ್ಲಿ ಆದರದಿಂದ ವಾಯು ಹಾಗೆ ಮಾಡಬಹುದು.

ಬೃಹದಾರಣ್ಯಕದಲ್ಲಿ ಮಾಸಾನಂತರ ದೇವಲೋಕ. ಛಾಂದೋಗ್ಯದಲ್ಲಿ ಮಾಸಾನಂತರ ಸಂವತ್ಸರ. ಇದು ವಿರುದ್ಧವಾದ್ದರಿಂದ ಮಾಸಾನಂತರ ದೇವಲೋಕವೆ ? ಅಥವಾ ಸಂವತ್ಸರವೆ ? ಎಂದು ಮೊದಲಿಗೆ ವಿಚಾರಿಸಬೇಕಾಗಿತ್ತು. ಅನಂತರವೆ, 'ವಾಯು ಸಂವತ್ಸರಾನಂತರವೆ ? ಅಥವಾ ದೇವಲೋಕಾನಂತರವೆ ?' ಎಂಬ ವಿಚಾರಕ್ಕೆ ಪ್ರಸಕ್ತಿ.

ಸಂವತ್ಸರ ದೇವಲೋಕಗಳೆರಡನ್ನೂ ಎರಡೂ ಉಪನಿಷತ್ತುಗಳಲ್ಲಿ ಇಟ್ಟುಕೊಳ್ಳಬೇಕೆಂದು ಭಾಷ್ಯ ಹೇಳಿದೆ. ಅದು ಹೇಗೆ ? ಎಂದರೆ ಅದಕ್ಕೆ ವಿವರಣೆ-ಮಾಸದ ಸಂಬಂಧವಿರುವುದರಿಂದ ಸಂವತ್ಸರ ಮೊದಲಿಗೆ ಬರಬೇಕು. ಅನಂತರ

ದೇವಲೋಕ. ಆದಿತ್ಯ ವಾಯುವಿನ ಅನಂತರ ಬರಬೇಕಾಗಿರುವುದರಿಂದ 'ಸಂವತ್ಸರದಿಂದ ಆದಿತ್ಯಲೋಕಕ್ಕೆ ಜ್ಞಾನಿ ಹೋಗುತ್ತಾನೆ' ಎಂಬ ಛಾಂದೋಗ್ಯವಾಕ್ಯದಲ್ಲಿ ನಡುವೆ ಬೃಹದಾರಣ್ಯಕದ ದೇವಲೋಕವನ್ನು ಸೇರಿಸಿ 'ಸಂವತ್ಸರಲೋಕದಿಂದ ದೇವಲೋಕಕ್ಕೆ, ದೇವಲೋಕದಿಂದ ವಾಯುಲೋಕಕ್ಕೆ, ವಾಯುಲೋಕದಿಂದ ಆದಿತ್ಯಲೋಕಕ್ಕೆ ಗಮನ' ಎಂದು ಓದಬೇಕು.

ಹೀಗೆ ಭಾಷ್ಯ-ಭಾಮತಿಗಳಲ್ಲಿ ವಿವರಣೆಯಿದೆ. ಆದರೆ ಸೂತ್ರದಲ್ಲಿ ಕೇವಲ 'ಸಂವತ್ಸರಲೋಕದಿಂದ ವಾಯುಲೋಕಕ್ಕೆ' ಎಂದಿಷ್ಟೇ ಹೇಳಿದೆ. ಆದರಿಂದ ಮೇಲೆ ಹೇಳಿದ ವಿವರಣೆ ಭಾಷ್ಯಕಾರರ ಸ್ವಂತ ಅಭಿಪ್ರಾಯ, ಹೊರತು ಸೂತ್ರಕಾರರ ಅಭಿಪ್ರಾಯವಲ್ಲ. ಇದು ಒಂದು ರೀತಿಯಿಂದ ಸೂತ್ರದ ಖಂಡನೆಯೇ ಆಗುತ್ತದೆ. ಭಾಷ್ಯ ಸೂತ್ರದ ಅರ್ಥವನ್ನು ಹೇಳಬೇಕು ಹೊರತು ಸೂತ್ರವನ್ನೇ ಖಂಡಿಸುವುದು ಭಾಷ್ಯದ ಕೆಲಸವಲ್ಲ.

ಸೂತ್ರದ ಅನುಸಾರವಾಗಿಯೇ ಛಾಂದೋಗ್ಯ ಬೃಹದಾರಣ್ಯಕಗಳನ್ನು ಹೊಂದಿಸಬಹುದಾಗಿತ್ತು. 'ದೇವಲೋಕ' ಎಂದರೆ 'ವಾಯುದೇವನ ಲೋಕ'ವೆಂದಿಟ್ಟುಕೊಂಡರೆ ಸಂವತ್ಸರದಿಂದ ವಾಯುಲೋಕಕ್ಕೆ, ವಾಯುವಿನಿಂದ ಆದಿತ್ಯಲೋಕಕ್ಕೆ ಎಂಬ ಕ್ರಮ ಎರಡೂ ಉಪನಿಷತ್ತುಗಳಿಗೆ ಸಮ್ಮತವಾಗುತ್ತಿತ್ತು. ಸೂತ್ರ 'ಸಂವತ್ಸರದಿಂದ ವಾಯು' ಎಂದು ಹೇಳುವುದೂ ಕೂಡುತ್ತಿತ್ತು.

ಭಾಷ್ಯದಲ್ಲಿ ನೀಡಿರುವ ವಿವರಣೆ ಸೂತ್ರದಲ್ಲಿ ಸೂಚಿತವಾಗಿಲ್ಲ ಎಂದು ಭಾಮತಿಯಲ್ಲಿ ಉಕ್ತವಾಗಿದೆ-

'ದೇವಲೋಕಾದ್ ವಾಯುಮಿತಿ ಪಠಿತವ್ಯಮ್ ।
ವಾಯುಮಬ್ದಾದಿತಿ ತು ಸೂತ್ರಮತ್ರಾವಾಚಕಮೇವ ।'

"ದೇವಲೋಕದಿಂದ ವಾಯುಲೋಕಕ್ಕೆ ಗಮನವೆಂದು ನಿರ್ಣಯ. ಅದನ್ನು ಛಾಂದೋಗ್ಯದಲ್ಲಿ ಸೇರಿಸಿಕೊಳ್ಳಬೇಕು. 'ಸಂವತ್ಸರದಿಂದ ವಾಯುಲೋಕಕ್ಕೆ ಗಮನ' ಎಂದಲ್ಲ. 'ಸಂವತ್ಸರದಿಂದ ವಾಯುಲೋಕಕ್ಕೆ ಗಮನ' ಎನ್ನುತ್ತಿರುವ ಸೂತ್ರ ಈ ನಿರ್ಣಯವನ್ನು ಸರ್ವಥಾ ಹೇಳುತ್ತಿಲ್ಲ" ಎಂದು.

ಇಲ್ಲಿ ಕಲ್ಪತರು ಹೀಗೆ ವ್ಯಾಖ್ಯಾನ ಮಾಡಿದೆ- 'ಅಬೋಧಕಮೇವೇತ್ಯರ್ಥಃ' 'ಸೂತ್ರ ಈ ನಿರ್ಣಯವನ್ನು ತಿಳಿಸುವುದೇ ಇಲ್ಲ' ಎಂದು.

ಹೀಗೆ ಭಾಷ್ಯ-ಭಾಮತೀ-ಕಲ್ಪತರು ಈ ಮೂರೂ ಗ್ರಂಥಗಳನ್ನು ಪರಿಶೀಲಿಸಿದಾಗ ಅದ್ವೈತಭಾಷ್ಯ ನಿಜವಾಗಿ ಭಾಷ್ಯವೇ ಅಲ್ಲ ಎಂದು ನಿಶ್ಚಯವಾಗುವುದು.

ಆದರೆ ಪ್ರಚಲಿತಪಾಠದಲ್ಲಿ ಭಾಮತಿವಾಕ್ಯ ಹೀಗಿದೆ-

'ವಾಯುಮಬ್ದಾದಿತಿ ತು ಸೂತ್ರಮತ್ರಾಪಿ ವಾಚಕಮೇವ' 'ಈ ವಿಷಯದಲ್ಲೂ ಸೂತ್ರವು ವಾಚಕವೇ ಆಗಿದೆ' ಎಂದು.

ಕಲ್ಪತರುವಾಕ್ಯವೂ ಹೀಗಿದೆ-

'ಬೋಧಕಮೇವೇತ್ಯರ್ಥಃ' 'ಬೋಧಕವೇ ಆಗಿದೆ' ಎಂದು.

ಪರಿಮಲದಲ್ಲಿ ಇದಕ್ಕೆ ವಿವರಣೆ ಹೀಗಿದೆ-

'ನನು ವಾಚಕಮೇವೇತಿ ನ ಯುಕ್ತಂ, ವಾಯುಶಬ್ದಸ್ಯ ಲಕ್ಷಣೀಯೇ ದೇವಲೋಕೇ ಶಕ್ತ್ಯಭಾವಾದಿತ್ಯಾಶಂಕ್ಯ ವ್ಯಾಚಷ್ಟೇ ಬೋಧಕಮೇವೇತ್ಯರ್ಥ ಇತಿ'

'ಭಾಮತಿಯಲ್ಲಿ ''ವಾಚಕವೇ'' ಎಂದು ಹೇಳುತ್ತಿರುವುದು ಸರಿಯಲ್ಲ. ವಾಯುಶಬ್ದಕ್ಕೆ ದೇವಲೋಕ ಎಂಬ ಅರ್ಥದಲ್ಲಿ ಲಕ್ಷಣೆಯೇ ಹೊರತು ಶಕ್ತಿ ಇಲ್ಲ.' ಎಂದು ಶಂಕಿಸಿ ವ್ಯಾಖ್ಯಾನಿಸುತ್ತದೆ ಕಲ್ಪತರು, 'ಬೋಧಕವೇ ಎಂದರ್ಥ' ಎಂದು.

ಭಾಷ್ಯರತ್ನಪ್ರಭೆಯಲ್ಲಿ ''ಸೂತ್ರದಲ್ಲಿ 'ವಾಯು' ಪದವು 'ದೇವಲೋಕಪೂರ್ವಕ ವಾಯು' ಪರವೇ'' ಎಂದು ಹೇಳಿದೆ. ಹೀಗಾಗಿ ಶೇಷಚಂದ್ರಿಕೆಯಲ್ಲಿ ಹಿಡಿದ ಭಾಮತೀಕಲ್ಪತರುಪಾಠಗಳು ಕೃತಕವಾಗಿರಬಹುದೆಂಬ ಸಂಶಯ ಇಲ್ಲಿ ಬರಬಹುದು.

ಆದರೆ ಭಾಮತಿಯಲ್ಲಿ 'ಸೂತ್ರದಲ್ಲಿ ವಾಯುಪದವು ವಾಚಕವೇ ಆಗಿದೆ' ಎಂದು ಹೇಳುವುದು ಸಂಭವನೀಯವಲ್ಲ. ಲಾಕ್ಷಣಿಕವಾದ ಪದವನ್ನು 'ವಾಚಕವೇ ಆಗಿದೆ' ಎಂದು ಯಾವ ವಿವೇಕಿಯೂ ಹೇಳಲಾರ. ಆದರೂ ಭಾಮತೀಕಾರರು ಹೇಳಿದ್ದಾರೆ ಎಂದುಕೊಂಡಿದ್ದಾರೆ. ಆದರಿಂದ ವ್ಯಾಖ್ಯಾನ ಮಾಡಬೇಕಾಯಿತು.

ವಸ್ತುತಃ 'ಸೂತ್ರಮತ್ರಾವಾಚಕಮೇವ' ಎಂಬಲ್ಲಿ ನಡುವೆ 'ಪಿ' ಎಂದು ಸೇರಿಸಿ 'ಸೂತ್ರಮತ್ರಾಪಿ ವಾಚಕಮೇವ' ಎಂದು ಯಾರೋ ಬರೆದರು. ಅದಕ್ಕೆ

ಅನುಸಾರವಾಗಿ 'ಅಬೋಧಕಮೇವ' ಎಂಬ ಕಲ್ಪತರುವಾಕ್ಯದಲ್ಲಿಯೂ ಅಕಾರವನ್ನು ತೆಗೆದು 'ಬೋಧಕಮೇವ' ಎಂದು ತಿದ್ದಿದರು ಎಂದು ಊಹಿಸಬಹುದು.

ಯದ್ಯಪಿ 'ಅಬೋಧಕಮೇವ' ಎಂಬ ಕಲ್ಪತರುಪಾಠ ಅಸಂಭಾವಿತವೆನಿಸುತ್ತದೆ. ಏಕೆಂದರೆ ಲಕ್ಷಣಾವೃತ್ತಿಯಿಂದ ಬೋಧಿಸಲು ಬರುವಾಗ ಅಬೋಧಕವೆನ್ನುವುದು ಹೇಗೆ ?' ಎಂದು. ಆದರೆ, ಮಾರ್ಗಕ್ರಮನಿರ್ಣಯಕ್ಕೇ ಹೊರಟ ಸೂತ್ರ 'ಸಂವತ್ಸರದಿಂದ ವಾಯುಲೋಕಕ್ಕೆ' ಎನ್ನುತ್ತಿದೆ. 'ಸಂವತ್ಸರದಿಂದ ದೇವಲೋಕಕ್ಕೆ, ದೇವಲೋಕದಿಂದ ವಾಯುಲೋಕಕ್ಕೆ' ಎನ್ನುವ ಅಭಿಪ್ರಾಯ ಸೂತ್ರಕ್ಕೆ ಇರುತ್ತಿದ್ದರೆ ಹಾಗೇ ಸ್ಪಷ್ಟ ಹೇಳಬೇಕಾಗಿತ್ತು. ಆದರಿಂದ ಆ ಅಭಿಪ್ರಾಯವಿಲ್ಲ. ಹೀಗಾಗಿ ಲಕ್ಷಣಾವೃತ್ತಿಯಿಂದಲೂ ಹಾಗೆ ಬೋಧಿಸುವುದಿಲ್ಲ. ಅಭಿಪ್ರಾಯವಿದ್ದರೆ ಮಾತ್ರ ಲಕ್ಷಣೆಗೆ ಪ್ರಸಕ್ತಿ ತಾನೆ ? ಆದರಿಂದ ಕಲ್ಪತರು 'ಸೂತ್ರವು ಬೋಧಕವೇ ಅಲ್ಲ' ಎಂದಿದೆ. ಸೂತ್ರವು ಕೇವಲ ಛಾಂದೋಗ್ಯವನ್ನು ಅನುವಾದಿಸುತ್ತದೆ ಹೊರತು ಬೃಹದಾರಣ್ಯಕವಾಕ್ಯವನ್ನು ಕಂಡೇ ಇಲ್ಲ, ಕಂಡು ಎರಡನ್ನೂ ಹೊಂದಿಸುವ ಪ್ರಯತ್ನವನ್ನೂ ಮಾಡಿಲ್ಲ ಎಂದು ಇದರಿಂದ ಹೇಳಿದಂತಾಯಿತು. ಭಾಷ್ಯವಂತೂ ಸ್ಪಷ್ಟವಾಗಿ ಇದನ್ನು ಹೇಳಿಬಿಟ್ಟಿದೆ-

'ವಾಯುಮಬ್ದಾದಿತಿ ತು ಛಂದೋಗಶ್ರುತ್ಯಪೇಕ್ಷಯೋಕ್ತಂ'

'ವಾಯುಮಬ್ದಾತ್' ಎಂಬ ಸೂತ್ರ ಛಾಂದೋಗ್ಯದ ಅನುವಾದ ಮಾತ್ರ''

ವಾಯುವಿಗೆ ಏಳನೇ ಸ್ಥಾನವನ್ನು ಕೊಟ್ಟಿರುವುದೂ ತುಂಬ ಅನುಚಿತ.

'ಸ ಇತೋ ಗತೋ ದ್ವಿತೀಯಾಂ ಗತಿಂ ವಾಯುಮಾಗಚ್ಛತಿ'

ಎಂದು ದ್ವೈತಭಾಷ್ಯದಲ್ಲಿ ಉಕ್ತವಾದ ಸ್ಪಷ್ಟಶ್ರುತಿಗೆ ವಿರುದ್ಧವಾಗಿದೆ. ಈ ಶ್ರುತಿ ಅಪ್ರಸಿದ್ಧವೆನ್ನುವುದು ನಿಜ. ಆದರೆ ಅಪ್ರಸಿದ್ಧ ಶ್ರುತಿಗಳನ್ನು ಉದಾಹರಿಸುವುದು ಪ್ರಾಚೀನರಲ್ಲಿ ಸಾಮಾನ್ಯ ಎಲ್ಲೆಡೆ ಕಂಡು ಬರುತ್ತದೆ. 'ಅನಂತಾ ವೈ ವೇದಾಃ' ಅಪ್ರಸಿದ್ಧಶ್ರುತಿಗಳು ಲೆಕ್ಕವಿಲ್ಲದಷ್ಟಿವೆ ಎಂದು ಶ್ರುತಿಯೇ ಹೇಳುತ್ತದೆ. ಭಾಗವತದಲ್ಲಿ ಶ್ರುತಿಗೀತೆಯು ವ್ಯಾಖ್ಯಾನಿಸುವುದೆಲ್ಲ ಅಪ್ರಸಿದ್ಧಶ್ರುತಿಗಳನ್ನೇ. 'ಊರ್ಜೋಽವರುಧ್ಯೈ,' 'ಯಜ್ಞೋಪವೀತಂ' ಮುಂತಾಗಿ ಕರ್ಮಾಂಗವಾಗಿರುವ ಶ್ರುತಿಗಳು ಅನೇಕ ಅಪ್ರಸಿದ್ಧವೆ ಆಗಿವೆ. ಅವು ಶ್ರುತಿಯೆ ಅಲ್ಲ ಎಂದು ತ್ಯಾಗ ಮಾಡಿದರೆ

ಕರ್ಮಾಚರಣೆಗೇ ಕುಂದು ಬಂದೀತು. ಮನುಸ್ಮೃತಿಯಲ್ಲಿಯೂ 'ಅಷ್ಟಕಾಃ ಕರ್ತವ್ಯಾಃ ಪುಷ್ಟಿಕಾಮೇನ' ಎಂದು ಅಪ್ರಸಿದ್ಧಶ್ರುತಿ ಉದಾಹೃತವಾಗಿವೆ. 'ಯದ್ವೈ ಕಿಂಚನ ಮನುರವದತ್ ತದ್ ಭೇಷಜಂ' ಎಂಬ ಶ್ರುತಿ ಇರುವುದರಿಂದ ಮನು ಅಪ್ರಸಿದ್ಧಶ್ರುತಿಯನ್ನು ಉದಾಹರಿಸಬಹುದೆನ್ನುವುದಾದರೆ 'ಮಧ್ವೋ ವೋ ನಾಮ ಮಾರುತಂ ಯಜತ್ರಾಃ' ಎಂದು ಶ್ರುತಿ ಇರುವುದರಿಂದ ಮಧ್ವರೂ ಉದಾಹರಿಸಬಹುದು.

ಅದ್ವೈತಭಾಷ್ಯಪ್ರಕಾರ 'ಸ ವಾಯುಲೋಕಂ' ಎಂಬುದು ಸಾಮಾನ್ಯಶ್ರುತಿ. ಅದರಲ್ಲಿ ಹೇಳಿದ ವಾಯುವಿಗೆ ವಿಶೇಷಶ್ರುತಿ ಏಳನೇ ಸ್ಥಾನ ನೀಡಿದೆ ಎಂದು ಸೂತ್ರ ಹೇಳುತ್ತಿದೆ. ಆದರೆ ಈ ಅರ್ಥದಲ್ಲಿ ಸೂತ್ರದಲ್ಲಿ 'ವಿಶೇಷಾತ್' ಎಂದು ಒಂದು ಶಬ್ದ ಸಾಕು. 'ಅವಿಶೇಷ'ಶಬ್ದ ವ್ಯರ್ಥ. ಅವಿಶೇಷ ಮತ್ತು ವಿಶೇಷ ಎಂದು ದ್ವಂದ್ವಸಮಾಸಕ್ಕೆ ಅವಕಾಶವಿಲ್ಲ. ದ್ವಂದ್ವ ಮಾಡಿದರೂ 'ಅಲ್ಪಾಚ್' ಆದ್ದರಿಂದ ವಿಶೇಷಶಬ್ದ ಮೊದಲಿಗೆ ಬರಬೇಕು. ಮತ್ತು ಅವಿಶೇಷಶ್ರುತಿ ಎಂದರೆ ಸಾಮಾನ್ಯಶ್ರುತಿ. ಅದರಿಂದ ಸಾಮಾನ್ಯವಿಶೇಷಾಭ್ಯಾಂ ಎಂದೇ ಹೇಳಬಹುದಿತ್ತು. ದ್ವೈತಭಾಷ್ಯದಲ್ಲಿ 'ಅವಿಶೇಷ' ಎಂದರೆ ವಿಶೇಷಾಭಾವವೆಂಬ ಯುಕ್ತಿ. ಅದರಿಂದ ದೋಷವಿಲ್ಲ.

ಹೀಗೆ ಅನೇಕ ವೈಶಿಷ್ಟ್ಯಗಳ ಸಂಗಮವು ಈ ಗ್ರಂಥವಾಗಿದ್ದು ಓದುಗರಿಗೆ ರಸದೌತಣವನ್ನು ಉಂಟುಮಾಡುವುದರಲ್ಲಿ ಸಂಶಯವೇ ಇಲ್ಲ.

ಈ ಗ್ರಂಥವನ್ನು ಸಂಪಾದಿಸಲು ಅವಕಾಶ ಮಾಡಿಕೊಟ್ಟ ಪೂರ್ಣಪ್ರಜ್ಞ ಸಂಶೋಧನ ಮಂದಿರದ ಸಂಸ್ಥಾಪಕರು, ಪರಮಪೂಜ್ಯ ಗುರುಗಳೂ ಆದ ಶ್ರೀಶ್ರೀವಿಶ್ವೇಶತೀರ್ಥ ಶ್ರೀಪಾದರ ಚರಣಾರವಿಂದಗಳಲ್ಲಿ ಭಕ್ತಿಪೂರ್ವಕ ಸಾಷ್ಟಾಂಗ ಪ್ರಣಾಮಗಳನ್ನು ಸಲ್ಲಿಸುತ್ತಿದ್ದೇನೆ.

ಪೂರ್ಣಪ್ರಜ್ಞ ಸಂಶೋಧನ ಮಂದಿರದ ಅಧ್ಯಕ್ಷರಾದ ಆತ್ಮೀಯ ವಿದ್ವಾಂಸರಾದ ಪ್ರೊ। ಡಿ. ಪ್ರಹ್ಲಾದಾಚಾರ್ಯರ ಸಹಕಾರವನ್ನು ಸ್ಮರಿಸುತ್ತೇನೆ. ನನ್ನ ಪ್ರಿಯ ವಿದ್ಯಾರ್ಥಿ ಹಾಗೂ ಸಂಶೋಧನ ಮಂದಿರದ ನಿರ್ದೇಶಕರಾದ ಡಾ. ಎ.ವಿ. ನಾಗಸಂಪಿಗೆಯವರಿಗೆ ಆಶೀರ್ವಾದಗಳು.

ಕೆ. ಹಯವದನ ಪುರಾಣಿಕ

Introduction

Śeṣatātparya-candrikā, as stated in the previous volumes, is an endevour by Sri Raghunatha tirtha to complete the Tatparyachandrika of Sri Vyasatirtha which discontinued at the end of second chapter of Brahma Sutras. The present volume consists of the fourth Pada of third chapter and the entire fourth chapter. This introduction is intended to prepare the reader to go through the volume deeply.

Following is the summary, according to the Bhāṣya of Madhvācārya, of the seventh adhikaraṇa known as *Samanādhikaraṇa* (Sūtra 7-14. II Pāda IV Chapter).

Apparent reading (*pūrvapakṣa*)

In the course of dissolution of Universe the principle of *ŚRĪ* i.e. Mahālakshmī, merges with the highest principle i.e Lord Viṣṇu. So States the *Chāndogya Upaniṣad "tejaḥ parasyam devatayam"*. This means ŚRĪ is afflicted with bondage like other finite souls as merger happens to bonded souls only. Therefore the principle of ŚRĪ cannot be considered as eternally free or never-bonded. The never-bonded status would make ŚRĪ equal to the Lord Viṣṇu and this in turn makes her as much supreme as Viṣṇu. This is against the stated import of *Śrutis* and reason.

Critical reading (*siddhānta*)

"Samāvetau prakṛtiśca paramaśca nityau sarvagatau nityamuktan" - This is *Souparṇa Śruti*. Here, it is very clear that the principle of ŚRĪ (prakṛti)

and Lord *Viṣṇu* (parama) are equal to the extent of eternal freedom or never-bondedness. This does not make them equal in respect of their virtues. The following difference to must be noted : Those finite souls who merge with or enter in Viṣṇu do not come back to the cycle of births and deaths. But those who do with ŚRĪ do come back (ŚRĪ is dependent on Viṣṇu; Viṣṇu is totally independent)

The merger of ŚRĪ with *Viṣṇu* does not entail the contigency of bondage to her. The merger of ŚRĪ is not similar with that of finite souls who have accomplished the aim of seeing Lord Viṣṇu. Actually there is no merger of ŚRĪ with Lord Viṣṇu. It is only the closest proximity. This is called merger in the secondary sense of the term. A pupil who resides very closely to his teacher is generally described as one who resides with the teacher. *Gurou Vasati.* This is only a figurative expression. The talk of ŚRĪ's merger is similar with this. Śrī Śaṅkara and Śrī Rāmānuja read the first word in the aphorism 4.2.7 differently. It is *samānā*..... according to them.

Apparent reading

A nescient (who has not accomplished self-realisation) is destined to be reborn. Embodiment of soul is rebirth. The five elements are essential to constitute a body. Therefore when he passes away the five elements, in their subtle form, have to accompany him. But the one who has accomplished self-realisation attains emancipation. So states the scripture *Amṛtatvameti.* Therefore, he does not have to pass away.

Critical reading

Utkrānti is common to both the nescient and the enlightened. The nescient is tied to his *karmans* and therefore his *Utkrānti* results in going back to a mortal body, i.e., rebirth. The enlightened does *Utkrānti* and attains emancipation.

Observation

In the arrangement of *Adhikaraṇas* any haphazard reading- is considered apparent reading *pūrvapakṣa*. It should be sensible as far as possible. In the present case the critical reading, according to the Bhāṣya of Śrī Śaṅkara is as follows :

The Enlightened are of two kinds according to the Advaita school.

1) Enlightened in *Paravidyā*.

2) Enlightened in Aparavidyā

Of the two the elightened in *paravidyā* has realised *Advaita* and therefore there is no world to him ; nor has he a mortal body; nor there is a division of places to him. *Utkrānti* is an upward movement of the soul from his mortal body to reach a destination. This *Utkrānti* is therefore untenable to a soul who has realised Advaita. The apparent reading must be opposite to the critical reading according to the basic structure of *Adhikaraṇas*. When the critical reading according to Śrī Śaṅkara, does not uphold *Utkrānti* to the enlightened soul (in paravidyā) the apparent reading cannot take the position that there is no *Utkrānti* to the enlightened soul.

The enlightened in *Aparavidyā does Utkrānti* according to the Advaita school. Therefore the Apparent reading can say that there is no *Utkrānti*. True. But *Adhikaraṇa* under discussion is not dealing with *Aparavidyā*. Therefore any presentation with reference to *Aparavidyā* is irrelevant. Bhamati says this : "*paravidyayā eva amṛtattvaprāptiḥ atra ucyate*". This means :

The attainment of emancipation by means of *paravidyā* is the import of this *adhikaraṇa*.

Upaniṣads, as a matter of fact deal more with *Aparavidyā* than with *paravidyā*. This matches with the proverb theives outnumber the merchants in the market place. The view that *paravidyā* leads to emancipation can neither be found in *Brahmasūtras* nor in the *Śrutis* - the origin of *Sūtras*. *Upaniṣad* describes, as the end benifit of the pursuit of *Daharavidyā* and similar Aparavidyās, the attainment of *Brahmaloka* and the pleasures available there. Journey to *Brahmaloka* requires *Utkrānti* from the present body. Therefore the *pūrvapakṣa* that one who pursues *Aparavidyā* does not make Utkrānti (Upward journey of the soul after escaping from the mortal body) is untenable.

Kalpataru, a commentary on Bhamati says : The import of this *adhikaraṇa* is : The learned in *Daharavidyā* attains emancipation. Emancipation is the final fruit of *paravidyā*. The one who is learned in *paravidyā* does not make *Utkrānti*. Therefore the opponent of the conclusion of this *adhikaraṇa* cannot present the view that the learned in *Daharavidyā* does not make *Utkrānti*. Therefore this presentation is the result of illusion.

This is not correct. The full text that avers the fruit of *Daharavidyā* is this : '*Tayordhvamāyannamṛtattvameti*'. This means : "Rises up from *Brahmanāḍi* and attains emancipation." It is clear that *Utkrānti* precedes emancipation. In view of this if the opponent of the conclusion of this *adhikaraṇa* says that the learned in *Daharavidyā* does not make *Utkrānti* it is the correct position.

Besides, *Kalpataru* says that there is no apparent view on the subject discussed in this *adhikaraṇa* - *Vastutastu nāsti purvapakṣaḥ*. This is self-contradictory. *Pūrvapakṣa* and *Siddhānta* are the essential characters of *adhikaraṇa*. In the absense of *pūrvapakṣa* what is called *adhikaraṇa* is not so really.

Besides *Kalpataru* presents the following *pūrvapakṣa* : The learned in *Aparavidyā* does not have to make *Utkrānti*. Because he has to reach *Saguṇabrahman*. It is omnipresent like space. *Utkrānti* is not necessary to reach him. This view of *Kalpataru* contradicts the *Bhāṣya* of Śrī Śaṅkara It says : The learned in *Aparavidyā* does make *Utkrānti* with subtle (five) elements. The subtle elements are required to take another body.

"Śarīraprāptyartham dehabeejabhutani
bhūtasūkṣmāṇi gṛhītvaiva Utkramaṇam Karoti"

The presentation of Siddhānta also, in *Kalpataru*, is wrong. Because it does not answer the point, made in pūrvapakṣa, that Utkrānti is not necessary to reach *Saguṇabrahman* as he is omnipresent

Bhāratītīrta's interpretation.

One who realises *SaguṇaBrahman* attains *Brahmloka.* Attainment of Brahmaloka is emancipation. One who fails to realize SaguṇaBrahman continues to be caught in the cycle of births and deaths i.e., *Samsāra*. This difference must be due to the difference in the *Utkrānti* of the two kinds of souls. Therefore the *Utkrāntis* of the enlightened and not enlightened are not similar or same. This is *pūrvapakṣa.*

Siddhānta: The enlightened enters *Suṣumnā nāḍi* in his body in preparation to make *Utkrānti.* The unenlightened enters other *nāḍis* in his body before making *Utkrānti*. But their *Utkrāntis* from *nāḍis* are as much similar as their births, pleasure and pain before when they resided in their mortal body. After making *Utkrānti* they take different paths and the resultant fruits are diffeent.

Here *pūrvapakṣa* is very weak. The two kinds of souls (see *pūrvapakṣa*) attain two different fruits and this must be due to two different *Utkrāntis* according to the *pūrvapakṣa* as presented by **Bhāratītīrta**. This is not correct. Difference in the end results need not be due to difference in all the means of them. Difference in some means also can produce different results.

As a matter of fact, the very reading *Samānā* is wrong. Therefore attempt to interpret the *Sūtra*, with this reading has failed. *Samanā* is the reading "Deśataḥ Katataśca vyaptyā samo nā paramapuruṣo yasyāh sā samanā". This means: Nārāyaṇa is equal to Lakṣmī in respect of spacial and temporal pervasion. In this sense the two words *samaḥ* and *nā* are compounded. The compound is technically called *bahuvreehi:*

Correctness of the word Samānā

1) If a second member of a Bahuvrīhi compound is *nadī* (a technical name to faminine bases ending with ई and ऊ) or ends with the letter , it (the compound) gets a suffix *kap* at its end, according to paninan aphorism नद्यृतश्च 5.4.153. नृ is the second member in the Bahuvrīhi compound samanā. Therefore it should get the suffix *Kap* at its end. The final form should be *Samanṛkā* and not *Samānā.*

2) A paninian aphorism ऋन्नेभ्यो ङीप् prescribes the suffix ङीप् to any base ending with ऋ Another aphorism नद्यृतश्च prescribes the suffix *Kap* to any base ending with ऋ. As this aphorism sublates ऋन्नेभ्यो ङीप् the *Bahuvrīhi* समनृ should get *Kap* and formation should be *Samanṛkā*. But the aphorism ऋतश्छन्दसि cancels the prescribed *Kap* to Vedic words. Therefore the Bahuvrīhi should get ङीप् and the final form should be *Samanārī.*

Justification of *Samānā*

1) Faminine bases ending with ऋ or नृ are eligible to get ङीप् according to aphorism ऋन्नेभ्यो ङीप्. The *Bahuvrīhi* समनृ is not a faminine base. Therefore it is not eligible for ङीप्.

2) Vedic words are barred from getting *Kap* according to aphorism ऋतश्छन्दसि. Therefore the word Samanā is correct.

3) The word *Samanā* is found in the Vedic hymn.

'घृतस्य जूतिः समना सदेवा संवत्सरं हविषा वर्धयन्ति ।'

Therefore it is correct.

o-o-o

'प्राणस्तेजसि तेजः परस्यां देवतायाम् .....' This is in *Bṛhadāraṇyaka Upaniṣad*. Here the word *tejas* is in neuter gender. But it does not mean fire which is one among five elements. It means goddess ŚRĪ, the never bonded. This ŚRĪ merges with *PARADEVATĀ* i.e., *Viṣṇu*. To convey this, the *Brahmasūtra* 4.2.7 has used the word *Samanā* in faminine gender in place of the word tejas.

o-o-o

Another example for wrong reading of Sūtra and consequent wrong interpretation.

The *Brahmasūtra* 4.3.2 is read as 'वायुशब्दादविशेष-विशेषाभ्याम्' by Śrī Madhvācārya. The *Bhāṣya* of the

Acharya interpretes the *Sūtra* as follows : A seeker who has accomplished God-realisation, at a fixed time, escapes from his terminal body and starts his upward journey. In course of journey he reaches *Vāyuloka* first. So says the *Śruti* "*yadā vai puruṣosmāllokāt praiti sa vāyumāgacchati*".

Another *Śruti* "*Atha yadu caivāsmin śavyam kurvanti yadu ca na arciṣamevābhisambhavanti*" – says, the said seeker reaches, first, the loka of *Arcis*. In both these Śrutis the idea of 'first' is not explicit. But the latter is interpretaed in this sense in learned quarters. Theefore the former also be taken in this sense.

But many other *Śrutis* and *Smṛtis* say that the said seeker reaches, first, the *loka* of *arcis*. The path of the said seeker is known as *arcirādimārga*. Therefore the thought that '*Vāyuloka*' is the first to be reached has to be given up. Another *Śruti* '*Arciṣohah*' states that '*Ahar*' loka is the second in the path of emancipation. Therefore what is the position of *Vāyuloka* in the path ?

Here this is *pūrvapakṣa*. Both *Arcis* and *Vāyu* loka should be considered second. Some qualified seekers may reach *Vāyuloka* from *arcis* and continue their onward journey. Some others may reach *aharloka* from *arcis* and continue. Why this arrangement ? Why should *aharloka* not be considered a third loka ? Because there is no clear proof to consider either *Vāyu* or *aharloka* as third. When this arrangement is, thus, inevitable the qualified seekers cannot de-

termine their path. In this situation of uncertainty they cannot find their path.

This is *Siddhānta* : *Vāyuloka* is the second spot. The *śruti* "*Sa ito gato dvitīyām gatim Vāyum āgacchati*" clearly states this. There is a śruti arciṣohah which states that the upward traveller reaches *aharloka* from *arcis* ? True. It is there. The *Śruti* can be valid even if *aharloka* is third loka. The *Śruti* does not say explicity that *aharloka* is second. But the *śruti* "*sa ito dvitīyām gatim Vāyum*" explicitly states *Vāyuloka* as second. That the inexplicit *śruti* must be interpreted in tune with the explicit *śruti* is the principle of interpretation. In this arrangement the accomplished seekers can be sure of their path and can set out on their *Utkrānti* i.e., upward journey.

The Bhāṣya of Śrī Śaṅkarācārya read the *sūtra* as *VĀYUMABDĀDAVIŚEṢA VIŚEṢĀBHYĀM.*

This is *pūrvapakṣa* :

"*sa etam devayānam panthānam āpadya agnilokamāgachhati sa Vāyulokam.*" This is *kouṣitaki śruti* This *śruti* states that the qualified seeker reaches *agniloka* after *Utkrānti* and then reaches *Vāyuloka.*Therefore *Vāyuloka* is second in the path. Here arises a question : *Bṛhadāraṇyoka upaniṣad* states :

yadā vai puruṣosmāllokāt praiti
sa vāyumāgachhati tasmai sa tatra
vigihīte, yathā rathacakrasya kham,
tena sa ūrdhvamākramate sa ādityamāgacchati

This means: The qualified seeker makes *Utkrānti*; reaches *Vāyuloka*; Vāyu makes way to him to travel to *Ādityaloka*; he reaches *Āditya*. According to *Bṛhadāraṇyaka* the order of lokas is this : *Arci-Ahas-śuklapakṣa-māsa-samvatsara-deva-Vāyu-Āditya.* In this order *Vāyu* is seventh ?

This is the answer : The quoted *Bṛhadāraṇyaka* says *tena sa Ūrdhvamākramate* which means *Vāyu* makes way to move upwards. It does not mean *Vāyuloka* is a path to *Ādityaloka*. The *Kauṣītakī Upaniṣad Agnilokamāgachhati sa vāyulokam* – states the order of lokās on the path of qualified seekers. According to this *śruti Vāyuloka* is second.

This is siddhānta

Bṛhadāraṇyaka just states "*Ūrdhvamākramate*" which means moves upwards. Which is the immediate destination ? *Ādityaloka.* This means the travelling seeker reaches *Ādityaloka* through *Vāyuloka.* This should be understood in conformity with the full description of the path found in other *śrutis.* In full description *Vāyuloka* is seventh.

The *Brahmasūtra* 4.3.2 is not consistent with the above quoted *Bṛhadāraṇyaka.* It says the travelling seeker reaches *Devaloka* from *samvatsaraloka* and from *Devaloka* reaches *Ādityaloka.*

The *Chāndogya Upaniṣad* states that *Masebhyaḥ samvatsaram samvatsarādādityam*. This means the said seeker reaches *samvatsaraloka* from *Māsaloka* and Ādityaloka from *samvatsara loka*. The *Brahma sūtra* under discussion is consistent with this

Chāndogya śruti. One cannot decide the order of *lokas* on the basis of *Kauṣītakī śruti*, because it is not in conformity with the *sūtra* under discussion. The description of the order of *lokas* in *Bṛhadāraṇyaka* does not mention *samvatsaraloka*. The *Chāndogya* does not mention *Devaloka*. The unmentioned should be borrowed while interpreting these *śrutis*. The *sūtra* 4.3.2 is stating the view of *Chāndogya* only.

A critique of Advaitabhāṣya

This *Adhikaraṇa* should inquire into the question as to which is the first one of the two *lokas* - *Archi* and *Agni*. According to the Chāndogya - te Arcisam abhisambhavanti - *Arci* is first. According to *Kauṣītakī* - *"sa etam devayānam panthānamāpadya Agnilokamāgacchati"* - *Agni* is first.

There is no room to the view that the words *agni* and *arci* are synonyms and that therefore there is no room for confusion. Because, in *Bhagavadgīta* the verse *Agnirjyotirahaḥ śuklaḥ ṣanmāsā uttarāyaṇam* (8.2.4) states two different lokas - *Agni* and *arcis* by two synonymous words *Agni* and *Jyoti.*

Therefore there is need to enquire whether *Archis* loka is first or *Agniloka.* Inquiry into the status of *Vāyuloka* in the order of *lokas* in the path of a seeker moving upwards is not relevant.

"yadā vai puruṣosmāllokat praiti sa Vāyumāgacchati" – This *Bṛhadāraṇyaka śruti* assigns Vāyu the first place- *"Agnilokamāgacchati, sa Vāyulokam"*. This *Kauṣītakī śruti* assigns second. It could be either first or second. How is *Vāyu* placed

seventh in the order? *Vāyu* gives way to the seeker to reach *Ādityaloka* so says *śruti*. In view of this *Vāyuloka* can be seventh as *ādityaloka* is decidedly eighth in the order.

This is not correct. It is not necessary that the presiding god of seventh loka alone should lead to eighth. The god of second *loka* also can guide the traveller upto the *Ādityaloka*. *Vāyu* can do this out of love for the learned seekers and out of devotion to God.

According to *Bṛhadāraṇyaka Devaloka* is situated after *Māsaloka*. According to *Chāndogya samvatsara* is situated after *Māsaloka*.

Is it *Devaloka* or *samvatsara* after Māsaloka ? This question should be addressed first. Only after this the question of place of *Vāyuloka* deserves attention.

"The unmentioned *lokas* should be borrowed while interpreting the concerned "*śrutis*" says the Bhāṣya of Śrī Śaṅkarācārya. The Bhāṣya itself and the commentary *Bhāmati* on it elaborate this in the following way.

Samvatsara is connected to *Māsa*. Therefore it should be located after *Māsa*. Devaloka could be located after *samvatsara*. *Āditya* should be located after *Vāyu*. There is no dispute over this. Therefore the *Chāndogya* statement the learned seeker reaches *Ādityaloka* from *Samvatsaraloka* must be refined with the insertion of *Devaloka*, after borrowing it from *Bṛhadāraṇyaka*. After insertion it should be read as follows. From *samvatsara* to *Devaloka*, from Devaloka to *Vāyuloka* and from *Vāyuloka* to *Ādityaloka*

This opinion of the *Bhāṣya* of Śrī Śaṅkara does not flow from the sūtra. It is Śaṅkara's independent opinion. The *sūtra* just says that the learned seeker reaches *Vāyu* from *samvatsaraloka*. Bhāṣya should bring out the thought ingrained in sūtras; it should not say something which cannot be traced to the *sūtra*.

It is possible to coordinate *Chāndogya* and *Bṛhadāraṇyaka* in consonance with the *sūtra*. It is thus : The word *Devaloka* must be taken in the sense of *loka of Vāyudeva*; The resultant order would be this : From *Samvatsara* to *Vāyuloka* and from *Vāyuloka* to Ādityaloka. This order would go well with both the *Upaniṣads*. It would also, go well with the *sūtra* as read by Śrī Śaṅkara.

The explanation given in the Bhāṣya is not denoted by *sūtra*- says Bhāmati : *Devalokād Vāyumiti paṭhitavyam. Vāyumabdatiti tu sūtram avācakameva*" – *Bhāmati*

This means: The passage is from *Devaloka* to *Vāyuloka*. This is the import of *śrutis*. This point must be inserted into the relevant sentence in *Chāndogya* as stated a little above. The *Brahmasūtra Vāyumabdād*...... is not at all stating this import.

Kalpataru, a gloss on *Bhāmati* interpretes *avacakameva* as *abodhakameva* which means the *sūtra* does not convey this import at all.

Thus a critical study of *Bhāṣya* of Śrī Śaṅkara, *Bhāmati* and *Kalpataru* reveals serious flaws in the

Bhāṣya of Śrī Śaṅkara and therefore its eligibility to the status of Bhāṣya stands awfully jeopardised.

Suspicious reading ?

The *Śeṣavākyārtha candrikā* of Śrī Raghunātha yati has taken the above mentioned readings from the Bhāṣya of Śrī Śaṅkara, *Bhāmati* and *Kalpataru* and has offered its observations.

But we do not find these readings in the copies of these works now available! The reading in the now available *Bhāmati* is this :

"*Vāyumabdaditi tu sutramatrāpi vācakameva*"

This means : Sūtra expressly conveys this.

The reading in the now available Kalpataru is this: "*Bodhakameva ityarthaḥ*".

Parimala, a gloss on *Kalpataru* records an objection on *vācakameva* of Bhāmati and introduces "*bodhakameva ityarthaḥ*" of Kalpataru as an answer to the objection.

All this gives rise to suspicion that the readings taken by the author of *śeṣavākyārtha candrikā* are ficticious or fabricated.

Not ficticious

According to *parimala* some think that the word *Vāyu* in the sūtra means *Devaloka* by *lakṣaṇāvṛtti*, a secondary power of the word. But it is not so. It means *Devaloka* by *saktivṛtti*, the primary power of word. To convey this Bhāmati has said *sūtramatrapi vācakameva.*"

But how can the word *Vāyu* mean *Devaloka* by *Śaktivṛtti* ? It can mean so by *lakṣaṇavṛtti* only. But the authors of glosses *kalpataru* and *parimala* have believed that the author of Bhāmati has said so and explained the same. Therefore the now available reading of Bhāmati is suspicious.

A conjecture is possible. Somebody inserted 'pi' after "*sūtramatra.....*" in Bhāmati. The reading became "*sūtramatrāpi vācakameva*". Then the kalpataru reading '*abodhakameva*' became unintelligible. Therefore 'a' was deleted from *abodhakameva.*' If become '*bodhakameva*'.

Dr. C.H. Srinivasamurthy

विषयानुक्रमणिका

विषयः	पृ.सं.
॥ तृतीयाध्याये चतुर्थपादः ॥	
३.४.१. पुरुषार्थाधिकरणम्	१
सूत्रभाष्यम्	१
तत्त्वप्रकाशिका	४
सङ्गत्यादि	४
पूर्वपक्षः	४
सिद्धान्तः	५
ज्ञानस्य कर्माङ्गत्वेन 'यं यम्' इति श्रुतौ पुरुषार्थवादः नतु मोक्ष इव स्वर्गादौ प्राधान्यादिति जैमिनिमतनिरूपणम्	५
ज्ञानिनां देवादीनां कर्मानुष्ठानदर्शनान्न ज्ञानस्य सर्वपुरुषार्थ-साधनत्वमिति निरूपणम्	६
यदेवेति श्रुत्या ज्ञानस्य कर्मशेषत्वनिरूपणम्	६
ज्ञानशेषत्वं साम्यं वा कर्मण एव किं न स्यादिति शङ्कायां कर्मैवेति श्रुत्या परिहारकथनम्	६
ज्ञानी चेति श्रुतौ ज्ञानिनः कर्मविधानाद् ज्ञानस्य कर्मशेषत्वसमर्थनम्	७
कुर्वन्नेवेहेति श्रुतावकरणे प्रत्यवायश्रुतेः ज्ञानिनः कर्म न लीलामात्रमिति निरूपणम्	७
ज्ञानस्यैव सर्वपुरुषार्थसाधनत्वं, कर्मणस्तु फलेऽतिशयाधायकत्वेन शेषत्वमिति स्वमतनिरूपणम्	७
ज्ञानेऽतिशयाधायकत्वेन कर्मणस्तच्छेषत्वमिति शङ्कापरिहारः	८
शेषतात्पर्यचन्द्रिका	९
सङ्गतिः	१०

विषयः	पृ.सं.
विषयसंशयौ चिन्ताक्रमश्च	१०
पूर्वपक्षः	११
सिद्धान्तः	१८
टीकाक्षरार्थः - पादार्थकथनम्	२०
परोक्तपादार्थस्यायुक्तत्वम्	२०
पूर्वपक्षीयौदार्यन्यायस्य व्याख्यानम्	२१
सिद्धान्तीयव्यवस्थितिन्यायस्य व्याख्यानम्	२१
'शेषत्वात्' इति सूत्रस्य परोक्तार्थायुक्तत्वम्	२२
'अधिकोपदेशात्तु' इति सूत्रस्य परोक्तार्थनिरासः	२२
'तुल्यं तु दर्शनम्' इति सूत्रस्य परोक्तार्थनिराकरणम्	२३
सङ्क्षेपभाष्यस्य एतदधिकरणतात्पर्यसूचकता	२३
'विज्ञातमेतत् सर्वेषाम्' इत्यादिभाष्यवचनार्थः	२३
३.४.२. अथ अधिकाराधिकरणम्	२५
सूत्रभाष्यम्	२५
तत्त्वप्रकाशिका	२६
सङ्गत्यादि	२६
पूर्वपक्षः	२६
सिद्धान्तः	२६
अर्थित्वादेः साम्यात् सर्वेषामधिकारिता इति शङ्कापरिहारः	२६
अर्थित्वादिसाम्येऽपि न सर्वस्याधिकारः किन्तु अध्ययनमात्रवत इति निरूपणम्	२७
शेषतात्पर्यचन्द्रिका	२८
एतदधिकरणप्रतिपाद्यविषयः	२८
पूर्वपक्षः	२८

विषयः	पृ.सं.
सिद्धान्तः	२९
असार्वत्रिकीति सूत्रार्थः	२९
विभागः शतवदिति सूत्रार्थः	२९
अध्ययनमात्रवत इति सूत्रार्थः	३०
टीकायां पूर्वपक्षीयोच्चावचशक्तिन्यायविवरणम्	३०
टीकायां सिद्धान्तीयाविशेषन्यायविवरणम्	३१
एतदधिकरणपरतया सङ्क्षेपभाष्यस्य व्याख्यानम्	३१
परमतनिरासः	३२
३.४.३ अधिकारविशेषाधिकरणम्	३४
सूत्रभाष्यम्	३४
तत्त्वप्रकाशिका	३४
सङ्गत्यादि	३४
पूर्वपक्षः	३४
सिद्धान्तः	३५
शेषतात्पर्यचन्द्रिका	३६
सङ्गतिः पूर्वपक्षश्च	३६
सिद्धान्तः	३६
परमतनिरासः	३७
टीकायां सिद्धान्तीयाविशेषन्यायविवरणस्य व्याख्यानम्	३८
सङ्क्षेपभाष्यव्याख्यानम्	३९
३.४.४ अथ कामचाराधिकरणम् (स्तुत्यधिकरणम्)	४०
सूत्रभाष्यम्	४०
तत्त्वप्रकाशिका	४६
सङ्गत्यादि	४६

विषयः	पृ.सं.
पूर्वपक्षः	४६
सिद्धान्तः	४७
यथेष्टाचारेणापि ज्ञानिनां मोक्षकथनात् सदसत्प्रवृत्तिभ्यां विशेषोऽस्तीति निरूपणम्	४७
सदसत्प्रवृत्तिभ्यां ज्ञानिनां विशेषोऽस्तीत्यस्य कैमुत्येन समर्थनम्	४८
य इममिति श्रुतौ ऊर्ध्वरेतस्त्वादिगुणवत्स्वेव ज्ञानोपदेशविधानात् नान्येषां ज्ञानाधिकार इति निरूपणम्	४८
केन स्यादिति यथेष्टाचरणविधायकश्रुतेः जैमिनिमतरीत्याऽर्थान्तरनिरूपणम्	४८
केन स्यादिति श्रुतेः बादरायणाभिमतार्थकथनम्	४९
त्रैवर्णिकानां वेदधारणविधिवत् 'येन स्यात्' इत्युक्तस्वेच्छाचारविधिर्ज्ञानिनामेवेति निरूपणम्	५०
केन स्यादिति न स्वेच्छाचरणं ज्ञानिनां विधीयते, किन्तु पूर्वोक्तस्तुतिरेव इत्याक्षेपपरिहारः	५०
ज्ञानिनां स्वेच्छाचरणविधौ स्पष्टप्रमाणकथनम्	५१
केन स्यादिति श्रुतेः पूर्वोक्तार्थत्रयस्याऽऽक्षेपद्वारा तत्परिहारकथनम्	५१
पूर्वोक्तार्थत्रयस्याधिकारिभेदेन उपपादनम्	५१
कामचाराणामपि मोक्षस्य श्रुतत्वात्, ज्ञानस्य मोक्षसाधने अग्निहोत्राद्यनपेक्षत्वनिरूपणम्	५२
'मोक्षसाधनज्ञानोत्पत्तावेव सर्वधर्मापेक्षा, नतु ज्ञानफलमोक्षेऽपि' इत्यस्य अश्वदृष्टान्तेन निरूपणम्	५२
ज्ञानादेव मोक्षस्य सिद्धत्वेऽपि माठरश्रुतौ ज्ञानिनः शमादेर्विधानात्, तथा ज्ञानाङ्गतया, शमादेरनुष्ठेयत्वनिरूपणम्	५३
ज्ञानिनां निषिद्धान्नभक्षणस्य प्राणात्ययकालीनत्वनिरूपणम्	५३

विषयः	पृ.सं.
निषिद्धाकरणे बाधकाभावात् निषिद्धं न कार्यमिति निरूपणम्	५४
स्मृत्या निषिद्धाकरणवर्णनम्	५४
श्रुत्याऽपि निषिद्धाकरणसमर्थनम्	५४
ज्ञानिभिः निषिद्धं त्याज्यं चेद् विहितमपि त्याज्यं भवेदित्याक्षेपपरिहारः	५४
सम्पूर्णफलसिद्ध्यै ज्ञानिना सत्कर्म कर्तव्यमेवेति कथनम्	५५
शेषतात्पर्यचन्द्रिका	५६
पादसङ्गतिः	५६
विषयः चिन्ताक्रमश्च	५८
पूर्वपक्षः	५९
सिद्धान्तः	६२
पक्षत्रयानुसारेण कामचारश्रुत्यर्थविवरणम्	६७
टीकाक्षरार्थः	६८
पूर्वपक्षीय-आत्मस्वरूपदार्ढ्यन्यायविवरणस्य व्याख्यानम्	६९
'स्तुतयेऽनुमतिर्वेति' सूत्रस्य परोक्तार्थनिरासः	७०
'कामकारेण चैके' इति सूत्रस्य परोक्तार्थनिराकरणम्	७०
'उपमर्दं च' इति सूत्रस्य परव्याख्यानिरासः	७१
'ऊर्ध्वरेतस्सु च शब्दे हि' इति सूत्रस्य परव्याख्यानिरासः	७२
'परामर्शं जैमिनिः' इत्यादिसूत्रस्य परकृतव्याख्यानिराकरणम्	७३
'अनुष्ठेयम्' इति सूत्रस्य परकृतव्याख्यानिराकरणम्	७६
'विधिर्वा धारणवत्' इत्यस्य परकृतव्याख्यानिरासः	७६
'स्तुतिमात्रम्' इत्यादिसूत्रद्वयस्य उभयोर्व्याख्यानपरीक्षा	७७
'भावशब्दाच्च' इति सूत्रस्य स्वव्याख्यानसमर्थनम्	७८
'परिप्लवार्थाः', 'तथा चैकवाक्य' इति सूत्रयोः परकृतव्याख्यानिराकरणम्	७९

विषयः	पृ.सं.

‘अत एव च’ इति सूत्रस्य परकृतव्याख्यानिराकरणम् ८०
‘अत एव च’ इति सूत्रस्य रामानुजीयाभिमतार्थनिराकरणम् ८०
सर्वापेक्षेति सूत्रस्य परकृतव्याख्यानिरासः ८१
‘शमदमाद्युपेतः’ इति सूत्रस्य परकृतव्याख्यानं तन्निरसनं च ८३
सर्वान्नेत्यादिसूत्रचतुष्टयस्य उभयोः व्याख्या ८६
तन्निरासः ८७
सिद्धान्तीयस्थितिन्यायविवरणस्य व्याख्यानम् ९२
एतदधिकरणसङ्गतत्वेन सङ्क्षेपभाष्यव्याख्यानम् ९३
३.४.५ अथ उभयलिङ्गाधिकरणम् ९६
सूत्रभाष्यम् ९६
तत्त्वप्रकाशिका ९८
सङ्गत्यादि ९८
पूर्वपक्षः ९९
सिद्धान्तः ९९
महाप्रयत्नेनापि अयोग्यताया अभिभवितुमशक्यत्वाद् योग्यानामेव ज्ञानप्राप्तिरिति निरूपणम् ९९
मिश्रज्ञानिनामपि स्वभावाभिभवो नास्तीति निरूपणम् १००
भगवतः विशेषानुग्रहपात्रत्वाद् देवानामेव ज्ञानादीति निरूपणम् १००
ज्ञानादीनां देवादिस्वभावत्वेन तदाभिभवो नास्तीति स्मृत्या निरूपणम् १००
स्वभावानभिभवस्य युक्त्या समर्थनम् १०१
जैमिनिमतेऽपि स्वरूपाभिभवो नास्तीति निरूपणम् १०१
शेषतात्पर्यचन्द्रिका १०२
एतदधिकरणप्रतिपाद्यविषयः १०२
सङ्गतिः १०३

विषयः	पृ.सं.

पूर्वः पक्षः १०४
सिद्धान्तः १०५
टीकाक्षरार्थः १०६
टीकायां पूर्वपक्षीयनिजस्वभावन्यायविवरणव्याख्यानम् १०७
टीकायां सिद्धान्तीयविभक्ततान्यायविवरणव्याख्यानम् १०७
टीकायां सिद्धान्तीयस्थितिन्यायविवरणव्याख्यानम् १०९
सूत्रक्रमः १०९
सङ्क्षेपभाष्यस्य एतदधिकरणपरतया योजना १११
३.४.६ अथ आधिकारिकाधिकरणम् ११२
सूत्रभाष्यम् ११२
तत्त्वप्रकाशिका ११३
सङ्गत्यादि ११३
पूर्वपक्षः ११४
सिद्धान्तः ११४
देवतापदं नाऽकाङ्क्षमित्यस्य कैमुत्येन समर्थनम् ११५
ज्ञानभक्त्यादिविषये आकाङ्क्षायमनाकाङ्क्षायां वा दोषो नास्तीति निरूपणम् ११५
शेषतात्पर्यचन्द्रिका **११६**
एतदधिकरणप्रतिपाद्यविषयः ११६
अनन्तरसङ्गतिः ११६
चिन्ताक्रमः ११७
पूर्वपक्षः ११७
सिद्धान्तः ११८
टीकायां पूर्वपक्षीयनिजस्वभावन्यायविवरणस्य व्याख्यानम् ११८

विषयः	पृ.सं.
टीकायां सिद्धान्तीयविभक्ततान्यायविवरणस्य व्याख्यानम्	११९
परोक्ताश्रमकर्माधिकरणम्	११९
तन्निरासः	१२०
भामतीमतप्रतिक्षेपः	१२०
कल्पतरुमतप्रतिक्षेपः	१२०
परेषामधिकरणे विहितत्वाच्चेति प्रथमसूत्रव्याख्यानपरीक्षा	१२२
परेषां सहकारित्वेन चेति द्वितीयसूत्रव्याख्यानपरीक्षा	१२२
परेषां सर्वथापीति तृतीयसूत्रव्याख्यानपरीक्षा	१२३
परेषाम् अनभिभवमिति चतुर्थसूत्रव्याख्यानपरीक्षा	१२४
उभयोर्विधुराधिकरणशरीरम्	१२४
तन्निरासः	१२४
पराभिमतस्यान्तरासूत्रार्थस्य निरासः	१२६
परेषां 'अपि स्मर्यते' सूत्रव्याख्याननिरासः	१२६
परेषां विशेषानुग्रहसूत्रव्याख्यानिरासः	१२७
परेषाम् अतस्त्वितरत् सूत्रव्याख्याननिरासः	१२७
परोक्तं तद्भूताधिकरणशरीरम्	१२८
तन्निरसनम्	१२८
परोक्तमाधिकारिकाधिकरणशरीरम्	१३०
तन्निरासः	१३०
परोक्तबहिरधिकरणस्वरूपम्	१३१
तन्निरासः	१३१
रामानुजीयानां तद्भूताधिकरणस्यायुक्तत्वम्	१३२
उभयोः तद्भूतस्येति सूत्रव्याख्याननिराकरणम्	१३२
उभयोः न चाधिकारिकमिति सूत्रार्थनिराकरणम्	१३३

विषयः	पृ.सं.
उभयोः उपपूर्वमिति सूत्रव्याख्याननिरासः	१३३
उभयोः 'बहिस्तु' इति सूत्रव्याख्याननिरासः	१३६
३.४.७ अथ फलश्रुत्यधिकरणम्	१३७
सूत्रभाष्यम्	१३७
तत्त्वप्रकाशिका	१३८
सङ्गत्यादि	१३८
पूर्वपक्षः	१३८
सिद्धान्तः	१३९
मुख्यकारणत्वेन देवानां मुख्यं फलं, प्रजानां सहकारित्वेनाल्पं फलमिति बादरायणीयमतवर्णनम्	१३९
शेषतात्पर्यचन्द्रिका	**१४०**
सङ्गतिः	१४२
विषयः चिन्ताक्रमश्च	१४३
पूर्वपक्षः	१४३
सिद्धान्तः	१४५
तत्त्वप्रदीपकृन्मतेन फलश्रुत्यधिकरणशरीरम्	१४७
संशयः पूर्वपक्षश्च	१४७
सिद्धान्तः	१४८
प्रकारान्तरेण फलश्रुत्यधिकरणरचनम्	१५०
प्रथमसूत्रार्थः	१५०
द्वितीयसूत्रार्थः	१५१
तृतीयसूत्रार्थः	१५२
उभयोः स्वाम्यधिकरणस्वरूपम्	१५३
तन्निराकरणम्	१५३

विषयः	पृ.सं.
टीकायां पूर्वपक्षीयस्वातन्त्र्यन्यायविवरणस्य व्याख्यानम्	१५६
सिद्धान्तीयात्वरयैवसिद्धिन्यायविवरणस्य व्याख्यानम्	१५७
अणुभाष्यस्यैतदधिकरणतात्पर्यपरत्ववर्णनम्	१५८
३.४.८ अथ कृत्स्नभावाधिकरणम्	१५९
सूत्रभाष्यम्	१५९
तत्त्वप्रकाशिका	१६०
सङ्गत्यादि	१६०
पूर्वपक्षः	१६०
सिद्धान्तः	१६०
शेषतात्पर्यचन्द्रिका	१६१
सङ्गतिः	१६१
अन्तरागर्भिणीन्यायेनाधिकरणद्वयम्	१६२
संशयः	१६२
पूर्वपक्षः	१६३
सिद्धान्तः	१६४
अन्तरागर्भिणीन्यायेन अधिकरणान्तरे पूर्वपक्षः	१६४
अधिकरणान्तरे सिद्धान्तः	१६५
उभयोक्तसहकार्यन्तरविध्यधिकरणम्	१६६
तन्निरासः	१६७
परोक्तस्य सहकार्यन्तरसूत्रव्याख्यानस्य निरासः	१६९
परोक्तकृत्स्नसूत्रव्याख्यानिरासः	१७०
परोक्तमौनसूत्रव्याख्यानिरासः	१७०
टीकाक्षरार्थः	१७१
आपूर्णविशेषयोग्यतेत्युक्तपूर्वपक्षीयन्यायविवरणस्य व्याख्यानम्	१७२

विषयः	पृ.सं.
अत्वरयैव सिद्धिरित्युक्तसिद्धान्तीयन्यायविवरणस्य व्याख्यानम्	१७२
सिद्धान्तीयन्यायविवरणाक्षरार्थः	१७३
सूत्रद्वयार्थः	१७३
सङ्क्षेपभाष्यस्य एतदधिकरणतात्पर्यपरत्वेन व्याख्यानम्	१७४
३.४.९ अथ अनाविष्काराधिकरणम् (अन्वयाधिकरणम्)	१७५
सूत्रभाष्यम्	१७५
तत्त्वप्रकाशिका	१७५
सङ्गत्यादि	१७५
पूर्वपक्षः	१७६
सिद्धान्तः	१७६
शेषतात्पर्यचन्द्रिका	१७७
सङ्गतिः	१७७
विषयसंशयौ	१७७
पूर्वः पक्षः	१७८
सिद्धान्तः	१७८
उभयोरनाविष्काराधिकरणशरीरम्	१७८
तन्निरासः	१७९
टीकाक्षरार्थः	१८०
आपूर्णविशेषयोग्यतेत्युक्तपूर्वपक्षीयन्यायविवरणम्	१८१
अत्वरयैव सिद्धिरित्युक्तसिद्धान्तीयन्यायविवरणम्	१८१
ब्रह्मणा विरोचनं प्रत्युपदेशस्यादोषत्वम्	१८२
३.४.१० अथ ऐहिकाधिकरणम्	१८४
सूत्रभाष्यम्	१८४
तत्त्वप्रकाशिका	१८५

विषयः	पृ.सं.
सङ्गत्यादि	१८५
पूर्वपक्षः	१८५
सिद्धान्तः	१८५
शेषतात्पर्यचन्द्रिका	**१८६**
सङ्गतिः	१८६
पूर्वपक्षः	१८६
सिद्धान्तः	१८७
परेषामधिकरणशरीरम्	१८७
तन्निरासः	१८८
टीकायामधिकरणप्रतिपाद्यनिष्कर्षः	१९०
संशयनिष्कर्षः	१९१
टीकायां विरोधहानिरूपपूर्वपक्षन्यायविवरणस्य व्याख्यानम्	१९२
टीकायाम् अत्वरयैव सिद्धिरूपसिद्धान्तन्यायविवरणस्य व्याख्यानम्	१९२
एतदधिकरणसङ्गतत्वेन सङ्क्षेपभाष्यव्याख्यानम्	१९३
३.४.११ अथ मुक्तिफलाधिकरणम्	१९४
सूत्रभाष्यम्	१९४
तत्त्वप्रकाशिका	१९४
सङ्गत्यादि	१९४
पूर्वपक्षः	१९५
सिद्धान्तः	१९५
शेषतात्पर्यचन्द्रिका	१९६
सङ्गतिः	१९६
चिन्ताक्रमः	१९६
पूर्वपक्षः	१९६

विषयः	पृ.सं.
सिद्धान्तः	१९७
परोक्तं मुक्तिफलाधिकरणशरीरम्	१९८
तन्निरासः	१९९
रामानुजोक्तं मुक्तिफलाधिकरणम्	२०२
तन्निरासः	२०३
उभयोक्तैहिकसूत्रार्थनिरासः	२०३
उभयोः मुक्तिफलसूत्रार्थनिरासः	२०३
परोक्ताः पादार्थाः सङ्गतयश्च	२०४
परोक्तप्रथमपादार्थनिरासः	२०५
द्वितीयपादे स्वप्नावस्थानिरूपणवैयर्थ्यम्	२०६
परोक्ततृतीयपादार्थनिरासः	२०८
परोक्तचतुर्थपादार्थनिरासः	२०९
टीकायां न्यायविवरणवाक्ययोजना	२१०
सूत्रार्थः	२१०
एतदधिकरणसङ्गततया सङ्क्षेपभाष्ययोजना	२११
॥ चतुर्थाध्याये प्रथमः पादः ॥	
४.१.१ अथ आवृत्त्यधिकरणम्	२१५-२१७
सूत्रभाष्यम्	२१५-२१८
तत्वप्रकाशिका	२१५
एतदध्यायप्रतिपाद्यविषयः	२१५
एतत्पादप्रतिपाद्यविषयः	२१६
सङ्गत्यादि	२१६
पूर्वपक्षः	२१६
सिद्धान्तः	२१७

विषयः	पृ.सं.
शेषतात्पर्यचन्द्रिका	**२१८**
मङ्गलाचरणम्	२१८
एतदध्यायप्रतिपाद्यविषयः	२१८
प्रतिपाद्यैक्यान्न पादभेद इति शङ्का, तत्परिहारश्च	२१८
पादक्रमोल्लङ्घने कारणोक्तिः	२२१
आवृत्त्यधिकरणे चिन्ताक्रमः पूर्वपक्षश्च	२२२
सिद्धान्तः	२२४
पराभिमताध्यायपादाधिकरणार्थपरीक्षा	२२६
रामानुजीयाभिमताध्यायपादार्थादिविमर्शः	२२७
पराभिमताधिकरणपरीक्षा	२२८
भामतीमतनिरासः	२३०
परोक्तसूत्रार्थविमर्शः	२३२
पराभिमतद्वितीयसूत्रार्थनिरासः	२३३
रामानुजाभिमताधिकरणपरीक्षा	२३४
रामानुजोक्तस्य प्रथमसूत्रार्थस्य विमर्शः	२३५
रामानुजोक्तस्य द्वितीयसूत्रार्थस्य विमर्शः	२३५
टीकाक्षरार्थः	२३६
सुशक्यताख्यपूर्वपक्षन्यायविवरणम्	२३७
महाफलत्वाख्यसिद्धान्तन्यायविवरणम्	२३८
सङ्क्षेपभाष्यम्	२३८
४.१.२ अथ आत्मोपगमाधिकरणम्	२४०
सूत्रभाष्यम्	२४०
तत्त्वप्रकाशिका	२४०
सङ्गत्यादि	२४०

विषयः	पृ.सं.
पूर्वपक्षः	२४१
सिद्धान्तः	२४१
शेषतात्पर्यचन्द्रिका	२४२
सङ्गतिः	२४२
पूर्वपक्षः	२४२
सिद्धान्तः	२४३
पराभिमताधिकरणपरीक्षा	२४३
जीवस्यैव संसारित्वापोहेनेश्वरत्वमत्र प्रतिपाद्यत इति परोक्तस्य विमर्शः	२४५
रामानुजाभिमताधिकरणपरीक्षा	२४९
टीकाक्षरार्थः	२५३
शश्वदतिप्रसिद्ध्याख्यपूर्वपक्षन्यायविवरणम्	२५४
प्रविविक्तताख्यसिद्धान्तन्यायविवरणम्	२५४
सूत्रार्थः	२५५
सङ्क्षेपभाष्यस्यैतदधिकरणतात्पर्यसूचकत्वम्	२५५
४.१.३ अथ नप्रतीकाधिकरणम्	२५६
सूत्रभाष्यम्	२५६
तत्त्वप्रकाशिका	२५६
सङ्गत्यादि	२५६
पूर्वपक्षः	२५६
सिद्धान्तः	२५७
शेषतात्पर्यचन्द्रिका	२५८
सङ्गत्यादि	२५८
पूर्वपक्षः	२५९
सिद्धान्तः	२५९

विषयः	पृ.सं.
अद्वैत्यभ्युपगताधिकरणपरीक्षा	२६०
विशिष्टाद्वैत्यभिमतसूत्रार्थविमर्शः	२६३
टीकाक्षरार्थः	२६३
विवेकाख्यपूर्वपक्षन्यायविवरणम्	२६३
सन्धिग्रहाख्यसिद्धान्तन्यायविवरणम्	२६४
सङ्क्षेपभाष्ये एतदधिकरणतात्पर्यसूचनम्	२६५
सूत्रार्थः	२६५
४.१.४ अथ ब्रह्मदृष्ट्यधिकरणम्	२६६
सूत्रभाष्यम्	२६६
तत्त्वप्रकाशिका	२६६
सङ्गत्यादि	२६६
पूर्वपक्षः	२६६
सिद्धान्तः	२६७
शेषतात्पर्यचन्द्रिका	**२६७**
अनन्तरसङ्गतिः	२६७
पूर्वपक्षः	२६८
सिद्धान्तः	२६९
अद्वैत्यभ्युपगताधिकरणपरीक्षा	२६९
भामत्युक्तप्रतिक्षेपः	२७२
परोक्तसूत्रयोजनानिरासः	२७३
रामानुजोक्तमधिकरणम्	२७४
तन्निरासः	२७४
विन्यासाख्यपूर्वपक्षन्यायविवरणव्याख्यानम्	२७५
साधनाख्यसिद्धान्तन्यायविवरणव्याख्यानम्	२७६

विषयः	पृ.सं.
सङ्क्षेपभाष्ये एतदधिकरणतात्पर्यसूचनम्	२७६
सूत्रार्थः	२७६
४.१.५ अथ आदित्यादिमत्यधिकरणम्	२७७
सूत्रभाष्यम्	२७७
तत्त्वप्रकाशिका	२७७
सङ्गत्यादि	२७७
पूर्वपक्षः	२७८
सिद्धान्तः	२७८
शेषतात्पर्यचन्द्रिका	२७९
सङ्गतिः	२७९
पूर्वपक्षः	२७९
सिद्धान्तः	२८०
परेषामधिकरणम्	२८०
तन्निरासः	२८१
विचाराख्यपूर्वपक्षन्यायविवरणयोजनम्	२८५
आप्तकृत्याख्यसिद्धान्तन्यायविवरणयोजनम्	२८६
सङ्क्षेपभाष्येण एतदधिकरणतात्पर्यवर्णनम्	२८७
सूत्रार्थः	२८७
४.१.६ अथ आसनाधिकरणम्	२८८
सूत्रभाष्यम्	२८८-२९१
तत्त्वप्रकाशिका	२८८-२९१
सङ्गत्यादि	२८८
पूर्वपक्षः	२८८
सिद्धान्तः	२८९

विषयः	पृ.सं.
शेषतात्पर्यचन्द्रिका	**२९२**
सङ्गतिः	२९२
विषयसंशयौ	२९२
पूर्वपक्षः	२९३
सिद्धान्तः	२९४
आसीनेत्यादिसूत्रचतुष्टयस्य परोक्तार्थपरीक्षा	२९६
'यत्रैकाग्रता' इति सूत्रस्य परोक्तार्थपरीक्षा	२९९
रामानुजमतपरीक्षा	३००
टीकाक्षरार्थः	३००
सञ्ज्ञाख्यपूर्वपक्षन्यायविवरणव्याख्यानम्	३००
विशेषकार्याख्यसिद्धान्तन्यायविवरणम्	३०३
सङ्क्षेपभाष्येण एतदधिकरणतात्पर्यवर्णनम्	३०३
सूत्रक्रमः	३०४
४.१.७ अथ प्रायणाधिकरणम्	३०५
सूत्रभाष्यम्	३०५
तत्त्वप्रकाशिका	३०५
सङ्गत्यादि	३०५
पूर्वपक्षः	३०६
सिद्धान्तः	३०६
शेषतात्पर्यचन्द्रिका	३०७
सङ्गतिः	३०७
पूर्वपक्षः	३०७
सिद्धान्तः	३०८
शाङ्करभाष्योक्तमेतदधिकरणशरीरम्	३०८

विषयः	पृ.सं.
रामानुजाभिमतसूत्रार्थनिरासः	३१२
नानाप्रवृत्त्याख्यपूर्वपक्षन्यायविवरणयोजनम्	३१२
विशेषकार्याख्यसिद्धान्तन्यायविवरणयोजनम्	३१३
सङ्क्षेपभाष्येण एतदधिकरणार्थकथनम्	३१५
४.१.८ अथ तदधिगमाधिकरणम्	३१७
सूत्रभाष्यम्	३१७-३२३
तत्त्वप्रकाशिका	**३१७-३२४**
सङ्गत्यादि	३१७
पूर्वपक्षः	३१७
सिद्धान्तः	३१८
शेषतात्पर्यचन्द्रिका	३२५
सङ्गत्यादि	३२५
पूर्वपक्षः	३२५
सिद्धान्तः	३२६
अद्वैत्यभ्युगततदधिगमाधिकरणपरीक्षा	३३०
परोक्ततदधिगमसूत्रयोजनानिरासः	३३४
रामानुजाभिमततदधिगमाधिकरणपरीक्षा	३३४
अद्वैत्यभिमतेतरस्यापीतिसूत्रार्थनिरासः	३३५
शाङ्करभाष्योक्तस्य 'पाते तु' इति सूत्रशकलव्याख्यानस्य विमर्शः	३३७
रामानुजोक्तस्येतरस्यापीतिसूत्रार्थस्य निरासः	३३७
परोक्तस्य अनाराब्धेति सूत्रार्थस्य निरासः	३३८
अनारब्धकार्यसूत्रे रामानुजाभिमताधिकरणपरीक्षा	३४४
अग्निहोत्रादीति सूत्रद्वयेऽद्वैताभिमताधिकरणनिरासः	३४४
अग्निहोत्रादीति आद्यसूत्रस्य परोक्तार्थनिरासः	३५०

विषयः	पृ.सं.
अतोऽन्यदपीति द्वितीयसूत्रस्य परव्याख्यानिरासः	३५०
अग्निहोत्रादीत्यादिसूत्रद्वयस्य रामानुजाभिमतव्याख्यानिरासः	३५१
यदेवेति पराभिमताधिकरणपरीक्षा	३५१
रामानुजोक्तस्य यदेवेति सूत्रार्थस्य निरासः	३५३
भोगेनेति परोक्ताधिकरणस्य परीक्षा	३५४
रामानुजोक्तस्य भोगेनेत्यधिकरणस्य परीक्षा	३५६
टीकाक्षरार्थः	३५७
कृतकृत्यतेति पूर्वपक्षन्यायविवरणव्याख्यानम्	३५८
विवरणार्थः	३५९
कृतसंस्थित्याख्यसिद्धान्तन्यायविवरणव्याख्यानम्	३५९
विवरणार्थः	३६०
सूत्रार्थः	३६०
सङ्क्षेपभाष्यस्यैतदधिकरणतात्पर्यसूचकत्वम्	३६३
॥ अथ द्वितीयः पादः ॥	
४.२.१ अथ वाङ्मनसाधिकरणम्	३६५
सूत्रभाष्यम्	३६५-३६६
तत्त्वप्रकाशिका	३६५-३६७
सिद्धान्तः	३६६
शेषतात्पर्यचन्द्रिका	३६७
मङ्गलाचरणम्	३६७
एतत्पादप्रतिपाद्यविषयः	३६७
संङ्गत्यादि	३६९
पूर्वपक्षः	३६९
सिद्धान्तः	३७०

विषयः	पृ.सं.
परेषां पादार्थकथनं वाङ्मनसाधिकरणशरीरं च	३७३
परोक्तपादार्थनिरासः	३७४
रामानुजरीत्या परोक्ताधिकरणनिरासः	३७६
तन्निरासः	३७६
स्वमतरीत्या परोक्तवाङ्मनसाधिकरणनिरासः	३७७
परोक्तवाङ्मनसीति सूत्रव्याख्याननिरासः	३७८
परोक्तस्य अत एवेति सूत्रव्याख्यानस्य निरासः	३७८
टीकाक्षरार्थः	३७९
टीकायां पूर्वपक्षीयव्यामिश्रतान्यायव्याख्यानम्	३७९
टीकायां सिद्धान्तीयविशेषसाम्यश्रुतिन्यायव्याख्यानम्	३८०
विवरणार्थः	३८१
सूत्रार्थः	३८२
४.२.२ अथ मनोऽधिकरणम्	३८४
सूत्रभाष्यम्	३८४
तत्त्वप्रकाशिका	३८४
सङ्गतिः	३८४
पूर्वपक्षः	३८४
सिद्धान्तः	३८५
शेषतात्पर्यचन्द्रिका	३८५
सङ्गतिः	३८५
पूर्वपक्षः	३८६
सिद्धान्तः	३८६
परकीयं मनोऽधिकरणम्	३८६
रामानुजाभिमतमनोऽधिकरणम्	३८७

विषयः	पृ.सं.
उभयोक्तसम्पत्तिशब्दार्थविमर्शः	३८८
टीकाक्षरार्थः	३८९
कार्यकरत्वरूपपूर्वपक्षन्यायविवरणम्	३८९
आढ्यतारूपसिद्धान्तन्यायविवरणव्याख्यानम्	३९०
विवरणार्थः	३९०
४.२.३ अथ अध्यक्षाधिकरणम्	३९४
सूत्रभाष्यम्	३९४
तत्त्वप्रकाशिका	३९४
सङ्गतिः	३९४
पूर्वपक्षः	३९५
सिद्धान्तः	३९५
शेषतात्पर्यचन्द्रिका	३९६
सङ्गत्यादि	३९६
पूर्वपक्षः	३९६
सिद्धान्तः	३९७
कार्यकरत्वाढ्यताख्ययोः पूर्वपक्षसिद्धान्तन्याययोर्विवरणम्	३९८
सूत्रार्थः	३९९
४.२.४ अथ भूताधिकरणम्	४००
सूत्रभाष्यम्	४००
तत्त्वप्रकाशिका	४००
सङ्गतिः	४००
पूर्वपक्षः	४००
सिद्धान्तः	४००
शेषतात्पर्यचन्द्रिका	४०१

विषयः	पृ.सं.
सङ्गत्यादि	४०१
पूर्वपक्षः	४०१
सिद्धान्तः	४०१
अर्थक्लृप्तिसमानलोपाख्ययोः पूर्वपक्षसिद्धान्तन्याययोर्विवरणम्	४०२
४.२.५ अथ अनेकलयाधिकरणम् (नैकस्मिन्नधिकरणम्)	४०३
सूत्रभाष्यम्	४०३
तत्त्वप्रकाशिका	४०३
सङ्गतिः	४०३
पूर्वपक्षः	४०३
सिद्धान्तः	४०४
शेषतात्पर्यचन्द्रिका	४०५
सङ्गतिः पूर्वपक्षश्च	४०५
सिद्धान्तः	४०५
अध्यक्षादित्रिसूत्र्यां परमतविमर्शः	४०५
कल्पतरुपरिमलोक्ततदुपगमवाक्यप्राबल्यनिरासः	४०७
सोऽध्यक्षे इति सूत्रस्याद्वैताभिमतव्याख्याविमर्शः	४०९
भूतेषु तच्छ्रुतेरिति सूत्रस्य परोक्तार्थनिरासः	४१०
नैकस्मिन्निति सूत्रस्य परोक्तार्थनिरासः	४११
टीकाक्षरार्थः	४१२
टीकायामर्थक्लृप्तिरूपपूर्वपक्षन्यायव्याख्यानम्	४१२
टीकायां सिद्धान्तीयसमानलोपन्यायव्याख्यानम्	४१३
४.२.६ अथ समनाधिकरणम्	४१७
सूत्रभाष्यम्	४१७-४२२
तत्त्वप्रकाशिका	४१७-४२२

विषयः	पृ.सं.
सङ्गतिः	४१७
पूर्वपक्षः	४१७
सिद्धान्तः	४१८
शेषतात्पर्यचन्द्रिका	४२२
सङ्गत्यादि	४२२
पूर्वपक्षः	४२३
सिद्धान्तः	४२४
उभयोक्तसमनाधिकरणपरीक्षा	४२५
भारतीतीर्थोक्ताधिकरणनिरासः	४२८
'अमृतत्वं चानुपोष्य' इति सूत्रांशव्याख्याविमर्शः	४२९
तदपीतेरित्यादिसूत्रचतुष्टयस्य परकीयं व्याख्यानम्	४३०
तन्निरासः	४३०
परेषां प्रतिषेधाधिकरणम्	४३२
रामानुजमते प्रतिषेधाधिकरणम्	४३३
उभयमतपरीक्षा	४३३
भारतीतीर्थाभिमततत्प्रतिषेधाधिकरणरचनानुवादनिरासौ	४३९
टीकायां पूर्वपक्षीयसुदाढर्यन्यायव्याख्यानम्	४४०
टीकायां सिद्धान्तीयमहिमान्यायव्याख्यानम्	४४१
'समना'शब्दव्युत्पत्तिः	४४२
विवरणार्थः	४४३
समनाधिकरणसूत्रक्रमः	४४६
४.२.७ अथ परा(लया)धिकरणम्	४४८
सूत्रभाष्यम्	४४८
तत्त्वप्रकाशिका	४४८

विषयः	पृ.सं.
सङ्गतिः	४४८
पूर्वपक्षः	४४८
सिद्धान्तः	४४८
शेषतात्पर्यचन्द्रिका	४४९
सङ्गतिः पूर्वपक्षश्च	४४९
सिद्धान्तः	४५०
परेषां परसम्पत्त्यधिकरणं तन्निरासश्च	४५१
रामानुजोक्तपरसम्पत्त्यधिकरणनिरासः	४५२
टीकाक्षरार्थः	४५४
परतन्त्रतेति पूर्वपक्षन्यायविवरणम्	४५४
'विशेष' रूपसिद्धान्तन्यायविवरणम्	४५५
४.२.८ अथ अविभागाधिकरणम्	४५६
सूत्रभाष्यम्	४५६
तत्त्वप्रकाशिका	४५६
सङ्गतिः	४५६
पूर्वपक्षः	४५६
सिद्धान्तः	४५७
शेषतात्पर्यचन्द्रिका	४५७
सङ्गत्यादि	४५७
पूर्वपक्षः सिद्धान्तश्च	४५९
परोक्ताविभागाधिकरणपरीक्षा	४५९
रामानुजोक्ताविभागाधिकरणनिरासः	४६१
टीकाक्षरार्थः	४६२
समानधर्मरूपपर्वपक्षन्यायविवरणम्	४६२

विषयः	पृ.सं.
कृतार्थतेति सिद्धान्तन्यायविवरणम्	४६३
४.२.९ अथ हृदयाग्रज्वलना(तदोकोऽ)धिकरणम्	४६४
सूत्रभाष्यम्	४६४-४६८
तत्त्वप्रकाशिका	४६४-४६९
सङ्गतिः	४६४
पूर्वपक्षः	४६५
सिद्धान्तः	४६५
शेषतात्पर्यचन्द्रिका	४७०
सङ्गत्यादि	४७०
पूर्वपक्षः	४७२
सिद्धान्तः	४७३
कृतशेषतेति पूर्वपक्षन्यायविवरणम्	४७४
शश्वदनुप्रवृत्तिरूपसिद्धान्तन्यायविवरणम्	४७५
विवरणार्थः	४७५
४.२.१० अथ प्रतिस्मरणाधिकरणम् (योग्यधिकरणम्.पा.)	४७९
सूत्रभाष्यम्	४७९
तत्त्वप्रकाशिका	४७९
सङ्गतिः	४७९
पूर्वपक्षः	४८०
सिद्धान्तः	४८०
शेषतात्पर्यचन्द्रिका	४८१
सङ्गत्यादि	४८१
पूर्वपक्षः सिद्धान्तश्च	४८२
परोक्तस्य तदोकोऽधिकरणस्य परीक्षा	४८३

विषयः	पृ.सं.
रामानुजोक्ततदोकोधिकरणपरीक्षा	४८८
उभयमतोक्तरश्म्यधिकरणपरीक्षा	४८९
निशीतिसूत्रस्याद्वैताभिमतव्याख्याविमर्शः	४९०
रामानुजोक्तनिशाधिकरणपरीक्षा	४९०
उभयमतोक्तदक्षिणायनाधिकरणपरीक्षा	४९१
योगिन इति सूत्रस्य परोक्तार्थनिरासः	४९२
'योगिनः' इति सूत्रस्य विशिष्टाद्वैतव्याख्याविमर्शः	४९२
लोकोपमेति पूर्वपक्षन्यायविवरणम्	४९३
शश्वदनुप्रवृत्तिरिति सिद्धान्तन्यायविवरणम्	४९३
विवरणार्थः	४९४
सङ्क्षेपभाष्यार्थः	४९४
॥ अथ तृतीयः पादः ॥	
४.३.१ अथार्चिराद्यधिकरणम्	४९७
सूत्रभाष्यम्	४९७
तत्त्वप्रकाशिका	४९७
सङ्गतिः	४९७
पूर्वपक्षः	४९८
सिद्धान्तः	४९८
शेषतात्पर्यचन्द्रिका	**४९९**
मङ्गलाचरणम्	४९९
एतत्पादप्रतिपाद्यविषयः	४९९
अनन्तरसङ्गतिः	५००
संशयः पूर्वपक्षश्च	५००
सिद्धान्तः	५०१

विषयः	पृ.सं.
उभयोक्तमर्चिराद्यधिकरणम्	५०२
तद्विमर्शः	५०४
परोदीरितसूत्रार्थविमर्शः	५०५
टीकायां न्यायमालोक्तपूर्वपक्षीयसुक्रमन्यायव्याख्यानम्	५०६
विवरणार्थः	५०६
टीकायां सिद्धान्तन्यायमालोक्तविशेषसम्प्राप्तिन्यायव्याख्यानम्	५०७
न्यायविवरणार्थः	५०७
ब्रह्मतर्कवचनार्थः	५११
सूत्रार्थः	५१२
४.३.२ अथ वायुगत्यधिकरणम्	५१३
सूत्रभाष्यम्	५१३
तत्त्वप्रकाशिका	५१३
सङ्गतिः	५१३
पूर्वपक्षः	५१३
सिद्धान्तः	५१३
शेषतात्पर्यचन्द्रिका	५१४
एतदधिकरणप्रतिपाद्यविषयः	५१४
सङ्गत्यादि	५१५
पूर्वपक्षः	५१५
सिद्धान्तः	५१५
परोक्तवाय्वधिकरणशरीरम्	५१६
तद्विमर्शः	५१७
रामानुजोक्तवाय्वधिकरणशरीरम्	५१९
तद्विमर्शः	५२०

विषयः	पृ.सं.
अप्रसिद्धश्रुत्युदाहरणाक्षेपपरिहारः	५२१
सुक्रम-विशेषसम्प्राप्तिरूपपूर्वपक्षसिद्धान्तन्याययोर्विवरणम्	५२२
सूत्रार्थः	५२३
४.३.३ अथ तटिदधिकरणम्	५२४
सूत्रभाष्यम्	५२४
तत्त्वप्रकाशिका	५२४
सङ्गतिः	५२४
पूर्वपक्षः	५२४
सिद्धान्तः	५२५
शेषतात्पर्यचन्द्रिका	५२५
अनन्तरसङ्गतिः	५२५
पूर्वपक्षः	५२६
सिद्धान्तः	५२६
उभयोक्ततटिदधिकरणशरीरम्	५२६
तद्विमर्शः	५२७
शाङ्करभाष्योक्तविद्युद्वरुणसम्बन्धविमर्शः	५२८
टीकाक्षरार्थः	५३१
सुक्रम-विशेषसम्प्राप्तिरूपपूर्वपक्षसिद्धान्तन्याययोर्विवरणम्	५३१
सूत्रार्थः	५३२
४.३.४ अथ आतिवाहिकाधिकरणम्	५३३
सूत्रभाष्यम्	५३३
तत्त्वप्रकाशिका	५३३-५३४
सङ्गतिः	५३३
पूर्वपक्षः	५३३

विषयः	पृ.सं.
सिद्धान्तः	५३३
शेषतात्पर्यचन्द्रिका	५३५
एतदधिकरणप्रतिपाद्यविषयः, सङ्गतिश्च	५३५
विषयसन्देहौ	५३६
अनन्तरसङ्गतिः	५३६
पूर्वपक्षः	५३६
सिद्धान्तः	५३७
सुक्रम-विशेषसम्प्राप्तिरूपपूर्वपक्षसिद्धान्तन्याययोर्विवरणम्	५३७
सूत्रार्थः	५४०
४.३.५ अथ वैद्युताधिकरण्	५४१
सूत्रभाष्यम्	५४१
तत्त्वप्रकाशिका	५४१
सङ्गतिः	५४१
पूर्वपक्षः	५४१
सिद्धान्तः	५४२
शेषतात्पर्यचन्द्रिका	५४२
एतदधिकरणप्रतिपाद्यविषयः	५४२
विषयः संशयः पूर्वपक्षश्च	५४२
सिद्धान्तः	५४३
उभयोक्तमातिवाहिकाधिकरणम्	५४४
तद्विमर्शः	५४५
आतिवाहिकसूत्रव्याख्यानिरासः	५४६
'उभयव्यामोहात्' इति सूत्रव्याख्याविमर्शः	५४६
विशिष्टाद्वैतिकृतस्योभयव्यामोहसूत्रापलापस्य निराकरणम्	५४७

विषयः	पृ.सं.
वैद्युतेनैवेति सूत्रव्याख्याविमर्शः	५४७
टीकायां पूर्वपक्षीयविक्रमन्यायव्याख्यानम्	५४८
टीकायां सिद्धान्तीयोरुत्वन्यायव्याख्यानम्	५४८
सूत्रार्थः	५५०
४.३.६ अथ कार्याधिकरणम्	५५१
सूत्रभाष्यम्	५५१-५५५
तत्त्वप्रकाशिका	५५१-५५६
सिद्धान्तः	५५६
सूत्रभाष्यम्	५५७
तत्त्वप्रकाशिका	५५८
शेषतात्पर्यचन्द्रिका	५५८
अन्तश्चतुर्भेदाधिकरणस्यास्य प्रतिपाद्यविषयाः	५५८
प्रथमः पूर्वपक्षः	५५९
प्रथमः सिद्धान्तः	५६१
द्वितीयः पूर्वपक्षः	५६१
द्वितीयः सिद्धान्तः	५६१
तृतीयः पूर्वपक्षः	५६२
तृतीयः सिद्धान्तः	५६३
चतुर्थः पूर्वपक्षः	५६४
चतुर्थः सिद्धान्तः	५६४
परोक्तं कार्याधिकरणम्	५६७
तद्विमर्शः	५६८
प्रतीकाप्रतीकविभागे रामानुजमतनिरासः	५७१
मुनिमतयोः पूर्वपक्षसिद्धान्तभावानौचित्यम्	५७२

विषयः	पृ.सं.
अप्रतीकेत्यादिद्विसूत्र्यां परकृतं व्याख्यानम्	५७४
तन्निरासः	५७५
टीकाक्षरार्थः	५७६
टीकायामष्टानां पूर्वपक्षसिद्धान्तन्यायानां विवरणम्	५७७
सूत्रार्थः	५८०
सूत्रक्रमौचित्यम्	५८२
सङ्क्षेपभाष्येऽधिकरणषट्कस्य तात्पर्योक्तिः	५८२
अथ चतुर्थः पादः	
सूत्रभाष्यम्	५८४
४.४.१ अथ सम्पद्याधिकरणम्	५८४
तत्त्वप्रकाशिका	५८४
एतत्पादार्थकथनम्	५८४
सङ्गत्यादि	५८५
पूर्वपक्षः	५८५
सिद्धान्तः	५८५
शेषतात्पर्यचन्द्रिका	५८६
मङ्गलाचरणम्	५८६
एतत्पादप्रतिपाद्यविषयः	५८६
सङ्गतिः	५८६
संशयः	५८७
पूर्वपक्षः	५८८
सिद्धान्तः	५८८
टीकाक्षरार्थः	५८९
टीकायां पूर्वपक्षीयातिक्रमोत्त्याख्यन्यायविवरणव्याख्यानम्	५८९

विषयः	पृ.सं.
टीकायां सामान्यरूपाख्यसिद्धान्तन्यायविवरणव्याख्यानम्	५९१
सूत्रार्थः	५९२
४.४.२ अथ मुक्ताधिकरणम्	५९४
सूत्रभाष्यम्	५९४
तत्त्वप्रकाशिका	५९४
सङ्गत्यादि	५९४
पूर्वपक्षः	५९४
सिद्धान्तः	५९५
शेषतात्पर्यचन्द्रिका	५९५
सङ्गतिः	५९५
पूर्वपक्षः	५९७
सिद्धान्तः	५९७
पराभिमतमुक्तिद्वैविध्यनिरासः	५९८
टीकायां पूर्वपक्षीयकृतिन्यायविवरणव्याख्यानम्	६०६
टीकायां प्रतिभानरूपसिद्धान्तन्यायविवरणव्याख्यानम्	६०६
विवरणार्थः	६०६
४.४.३ अथाऽत्माधिकरणम्	६०८
सूत्रभाष्यम्	६०८
तत्त्वप्रकाशिका	६०८
सङ्गत्यादि	६०८
पूर्वपक्षः	६०८
सिद्धान्तः	६०९
शेषतात्पर्यचन्द्रिका	६०९
एतदधिकरणप्रतिपाद्यविषयः	६०९

विषयः	पृ.सं.
सङ्गतिः	६०९
पूर्वपक्षः	६१०
सिद्धान्तः	६११
पराभिमतात्माधिकरणपरीक्षा	६१२
टीकायां पूर्वपक्षीयार्थलाभरूपन्यायविवरणम्	६१५
टीकायां सिद्धान्तीयोक्तिन्यायविवरणव्याख्यानम्	६१६
क्रमभङ्गे कारणोक्तिः	६१७
४.४.४ अथाविभागाधिकरणम्	६१८
सूत्रभाष्यम्	६१८
तत्त्वप्रकाशिका	६१८
सङ्गत्यादि	६१८
पूर्वपक्षः	६१८
सिद्धान्तः	६१९
शेषतात्पर्यचन्द्रिका	६१९
पेटिकासङ्गतिः	६१९
अनन्तरसङ्गतिः	६२०
पूर्वपक्षः	६२१
सिद्धान्तः	६२१
पराभिमताविभागाधिकरणपरीक्षा	६२१
रामानुजीयाविभागाधिकरणपरीक्षा	६२२
टीकाक्षरार्थः	६२३
टीकायां पूर्वपक्षीयपरागतिरूपन्यायविवरणम्	६२३
टीकायाम् आश्चर्यतेति सिद्धान्तन्यायविवरणव्याख्यानम्	६२४
सूत्रार्थः	६२४

विषयः	पृ.सं.
४.४.५ अथ ब्राह्माधिकरणम् (चितिमात्राधिकरणम्) ॥ ५ ॥	६२५
सूत्रभाष्यम्	६२५-६२७
तत्त्वप्रकाशिका	६२५-६२७
सङ्गत्यादि	६२५
पूर्वपक्षः	६२५
सिद्धान्तः	६२६
शेषतात्पर्यचन्द्रिका	६२८
सङ्गतिः	६२८
संशयपूर्वपक्षौ	६२८
सिद्धान्तः	६२९
परोक्तब्राह्माधिकरणशरीरम्	६३०
पराभिमतब्रह्माधिकरणस्य निरासः	६३१
विशिष्टाद्वैतमतरीत्या ब्राह्माधिकरणशरीरम्	६३३
तन्निरासः	६३४
टीकाक्षरार्थः	६३५
पारगत्याख्यपूर्वपक्षीयन्यायविवरणव्याख्यानम्	६३५
सिद्धान्तीयाकृत्रिमताख्यन्यायविवरणव्याख्यानम्	६३६
विवरणार्थः	६३६
४.४.६ अथ सङ्कल्पाधिकरणम्	६३७
सूत्रभाष्यम्	६३७
तत्त्वप्रकाशिका	६३७
सङ्गत्यादि	६३७
पूर्वपक्षः	६३७
सिद्धान्तः	६३७

विषयः	पृ.सं.
शेषतात्पर्यचन्द्रिका	६३८
सङ्गतिः	६३८
पूर्वपक्षः	६३८
सिद्धान्तः	६३९
टीकाक्षरार्थः	६३९
टीकायां तदोक इत्युक्तपूर्वपक्षीयन्यायविवरणव्याख्यानम्	६३९
अस्तदोष इत्युक्तसिद्धान्तन्यायविवरणम्	६३९
४.४.७ अथानन्याधिपतित्वाधिकरणम्	६४१
सूत्रभाष्यम्	६४१
तत्त्वप्रकाशिका	६४१
सङ्गत्यादि	६४१
पूर्वपक्षः	६४१
सिद्धान्तः	६४२
शेषतात्पर्यचन्द्रिका	६४२
सङ्गतिः पूर्वपक्षश्च	६४२
सिद्धान्तः	६४३
सूत्रार्थः	६४३
परेषामनन्याधिपतित्वाधिकरणशरीरम्	६४३
तन्निरासः	६४४
भारतीतीर्थोक्तसङ्गतिनिरासः	६४५
अत एव चेति सूत्रस्य परोक्तार्थनिरासः	६४६
टीकाक्षरार्थः	६४६
टीकायां पूर्वपक्षीय-तदोक इत्युक्तन्यायविवरणव्याख्यानम्	६४६
टीकायां सिद्धान्तीयास्तदोषाख्यन्यायविवरणव्यख्यानम्	६४६

विषयः	पृ.सं.
४.४.८ अथोभयविधभोगाधिकरणम्	६४७
सूत्रभाष्यम्	६४७-६५२
तत्त्वप्रकाशिका	६४७-६५२
सङ्गत्यादि	६४७
पूर्वपक्षः	६४७
सिद्धान्तः	६४९
शेषतात्पर्यचन्द्रिका	६५३
सङ्गतिः	६५३
पूर्वपक्षः	६५४
सिद्धान्तः	६५५
परेषामुभयविधभोगाधिकरणशरीरम्	६५६
तन्निरासः	६५८
प्रदीपस्वाप्ययसूत्रयोः परोक्तार्थः	६५९
तन्निरासः	६६०
टीकाक्षरार्थः	६६२
टीकायां पूर्वपक्षीयसमस्तकार्यन्यायविवरणव्याख्यानम्	६६२
टीकायां विशेषक्लृप्त्याख्यसिद्धान्तन्यायविवरणव्याख्यानम्	६६२
सूत्रक्रमौचित्यम्	६६३
४.४.९ अथ सर्वकामाधिकरणम्	६६४
सूत्रभाष्यम्	६६४-६६८
तत्त्वप्रकाशिका	६६४-६६८
सङ्गत्यादि	६६४
पूर्वपक्षः	६६४
सिद्धान्तः	६६४

विषयः	पृ.सं.

विषयः	पृ.सं.
शेषतात्पर्यचन्द्रिका	६६९
सङ्गतिः	६६९
पूर्वपक्षः	६६९
सिद्धान्तः	६६९
टीकाक्षरार्थः टीकायां पूर्वपक्षीयसमस्तकार्यविवरणव्याख्यानम्	६७०
टीकायां सिद्धान्तीयविशेषकृप्तिन्यायविवरणव्याख्यानम्	६७१
विवरणार्थः	६७१
सूत्रार्थः	६७५
४.४.१० अथ स्थित्यधिकरणम्	६७७
सूत्रभाष्यम्	६७७
तत्त्वप्रकाशिका	६७७
सङ्गत्यादि	६७७
पूर्वपक्षः	६७८
सिद्धान्तः	६७८
सूत्रभाष्यम्	६७८
तंत्त्वप्रकाशिका	६७९
शेषतात्पर्यचन्द्रिका	६८०
पेटिकासङ्गतिः	६८०
पूर्वपक्षः	६८०
सिद्धान्तः	६८१
टीकाक्षरार्थः-टीकायां वशिताख्यपूर्वपक्षन्यायविवरणव्याख्यानम्	६८३
टीकायां कृतनिःश्रमत्वरूपसिद्धान्तन्यायविवरणव्याख्यानम्	६८४
सूत्रार्थः	६८६

विषयः	पृ.सं.
४.४.११ अथानावृत्त्यधिकरणम्	६८७
सूत्रभाष्यम्	६८७
तत्त्वप्रकाशिका	६८८
सङ्गत्यादि	६८८
पूर्वपक्षः	६८८
सिद्धान्तः	६८८
शेषतात्पर्यचन्द्रिका	६९०
सङ्गतिः	६९०
पूर्वपक्षः	६९१
सिद्धान्तः	६९१
उभयमताभ्युपगतानावृत्त्यधिकरणशरीरम्	६९१
तन्निरासः	६९३
रामानुजमतेऽनावृत्त्यधिकरणानुपपत्तिः	६९५
अद्वैतमोक्षेऽनावृत्तेरयोगः	६९५
टीकायां पूर्वपक्षीयविश्वसम्भावनान्यायविवरणव्याख्यानम्	६९६
टीकायां माहात्म्यरूपसिद्धान्तन्यायविवरणव्याख्यानम्	६९७
सङ्क्षेपभाष्ये एतत्पादीयाधिकरणानामर्थः	६९७
ब्रह्मसूत्रग्रन्थस्य मतान्तरप्रतिकूलत्वम्	७००

॥ श्रीरस्तु ॥

श्रीमद्ब्रह्मसूत्रभाष्यम्

श्रीमत्तत्त्वप्रकाशिका-शेषतात्पर्यचन्द्रिकासहितम्

॥ तृतीयाध्याये चतुर्थपादः ॥

॥ अथ पुरुषार्थाधिकरणम् ॥१॥

सूत्रभाष्यम्

ॐ ज्ञानसामर्थ्यमस्मिन् पाद उच्यते -

॥ॐ पुरुषार्थोऽतः शब्दादिति बादरायणः ॐ ॥

॥३-४-१ ॥

यद्दर्शनार्थमुपासनोक्ता तस्माद् दर्शनात् सर्वपुरुषार्थप्राप्तिरिति बादरायणो मन्यते ।

'यं यं लोकं मनसा संविभाति
विशुद्धसत्त्वः कामयते यांश्च कामान् ।
तं तं लोकं जयते तांश्च कामां-
स्तस्मादात्मज्ञं ह्यर्चयेद् भूतिकामः ॥' (मु.उ.३-१-१०)

इति शब्दात् ॥ १ ॥

॥ॐ शेषत्वात् पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः ॐ ॥

॥ ३-४-२ ॥

अस्त्येव मोक्षसाधनत्वं ज्ञानस्य[१] । स्वर्गादिषु तत्साधनकर्मशेषत्वेन ।

१. ह. अस्त्येव मोक्षसाधकत्वम् ।

'स्वर्गं धनाद् देहतो वै गृहाच्च
प्राप्स्यन्ति धीरा न त्वधीराः कुतश्चित्।'

इति वदति जैमिनिः ॥ २ ॥

॥ॐ आचारदर्शनात् ॐ ॥ ३-४-३ ॥

ज्ञानिनामेव देवादीनामाचारदर्शनात्॥ ३ ॥

॥ ॐ तच्छ्रुतेः ॐ ॥ ३-४-४ ॥

'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' (छा.उ. १.१.१०) इति शेषत्वश्रुतेः ॥ ४ ॥

॥ ॐ समन्वारम्भणात् ॐ ॥ ३-४-५ ॥

'कर्मैव देहं दैविकं मानुषं वाऽप्यन्वारभेन्नापरस्तत्र हेतुः।
भोगांस्तदीयांश्च यथाविभागं ददाति कर्मैव शुभाशुभं यत्॥'

इति माठरश्रुतेश्च। संशब्दः प्राधान्यं दर्शयति ॥ ५ ॥

॥ ॐ तद्वतो विधानात् ॐ ॥ ३-४-६ ॥

'ज्ञानी च कर्माणि सदोदितानि
कुर्यादकामः सततं भवेत।'

इति कमठश्रुतौ ज्ञानवतोऽपि विधानात्॥ ६ ॥

॥ ॐ नियमाच्च ॐ ॥ ३-४-७ ॥

'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳसमाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥' (ई.उ.२.)इति ॥ ७॥

॥ॐ अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॐ ॥
॥ ३-४-८ ॥

'ज्ञानादेव स्वर्गो ज्ञानादेवापवर्गो
ज्ञानादेव सर्वे कामाः[1] सम्पद्यन्ते।
तथापि यथा यथा कर्म कुरुते
तथा तथाऽधिको भवति ॥'

इति कौण्ठरव्यश्रुतेः। युधिष्ठिरादीनां राजसूयादिना फलाधिक्यदर्शनाच्चेति बादरायणस्य मतम्[2] ॥ ८ ॥

॥ ॐ तुल्यं तु दर्शनम् ॐ ॥ ३-४-९ ॥

राजसूयादिकृतावकृतौ च सममेव तेषां विज्ञानम्[3]।
'विज्ञातमेतत् सर्वेषां मुनीनां ब्रह्मदर्शनात्[4]।
स्यादेव मोक्षो नान्यस्मादिति तत्रापि चित्रता॥
स्वर्गादयः कर्मणैव नान्येनेत्यपरे विदुः।
ज्ञानेनाधिक्यमित्याहुर्जैमिन्याद्यास्तु केचन॥
अदृष्टमेव ज्ञानेन दृष्टं नैवोपलभ्यते।
इति केचिद् विदः प्राहुर्व्यासशिष्या इमेऽखिलाः॥
यस्माद् व्यासमतं सर्वं सत्यमेव ततोऽखिलम्।
यथाऽकाशस्त्वनन्तोऽपि व्यामो हस्तावधिस्तथा।
प्रादेशोऽपि हि सत्येन तथैतेषां मतानि तु॥

---

१. ह्. ज्ञानादेव कामाः
२. ह्. बादारायणमतम्
३. ह्. ज्ञानम्
४. ह्. तत्त्वदर्शनात्

स्वयं तु भगवान् व्यासो व्याप्तज्ञानमहांशुमान्।
अनन्ताकाशवत् पश्यन् निखिलं पुरुषोत्तमः॥
ज्ञानेनैवाप्यते सर्वं कर्मणा त्वधिकं भवेत्।
इति प्राह महायोगी पुमर्थानां विनिर्णयम्॥' इति भविष्यत्पर्वणि।
'ज्ञानिनामपि देवानां विशेषः कर्मभिर्भवेत्।
चीर्णेऽकृते वा ज्ञानस्य न विशेषोऽस्ति कर्मणि॥' इति ब्रह्मतर्के[४] ॥९॥

॥ इति पुरुषार्थाधिकरणम्॥ १ ॥

तत्त्वप्रकाशिका

॥ श्रीमद्धनुमद्भीममध्वान्तार्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

सङ्गत्यादि

एतत्पादार्थं दर्शयति- **ज्ञानेति ॥** भगवदपरोक्षज्ञानार्थमुपासनोक्ता। तज्ज्ञानं तया भवति इति चोक्तम्। तस्य ज्ञानस्य सामर्थ्यमत्रोच्यत इत्यर्थः। अत्रादौ ब्रह्मप्राप्तिसाधनज्ञानस्य सर्वपुरुषार्थसाधनत्वमहिम्नो वर्णनादस्ति शास्त्रादिसङ्गतिः । अन्यथा न तत्रातिशयेन प्रवृत्तिः स्यादिति तद् वर्णनीयम्। उपासनासाध्यतया प्रकृतं ज्ञानमत्र विषयः। किं मोक्षमात्रसाधनमुत फलान्तरस्यापि साधनम् इति सन्देहः । निरवधारणमुक्तिसाधनत्वोक्तेरुभयथा सम्भवः सन्देहबीजम्।

पूर्वपक्षः

ज्ञानं मोक्षमात्रसाधनमिति पूर्वः पक्षः । ज्ञानिनां मोक्षेतरपुरुषार्थेषु विरक्तत्वेन तदिच्छाया एवाभावात्। 'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात्', 'प्रजहाति यदा कामान्' इत्यादेः। इच्छाभावेऽपि तत्प्राप्तौ

४. ह. इति च ब्रह्मतर्के

पुरुषार्थत्वमेव न स्यात् । अतो ज्ञानस्य मोक्षमात्रसाधनत्वान्न तत् सर्वथाऽऽपायमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **पुरुषार्थ इति ॥** यस्य दर्शनस्यार्थे पूर्वमुपासनोक्ताऽतो दर्शनतः पुरुषैरर्थ्यमानं यावच्छुभं तावत् सर्वमाप्यत एव, नतु मोक्षमात्रम्। कुतः? 'यं यम्' इति शब्दादिति भगवान् बादरायणो मन्यत इत्यर्थः। संविभाति इच्छति। जयते प्राप्नोति। नच श्रुत्यादिना ज्ञानिनां मोक्षेतरपुरुषार्थेच्छाभावान्न ज्ञानात् सर्वपुरुषार्थप्राप्तिरिति युक्तम्। श्रुत्यादेः प्रायेण ज्ञानिनामन्येच्छाभावपरत्वात्। अस्माभिस्तु श्रुत्यवलम्बेन यस्य सौभरिकर्दमादिवद् भवतीच्छा तस्य ज्ञानादेव सर्वपुरुषार्थप्राप्तिर्भवतीत्यभ्युपगमात्॥ १॥

ज्ञानस्य कर्माङ्गत्वेन 'यं यम्' इति श्रुतौ पुरुषार्थवादः नतु मोक्ष इव स्वर्गादौ प्राधान्यादिति जैमिनिमतनिरूपणम्

एतमर्थमाक्षिपत् सूत्रमुपन्यस्य व्याचष्टे- **शेषत्वादिति ॥** यदुक्तं मोक्षादिसमस्तपुरुषार्थसाधनं ज्ञानमिति तत्रास्तु ज्ञानस्य मोक्षसाधनत्वं, नतु स्वर्गादिसाधनत्वम्। तत्साधनं तु कर्मैव। नचैवं 'यं यं लोकम्' इति ज्ञानस्य सर्वपुरुषार्थसाधनत्ववादविरोधः। ज्ञानस्यापि कर्मशेषत्वेन स्वर्गादिसाधनत्वाभ्युपगमात्। नच वाच्यं ज्ञानस्य कर्मशेषत्वाभ्युपगमेऽपि पुरुषार्थवादविरोधानतिवृत्तिः। पुरुषार्थवादे ज्ञानस्य प्राधान्यदर्शनात्। नहि शेषत्वे तथा प्रयोगो दृष्ट इति। स्वर्गसाधनकर्मशेषेऽपि धनादौ 'स्वर्गं धनात्' इति प्राधान्यप्रयोगदर्शनात्। तद्वदत्राप्युपपत्तेरिति जैमिनिराचार्यो मन्यत इति भावः। अत्र ज्ञानस्य कर्मशेषत्वं नाम कर्मणैव सिद्ध्यत्स्वर्गस्याधिक्यापादकत्वम्॥ २॥

ज्ञानिनां देवादीनां कर्मानुष्ठानदर्शनान्न ज्ञानस्य सर्वपुरुषार्थसाधनत्वमिति निरूपणम्

ननु ज्ञानस्यैव सर्वपुरुषार्थसाधनत्वं किं न स्याच्छ्रुतिबलात्। कुतः श्रुतेरर्थान्तरकल्पनेत्याशङ्कां परिहरत् सूत्रं पठित्वा व्याचष्टे- आचारेति ॥ देवास्तावज्ज्ञानिनः। 'नैव देवपदं प्राप्ता ब्रह्मदर्शनवर्जिताः' इति वचनात्। तेषां च कर्मानुष्ठानं दृश्यते 'यज्ञेन यज्ञमयजन्त देवाः' इत्यादौ। तथाच ज्ञानस्यैव सर्वपुरुषार्थसाधनत्वे कर्मानुष्ठानवैयर्थ्यं स्यात्। अतो न ज्ञानादेव सर्वपुरुषार्थप्राप्तिरिति भावः ॥ ३ ॥

यदेवेति श्रुत्या ज्ञानस्य कर्मशेषत्वनिरूपणम्

नन्वेवमस्तु ज्ञानकर्मणोरुभयोरपि स्वर्गादिसाधनत्वम्। ज्ञानस्य कर्मशेषत्वं कुतः? इत्याशङ्कां परिहरत् सूत्रं पठित्वा व्याचष्टे- तदिति ॥ न ज्ञानस्य कर्मशेषत्वाभावः । 'यदेव विद्यया' इति तदभिधायकश्रुतेरिति भावः। उपनिषदा स्वयोग्यया। वीर्यवत्तरमधिकफलसाधनम् ॥ ४ ॥

ज्ञानशेषत्वं साम्यं वा कर्मण एव किं न स्यादिति शङ्कायां कर्मैवेति श्रुत्या परिहारकथनम्

ननु यथा ज्ञानस्य प्राधान्यं श्रुतमपि न स्वीक्रियते किन्तु शेषत्वमेवैवं 'यदेव विद्यया' इति श्रुतमपि कर्मणः प्राधान्यं नाङ्गीकार्यम्। किं नाम? ज्ञानशेषत्वं कर्मणः साम्यं वा भवतु विशेषप्रमाणाभावादित्याशङ्कां परिहरत् सूत्रं पठित्वा तदभिमतश्रुतिमुदाहरति- समिति ॥ न स्वर्गादिसाधने कर्मणः शेषत्वं साम्यं वा ज्ञानेन, अपि तु प्राधान्येनारम्भकत्वम्। कुतः? 'कर्मैव' इति कर्मण एव प्राधान्येन स्वर्गाद्यारम्भकत्वश्रुतेरिति भावः। नापरस्तत्र हेतुरिति। कर्मशेषतयैव हेतुर्भवति न प्राधान्येन हेतुरस्तीत्यर्थः। ननु कर्मणः स्वर्गाद्यारम्भ-

कत्वमेव सूत्रितं न प्राधान्यं, तच्च परस्यापि सिद्धमित्यत आह- संशब्द इति ॥ ५ ॥

ज्ञानी चेति श्रुतौ ज्ञानिनः कर्मविधानाद् ज्ञानस्य कर्मशेषत्वसमर्थनम्

तथाऽपि न ज्ञानस्य कर्मशेषत्वं युक्तम्। किन्तु स्वयमेव पुरुषार्थहेतुः। कस्मात्? ज्ञानिकृतकर्मणः फलाभावात्। फलाभावेऽप्याचारस्तु मुक्तवल्लीलयैवेत्याशङ्कां परिहरत् सूत्रमुपन्यस्य व्याचष्टे- तद्वत इति ॥ न ज्ञानिनां कर्म लीलया मुक्तवत्। येन फलाभावः। 'ज्ञानी च कर्माणि' इति ज्ञानिनः कर्मविधानात्। विहिताचरणस्य लीलात्वाभावादिति भावः ॥ ६ ॥

कुर्वन्नेवेहेति श्रुतावकरणे प्रत्यवायश्रुतेः ज्ञानिनः कर्म न लीलामात्रमिति निरूपणम्

न केवलं विहितत्वाज्ज्ञानिनः कर्म न लीलामात्रम् अपित्वकरणे प्रत्यवायश्रुतेश्चेत्यर्थप्रतिपादकं सूत्रं पठित्वा तां श्रुतिमुदाहरति- नियमाच्चेति ॥ एवं कर्मकरणे त्वयि कर्म न लिप्यते। इतोऽन्यथाऽकरणे नरे ज्ञानिन्यपि त्वयि पापं कर्म न लिप्यत इति नास्तीत्यर्थः ॥ ७ ॥

ज्ञानस्यैव सर्वपुरुषार्थसाधनत्वं, कर्मणस्तु फलेऽतिशयाधायकत्वेन शेषत्वमिति स्वमतनिरूपणम्

एवं जैमिनिमतावलम्बेन चोदिते स्वमतं समर्थयत् सूत्रमुपन्यस्य व्याचष्टे- अधिकेति ॥ यदुक्तं ज्ञानादेव सर्वपुरुषार्थप्राप्तिरिति तदेवं तथैव। न तु ज्ञानं कर्मशेषतया पुरुषार्थसाधनम्। नचैवं ज्ञानिनामाचारवैयर्थ्यं विध्याद्यनुपपत्तिश्चेति वाच्यम्। ज्ञानादेव जायमाने पुरुषार्थे कर्मणोऽतिशयापादकत्वेन ज्ञानशेषत्वात्। ज्ञानादेव फलप्राप्तिः कर्मणस्तु फलेऽतिशयाधायकत्वेन

शेषत्वमिति कुतः? 'ज्ञानादेव' इति श्रुतेर्लिङ्गदर्शनाच्चेति भगवतो बादरायणस्य मतमिति भावः ॥ ८ ॥

ज्ञानेऽतिशयाधायकत्वेन कर्मणस्तच्छेषत्वमिति शङ्कापरिहारः

नन्वस्तु ज्ञानस्य पुरुषार्थहेतुत्वं कर्मणस्तु तच्छेषत्वम् । शेषत्वं च न ज्ञानफलेऽतिशयाधायकत्वेन, किन्तु ज्ञानेऽतिशयाधायकत्वेन किं न स्यादित्याशङ्कां परिहरत् सूत्रं पठित्वा व्याचष्टे- **तुल्यं त्विति ॥** न ज्ञानिकर्मणो ज्ञानेऽतिशयाधायकत्वं, किन्तु ज्ञानफल एव । कुतः? कर्मकरणाकरणयोर्ज्ञानस्य तुल्यत्वात् । अन्यथा कर्मकरणे ज्ञानं पुरुषार्थसाधने समर्थमकरणेऽसमर्थमिति ज्ञाने विशेषः स्यात् । एतच्चोपपादयिष्यत इति भावः ।

नन्वेवं तर्हि भगवन्मतविरोधेन जैमिनिमतस्याप्रामाण्यं प्रसज्येत । नच मुनिमतस्य तद् युक्तम् । प्रामाण्ये तु भगवन्मतस्याप्रामाण्यमित्याशङ्कां स्मृत्या परिहरति- **विज्ञातमिति ॥** सम्मतमिति यावत् । अनेनैतदपि निरस्तम् । यत् परैरुच्यते पुरुषार्थादिसूत्रैर्भगवता केवलज्ञानस्य मोक्षसाधनत्वमुच्यते 'शेषत्वात्' इत्यादिसूत्रैस्तु कर्मशेषत्वं ज्ञानस्येति जैमिनिमतमुच्यत इति । तत्रापि तेषां मतेष्वपि चित्रता विषयान्तरे । आधिक्यं कर्मफले । विचित्रतायामपि न मुनिमतानामसत्यत्वं भगवन्मतान्तर्भूतत्वादित्यत्र दृष्टान्तमाह- **यथेति ॥** यथाऽनन्ताकाशः सत्येन सत्यत्वेन वर्तते तदवान्तरभेदाश्च तथा भगवन्मतं तदन्तर्गतमतान्यपि सत्यानीत्यर्थः ।

ननु ज्ञानादेव सर्वपुरुषार्थः कर्मणा तदाधिक्यमिति भगवन्मतम् । अतः कथमनन्ताकाशवदन्तर्भावितान्यमतत्वं तस्येत्यत आह- **स्वयं त्विति ॥** निखिलं स्वमतत्वेन पश्यन्नपि व्यासः केनचिद् विशेषेणैवं पुरुषार्थनिर्णयं प्राहेत्यर्थः । अनन्ताकाशवदित्यनन्वयदृष्टान्तो यथाऽऽकाशो व्याप्तस्तथा

ज्ञानमिति । तथाचोक्तम्- 'व्यत्यासोऽनन्वयश्चैव प्रसिद्धो भूत एव च । सर्वसांहारिकश्चेति दृष्टान्तः पञ्चधा स्मृतः' इति ।

नन्वेवं मतानां स्मृत्या प्रामाण्योक्तावपि परस्परविरुद्धत्वात् कथं तत् स्यादित्यतो भगवन्मतं देवताविषयं जैमिन्यादिमतं तु तदन्यविषयमिति भावेनात्र स्मृतिमाह- **ज्ञानिनामिति ॥** अत एव सूत्रकृता देवताचारस्य तद्विषयकर्मविध्यादेरेव गतिरुक्ता । न तु 'यदेव विद्यया करोति', 'कर्मैव देहम्' इति श्रुत्योस्तयोर्मानुषविषयत्वोपपत्तेः । प्रतिबन्धकयुक्तदेवताविषयत्वोपपत्तेश्च । अतो ज्ञानस्य सर्वपुरुषार्थसाधनत्वादत्यन्तापेक्षितं तदिति सिद्धम् ॥ ९ ॥

॥ इति पुरुषार्थाधिकरणम् ॥ १ ॥

शेषतात्पर्यचन्द्रिका

॥ तृतीयाध्यायस्य तुरीयः पादः ॥

॥ अथ पुरुषार्थाधिकरणम् ॥ १ ॥

यद्दर्शनप्रभावेण सौभर्याद्या यथेष्टतः ।
रमन्ते नाकिरामाभिः तं भजे वल्लभं श्रियः ॥

अत्र भगवदपरोक्षसामर्थ्यं साधनानुक्रमप्राप्तमुच्यते । तत्र 'ऐहिकमप्रस्तुत' इत्यतः प्राङ् नवाधिकरणी कर्मादिव्यावृत्तमाहात्म्यप्रतिपादकत्वादसाधारणपेटिका । अत एव तत्र प्रत्यधिकरणम् 'अन्यथा कर्माद्यतिशयाभावप्रसङ्गात्' इति टीका दृश्यते । ततोऽधिकरणद्वयं साधारणमाहात्म्यप्रतिपादकत्वात् साधारणपेटिकेति विवेक्तव्यम् । तत्राऽऽदावभ्यर्हितत्वात् स्वर्गाद्यखिलपुमर्थाद्यर्थसाधनत्वमुच्यते ।

॥ ॐ पुरुषार्थोऽतः शब्दादिति बादरायणः ॐ ॥ ३-४-१ ॥

सङ्गतिः

यथा चतुर्गुणोपासनसर्वगुणोपासने अधिकारिभेदेन व्यवस्थिते, एवं ज्ञाने कर्मशेषत्वतदशेषत्वे इति प्रतिपादनाद्वा, युक्ता पूर्वत्र व्यवस्थापकस्य 'सत्यो ज्ञानः परमानन्दरूपः' (ब्र.सू.भा.उ.कमठश्रुतिः) इत्यादिकमठवाक्यस्य सत्त्वादधिकारिभेदेन व्यवस्था प्रकृते [१]भेदाभावादित्युत्थानाद् वाऽनन्तरसङ्गतिः ।

विषयसंशयौ चिन्ताक्रमश्च

मोक्षसाधनेषु प्रकृतेषु विचार्यत्वेनावशिष्टमपरोक्षज्ञानं विषयः । समस्तपुरुषार्थसाधनं न वेति संशयः । तदर्थं स्वर्गादिसाधनं न वा । तदर्थं स्वर्गादिसाधनत्वे प्रमाणं बाधकाभावश्चास्ति न वेत्यादि चिन्तनीमयु । तथा स्वर्गादिसाधनत्वेऽपि ज्ञानस्य प्राधान्यमस्ति न वा । तदर्थं ज्ञानस्य प्राधान्ये प्रमाणं बाधकाभावश्चास्ति न वा । तदर्थं ज्ञानस्य प्राधान्याप्राधान्ये अधिकारिभेदेन युक्ते न वेत्याद्यपरमप्यत्रैव चिन्तनीयम् । अत एवायं मोहनयाङ्गावबद्धनयार्थवादादिनयवद् द्विपर्वा विचारः ।

यद्यप्याद्यं सूत्रं ज्ञानस्य स्वर्गादिसाधनत्वमात्रं प्रतिपादयदेकमधिकरणम् । 'शेषत्वात्' इत्याद्यष्टसूत्री प्राधान्यं प्रतिपादयन्त्यधिकरणान्तरम् । तथाच द्विपर्वाश्रयणक्लेशो न भविष्यति । अन्यथैवमन्यत्रापि द्विपर्वाश्रयणेनाधिकरणैक्यं स्यात् । तथाऽपि 'अधिकोपदेशात्' (३-४-८) इति सूत्रे 'ज्ञानादेव स्वर्गः' (ब्र.सू.भा.उ. कौण्ठरव्यश्रुतिः)इत्यधिकोपदेशाद् विशेषश्रुतेर्ज्ञानस्य सर्वपुरुषार्थसाधनत्वं यदुक्तं तदेवम् इति पुरुषार्थसूत्रोक्तप्रमेयसाधनदर्शनादेकाधिकरणता । स्वर्गादिसाधनसिद्धावेव तद्विशेषश्चिन्तनीय इति युक्तं च पुरुषार्थसूत्रे तन्मात्रसाधनम् ।

१. क. व्यवस्थापकाभावेन भेदाभावात् ।

पूर्वपक्षः

स्वर्गाद्यसाधनं ज्ञानं कर्मणो विहितत्वतः ।
ज्ञानिनस्तत्र रागस्य निषेधान्न च काङ्क्षिता ॥
साधनत्वेऽपि शेषत्वमेव ज्ञानस्य नान्यथा ।
ज्ञानात् स्वर्गादिवचनं धनवाक्यादिवद् भवेत् ॥
इति जैमिनिराचार्यो मन्यते तत्त्वदर्शिवान् ।
अतः कथमशेषार्थसाधनं ज्ञानमिष्यताम् ॥

नहि ज्ञानसाध्ये स्वर्गादौ 'यजेत स्वर्गकामः' इत्यादिकमुपपन्नं स्यात् । नच व्रीहियवशास्त्रवदुपपत्तिः । नित्यवच्छ्रवणविरोधात् । अन्यथा 'स्वर्गं धनाद् देहतो वै गृह्णाच्च' इति शास्त्रेणापि तदापत्तेः । नच धनादीनां यागस्वरूपनिर्वर्तकत्वेनान्यथासिद्धत्वान्न स्वर्गपर्यन्ततेति वाच्यम् । तत्तत्कर्मसन्निकृष्टयाज्यापुरोनुवाक्यास्तुतशस्त्राद्यर्थभूतब्रह्मज्ञानस्यापि तत्तद्देवताशब्दशब्दितभगवत्सम्प्रदानकहविस्त्यागात्मकयागनिर्वर्तकतया यागाङ्गत्वात् । 'कुर्वन्नेवेह कर्माणि जिजीविषेत्' (ई.उ. २) इति ज्ञानिनोऽपि कर्मविधानाच्च । नच तज्ज्ञानार्थं तस्य निष्पन्नत्वात् । नच किञ्चित् स्वर्गादन्यफलान्तरं लभ्यते ।

किञ्च न स्वर्गादिः ज्ञानिनः काङ्क्षितः । ज्ञानित्वव्याघातात् । अनाकाङ्क्षितं च न ज्ञानमापादयति । इष्टसाधनत्वाभावप्रसङ्गात् । अस्तु वा साधनत्वं, तथाऽपि न प्राधान्यम् । साधनत्वमात्रस्य महिमत्वाभावात् । 'ज्योतिष्टोमेन स्वर्गकामः' इति यागस्यैव प्राधान्यावगमात् । 'यं यं लोकं मनसा संविभाति' (मु.उ. ३.१.१०) इत्यत्र साधनत्वख्यापकाभावेन धनादिसाधारण्यप्रयोजकत्वमात्रेणाप्युपपत्तेर्न प्राधान्यं गम्यते । अत उक्तन्यायेन धनादिवद् ज्ञानस्य कर्मशेषत्वमेव न्याय्यम् ।

ननु ज्ञानस्य किं मोक्षेऽपि साध्ये कर्मशेषतोच्यते, उत स्वर्गादौ तदितरस्मिन्

फले। नाद्यः। 'भाक्तं वाऽनात्मवित्त्वात् तथाहि दर्शयति' (३.१.७), 'विद्यैव तु निर्धारणात्' (३.३.४८), 'दर्शनाच्च' (३.३.४९), 'श्रुत्यादिबलीयस्त्वाच्च न बाधः' (३.३.५०) इत्यादिसूत्रैस्तद्गृहीतश्रुतिभिश्च मोक्षे प्रधानं साधनं ज्ञानमेव नान्यत्। कर्मादि तच्छेषमेव। 'यज्ञेन दानेन विविदिषन्ति' (बृ.उ. ६.४.२२) इति चित्तशुद्धिद्वारा विविदिषोत्पादनेन चारितार्थ्यावगमादिति निपुणतरं वैराग्यपादादौ व्युत्पादनेन पुनरिह शङ्काऽयोगात्। नच कर्मशेषत्वे स्पष्टश्रुतिरस्ति। येन पुनः शङ्कोदयः स्यात्।

किञ्च जैमिनिमतेनायं पक्षः प्रवर्तयितव्यः। नचासौ जैमिनिर्ज्ञानस्य सर्वकर्मशेषतामभ्युपैति। नन्वभ्युपैत्येवासौ। यतः सूत्रकार एवात्र 'शेषत्वात् पुरुषार्थवादः'(३.४.२.) इति तन्मतमनुबभाषे। कर्तृत्वेनात्मनः कर्मशेषत्वात् तद्विज्ञानमपि व्रीहिप्रोक्षणादिवद् विषयद्वारेण कर्मशेष एव। अत आत्मज्ञानस्य प्रयोजनापेक्षाभावात् 'तरति शोकम्' (छा.उ. ७.१.३) इति फलश्रुतिरर्थवादः। यथाऽन्येषु द्रव्यसंस्कारकर्मसु 'यस्य पर्णमयी जुहूर्भवति न स पापꣳ श्लोकꣳ शृणोति। यदङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते। यत् प्रयाजा अनुयाजा इज्यन्ते' इत्यादिफलश्रुतिरर्थवाद इति तद्व्याख्यानात्। अत एव ब्रह्मवाक्येन कर्मवाक्यानामेकवाक्यतां ब्रुवन्तो जैमिनिमतानुयायिनश्च कर्माङ्गत्वेन ब्रह्मज्ञानस्य पुरुषार्थसाधनत्वमाहुर्न केवलस्येति चेन्न। ज्ञानस्य कर्मशेषत्वे पृथक् शास्त्रानारम्भापातात्। नच जैमिनिमते त्वनारम्भणं नानिष्टमिति वक्तुं शक्यम्। स्वाचार्योक्तिविरोधेन स्वमतस्यैव शिष्टापरिग्रहेणानारम्भणीयत्वप्रसङ्गात्। व्यासो हि तस्याचार्यः प्रसिद्धः। 'व्यासशिष्या इमेऽखिलाः' (ब्र.सू.भा.उ. भविष्यत्पर्ववचनम्) इति वचनात्। स च 'भाक्तं वा' (ब्र.सू. ३.१.७) इत्याद्यसूत्रयदित्युक्तम्। अत एव तन्मतानुभाषणसूत्रस्य व्याख्यानं प्रत्याख्येयम्। असदनुवाददोषप्रसङ्गाच्च। नहि समाकर्षाधिकरणे 'अन्यार्थं तु जैमिनिः

प्रश्नव्याख्यानाभ्यामपि चैवमेके' (ब्र.सू. १.४.१९) इति सूत्रे परमगुरुभगवन्मतैकदेशमाश्रित्य जगति शब्दव्यवहारस्यान्यार्थं परमात्मज्ञानार्थं कर्मदेवादिकं जगद् वदति वेदराशिरिति गतिं ब्रुवन् जैमिनिः कर्मादेः परमात्मज्ञानार्थतां मन्यमानस्तज्ज्ञानस्य कर्मशेषत्वं ब्रूयात्।

स्यादेतत्। 'अन्यार्थम्' (ब्र.सू. १-४-१९) इति सूत्रस्यैवं वृत्तिः। कौषीतकीब्राह्मणगतबालाक्यजातशत्रुसंवादसमन्वयप्रतिपादने तत्र जीवप्राधान्यं निरस्य परमात्मज्ञापनार्थं 'एष आत्मैतैरात्मभिर्भुङ्क्ते' इत्यादिको जीवपरामर्श इति वदति जैमिनिरिति। तथाच नात्र ब्रह्मज्ञानार्थता कर्मादिवाक्यस्योच्यत इति सूत्रार्थः।

मैवम्। जीवस्य परमात्मनोऽनन्यत्वज्ञानाभ्युपगमेन[१] स्वसिद्धान्तविरोधात्। न स्वसिद्धान्तोऽयं व्यासमते जीवपरमात्मनोरन्यत्वानभ्युपगमेऽपि जैमिनिमते तत्सम्भवादिति चेन्न। प्रत्युक्तत्वात्। यदि नायं स्वसिद्धान्तस्तर्हि सूत्रकृदेव निराकुर्यात्। स्वसिद्धान्तानुक्तिदोषप्रसङ्गाच्च। यच्चोक्तमाश्मरथ्यौडुलोमिपक्षयोर्भेदस्पर्शित्वमुपन्यस्य भेदलेशस्याप्यविषयत्वेनाभेदविषयत्वेनोपन्यस्तम्- 'अवस्थितेरिति काशकृत्स्नः' (१.४.२३.) इति काशकृत्स्नीयं मतमेव स्वसिद्धान्त इति। तन्न। तर्ह्यन्यत्वेन भ्रान्त्या प्रतीतस्य सम्यग् ज्ञापनार्थं जीवपरामर्श इत्यस्मिन् प्रकरणे पठितं[२] स्यात्। नचैतद् युक्तम्। एवं ब्रह्मदर्शिनः स्वान्यशिष्यादिदर्शनाभावेन समन्वयप्रतिपादनानुपपत्तेः। स्वप्नस्थवदन्यं पश्यतीति चेन्न। व्यासस्य स्वप्नस्थवदप्रतिबुद्धत्वे तद्वचनस्य प्रेक्षावदुपादित्सागोचरता न स्यात्। प्रतिबुद्धत्वे तु स्वान्यदर्शनानुपपत्तिरेव। तस्मात् परमात्मज्ञानार्थं कर्मदेवतादिकं वदति वेद इति जैमिनिवादो युक्तः। न जीवपरामर्शवादो जैमिनिवादः।

---

१. म. अन्यत्वानभ्युपगमेन २. म. फलितम्

ननु समन्वयपरे प्रथमेऽध्याये परमात्मज्ञापनार्थं कर्मवेदादिकं वदति वेद इति प्रतिपादनं कथं सङ्गतम्? समन्वेतव्यशब्दानुक्तेः। मैवम्। 'एतेन सर्वे व्याख्याता व्याख्याताः' (१-४-२९) इति निगमनसूत्रेण कर्मवेदादिप्रतिपादकवेदभागस्य सर्वस्यापि समन्वयोक्तेः। अन्यथा तवापि मतेऽसङ्गतिः स्यादेव। नचैतेन साङ्ख्यनिराकरणोक्तन्यायेनावशिष्टाः परमाण्वादिकारणतावादिनः सर्वेऽपि निराकृता व्याख्याता इति तस्य योजना भविष्यतीति वाच्यम्। समन्वयाद् ऋते केवलसाङ्ख्यनिराकरणस्यासङ्गतत्वात्।

ननु प्रधानस्यैव वैदिकत्वं निराक्रियते तद्भागवेदसमन्वयसिद्ध्यर्थमिति चेन्न। स्वतन्त्रस्य प्रधानस्य वैदिकत्वं 'आनुमानिकमप्येकेषाम्' (१-४-१) इति निराकरिष्यत इतीह तस्याकर्तव्यत्वात्। नहि महादादिविकारवतः परतन्त्रस्य प्रधानस्यामुख्यार्थतया वैदिकत्वे न काचित् सिद्धान्तहानिरस्ति। प्रत्युत सृष्ट्यनुपपत्तेश्च। अतः सर्वशब्दानां ब्रह्मणि प्रवृत्तिप्रतिपादने तैर्भगवति व्यवहारस्य सार्वजनीनस्य गतिर्वक्तव्या। तदर्थं युक्तं समाकर्षाद्यनेकमतकथनम्। नचात्रान्यतरमतस्याप्रामाण्यं शङ्क्यम्। अधिकारिभेदान्मतभेदस्यापि युक्तत्वात्। तस्माद् 'अन्यार्थम्' इत्यादेरुक्त एवाभिप्रायः।

ननु तथाऽपि नायमभिप्रायो युक्तः। तथा सति परमात्मनो देवानां च तद्विग्रहाणां च जैमिनिनाऽङ्गीकार्यतापत्तिः। नचेष्टापत्तिः। यजमानाद्यतिरिक्तचेतनादेरनङ्गीकारात्। कथमेतदवगतमिति चेत्। प्रथमकाण्डे नवमेऽध्याये 'देवता वा प्रयोजयेदतिथिवद्भोजनस्य तदर्थत्वात्' इत्यादिना सूत्रसन्दर्भेण तदभावप्रतिपादनात्। तथाहि। देवताविग्रहवादिनां पक्षं सविस्तरमनूद्य 'अपि वा शब्दपूर्वत्वाद् यज्ञकर्म प्रधानं स्याद् गुणत्वे देवताश्रुतिः' इत्यादिना तदभावप्रतिपादनात्।

मैवम्। देवताप्राधान्यपक्षेऽपि बहुभिः सूत्रैः प्रमाणानामुपन्यासात्। देवतादि-

सद्भाव एव तत्सिद्धान्त इत्यवगमात्। कथमन्यथेश्वरादिदेवतानभ्युपगमे उद्देश्याभावात् तदुद्देशेन यागसम्भवः तद्विधेरानर्थक्याभावश्च? बहूनामपि सूत्राणां पूर्वपक्षत्वेन व्याख्यानायोगाच्च। 'अपि वा शब्दपूर्वत्वात्' इत्युत्तरसूत्रविरोधाच्च। नह्येकतमस्मिन्ननुपन्यस्ते पक्षे पक्षान्तरसूचको वेतिशब्दः प्रयुज्यते। तत्पक्षे तु बहुप्रमाणविरोधेन वक्ष्यमाणे पक्षेऽरुचिं सूचयितुं युक्तः। तेन देवताप्राधान्यपक्ष एव मुख्यसिद्धान्त इत्यवगम्यते। तेन कर्मैकभक्तप्राकृतजनच्छन्दोनुवृत्त्याऽन्योऽपि पक्षो दर्शित इति न विरोधः। तत्रापि कर्मप्राधान्यं ब्रुवता देवताविग्रहाद्यभावोऽभिप्रेतः। विद्यमानस्य हि देवतादेः स्रुगाज्यवह्न्यादिवद् गुणत्वं यथाश्रुतमपि सम्भवति। प्रत्युत गुणत्वे देवताश्रुतिरित्याह। देवताया अभावे तच्छ्रुतेर्गत्युक्त्यनुपपत्तेः। इतश्च जैमिनेर्देवतादिसद्भाव एव सिद्धान्तः। 'देवता वा प्रयोजयेत्' इत्यादिपूर्वसूत्रैरुपन्यस्तप्रमाणानां निराकरणादर्शनात्। यद्ययं पूर्वपक्षस्तर्हि तदुक्तानां प्रमाणानां कथमाभासतां दर्शयेत्?

ननु दर्शितमेतच्छबरस्वामिना। मैवम्। उत्सूत्रत्वेनानादरणीयत्वात्। देवताद्यभावे शाबराद्युक्तयुक्तिनिराकरणप्रकारः सविस्तरं न्यायकणिकासु द्रष्टव्यः। तस्मान्न जैमिनिर्देवताद्यभावं मन्यते। तस्माद् 'अन्यार्थं तु जैमिनिः' (ब्र.सू. १.४.१९) इत्यत्रोक्त एव सूत्रार्थः। ततश्च[१] ब्रह्मज्ञानस्य प्राधान्यं कर्मणश्च तच्छेषतां मन्वानः 'शेषत्वात् पुरुषार्थवादः' (ब्र.सू. ३.४.२) इति कथं ज्ञानस्य सर्वत्र शेषत्वं ब्रूयादित्याद्यः पक्षो न युक्तः।

नापि द्वितीयः। अर्धजरतीयानुपपत्तेः। नहि सामान्याकारेण 'यं यं लोकं मनसा संविभाति' (मु.उ. ३.१.१०) इति समस्तपुरुषार्थसाधनत्वेन श्रुतस्य ज्ञानस्य मोक्षांशे प्राधान्यम्, स्वर्गाद्यंशे तु तन्नेत्यस्य सम्भवः। ज्ञानस्य कर्मशेषत्वे

१. क. तथा च

च स्वर्गाद्यंशेऽपि पुरुषार्थवादविरोधानतिवृत्तिः। 'यं यं लोकं मनसा' (मु.उ. ३.१.१०) इति ज्ञानस्य स्वर्गाद्यंशेऽपि प्राधान्यदर्शनात्। नहि शेषत्वे तथा प्रयोगो दृष्टः। 'ज्योतिष्टोमेन स्वर्गकामः' इत्यादिप्राधान्यश्रुतिस्तु 'कर्मणैव हि संसिद्धिम्' (भ.गी. ३.२०) इत्यादाविव मोक्षसाधनज्ञानशेषत्वेन योजनीया। न भवति च विभागकल्पनक्लेशः। तस्मान्नोभयथाऽपि पूर्वपक्षसम्भव इति।

अत्र ब्रूमः। अस्त्येव द्वैविध्यकल्पने प्रमाणम्। 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' (बृ.उ. ६.४.२२) इति स्पष्टं ज्ञानसाधनचित्तशुद्ध्यनन्तरभाविविविदिषोत्पादनेन मोक्षे कर्मणामतिदवीयस्त्वप्रतिपादनात्। नचात्र स्वर्गाद्यंशेऽप्यतिदवीयस्त्वप्रतिपादनमस्ति। प्रत्युत 'ज्ञानेनामृतीभवति' इतिवत् 'ज्योतिष्टोमेन स्वर्गः' इति सामीप्यश्रुतेश्च। 'यं यं लोकम्' (मु.उ. ३.१.१०) इत्यस्य सामान्यश्रुतित्वेन विशेषवचनबाधकत्वायोगाच्च। स्वर्गाद्यंशे शेषत्वेनाप्युपपत्त्या सावकाशत्वाच्च। दृष्टश्च शेषत्वेऽपि साधनत्ववादः 'स्वर्गं धनाद् देहतो वै गृहाच्च' इत्यादौ। नहि धनादयः कर्मवदन्यशेषतया स्वर्गसाधनम्। नच प्रतिदृष्टान्तस्यापि भावाद्वैषम्याय ज्ञानस्यैव प्राधान्यमस्त्विति वाच्यम्। ज्ञानिनामेव देवानां कर्माचरणदर्शनात्। नच तद् ज्ञानार्थम्। तस्य देवत्वादेव सिद्धत्वात्। 'नैव देवपदं प्राप्ता ब्रह्मदर्शनवर्जिताः' इत्यादेः। नापि मोक्षार्थम्। 'नान्यः पन्थाः' (श्वे.उ. ३.८) इति श्रुतिविरोधात्। अनियमनयेन तस्यापि सिद्धत्वाच्च। अतस्तत् स्वर्गार्थमेवेति वक्तव्यम्। अन्यथा तदनुमानवैयर्थ्यम्। नच ज्ञानकर्मणोरुभयोरपि स्वर्गाद्यंशे तुल्यवत् साधनत्वमस्तु, न भविष्यति चोभयश्रुतिव्याकोप इति वाच्यम्। 'यदेव विद्यया करोति' (छा.उ. १.१.१०) इति श्रुतौ ज्ञानस्य तृतीयानिर्देशेन करोतीत्युक्तकर्मशेषत्वस्य स्पष्टं श्रवणात्। नच 'तदेव वीर्यवत्तरं भवति' (छा.उ. १.१.१०) इत्यक्षरस्वारस्येन कर्मणोऽप्रयोजकत्वं गम्यते। विद्यासाहित्येनैव

वीर्यवत्त्वप्रतीतेः। तथा मोक्षवैषम्यं च सिद्ध्यति। यदि च ज्ञानशेषत्वं न सम्मतं, तर्हि साम्यमेवास्तु। विकल्पस्तु व्रीह्यादिवन्न्याय्य इति वाच्यम्। 'भोगांस्तदीयांश्च यथाविभागं ददाति कर्मैव शुभाशुभं यत्' (ब्र.सू.भा.उ. माठरश्रुतिः) इति निरवकाशश्रुतेः।

नच, नेयं निरवकाशश्रुतिः। एवकारस्यायोगव्यवच्छेदार्थत्वोपपत्तेः। अन्यथा साधारणकारणस्य कालादेरपि साधनत्वं न प्राप्नोति। 'यदेव विद्यया' (छा.उ. १.१.१०) इति श्रुतिविरोधश्च। आचारदर्शनं तु देवानां लीलया भविष्यतीति वाच्यम्। 'ज्ञानी च कर्माणि सदोदितानि कुर्यात्' (श्रुतिः) इति विधिप्रत्ययदर्शनात्। नहि लीलार्थे विधिप्रत्ययः।

न च 'विष्णुरुपांशु यष्टव्यः' इत्यादिवद् विधिप्रत्ययो नेतव्यः। मोक्षांशे ज्ञानशेषत्वेनाघुष्टस्य कर्मणः बहुप्रमाणविरोधेन ज्ञानशेषत्वाङ्गीकारायोगात्। 'सर्वतो बलवती ह्यन्यथानुपपत्तिः' इति न्यायविदां पन्था इति वाच्यम्। 'एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे' (ई.उ. २) इति ज्ञानिनोऽपि कर्माकरणे प्रत्यवायश्रवणात्।

न चाऽग्नेयादिषड्यागवत् समप्रधानत्वेऽप्युपपत्तिः। तद्वद् युगपत् फलसम्बन्धित्वग्राहकप्रमाणस्याद्याप्यनुपन्यासेनान्योन्याश्रयात्। तस्माद् ज्ञानस्य मोक्षांशे प्राधान्येऽपि न स्वर्गाद्यंशेऽपि प्राधान्यम्। किन्तु तच्छेषत्वमेव। तच्छेषत्वं च ज्ञानस्य न याज्यापुरोनुवाक्याद्यर्थभूतब्रह्मविषयत्वेन देवतास्वरूपज्ञानवत् कर्मस्वरूपनिर्वर्तकतया। ज्ञानहीनानामपि कर्मस्वरूपनिर्वृत्तिदर्शनात्। नहि कर्मठाः साक्षात्कृतब्रह्माणः। किन्तु प्रयाजादिवत् कर्मणैव सिद्ध्यत्स्वर्गादौ सुखाधिक्याद्यतिशयापादकत्वेन फलोपकार्यङ्गतयैव। अत एव 'वीर्यवत्तरं भवति' (छा.उ. १.१.१०) इति श्रुतौ वीर्यादिशब्दप्रयोग इति पूर्वः पक्षः।

सिद्धान्तः

अस्ति तावन्मतेः सर्वपुरुषार्थेषु हेतुता।
सम्भावनामात्रतोऽपि स्वर्गादीच्छा विभाव्यते॥

'यं यं लोकं मनसा संविभाति' (मु.उ. ३.१.१०) इत्यंशेषु पुरुषार्थसाधनत्वाभिधानस्य सम्भवेऽसति बाधके सङ्कोचायोगात्। नच 'परीक्ष्य लोकान्' (मु.उ. १.२.१२), 'प्रजहाति' (भ.गी. २.५५) इत्यादिवचनेन ज्ञानिनोऽन्यत्र रागहीनत्वं बाधकमिति वाच्यम्। प्रायो ज्ञानिनां तथात्वेऽपि यस्य कस्यचिदभिलाषा भविष्यतीति सम्भावनामात्रेण तं प्रत्यर्थवत्त्वोपपत्तेः। न चाऽगमविरुद्धार्थे सम्भावनाऽपि कथमिति वाच्यम्। सौभर्यादेः प्रत्यक्षतो दर्शनेन तदुपपत्तेः। नहि प्रत्यक्षादपि बलवानागमः। तेन सामान्यतः सिद्धमेतत् सर्वपुरुषार्थसाधनत्वं ज्ञानस्य। प्राधान्यं तु-

'श्रुतिवैषम्यभङ्गाय स्वर्गादावप्यशेषता।
आधिक्यं कर्मणा स्वर्गभोगे मुक्तौ यथा श्रुतेः॥',

'यं यं लोकं मनसा संविभाति' (मु.उ. ३.१.१०) इति श्रुतेरवैषम्याय मोक्षं प्रतीव स्वर्गं प्रत्यपि प्राधान्यम्। अन्यथा साधनत्वांशे वैषम्याभावेऽपि प्राधान्यांशे स्यादेव वैषम्यम्। नच तदङ्गीकर्तुं शक्यं बाधकाभावे। ज्ञानिनामपि देवानां कर्माचरणं तु मौक्तिकफलाधिक्याय स्वार्गिकफलाधिक्याय भविष्यति। 'ज्ञानादेव स्वर्गो ज्ञानादेवापवर्गो ज्ञानादेव सर्वे कामाः सम्पद्यन्ते। तथाऽपि यथा यथा कर्म कुरुते तथा तथाऽधिको भवति' (ब्र.सू.भा.उ. कौण्ठरव्यश्रुतिः) इति श्रुत्या स्वयमेव ज्ञानिनां कर्माचरणविध्यादिवैयर्थ्यनिरासात्।

यद्यपि ज्ञानादेव स्वतन्त्रात् स्वर्गो भवति। ततो ज्ञानिनां कर्माचरणादि व्यर्थं प्रतीयते। तथाऽपि न व्यर्थम्। भोगे आधिक्यस्य कर्माधीनत्वादित्येवमपि

श्रुतिर्व्याख्यायते। अन्यथाऽपवर्गसाम्येन स्वर्गादिसाधनत्वश्रुतेः निष्कारणं वैषम्याभ्युपगमापत्तिः।

ननु 'तथा तथाऽधिको भवति' इति सामान्यतः श्रवणस्य ज्ञानाधिक्यापादकत्वेनाप्युपपत्तेः न स्वर्गभोगाधिक्यं कर्मफलं कल्पनीयम्। तथाच पुनर्मोक्षवैषम्यापत्तिरिति चेन्न। 'चीर्णेऽकृते वा ज्ञानस्य न विशेषोऽस्ति कर्मणि' (ब्र.सू.भा.उ. ब्रह्मतर्कवचनम्) इति ज्ञानगताधिक्यनिषेधात्। यदि पुनर्मोक्षवैषम्यमेव स्वर्गादौ गुणः। अन्यथा मोक्षस्यालौकिकत्वासिद्धेः। 'यदेव विद्यया करोति' (छा.उ. १.१.१०) इत्यादिश्रुतयोऽप्यनुकूलिताः। विद्यादिशब्दानां च स्वर्गादिसाधने कर्मणि नैशित्यापादकतयोपपत्तेः। आचाराणां चापूर्वफलान्तरकल्पनाक्लेशश्च न भविष्यति। तस्माद् ज्ञानं मोक्षांशे प्रधानं साधनम्। कर्म च तदीयमुक्तौ भोगाधिक्यसाधनत्वेनाप्रधानम्। अत एव ज्ञानस्य शेषः। स्वर्गाद्यंशे तु कर्मैव प्रधानम्। ज्ञानं तु स्वार्गिकभोगाधिक्यसाधनतया न प्रधानं, कर्मशेष एव।

'स्वर्गादयः कर्मणैव नान्येनेत्यपरे विदुः।
ज्ञानेनाऽधिक्यम्'

इत्याद्यागमाश्चानुकूलिता भविष्यन्तीति। तस्मादुक्तविपरीतमेव न्याय्यमिति मन्यसे तर्हि तथाऽस्तु। परन्तु 'ज्ञानेनैवाऽप्यते सर्वं कर्मणा त्वधिकं भवेत्' (ब्र.सू.भा.उ. भविष्यत्पर्ववचनम्) इत्याद्यागमानुसारादिदमपि न्याय्यमेव। सर्वागमाः सहस्रमप्येकस्यैव ज्ञानस्य शेषत्वं शेषित्वं च कथमवगमयेयुः। काऽत्र कथन्ता। एकस्यैव दण्डादेः रूपघटयोः प्राधान्याप्राधान्यस्यैकस्य कर्मण एकपुरुषं प्रत्येकजातीयचन्द्रादेश्चैकं प्रत्येव कालभेदेनैकस्मिन्नपि काले एकं पुरुषं प्रत्येवावच्छेदकभेदेन जलसेचनादेश्च सुखदुःखजनकत्वस्य दर्शनात्। इहापि देवत्वमनुष्यत्वाद्यवच्छेदकभेदेन ज्ञानस्य शेषशेषिभावोभयोपपत्तेः। 'ज्ञानिनामपि

देवानां विशेषः कर्मभिर्भवेत्' (ब्र.सू.भा.उ. ब्रह्मतर्कवचनम्) इति वैशेषिकवचनेन देवत्वावच्छेदेन प्राधान्यम्। तदितरत्वावच्छेदेनाप्राधान्यमिति व्यवस्थापनात्। जैमिनिमतस्याप्रामाण्यमङ्गीकृत्याधिकरणं व्याख्यायतां परेषां मतमुक्तरीत्या सामञ्जस्यसम्भवे तदङ्गीकारायोगात् पूर्वोक्तदिशा सूत्राक्षरास्वारस्याच्च न पुनर्निराकृतम्।

टीकाक्षरार्थः - पादार्थकथनम्

टीकाक्षरार्थस्तु- सर्वत्र प्रमेयानि भिन्नान्येव। समस्तपुरुषार्थसाधनत्व-सर्वाधिकारिकत्वाभावविशेषाभावादीनां तत्तदधिकरणप्रतिपाद्यानां भेदेनोपलम्भात्। अन्यथाऽधिकरणभेदो न स्यात्। ततश्च कथं पादैक्यम्? विषयतावच्छेदकानां भिन्नभिन्नत्वादित्याशङ्क्य 'ज्ञानसामर्थ्यमस्मिन् पाद उच्यते' इति भाष्येणैतत् परिहृतमित्याह- **एतत्पादार्थमिति**॥ पादैक्यप्रयोजकं ज्ञानसामर्थ्याख्यं सर्वाधिकरणार्थानुगतमेकं माहात्म्यमाहेत्यर्थः। एवमन्यत्रापि द्रष्टव्यम्।

परोक्तपादार्थस्यायुक्तत्वम्

यद्वा, पूर्वपादोक्तानां परापरब्रह्मविद्यानां कर्मनिरपेक्षाणामेव पुरुषार्थ-साधनत्वम्, विद्योत्पत्त्युपयोगिन्यो यज्ञादिरूपा इतिकर्तव्यताश्च निरूप्यन्त इति अन्ये पादार्थमाहुः। सर्वथा कर्मनिरपेक्षाणां पुरुषार्थसाधनत्वानुपपत्तेः, यज्ञादीनां वैराग्यादिसाधनमात्रोत्पत्त्युपयोगित्वेन विशिष्य ज्ञानमात्रेतिकर्तव्यतात्वाभावेनेह ज्ञानपादे निरूपणानुपपत्तेश्च, पादभेदश्च सर्वत्र दुर्वार इति तन्मतमयुक्तमिति मन्वानो भाष्यकृत् स्वयम् अन्यथा पादार्थमाहेत्याह- **एतत्पादार्थमिति**॥ 'तन्निर्धारणार्थनियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम्' (३.३.४३) इति श्रवणाद्युपासनाजन्यतयोक्तज्ञाननिरूपणार्थं प्रवृत्ते पादे इतिकर्तव्यतादि-निरूपणमयुक्तमिति सूचयत्येतच्छब्देन।

पूर्वपक्षीयौदार्यन्यायस्य व्याख्यानम्

अत्रैतत्पादन्यायमाला -

'औदार्यमुच्चावचशक्तिरात्मस्वरूपदार्ढ्यं च निजस्वभावः।
स्वातन्त्र्यमापूर्णविशेषयोग्यता विरोधहानिश्च चतुर्थपादे॥' इति।

तत्र प्रथमोद्दिष्टमौदार्यन्यायं सम्बन्धिप्रदर्शनेनात्र विवक्षितसाध्ये साक्षाद्धेतु-भावासम्भवेनाध्याहार्यभागप्रदर्शनेन च विवृण्वत्

'नच ज्ञानिनामौदार्यान्मोक्षादन्यफलेच्छाया एवासम्भवात् तदुक्तिः प्रशंसामात्रमिति वाच्यम्।'

इति वाक्यं व्याचष्टे- **ज्ञानं मोक्षमात्रस्य साधनमिति पूर्वः पक्ष इत्यादिना**॥ 'यं यं लोकं मनसा संविभाति' (मु.उ. ३.१.१०) इति ज्ञानस्य सर्वपुरुषार्थ-साधनत्वोक्तिः प्रशंसामात्रम्। वस्तुतस्तु मोक्षमात्रस्यैव साधनत्वम्। न तदितरफलस्य। ज्ञानिनां मोक्षफलेच्छाया एवाभावात्। तदपि कुतः ? ज्ञानिनां मोक्षेतरपुरुषार्थेषु औदार्याद् विरक्तत्वाद् अनिष्टत्वानुसन्धातृत्वाद् इति विवरणं व्याख्यातं द्रष्टव्यम्।

नात्र परमत इव क्रत्वर्थपुरुषार्थत्वसन्देहेनाधिकरणप्रवृत्तिरिति भाष्यसूचितं सूत्रभावमाह- **पुरुषैरर्थ्यमानं यावच्छुभं तत्सर्वमाप्यत एव न तु मोक्षमात्रमिति**॥ 'संविभाति' इति श्रुतिगतं पदं 'भा ज्ञाने' इति धातुजत्वात् तत्कार्येच्छापरमिति व्याचष्टे- **इच्छतीति**॥

सिद्धान्तीयव्यवस्थितिन्यायस्य व्याख्यानम्

अत्रैतत्पादीयसिद्धान्तन्यायमाला -

'व्यवस्थितिस्त्वविशेषः स्थितिश्च निषेधसामान्यविधिक्रियाणाम्।
विभक्तता चात्वरयैव सिद्धिर्विपक्षसम्प्राप्तिविरुद्धहेतवः॥' इति।

तत्र प्रथमोद्दिष्टं व्यवस्थितिन्यायं तदाकारप्रदर्शनेन विवृण्वत्-

'प्रायशो न सम्भवत्येव। कस्यचित् सौभर्यादिवत् सम्भवति चेज्ज्ञानेनैवाशेषमभीप्सितं भवतीति व्यवस्थोपपत्तेः।'

इति वाक्यं तात्पर्यकथनपूर्वं व्याचष्टे- **श्रुत्यादेः प्रायेणेति**॥ तेन 'प्रायशो न सम्भवत्येव' इत्येतत् 'परीक्ष्य लोकान्' (मु.उ. १.२.१२) इत्यादि-श्रुतेर्गतिवर्णनमिति ध्येयम्।

'शेषत्वात्' इति सूत्रस्य परोक्तार्थायुक्तत्वम्

मोक्षं प्रत्यपि ज्ञानस्य न प्राधान्यम्, किन्तु कर्मशेषतैवेत्यस्योक्तरीत्या जैमिनिमतत्वाभावेन स्वयमन्यथा सूत्रार्थमाह- **तत्रास्तु ज्ञानं मोक्षसाधन[१]-मित्यादिना**॥

'अधिकोपदेशात्तु' इति सूत्रस्य परोक्तार्थनिरासः

'यः सर्वज्ञः सर्ववित्' (मु.उ. १.१.९) इत्यादिश्रुतिभिः शारीरादधिक-स्येश्वरात्मनो दर्शनात् वेदान्तेष्वधिकस्येश्वरस्योपदेशस्तावत् सिद्धः। तस्मादधिकोपदेशाद् बादरायणस्य यद् विद्यास्वातन्त्र्यं मतं तत् तथैव तिष्ठति। न शेषत्वादिभिः हेत्वाभासैः चालयितुं शक्यते। जीवात्मनः क्रत्वव्यभिचारित्वेन तद्विद्यायाः प्रोक्षणादिवत् क्रतुशेषत्वेऽपि ईश्वरात्मनः सार्वज्ञ्यादिगुणशालिनः तदभावेन तद्विद्यायाः नान्यशेषता, इति 'अधिकोपदेशात्' इति सूत्रव्याख्यानम् असत्। उक्तरीत्या क्वचिच्छेषत्वाङ्गीकारेणाऽभासत्वासिद्धेः। ईश्वरस्य तत्तद्देवताशब्दवाच्यत्वेन तत्तन्मन्त्रार्थतया तज्ज्ञानस्य यागस्वरूपनिर्वर्तकत्वा-वश्यम्भावाच्च इति स्वयमन्यथा व्याचष्टे- **ननु ज्ञानं कर्मशेषतया पुरुषार्थ-साधकमिति**॥ 'दर्शनात्' इत्येतद् द्वेधा व्याचष्टे- **ज्ञानादेवेति श्रुतेर्लिङ्ग-दर्शनाच्चेति**॥

१. 'तत्रास्तु ज्ञानस्य मोक्षसाधनत्वम्' इति पाठः तत्त्वप्रकाशिकायां दृश्यते।

'तुल्यं तु दर्शनम्' इति सूत्रस्य परोक्तार्थनिराकरणम्

" 'एतद्ध स्म वै तद्विद्वांस आहुर्ऋषयः कावषेयाः' 'एतावदरे खल्वमृतत्व-मिति होक्त्वा याज्ञवल्क्यः प्रवव्राज' (बृ.उ. ४.५.१५) इत्यादिश्रुतिषु ब्रह्मविदामकर्मनिष्ठत्वदर्शनादाचारदर्शनमुभयत्रापि तुल्यम्' " इति नार्थः। 'ज्ञानी च कर्माणि सदोदितानि' (ब्र.सू.भा.उ. कमठश्रुतिः, 'कुर्वन्नेव' (ई.उ. २) इत्यादिबहुश्रुतिविरोधादिति मन्वानः 'तुल्यं तु दर्शनम्' इति सूत्रं स्वयमन्यथाऽवतार्य व्याचष्टे- **नन्वस्तु ज्ञानस्येत्यादिना**॥

सङ्क्षेपभाष्यस्य एतदधिकरणतात्पर्यसूचकता

एतेन 'सर्वेऽपि पुरुषार्थाः स्युर्ज्ञानादेव न संशयः' इति सङ्क्षेपभाष्यस्य सर्वेऽपि पुरुषार्थाः स्वर्गादयो, न मोक्ष एव, ज्ञानादेव भवन्ति। नतु पूर्वपादे प्रकृतादुपा-सनादित्यर्थः। तेन सौत्रः पुरुषार्थशब्दः न मोक्षमात्रपरः। अतश्शब्दश्च नोपासनपर इत्युक्तं भवति।

सर्वेऽपि पुरुषार्थाः देवमनुष्यादिसाधारण्येन स्वार्गिकानुभवाधिक्य-तत्स्वरूपनिष्पत्त्यादयो ज्ञानादेव स्युरित्यत्र यतो न संशयः ततः सर्वेऽपि पुरुषार्था ज्ञानादेवेति वा।

यतः सर्वेऽपि जैमिन्याद्याः व्यासशिष्याः, यतः स्वगुरुशिष्ययोर्विवादायोगेन सर्वेऽपि जैमिन्यादिपक्षाः पुरुषार्थाः तत्साधनभूता इत्यत्र नास्ति संशयः, अतः सर्वेऽपि ज्ञानादेवेति वा।

ये तु ज्ञानोत्तरकालमनुष्ठितेन प्रवृत्तकर्मणा देवानां मनुष्यादीनां वा स्वर्गादौ सुखविशेषाः स्वर्गादयो वा पुरुषार्थास्ते सर्वेऽपि ज्ञानाज्जाते मोक्षेऽन्तर्गता एव। 'यावानर्थ उदपाने' (भ.गी. २.४६) इत्यादेः। ततो ज्ञानादेव सर्वेऽपीति वा योजना द्रष्टव्या।

'विज्ञातमेतत् सर्वेषाम्' इत्यादिभाष्यवचनार्थः

'विज्ञातमेतत् सर्वेषाम्' (ब्र.सू.भा.उ. भविष्यत्पर्ववचनम्) इत्यादि-

भाष्योदाहृतवचनानामयमर्थः। ब्रह्मदर्शनान्मोक्षो नियमेन स्यान्नान्यस्मात् कर्मणः इति सर्वेषां व्यासशिष्याणां जैमिन्यादीनां सम्मतमेव। अपि तथापि तत्र ब्रह्मदर्शनमधिकृत्य विषयान्तरे चित्रता नानाप्रकारत्वमस्ति। तदेव विशदयति- **स्वर्गादय इति**॥

अपरे तु जैमिन्याद्यतिरिक्ताः शिष्याः स्वर्गादयः कर्मणैव नान्येन ज्ञानेन कश्चिदुपकार इत्याहुर्विदश्च। केचन जैमिन्याद्यास्तु ज्ञानेन कर्मसाध्येऽपि स्वर्गादावाधिक्यं सुखविशेषोऽस्ति न तु ज्ञानकृतोपकारस्य सर्वथाऽप्यभाव इत्याहुः।

तदन्ये केचिद् विद्वांसः अदृष्टं स्वर्गादिकमेव ज्ञानाज्जायते, नतु दृष्टं वृष्टि-पुत्रादि, तत्तु कारीर्यादिसाध्यमिति प्राहुः। यस्मादखिला इमे व्यासशिष्यास्ततः इदं सर्वं व्यासमतमेव। नहि गुरुशिष्ययोर्मतं भिद्यते। तत इदं सर्वमबाधितमेव। यथाऽऽकाशः कात्स्न्र्येनागृह्यमाणोऽनन्तोऽपि गृह्यमाणभेदापेक्षया व्यामः पुरुष-प्रमाणः, हस्तावधिः हस्तप्रमाणः, प्रादेशः प्रादेशपरिमाणश्चेति सत्येन वचने-नोच्यते तथैवैतेषां मतान्यप्यधिकारिभेदविवक्षया सत्येन वचनेनोच्यन्ते। अनन्ता-काशवद् व्याप्तं यद् ज्ञानं तदेव महानंशुस्तद्वान् भगवान् पुरुषोत्तमो व्यासः निखिलं मतं स्वयं स्वमतत्वेन पश्यन्नपि देवाद्यधिकारिविशेषविवक्षया सर्वं पुरुषार्थजातं स्वर्गादि ज्ञानेनैवाऽप्यते, ज्ञानमेव प्रधानं साधनम्, कर्मणा तु स्वार्गिकसुखा-धिक्यं भवेदिति प्राह। तत्र ज्ञानिनां मध्ये देवानां ज्ञानेनैव स्वर्गः कर्मभिस्तु तद्गतसुखविशेषो भवेत्। अन्यथा तत्तत्कर्मणां वैयर्थ्यं स्यात्। स्वर्गस्य ज्ञानेनैव सिद्धेः। कर्मणि चीर्णे कृतेऽकृते वा तदीयज्ञानस्य विशेषो वृद्धिह्रासादिर्नास्ति। येन तदर्थता[1] स्यादिति।

॥ इति पुरुषार्थाधिकरणम्॥ १॥

१. क. तदर्थः।

॥ अथ अधिकाराधिकरणम्॥[1]

सूत्रभाष्यम्

सर्वेषां पुरुषार्थापेक्षित्वाज्ज्ञानाधिकारितेत्यत आह -

॥ ॐ असार्वत्रिकी ॐ ॥ ३-४-१० ॥

न सर्वेषामधिकारः॥ १०॥

॥ॐ विभागश्शतवत् ॐ ॥ ३-४-११ ॥

'नवकोट्यो हि देवानां तेषां मध्ये शतस्य तु।
सोमाधिकारो वेदोक्तो ब्रह्मणी द्वे शताधिके॥
यथा तथैवासङ्ख्येयाः प्रजास्तासु क्रियाञ्जनः।
ज्ञानाधिकारी सम्प्रोक्तो विष्णुपादैकसंश्रयः॥'

इति वचनात् सुखापेक्षासाम्येऽपि विभाग इष्यतेऽधिकारार्थम्॥ ११॥

कस्याधिकारः ?

॥ ॐ अध्ययनमात्रवतः ॐ ॥ ३-४-१२ ॥

'अवैष्णवस्य वेदेऽपि ह्यधिकारो न विद्यते।
गुरुभक्तिविहीनस्य शमादिरहितस्य च॥
नच वर्णावरस्यापि तस्मादध्ययनान्वितः।
ब्रह्मज्ञाने तु वेदोक्ते ह्यधिकारी[2] सतां मतः॥' इति ब्रह्मतर्के[3]॥

१. अस्यैव 'असार्वत्रिकाधिकरणम्' इति नामान्तरम्।
२. ब. वेदोक्तेऽप्यधिकारी ३. ब. इति हि ब्रह्मतर्के

'पठेद् वेदानथार्थानधीयीताथ विचार्य ब्रह्म विन्देत्' इति कौषारवश्रुतिः[१] ॥ १२ ॥

॥ इति अधिकाराधिकरणम् ॥ २ ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र भगवत्प्राप्तिसाधनज्ञाने सर्वेषामधिकाराभावमहिम्नो वर्णनादस्ति शास्त्रादिसङ्गतिः। सर्वाधिकारिकत्वे न तस्य यागाद्यतिशयः सिद्ध्यतीत्येतत् वर्णनीयम्। प्रकृतं ज्ञानमेव विषयः। 'किं तत्र सर्वेषामधिकारोऽस्ति न वा' इति सन्देहः। लोके साधनद्वैविध्यप्रतीतिः सन्देहबीजम्।

पूर्वपक्षः

पूर्वपक्षयति- **सर्वेषामिति** ॥ सर्वेषामप्यस्ति ज्ञानेऽधिकारः। फलार्थी समर्थो विद्वान् हि साधनेऽधिक्रियते। तत्रास्त्येव सर्वेषां ज्ञानफले मोक्षेऽर्थिता। निर्दुःखानन्दात्मकत्वात् तस्य। तादृशस्य च पुरुषार्थत्वात्। अस्ति च सर्वेषां श्रवणादौ सामर्थ्यं तदुपयोगिनी विद्वत्ता च। एवं च सर्वेषामधिकाराभावे निरधिकारित्वं ज्ञानस्य स्यात्। अतः सर्वेषां ज्ञानेऽधिकारित्वान्न तदतिशयवदिति भावः। वक्ष्यमाणसूत्रमनुकरोति स्त्रीलिङ्गप्रयोगेण।

सिद्धान्तः

सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे- **अत इति** ॥ १० ॥

अर्थित्वादेः साम्यात् सर्वेषामधिकारिता इति शङ्कापरिहारः

नन्वर्थित्वादेः सर्वेषामपि सद्भावात् कथं नाधिकारितेत्याशङ्कां परिहरत्

१. ब. इति च कौषारवश्रुतिः

सूत्रमुपन्यस्य व्याचष्टे- **विभाग इति** ॥ यथा खलु देवत्वसाम्येऽपि नवकोटीनां न साधारण्येन सोमाधिकारः, किन्तु परापरब्रह्मद्वयाधिकशतस्येति विभाग एव, तथा सर्वेषां पुरुषार्थापेक्षासाम्येऽपि न ज्ञानाधिकारः। किन्तु ज्ञानाधिकारार्थं पुरुषविभागोऽङ्गीकार्यः। यद्युच्येत न देवत्वं सोमाधिकारोपयोगीति तर्हि नार्थित्वादिमात्रं ज्ञानाधिकारोपयोगीति वक्तव्यमिति भावः ॥ ११ ॥

अर्थित्वादिसाम्येऽपि न सर्वस्याधिकारः किन्तु अध्ययनमात्रवत इति निरूपणम्

यद्यर्थित्वादिसाम्येऽपि न सर्वेषामधिकारस्तर्हि कस्याप्यसौ न स्यात्। यदि केषाञ्चिदस्ति तर्ह्यर्थित्वाद्यतिरिक्तं विशेषणं वक्तव्यम्। नच तदस्तीति भावेनाऽऽक्षिपति- **कस्येति** ॥ अर्थित्वाद्यतिरिक्तेन केन विशेषणेन युक्तस्येत्यर्थः। परिहाराय सूत्रं पठति- **अध्ययनेति** ॥ नार्थित्वादेरधिकाराप्रयोजकत्वे तत्प्रयोजकविशेषणान्तराभावात् कस्याप्यधिकाराभावः। यथाशक्त्यखिलवेदाध्ययनवत्त्वेन विशेषणान्तरेण युक्तस्य ज्ञानाधिकारसम्भवादिति भावः। यद्यध्ययनवतोऽधिकारस्तर्ह्युक्तविभागभङ्गः स्यात्। सर्वैरपि वेदस्याध्येतुं शक्यत्वादित्यत आह- **अवैष्णवस्येति** ॥ यस्मादध्ययने भगवद्भक्त्यादिमतामेवाधिकारो नान्येषां, तस्मादध्ययनान्वितो ब्रह्मज्ञानेऽधिकारीति युक्तम्। विभागभङ्गाभावादिति भावः। अध्ययनवतो वैदिकब्रह्मज्ञाने[१]ऽधिकार इति स्मृत्या सिद्धम्। तत्र श्रुतिं चाऽऽह- **पठेदिति** ॥ अतो ज्ञाने सर्वेषामधिकाराभावादतिशयितं तदिति सिद्धम्।

॥ इति अधिकाराधिकरणम् ॥ २ ॥

१. क. वैदिके ब्रह्मज्ञाने

शेषतात्पर्यचन्द्रिका

॥ अथाधिकाराधिकरणम्॥ २॥

॥ ॐ असार्वत्रिकी ॐ ॥ ३-४-१० ॥

एतदधिकरणप्रतिपाद्यविषयः

अत्र ज्ञाने द्विजातिमात्रस्याधिकाराभावस्त्रिसूत्र्या समर्थ्यते।

ननु एतत् 'प्रज्ञान्तरपृथक्त्ववद् दृष्टिश्च तदुक्तम्' (३-३-५२) इत्यनेन गतम्। मैवम्। तत्रोपासनाभेदवद् दर्शनभेदस्यैवोक्तेः। 'सर्वथाऽपि तु त एवोभयलिङ्गात्' (३-४-३४) इत्यत्र ज्ञानलाभः सार्वत्रिको न भवतीति वक्ष्यते। अत्र तन्निमित्ताधिकारापरपर्याययोग्यता न सार्वत्रिकीति इति न दोषः। 'यावदधिकारमवस्थितिराधिकारिकाणाम्' (३-३-३३) इत्यत्र तूत्तराधिकरणसिद्धयोग्यतातारतम्यमुपजीव्याऽनन्दतारतम्यमुक्तम्। यद्यपि ज्ञानतज्जन्यफलादेरसार्वत्रिकत्वसिद्ध्यैव तन्निमित्तज्ञानतद्योग्यतादेरपि तत् सिद्ध्यति। अन्यथा तस्याऽकस्मिकत्वापत्तेः। तथाऽपि विशेषप्रमाणैः दाढर्यार्थमेतत्।

पूर्वपक्षः

यद्यपि चेदं मध्ये न निवेष्टुमर्हति। सदसत्प्रवृत्त्योर्विशेषाभावदौर्लभ्यादेर्माहात्म्यान्तरस्यापि वक्ष्यमाणत्वात्। यावन्माहात्म्यं श्रुतवतो हि किमेवं महामहिम्नि ज्ञाने सर्वेषामधिकारोऽस्ति न वेति जिज्ञासा भवति। न मध्ये। तथाऽपि न ज्ञानस्य मोक्षमात्रसाधनत्वेन सर्वेषां ज्ञानेऽधिकारः। मोक्षे सर्वसाधारण्याभावस्य स्थितत्वात्। स्वर्गाद्यखिलसाधनत्वे तु स्वर्गादेः सर्वसाधारण्यात् तत्साधने कर्मणीव कुतो न सर्वेषामधिकारः। तत्प्रयोजकार्थित्वादिसाम्येऽपि तदभावश्चेत् कर्मण्यपि तदापत्तिः। ज्ञाने कस्यापि तदभावापत्तिश्च स्यात्। नचाधिकारप्रयोजकं कर्मव्यावृत्तं प्रयोजकान्तरमुपलभ्यते। अध्ययनमात्रत्वादेर्द्विजातिसाधारण्यात्। नच सर्वेषां न मुक्तिः। किन्तु

योग्यानामेवेत्युक्तम्। तथा केषाञ्चित् स्वर्गादिरेवेति व्यवस्थितं च। तथाच सर्वेषामधिकारसाम्ये फलभेदो न स्यादिति वाच्यम्। उच्चावचशक्तियोगात् फलभेदोपपत्तेः। दृश्यते हि समाधिकाराणामेव द्विजातीनां धारणाशक्तियुक्तानामेव मुखपाठो वेदस्य, तच्छून्यानां तदभाव इति फलभेदोऽपि।

तस्माद् बाधकलेशस्याप्यभावान्नाधिकारिता।
दुर्लभाऽतो न कर्मादेर्मता स्यादतिशायिता॥

इत्युत्थानसौकर्यादत्रैव निवेशो युक्तः।

सिद्धान्तः

सिद्धान्तस्तु -

न्याय्याध्ययनवत्त्वेन द्विजातीनां विशेषणम्।
अध्येतारश्च सर्वेऽपि न तथेति व्यवस्थितिः॥

अर्थित्वाद्यतिरिक्तं विष्णुभक्त्यादिपूर्वकाध्येतृत्वमधिकारप्रयोजकमस्त्येव। नचैतत् कस्यापि नास्ति। न वा द्विजातिमात्रेऽस्तीत्यधिकारोऽपि न सार्वत्रिक इति युक्तमेवेति।

असार्वत्रिकीति सूत्रार्थः

सूत्रार्थस्तु- मतभेदव्यवस्थापनेन पूर्वाधिकरणसिद्धदेवमनुष्यादिनिष्ठज्ञानाधिकारिता **असार्वत्रिकी** न सर्वेषामस्ति। तत्प्रयोजकधर्मस्य कर्मादिसाधारणार्थित्वाद्यतिरिक्तस्य वक्ष्यमाणत्वादिति भावः।

विभागः शतवदिति सूत्रार्थः

कर्मादौ क्लृप्तमेव प्रयोजकमस्तु। गौरवं च न भविष्यति। उच्यते। तथाऽपि **विभागः** व्यवस्था वक्ष्यमाणप्रयोजकान्तरप्रयोज्योऽङ्गीकार्यः। अन्यथा क्लृप्तदेवत्वसामान्यमादाय सर्वेषां सोमाधिकारे द्व्यधिकशतमात्रस्य नाधिकस्या-

धिकार इति विभागो न स्यात्। अस्ति चासौ विभागः। 'नवकोट्यो हि देवानाम्' (ब्र.सू.भा.उ. वचनम्) इत्यादेः। तस्यार्थः नवकोटिसङ्ख्यानां देवजातीनां मध्ये आदित्याः द्वादश, प्रधानवायुना सह मरुतः पञ्चाशत्, रुद्रा एकादश, वसवोऽष्टौ, विश्वेदेवा दश, पितृपास्त्रयः, अश्विनौ द्वौ, द्यावापृथिवी द्वे, ऋभव एकं, गुरुरेकः, आहत्य शतं देवाः। तत्र सङ्ग्रहः-

'आदित्या मरुतो रुद्रा वसवो विश्वदेवकाः।
पितृपा अश्विनौ द्यावापृथिव्या ऋभवो गुरुः॥
द्वादशाथो पञ्चदशमेकादश चतुर्द्विकम्।
दश त्रयश्च द्वौ द्वौ च ह्येकमेकमिति क्रमात्॥'

चतुर्मुखो विष्णुश्चाऽहत्य द्व्यधिकशतदेवानामेव सोमाधिकारः सोमभागिता सोमद्रव्येण पूज्यता नान्येषामिति यथा व्यवस्था तथा वक्ष्यमाणगुणशालिनां मुक्तियोग्यानामेव ज्ञानाधिकारो नान्येषामिति।

अध्ययनमात्रवत इति सूत्रार्थः

यद् वक्तुं विपक्षे बाधकमुक्तं तदेव तृतीयेन प्रदर्श्यते- **अध्ययनमात्रवतः**। मात्रशब्दः कात्स्न्र्यपरः। यथाशक्त्यखिलवेदाध्ययनवतोऽधिकारः। नचैवमपि साधारण्यम्। न्याय्याध्ययनस्य विवक्षितत्वात् इति।

प्रतिज्ञातार्थानङ्गीकारे द्वितीयेन बाधकमुक्त्वा परोक्तबाधकोद्धारः स्वपक्षे तृतीयेन क्रियत इति सूत्रक्रमः।

टीकायां पूर्वपक्षीयोच्चावचशक्तिन्यायविवरणम्

टीकाक्षरार्थस्तु- उच्चावचशक्तिन्यायमेतदधिकरणपूर्वपक्षसङ्गतत्वेन विवृण्वत्

'नचाधिकारे समेऽपि तेषामेवोच्चावचशक्तियोगात् फलभेदोपपत्तेरधिकारिविशेषकल्पनं व्यर्थम्'

इति वाक्यं तात्पर्यतो व्याचष्टे- **एवं च सर्वेषामधिकाराभाव इति**॥

फलभेदानुपपत्तिरूपबाधकस्योच्चावचशक्तियोगेनैव परिहर्तुं शक्यत्वेऽपि यदधिकारिविशेषकल्पनं तद् व्यर्थम्। विरुद्धप्रयोजनं च। एवमपि सर्वेषामधिकाराभावे निरधिकारिकत्वं ज्ञानस्य स्यादित्यापादनसम्भवादित्यर्थः।

टीकायां सिद्धान्तीयाविशेषन्यायविवरणम्

अविशेषन्यायं प्रकृतसङ्गतत्वेन विवृण्वत्

'भक्त्याद्यधिकारानुसारेण शास्त्रात् फलप्राप्तेः सर्वेषामविशेषात्। दृश्यमानत्वाच्च भक्त्याद्यधिकारतारतम्यस्य। उच्चावचशक्तेरपि तन्निबन्धनत्वात्।'

इति वाक्यं 'अध्ययनमात्रवतः' इति सूत्राभिप्रायकथनपरमिति भावेन सूत्रमवतारयति- **यद्यर्थित्वादिसाम्येऽपीति**॥ ततश्च भक्त्याद्यधिकाररूपयोग्यतानुसारेण शास्त्रजन्यज्ञानाख्यफलप्राप्तेः श्रुतत्वात्। किं बहुना ? भक्त्यादियोग्यतातारतम्यस्यापि दृश्यमानत्वाच्च न योग्यता सार्वत्रिकी। अन्यथा सर्वेषामविशेषाच्छास्त्रजन्यफलस्य मुक्तेश्च प्राप्तेः पूर्वोक्ताया अनुद्धार एव। नचोच्चावचशक्तियोगात् फलभेदोपपत्तिः। उच्चावचशक्तेरपि योग्यतानिबन्धनत्वात्। अन्यथा तस्याऽकस्मिकत्वापत्तेरिति विवरणार्थोऽनुसन्धेयः।

सम्बन्धदीपिकादौ तूच्चावचशक्त्यविशेषन्याययोरुत्तराधिकरणसम्बन्धित्वमुपेत्यौदार्यव्यवस्थितिन्याययोः पूर्वाधिकरणसम्बन्धित्वेन व्याख्यातयोरप्यावृत्त्यै- तदधिकरणसम्बन्धित्वं तयोश्च यथासम्भवं ग्रन्थाद् बहिरेव व्याख्यानमूह्यमित्युक्तम्।

एतदधिकरणपरतया सङ्क्षेपभाष्यस्य व्याख्यानम्

एतेन 'सर्वेऽपि पुरुषार्थाः स्युर्ज्ञानादेव न संशयः।' इत्यनन्तरं 'विशेषस्तु ज्ञाने स्यात्' इति पूर्ववाक्यानुषङ्गेण यथाकर्मण्यविभागेनार्थित्वादियुक्तानां सर्वेषामधिकारः, न तथा ज्ञाने। किन्त्वध्ययनादियुक्तानामेवाधिकारो न सर्वेषामपीति विशेषोऽस्तीत्येतदधिकरणतात्पर्यमपि सङ्क्षेपभाष्योक्तं वेदितव्यम्।

परमतनिरासः

'असार्वत्रिकी' इत्यादित्रीण्यपि सूत्राणि 'तच्छ्रुतेः' (३-४-४), 'समन्वारम्भणात्' (३-४-५), 'तद्वतो विधानात्' (३.४.६), इति सूत्रत्रयेण जैमिन्युपन्यस्तयुक्तीः क्रमेण पराकुर्वन्ति। तथाहि। 'यदेव विद्यया करोति श्रद्धयोपनिषदा' (छा.उ. १.१.१०) इति विद्यायाः कर्मशेषत्वश्रुतेः, न स्वातन्त्र्यमिति 'तच्छ्रुतेः' इति सूत्रोक्तमयुक्तम्। यत इयं श्रुतिरसार्वत्रिकी सर्वविद्याविषया न भवति। किन्तु 'ओमित्येतदक्षरमुद्गीथमुपासीत' (छा.उ. १.१.१) इत्युक्तोद्गीथविद्याविषयैव।

यच्च 'तं विद्याकर्मणी समन्वारभेते' (बृ. ४.४.२) इति विद्याकर्मणोः फलारम्भे साहित्यदर्शनात् न स्वातन्त्र्यं विद्याया इति समन्वारम्भणसूत्रेणोक्तं तत् प्रत्युच्यते- यथा 'शतमाभ्यां दीयताम्' इत्युक्ते पञ्चाशदेकस्मै पञ्चाशदपरस्मै इति विभज्य दीयते, एवं विद्या स्वं पुरुषं समारभते, कर्म चान्यमिति विभागोऽत्र द्रष्टव्यः।

यच्चोक्तं 'आचार्यकुलाद् वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्त्य कुटुम्बी शुचौ देशे स्वाध्यायमधीयानः' (छा.उ. ८.१५.१) इति समस्तवेदार्थज्ञानवतः कर्मविधानान्नाऽत्मज्ञानस्य स्वातन्त्र्यमिति युक्त्यन्तरं 'तद्वतो विधानात्' इति सूत्रेणोच्यत इति। तन्निराचष्टे। अध्ययनमात्रवत एव कर्मविधिरत्र नाऽत्मज्ञानवत इति पूर्वाधिकरणशेषतैव त्रयाणामपि सूत्राणामिति परमतमयुक्तम्।

जैमिनिमतस्योक्तरीत्या भगवन्मताविरुद्धत्वेन प्रतिसूत्रार्थं दूषणे तस्यात्यन्ताप्रामाण्यापातात्। अधिकारिभेदेन स्वर्गादौ कर्मणः प्राधान्योपपत्तेश्च। मद्रीत्या दुर्लभत्वरूपस्य ज्ञानमाहात्म्यान्तरस्य प्रतिपादनायाधिकरणान्तरत्वे

सम्भवति पूर्वशेषताऽयोगाच्च। कर्मादिवद् विजातीयसाधारण्यात् नास्य पूर्वोक्तं माहात्म्यं युक्तमित्याद्याक्षेपस्य त्वन्मते समाधानाभावप्रसङ्गाच्च। मन्मते जैमिन्युक्तस्य दूष्यत्वाभावेन प्रत्युक्तिखण्डनाभावो न दोषः।

किञ्च 'तच्छ्रुतेः' इत्युक्तस्य 'असार्वत्रिकी' इत्यनेन न समाधानमुपलभ्यते। नचैषा श्रुतिः प्रकृतोद्गीथविद्यामात्रविषयेति युक्तम्। सन्निधानाच्छ्रुतेः प्रबलत्वात्। नच 'तेजो वै घृतम्' इत्यादिवदुपोद्बलको वाक्यशेषोऽस्ति। सर्वकर्मसाधारण्येन प्रसिद्धश्रद्धासमभिव्याहाराच्च।

एवं समन्वारम्भणसूत्रोक्तदूषणं 'विभागः शतवत्' इति चायुक्तम्। 'तं विद्याकर्मणी समन्वारभेते' (बृ. ४.४.२) इति श्रुतौ विद्याकर्मणोः सहगमनप्रतीतावपि शेषशेषिभावाप्रतीतेः। अन्यथा राज्ञा सह गच्छतोरमात्यसेनान्योरपि तत्प्रसङ्गात्। 'शतमाभ्यां दीयताम्' इत्यत्र द्विवचनश्रवणेन तथा विभागोपपत्तावपि 'तं समन्वारभेते' इत्यत्र द्विवचनाभावेन विभागायोगाच्च।

एवं 'तद्वतो विधानात्' इत्यस्य व्याख्यानं चायुक्तम्। समस्तवेदार्थज्ञानवतः कर्मविधानेऽप्यात्मज्ञानवतस्तदभावात् स्वाध्यायादिकर्मविधानानुपपत्तेश्च। नहि प्रध्वस्ताखिलप्रपञ्चात्मज्ञानवतः कर्मविधानं सम्भवति। सम्भवे वा 'अध्ययनमात्रवतः' इति दूषणानुपपत्तेः। 'अवैष्णवस्य वेदेऽपि ह्यधिकारो न विद्यते' (ब्र.सू.भा.उ. ब्रह्मतर्कवचनम्) इत्युक्तरीत्याऽन्यायाध्ययनस्य ब्रह्मज्ञानादीनामभावात्। तस्यापि कर्मविधानप्राप्तेर्दुर्वारत्वात्। तस्मादपव्याख्यानमेवैतत्।

॥ इति अधिकाराधिकरणम् ॥ २ ॥

॥ अथ अधिकारविशेषाधिकरणम् ॥ ३ ॥[१]

सूत्रभाष्यम्

॥ ॐ नाविशेषात् ॐ ॥ ३-४-१३ ॥

न सामान्येनाधिकारो देवादीनाम्।

'अथ पुमर्थसाधनान्यर्थो धर्मो ज्ञानमित्युत्तरोत्तरम्।
तत्राधिकारिणो मनुष्या ऋषयो देवा इत्युत्तरोत्तरम् ॥'
इति कौण्डिन्यश्रुतिः[२] ॥ ३ ॥

॥ इति अधिकारविशेषाधिकरणम् ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र भगवत्प्राप्तिसाधनज्ञानाधिकारस्य सम्पूर्णस्य दौर्लभ्यलक्षणज्ञानमहिम्नो वर्णनादस्ति शास्त्रादिसङ्गतिः। सौलभ्येऽतिशयाभावप्रसङ्गादेतत् समर्थनीयम्। प्रकृतो ज्ञानाधिकारो विषयः। किं सर्वेषां देवादीनामेकप्रकारेणाथ नानाप्रकारेणेति सन्देहः। लौकिकसाधनेषूभयथा दर्शनं सन्देहबीजम्।

पूर्वपक्षः

सर्वेषामविशेषेण ज्ञानाधिकार इति पूर्वः पक्षः। अधिकारतारतम्यकल्पनस्य व्यर्थत्वात्। नच वाच्यं 'प्रज्ञान्तरपृथक्त्ववद् दृष्टिः' इति ज्ञाने

१. अस्यैव 'अविशेषाधिकरणम्' इति नामान्तरम्।
२. ब. इति हि कौण्डिन्यश्रुतिः।

तारतम्यस्योक्तत्वात् तदधिकारेऽपि तारतम्यमिति। अधिकारे विशेषाभावेऽपि ज्ञानतारतम्यस्याधिकारिणामुच्चावचशक्त्यैव सम्भवात्। अतः सर्वेषां ज्ञानाधिकारसाम्येन सर्वसौलभ्यात् पूर्णाधिकारस्य न ज्ञानमतिशयितमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रं पठित्वा व्याचष्टे- **नेति** ॥ न देवाद्यधिकारिणां साम्येन ज्ञानाधिकारः । तथात्वे ज्ञानेऽपि साम्यप्रसङ्गात्। तस्याधिकारानुसारित्वात्। नचाधिकारसाम्येऽपि शक्तितारतम्येन ज्ञानतारतम्यमिति युक्तम्। अधिकारसाम्ये शक्तितारतम्यस्यैवायोगात्। अधिकारतारतम्यमन्तरेण तत्कारणाभावादिति भावः। ज्ञानाधिकारतारतम्ये श्रुतिं चाऽऽह- **अथेति** ॥ पुमर्थो मोक्षः। अर्थस्य धर्मज्ञानद्वारा मोक्षसाधनत्वं, धर्मस्य ज्ञानद्वारा, ज्ञानस्य साक्षादिति। अतः सम्पूर्णज्ञानाधिकारस्य सर्वसुलभत्वाभावात् सातिशयं ज्ञानमिति सिद्धम् ॥ १३ ॥

॥ इति अधिकारविशेषाधिकरणम् ॥ ३ ॥

शेषतात्पर्यचन्द्रिका

॥ अथाधिकारविशेषाधिकरणम् ॥ ३ ॥

॥ ॐ नाविशेषात् ॐ ॥ ३-३-१३ ॥

सङ्गतिः पूर्वपक्षश्च

ननु विष्णुभक्त्यादिविहीनानां नात्राधिकार[1] इत्यस्तु । तथाऽपि विष्णुभक्त्यादिकमस्त्येव । योग्यतातारतम्यं तु नास्त्येव । तदनङ्गीकारे बाधकाभावात् । ज्ञानादिफलतारतम्यस्योच्चावचशक्तितारतम्येनोपपत्तेः[2] । नच शक्तितारतम्यस्यापि योग्यतातारतम्यनिबन्धनत्वादनुपपत्तिरेवेति वाच्यम् । तस्यान्यत्र क्लृप्तवयःकालमनःप्रणिधानादिनैवोपपत्तेः ।

तथा च कल्पने[3] च स्याद् गौरवं न च विद्यते ।
प्रमाणं स्पष्टमत्रातोऽविशेषादधिकारिता ॥' इत्युत्थानात् सङ्गतिः ।

सिद्धान्तः

पुमर्थसाधनान्यर्थो धर्मो ज्ञानमिति श्रुतौ ।
मनुष्यादिप्रभेदेन चोत्तरोत्तरतः क्रमात् ॥
योग्यतातारतम्योक्तेस्तन्निबन्धनमेव तत् ।
तस्मात् सम्पूर्णयोग्यत्वं नाविशेषाद् भविष्यति ॥

इति सिद्धान्तः ।

टीकायां पूर्वपक्षीयोच्चावचशक्तिन्यायविवरणस्य व्याख्यानम्

टीकाक्षरार्थस्तु - उच्चावचशक्तिन्यायं साध्यादिप्रदर्शनेन विवृण्वत् -

---

१. क. न तत्राधिकारः २. म. उच्चावचशक्तितारतम्येनैवोपपत्तेः ।
३. क. विकल्पने ।

'नचाधिकारे समेऽपि तेषामेवोच्चावचशक्तियोगात् फलभेदोपपत्तेरधिकारिविशेषकल्पनं व्यर्थम्'

इति वाक्यमेतदधिकरणसङ्गतत्वेनाप्यावर्तनीयमिति भावेन व्युत्क्रमेण परमसाध्यमध्याहृत्य व्याचष्टे- **सर्वेषामिति** ॥ विशेषेत्यस्यार्थः - **तारतम्येति** ॥ पूर्वांशं व्याख्यातुमवतारयति- **नच वाच्यमिति** ॥ ज्ञानाख्यफलभेदस्य प्रज्ञान्तरनयसिद्धान्तत्वात्[1] साध्यसाधनावैरूप्यस्य च 'आनन्दादयः प्रधानस्य' (३-३-१२) इत्युक्तत्वात्, फलभेदप्रयोजकस्याधिकारातिरिक्तस्यान्यस्यादर्शनाद् अधिकारतारतम्यमेवाङ्गीकर्तव्यमिति शङ्कितुर्हृदयम् ।

वाक्यं व्याचष्टे- **अधिकारे विशेषाभावेऽपीति** ॥ अनेन 'अधिकारे समेऽपि' इत्येतदुक्तार्थं भवति । फलभेदशब्दार्थः - **ज्ञानतारतम्यस्येति** ॥ तेषामित्यस्यार्थः - **अधिकारिणामिति** ॥ उच्चावचशक्तिरेव योगः । अत उच्चावचशक्त्यैवेत्येतावदेवोक्तम् । अन्यत्र क्लृप्तोच्चावचशक्त्यैवोपपत्तौ तन्नियामकत्वेनापि योग्यताविशेषस्य कल्पने गौरवमित्येवकारेणाऽऽचष्टे ।

परमतनिरासः

'कुर्वन्नेवेह कर्माणि' (ई.उ. २) इति ज्ञानिनोऽपि कर्मनियमविधानात् कर्मशेषत्वं ज्ञानस्येति 'नियमाच्च' इति सूत्रोक्तं नेति सूचयितुं ''नाविशेषात्'' इति सूत्रम् । 'विदुष इति विशेषाश्रवणात् नात्र कर्मशेषत्वं ज्ञानस्योच्यत इति तस्यार्थः' इति पूर्वशेषत्वेनैवापरेषां[2] व्याख्यानं न युक्तम् । न रीयते न क्षीयते इति नरशब्देनापरोक्षज्ञानिन एवोक्तेः । प्रकरणबलात् प्राप्तस्य स्वायम्भुवमनोः 'त्वयि' इति परामृष्टस्य ज्ञानित्वाच्च । उक्तरीत्या प्राप्तस्य पूर्वपक्षस्यानिराकरणे ज्ञानस्यातिशयाभावप्रसङ्गाच्च । अतोऽधिकरणान्तरमेवैतदिति सूत्रमवतारयन्नेव

---

१. कः सिद्धत्वात् २. म. परेषाम्

भाष्यं व्याचष्टे- **सिद्धान्तयत् सूत्रं पठित्वेति**॥ न पररीत्या पूर्वशङ्कानिवारण-सूत्रमित्यर्थः।

टीकायां सिद्धान्तीयाविशेषन्यायविवरणस्य व्याख्यानम्

अविशेषन्यायं साध्यादिप्रदर्शनपूर्वकं विवृण्वत्

'भक्त्याद्यधिकारानुसारेण शास्त्रफलप्राप्तेः सर्वेषामविशेषात्। दृश्यमानत्वाच्च भक्त्याद्यधिकारतारतम्यस्य। उच्चावचशक्तेरपि तन्निबन्धनत्वात्'

इति वाक्यमेतदधिकरणसङ्गतत्वेनाप्यावर्तनीयम्, भाष्यादपि प्रथमं च योज्यमिति भावेन सूत्रार्थं वदन्नेव व्याचष्टे- **न देवताद्यधिकारिणां साम्येन ज्ञानाधिकार इति**॥ 'सर्वेषामविशेषात्' इत्यंशं पूर्वावृत्त्या व्याचष्टे- **तथात्वे ज्ञानेऽपीति**॥ तेन 'अविशेषाङ्गीकारे' इति विवरणस्याऽऽदावध्याहृतमिति[1] सूचयति। अविशेषादित्यस्यार्थकथनम्- **साम्यप्रसङ्गादिति**॥ फलप्राप्तेरित्यस्य प्रकृतोपयोग्यर्थकथनम्- **ज्ञानेऽपीति**॥ तथा चाविशेषाङ्गीकारेऽधिकारसाम्याङ्गीकारे भक्त्याद्यधिकारानुसारेणैव प्राप्यतया शास्त्रप्रतिपादितस्यापि ज्ञानाख्यफलस्य सर्वेषां देवादीनामविशेषेणैव प्राप्तिः स्यात्। नचैतदिष्टम्। भक्त्याद्यधिकारानुसारेणैव ज्ञानप्राप्तेः 'नासुरा दैवीं न देवा आसुरीं न मनुष्या दैवीमासुरीं च गतिमीयुः' (ब्र.सू.भा.उ. निमयश्रुतिः) इति वचनेन प्रज्ञान्तरपृथक्त्वनयेन चाङ्गीकृतत्वात्। न केवलं विपक्षे बाधकादेव। किन्तु भक्त्याद्यधिकारतारतम्यस्य 'अथ पुमर्थसाधनानि' इत्यादिकौण्डिन्यश्रुत्या दृश्यमानत्वाच्च। 'नाविशेषादधिकारः' इति सूत्रविवरणयोरेकवाक्यतया विवरणयोजना द्रष्टव्या। 'उच्चावचशक्तेरपि तन्निबन्धनत्वात्' इत्यंशं व्याख्यातुं शङ्कामनूद्य प्रक्षिपति- **नचाधिकारेति**॥ तत्र हेतुत्वेन व्याचष्टे- **अधिकारेति**॥ तन्निबन्धनत्वादित्यस्य विवरणम्- **अधिकारतारतम्यमन्तरेणेति**॥

१. म. अध्याहार्यमिति

यद्वा, 'दृश्यमानत्वाच्च' इत्यादिवाक्यं प्रकारान्तरेण व्यतिरेकमुखेन व्याचष्टे- **अधिकारतारतम्यमन्तरेणेति**॥ तेन भक्त्याद्यधिकारतारतम्यस्यैवोच्चावचशक्तितारतम्यकारणत्वेन श्रुतिषु दृश्यमानत्वात् तद्व्यतिरेकेण कारणान्तराभावात्। तदनङ्गीकारे उच्चावचशक्तेरेवाभावप्रसङ्ग इत्यर्थ उक्तो भवति।

ननु क्लृप्तोच्चावचशक्त्यैव ज्ञानतारतम्योपपत्तिः। उच्चावचशक्तेस्त्ववस्थाविशेषादय एव कारणम्। न त्वक्लृप्तं योग्यतादि। कल्पनागौरवप्रसङ्गादित्याशङ्क्य 'दृश्यमानत्वात्' इति विवरणसूचितश्रुतिपाठाय प्रवृत्तं 'अथ पुमर्थसाधनानि' इति भाष्यं व्याचष्टे- **ज्ञानाधिकारेति**॥ प्रामाणिकं गौरवं न दोषायेति भावः। 'पुरुषार्थोऽतः शब्दात्' (३.४.१.) इत्यादौ स्वर्गादिरपि प्रकृतत्वात् श्रुतिं व्याचष्टे- **पुरुषार्थो[1] मोक्ष इति**॥ अर्थधर्मज्ञानेषूत्तरोत्तरत्वं घटयति- **अर्थस्येति**॥ एवं मनुष्यर्षिदेवेष्वर्थधर्मज्ञानान्युत्तरोत्तरमधिकानि। ततस्तेषामुत्तरोत्तरमधिकारोऽप्यधिक इत्यर्थः।

सङ्क्षेपभाष्यव्याख्यानम्

'विशेषस्तु ज्ञाने स्यादुत्तरोत्तरम्' इति विशिष्टस्याप्यावृत्त्या मनुष्यर्षिदेवेषु ज्ञाने उत्तरोत्तरं विशेषस्तत एव तेष्वधिकारेष्वपि विशेषः 'अथ पुमर्थसाधनान्यर्थो धर्मो ज्ञानमित्युत्तरोत्तरम्' (ब्र.सू.भा.उ. कौण्डिन्यश्रुतिः) इत्यादिश्रुतेः। तत्रापि चतुर्मुखस्य सम्पूर्णमधिकार इतरेषां तूत्तरोत्तरं चतुर्मुखपर्यन्तमिति सङ्क्षेपभाष्यमपि योजनीयम्।

॥ इति अधिकारविशेषाधिकरणम् ॥ ३ ॥

१. 'पुमर्थः' इति तत्त्वप्रकाशिकायाम्।

॥ अथ कामचाराधिकरणम् (स्तुत्यधिकरणम्) ॥ ४॥

सूत्रभाष्यम्

'अथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मणः स ब्राह्मणः केन स्याद् येन स्यात् तेनेदृश एव' (बृ.उ.५-५-१) इति ज्ञानिनो यथेष्टाचरणं[१] विधीयत इत्यत आह -

॥ ॐ स्तुतयेऽनुमतिर्वा ॐ ॥ ३-४-१४ ॥

न विधिः। ज्ञानिनः स्तुतये[२] अनुमतिमात्रं वा। युज्यते च ॥ १४॥

॥ ॐ कामकारेण चैके ॐ ॥ ३-४-१५ ॥

'कामचाराः[३] कामभक्षाः कामवादाः कामेनैवेमं देहमुत्सृज्याथ परात् परमीयुरनारम्भणम्' (सामशाखा) इति चैके पठन्ति॥ १५॥

॥ ॐ उपमर्दं च ॐ ॥ ३-४-१६ ॥

'ओमित्युच्चार्यान्तरिममात्मानमभिपश्योपमृद्य पुण्यं च पापं च काममाचरन्तो ब्रह्मानुव्रजन्ति' इति च तुरश्रुतौ॥ १६॥

॥ ॐ ऊर्ध्वरेतस्सु च शब्दे हि ॐ ॥ ३-४-१७ ॥

न तावता कामचाराणां ज्ञानेऽधिकारः[४]।

'य इमं परमं गुह्यमूर्ध्वरेतस्सु भाषयेत्।
न तथा विद्यते भूयान् यं प्राप्यान्येऽपि भूयसः॥'
इति माठरश्रुतेः ॥ १७ ॥

१. ब. यथेष्टचरणम् २. ब. ज्ञानिस्तुतये ३. ब. कामचराः
४. ब. ज्ञानाधिकारः

॥ॐ परामर्शं जैमिनिरचोदना चापवदति हि ॐ ॥३-४-१८॥

'प्रातरुत्थायाथ सन्ध्यामुपासीत यत् सन्ध्यामुपासते ब्रह्मैव तदुपासतेऽथ देवान्नमेज्जुहुयाद् वेदानावर्तयीत नान्यत् किञ्चिदाचरेन्न सुरां पिबेन्न पलाण्डुं[१] भक्षयीत न भृशं वदेन्न विस्मरेदात्मानं[२] सोमं पिबेद्धुतशेषेण वर्तयेत्'[३] इत्युक्ताचारपरामर्शेन विधिबन्धवर्जितत्वेन कामत एव तस्य चरणं कामचार इति जैमिनिर्मन्यते । नच निषिद्धं कर्म [४]कर्तव्यमेवेति चोदना। 'ब्राह्मणो न हन्तव्यः' इत्याद्यपवादश्च॥ १८॥

॥ ॐ अनुष्ठेयं बादरायणः साम्यश्रुतेः ॐ ॥ ३-४-१९ ॥

अनुष्ठेयानां मध्य एव कामतश्चरणं कामतो निवृत्तिरिति बादरायणो मन्यते। 'केन स्याद् येन स्यात् तेनेदृश एव' (बृ.उ.५.५.१)इति साम्यश्रुतेः।

'यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः।
आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते॥'
इति भगवद्वचनाच्च॥ १९॥

॥ ॐ विधिर्वा धारणवत् ॐ ॥ ३-४-२० ॥

'केन स्याद् येन स्यात्' इति विधिर्वा। यथा वेदधारणं त्रैवर्णिकानां विहितं नान्येषाम् एवं स्वमतानुसारिणी प्रवृत्तिर्ज्ञानिनां विहिता। न तत्राधर्मशङ्का[५] कार्या। नान्येषामिति वा।

१. ब. पलाण्डु २. ब. न विस्मरेताऽत्मानम्
३. 'आवर्तयेत्' इति कुत्रचित् ४. ब. निषिद्धं कर्तव्यमेव।
५. ब. अधर्माशङ्का

'स्वेच्छयैव प्रवृत्तिस्तु ब्रह्मणो विधिचोदिता।
नाशङ्क्यं तन्मतं क्वापि विष्णोः प्रत्यक्षचोदना।
इतरेषां न विहिता स्वेच्छावृत्तिः कथञ्चन ॥'

इति ब्राह्मे[१] ॥ २० ॥

॥ ॐ स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॐ ॥ ॥ ३-४-२१ ॥

स्तुतिमात्रमेव स्वेच्छाचरणं न विधिः । तैरपि सामान्यविधिस्वीकारादिति[२] चेन्न। अपूर्वत्वात् परवशत्वात्। सर्वविध्यतिक्रमेण स्तुतिमात्रविषयत्वं परब्रह्मण एव हि।

'विधीनां विषयास्त्वन्ये ब्रह्मणः स्वेच्छया कृतौ।
परस्य ब्रह्मणो ह्येव सर्वविध्यतिदूरता॥' इति ब्रह्मतर्के[३] ॥ २१ ॥

॥ ॐ भावशब्दाच्च ॐ ॥ ३-४-२२ ॥

'यथाविधानमपरे विधिर्भावे प्रजापतेः।
ब्रह्मणः परमस्यैव सर्वविध्यतिदूरता॥' इति च तुरश्रुतौ ॥ २२ ॥

॥ ॐ पारिप्लवार्था इति चेन्न विशेषितत्वात् ॐ ॥ ३-४-२३॥

'केन स्याद् येन स्यात्' (बृ.उ.५-५-१) इत्यादयः स्थिरत्वनिवृत्त्यर्था इति चेन्न । 'त्रेधा हि ज्ञानिनो ह वाव भवन्ति विधिनियता अनियताः

१. ब. इति हि ब्राह्मे
२. ब. स्वीकरणादिति
३. ब. इति हि ब्रह्मतर्के

स्वेच्छानियता इति । विधिनियता[१] मनुष्या अनियता हि देवा ब्रह्मैव स्वेच्छानियतः' इति गौपवनश्रुतौ विशेषितत्वात्॥ २३॥

॥ ॐ तथा चैकवाक्योपबन्धात् ॐ ॥ ३-४-२४ ॥

एवं सति विधिवाक्यानां स्वेच्छावृत्तिवाक्यानां च[२] सम्बन्धो भवति ॥ २४॥

॥ ॐ अत एव चाग्नीन्धनाद्यनपेक्षा ॐ ॥ ३-४-२५॥

अत एव ज्ञानस्य मोक्षदाने नाग्निहोत्राद्यपेक्षा।

ब्रह्मतर्के च -

'येषां ज्ञानं समुत्पन्नं तेषां मोक्षो विनिश्चितः।
शुभकर्मभिराधिक्यं विपरीतैर्विपर्ययः॥
स्वेच्छानुवृत्त्यैव भवेद् ब्रह्मणः प्रायशस्तथा।
देवानामपि सर्वेषां विशेषादुत्तरोत्तरम्॥' इति॥ २५॥

॥ ॐ सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॐ ॥ ३-४-२६ ॥

सर्वधर्मापेक्षा च ज्ञानस्योत्पत्तौ। 'विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' (बृ.उ.६-४-२२) इति श्रुतेः। यथा गतिनिष्पत्त्यर्थमश्वादयोऽपेक्ष्यन्ते न विनिष्पन्नगतेर्ग्रामादिप्राप्तौ॥ २६॥

॥ ॐ शमदमाद्युपेतः स्यात् तथाऽपि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात् ॐ ॥ ३-४-२७ ॥

१. ब. त्रेधाह ज्ञानिनो विधिनियताः
२. ब. चशब्दो नास्ति

यद्यपि ज्ञानेनैव मोक्षो नियतः, तथाऽपि ज्ञानी शमदमाद्युपेतः स्यात्। 'आचार्याद् विद्यामवाप्यैतमात्मानमभिपश्यन्[1] शान्तो भवेद् दान्तो भवेदनुकूलो भवेदाचार्यं परिचरेत् परिचरेदाचार्यम्' इति माठरश्रुतौ ज्ञानिनोऽपि तद्विधेः। 'ब्राह्मीं वाव त उपनिषदमब्रूमेति। तस्यै तपो दमः कर्मेति प्रतिष्ठा वेदाः सर्वाङ्गानि सत्यमायतनम्। यो वा एतामुपनिषदमेवं[2] वेद' (के.उ.४-७८-९) इति ज्ञानाङ्गतया तेषामवश्यानुष्ठेयत्वात्।

'यस्य ज्ञानं तस्य मोक्ष इति नात्र विचारणा।
तस्य शान्त्यादयोऽङ्गानि तस्मात् तेषामनुष्ठितिः।
अवश्यकरणीया स्यादन्यथाऽल्पफलं भवेत्॥' इत्याग्नेये[3]॥

तुशब्दः पूर्णफलार्थत्वं सूचयति॥२७॥

॥ ॐ सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॐ ॥ ३-४-२८॥

'यदि ह वा अप्येवंविन्निखिलं भक्षयीतैवमेव स भवति' इति सर्वान्नानुमतिः प्राणात्ययविषया। 'न वा अजीविष्यमिमानखादन्निति होवाच कामो म उदपानम्' (छा.उ.१-१०-४) इति तद्दर्शनात्[4]॥ २८॥

॥ ॐ अबाधाच्च ॐ ॥ ३-४-२९ ॥

'अन्याय्यचरणाभावे नहि ज्ञानस्य बाधनम्।
अतो विद्वानपि न्याय्यं वर्तेतोत्कर्षसिद्धये॥'

इति ब्रह्मतर्के[5] ॥ २९॥

१. ब. अभिपश्य २. ब. एतामेवं वेद
३. ब. इति चाऽग्नेये ४. ब. इति दर्शनात् ५. इति च ब्रह्मतर्के

॥ ॐ अपि स्मर्यते ॐ ॥ ३-४-३० ॥

'अतीतानागतज्ञानी त्रैलोक्योद्धरणक्षमः।
एतादृशोऽपि नाऽचारं श्रौतं स्मार्तं परित्यजेत्[1]॥'

इति हरिवंशेषु॥३०॥

॥ ॐ शब्दश्चातोऽकामचारे[2] ॐ ॥ ३-४-३१ ॥

'स य एतदेवंविदेवं मन्वान एवं पश्यन्न कामचरितं चरेन्न कामं भक्षयीत न काममनुवर्तेत' इति कौण्डिन्यश्रुतौ। अत इत्यल्पफलत्वं सूचयति।

'न निषिद्धानि वर्तेत पूर्णज्ञानफलेच्छया।' इति पाद्मे[3] ॥ ३१॥

॥ ॐ विहितत्वाच्चाऽश्रमकर्मापि ॐ ॥ ३-४-३२ ॥

न केवलं निषिद्धाकरणे[4] पूर्यते। कर्तव्यं च वर्णाश्रमविहितं कर्म।

'पश्यन्नपीममात्मानं कुर्यात् कर्माविचारयन्।
यदात्मनः सुनियतमानन्दोत्कर्षमाप्नुयात्॥'

इति कौषारवश्रुतौ विहितत्वाच्च। अपिशब्दो वर्णधर्मसमुच्चयार्थः॥ ३२॥

॥ ॐ सहकारित्वेन च ॐ ॥ ३-४-३३ ॥

'यथा राज्ञः सहकार्येव मन्त्री तथाऽप्यृते तं क्षितिपः कार्यमृच्छेत्।
एवं ज्ञानं कर्म विनाऽपि कार्यं सहायभूतं न विचारः कुतश्चित्॥'

इति कमठश्रुतौ सहकारित्वोक्तेश्च।

१. ब. विसर्जयेत् २. ब. अकामकारे
३. ब. इति च पाद्मे ४. केवलनिषिद्धाकरणेन

'ज्ञानान्मोक्षो भवत्येव सर्वाकार्यकृतोऽपि तु।
आनन्दो ह्रसतेऽकार्याच्छुभं कृत्वा[१] तु वर्धते ॥' इति ब्रह्माण्डे[२] ॥
'सर्वदुःखनिवृत्तिश्च[३] ज्ञानिनो निश्चितैव हि।
उपासया कर्मभिश्च भक्त्या चाऽनन्दचित्रता ॥' इति बृहत्तन्त्रे[४] ॥
'धर्मस्वरूपचित्रत्वाद् यो यो देवमनोगतः।
स एव धर्मो विज्ञेयो न ह्येते लोकसम्मिताः ॥' इति च पाद्मे ॥ ३३ ॥

॥ इति कामचाराधिकरणम् (स्तुत्यधिकरणम्) ॥ ४ ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र भगवत्प्राप्तिसाधनज्ञानस्यासत्प्रवृत्तावपि मोक्षसाधनत्वनियम-लक्षणमहिम्नो वर्णनादस्ति शास्त्रादिसङ्गतिः। अन्यथा साधनान्तरादति-शयाभावप्रसङ्गात् समर्थनीयमेतत्। प्रकृतज्ञानवानत्र विषयः। किं तस्य सदसत्प्रवृत्त्योर्विशेषोऽस्ति न वा इति सन्देहः। लौकिकदृष्टिस्तुल्यं त्वित्युक्तिश्च सन्देहबीजम्।

पूर्वपक्षः

पूर्वपक्षं सूचयति- **अथेति** ॥ न ज्ञानिनः सदसत्प्रवृत्त्योर्विशेषोऽस्ति। 'ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेद् बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मणः स ब्राह्मणः केन स्याद् येन स्यात् तेनेदृश एव' इति श्रुतौ ज्ञानिनो यथेष्टप्रवृत्तिविधानात्। तथाहि। यो ब्रह्म-

१. ब. कृत्वा च २. ब. इति च ब्रह्माण्डे
३. ब. सर्वदुःखनिवृत्तिस्तु ४. ब. इति च बृहत्तन्त्रे

प्राप्तियोग्योऽसावागमजं ज्ञानं लब्ध्वा युक्तिजज्ञानमापादयेत्। तदुभय-लाभानन्तरं ध्यानी भवति। तेन चापरोक्षज्ञानं प्राप्नोति। अथ जीवन्मुक्त उच्यते। स च सता वाऽसता वा केनापि प्रकारेण वर्तेतेति। यदि ज्ञानिनः सदसत्प्रवृत्त्योरस्ति विशेषस्तर्हि सदेवाऽचरेन्नासदिति वक्तव्यम्। नतु यथेष्टाचरणं विधातुं युक्तम्। श्रूयते च ज्ञानिनः सदसत्प्रवृत्त्योरविशेषः- 'येन स्यात् केन स्यात् तेनेदृश एव' इति। अयुक्तश्च ज्ञानिनः सदसत्प्रवृत्त्योर्विशेषः। नहि मोक्षादतिशयितं फलमस्ति, यत् सत्प्रवृत्त्या भवेत्। नच समुच्चयसाध्यत्वं मोक्षस्य, नापि ज्ञानिनो मोक्षाभावः। योऽसत्प्रवृत्त्या भविष्यति। अतः सदसत्प्रवृत्तिभ्यां ज्ञानिनो विशेषाभावादाद्याधिकरणोक्तमयुक्तमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमवतार्य व्याचष्टे- **अत इति** ॥ अस्त्येव ज्ञानिनः सदसत्प्र-वृत्त्योर्विशेषस्तर्हि कथमयं यथेष्टाचरणविधिः? मैवम्। 'केन स्यात्' इत्यस्य विधित्वाभावात्। तर्हि किमर्थमुच्यते। यथा कश्चित् भृत्यं प्रति तत्स्तुतये कथ्यते यथेष्टं कुर्विति नतु विधिस्तथैतदपि ज्ञानिनः स्तुतय एवोच्यते। अथवा यथेष्टाचारेऽनुज्ञामात्रमेतत्। सर्वथा तु न विधिरिति भावः। न सद-सत्प्रवृत्तिभ्यां ज्ञानिनो विशेषो युज्यते। तथा सत्यसत्प्रवृत्त्या कुण्ठितस्य ज्ञानस्य मोक्षसाधनत्वाभावप्रसङ्गात्। तथाच 'अनियमः' इत्युक्तव्याघातः। सत्प्रवृत्तिसमुच्चितस्य मोक्षसाधनत्वप्रसङ्गादित्यत आह- **युज्यते चेति** ॥ सदसत्प्रवृत्तिभ्यां विशेष इति शेषः ॥ १४ ॥

यथेष्टाचारेणापि ज्ञानिनां मोक्षकथनात् सदसत्प्रवृत्तिभ्यां विशेषोऽस्तीति निरूपणम्

असत्प्रवृत्त्या कुण्ठितशक्तेर्ज्ञानस्य मोक्षसाधनत्वाभावप्रसङ्गात् कथं युज्यते? इत्याशङ्कां परिहरत् सूत्रमुपन्यस्य व्याचष्टे- **कामेति** ॥ नासत्प्रवृत्त्या

कुण्ठितत्वेन ज्ञानस्य मोक्षसाधनत्वाभावः प्रसज्यते। यतो यथेष्टाचारेणापि ज्ञानिनो मोक्षमेके शाखिनः पठन्ति इति भावः। अनारम्भणमनादि॥१५॥

सदसत्प्रवृत्तिभ्यां ज्ञानिनां विशेषोऽस्तीत्यस्य कैमुत्येन समर्थनम्

कैमुत्येनैतमर्थं समर्थयत् सूत्रं पठित्वा तत्सूचितां श्रुतिमुदाहरति- **उपमर्दं चेति॥** ज्ञानिनो हि विषभक्षणान्मृतेरिवानिवर्त्यतया प्राप्तस्याऽरब्धकर्मणोऽपि किञ्चिद् भुक्तस्य ज्ञानेनोपमर्दमेके शाखिनः पठन्ति। तदोत्तरकालीनासत्कर्म न मोक्षप्रतिबन्धकमिति किं वर्णनीयमिति भावः। तदुक्तम्- 'न वै जनो जातु कथञ्चनाऽव्रजेन्मुकुन्दसेव्यन्यवदङ्ग संसृतिम्' इति। 'ओमित्युच्चार्य' इति श्रवणाद्युपलक्षणम्। अन्तर्हृदयस्येत्येतदप्युपलक्षणम्॥ १६॥

य इममिति श्रुतौ ऊर्ध्वरेतस्त्वादिगुणवत्स्वेव ज्ञानोपदेशविधानात्-नान्येषां ज्ञानाधिकार इति निरूपणम्

यदि कामचारिणामपि ज्ञानिनां मुक्तियोग्यता तर्हि तद्वज्जिज्ञासूनामपि कामचाराणां ज्ञानाधिकारः स्यादविशेषात्। तथाच 'अध्ययनमात्रवतः' इत्युक्तबाध इत्याशङ्कां परिहरत् सूत्रमुपन्यस्य व्याचष्टे- **ऊर्ध्वेति॥** कामचाराणामपि ज्ञानिनां मुक्तियोग्यताऽस्तीत्येतावता तद्वत् कामचाराणां ज्ञानाधिकारो न मन्तव्यः। 'य इमम्' इति शब्दे श्रुतौ ऊर्ध्वरेतस्त्वादिगुणवत्स्वेव ज्ञानोपदेशविधानात्। अपरोक्षज्ञानस्य च परोक्षज्ञानपूर्वकत्वादिति भावः। भूयसो भूयांसः॥ १७॥

केन स्यादिति यथेष्टाचरणविधायकश्रुतेः जैमिनिमतरीत्याऽर्थान्तरनिरूपणम्

एवं 'केन स्यात्' इत्यस्य विधित्वमङ्गीकृत्यार्थ उक्तः। तथैव जैमिनिमतेनार्थान्तरं प्रतिपादयत् सूत्रमुपन्यस्य व्याचष्टे- **परामर्शमिति॥** नायं श्रुत्या कामचारो विहितः। नाप्ययं सदसत्प्रवृत्तिविषयः। किन्तु सदाचारस्यैव

नियमेनाऽचरणमेव श्रुत्योच्यमानः कामचारः। नचात्राऽचारानुक्तिदोषः। 'प्रातरुत्थाय' इत्यादिश्रुतिस्मृत्युक्ताचारपरामर्शेन श्रुत्या तच्चरणविधानात्। नचैवं नियमेन चरणे 'केन' इति कामचारोक्त्ययोगः। विधिबन्धवर्जितत्वेन स्वेच्छयैव चरणादिति जैमिनिराचार्यः मन्यत इति भावः। किमर्थं सर्वसत्प्रवृत्तौ कामचरणं नियमेनात्रोक्तमित्युच्यते। निषिद्धप्रवृत्तिरप्यत्रोक्ता किं न स्यादिति चेत्। किं निषिद्धं ज्ञानिना कर्तव्यमिति स्फुटविधिसद्भावादेतदुच्यते निषेधाभावाद्वा। आद्यं पराचष्टे- **नचेति॥** द्वितीयं पराह- **ब्राह्मण इति॥** अयं च सामान्यनिषेधो ज्ञानिष्वपि वर्तते॥ १८॥

केन स्यादिति श्रुतेः बादरायणाभिमतार्थकथनम्

एवमस्य वाक्यस्य जैमिनिमतानुसारेण सदाचारविधित्वमेवोक्त्वा यत् 'स्तुतयेऽनुमतिर्वा' इत्युक्तं तदेव प्रतिपादयत् सूत्रमुपन्यस्य व्याचष्टे- **अनुष्ठेयमिति॥** 'केन स्यात्' इति यथेष्टाचारविधिर्न भवति। नापि सर्वस्य कर्तव्यताविधिः। किन्तु श्रुत्याद्युक्तानामनुष्ठेयानां मध्ये स्वेच्छया केषाञ्चिच्चरणं केषाञ्चिदचरणमित्यनुज्ञानमेव कामचारश्रुत्यर्थ इति भगवान् बादरायणो मन्यत इति भावः। कामेन सर्वचरणमेवार्थः किं न स्यादित्यत आह- **केनेति॥** अनुष्ठेयानां मध्य एवायं कामचारो न सर्वेषाम्। केनापि प्रकारेण प्रवृत्तावपि ज्ञानिनः साम्योक्तेः। साम्योक्तिश्चोक्तकामचरण एव सम्यक् सम्बद्ध्यते। प्राप्तिसद्भावात्। सर्वाचरणपक्षे तु सम्भवमात्रज्ञापनं स्यात्। सम्भवज्ञापनादप्यसम्भवनिवृत्तेर्ज्यायस्त्वादिति भावः।

सत्यमस्मिन् पक्षे साम्योक्तिः सम्यक् सम्बद्ध्यत इति। तथाऽपि न युज्यते। कर्तव्यपरित्यागे साम्यायोगात्। अतो मुख्याऽपि योजना साध्वीत्यत आह- **यस्त्विति॥** ज्ञानिनां कार्याभावोक्तेर्न तत्परित्यागे साम्यायोग इति भावः। आत्मरतिः परमात्मदर्शननिमित्तसुखमाप्तः। आत्मतृप्तः परमात्म-

प्रसादेन विषयेष्वलम्बुद्धिमाप्तः । तत् कुतः? परमात्मनि सन्तोषवत्त्वात् तद्दर्शनादिनिमित्तसुखवत्त्वादिति भावः । एवं 'केन स्यात्' इति वाक्यशेषस्य यथेष्टाचरणविधित्वाभावमभ्युपेत्यार्थद्वयमुक्तम् ॥ १९ ॥

त्रैवर्णिकानां वेदधारणविधिवत् 'येन स्यात्'
इत्युक्तस्वेच्छाचारविधिर्ज्ञानिनामेवेति निरूपणम्

अथाऽयं स्वेच्छाचरणविधिर्वा भवतीत्यर्थप्रतिपादकं सूत्रं पठित्वा व्याचष्टे- **विधिर्वेति ॥** विधिरिति यथेष्टाचरणविधिरित्यर्थः । न ज्ञानिनां स्वेच्छाचरणविधिर्युक्तोऽज्ञानिनामपि तथात्वप्रसङ्गादित्यत आह- **यथेति ॥** विहिता नान्येषामित्यन्वयः । उक्तस्यैव विवृतत्वात् पुनर्वाशब्दः । नायं यथेष्टाचरणविधिः सम्भवति । अचोदनेत्युक्तविरोधात् । अधर्मकरणस्यापि सम्भवादित्यत आह- **न तत्रेति ॥** कुतो न तत्राधर्मशङ्का कार्येत्यत आह- **स्वेच्छयेति ॥** अत्र ब्रह्मण इत्युक्तेऽपि ज्ञानिनामित्येव ज्ञातव्यम् । विषयविभागस्य वक्ष्यमाणत्वात् । चोदना यत इति शेषः ॥ २० ॥

केन स्यादिति न स्वेच्छाचरणं ज्ञानिनां विधीयते, किन्तु पूर्वोक्तस्तुतिरेव
इत्याक्षेपपरिहारः

उक्तमाक्षिप्य समादधत् सूत्रमुपन्यस्याऽऽक्षेपांशं तावद् व्याचष्टे- **स्तुतिमात्रमिति ॥** यदुक्तं 'केन स्यात्' इति स्वेच्छाचरणं ज्ञानिनां विधीयत इति । मैवम् । किन्तु पूर्वोक्तस्तुतिरेव । कुतः? ज्ञानिभिरपि 'सन्ध्यामुपासीत' इत्यादिसर्वजनसाधारणविधिस्वीकारात् । स्वेच्छाचरणविधौ तदयोगादिति भावः । परिहारांशं व्याचष्टे- **नेति ॥** ज्ञानिनां स्वेच्छाचरणविधिर्नास्ति किन्तु स्तुतिमात्रमेतदिति न युक्तम् । ज्ञानिनां स्वेच्छाचरणविध्यभावेन स्तुतिविषयत्वे सर्वविध्यतिदूरत्वेन स्तुतिमात्रविषयत्वप्रसङ्गात् । नच तद् युक्तं परमात्माधीनत्वादिति भावः ।

परमात्माधीनत्वेऽपि सर्वविध्यतिदूरत्वेन स्तुतिमात्रविषयत्वं किं न स्यादित्यत आह- **सर्वेति ॥** ज्ञानिनां सामान्यविधिसद्भावात् स्वेच्छाविध्यभावेऽपि न सर्वविधिदूरत्वमित्याशङ्कां परिहर्तुमुक्तार्थे स्मृतिं चाऽऽह- **विधीनामिति ॥** २१ ॥

ज्ञानिनां स्वेच्छाचरणविधौ स्पष्टप्रमाणकथनम्

ननु ज्ञानिनां स्वेच्छाचरणविधेः स्फुटप्रमाणसिद्धत्वे भवेदेतद्वाक्यं तदर्थं, तदेव कुत इत्याशङ्कां परिहरत् सूत्रमुपन्यस्य तत्सूचितश्रुतिमेवोदाहरति- **भावेति ॥** भावे इच्छायाम् । अतीतसूत्रे स्वेच्छाचरणविधेरर्थसिद्धत्वाच्चशब्दः ॥ २२ ॥

केन स्यादिति श्रुतेः पूर्वोक्तार्थत्रयस्याऽऽक्षेपद्वारा तत्परिहारकथनम्

उक्तमाक्षिप्य समादधत् सूत्रं पठित्वाऽऽक्षेपांशं तावद् व्याचष्टे- **पारिप्लवार्था इति ॥** प्रथमं जैमिनिमतानुसारेण ज्ञानिभिः समस्तं कार्यमिति 'प्रातरुत्थाय' इत्यादिवाक्यान्यनुसृत्योक्तम् । अथ 'यस्त्वात्मरतिः' इत्याद्यनुसारेण स्वेच्छाचरणमनुज्ञातम् । पुनश्च 'यथाविधानम्' इत्याद्यनुसारेण स्वेच्छाचरणविधिरुक्तः । त्रयं च 'केन स्यात्' इत्याद्यर्थतयोक्तम् । एवं च 'केन स्यात्' इत्यादिव्यपदेशा न यथावस्तुबोधका भवन्ति । प्रकारत्रयप्रतिपादकवाक्यानां परस्परविरुद्धत्वात् । वस्तुनि विकल्पासम्भवादिति भावः । परिहारांशं व्याचष्टे- **नेति ॥** अनियता अनुष्ठेयानां मध्ये कामचारानुज्ञावन्तः ॥ २३ ॥

पूर्वोक्तार्थत्रयस्याधिकारिभेदेन उपपादनम्

ज्ञानिनामनेकप्रकारत्वेऽपि किमासीदित्याशङ्कां परिहरत् सूत्रं पठित्वा व्याचष्टे- **तथाचेति ॥** एवं ज्ञानिनां त्रैविध्ये सिद्धे 'प्रातरुत्थाय' इत्यादिवाक्यानां 'यस्त्वात्मरतिः' इति स्वेच्छाचरणानुज्ञावाक्यानां 'यथाविधानम्'

इति स्वेच्छाचरणविधिवाक्यानामविरोधो भवति भिन्नविषयत्वसम्भवात्। तथाच 'केन स्यात्' इति वाक्यस्याऽपि तदनुसारेणास्थिरत्वाभाव इति भावः। अनेन जैमिनिमतं मानुषविषयं, द्वितीयं देवताविषयं, तृतीयं हिरण्यगर्भविषयमित्युक्तं भवति। नच देवतानां स्वेच्छाचरणे विध्यभावप्राप्तेरुक्तमयुक्तम्। प्रायस्तेषां स्वेच्छाचरणविधिसद्भावात्। स्वेच्छाचरणेऽनुज्ञामात्रत्वाच्चेति॥ २४॥

कामचाराणामपि मोक्षस्य श्रुतत्वात्, ज्ञानस्य मोक्षसाधने अग्निहोत्राद्यनपेक्षत्वनिरूपणम्

एवं ज्ञानिनां श्रुतिबलेन सदसत्प्रवृत्त्योरविशेषः परिहृतः। तत्र यदुक्तं ज्ञानिनां सदसत्प्रवृत्त्योर्विशेषे ज्ञानस्यासत्प्रवृत्तिकुण्ठितशक्तेर्न मोक्षसाधनत्वं स्यात्। मोक्षसाधने च सत्प्रवृत्तिसापेक्षत्वं स्यादिति। तत्राऽयं चोद्यं परिहृतम्। द्वितीयपरिहाराय सूत्रं पठित्वा व्याचष्टे- **अत एवेति**॥ ज्ञानिनः सदसत्प्रवृत्तिभ्यां विशेषसद्भावेऽपि नाग्निहोत्रादिसत्प्रवृत्तिसापेक्षत्वं ज्ञानस्य मोक्षसाधने। कुतः? कामचाराणामपि मोक्षस्य पठितत्वादेवेति भावः।

ननु यदि सत्प्रवृत्त्या न मोक्षो नासत्प्रवृत्त्या तत्प्रतिबन्धः, कथं तर्हि ताभ्यां ज्ञानिनो विशेष इत्यत आह- **ब्रह्मतर्के चेति**॥ २५॥

'मोक्षसाधनज्ञानोत्पत्तावेव सर्वधर्मापेक्षा, नतु ज्ञानफलमोक्षेऽपि' इत्यस्य अश्वदृष्टान्तेन निरूपणम्

अस्तु ज्ञानिनः सत्प्रवृत्त्या विशेषान्मोक्षप्राप्तिः। किमाधिक्येन? कामचाराणां मोक्षश्रुतिस्तु न बाधिका। असत्प्रवृत्तेरप्रतिबन्धकत्वेऽपि सत्प्रवृत्तेर्मोक्षहेतुत्वोपपत्तेरित्याशङ्कां परिहरत् सूत्रमुपन्यस्य व्याचष्टे- **सर्वेति**॥ न ज्ञानस्य मोक्षसाधने सत्प्रवृत्त्यपेक्षा सर्वसत्प्रवृत्तीनां ज्ञानोत्पत्त्यर्थमपेक्षितत्वात्। 'विविदिषन्ति' इति श्रुतेरिति भावः। अनाशकेनानशनेन।

ननु सत्कर्मणो ज्ञानार्थस्यापि मोक्षार्थमपेक्षितत्वं किं न स्यादित्यत आह- **यथेति**॥ यथा गतिसाधनाश्वादयो निष्पन्नायां गतौ गतिसाध्यफले नापेक्ष्यन्ते तथा कर्माणि ज्ञानसाधनानि ज्ञाने निष्पन्ने न तत्फलार्थमपेक्षितानीति भावः॥ २६॥

ज्ञानादेव मोक्षस्य सिद्धत्वेऽपि माठरश्रुतौ ज्ञानिनः शमादेर्विधानात्, तथा ज्ञानाङ्गतया, शमादेरनुष्ठेयत्वनिरूपणम्

यदि सदसत्प्रवृत्तिभ्यां मोक्षतदभावाभावः न तर्हि ताभ्यां विशेषो ज्ञानिन इति न तेन सत् कार्यमसत् त्याज्यम्। नच मोक्षाधिक्यादिविशेषः। ज्ञानादेव तदुपपत्तेरित्याशङ्कां परिहरत् सूत्रमुपन्यस्य व्याचष्टे- **शमेति**॥ यद्यप्यस्ति ज्ञानिनो मोक्षः, तथाऽपि ज्ञानिनः शमदमादिसत्प्रवृत्त्या भवितव्यम्। तथा विधिसद्भावादित्यर्थः। ज्ञानादेव मोक्षसिद्धेः व्यर्थो विधिरित्यत आह- **ब्राह्मीमिति**॥ न ज्ञानिनः शमदमादिवैयर्थ्यम्। ज्ञानप्रतिष्ठापकत्वेन तेषामवश्यानुष्ठेयत्वादिति भावः। तपआदि प्रतिष्ठेति। तद्वत्सु विद्या प्रतितिष्ठतीत्यर्थः। सत्यं मीमांसा। आयतनमुत्पत्तिकारणम्।

ननु ज्ञानादेव मोक्षसिद्धौ किं प्रतिष्ठयेत्यत आह- **यस्येति**॥ ज्ञानमात्रेण मोक्षसिद्धावपि शमाद्यङ्गयुक्तेन सम्पूर्णो भवति नान्यथाऽतस्तदनुष्ठेयमिति भावः। एतत् सूत्र एव किं नोक्तमित्यत आह- **तुशब्द इति**॥ २७॥

ज्ञानिनां निषिद्धान्नभक्षणस्य प्राणात्ययकालीनत्वनिरूपणम्

ननु यदि सदसत्प्रवृत्तिभ्यामस्ति ज्ञानिनो विशेषस्तर्हि कथम् 'एवंविन्निखिलं भक्षयीतेति तस्य निषिद्धान्नभोजनेऽपि ह्रासाभावोक्तिः सम्भवति। अतो न विशेषः स्यादित्याशङ्कां परिहरत् सूत्रं पठित्वा व्याचष्टे- **सर्वेति**॥ नैतच्छ्रुतिबलेन ज्ञानिनोऽसत्प्रवृत्त्या विशेषाभावो वक्तव्यः। एतच्छ्रुतेः

प्राणात्ययविषयत्वात्। यदि प्राणात्ययकाले ज्ञानी निषिद्धं भुञ्जीथ तर्हि न तेन तस्य विशेष इति साधारणश्रुतेः कुतः प्राणात्ययविषयत्वकल्पनम्? लिङ्ग-दर्शनादेव। चाक्रायणेनेभ्योच्छिष्टकुल्माषान् खादतोच्छिष्टजलपाने प्रार्थिते-नोक्तमुच्छिष्टं वै मे पीतं स्यादिति। तत्रेभ्यो बभाषे। न स्विदेतेऽपि कुल्माषा उच्छिष्टा इति। तत्र मुनिरुवाच। यदीमान् कुल्माषान्नाभक्षयं तर्हि न मे जीवनं भवति। अतः प्राणात्यये दोषाभावात् ते भक्षिताः। जलपानं तु ममेच्छाधीन-मिदानीमपि वर्तते। वृथोच्छिष्टस्वीकारे दोषप्राप्तेर्न तत् पिबामीति। अतो न कर्तव्यमेव ज्ञानिनाऽपि निषिद्धमिति भावः॥ २८॥

निषिद्धाकरणे बाधकाभावात् निषिद्धं न कार्यमिति निरूपणम्

किञ्च किं ज्ञानिनिषिद्धाकरणे बाधकसद्भावाद्वा तदुच्यते, अथ करणे प्रमाणसद्भावादुत निषेधकप्रमाणाभावादथ करणे बाधकाभावाद्वा। आद्यं पराकुर्वत् सूत्रं पठित्वा स्मृत्यैव व्याचष्टे- **अबाधाचेति**॥ २९॥

स्मृत्या निषिद्धाकरणवर्णनम्

न द्वितीयः। असिद्धत्वात्। निषेधकस्मृतिसद्भावान्न तृतीयोऽपीत्यर्थ-प्रतिपादकं सूत्रं पठित्वा तां स्मृतिमुदाहरति- **अपीति**॥ ३०॥

श्रुत्याऽपि निषिद्धाकरणसमर्थनम्

न केवलं स्मृतिरेव निषेधिका श्रुतिश्चास्तीत्यर्थप्रतिपादकं सूत्रमुपन्यस्य तां श्रुतिमुदाहरति- **शब्दश्चेति**॥ चरतिर्गतिः। चतुर्थं निराकर्तुमाह- **अत इति**॥ तदेव कुत इत्यत आह- **नेति**॥ ३१॥

ज्ञानिभिः निषिद्धं त्याज्यं चेद् विहितमपि त्याज्यं भवेदित्याक्षेपपरिहारः

नन्वेवं निषिद्धाचरणे फलह्रासादिबाधकसद्भावादस्तु ज्ञानिनो निषिद्ध-

वर्जनं, नतु सत्कर्मकरणम्। ह्रासकारणाभावे ज्ञानादेव पूर्णफलसिद्धेरित्या-शङ्कां परिहरत् सूत्रमुपन्यस्य व्याचष्टे- **विहितत्वाचेति**॥ सुनियतं वर्णाश्रमो-चितम्॥ सूत्रेऽनुक्तो वर्णधर्मः किमर्थं भाष्यत इत्यत आह- **अपीति**॥३२॥

सम्पूर्णफलसिद्ध्यै ज्ञानिना सत्कर्म कर्तव्यमेवेति कथनम्

विहितत्वेऽपि न सत्कर्म ज्ञानिना कार्यम्। फलाभावात्। सम्पूर्णफलस्य ह्रासकारणाभावे स्वत एव सिद्धेः। अन्यथा समुच्चयवादापत्तेरित्याशङ्कां परिहरत् सूत्रमुपन्यस्य व्याचष्टे- **सहकारित्वेनेति**॥ कर्तव्यमेव ज्ञानिना सत्कर्म। सम्पूर्णफलसिद्धौ कर्मणो ज्ञानसहकारित्वेनोक्तत्वात्। नचैवं समुच्चयवादापत्तिः। विनाऽपि कर्म ज्ञानमात्रेण मोक्षस्वरूपसिद्धेरिति भावः। यद्यपि क्षितिपो मन्त्रिणमृते कार्यं प्राप्नोति तथाऽपि मन्त्री सहकारी सम्पूर्णकार्यसिद्धेः। एवं यद्यपि ज्ञानं कर्म विनाऽपि मोक्षकार्यं साधयेत् तथाऽपि कर्म सहायभूतम्। फलाधिक्यहेतुत्वादित्यर्थः। अत्र स्मृतिं चाऽह- **ज्ञानादिति**॥ यदि सम्पूर्णानन्दप्राप्तौ कर्मसहकृतं ज्ञानं साधनं तर्हि समुच्चयवादापत्तिर्दुर्वारा। सम्पूर्णानन्दप्राप्तिमन्तरेण मोक्षस्वरूपस्य ज्ञानमात्रसाध्यस्य पृथगभावादित्यत आह- **सर्वेति**॥ सर्वदुःखनिवृत्तिर्ज्ञान-साध्यो मोक्ष इति भावः।

यदुक्तमसत्प्रवृत्त्याऽऽनन्दह्रास इति न तद् युक्तम्। ब्रह्मादीनां पुत्रिका-कामाद्यसत्प्रवृत्या ह्रासाभावादित्यत आह- **धर्मेति**॥ अन्येषामेवमभावात् तेषामेवायं विशेषः कथमित्यत आह- **नहीति**॥ अतो ज्ञानिनां सदसत्प्रवृत्तिभ्यां विशेषसद्भावेऽपि मोक्षो नियत एवेति सिद्धम्॥ ३३॥

॥ इति कामचाराधिकरणम् (स्तुत्यधिकरणम्)॥ ४॥

शेषतात्पर्यचन्द्रिका

॥ अथ कामचाराधिकरणम् (स्तुत्यधिकरणम्) ॥ ४ ॥

॥ ॐ स्तुतयेऽनुमतिर्वा ॐ ॥ ३-४-१४ ॥

पादसङ्गतिः

सर्वाकार्यकृतोऽपि ज्ञानिनो मोक्षो भवत्येव। नत्वज्ञानिन इव निषिद्धाचरणेन प्रतिबद्ध्यत इति ज्ञानस्यैव महिमाऽस्मिन् विंशतिसूत्रात्मकेऽधिकरणे प्रतिपाद्यते।

नन्वेतदधिकरणस्थसूत्रेषु 'स्तुतयेऽनुमतिर्वा' इत्यादिषु, 'केन स्याद् येन स्यात् तेनेदृश एव' (बृ.उ. ५.५.१) इति श्रुतेरर्थत्रयकथनेन निषिद्धाचरणे आनन्दह्रासलक्षणहान्युक्तेः सत्कर्माचरणेन च तद्वृद्ध्युक्तेः ज्ञानानन्तरमपि कर्मावश्यं कर्तव्यमिति कर्मण एव माहात्म्यं प्रतिपाद्यते। अत एवेहापि टीकायां 'किं ज्ञानस्य सदसत्प्रवृत्त्योर्विशेषोऽस्ति न वेति सन्देहः', 'न ज्ञानिनः सदसत्प्रवृत्त्योर्विशेषोऽस्ति' इति पूर्वः पक्ष इति। 'अतः सदसत्प्रवृत्तिभ्यां ज्ञानिनो विशेषाभावाद् आद्याधिकरणोक्तमयुक्तम्' इति[१] पूर्वपक्षोपसंहारोऽपि दृश्यते। अन्यथा ज्ञानस्य माहात्म्यमित्येव स्यात्। इह प्रदर्शितपूर्वपक्षस्य ज्ञानमाहात्म्यापादकत्वेन सिद्धान्तस्य तद्विरोधेन च पूर्वपक्षसिद्धान्तविनिमयापातश्च[२]। सूत्राणामनाभिमुख्यं च। कर्मण एव माहात्म्यप्रतिपादने यद्यप्येवञ्जातीयको दोषो नास्ति। तथाऽपि ज्ञानमाहात्म्यप्रतिपादनपरेऽस्मिन् पादेऽन्तर्भावासम्भवः प्रतिकूलता चास्ति दोषः।

मैवम्। यद्यप्यत्र मुखतो ज्ञानिनां सदसत्प्रवृत्तिभ्यामानन्दवृद्धिह्रासरूपविशेषसद्भावः प्रतिपाद्यते। तथाऽपि मोक्षे तदभावलक्षणविशेषः फलतो

१. प. पाठे 'ज्ञानेऽधिकारे च तारतम्यम् अयुक्तम्' इति अधिकं दृश्यते।
२. म. पूर्वपक्षसिद्धान्तयोः विनिमयापातश्च।

निराक्रियत इत्यस्यान्तर्भावसम्भवात्। नचायं ज्ञानिनो विशेषो न भवति। अज्ञानिनां सदसत्प्रवृत्तिभ्यां विशेषसद्भावात्। मोक्षाभावलक्षणकर्मलेपस्याङ्गीकारात्। उक्तं चैतत्- 'कामकारेण चैके' इति सूत्र एव। उपमर्दसूत्रेऽपि विषभक्षान्मृतेरिवानिवर्त्यतया प्राप्तस्य प्रारब्धकर्मणोऽपि ज्ञानेनोपमर्दकथनात्। प्रारब्धकर्मोपमर्दकत्वलक्षणमाहात्म्यं स्पष्टमेव प्रतिपाद्यते। नह्येतत् कर्मसाधारणम्। तस्य सञ्चितागामिनिवर्तनेऽप्यसामर्थ्यात्। अत एव

'विकर्मलेपो नैवास्ति सम्यग् दृष्टिमतां क्वचित्।
अत्र ज्ञानफलस्यैव मुक्तेर्नियततोच्यते॥
प्रारब्धकर्मजस्यैव विषभक्षान्मृतेरिव।
प्राप्तस्याप्यनिवृत्तस्य किञ्चिद् भुक्तस्य संविदा।
उपमर्द इह प्रोक्तः'

इत्येतदधिकरणतात्पर्यमुक्तम्।

यद्यपि प्रारब्धकर्मोपमर्दकत्वरूपं ज्ञानमाहात्म्यं उपमर्दसूत्रप्रतिपाद्यं प्रतीयते। तथाऽपि तन्नाधिकरणस्य प्रधानं प्रतिपाद्यम्। आद्यादिसूत्राणां साक्षात् तदनभिमुखत्वाद् इतीह टीकायां ज्ञानिनः सदसत्प्रवृत्तिभ्यां विशेषसदसद्भावविषयिणी चिन्ताऽपि दृश्यते[१]।

अत्र ज्ञानोत्तरकालं प्रवर्तमानयोः सदसत्कर्मणोस्तत्पूर्वकालीनकर्मवन्नाल्पफलत्वम्। किन्त्वानन्दवृद्धिह्रासरूपमहाफलत्वमित्येवं ज्ञानोत्तरकर्ममाहात्म्यमेव प्रतिपाद्यम्। नचैतत्पादासङ्गतिः। कर्मणः स्वतोऽल्पफलजनकत्वस्वाभाव्यात्। यदनन्तरमेव यस्य यत्सामार्थ्यं तत् तत्सामर्थ्यमेवेति ज्ञानसामर्थ्य एव पर्यवसानात्। नहि यौवनानन्तरमेव चेतनस्यापत्योत्पादकत्वं सम्पद्यमानं

१. क. युज्यते।

यौवनस्य महिमा न भवति। 'य आत्मानमेव लोकमुपास्ते। न हास्य कर्म क्षीयते' (बृ. १.४.१५) इत्यादिना क्षयिष्णुफलजनकत्वेन निश्चितस्यापि कर्मण आनन्द-वृद्ध्यादिरूपाक्षयिष्णुफलसाधनत्वरूपमाहात्म्यस्योपास्तिशब्दितापरोक्षज्ञानोत्तर-कालीनत्वश्रवणाद् ज्ञानमाहात्म्यमेवैतद् भवतीत्यप्याहुः।

विषयः चिन्ताक्रमश्च

अत एवात्र ज्ञानं विषयः। तत् किं कर्मतोऽनतिशयितमुतातिशयितम् इति चिन्तनीयम्। तदर्थं ज्ञानानन्तरमनुष्ठिताभ्यां सदसत्कर्मभ्यां ज्ञानस्य मोक्षजनकत्व-शक्त्याविर्भावकुण्ठने इष्टे न वा। तदर्थं शक्तिकुण्ठनाद्यनङ्गीकारे बाधकमस्ति न वा। तदर्थं 'नो इतराणि' (तै.उ.) इत्यादिविकर्माचरणनिषेधस्य फलान्तरं न लभ्यते उत लभ्यते। तदर्थं मौक्तिकानन्दादिह्रासशक्त्यङ्गीकारो न भवत्युत भवति। तदर्थं 'केन स्याद् येन स्यात् तेनेदृशः' (बृ.उ. ५.५.१) इत्यादिविधिरुत अर्थवाद इति।

यद्ययं यथेष्टाचरणविधिस्तदा विकर्माचरणफलत्वेनाऽनन्दह्रासादिर्नाङ्गीकर्तुं शक्यः। ततश्च विकर्माचरणनिषेधस्याऽनन्दह्रासाभावाख्यं न फलान्तरं लभ्यत इति मोक्षजनकत्वशक्तिकुण्ठनाभाव एव फलमित्यसत्कर्मणा तच्छक्तिकुण्ठनमेव जायत इति न ज्ञानमतिशयितम्। विपरीते तु विपर्यय इति फलफलिभावः।

मतान्तरे तु ज्ञानमतिशयितं भवति न वेति सन्देहः। तदर्थं तदनन्तरं क्रियमाणं कर्मातिशयवद् वा न वा। तदर्थं ज्ञानिनो आनन्दवृद्धिह्रासौ स्तो न वा। यदि ज्ञानिनस्तौ वर्तेते तदा तयोः कारणान्तरासम्भवाज्ज्ञानात् पूर्वकृतकर्मणश्च फलान्तरजनकत्वेन क्लृप्ततया तदुत्तरकालीनकर्मण एव कारणत्वावश्यम्भावात् महाफलजनकत्वेनातिशयोऽपि ज्ञानस्यैवेति सिद्ध्यति। यदि पुनर्न तावङ्गीक्रियेते तर्हि ज्ञानप्राचीनकर्मवत् तदुत्तरकालीनकर्मणोऽपि महाफलजनकत्वाभावेन माहात्म्यासिद्धौ ज्ञानस्यापि न तत् सिद्ध्यतीति।

पूर्वपक्षः

तत्र

ब्राह्मणो येन केन स्यात् तेन हानिर्न कस्यचित्।
इत्यादिश्रुतिवाक्येन वृद्धिह्रासौ न मोक्षगौ॥

यदि ज्ञानानन्तरं सदसत्प्रवृत्तिभ्याम् आनन्दवृद्धिह्रासरूपो वा मोक्षतदभाव-रूपो वा विशेषः स्यात् तर्हि सत्कर्मैवाऽचरेन्न निषिद्धमिति वक्तव्यम्। नतु यथेष्टाचरणं विधातुं युक्तम्। विधीयते च। 'स ब्राह्मणो येन स्यात् केन स्यात् तेनेदृश एव' (बृ.उ. ५.५.१) इति। नचात्र विधिप्रत्ययाभावः। 'येन स्यात्' इति लिङ ईदृश एवेत्यनेनान्विततया विध्यर्थकत्वायोगादिति वाच्यम्। श्रूयते तावज्ज्ञानिनः सदसत्प्रवृत्त्योरविशेषः- 'येन स्यात् केन स्यात् तेनेदृश एव' (बृ.उ. ५.५.१) इति। येन केनापि निषिद्धेन वाऽनिषिद्धेन वा प्रकारेण वर्तेत ज्ञानी। यथा निषिद्धेन वर्तमानोऽज्ञानी तदीदृश एव दोषसंश्लेषवान् भवति न तथा ज्ञानीति श्रूयत इत्ययमर्थवादस्तावद् भवति। तथा च 'प्रतिष्ठाकामो रात्रिसत्रं कुर्यात्' इतिवदत्रापि 'ज्ञानी यथेष्टं कुर्यात्' इति विध्युन्नयनस्यैवाऽर्थवादिकस्य सम्भवात्।

ननु रात्रिसत्रवाक्ये निषेधाभावेन विध्युन्नयनसम्भवेऽपि 'यान्यनवद्यानि कर्माणि तानि सेवितव्यानि। नो इतराणि' इति निषिद्धाचरणस्याकर्तव्यतयोक्तेः यथेष्टाचरणविध्युन्नयनं न सम्भवतीति चेन्न। 'नो इतराणि' (तै.उ.) इत्यादि-निषेधस्याज्ञानिविषयत्वेन ज्ञानिनां यथेष्टाचरणविध्युन्नयनबाधकत्वाभावात्। निषेधवाक्यस्य ज्ञानिविषयत्वे प्रयोजनाभावेन वैयर्थ्यापत्त्याऽज्ञानिमात्रविषयत्वेन सङ्कोचनीयत्वाच्च।

तथाहि। किं ज्ञानिनोऽसत्प्रवृत्तिनिषेधः मोक्षाभावनिवृत्त्यर्थः, उताऽनन्द-ह्रासनिवृत्त्यर्थः। नाऽद्यः। असत्प्रवृत्तिसहस्रेणापि मोक्षस्याप्रतिबध्यत्वात्।

अन्यथा 'अनियमः सर्वेषाम्' (ब्र.सू. ३.३.३२) इत्युक्तव्याघातः । असत्प्रवृत्तिनिषेधसमुच्चितस्य ज्ञानस्य मोक्षसाधनत्वप्रसङ्गेन मोक्षस्य समुच्चयसाध्यत्ववादापाताच्च ।

न द्वितीयः । मोक्षादतिशयितफलान्तरस्याऽनन्दह्रासाभावादेरनङ्गीकारात् । नचाऽसावानन्दह्रासोऽङ्गीकर्तुं शक्यः । यदि विकर्मणाऽऽनन्दह्रासः स्यात् तदा 'ममास्मादेतावन्न्यूनः, अस्मादेतावदधिकः, अनेन समानः' इति शास्त्रीयनियमो भज्येत । नहि क्लृप्तानन्दमध्ये कस्यचिदानन्दव्यक्तिविशेषस्य ह्रासे 'अस्माच्छतगुणन्यूनः', 'अस्माच्छतगुणाधिकः' इत्यादिव्यवस्था सम्भवति । नचाऽनन्दह्रासो नाऽनन्दव्यक्तिनाशः । येन शास्त्रीयो नियमो भज्येत । किन्तु क्लृप्तस्यैवाऽनन्दस्यानभिव्यक्तिरिति वाच्यम् । प्रकृत्याद्यावरणानामपास्तत्वेन मुक्तिदशायां तदयोगात् । एवं सत्प्रवृत्त्या फलविशेषोऽपि निराकरणीयः । तस्माद् ज्ञानिनं प्रति फलाभावेन निषेधशास्त्रस्य चाज्ञानिमात्रविषयत्वेन सङ्कोचादिह विध्युन्नये[१] बाधकाभावः । अन्यथाऽसत्प्रवृत्त्याऽऽनन्दाभिव्यक्तिकुण्ठनमिव संसारनिर्वृत्तिरूपमोक्षकुण्ठनमपि स्यादविशेषात् । एवं सत्प्रवृत्त्या मोक्षस्वरूपनिर्वृत्तिरपि स्यादिति समुच्चयवादापत्तिः[२] । नहि सदसत्प्रवृत्तिभ्यां मौक्तिकानन्दवृद्धिह्रासावेव, नतु मोक्षतदभावावित्यत्र नियामकसम्भवः । सम्भवे वा जिज्ञासूनामपि तथात्वापातः । नचैवं विधित्वसम्भवे स्तुतिमात्रत्वमनुमतिमात्रत्वं वा वक्तुमुचितम् । सर्वविध्यतिदूरत्वेन स्तुतिमात्रविषयत्वस्य भगवदेकनिष्ठधर्मत्वेनान्यत्रायोगाच्च[३] । अनुमतिमात्रत्वेऽपि 'ब्राह्मणो न हन्तव्यः' इत्यादिनिषेधशास्त्रव्याकोपः ।

ननु 'येन स्यात् केन स्यात्' (बृ.उ. ५.५.१) इति सामान्यतः श्रवणेऽपि 'प्रातरुत्थाय' इत्यादिश्रुत्युक्तसदाचारमात्रेऽनुमतिः सन्ध्यावन्दनादीनां मध्ये

१. प. विध्युन्नयने　　२. म. समुच्चयभावापत्तिः ।　　३. प. अत्रायोगाच्च ।

एव केषाञ्चिदग्नि-होत्रादीनां वर्जनेऽनुमतिमात्रमतो न दोष इति चेन्न । अनुमतिर्नामाभ्यनुज्ञानम् । तस्य विहितैकदेशत्यागे प्रवृत्तस्याविशेषात् तदेकदेशान्तरेऽपि प्रवृत्त्या ज्ञानिनः कर्मविध्यगोचरत्वस्यैव प्राप्तेः ।

अत एव श्रुतिस्मृत्युक्तसदाचारपरामर्शेन तच्चरणविधानं 'विहितं सर्वं कुर्यात्' इति 'येन स्यात् केन स्यात्' (बृ.उ. ५.५.१) इत्यनेनोच्यत इति निरस्तम् । 'कामचाराः कामवादाः कामभक्षाः कामेनैवेमं देहमुत्सृज्य' (सामशाखा) इत्यादिवाक्यविरोधात् । नहि यावत्सु कर्मसु[१] प्रवृत्तस्य कामचारादिर्युज्यते । कामतो हि चरणं कामचारः स्वच्छन्दवृत्तित्वम् । तच्च किञ्चिद् विहितं त्यजतः निषिद्धं कुर्वत एव भवेत्, नान्यथा । न च विधिबन्धवर्जितत्वेन विहितस्य सर्वस्यानुष्ठानमेव कामचरणमिति वाच्यम् । विधिबन्धाभावे तदाचरणस्यैवानुपपत्तेः । सिद्धान्ते आनन्दवृद्धिह्रासयोरङ्गीकृतत्वेन करणाकरणयोरभ्युदयप्रत्यवाययोः सद्भावेन विधिबन्धस्यैवाङ्गीकार्यत्वाच्च । तस्माज्ज्ञानिनः सदसत्प्रवृत्तिभ्यां विशेषाङ्गीकारे 'येन स्यात् केन स्यात् तेनेदृश एव' (बृ.उ. ५.५.१), 'कामचाराः कामवादाः कामभक्षाः' (सामशाखा) इत्यादिश्रुतिविरोधो दुर्वारः ।

किञ्च 'यदि हवा एवंविन्निखिलं[२] भक्षयीतैवमेव स भवति' इत्यादिश्रुत्युक्तनिषिद्धान्नभक्षणादिकृतलेपाभावानुपपत्तिः । मोक्षस्य कर्मसाध्यत्वे समुच्चयवादाद्यापत्तिश्च । तस्मादुक्तरीत्या मोक्षेतरफलस्यातिशयितस्याभावादानन्दवृद्ध्यादेश्च तारतम्यविरोधित्वेन सत्प्रवृत्तिसाध्यत्वानङ्गीकारात् । एवं मोक्षेतरहानेरगणनीयत्वादानन्दह्रासस्य च तारतम्यविरोधित्वेनासत्प्रवृत्तिसाध्यस्यानङ्गीकारान्न ज्ञानिनः सदसत्प्रवृत्त्योर्विशेष इति पूर्वः पक्षः ।

१. प. वरसत्कर्मणि, म. यावत्सुकर्मणि

२. 'अप्येवंविन्निखिलम्' इति ब्र.सू.भाष्ये ।

सिद्धान्तः

लिङादिश्रवणाभावान्न यथेष्टक्रियाविधिः ।
न हन्तव्यो ब्राह्मणः स्यादित्यादेर्न[1] तदुन्नयः ॥

नचास्य निषेधस्य ज्ञानिनं प्रत्यभिमुखत्वे प्रयोजनाभावः। ज्ञानिनो मोक्षस्य नियतत्वेन मोक्षाभावनिवृत्त्यर्थत्वाभावेऽप्यानन्दह्रासाभावार्थत्वोपपत्तेः। ज्ञानेनैव सिद्ध्यतो मोक्षस्याऽनन्दह्रासाभावरूपसम्पूर्णसिद्ध्यर्थत्वेन कर्मणः सहकारिमात्रत्वे समुच्चयवादानवकाशात् । अन्यथाऽऽग्नेयादिषड्यागेन सिद्ध्यतः स्वर्गस्योपकारक[2]मनुयाजाद्युत्तराङ्गमपेक्षितमेवेति प्रधानस्योत्तराङ्गेन समुच्चयवादापत्तिः। अतो विहिताचरणेनाऽऽनन्दवृद्धिः निषिद्धाचरणेन तद्ध्रासश्चास्तीति विधिनिषेधशास्त्रयोर्वैयर्थ्याभावेन ज्ञान्यभिमुखता च न विरुद्धा। नच तारतम्यानुपपत्तिः। क्लृप्तस्याऽनन्दस्याभिव्यक्त्यनभिव्यक्तिरूपवृद्धिह्रासयोस्तारतम्याविघातकत्वात्। यद्यपि मुक्तौ प्रकृत्याद्यावरणं निवृत्तमित्यनभिव्यक्तिकारणासम्भवः। तथाऽपि ईश्वरेच्छाया एवाऽवरणत्वाङ्गीकाराददोषः। ईश्वरो ज्ञानोत्तरमपि विधिनिषेधशास्त्रमनुल्लङ्घ्य प्रवृत्ते ज्ञानिनि प्रसन्नः स्वेच्छया यावताऽयमानन्दादिना परिमितस्तावन्तमस्मा अभिव्यञ्जयति स्पष्टम्। स्पष्टप्रतिभास एवाऽनन्दस्याभिवृद्धिर्नत्वपूर्वव्यक्तिलाभो येन तारतम्यविरोधः समुच्चयवादो वा स्यात्। क्लृप्तानन्दादिव्यक्तिविशेषाणां कर्मनिरपेक्षज्ञानेनैव प्राप्तत्वात्। अन्यथा मोक्षैकदेशकर्मक्षयोऽपि न स्यात्। तदुल्लङ्घ्य प्रवृत्ते तु 'ज्ञानिनं मोचयामि' इति इच्छया क्लृप्तयावदानन्दाविर्भावेन मोचयन्नपि 'एनं न सम्यक् मोचयामि' इति स्वेच्छयैव न स्पष्टमभिव्यञ्जयति। अयमेव ह्रास आनन्दस्य न तु क्लृप्तस्य हानिः। 'गुणदोषैः सुखस्यापि वृद्धिह्रासौ विमुक्तिगौ' इत्यत्राप्ययमेवार्थोऽनुसन्धेयः।

यद्वा, स्वाधिकाराधिकयत्नेन यावताऽयमानन्दादिना परिमितस्तावत्-

१. म. विध्यादेर्न। २. म. अङ्गोपकारकम्

परिमितस्यापि[1] स्वाधिकारानुगुणप्रयत्नमात्रेण सिद्धत्वात् ततोऽधिकानन्दादिव्यक्तिविशेषाप्तिरेव[2] साध्येति वक्तव्यं तावत्। ईश्वराराधनरूपस्वाधिकाराधिकयत्नस्य वैफल्यायोगात् । तथाचैवमवश्यं प्राप्तव्यस्याऽनन्दव्यक्तिविशेषस्य [3]हानिरेवाऽनन्दह्रासः। नचेश्वराराधनफलस्य केनचिद्धानिरपि न कर्तुं शक्येति वाच्यम्। साधारणविकर्मणा कर्तुमशक्यत्वेऽपि महता विकर्मणा तत्सम्भवात्। नच महदपि विकर्मेश्वराराधनफलहानिं कथं कुर्यादिति वाच्यम्। ईश्वरेच्छयैवोपोद्बलितत्वात्।

अत एव यस्तु स्वाधिकाराधिकं यत्नं करोति स तद्विघातकं महद्विकर्मापि करोत्येव। 'अनेनाहं स्वाधिकाराधिकं यत्नं कारयित्वा तत्प्रच्यावकं महद्विकर्मापि कारयिष्यामि' इत्येवंरूपेश्वरेच्छायाः प्रबलत्वात् । अन्यथाऽधिकानन्दप्राप्तौ स्वेच्छानियततारतम्यविरोधापातः। नहीश्वरेच्छानां परस्परं विरोधोऽस्ति। नचैतद् बहुकल्पनागौरवम्। तत्राधिकारिणो 'मनुष्या ऋषयो देवाः इत्युत्तरोत्तरम्' इति कौण्डिन्यश्रुतौ ज्ञानाधिकारतारतम्यस्य श्रवणात्। नहि ज्ञानाधिकारस्तारतम्यनियतः। ज्ञानादिसाधनं च तारतम्योपेतम्। तत्फलं त्वेकरूपमेवेति सम्भवति।

अत एव पूर्वोक्तं मतमपि नापह्नवयोग्यम्। तस्य मनुष्यविषयत्वात्। तेषां चाधमाधिकारित्वात्। 'तेष्वेव कांश्चिज्ज्ञानोत्तरं तत्तच्छक्त्यनुसारेण विहितकर्मसु सम्प्रेर्य तैश्च तानि कारयित्वा यावत्स्वरूपानन्दादि सम्यगभिव्यञ्जयामि। कांश्चित्तु विकर्मसु सम्प्रेर्य तैश्च तानि कारयित्वाऽऽनन्दादीन्न सम्यगभिव्यञ्जयामि' इतीच्छति परमेश्वरः । 'देवेषु तत्तदधिकारानुसारेण कांश्चित् स्वाधिकाराधिकराजसूयरामसेवादिषु सम्प्रेर्य तैश्च तानि कारयित्वा पुनरपि तान्येव स्वोच्चदारपरिग्रहादिषु महत्सु विकर्मसु सम्प्रेर्य तैश्च तानि कारयित्वा प्राप्तव्यफलविशेषं घातयामि' इतीच्छतीत्यवश्यं वक्तव्यत्वात्। अन्यथाऽधिकारविशेषाङ्गीकारो व्यर्थः स्यात्।

१. प. सर्वस्यापि २. म. विशेषप्राप्तिरेव ३. प. अप्राप्तिरेव

तस्मान्मतद्वयेऽपि न तारतम्यविरोधः। तस्माद् 'ब्राह्मणो न हन्तव्यः' इत्यादि-सामान्यशास्त्रस्य नाधिकारिषु सङ्कोचः। कथं तर्हि 'येन स्यात् केन स्यात् तेनेदृश एव' (बृ.उ. ५.५.१), 'कामचाराः कामवादाः कामभक्षाः' (सामशाखा) इत्यादिश्रुतिर्यथेष्टाचरणं विधत्ते इति चेन्न। लिङाद्यभावेन 'ब्राह्मणो न हन्तव्यः' इत्यादिनिषेधशास्त्राद् विध्युन्नयनायोगेन च यथेष्टाचरणविधित्वानङ्गीकारात्। किन्तु स्तुतिमात्र एवायं वादः। विहितेन निषिद्धेन वा वर्तमानो ज्ञानी मोक्षं साधयितुं समर्थ एवेत्यस्य सामर्थ्यस्य प्रकटनात्। सामर्थ्यप्रकटनमेव हि स्तुतिः।

ननु ज्ञानी तदैव प्रशंस्यते यदि तस्य यथेष्टाचरणेऽपि न काचिद्धानिः। नचासावस्ति। आनन्दह्रासस्याङ्गीकृतत्वादिति यदि मन्यसे तदा मोक्षहान्यभाव-मात्रेण स्तुत्युपपत्तिः। यदि तावता न सन्तोषस्तदाऽनुमतिमात्रमेतदस्तु। क्रियमाणस्याभ्यनुज्ञा ह्यनुमतिः। यथा कश्चित् पुत्रादिकं प्रबलेन देवदत्तादिना युद्ध्यन्तमाकर्ण्यापि प्राणपर्यन्तहानिर्नास्तीति मन्वानः कलहं निवर्तयितुमशक्नुवन् युध्यतु तेनेत्यभ्यनुजानाति, तथैवाऽयं परमात्माऽपि तत्तदधिकारानुसारेणा-नादितः प्रवृत्तस्वेच्छामनुरुन्धानः तेन क्रियमाणं निषिद्धमप्यनुजानाति 'येन स्यात् केन स्यात्' इत्यादिवाक्यरूपेणेत्युक्तौ को दोषः।

ननु 'येन स्यात् केन स्यात्' (बृ.उ. ५.५.१), 'कामचाराः कामवादाः' (सामशाखा) इत्यादिकामचारवचनं ज्ञानिनं प्रति परमात्मनः क्रियमाणानुज्ञारूपं पित्रादिवाक्यवदित्यनुपपन्नम्। किं विहितं सर्वं ज्ञानिना कार्यम्, निषिद्धं किञ्चित् करोति चेत् क्रियतामित्यनुज्ञानमुच्यत उत विहितेष्वेव किञ्चित् क्रियतां न वा किञ्चित् क्रियतामिति। आद्ये यावद्विहिताकरणे मोक्षाभावरूपप्रत्यवायोऽस्ति न वा। नाऽद्यः। अज्ञानिसाधारण्यापातात्। 'अनियमः' इत्युक्तव्याघातश्च[१]। न

१. म. व्याघाताच्च

द्वितीयः। विहितांशेऽप्यनुज्ञामात्रत्वापातात्। किञ्च सर्वस्य विहितस्य कर्तव्यत्वे 'तेनेदृश एव' (बृ.उ. ५.५.१) इत्युक्तसाम्योक्तिरयुक्ता स्यात्। असाम्यप्रसक्तौ हि साम्योक्तिर्दृश्यते। नहि सर्वसत्प्रवृत्तावसाम्यं प्रसक्तम्। येन तन्निषेधाय[१] साम्योक्तिः स्वरसा स्यात्। किन्त्वियं साम्योक्तिः सर्वसत्प्रवृत्तेः सम्भवमेव ज्ञापयति। अन्यथा 'एतादृशोऽपि नाऽचारं श्रौतं स्मार्तं परित्यजेत्' (ब्र.सू.भा.उ. हरिवंशवचनम्) इत्यादिनैव प्राप्तोऽप्यनेन साम्यवचनेनानूद्यत इति स्यात्। केषाञ्चिच्चरणं केषाञ्चिदचरणमित्यङ्गीकार एव कामचारशब्दस्वारस्य-सम्भवेऽपि नियमेन सर्वसदाचारे तत्स्वारस्यभङ्गाच्च। द्वितीये यद्यप्यत्र सर्वसत्प्रवृत्तिसम्भवानुवादमात्राद् विहितेष्वेव केषाञ्चित् करणात् केषाञ्चिदकरणाच्च सर्वसत्कर्मतः प्राप्तासाम्यनिवृत्तेर्ज्यायस्त्वादसर्वाचरणपक्षे साम्योक्तिस्वारस्यमस्ति। तथाऽप्यसौ न युज्यते। कर्तव्येषु कांश्चित् परित्यक्तवतः यावत्सत्कर्मकर्तृसाम्यस्यैव बाधितत्वात्। नहि श्रौतोऽपि बाधितः सिद्ध्यति।

अत्रोच्यते। न तावदाद्ये पक्षे दोषः। सर्वविहिताकरणे मोक्षाभावरूपप्रत्य-वायाभावेऽप्यानन्दाभिवृद्ध्यर्थं तस्य कर्तव्यत्वात्। अज्ञानिनः विधिनिषेध-योस्त्यागस्वीकारयोर्मोक्षाभावरूपप्रत्यवायवत्त्वेन न ज्ञानिनस्तत्साधारण्यम्। अत एव सर्वविहितत्यागे सर्वाकार्यकृतौ च ज्ञानिनि मोक्षो नियत इत्युच्यते। अत एवास्य न विधिबन्धः। महाफलहानेरभावात्। अत एव च सर्वसत्कर्मणां सन्ध्योपास्तिदेवप्रणामाग्निहोत्रहोमादीनां कामत एव स्वेच्छयाऽऽचरणं कामचारश्रुत्यर्थो मुख्य एव। विधिबन्धवर्जितत्वेनाऽचरणात्। यो हि ब्रह्मयज्ञ-स्वाध्यायानन्तरं विधिबन्धवर्जितत्वात् कुशैरध्येति स स्वेच्छाचारीत्युच्यते।

यद्यप्यानन्दह्रासोऽस्ति। तथाऽपि नान्यकाम्येष्ट्यादाविव विधिबन्धः। अत एवाऽऽनन्दवृद्ध्यादिकामनानिबन्धनत्वात् तत्प्रवृत्तेः सः कामचारीत्युच्यते। न

१. म. तन्निषेधार्थम्।

ह्यस्य विधिबन्धो भवति कस्यचित् कृतावकृतौ न स्वसम्पादितसाधनवैयर्थ्यं भवति। ज्ञानिनश्च विहितानामकरणेऽधःपातरूपप्रत्यवायाभावात् ईश्वरप्रीतिकामतश्चरणं कामचारश्रुत्यर्थ इत्यप्याहुः । अत एव च निषिद्धानामपि मध्ये सम्पूर्णफलेच्छया केषाञ्चित् त्यागस्तदभावे तदभावः । 'नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन' (भ.गी.३.१८), 'यस्त्वात्मरतिरेव स्यात्' (भ.गी.३.१७), 'कुर्वन्नेवेह कर्माणि जिजीविषेत्' (ई.उ. २) इत्यादेः । यावज्जीवं सर्वाणि सत्कर्माण्यपि सम्पूर्णमोक्षेच्छुना कार्यमित्यस्य प्रमितत्वात् 'तेनेदृश एव' (बृ.उ. ५.८.१) इत्युक्तसाम्यात् त्वसाम्यप्रसक्त्यभावेऽपि सुखवृद्ध्यादिकामनारहितोत्तमाधिकारिसदृशो भवतीत्येवं नेयम्।

नापि द्वितीये दोषः । 'यस्त्वात्मरतिरेव स्यात्' (भ.गी. ३.१७) इति गीतावाक्ये कर्तव्यपरित्यागे दोषाभावोक्तेः । कामचारश्रुतिश्चैवं समाहिता भवति। विहिताचरणेनाधिकस्य प्राप्तव्यस्याऽनन्दस्य सम्पादनात्। निषिद्धाचरणेन च तस्यानिवारणात्। अत एव पूर्वत्रैव न सर्वकृतावनुज्ञा। न सर्वाकृतावपि। एवं न सर्वनिषिद्धकरणेऽनुज्ञा। नापि निषिद्धमात्राकरणे। किन्तु किञ्चिद् विहितकरणे किञ्चिन्निषिद्धकरणे च।

यद्येवमपि 'नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन' (भ.गी. ३.१८) इत्यत्र प्रयोजनसामान्यनिषेधकावधारणबलादानन्दस्यानभिव्यक्तिह्रासादिर्नेष्यते तदा रात्रिसत्रन्यायेन विध्युन्नयनाद् विधिरेवास्तु- 'ब्रह्मज्ञानी यथेष्टमाचरेत्' इति।

ननु नैवं विधातुं शक्यम् । अज्ञानिनोऽपि विधानापातात् । प्रकरणादपि सामर्थ्यस्य प्रबलत्वात्। 'सन्ध्यामुपासीत', 'ब्राह्मणो न हन्तव्यः' इत्यादिविधिनिषेधयोरुभयत्राविशेषाच्च। तस्मात् कामचारवाक्यं 'वायुर्वै क्षेपिष्ठा' इत्यादिवत् स्तुतिमात्रमिति चेन्न। वायौ क्षेपिष्ठत्वाद्यभावे वाक्याप्रामाण्यप्रसङ्गेन स्तुतिस्थलेऽपि वस्तुनस्तथात्वावश्यम्भावादिहापि सर्वविध्यतिदूरत्वाभावे ज्ञानि-

नस्स्तुत्यनुपपत्तेः, तदङ्गीकारे चेश्वरसाम्यापत्त्या सर्वविध्यतिदूरत्वेन विधिविषयत्वस्यावश्यं वक्तव्यत्वात्। नचायं विधिर्व्यर्थः। अस्मिन् पक्षे आनन्दवृद्ध्यादेरनङ्गीकारादिति वाच्यम्। प्रयोजनमनपेक्ष्यैव विधिविषयत्वाङ्गीकारात्।

ननु विध्यनुमत्योः को विशेष इति चेदस्ति महान् विशेषः । विधौ हि कामचरणमेव विहितक्रिया। ततस्तेनापि नानन्दह्रासः। अनुमतौ तु सर्वाभिलषितमोक्षहान्यभावेऽपि विहिताननुष्ठानादिना भवत्येवाऽनन्दह्रास इति।

पक्षत्रयानुसारेण कामचारश्रुत्यर्थविवरणम्

ननु ज्ञानिनाऽपि ईश्वरप्रीतिकामतः यावद् विहितमनुष्ठेयं, निषिद्धाच्च निवर्तितव्यमिति कामचारश्रुत्यर्थ इत्यनुमतिमात्रत्वपक्षाश्रयणेनैकः पक्षः । विहितेष्वेव यथामनोऽनुष्ठानं केषाञ्चित्, केषाञ्चिन्नेति कामचारश्रुत्यर्थ इति तस्मिन्नेव मते द्वितीयः पक्षः। विधित्वाश्रयणेन स्वमनोनुसारेणैव कुर्यादिति कामचारश्रुत्यर्थ इति तृतीयः। तथाच त्रयोऽपि पक्षा इहोपक्षिप्ताः।

वस्तुनि विकल्पासम्भवेन कथमेते पक्षाः एकस्यैव वाक्यार्थ इति चेत्,

न। मनुष्यदेवचतुर्मुखभेदेन ज्ञानिनां त्रैराश्याभ्युपगमात्। तत्राऽद्यः पक्षो मनुष्यविषयः। देवताविषयो द्वितीयः। तृतीयश्चतुर्मुखविषयः। तत्र 'देवर्षिभूतात्मनृणां पितॄणां न निन्दको नायमृणी च राजन्' इत्यादेः 'जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते' इत्यादिना प्रसिद्धऋणत्रयस्य ज्ञानेनैव परिहारोक्तेः विधिबन्धवर्जितत्वेनेश्वरप्रीतिकामनयैव सर्वेषां विहितानामनुष्ठानं निषिद्धानां च वर्जनम्। तथाच भगवत्प्रपन्नतया पूर्वोक्तविधिबन्धवर्जितत्वेनेश्वरप्रीत्यर्थं विहितस्य सर्वस्यापि यथाशक्त्याचरणं कामचरणम्। मनुष्याणां तेनैव यावत्स्वरूपानन्दाविर्भावः। तेषां विहिताकरणेन निषिद्धकरणेन चानभिव्यक्तिरूपो ह्रासः भगवदिच्छया भवति। देवानां तु न तथा विहितं सर्वमनुष्ठेयमिति निर्बन्धः।

मुक्तौ तेषां भगवदिच्छाया आवरणत्वाभावात्। यावत्स्वरूपभूतानन्दादिकमभिव्यज्यत एव विहिताचरणाभावेऽपि। परन्तु प्राप्तव्यानन्दो ह्रसति। अतः करिष्यमाणविकर्मणा ह्राससिद्ध्यर्थं पूर्वं विहितमेव किञ्चित् स्वाधिकाराधिकं यत्नं कुर्वन्तीति ततः स्वमनोनुसारेण केषाञ्चिदनुष्ठानं केषाञ्चिन्नेत्युपपन्नम्। चतुर्मुखस्य तु न स्वरूपानन्दस्यानभिव्यक्तिः। न वा प्राप्तव्यहानिः। स्वाधिकाराधिकयत्नस्यैवाकरणात्। किन्तु यथेष्टाचरणविधिरेव। निषिद्धमपि कुर्यादिति चेत् कुर्यादेव। किं ततः? हान्यभावस्योक्तत्वात्। 'ब्राह्मणो न हन्तव्यः' इत्यादिवचनविरोध इति चेन्न। तद्वचनस्य विधिनिषेधाधिकारिणं प्रत्येव प्रवृत्तत्वात्। नचायं विधिनिषेधाधिकारी। सर्वविध्यतिदूरत्वविधिगोचरत्वात्। नच तत्र विवदितव्यम्। 'यथाविधानमपरे विधिर्भावि प्रजापतेः' (ब्र.सू.भा.उ. तुरश्रुतिः) इतीच्छायां विधिश्रवणात्। नहि सर्वविध्यतिदूरो 'न हन्तव्यः' इत्यादिविधिगोचरो भवति। ईश्वरस्यापि तत्प्रसङ्गात्। ईश्वरसाम्यपरिहारायैवात्र विधित्वाश्रयणमिति सर्वमनवद्यम्।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- **मोक्षसाधनत्वनियमलक्षणमहिम्नो वर्णनादिति ॥** उपलक्षणमेतत्। प्रबलप्रारब्धकर्मोपमर्दकत्वलक्षणस्य ज्ञानोत्तरकृतकर्मण आनन्दवृद्ध्यादिरूपमहाफलसाधनत्वलक्षणस्य च महिम्न इत्यपि योज्यम्। यद्यपि मोक्षसाधनत्वनियमलक्षणो महिमा 'अनियमः सर्वेषाम्' (ब्र.सू. ३.३.३२) इत्यत्रैवोक्तः। तथाऽप्यत्रासत्प्रवृत्तावानन्दहानिरिव मोक्षहानिरपि स्यात् इति शङ्कासमाधानेन दृढीकरणाददोषः।

प्रकृतज्ञानवानत्र विषय इति ॥ ज्ञानोत्तरकालीनं कर्म विषय इत्युक्तावप्युक्तरीत्या इष्टसिद्धिः। तथाऽपि 'ज्ञानिनामात्मस्वरूपदाढर्यात्' इत्यन्यत्रोक्तेरेवमुक्तम्। ज्ञानिनां निषिद्धाचरणं युक्तं न वेत्यनध्यवसाय उताध्यवसाय इति

चिन्त्यत इति एकदेशिनां पन्था न युक्तः। विवरणादिविरोधादिति स्वयमन्यथा संशयमाह- **तस्य सदसत्प्रवृत्त्योर्विशेषोऽस्ति न वेति सन्देह इति ॥** यद्यप्यत्र वक्ष्यमाणं वृद्धिह्रासरूपं न ज्ञानस्य फलं किन्तु कर्मणः। तथाऽपि ज्ञानस्यैवायं महिमा भवति। अत एव सदसत्प्रवृत्त्योर्विशेषोऽस्ति न वेत्येवोक्तम्, नतु ज्ञानस्य फलमस्ति न वेति ॥ **लौकिकेति ॥** सत्प्रवृत्तं पूजयन्ति, नत्वसत्प्रवृत्तमिति लोके दर्शनादित्यर्थः।

पूर्वपक्षीय-आत्मस्वरूपदार्ढ्यन्यायविवरणस्य व्याख्यानम्

'आत्मस्वरूपदाढर्यम्' इत्युक्तन्यायं साध्यादिप्रदर्शनेन विवृण्वत्

'नच ज्ञानिनामात्मस्वरूपदाढर्यात् सत्प्रवृत्तिविपरीतप्रवृत्त्योरविशेषः।'

इति वाक्यं व्याख्यातुमुपक्रमते- **अयुक्तश्चेति ॥** 'आत्मस्वरूपदाढर्यात्' इत्येतद् व्यतिरेक-मुखेन व्याचष्टे- **नहीति ॥**

नन्वानन्दवृद्धिरेव सत्प्रवृत्त्या भविष्यतीत्याशङ्कापरिहारकतया 'आत्मस्वरूपदाढर्यात्' इत्येतत् प्रकारान्तरेण व्याचष्टे- **नहीति ॥** प्रकारान्तरेण व्याचष्टे- **नच समुच्चयेति ॥** एवं सत्प्रवृत्त्या विशेषाभावमुपपाद्य विपरीतप्रवृत्तिशब्दितासत्प्रवृत्त्या विशेषाभावमुपपादयति- **नापि ज्ञानिन इति ॥** अनेनाऽत्मस्वरूपस्य मोक्षस्य ज्ञानेनैव दृढत्वात् तत्रासत्प्रवृत्त्या प्रतिबन्धनासम्भवान्मोक्षाभावलक्षणो विशेषो नास्ति। नच मोक्षस्वरूपमात्रस्य सिद्धत्वेऽपि तत्राऽनन्दह्रासोऽसत्प्रवृत्त्या भविष्यतीति वाच्यम्। यतस्तत्रापीदमेवोत्तरम्। तत्तदात्मस्वरूपस्य अयमेतावदानन्द इति तारतम्यस्य क्लृप्तत्वेन ह्रासाङ्गीकारे तद्बाधापत्तेः। अनभिव्यक्तिरेव तत्कृतो विशेषो भविष्यतीत्यत्राप्येतदेवोत्तरम्। आत्मस्वरूपभूतस्याऽनन्दस्य दृढप्रतिभानादनभिव्यक्त्यनुपपत्तिः। उपपत्तिस्तु पूर्ववदिति। एवं ज्ञानकर्मणोः समुच्चयो न युक्तः। आत्मस्वरूपभूतस्याऽनन्दस्याभिव्यञ्जने ज्ञानस्य दाढर्यात् कर्मनैरपेक्ष्यादिति विवरणं व्याख्यातं भवति।

'स्तुतयेऽनुमतिर्वेति' सूत्रस्य परोक्तार्थनिरासः

अत्राऽद्यं सूत्रं पुरुषार्थाधिकरणशेषः। तथाहि। 'कुर्वन्नेवेह कर्माणि' (ई.उ. २) इत्यादिवाक्याद् ज्ञानस्य कर्मशेषत्वं न मन्तव्यम् इत्यत्र 'ज्ञानी कुर्वन्' इति विशेषाश्रवणान्नानेन कर्मशेषत्वसिद्धिरिति 'नाविशेषात्' इति पूर्वसूत्रेणोक्तम्। इतश्च नास्मात्कर्मशेषपरत्वसिद्धिः। यावज्जीवं कर्म कुर्वत्यपि पुरुषे विदुषि विद्यासामर्थ्याद् यावज्जीवकृतं कर्मापि न लेपाय भवतीति विद्यास्तुतये कर्मानुज्ञानमात्रं वेति 'स्तुतयेऽनुमतिर्वा' इत्यस्यार्थ इत्यन्येषां पन्थाः।

स न युज्यते। तथाहि। 'कुर्वन्नेवेह' (ई.उ. २)इति वाक्ये कर्मलेपः प्रतिपाद्यत इति सिद्धान्तिनोऽपि सम्मतं, न वा। आद्येऽस्मिन् सूत्रे कर्मापि न लेपाय भवतीति व्याख्यानायोगः। द्वितीये 'नाविशेषात्' इति पूर्वसूत्रमयुक्तम्। विशेषणेऽपि लेपप्रतिपादनाभावात्। अङ्गीकारवादश्चागतिकागतिः। 'स्तुतये' इत्यनेनैव विवक्षितार्थसिद्धेः सूत्रशेषवैयर्थ्यम्। लिङादेर्नञ्द्वयस्य च विरोधश्च। अतो नायमत्र [1]श्रुत्यर्थतयोच्यते। तस्मादधिकरणान्तरमेवेदं विंशतिसूत्रम्। तत्राऽद्यमिदं सिद्धान्तसूत्रमित्यभिप्रेत्य सूत्रमवतारयन्नेव भाष्यमवतारयति- **सिद्धान्तयदिति**॥

'स्तुतयेऽनुमतिर्वा' इति परीत्यैव नैकं वाक्यमित्याह- **अथवेति**॥ यद्वा, परमतेऽयुक्तो वाशब्दः पूर्वशेषत्वाङ्गीकारात्। मन्मते तु कथमित्यत आह- **अथवेति**॥ ननु स्तुतिमात्रत्वसाधनेनैव विधित्वपक्षस्य व्यावर्तितत्वात् कुतः पक्षान्तरोपक्षेप इत्यतस्तस्य भावमाह- **सर्वथा तु न विधिरिति**॥

'कामकारेण चैके' इति सूत्रस्य परोक्तार्थनिराकरणम्

प्रत्यक्षीकृतविद्याफला एके विद्वांसः कामकारेणेच्छया प्रजादिषु 'एतद्ध स्म वै तद्विद्वांसः[2] प्रजां न कामयन्ते किं प्रजया करिष्यामः' इति परामृशन्ति। अतो

१. म. स्तुत्यर्थतया २. 'तत्पूर्वे विद्वांसः' इति शा.भाष्ये।

न कर्मशेषत्वं ज्ञानस्येति, युक्त्यन्तरं 'कामकारेण चैके' इति सूत्रेणोच्यत इति अपव्याख्यानम्। सूत्राक्षरानारोहात्। सान्तानिककर्मणस्त्यागावगमेऽपि निवृत्तकर्मणस्तदनवगमाच्च। कामाभावप्रतिपादनाय 'काममेके' इति सूत्रविन्यासापाताच्चेति स्वमतेन सूत्रं व्याख्यातुं 'युज्यते च' इति भाष्यमवतारयति- **ननु न सदसत्प्रवृत्तिभ्यामिति**॥ आनन्दवृद्धिह्रासयोस्तारतम्यविरोधित्वेन सदसत्प्रवृत्तिभ्यां विशेषः ज्ञाने शक्त्याविर्भावकुण्ठनमेवेति शक्तिकुण्ठनावश्यम्भावात् ज्ञानस्य मोक्षसाधनत्वं न स्यादित्यर्थः। इष्टापत्तिमाशङ्क्याऽह- **तथा चेति**॥

ननु नायमस्ति व्याघातः। सत्प्रवृत्तिसहितस्यैव ज्ञानस्य मोक्षसाधनत्वशक्तिः न केवलस्य। तथाचासत्प्रवृत्तिदशायां कोमलदण्डादेरिव ज्ञानस्य मोक्षसाधनत्वशक्तेरेवाभावेन 'अनियमः' इत्युक्तव्याघातायोगात्। नहि दण्डो घटं जनयतीत्यस्य नियमस्य कोमलदण्डाद् घटाजननेन[1] व्याघातोऽस्तीत्यत आह- **सत्प्रवृत्तिसमुचितस्येति**॥ कर्मनिरपेक्षज्ञानस्य 'विद्यैव तु निर्धारणात्' (ब्र.सू. ३.३.४८) इत्यादौ मोक्षजनकत्वशक्तेरभिधानादिति भावः। तथा च **कामः** कामितं **कारः** करणम्। कामितानां यथेष्टाचारवादपक्षाणां करणेनानादित्वादनारम्भणशब्दितब्रह्मप्राप्तिं 'कामचाराः' इत्यादि**नैके** शाखिनः पठन्ति यतस्ततः ज्ञानिनः सदसत्प्रवृत्तिभ्यां विशेषे न किञ्चिद् बाधकम्। सत्प्रवृत्तिसहितस्यैव ज्ञानस्य मोक्षजनकत्वशक्तिकल्पनं त्वप्रामाणिकम्। यथेष्टाचरणविध्यनुपपत्तिरूपबाधकमाद्येन परिहृत्य शक्तिकुण्ठनरूपबाधकमत्र परिह्रीयत इति चकारोऽपि स्वरस इत्युक्तं भवति।

'उपमर्दं च' इति सूत्रस्य परव्याख्यानिरासः

क्रियाकारकफललक्षणस्य समस्तप्रपञ्चस्य विद्यासामर्थ्यात् स्वरूपोप-

१. घटाजनने

मर्दमामनन्ति 'यत्र त्वस्य[१]' इत्यादिना। तस्मादपि स्वातन्त्र्यं विद्याया इति हेत्वन्तरं 'उपमर्दं च' (ब्र.सू. ३.४.१६) इति सूत्रेणोच्यत इत्येतद् दुर्भाष्यम्। नहि क्रियाकारकफलादिस्वरूपनिवर्तकत्वं विद्यायाः प्राधान्यहेतुर्भवति। घट-तत्प्रागभावयोर्दहनतुहिनयोस्तेजस्तिमिरयोः पूर्वोत्तरज्ञानयोश्च निवर्त्यनिवर्तक-भावसद्भावेऽपि प्राधान्याप्राधान्ययोरदर्शनात्। ज्ञानेन क्रियाकारकफललक्षण-प्रपञ्चनिवृत्तौ जीवन्मुक्तिदशायां भिक्षाटनादिसर्वव्यापारोपरमप्रसङ्गश्चेति स्वयमन्यथा व्याचष्टे- **कैमुत्येनेति** ॥ कैमुत्यद्योतनार्थमाह- **अनिवर्त्यतया प्राप्तस्याऽरब्धकर्मणोऽ-पीति** ॥ अत एव 'अनारब्धकार्ये एव' (४.१.१५.) इति वक्ष्यति।

नन्वत एव प्रबलत्वादुपमर्दासम्भवः। अन्यथा प्रारब्धानामनाशोक्तिः 'भोगेन त्वितरे' (४.१.१९) इत्यादौ न स्यादित्यत आह- **किञ्चिद् भुक्तस्येति** ॥ नात्र सर्वथा भोगमन्तरा नाशं ब्रूमः। नापि सर्वात्मना भोगम्। प्रायश्चित्तशास्त्र-वैयर्थ्यापातात्। नहि प्रारब्धस्य कर्मणः सर्वथा भोगस्यापेक्षितत्वे प्रायश्चित्त-विधानमर्थवद् भवति। प्रायश्चित्तशास्त्रस्य हि ब्रह्महत्यादिकर्मणः भोगं विनैव क्षयः प्रयोजनम्। अत इदं वक्तव्यम्। प्रबलस्यापि प्रारब्धस्य किञ्चिद्भोगेन शक्तिह्रासे क्रियमाणं प्रायश्चित्तं फलह्रासं करोतीति। तद्वदिहापि ज्ञानेन फलह्रासे दोषाभावादिति भावः। ततश्च चशब्द एके पठन्ति इत्यस्य सङ्ग्रहार्थः। 'ओमित्युच्चार्य' (ब्र.सू.भा.उ. तुरश्रुतिः) इत्यादिना प्रारब्धकर्मणोऽप्येके शाखिनः फलह्रासलक्षणमुपमर्दमामनन्ति यदा तदा काम्यसत्कर्म न मोक्षप्रतिबन्धकमिति किं वक्तव्यमिति सूत्रं योजितं भवति।

'ऊर्ध्वरेतस्सु च शब्दे हि' इति सूत्रस्य परव्याख्यानिरासः

''ऊर्ध्वरेतस्सु चाऽश्रमेषु[२] विद्या श्रूयते। तेषां च कर्माभावात् न विद्यायास्त-

१. 'यत्र वा अस्य' इति शा. भाष्ये। २. म. आश्रयणेषु

च्छेषत्वम्। औध्र्वरेतसश्चाऽश्रमः 'त्रयो धर्मस्कन्धाः' (छा.उ. २.२३.१), 'ये चेमेऽरण्ये श्रद्धा तप इत्युपासते' (छा.उ. ३.१०.१), 'एतमेव प्रव्रजिनो[१] लोकमिच्छन्तः प्रव्रजन्ति' (बृ.उ. ४.४.२२), 'ब्रह्मचर्यादेव प्रव्रजेत्' (जा. ४) इत्यादिशब्दे ज्ञायते'' इति 'ऊर्ध्वरेतस्सु च शब्दे हि' इत्यस्यापवृत्तिः। ऊर्ध्वरेतसां बाह्यकर्मप्राचुर्याभावेऽपि वनस्थानां सन्ध्योपास्तिवन्यान्नदानादीनां न्यासिनां च अष्टकवलग्रासचतुर्गुणशौचेन्द्रियसंयमनत्रिषवणस्नानस्वभोक्तव्यान्नदानविद्यादान-जपव्याख्यानकर्मणां प्रमितत्वात्। 'स्वाध्यायज्ञानयज्ञाश्च' (भ.गी. ४.२८) इति ज्ञानिनामपि यज्ञविधानाच्च। सर्वप्रमाणसिद्धौर्ध्वरेतसाश्रमस्य प्रमाणेन साधनानपेक्षत्वेन 'शब्दे हि' इत्यंशवैयर्थ्याच्च। अतः स्वमतेन सूत्रमवतारयति- **यदि कामचाराणामपीति** ॥ असत्प्रवृत्तेर्मोक्षप्रतिबन्धकत्वाभावेऽविशेषाज्ज्ञान-प्रतिबन्धकत्वमपि न स्यादिति भावः। चशब्दोऽध्याहारसूचक इति मन्वानोऽ-ध्याहार्यभागं दर्शयति- **कामचाराणामपीति** ॥ हिशब्दो हेत्वर्थ इति मन्वान आह- **य इममिति** ॥ तेन यस्मात् 'य इमं परमं गुह्यम्' (ब्र.सू.भा.उ.माठर-श्रुतिः) इति श्रुतावूर्ध्वरेतस्स्वेव ज्ञानोपदेशविधानं, यतश्च नोपदेशमन्तराऽपरोक्ष-ज्ञानम्, अतः कामचाराणां न ज्ञानप्राप्तिराशङ्कनीयेति सूत्रार्थो निर्गलितः।

'परामर्शं जैमिनिः' इत्यादिसूत्रस्य परकृतव्याख्यानिराकरणम्

गृहस्थाश्रमातिरिक्ताश्रमत्रयसद्भावे प्रमाणाभावः। तथाचौर्ध्वरेतसाश्रमे कर्मणोऽभावान्न विद्यायास्तच्छेषत्वमित्याक्षिप्य 'परामर्शं जैमिनिः' इत्यादि-त्रिसूत्र्याऽधिकरणन्यायेन[२] समाधीयते।

तत्राऽद्यमिदं पूर्वपक्षसूत्रम्। 'त्रयो धर्मस्कन्धाः यज्ञोऽध्ययनं दानमिति प्रथमः तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्य-कुलेऽवसादयन्, सर्व एते पुण्यलोका भवन्ति' (छा.उ. २.२३.१), 'ब्रह्म-

१. 'एतमेव प्रव्रजिनः' इति शा. भाष्ये। २. म. त्रिसूत्र्या अधिकरणन्यायेन।

संस्थोऽमृतत्वमेति' (छा.उ. २.२३.१) इत्यादिवाक्ये यद्यप्याश्रमचतुष्टयं प्रतीयते। तथाऽपीदं न तत्र मानम्। विध्यभावात्। तदपि कुतः ? अचोदना यतः लिङादीनामन्यतमस्यास्मिन् वाक्येऽभावः। 'त्रयो धर्मस्कन्धाः' (छा.उ. २.२३.१) इत्यादिकं तु वाक्यमाश्रमान्तराणामनुवादकमेव न विधायकमिति जैमिनिराचार्यो मन्यते। अनुवादश्च लोकप्रसिद्धिमात्रेणोपपन्नः।

किञ्च 'वीरहा वा एष देवानां योऽग्निमुद्वासयते' (शा.भा.उ.श्रुतिः), 'प्रजातन्तुं मा व्यवच्छेत्सीः' (तै.उ. १.११.१), 'नापुत्रस्य लोकोऽस्ति' (शा.भा.उदाहृता) इत्यादिनाऽग्नित्यागादेरनर्थसाधनत्वोक्तेः 'वीरहा' इत्यादिश्रुतिराश्रमान्तरमपवदति। तथाचोर्ध्वरेतस्सु कर्माभावेऽपि मोक्षदर्शनाज्ज्ञानस्य प्राधान्यमिति न युक्तमिति 'परामर्शं जैमिनिः' इति सूत्रस्य व्याख्यानं न युक्तम्।

'ब्रह्मचर्यादेव प्रव्रजेत्' (जा. ४), 'यदहरेव विरजेत् तदहरेव प्रव्रजेत्' (जाबालोपनिषत्) इत्यादिलिङादिश्रवणेन[१] विधित्वसम्भवात्। लोकप्रसिद्धाश्रमान्तरापह्नवे गृहस्थाश्रमान्तरस्याप्यपह्नवापाताच्च। आश्रमान्तरसद्भावेऽपि ज्ञानकर्मणोः गृहस्थे एव समावेशेऽप्यङ्गाङ्गिभावासिद्धेर्ज्ञानस्य कर्मशेषत्वानुपपत्त्याऽऽश्रमान्तरनिराकरणप्रयासवैयर्थ्याच्च।

नह्येकपुरुषसमावेशमात्रेणाङ्गाङ्गिभावोऽङ्गीकर्तुं शक्यः। तथा सत्येकपुरुषसमाविष्टानामाग्नेयादिषड्यागादीनां प्रयाजादीनां च शमदमादीनां च परस्परमङ्गाङ्गिभावापत्तिः। परामर्शशब्दस्यानुवादे व्युत्पत्त्यभावाच्च। मद्रीत्या पूर्वोक्तप्रमेये मतभेददर्शनेनैकाधिकरणत्वे, सिद्धान्तसूत्रत्वे च सम्भवति तद्वैपरीत्यायोगश्चेति मन्वानः स्वयं स्तुतयेसूत्रैकवाक्यतां स्थापयन्नवतारयति- **एवं केन स्यादित्यस्येति ॥ अर्थान्तरमिति ॥** वक्ष्यमाणबादरायणाभिप्रायादभिप्रायान्तरमि-

१. म. इत्यादौ लिङादिश्रवणेन

त्यर्थः। तेनानुमतिपक्ष एवाभिप्रायान्तरमुच्यत इति फलितम्। तेन 'येन स्यात्' (बृ.उ. ५.५) इत्यादिनोक्तः कामचारः सदसत्प्रवृत्तिविषयो न भवति। यतः 'प्रातरुत्थाय' इत्यादिश्रुत्युक्ताशेषसदाचारपरामर्शमेव जैमिनिराचार्यो मन्यते। अतः श्रुत्युक्तानां सर्वसदाचाराणामधःपातहेतुप्रत्यवायभयाख्यप्रतिबन्धरहितत्वेनाऽचरणमभ्यनुज्ञायते। नत्वसत्कर्माचरणमपि। ज्ञानिनाऽसत्कर्म कर्तव्यमिति चोदनाभावात्। 'ब्राह्मणो न हन्तव्यः' इति प्रत्युतापवादाच्चेति सूत्रं व्याख्यातं वेदितव्यम्।

यद्यपीदं स्तुतिसूत्राव्यवधानमर्हति। 'अनुमतिर्वा' इत्युक्तानुमतेरेव मतभेदेनात्र विचारणात्। तथाऽपि स्तुतित्वपक्षोऽनुपपन्नः। ज्ञानिनः सामर्थ्यप्रकटनं हि स्तुतिः। तथाच ज्ञानिनः किं सामर्थ्यम्? यत्प्रकटनार्थं 'येन स्यात् केन स्यात्' (बृ.उ. ५.५) इति वाक्यं स्तुतिः स्यादित्याशङ्कायां कामचारादावपि मोक्षमयं ज्ञानी साधयत्येवेति तदीयसामर्थ्यं वक्तुं कामकारसूत्रम्। तत्रासम्भावनाशङ्कानिरासायोपमर्दसूत्रम्। तत्रातिप्रसङ्गनिरासायोर्ध्वसूत्रम्। एवं त्रिसूत्र्या स्तुतित्वपक्षं विवरित्वाऽनन्तरोक्तानुमतिपक्षं विवृणोत्यनेन सूत्रेण। तत्र त्रिसूत्र्याः प्रागस्य समावेशे स्तुतित्वपक्षो न विवृतः स्यात्। तस्मादस्यात्रैव निवेशो युक्तः।

यद्यपि 'येन स्यात् केन स्यात्' (बृ.उ. ५.५) इत्यस्य मतभेदेनार्थत्रयकथनपरेऽस्मिन्नधि-करणे 'परामर्शं जैमिनिः' इत्यारभ्यैव सूत्रसन्दर्भो युक्तः। 'स्तुतयेऽनुमतिर्वा' इति सूत्रमकर्तव्यमेव। तथाच तदुक्तस्तुतित्वविवरणक्लेशोऽपि न भविष्यति। तथाऽपि सङ्क्षेपेण प्रमेयमुपक्षिप्य[१] प्रतिज्ञाय तद्विवरणमारभन्ते हि कथारसिकाः। अतः प्रक्रियाशिक्षणाय सामान्यतः मतद्वयं प्रतिज्ञाय तत्राऽद्यमतं त्रिसूत्र्या विवरित्वा द्वितीयं मतं मतभेदेनात्र विव्रियत इति को दोषः।

१. म. प्रमेयमाक्षिप्य।

'अनुष्ठेयम्' इति सूत्रस्य परकृतव्याख्यानिराकरणम्

अनुष्ठेयमेवाऽऽश्रमान्तरम् । अनुष्ठेयत्वेनाभिमतगार्हस्थ्येनास्य साम्येनैव श्रुतत्वात्, इति 'अनुष्ठेयं बादरायणः साम्यश्रुतेः' इति सूत्रमन्ये व्याचक्षते।

तदयुक्तम्। 'यदहरेव विरजेत् तदहरेव प्रव्रजेत्' (जाबालोपनिषत्) इत्यादि-विधिप्रत्ययघटितस्पष्टश्रुत्यनवलोकनेन शङ्कमानं प्रति तत्प्रदर्शनेन ऋजौ समाधाने सति गृहस्थाश्रमप्रतिबन्दीग्रहणेन समाधानायोगात्। तत्स्मारणस्यैव विवक्षितत्वे 'विधिर्वा धारणवत्' इति सूत्रवैयर्थ्यात्। इह त्वद्भाष्ये अतः 'त्रयः स्कन्धाः' इत्यादिवाक्ये विधिप्रत्ययाभावादाचारादिप्राप्ताश्रमान्तरानुवादमात्रत्वान्न तत्सिद्धिः। यदि प्रत्यक्षेण गृहस्थाश्रमस्य विधानात् तत्सिद्धिस्तर्हि तत एवेहापि तत्सिद्धिरित्यादिना प्रतिबन्दीग्रहणस्यैव प्रतीतेश्च। श्रुतिसाम्यादिति निर्देष्टव्ये 'साम्यश्रुतेः' इति निर्देशायोगाच्चेति विवक्षितमर्थं वदन् सूत्रमवतारयति- **एवमस्य वाक्यस्येति॥** अनुष्ठेयं प्रत्येव स्वेच्छया कदाचिच्चरणं कदाचिदचरणमित्यनु-ज्ञानमेव 'येन स्यात्' इत्यादिकामचारश्रुत्यर्थः। 'तेनेदृश एव' (बृ.उ. ५.५.१) इत्युक्तसाम्यश्रुतिसामञ्जस्यादित्येतत्सूत्रवृत्तिः।

'विधिर्वा धारणवत्' इत्यस्य परकृतव्याख्यानिरासः

'त्रयो धर्मस्कन्धाः' (छा.उ. २.२३.१) इत्यादौ चतुर्णामाश्रमाणामनु-वादान्यथानुपपत्त्याऽन्यत्र तन्मूलीभूतो विधिर्वा कल्प्यते।

यद्वा प्रतीतैकवाक्यतां भङ्क्त्वाऽपि 'अधस्तात् समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयति' इत्यादावुपरिधारणवदत्रैव विधिचतुष्टयकल्पना। यद्वा मास्त्विह वाक्यभेदः। ब्रह्मसंस्थवाक्य एव विधिकल्पनमितरेषां त्वनुवाद-मात्रत्वादिति 'विधिर्वा धारणवत्' इति सूत्रमन्यैस्त्रेधा व्याख्यातम्।

तन्न युक्तम्। त्रिष्वपि पक्षेषु संन्यासस्य कर्तव्यत्वेऽपि कर्मन्यासिनामेव

ज्ञानमित्यादिव्यवस्थायाः ज्ञानस्यान्यशेषत्वनिराकरणाय त्वदपेक्षितायाः प्रमाण-विरोधादिनाऽसिद्धेः। 'तदहरेव प्रव्रजेत्' (जाबालोपनिषत्) इत्यादिप्रत्यक्षविधौ सति 'त्रयो धर्मस्कन्धाः' (छा.उ. २.२३.१) इत्यादौ वृथा विधिकल्पन-क्लेशायोगाच्चेति स्वयं सूत्रं व्याचष्टे- **एवं केन स्यादिति वाक्यस्येति॥** विधिशब्दस्य प्रकृतोपयुक्तमर्थमाह- **विधिरिति॥**

नन्वेवं यथेष्टाचरणविधानाङ्गीकारात् सदसत्प्रवृत्त्योर्विशेषो न सिद्ध्यति। अधर्माचरणेऽपि आनन्दह्रासाद्यभावप्राप्तेरिति चेन्न। ज्ञानिनं प्रत्यधर्मस्यैवा-भावात्। नहि ज्ञान्यधर्मं करोति। 'प्रायः सतां न मनः पापमार्गे' (म.भा. ता.नि.) इति श्रवणात्। यदि च कथञ्चित् करोति ज्ञानी तदा तं प्रति स धर्म एव।

'अपि चेत् सुदुराचारो भजते मामनन्यभाक्।
साधुरेव स मन्तव्यः सम्यग् व्यवसितो हि सः॥' भ.गी. ९.३०)

इत्यादेः।

न चातिप्रसङ्गः शङ्कनीयः। अधिकारित्रैविध्यस्य वक्ष्यमाणत्वात्। पूर्वपक्षिणा सर्वानपि ज्ञानिनः प्रति यथेष्टाचरणविधिरित्युक्तम्। सिद्धान्तिना तु ज्ञानिविशेषं प्रति विधित्वेऽपि न सर्वान् प्रतीत्युच्यत इति न पूर्वोत्तरव्याहतिरिति भावः।

'स्तुतिमात्रम्' इत्यादिसूत्रद्वयस्य उभयोर्व्याख्यानपरीक्षा

स्तुतिमात्रमित्यादिसूत्रद्वयं, 'स एष रसानां रसतमः परमः परार्ध्योऽष्टमो य उद्गीथः' (छा.उ. १.१.३) इत्यादयः कर्माङ्गभूतोद्गीथसामोक्थाग्र्याद्याश्रिता रसतमत्वपरतमत्वपरार्ध्यत्वादयो धर्माः किं कर्मकाण्डविहितोद्गीथादिस्तुत्यर्थाः उतोपास्यं ज्योतिष्टोमादिकर्माङ्गं यदुद्गीथादि तद्विशेषणोपासनाविषयसमर्पकत्वेन तद्विधिगोचरा इति संशये, न रसतमत्वादयो धर्माः स्तुतिमात्रं स्तुत्यर्था एव।

उद्गीथादीनां कर्माङ्गानामत्रोपादानादिति चेन्न। अपूर्वत्वाद् विध्यर्थतैव युक्ता। 'उद्गीथमुपासीत' (छा.उ. १.१.१), 'सामोपासीत' (छा.उ. २.२.१) इत्यादौ विस्पष्टं भावशब्दाच्च विधायकलिङादिशब्दात्, इत्येकमधिकरणमुभाभ्यां व्याख्यातम्।

तन्न। 'चमसेनाऽपः प्रणयेत्' इत्यादौ कर्माङ्गानामप्प्रणयनादीनामुपादानेऽपि चमसविधानाङ्गीकारात् 'उपादानात्' इति सौत्रस्य हेतोर्व्यभिचारित्वात्। रसतमादिवाक्ये विध्यश्रवणात्। अपूर्वत्वादिति हेतुश्चायुक्तः। विधित्वं हि शब्दानां भावनाभिधायित्वमेव।

'कुर्यात् क्रियेत कर्तव्यं भवेत् स्यादिति पञ्चमम्।
एतस्मात् सर्ववेदेषु नियतं विधिलक्षणम्॥' इत्यादितल्लक्षणात्।

किञ्च भाव्यकरणेतिकर्तव्यतानां 'आपयिता हवै कामानां भवति' (छा.उ. १.१.७) इत्यादिनाऽभीष्टप्राप्त्युपास्तिशमदमादीनां प्रमाणान्तरेण प्राप्ततया रसतमत्वादीनां भाव्याद्यन्यतमत्वायोगेन विधिगोचरत्वानुपपत्तिः। किञ्च 'उद्गीथमुपासीत'(छा.उ. १.१.१), 'सामोपासीत' (छा.उ. २.२.१)इत्यादौ विधिश्रवणेऽपि स्तुतिमात्रत्वेन शङ्कितरसतमत्वादिवाक्येषु विधिप्रत्ययाश्रवणाद् 'भावशब्दाच्च' इति सूत्रमनुपपन्नं स्यादिति स्वयं सूत्रद्वयमन्यथा व्याचष्टे- **यदुक्तं केन स्यादिति स्वेच्छेत्यादिना चशब्द इत्यन्तेन॥ सर्वविध्यतिदूरत्वेन स्तुतिमात्रविषयत्वप्रसङ्गादिति॥** 'यस्त्वात्मरतिरेव स्यात्' (भ.गी. ३.१७) इत्यादिना सन्ध्योपास्त्यादिविध्यगोचरत्वमुक्तम्। स्वेच्छाचरणविधिं प्रत्यप्यगोचरत्वे सर्वविध्यतिदूरता दुर्वारा स्यादिति भावः।

'भावशब्दाच्च' इति सूत्रस्य स्वव्याख्यानसमर्थनम्

नन्वेवं स्वेच्छाचरणविधित्वानङ्गीकारे बाधकमेवोक्तम्, नतु साधकम्। अतो

'भावशब्दाच्च' इति सूत्रे स्वेच्छाचरणविधित्वे प्रमाणान्तरसूचकचशब्दो व्यर्थः। परमते तु तत्सार्थक्यमस्तीत्यत आह- **अतीतसूत्र इति॥** यद्यप्यतीतसूत्रे स्वेच्छाचरणविधौ प्रमाणं न मुखत एवोक्तम्। तथाऽपि सर्वविध्यतिदूरत्वेन स्तुतिमात्रविषयत्वस्य भगवदेकनिष्ठत्वान्यथानुपपत्त्या यथेष्टाचरणविधित्वसिद्धेरतीतसूत्रेऽर्थापत्तिरुपन्यस्ता। अत्र श्रुतिरुपन्यस्यते। अतश्चशब्दो न व्यर्थ इति भावः।

'पारिप्लवार्थाः', 'तथा चैकवाक्य' इति सूत्रयोः परकृतव्याख्यानिराकरणम्

अत्र 'पारिप्लवार्थाः' इत्यादिसूत्रद्वयम् 'अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुः' (बृ.उ. ४:५.१) इत्याद्याख्यानानि 'आत्मा वा अरे द्रष्टव्यः' (बृ.उ. ४.५.६) इत्याद्यात्मविद्यासन्निधौ श्रुतानि किमाश्वमेधिकपारिप्लवप्रयोगार्थान्युत विद्यार्थानीति संशये वेदान्तपठिता आख्यायिका अश्वमेधाङ्गभूतपारिप्लवार्था एव सर्वाण्याख्यानानि शंसन्तीति पारिप्लवे विनियोगादिति चेन्न। 'पारिप्लवमाचक्षीत' इत्युपक्रम्य 'मनुर्वैवस्वतो राजा' इत्यादि प्रथमेऽहनि, द्वितीयेऽहनि यमो वैवस्वतः, तृतीयेऽहनि वरुण आदित्यः' इति वाक्यशेषगताख्यानानामेव सर्वशब्देन ग्रहणात्। तथा च सति पारिप्लवार्थत्वाभावे विद्यानामाख्यानानां चैकवाक्यतासम्भवात् स्तुत्यर्थत्वमेवेत्यधिकरणान्तरतया व्याख्यातमुभाभ्याम्।

तन्न। विद्यासन्निधावाम्नातानाम् 'अथ ह याज्ञवल्क्यस्य' (बृ.उ. ४.५.१) इत्याद्याख्यानानां कर्मकाण्डपठिताश्वमेधिकपारिप्लवार्थत्वशङ्कायाः निर्दलत्वात्। 'सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ' इत्यत्रेवेहापि सर्वशब्दस्य सन्निहिताख्यानमात्रपरत्वस्य पूर्वतन्त्रसिद्धतयेह पुनरवक्तव्यत्वात्। 'विशेषितत्वात्' इति सूत्राक्षरस्वारस्यभङ्गाच्च। 'तथाचैकवाक्योपबन्धात्' इत्यस्योपसंहारमात्रपरत्वेन वैयर्थ्याच्चेति स्वयं सूत्रद्वयं पूर्वार्थसङ्गततया[1] व्याख्याति- **प्रथमं जैमिनि-**

१. म. पूर्वार्धसङ्गततया

मतानुसारेणेत्यादिना अनुज्ञामात्रत्वाच्चेत्यन्तेन॥ त्वन्मतेऽपि 'तथाच' इति सूत्रमुपसंहारार्थमेवेत्यत आह- **अविरोधो भवतीति**॥ नेदमुपसंहारमात्रार्थं, किन्तु ज्ञानिनामनेकप्रकारत्वेऽप्युक्तश्रुतित्रयविरोधाभावः कुतः? इति शङ्कापरिहारस्याप्यत्र सद्भावादिति भावः। तथाच 'येन स्यात् केन स्यात्' (बृ.उ. ५.५.१) इत्यादिव्यपदेशाः पारिप्लवार्था अस्थिरार्था न यथावस्तुबोधका इति यावत्। कुतः ? 'पारिप्लवार्था यतः' इत्यावर्तनीयम्। प्रकारत्रयप्रतिपादकवाक्यानां परस्परविरुद्धत्वादिति चेन्न। ज्ञानिनां त्रिविधत्वेन श्रुतौ विशेषितत्वात्। तथाच ज्ञानिनां त्रिविधत्वे सिद्धे 'प्रातरुत्थाय' इत्यादिवाक्यानां त्रयाणामप्येकवाक्यतोपबन्धो भवति। ततश्चैकवाक्यतोपबन्धान्न 'पारिप्लवार्थाः' इति पूर्वेण सम्बन्धः। 'विशेषितत्वात्' इत्यस्य स्वतन्त्रयुक्तित्वाभावेनेह चशब्दाभाव इति सूत्रद्वयमपि व्याख्यातं वेदितव्यम्।

'अत एव च' इति सूत्रस्य परकृतव्याख्यानिराकरणम्

अत एव विद्यायाः पुरुषार्थहेतुत्वादेवाग्नीन्धनशब्दिताधानाद्युपलक्षितत्वाद् वर्णाश्रमकर्मणां विद्यया स्वार्थसिद्धावनपेक्षैवेति 'अत एव चाग्नीन्धनाद्यनपेक्षा' इति सूत्रमधिकरणान्तरमन्यैर्व्याख्यातम्। तन्न। 'विद्यां चाविद्यां च यस्तद् वेदोभयं सह' (ई.उ. ११) इति श्रुत्यैव दलद्वयात्मकमोक्षस्य ज्ञानकर्मोभयसाध्यत्वावगमात्। उक्तरीत्याऽऽनन्दवैचित्र्यादेः कर्मसाध्यस्यावश्यमङ्गीकार्यत्वाच्च।

'अत एव च' इति सूत्रस्य रामानुजीयाभिमतार्थनिराकरणम्

केचित्तु, यत ऊर्ध्वरेतस आश्रमिणः विद्यावत्त्वेन 'ब्रह्मसंस्थोऽमृतत्वमेति' इत्यादिश्रुत्या परिगृह्यन्ते, अत ऊर्ध्वरेतस्सु विद्या अग्नीन्धनाद्यपेक्षा यज्ञाद्यङ्गिका न भवति। अतः परिव्राजकानामप्यस्ति ब्रह्मविद्याधिकार इति व्याचख्युः।

तदपि न। अस्मिन् मतेऽतःशब्दस्य व्यवहितपरामर्शकत्वाभावेऽपि

केवलस्वाश्रमविहितकर्मापेक्षिण्येव तेषां विद्येति चशब्दसार्थक्येऽपि चाधिकारसमर्थनस्य देवताधिकरणानन्तरमेव सङ्गतत्वेनेह तदयोगात्।

किञ्चोर्ध्वरेतश्शब्देन नैष्ठिकवानप्रस्थन्यासिनस्त्रयोऽपि गृह्यन्त उत न्यासिन एव। आद्येऽप्यग्नीन्धनशब्देनाग्निसाध्यक्रियोच्यत उताऽधानादिक्रियाविशेष एव। नाऽद्यः। न्यासिमात्रस्य निरग्निकत्वेऽपीतरयोः साग्निकत्वेन तदीयविद्याया अग्निसाध्यक्रियानपेक्षत्वस्य बाधितत्वात्। न द्वितीयः। सामान्यशब्दस्य विशेषपरत्वे लक्षणापातात्। न तृतीयः। प्रक्रमविरोधात्। 'ऊर्ध्वरेतस्सु' इति सूत्रे हि त्रयोऽपि प्रकृताः। तस्मात् परकीयव्याख्यानमसदिति मन्वानः स्वयं सूत्रमवतारयति- **एवं ज्ञानिनां श्रुतिबलेनेति**॥ तेन कामचाराणामपि मोक्षस्य पठितत्वादेव ज्ञानस्य स्वकार्यमोक्षसाधनेऽग्नीन्धनाद्यनपेक्षा। अग्निहोत्राद्यपेक्षाभावः। तर्हि पूर्वोक्तविशेषो व्याहन्येतेति चेन्न। 'शुभकर्मभिराधिक्यं विपरीतैर्विपर्ययः।' (ब्र.सू.भा.उ. ब्रह्मतर्कवचनम्) इति ब्रह्मतर्कवचनादिति चकारस्यार्थ इत्युक्तं भवति।

यद्यपीदं सूत्रम् 'अतः' इति परामर्शसौकर्याय 'कामकारेण चैके' इति सूत्रादनन्तरं पठितव्यम्। तथाऽपि यतः ज्ञानिनां त्रेधा विशेषितत्वं यतश्च तदीयज्ञानोत्तरकर्मणामग्निहोत्रादीनां मोक्षगताधिक्यजनकत्वेनैवोपयोगः प्रमितः, यतश्चाग्निहोत्रादिकर्मणां त्यागेऽपि कामचाराणामपि मोक्षः प्रमितः, अत एवाऽधिक्यजननाय ज्ञानस्य तदपेक्षायामपि मोक्षजननाय तदपेक्षा नास्तीति योजनालाभायात्रैव पाठो युक्तः।

सर्वापेक्षेति सूत्रस्य परकृतव्याख्यानिरासः

अत्र किं ब्रह्मविद्याया अत्यन्तमेव वर्णाश्रमविहितकर्मानपेक्षा उतास्ति किञ्चिदपेक्षेति[१] संशये 'अत एव चाग्नीन्धनाद्यनपेक्षा' इत्युक्तत्वादत्यन्तमनपेक्षायां

१. म. काचिदपेक्षेति।

प्राप्तायां 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन' (बृ.उ. ४.४.२२) इत्यादिश्रुतेः विद्यायाः सर्वकर्मापेक्षा चाङ्गीकर्तव्योत्पत्तौ नतु फलसिद्धौ। यथाऽश्वो लाङ्गलवाहनेऽनुपयुक्तोऽपि रथचर्यायामुपयुक्त एव। यद्वा गृहस्थेषु यज्ञादि-सर्वकर्माण्यपेक्ष्यैव विद्या फलं साधयति। 'तमेतं वेदानुवचनेन' (बृ.उ. ४.४.२२) इत्यादिश्रुतेः। यथा गमनसाधनभूतोऽप्यश्वः स्वपरिकरबन्धरूप-कर्मापेक्ष एव स्वकार्यं साधयति, एवं मोक्षसाधनभूताऽपि विद्या गृहस्थेषु यज्ञादिकमपेक्षत इति 'सर्वापेक्षा च' इति सूत्रस्य परकीयव्याख्यानमयुक्तम्। उक्तरीत्या ज्ञानोत्तरकृतकर्मणां मौक्तिकानन्दाभिवृद्ध्युपयोगित्वेन फलोपकार्यङ्गत्वात् ज्ञानोत्पत्त्यनन्तरं यज्ञादिक्रियानपेक्षायोगात्। द्वितीये मते तु 'तमेतं वेदानुवचनेन' (बृ.उ. ४.४.२२) इति श्रुतौ विविदिषासंयोगाज्ज्ञानोत्प-त्त्यर्थत्वावगमेन तच्छ्रुत्युदाहरणमसङ्गतमिति मन्वानः स्वयमवतारयति- **अस्तु ज्ञानिन इति ॥** नन्विदमयुक्तम्। 'अत एव' इति पूर्वसूत्रेऽस्य चोद्यस्य परिहृतत्वादित्यत आह- **कामचाराणां मोक्षश्रुतिस्त्विति ॥** यद्यपि कामचाराणां मोक्षश्रुतेर्मोक्षे सत्कर्मणामुपयोगो नास्ति। तत एव च न समुच्चय इत्युक्तं पूर्वसूत्रे। तथाऽपि न तद् युज्यते। 'कामचाराः कामवादाः' (सामशाखा) इत्यादिश्रुतेरसत्प्रवृत्तेर्मोक्षप्रतिबन्धकता नास्तीत्येवम्परत्वोपपत्तेः सत्प्रवृत्तेर्मोक्ष-साधनत्वं नास्तीत्यत्रापि तात्पर्याकल्पनात्। सति चैवं ज्ञानोत्तरकर्मणः मोक्ष-स्वरूपनिष्पत्तावेवोपयोगोपपत्तेर्नाऽधिक्यफलकल्पनक्लेशोऽस्तीति लाघवमिति समुच्चयवादो दुर्वार इति पुनरुक्तोपमर्देन शङ्कोदयादिति भावः।

सूत्रं व्याचष्टे- **न ज्ञानस्येति ॥** न मोक्षस्वरूपनिष्पत्तौ यज्ञाद्यपेक्षितम्। प्रमाणाभावात्। प्रत्युत 'विविदिषन्ति' (बृ.उ. ४.४.२२) इत्यादि[1]विविदिषा-संयोगेन ज्ञानोत्पत्त्यर्थत्वप्रतीतेरन्यथासिद्धत्वात्। न ह्यन्यथासिद्धं कारणं

१. म. इति विविदिषासंयोगेन

भवति। अन्यथा गतावुपक्षीणाश्वादेर्ग्रामप्राप्त्यनन्तरभाविभोजनादौ कारणता स्यात्। नच विशिष्य ज्ञानोत्तरकृतकर्मणां मोक्षनिष्पत्तावेव हेतुताऽस्तीत्यत्र प्रमाणमस्तीत्युक्तम्। ज्ञानोत्तरकालं विधीयमानानि कर्माणि न निष्फलानि भवन्तीन्यथानुपपत्त्या 'शुभकर्मभिराधिक्यं विपरीतैर्विपर्ययः' (ब्र.सू.भा.उ. ब्रह्मतर्कवचनम्) इति प्रमाणसिद्धत्वाच्च गौरवमकिञ्चित्करमिति भावः।

'शमदमाद्युपेतः' इति सूत्रस्य परकृतव्याख्यानं तन्निरसनं च

यद्यपि 'यज्ञेन विविदिषन्ति' (बृ.उ. ४.४.२२) इत्यादिश्रुतेः ''यज्ञादिभिरेव विद्यामाप्तुमिच्छन्ति। अतः 'इत्थं महाभागा विद्या' इति विद्या-स्तुतिपरतया न विद्यासाधनत्वम्। तथाऽपि शमदमाद्युपेतः स्यादेव विद्यार्थी। 'एवंविच्छान्तो भूत्वाऽऽत्मन्येवाऽत्मानं पश्येत्' (बृ.उ. ४.४.२३) इति श्रुति-विहितानां तेषां शमादीनामवश्यानुष्ठेयत्वात्। नचैतावता यज्ञादीन्यनपेक्षितानि। तदङ्गतया तद्विधेः। ज्ञानाङ्गतया यज्ञादिविधेस्तेषामवश्यानुष्ठेयत्वात्। यद्यपि वर्तमानापदेशतया विद्यास्तुतिर्न विधिरित्युक्तम्। तथाऽपि विविदिषासंयोग-स्यापूर्वत्वाद् विधिरेवायम्। अतस्तद्विधेस्तदङ्गत्वम्। तत्रापि 'एवंवित्' (बृ.उ. ४.४.२३) इति विद्यासंयोगाच्छमादेर्विद्यायामन्तरङ्गत्वम्। विविदिषासंयोगाद् यज्ञादीनि बाह्यतराणीति तुशब्देनाऽह। यद्वा, यद्यपि गृहस्थः करणव्यापाररूप-कर्मसु व्यापृतः। तथाऽपि 'तस्मादेवंविच्छान्तो दान्त उपरतः' (बृ.उ. ४.४.२३) इत्यादिना विद्याङ्गतया तेषां विधेश्चित्तसमाधानरूपत्वेन विद्यानिष्पत्तये तेषामवश्यानुष्ठेयत्वाच्च गृहस्थोऽपि शमदमाद्युपेतः स्यादेवेति शमदमादि-सूत्रव्याख्यानमयुक्तम्।

यज्ञादेः शमादेश्च वैषम्यादर्शनेन शमादेर्विशिष्य विद्योत्पत्तिसाधनत्व-साधनप्रयासवैयर्थ्यात्। नह्यश्वादिवत् कार्यान्तरे मोक्षेऽनुपयुक्तोऽपि कार्यान्तरे विद्यायां यज्ञादिरुपयुक्त इत्युक्तौ शमादीनामपि प्राप्तेः पुनश्शङ्काप्रापकहेतुविशेष

उपलभ्यते। नच शमादीनां विद्यां प्रत्यन्तरङ्गत्वं विशेषहेतुरिति शक्यते वक्तुम्। प्रत्युत तदकर्तव्यत्वशङ्काविरोधित्वात्। अत एव गृहस्थानां शमदमाद्य-कर्तव्यत्वशङ्काऽपि नोदेति। नच गृहस्थानां ज्ञानं नास्ति। तेषामपि मोक्षवचनविरोधात् इति मन्वानः स्वयं शमादिसूत्रमवतारयति- **यदि सदसत्प्रवृत्तिभ्यामिति॥**

यज्ञादिश्रुतेर्मोक्षं प्रत्यन्यथासिद्धत्वाद् यज्ञादीनां मोक्षे उपयोगो नास्ती-त्युक्तम्। कामचारश्रुतेश्च मोक्षेऽसत्प्रवृत्तेः प्रतिबन्धकत्वं नास्तीत्युक्तम्। तर्हि ज्ञानोत्तरकालं सत्कर्मानुष्ठानं न कर्तव्यं निषिद्धाचरणं च कर्तव्यं प्रसज्येत। यद्यपि 'अचोदना चापवदति हि' इत्युक्तम्। तथाऽप्यपवादस्य सामान्यविषयत्वेन सावकाशत्वान्न ज्ञानिविषयत्वम्। नच सत्प्रवृत्त्यभावे मोक्षाधिक्यानुपपत्तिः। आधिक्यस्यैवानङ्गीकारात्। अङ्गीकारे वा ज्ञानादेव तदुपपत्तेः। नच ज्ञानस्य मोक्षजननोपक्षीणता। आधिक्यं प्रत्यपि स्वतन्त्रान्वयव्यतिरेका-वङ्गीकृत्य कारणत्वस्यावश्यमेष्टव्यत्वात्। अन्यथा कुलालादेरपि दण्डादिसम्पा-दकतयाऽन्यथासिद्धिप्रसङ्गात्[१]। न भवति च ज्ञानानन्तरमप्यवश्यं कर्मकरण-नियमसाधनप्रयासः। नच 'शुभकर्मभिराधिक्यम्' (ब्र.सू.भा.उ. ब्रह्मतर्क-वचनम्) इत्यादिना प्रतीतकर्मसाध्यत्वविरोधः। ज्ञानात् पूर्वकृतकर्म-विषयत्वोपपत्तेः। नच ज्ञानेन विनाशस्य पुण्यपापयोर्वक्ष्यमाणत्वात् कथं विनष्टस्याधिक्यजनकत्वमिति वाच्यम्। इष्टपुण्यस्य विनाशानङ्गीकारात्। तस्माज्ज्ञानोत्तरं सत्कर्म न कर्तव्यम्। निषिद्धं च न त्याज्यमिति भावः।

सूत्रं व्याचष्टे- **यद्यप्यस्तीति॥** कर्मणां ज्ञानोत्पत्त्युपक्षीणत्वेन न मोक्षं प्रति हेतुत्वम्। ज्ञानस्य च स्वतन्त्रस्यैव मोक्षसाधनत्वं नान्यापेक्षाऽस्ति। आधिक्यमपि तेनैव लब्धुं शक्यम्। तथाऽपि न ज्ञानोत्तरकर्मापलापः शक्यः। 'आचार्याद्

१. म. अन्यथासिद्धिसम्भवात्।

विद्यामवाप्यैतमात्मानमभिपश्यन् शान्तो भवेद् दान्तो भवेत्' (ब्र.सू.भा.उ. माठरश्रुतिः) इति विद्याप्राप्त्यनन्तरमपि शमदमादिरूपसत्प्रवृत्तिविधानात्। नचात्र ज्ञानात् पूर्वकर्मविषयताशङ्कावकाशः। 'विद्यामवाप्य' इति क्त्वाप्रत्ययविरो-धात्। नच ज्ञानस्यैव सर्वपुरुषार्थसाधनसामर्थ्याद् व्यर्थोऽयं विधिरिति वाच्यम्। 'तस्यै तपो दमः कर्मेति प्रतिष्ठा' (के.उ. ४.७८.९) इति सम्पूर्णमोक्ष-साधनत्वाख्यप्रतिष्ठायाः शमादिसत्प्रवृत्तिसापेक्षत्वश्रुतेः सार्थक एवायं विधिरिति भावः।

नन्वेवं शमदमादीत्यनेन यज्ञादिसत्कर्ममात्रमभिप्रेतं चेत् सौत्रस्तुशब्दो व्यर्थः। परमते तु यज्ञादेः शमदमादेश्च विद्यायां बहिरङ्गत्वान्तरङ्गत्वाख्य-विशेषसूचकः सार्थक इति शङ्कानिराकरणाय 'तुशब्दः पूर्णफलार्थत्वं दर्शयति[१]' इति प्रवृत्तं भाष्यं व्याख्यातुमवतारयति- **ननु ज्ञानादेवेति॥** अनेन तथाऽपीति श्रवणाद् यद्यपीति लभ्यते। तत एव शमदमाद्युपलक्षितसत्प्रवृत्त्याक्षेपो लभ्यते।

यद्यपि उक्तरीत्या ज्ञानी सत्प्रवृत्तो भवेदिति नियमोऽनपेक्षितः। तथाऽपि शमदमाद्युपेतः सत्प्रवृत्तियुक्तः स्यादेव। तदङ्गतया ज्ञानाङ्गतया ब्रह्मज्ञानेनैव[२] सिद्ध्यति। फले विशेषाधायकतया प्रयाजादिवत् फलोपकार्यङ्गतया तद्विधेः। 'आचार्याद् विद्यामवाप्य' (ब्र.सू.भा.उ. माठरश्रुतिः) इत्यादिना शमादीनां विधानात्। 'ब्राह्मीं वाव त उपनिषदमब्रूम' (के.उ. ४.७८.९) इति तदङ्गतया ज्ञानप्रतिष्ठापकतया तेषामवश्यमनुष्ठेयत्वावगमात् इति सूत्रयोजना द्रष्टव्या।

अत्र ज्ञानानन्तरमपि सत्प्रवृत्तिः साध्यते। सा च सर्वेषां नैकविधा। किन्तु वनस्थानामग्निहोत्रादिरूपा, गृहस्थानां पशुबन्धादिघटितयज्ञादिरूपा, न्यासिनां तु शमदमादिरूपेति दर्शयितुमग्नीन्धनादीति यज्ञादीति च विचित्रोक्तिः[३]।

१. प. सूचयति २. प. प्रज्ञानेनैव
३. म. यज्ञादीति च शमदमादीति च विचित्रोक्तिः।

यद्वाऽग्नीन्धनादीत्युक्तमग्निहोत्राद्येव। नतु यज्ञादि। तस्य हिंसागर्भत्वादित्यतो विवृतं 'यज्ञादिश्रुतेः' इत्यनेन। स च यज्ञादिर्ज्ञानिना लौकिकवत् कामनयोद्धृत्या च न कर्तव्यम्। किन्तु भगवन्निष्ठयेन्द्रियनिग्रहादिना चेति यज्ञादीत्येतदपि शमदमादीत्यनेन विवृतमिति विचित्रोक्तेः प्रयोजनमनुसन्धेयम्।

सर्वान्नेत्यादिसूत्रचतुष्टयस्य उभयोः व्याख्या

'सर्वान्ने'त्यारभ्य सूत्रचतुष्टयमधिकरणान्तरम्। छान्दोग्ये प्राणविद्यायां 'न हवा एवंविदि किञ्चनानन्नं भवति' (छा.उ. ५.२.१) इति[1] च श्रूयमाणं सर्वान्नभक्षणं प्राणविद्याङ्गत्वेन विधीयते। अपूर्वत्वात् प्रवृत्तिविशेषकरत्वाच्चेति प्राप्ते प्राणात्यय एव परस्यामापद्येव सर्वान्नानुमतिः शुच्यशुचि वा सर्वमन्नमदनीयत्वेनाभ्यनुज्ञायते छान्दोग्यबृहदारण्यकयोर्नतु सर्वदा। चाक्रायणस्य कष्टायामेवावस्थायामभक्ष्यभक्षणप्रवृत्तेः अशुचिजलपाननिवृत्तेश्च दर्शनात्। ततोऽत्र श्रूयमाणं सर्वान्नभक्षणं प्राणस्यान्नमिदं सर्वमिति चिन्तनसंस्तवमात्रम् इत्याद्यस्यार्थः।

'आहारशुद्धौ सत्त्वशुद्धिः' इत्यादिभक्ष्याभक्ष्यविभागशास्त्रबाधाभावाच्चेत्यनुज्ञामात्रे हेत्वन्तरम्- 'अबाधाच्च' इति द्वितीयेनोच्यते।

जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा॥

इति, तथा 'मद्यं नित्यं ब्राह्मणो वर्जयेत्' इति च सर्वान्नस्य वर्जनमपि च स्मर्यते। तदुभयान्यथानुपपत्त्या आपत्काले भक्षणमभ्यनुज्ञायते। अनापदि तु तद्वर्जनमिति 'अपि स्मर्यते' इति तृतीयेनोच्यते।

१. 'तथा वाजसनेयके न ह वा अस्यानन्नं जग्धं भवति' इति अधिकं कुत्रचिद् दृश्यते।

अकामचारे स्वेच्छानिमित्तप्रवृत्तिनिवृत्त्यर्थं 'ब्राह्मणः सुरां न पिबेत्' इति शब्दश्चास्ति। अतो 'न हवा एवंविदि' (छा.उ. ५.२.१) इत्येवञ्जातीयका अर्थवादा एव न विधय इति 'शब्दश्चातोऽकामकारे[1]' (छा.उ. ५.२.१) इत्यनेनोच्यत इत्युभाभ्यां व्याख्यातम्।

तन्निरासः

तन्न। त्वन्मते ज्ञानानन्तरं कर्मणस्त्यागाङ्गीकारात्। ज्ञानात् पूर्वावस्थाचिन्तनं तु पादासङ्गतम्। धर्मशास्त्रादेव ज्ञातुं शक्यमित्येतच्छास्त्रासङ्गतं च। सर्वान्नसूत्रस्याधिकरणादित्वेन तत्स्थचशब्दवैयर्थ्याच्च। अभक्ष्यभक्षणप्रमाणस्यात्रैवोक्तत्वेन तृतीयसूत्रवैयर्थ्याच्च। भक्ष्याभक्ष्यविभागशास्त्राबाधस्य ज्ञानिनः सर्वान्नभक्षणविधित्वेऽप्युपपत्तेर्द्वितीयसूत्रार्थायोगाच्च।

अत एव तृतीयसूत्रव्याख्यानमप्ययुक्तम्। ज्ञानिनः सर्वान्नभक्षणविधावपि 'मद्यं नित्यं ब्राह्मणो वर्जयेत्' इति निषेधस्याज्ञानिविषयत्वोपपत्तेः। अत एव चतुर्थसूत्रव्याख्यानमपि निरस्तम्। तृतीयेनैवास्य लाभात्। अकामचारे, अतः, इति पदद्वयवैयर्थ्याच्च।

किञ्चास्याधिकरणस्याज्ञानिविषयत्वे चाक्रायणचरित्रोदाहरणासङ्गतिः। नहि चाक्रायणो न ब्रह्मज्ञानीति शक्यते वक्तुम्। ज्ञानिविषयत्वे तु त्वन्मते ज्ञानिनः सदसत्प्रवृत्तिभ्यां विशेषानङ्गीकारेण निषिद्धाचरणस्य प्राणात्ययविषयत्वसाधनवैयर्थ्यात्। नहि ब्रह्मज्ञानिनः भिक्षाटनादिदृष्टार्थकर्माणि विनाऽदृष्टार्थोपयोगिकर्मबन्धोऽस्ति। 'निर्मृष्टनिखिलप्रपञ्चावभासस्य' इत्यादित्वदुक्तिविरोधात्।

किञ्च वामदेव्यविद्यासन्निधावाम्नाते 'न काञ्चन परिहरेत् तद् व्रतम्' (छा.उ.

१. म. अकामचारे

२.१३.२) इति वाक्ये वामदेव्यविद्याङ्गत्वेन सर्वस्त्रीसम्भोगो विधीयते। निषेधस्य पुरुषार्थत्वेऽपि क्रत्वर्थत्वेन विधिसम्भवादिति त्वयैवाङ्गीकृतः । तद्वदिहापि पुरुषार्थत्वेन निषिद्धानामप्यभक्ष्यभक्षणादीनां विद्याङ्गत्वेन विधानोपपत्तेरयुक्तमिदमधिकरणमिति स्वमतेन सर्वान्नसूत्रं पूर्वशेषताज्ञापनाय सङ्गतिं सूचयन्नवतारयति- **ननु यदीति ॥** अनेन 'स्तुतयेऽनुमतिर्वा' (३-४-१४) इत्याद्यसूत्रोक्तविशेषाक्षेपसमाधानायेदं प्रवृत्तं नाधिकरणान्तरमित्युक्तं भवति।

ननु तर्हि तदानन्तर्यमेवास्य युक्तमिति चेन्न। उक्तरीत्या शङ्काक्रमेणेयतः प्रबन्धस्यावश्यकर्तव्यत्वात् । नचात्यन्तमव्यवहितसङ्गत्यभावः । पूर्वसूत्रे आद्यसूत्राभिप्रेतस्य सदसत्प्रवृत्तिभ्यां फलाधिक्याल्पत्वरूपविशेषस्य तुशब्देन सूचनादिति भावः ॥ **ह्रासाभावोक्तिरिति** ॥ 'यदि हवा अप्येवंविन्निखिलं भक्षयीतैवमेव भवति' (ब्र.सू.भा.उ.श्रुतिः) इति श्रुतिरित्यर्थः । मन्मतेऽपि चशब्दो न व्यर्थ इत्यभिसन्धिरेतत्सूत्रार्थमुपसंहरति- **अतो न कर्तव्यमेवेति ॥** यतो ज्ञानिनां निषिद्धं न कर्तव्यमित्यत्र पूर्वसूत्रेषु कानिचिद् बाधकानि परिहृतानि कामचारश्रुत्यादीनि, सर्वान्नानुमतिरूपबाधकं च प्राणात्ययविषयतया परिहृतम् अत इत्यर्थः । ज्ञानिनां निषिद्धं न कर्तव्यमित्यधिकरणोपक्रमोक्तप्रमेयस्यैव युक्त्यन्तरैः साधनायोत्तरसूत्रत्रयम् । नतु परमत इव सर्वान्नभक्षणविधित्वनिराकरणायेति भावेन सूत्रत्रयमवतारयति- **किञ्च किमिति ॥ तदुच्यत इति ॥** निषिद्धं कर्तव्यमित्युच्यत इत्यर्थः । अनेन ज्ञानिनो निषिद्धपरदारपरवित्तापहारादौ प्रवृत्तिमङ्गीकुर्वता वक्तव्यम्। किं ज्ञानी नास्तिकवत् प्रवृत्त उतानास्तिकवत्। नोभयमपि युक्तम्। नास्तिकप्रवृत्तावकरणे दृष्टबाधकसद्भावः, करणे च दृष्टबाधकाभावो हेतुत्वेन दृष्टः । न पुनर्वचनात् प्रवृत्तिर्वचनान्निवृत्तिरिति नियमोऽस्ति। निषिद्धान्नभोजनादौ क्षुद्बाधादिबाधकनिवृत्तिमात्रं मरणादिदृष्टबाधकाभावमात्रं चापेक्ष्य नास्तिकानां प्रवृत्तिदर्शनात्। आस्तिकानां विधिवचनं

निषेधाभावं चापेक्ष्यैव प्रवृत्तिः। भोजनाद्यकरणप्रयुक्तक्षुद्बाधादिकमशनप्रयुक्ततृप्तिरूपबाधकाभावं चापरिगणयित्वैवानशनादिव्रते प्रवृत्तानां बहूनां दर्शनात्। न चात्र ज्ञानिन उभयविधप्रवृत्तिर्निषिद्धाचरणे सम्भवतीति वक्तुं विकल्पचतुष्टयमुक्तम्। तेन निषेधकाभावस्यैव बाधकाभावरूपत्वेन करणे प्रमाणस्यैवाकरणे बाधकसद्भावरूपत्वेन च विकल्पानां परस्परं साङ्कर्यमिति निरस्तम् । आस्तिकनास्तिकप्रवृत्तिनिषेधस्यैवेह कर्तव्यत्वाच्च।

यद्यप्यत्र करणे प्रमाणाभावादिति द्वितीयकल्पस्य सूत्रे परिहारो नास्तीति स न कर्तव्य एव। तथाऽपि निषेधवचनाभावमात्रेण तदीयप्रवृत्तिर्नोपपद्यत इति सोऽपि कल्पः सूत्राद् बहिरेव निषेद्धव्य इत्यदोषः । आद्यविकल्पदूषणं सूत्रेण सङ्गमयति- **आद्यं पराकुर्वदिति ॥** तथाच यथा नास्तिको निषिद्धान्नभोजनाद्यकरणे क्षुत्पीडाबाधकसद्भावात् तन्निवृत्त्यर्थं निषिद्धमपि करोति तथा नायं ज्ञानी निषिद्धाचरणाभावे ज्ञानहानिरूपदृष्टबाधकमपेक्ष्य निषिद्धमाचरति। क्षुद्बाधकरूपबाधकसद्भावं तु ज्ञानित्वादेव सहते । ज्ञानहानिरूपबाधकवत् तस्य बाधकत्वासम्मतेरिति भावः। तेन ज्ञानिनोऽप्यनापदि निषिद्धाचरणे तज्ज्ञानजन्यमौक्तिकानन्दयोग्यतापर्याप्ताभिव्यक्तिबाध एव ज्ञानिनोऽनिष्टः । स च निषिद्धचरणाभावे नास्त्येव। अन्यथा त्वस्तीति सूत्रयोजना सूचिता भवति। द्वितीयः सूत्राद् बहिरेव निरसनीय इत्याह- **न द्वितीयः ॥**

यद्यपीदं 'अचोदना चापवदति' इत्यत्रोक्तम्। तथाऽप्यत्र प्रसङ्गात् स्मारितमित्यदोषः । एवमग्रेऽपि । तृतीयेऽपि बाधकं पौरुषेयं वाक्यं नास्तीत्युच्यते । उतापौरुषेयमिति विकल्प्याऽद्यदूषणायानन्तरसूत्रमवतारयति- **निषेधकस्मृतिसद्भावादिति ॥** तत्रापिश्चार्थः । एतद्दूषणाभावसमुच्चितस्य हेतोः साध्यसाधकत्वात्। एवमधस्तात् पुरस्ताच्च द्रष्टव्यम्।

नन्वनाशङ्कितदोषत्वात् सर्वान्नश्रुतिः प्रबला कथं पौरुषेयेण स्मृतिवाक्येनान्य-

थयितव्या । किञ्च 'अतीतानागतज्ञानी' (ब्र.सू.भा.उ. हरिवंशवचनम्) इति वचने सत्कर्मत्याग एव निषिद्ध्यते । न तु निषिद्धाचरणमित्यतो द्वितीयनिषेधायानन्तरसूत्रमवतारयति- **न केवलं स्मृतिरेवेति ॥** यद्यप्यत्र प्रबलत्वाच्छ्रुतिरेवाग्रे सूत्रकृता प्रदर्शनीया । तथाऽपि कथाप्रक्रियाशिक्षणाय विपरीतोक्तिः । सूत्रगतातःशब्दवैयर्थ्यपरिहाराय प्राप्तं 'अत इत्यल्पफलत्वं सूचयति' इत्यादिभाष्यं करणे बाधकाभावादिति चतुर्थपक्षनिराकरणतया क्रमेण व्याचष्टे- **चतुर्थं निराकर्तुमिति ॥** निषिद्धस्य करणे आनन्दह्रासलक्षणाल्पफलत्वं बाधकमस्ति । ततश्चतुर्थः पक्षो न युक्तः इति वक्तुं भाष्यकारस्तदुपोद्घातत्वेनाल्पफलत्वं सूत्रार्थतयाऽऽहेत्यर्थः । तथाचाल्पफलत्वं निषिद्धाचरणे बाधकमस्तीति भाष्यशेषः । प्रमाणोदाहरणस्यासाङ्गत्यं परिहरति- **तदेव कुत इति ॥** निषिद्धाचरणेनाल्पफलत्वं भवतीत्येतदेव कस्मात् प्रमाणाद् भवतीत्यर्थः ।

'विहितत्वाच्च' इत्युत्तरसूत्रं वक्तव्यशेषाभावाद् व्यर्थमित्याशङ्क्यावतारयति- **नन्वेवं निषिद्धाचरण इति ॥ फलह्रासादीति ॥** प्राप्तव्यह्रासः क्लृप्तस्यानभिव्यक्तिश्च बाधकमित्यर्थः । सम्पूर्णफलसिद्ध्यर्थं सत्कर्म कर्तव्यं निषिद्धं च त्याज्यमित्युच्यते । तत्र निषिद्धकरणे आनन्दह्रासाद्युक्त्या सम्पूर्णफलप्रतिबन्धकत्वं निषिद्धाचरणस्य ज्ञायते । तथाच प्रतिबन्धकाभावे सति कारणत्वेन क्लृप्तज्ञानादेव सम्पूर्णमोक्षसिद्धेः । निषिद्धाचरणस्याऽनन्दाभिव्यक्तिप्रतिबन्धकत्वात् । तदकरणस्याऽनन्दाभिवृद्ध्यर्थत्वसम्भवेऽपि वर्णाश्रमविहितनित्यनैमित्तिककर्मणोऽपि कुतस्तत्रोपयोगोऽङ्गीकर्तव्यः । अतस्तदाचरणं नाऽवश्यकमिति शङ्कापरिहारस्य निषिद्धाचरणनिषेधपरैः पूर्वसूत्रैरप्राप्तत्वादुत्तरसूत्रसन्दर्भस्सार्थक इति भावः ।

अयमत्र परिहारनिष्कर्षः । यद्यपि निषिद्धाचरणं विवक्षितकार्यप्रतिबन्धकम् । तथाऽपि न तदभावमात्रेण आनन्दवैचित्र्यसिद्धिः । साक्षादेव

वर्णाश्रमविहितकर्मणां तत्साधनत्वेन विधानात् । प्रतिबन्धकं हि तत्कारणे कार्यानुकूलशक्तिं विघटयत् कार्यं विघटयति । अतस्तदभाव आनन्दाभिव्यक्तिसाधनत्वेन विहिताश्रमकर्मगतशक्तावुपक्षीण इति कथं तदभावेनाऽश्रमकर्मापलाप इति । अत्र परकीयं व्याख्यानमुपरिष्टान्निराकरिष्यते ।

'सहकारित्वेन च' इति सूत्रमवतारयति- **विहितत्वेऽपीति ॥** न सत्कर्म ज्ञानिना कर्तव्यम् । 'अत एव चाग्नीन्धनाद्यनपेक्षा' इति सूत्रे कामकाराणामपि मोक्षश्रुतेः सत्कर्मानपेक्षाया उक्तत्वात् । पूर्वसूत्रोदाहृतं 'कुर्यात् कर्माविचारयन्' इत्यादिकौषारववाक्यं तु निष्फले विधिवैयर्थ्याद् विधिस्वरूपार्थवादमात्रम् । अन्यथा समुच्चयवादः स्यादिति भावः । विवक्षिताध्याहारेण सूत्रं व्याख्याति- **कर्तव्यमेवेति ॥** विधिप्रत्ययस्वारस्येन कौषारववाक्यं नार्थवादः । अन्यत्रापि तत्प्रसङ्गात् । 'अत एव चाग्नीन्धनाद्यनपेक्षा' इत्यनेन च समुच्चयवादो निरस्तः । तदुभयान्यथानुपपत्त्यैव सहकारित्वेन कर्मणां विधानं कौषारवश्रुतावङ्गीक्रियते । नचैवमपि समुच्चयवादापत्तिरस्ति । गुणप्रधानभावाङ्गीकारात् । उभयोः प्राधान्य एव समुच्चयवादः आग्नेयादिषु दृष्टः । नत्वन्यसहकृतत्वमात्रेण । तथा सत्यनुयाजाद्युत्तराङ्गसहकृताग्नेयादीनामनुयाजादिभिः समुच्चयवादः स्यात् । नच तत्र प्रधानयागमात्रसाध्यस्वर्गलोकप्राप्तिलक्षणफलस्य फलोपकार्यनुयाजाद्यङ्गसाध्यभोगविशेषरूपफलस्य च पृथग् दर्शनात् तत्र तदभावेऽपीह ज्ञानकर्मसाध्ययोः फलयोः पृथगदर्शनान्नैवमिति वाच्यम् ।

'सर्वदुःखनिवृत्तिस्तु ज्ञानिनो निश्चितैव तु ।
उपासया कर्मभिश्च भक्त्या चाऽनन्दचित्रता ॥'

(ब्र.सू.भा.उ. बृहत्तन्त्रवचनम्)

इति वचनादिहापि सर्वदुःखनिवृत्तिरूपमोक्षस्वरूपमात्रं ज्ञानफलम् । तत्र विचित्रानन्दभोगादिः कर्मफलमिति फलभेदाङ्गीकारादिति भावः ।

सूत्रस्थचशब्दसूचितं 'धर्मस्वरूपचित्रत्वात्' इत्यादिपाद्यवचनं भाष्यकृदुदाहरति । कथमेतत् सूत्रार्थतया सङ्गमयितव्यमित्यतो नेदमेतत्सूत्रसङ्गतम् । किन्त्वेतदधिकरणाद्यसूत्रोक्तप्रमेयाक्षेपसमाधानपरमित्यभिप्रेत्य तदुक्तप्रमेयमनुवदन्नवतारयति- **यदुक्तमित्यादिना ॥** कामचरणश्रुतिः स्तुतिमात्रमनुमतिमात्रं वेत्युक्त्या निषिद्धाचरणेनाऽनन्दह्रासो भवतीत्युक्तमिति ज्ञातव्यम् ।

एतेन सर्वान्नानुमतिसूत्रमारभ्य 'सहकारित्वेन च' इत्यन्तं सूत्रषट्कमधिकरणान्तरमिति स्वयूथ्यानामेव व्याख्यानं भाष्यविरुद्धम् । पाद्यवचनोदाहरणस्य सहकारिसूत्रासङ्गतत्वात् । तस्मात् 'स्तुतयेऽनुमतिर्वा' इत्यारभ्य विंशतिसूत्रमेकमधिकरणमित्येव युक्तम् ।

सिद्धान्तीयस्थितिन्यायविवरणस्य व्याख्यानम्

स्थितिन्यायमेतदधिकरणसङ्गतत्वेन प्रमाणपूर्वं विवृण्वत्

' ''एतावत्यधिका[1] नास्ति प्राप्तिरित्यन्ततः स्थिता ।
या स्थितिस्तां समाप्नोति यथाशक्तिप्रयत्नतः ।
विपरीतप्रवृत्तेस्तु तस्य ह्रासोऽधिकं भवेत् ॥''

इति वचनात् स्थितिविशेषोपपत्तेः'

इति वाक्यं पादार्थप्रतिकूलम् । अत्र ज्ञानिनां सदसत्प्रवृत्त्या[2] विशेषप्रवृत्तेरित्यतः 'कामकारेण चैके' इत्येतदधिकरणगुणसूत्रानुरोधाज्ज्ञानमाहात्म्येनाधिकरणार्थमुपसंहरति- **अत इति ॥** तथाचेदं विवरणवाक्यमेतदधिकरणादिसूत्रानुरोधप्रवृत्तं न ज्ञानमाहात्म्यविरोधीति द्रष्टव्यम् । यस्य मानुषजीवस्याऽनन्दप्राप्तिरेतावती इतोऽधिका नास्ति साधनशतेनापि इत्यन्ततःस्थिता या प्राप्तिर्यावदानन्दाविर्भावः तां प्राप्तिं यावदानन्दाविर्भावविशिष्टस्वरूपावस्थितिरूपां सम्पूर्णमुक्तिं स मानुषो जीवो यथाशक्ति

१. ब. एतावतोऽधिका २. म. सदसत्प्रवृत्तिभ्याम्

स्ववर्णाश्रमोचितकर्मानुष्ठानेन ज्ञानोत्तरभाविना प्राप्नोति । विपरीतवृत्तेस्तु ज्ञानोत्तरभाविना निषिद्धाचरणेन तस्य यावदानन्दाविर्भावविशिष्टस्वरूपावस्थानलक्षणस्य मोक्षस्य ह्रासो भवेत् । प्रकृत्याद्यावरणनिवृत्तावपि भगवदिच्छारूपावरणेन कस्यचिदंशस्यानभिव्यक्तिः । अतः सम्पूर्णमोक्षो न सिद्ध्यति ।

यस्तु योग्यो देवजीवस्तस्यैतावती स्थितिः, इयानानन्दो नातोऽधिकोऽस्तीति या स्वरूपेणावस्थितिरूपा प्राप्तिः क्लृप्तानन्दाप्राप्तव्याधिकानन्दादिस्तां स्थितिं यथाशक्तिप्रयत्नतः अधिकारानुसारिप्रयत्नतः, चन्द्रसुग्रीवादिवच्छक्त्यतिशयेनाधिकारानुसारिप्रयत्नतश्च तां स्थितिं समाप्नोति विपरीतप्रवृत्त्यभावे । विपरीतप्रवृत्तेस्तु यद्यपि क्लृप्तस्थितेरभावो नास्ति । तथाऽपि स्वाधिकारानुसारिसत्प्रवृत्त्या प्राप्तव्यतया सम्भावितस्याधिकानन्दस्य ह्रासो भवेदिति वचनार्थोऽपि द्रष्टव्यः । 'एतावतोऽधिका नास्ति' इति विवरणपाठः क्वचिद् दृश्यते । तस्याप्युक्त एवार्थः ।

एतदधिकरणसङ्गतत्वेन सङ्क्षेपभाष्यव्याख्यानम्

'विशेषस्तु ज्ञाने स्यादुत्तरोत्तरम् ।
सर्वेऽपि पुरुषार्थाः स्युर्ज्ञानादेव न संशयः ॥
न लिप्यते ज्ञानवांश्च सर्वदोषैरपि क्वचित् ।
गुणदोषैः सुखस्यापि वृद्धिह्रासौ विमुक्तिगौ ।
नृणां सुराणां मुक्तौ तु सुखं क्लृप्तं यथाक्रमम् ॥'

इति सङ्क्षेपभाष्येणापि यद्यपि सायुज्यादिलक्षणाः सर्वेऽपि पुरुषार्थाः स्वस्वयोग्यतानुसारेणाधिकारिणां ब्रह्मापरोक्षज्ञानादेव स्युरित्यत्र संशयो नास्ति । 'येन स्यात् केन स्यात् तेनेदृश एव' (बृ.उ. ५.५.१), 'कामचाराः कामभक्षाः' (सामशाखा) इत्यादिप्रमाणानामुक्तत्वात् । अत एव सर्वदोषैरपि सर्व-

निषिद्धाचरणेनापि ज्ञानवान्न लिप्यते। मोक्षाभावलक्षणलेपवान्न जायते च। तथाऽपि गुणदोषैर्मुक्तावनुभूयमानसुखस्य विमुक्तिगौ वृद्धिह्रासावपि विद्येते एव। 'एतावत्यधिका नास्ति' इत्यादिप्रमाणानामुक्तत्वात्। अतो ज्ञानिभिर्विहितं न त्याज्यम्। निषिद्धं न कर्तव्यम्। अयं च न देवताविषय इत्याह- **नृणामिति**॥ नृणामेव सत्प्रवृत्तिलक्षणगुणेन यावदानन्दाविर्भावलक्षणवृद्धिर्निषिद्धाचरणरूपदोषैः कस्यचिदनभिव्यक्तिरूपह्रासः। सुराणां मुक्तौ तु सुखं न वृद्धिह्रासोपेतम्। किन्तु यथाक्रमं क्लृप्तमेव। यस्य देवस्य यावन्त आनन्दास्तावन्तः सत्प्रवृत्त्यभावेऽपि तस्याभिव्यज्यन्त एव। न पुनर्नृणामिव यावदभिव्यक्तिप्रतिबन्धकेश्वरेच्छादिरूपावरणकल्पनम्। अत एवासत्प्रवृत्तावपि सर्वात्मनाऽभिव्यक्तिरस्त्येवेति भाष्योदाहृतप्रमाणैः क्लृप्तम्।

यद्वा, नृणां सुराणां च सुखस्य गुणदोषैर्वृद्धिह्रासौ विद्येते एव। सत्प्रवृत्त्या प्राप्तसम्भावनारूपवृद्धेः प्राप्तस्य हानिरूपह्रासस्य चासत्प्रवृत्त्या सुराणामङ्गीकारात्। परन्तु सुराणां यथाक्रमं सुखं क्लृप्तम्। नतु नृणामिव क्लृप्तस्यैव हानिरिति तुशब्देनाऽचष्टे।

ननु नृणां सुराणामपि ज्ञानित्वाविशेषादयं विशेषः कुतोऽङ्गीकर्तव्य इत्यत उक्तम्- **विशेषस्तु ज्ञाने स्यादुत्तरोत्तरमिति**॥ ज्ञाने ज्ञानित्वे समानेऽपि ज्ञानिषूत्तरोत्तरं ज्ञानानन्तरं मनुष्याणां विधिनियतत्वं देवानामनियतत्वं चतुर्मुखस्य स्वेच्छानियतत्वं स्याद् अस्ति। तुशब्देन देवानां प्रायश इति विशेषं ब्रह्मणो नियमेन स्वेच्छानियतत्वमिति विशेषं चाऽह। तदुक्तम्-

'स्वेच्छानुवृत्त्यैव भवेद् ब्रह्मणः प्रायशस्तथा।
देवानामपि सर्वेषां विशेषादुत्तरोत्तरम्॥'इति।

विधिनियतत्वानियतत्वादिविशेषश्रवणान्मोक्षेऽपि विशेषो युक्त एव।

नन्वेतादृशविशेषे मुनुष्यादौ विद्यमानेऽपि ज्ञाने विशेषाभावान्न मोक्षवैचित्र्यमिति चेन्न। ज्ञाने विशेषाभावे विधिनियतत्वादिविशेषायोगेन ज्ञानेऽपि विशेषस्याङ्गीकार्यत्वात्। अल्पाधिकारित्वादिनाऽयं विशेषो भविष्यतीति चेन्न। ज्ञानविशेषस्यापि वक्तव्यत्वादिति भावेन पूर्वोक्तं ज्ञानविशेषं स्मारयति- **विशेषस्त्विति**॥ उत्तरोत्तरं ज्ञाने विशेषस्तु स्यादेवेति प्रागेव प्रतिपादितमिति विशेष इत्येतदधिकरणतात्पर्यमप्युक्तमनुसन्धेयम्।

॥ इति कामचाराधिकरणम्॥ (स्तुत्यधिकरणम्)

॥ अथ उभयलिङ्गाधिकरणम् ॥ ५ ॥

सूत्रभाष्यम्

॥ ॐ सर्वथाऽपि तु त एवोभयलिङ्गात् ॐ ॥ ॥३-४-३४ ॥

सर्वप्रकारेणोत्साहेऽपि ये ज्ञानयोग्यास्त एव ज्ञानं प्राप्नुवन्ति नान्ये। 'य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' (छा.उ.८-७-३) इति श्रुत्याचार्योपदेशसाम्येऽपि विरोचनो विपरीतज्ञानमापेन्द्रः सम्यग्ज्ञानमित्युभयविधलिङ्गात् ॥ ३४ ॥

॥ ॐ अनभिभवं च दर्शयति ॐ ॥ ३-४-३५ ॥

'दैवीमेव सम्पत्तिं देवा अभिगच्छन्त्यासुरीमेव चासुरा नैवैतयोरभिभवः[१] कदाचित् स्वभाव एव ह्यवतिष्ठते' इति स्वभावानभिभवं च दर्शयति ॥३५॥

॥ ॐ अन्तरा चापि तु तद्दृष्टेः ॐ ॥ ३-४-३६ ॥

सम्यग्ज्ञानविपरीतज्ञानयोरन्तरा स्थितानामपि देवासुरभावयोर्दाढर्यदृष्टेः ॥ ३६ ॥

॥ ॐ अपि स्मर्यते ॐ ॥ ३-४-३७ ॥

'असुरा आसुरेणैव स्वभावेन च कर्मणा।
ज्ञानेन विपरीतेन तमो यान्ति विनिश्चयात् ॥

१. ब. नैतयोरभिभवः

देवा दैवस्वभावेन कर्मणा चाप्यसंशयम्।
सम्यग्ज्ञानेन परमां गतिं गच्छन्ति वैष्णवीम् ॥
नानयोरन्यथाभावः कदाचित् क्वापि विद्यते।
मानुषा मिश्रमतयो विमिश्रगतयोऽपि च ॥'

इति स्कान्दे ॥ ३७ ॥

॥ ॐ विशेषानुग्रहं च ॐ ॥ ३-४-३८ ॥

'शृण्वे वीर उग्रमुग्रं दमायन्नन्यमन्यमति नेनीयमानः।
एधमानद्विळुभयस्य राजा चोष्कूयते विश इन्द्रो मनुष्यान् ॥'

इति (ऋ.सं.६-४७-१६) विशेषानुग्रहं च दर्शयति देवेषु परमेश्वरस्य।

'असुरान् दमयन् विष्णुः स्वपदं च सुरान् नयन्।
पुनः पुनर्मानुषांस्तु सृतावावर्तयत्यसौ ॥'

इति भविष्यत्पर्वणि[१] ॥ ३८ ॥

॥ ॐ अतस्त्वितरज्ज्यायो लिङ्गाच्च ॐ ॥ ३-४-३९ ॥

देवभागादसुरभाग एव बहुलः। 'तस्मान्न जनतामियात्[२]' (बृ.उ.३-३-१०) इति लिङ्गात्। चशब्दात् 'ततः कनीयसा[३] एव देवा ज्यायसा असुराः' (बृ.उ.३-३-१) इति श्रुतेश्च।

'असुरा बहुला यस्मात् तस्मान्न जनतामियात्' इति च ब्राह्मे ॥ ३९ ॥

१. ब. इति च भविष्यत्पर्वणि २. ब. जनमियात् ३. ब. कानीयसाः

॥ॐ तद्भूतस्य तु तद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः ॐ॥

॥३-४-४०॥

असुरजातेरेवासुरत्वं देवजातेरेव देवत्वं जैमिनेरपि सिद्धमेव। 'नासुरा दैवीं न देवा आसुरीं न मनुष्या दैवीमासुरीं च गतिमीयुरात्मीयामेव जातिमनुभवन्ति[१]' इति नियमश्रुतेः। 'नासुराणां दैवं रूपं न देवानामासुरं न चोभयं मनुष्याणां यो यद्रूपः स तद्रूपो निसर्गो ह्येष[२] भवति' इत्यतद्रूपत्वश्रुतेः। 'तं भूतिरिति देवा उपासाञ्चक्रिरे ते बभूवुस्तस्माद्धाप्येतर्हि सुप्तो भूर्भूरित्येव प्रश्वसित्यभूतिरित्यसुरास्ते ह पराबभूवुः' (ऐ.आ.२.१.८) इति देवासुराणां भावाभावश्रुतेश्च।

'देवानां भूतिरित्येव मनो विष्णौ स्वभावतः।
असुराणामभूतित्वेनैतन्नेयमतोऽन्यथा॥
देवाः शापाभिभूतत्वात् प्रह्लादाद्या बभूविरे।
अतः सुगतिरेतेषां नान्यथा व्यत्ययो भवेत्॥'

इति चाध्यात्मे॥ ४०॥

॥ इति उभयलिङ्गाधिकरणम्॥ ५॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र भगवत्प्राप्तिसाधनज्ञानस्याधिकारिमात्रप्राप्यत्वमहिम्नो वर्णनादस्ति शास्त्रादिसङ्गतिः। अनधिकारिप्राप्यत्वे मुक्त्ययोग्यानामपि मोक्षप्रसङ्गात् समर्थनीयमेतत्। प्रकृतं ज्ञानमत्र विषयः। किमधिकारिभिरेवाऽप्यत उतानधिकारिभिरपीति सन्देहः। उभयथाऽपि लोके दर्शनं सन्देहबीजम्।

१. ब. अनु भवति २. ब. ह्येवैष

पूर्वपक्षः

अनधिकारिभिरपि ज्ञानमाप्यत इति पूर्वः पक्षः। अधिकाराभावेऽपि महाप्रयत्नेन प्राप्तुं शक्यत्वात्। वेदानधिकारिणामपि प्रयत्नेन तत्प्राप्तिदर्शनात्। अतोऽयोग्यैरपि ज्ञानस्य प्राप्तुं शक्यत्वादयोग्यानामपि मोक्ष इति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **सर्वथाऽपीति**॥ देशकालगुरूपसत्तिश्रवणाद्यनेकोत्साहेऽपि योग्यानामेव ज्ञानप्राप्तिर्भवति नायोग्यानाम्। कुतः? 'य आत्मा' इति श्रुतिरूपेणेन्द्रविरोचनयोः प्रजापतेराचार्यस्योपदेशसाम्येऽपि योग्यत्वादिन्द्र एव सम्यग्ज्ञानं प्राप्तः, नत्वयोग्यो विरोचनः, प्रत्युत विपरीतज्ञानमेवाऽप। य आत्माऽपहतपाप्मत्वादिलक्षणः स जिज्ञास्य इति प्रजापतिनोपदिष्टे कोऽसाविति ताभ्यां पृष्टेन प्रजापतिनोक्तम्- य एषोऽन्तरक्षिणि पुरुषो दृश्यते 'एष आत्मा' इति। तच्छ्रुत्वेन्द्रेणापहतपाप्मत्वादिलक्षणोऽक्षिस्थो हरिरात्मेति ज्ञातत्वात्, विरोचनेन तु चक्षुषि प्रतीयमानप्रतिबिम्ब एवापहतपाप्मत्वादिलक्षणात्मेति कल्पिततत्वादिति भावः। अविजिघत्सोऽपिपास इति बुभुक्षादिना पीडाभाव उच्यते। नह्यस्य घटादेरिवान्वेषणं युज्यत इत्यतः स विजिज्ञासितव्य इति॥ ३४॥

महाप्रयत्नेनापि अयोग्यताया अभिभवितुमशक्यत्वाद् योग्यानामेव ज्ञानप्राप्तिरिति निरूपणम्

ननु महाप्रयत्नेनायोग्यताया अभिभवितुं शक्यत्वादयोग्यानामपि ज्ञानप्राप्तिः किं न स्यात्। दृष्टं हि विश्वामित्रस्य महता प्रयत्नेन विप्रत्वमित्याशङ्कां परिहरत् सूत्रं पठित्वा व्याचष्टे- **अनभिभवं चेति**॥ भवेदयोग्यताभिभवेनायोग्यानामपि ज्ञानप्राप्तिः। यदि क्षत्रियत्वादिवदयोग्यत्वमस्वाभाविकं स्यात्। नत्वेतदस्ति। तस्य स्वभावत्वात्। स्वभावत्वेऽप्यभिभवः किं न

स्यादिति न वाच्यम् । स्वभावानभिभवस्य श्रुतिसिद्धत्वादिति भावः । **सम्पत्तिं स्वभावम्** ॥ ३५ ॥

मिश्रज्ञानिनामपि स्वभावाभिभवो नास्तीति निरूपणम्

अस्त्वत्यन्तायोग्यानामसुरादीनां ज्ञानप्राप्त्ययोगो देवादीनां च मिथ्याज्ञानाप्राप्तिरितिदाढर्येनाभिभवायोगात् । मध्यममानुषाणां तु ज्ञानादिप्राप्तिर्भवतु । तत्स्वभावाभिभवस्य कर्तुं शक्यत्वादित्याशङ्कां परिहरत् सूत्रमुपन्यस्य व्याचष्टे- **अन्तरेति** ॥ मानवानां सम्यग्विपरीतज्ञानयोरन्तरास्थितत्वमेव मिश्रज्ञानित्वमेव, नतु केवलज्ञानादिप्राप्तिः । तेषामपि स्वभावाभिभवो नास्ति । कुतः? तेषां मिश्रज्ञान एव विशेषेण दाढर्यदृष्टेः । अतिदृढस्य चाभिभवायोगादिति भावः ।

ज्ञानादीनां देवादिस्वभावत्वेन तदभिभवो नास्तीति स्मृत्या निरूपणम्

ननु देवदानवमानवानां तत्स्वभावत्वे भवेदभिभवाभावः । तदेव कुतः? तादृशस्वभावत्वे च तथाफलेन भाव्यम् । तदपि कुतः? इत्याशङ्कां स्मृत्या परिहरत् सूत्रमुपन्यस्य तां स्मृतिमुदाहरति- **अपीति** ॥ स्वभावेनेति ज्ञानकर्मणोर्विशेषणम् । ज्ञानादेर्दैवत्वादिकं च 'सर्वभूतेषु येनैकम्' इत्यादिना ज्ञातव्यम् ॥ ३७ ॥

भगवतः विशेषानुग्रहपात्रत्वाद् देवानामेव ज्ञानादीति निरूपणम्

हेत्वन्तरेण देवानामेव सम्यग्ज्ञानफले नान्येषामित्यर्थप्रतिपादकं सूत्रमुपन्यस्य व्याचष्टे- **विशेषेति** ॥ ज्ञानादि तावद् भगवत्प्रसादाधीनम् । 'अज्ञानां ज्ञानदो विष्णुः' इत्यादेः । भगवदनुग्रहश्च देवेष्वेव विशेषतो नान्येषु श्रुतिसिद्धः, अतस्तेषामेव सम्यग्ज्ञानादि नासुराणामिति भावः । अध्यवसायान्तगामी परमेश्वरः सर्वानुग्रान् दैत्यान् दमयंस्तद्विरुद्धान् देवान् संसारमतिक्रम्य स्वपदं नयन् वेदादिषु श्रूयते । स एव मनुष्यप्रजाः संसार एवाऽवर्तयतीत्यर्थः ।

इन्द्रपदव्याख्यानम्- **परमेश्वरस्येति** ॥ श्रुत्यर्थनिश्चायिकां स्मृतिं चाऽह- **असुरानिति** ॥ ३८॥

स्वभावानभिभवस्य युक्त्या समर्थनम्

यदुक्तं न दैत्यानां तत्स्वभावाभिभवेन देवत्वप्राप्तिरिति तदेव युक्त्या समर्थयत् सूत्रं पठित्वा व्याचष्टे- **अत इति** ॥ यद्यसुराणां स्वभावाभिभवेन देवत्वप्राप्तिस्तर्हि कदाचित् तेषां देवभागादूनता स्यात् । नचैवम् । अतो देवभागादितरस्यासुरभागस्यैव ज्यायस्त्वात् । तदेव कुतः? जनताऽप्रवेशोक्त्यन्यथानुपपत्तेः श्रुतेश्चेति भावः । ततस्तयोर्देवासुरभागयोः । कनीयांसो ज्यायांसश्चेत्यर्थः । ननु जनताप्रवेशनिषेधोऽसुरबाहुल्यनिमित्त एव कुत इति तत्राऽह- **असुरा इति** ॥ ३९ ॥

जैमिनिमतेऽपि स्वरूपाभिभवो नास्तीति निरूपणम्

जैमिनिमतेनाप्येतमर्थं समर्थयत् सूत्रं पठित्वा व्याचष्टे- **तद्भूतस्येति** ॥ देवस्यैव देवभावोऽसुरस्यैवासुरभावो जैमिनेरपि सिद्ध एव । नतु तत्र पुरुषार्थाद्यधिकरणवद् व्यवस्थितविकल्पोऽस्ति । केन हेतुना जैमिनेस्तत्सिद्धिः? नियमादिश्रुतेरेवेति भावः । गतिजातिशब्दौ स्वभावार्थौ । रूपमिति सम्यग्ज्ञानादि । देवासुराणां परस्परविपरीतोपासनफलनियमः 'तं भूतिः' इत्यनेनोच्यते । अन्यथा स न स्यात् । बभूवुर्भूतिमन्तः । सुप्तः सुप्तेषु स्थितो वायुः ।

ननु प्रह्लादादीनां दैत्यानामेव सम्यग्ज्ञानफलयोर्दर्शनात् कथमेतदित्यत उक्तार्थे स्मृतिं चाऽह- **देवानामिति** ॥ नचैतावता देवानामसुरत्वप्राप्तिः । 'हेतुतः सोऽन्यथाभावो रक्तता स्फटिके यथा' इति वचनात् । अतो भगवज्ज्ञानस्य योग्यैकसाध्यत्वाद् योग्यानामेव मोक्ष इति सिद्धम् ॥ ४० ॥

॥ इति उभयलिङ्गाधिकरणम् ॥ अ० ९ ॥

शेषतात्पर्यचन्द्रिका

॥ अथोभयलिङ्गाधिकरणम् ॥ अ० ५ ॥

॥ ॐ सर्वथाऽपि तु त एवोभयलिङ्गात् ॐ ॥ ३-४-३४ ॥

एतदधिकरणप्रतिपाद्यविषयः

अनया सप्तसूत्र्या ज्ञानस्याधिकारिमात्रप्राप्यत्वमहिमा वर्ण्यते।

नन्वधिकारिमात्रप्राप्यत्वमनधिकारिकृत्यसाध्यत्वं, तच्च कर्मणोऽप्यस्ति। शूद्रादिकृत्यसाध्यत्वात्। नच शूद्रादिभिरप्यन्याय्याध्ययनप्रवृत्तेः साङ्गकर्मानुष्ठानसम्भवात् तत्कृतिसाध्यत्वमेव तत्रेति वाच्यम्। ज्ञानेऽप्यन्याय्याध्ययनप्रवृत्तानधिकारिकृतिसाध्यत्वदर्शनात्। नह्यधिकारिणो दुर्योधनादयः कृष्णादीन्न साक्षात्कृतवन्तः। नच तथाभूतसाक्षात्कारस्य श्रवणमननभगवत्प्रसादादिपूर्वकत्वाभावेन फलजननशक्त्यभावेनेहाविवक्षिततया विवक्षितज्ञानस्य तत्कृतिसाध्यत्वाभावोऽस्तीति वाच्यम्। इह कर्मणोऽपि तत्कृतिसाध्यत्वाभावात्। उपनयनादिसंस्कारपूर्वकाध्ययनभगवत्प्रसादादिपूर्वकस्य कर्मण एव स्वर्गादिजनकत्वाङ्गीकारात्। नहि शूद्रादीनां विवक्षिताध्ययनभगवत्प्रसादादिरस्ति। प्रत्युतान्याय्याध्ययनादिना भगवत्कोपस्यैव जातत्वात्। तत्कथं ज्ञानस्यैवायं महिमेति चेत्, उच्यते।

अनधिकारित्वं जातिकृतं स्वरूपकृतं चेति द्वेधा भिद्यते। शूद्रादीनां जातिकृतानधिकारिणां विवक्षितकर्मणः कृत्यसाध्यत्वम्। तत्कृतिसाध्यकर्मणः[१] स्वर्गजनकत्वानङ्गीकारात्। येषां तु जातिकृतमनधिकारित्वं नास्ति ब्राह्मणयोनिजत्वात्, परन्तु विष्णुभक्त्याद्यङ्गवैकल्यादेवानधिकारित्वं तत्कृतकर्मणां स्वर्गादिकं फलमङ्गीक्रियते। अत एव तेष्वपि स्वर्गादिभोगानुकूलभगवत्प्रसादोऽपि। न चात्र विवदितव्यम्।

१. म. तत्कृतसाध्यकर्मणः

'द्रव्यं कर्म च कालश्च स्वभावो जीव एव च।
यदनुग्रहतः सन्ति न सन्ति यदुपेक्षया॥' (स्मृतिः)

इति वचनात् तेष्वपि जीवनादिकार्यानुकूलप्रसादस्य प्रमितत्वात्। अत एव 'आचार्याणां तु तेजसा' इत्याचार्यसामर्थ्यस्य तद्घटकत्वमुक्तम्। तथाच येषां स्वरूपकृतमनधिकारित्वं तामसत्वात्मकमस्ति तत्कृत्या स्वर्गादिफलजननसमर्थं कर्म साध्यत एव। विवक्षितज्ञानं तु नैवं तामसादिजीवकृत्या[१] साध्यते। किन्तु सात्त्विकजीवकृत्यैव। कर्मणि तु नायमस्ति नियम इति तामसादिजीवकृत्यसाध्यत्वरूपमाहात्म्यं नान्यगामि। ननु 'यावदधिकारमवस्थितिराधिकारिकाणाम्' (३-३-३३) इत्यधिकरणे योग्यताविशेषेण मुक्तावानन्दविशेषसमर्थनमुपासनापादेऽनुपपन्नम्। सिद्धायामेव योग्यतायां तयाऽऽनन्दविशेषसाधनस्य युक्तत्वात्। अत इदमधिकरणं यावदधिकाराधिकरणात् प्राङ् निवेशनीयमिति चेन्न। 'प्राप्तेश्च समञ्जसम्' (३-३-१०) इत्यनेनोपासनापादस्थेन यावदधिकरणात् प्राक्तनेन योग्यतायाः साधितत्वात्।

नन्वत एवेदमधिकरणं व्यर्थम्। न व्यर्थम्। उपासनायां योग्यतायास्साधितत्वे[२] ज्ञानयोग्यताया असाधितत्वात्। समानन्यायेन साधितत्वेऽपि ज्ञानमाहात्म्यपर्यवसानेनेहाऽऽक्षेपसमाधानाभ्यां दृढीकरणाददोषः।

यद्वा, अत्र सिद्धयोग्यतया विरोधस्तत्र परिहृतो ननु योग्यतैव समर्थितेत्यदोषः।

सङ्गतिः

ननु 'सर्वदुःखनिवृत्तिस्तु ज्ञानिनो निश्चितैव तु।' इति बृहत्तन्त्रवचनेन 'सहकारित्वेन च' इति सूत्रोक्तज्ञानसहकारित्वोपपादनाय सर्वदुःखनिवृत्ति-

१. म. तामसजीवकृत्या २. प. साधितत्वेऽपि

रूपमोक्षो ज्ञानिनो नियत इत्युक्तमयुक्तम्। मोक्षानधिकारिणां तमोयोग्यानां ज्ञानसम्भवेन नियमासम्भवात्।

किञ्च 'कर्मस्वरूपचित्रत्वाद्[१] यो यो देवमनोगतः। स एव धर्मो विज्ञेयो नह्येते लोकसम्मताः॥' (ब्र.सू.भा.उ. पाद्मवचनम्) इति वचनेन 'सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्' (ब्र.सू. ३.४.२८) इत्यादिसूत्रोक्तानन्दह्रासोपपादनायोक्तं ज्ञानिनां लोकविलक्षणत्वमनुपपन्नम्। अयोग्यानामपि ज्ञानोदयेन लोकसाम्यस्यैव न्याय्यत्वादित्युत्थानादनन्तरसङ्गतिः।

पूर्वः पक्षः

तत्र पूर्वः पक्षः।

कृतिसाध्यं न चेज्ज्ञानं न कस्यापि च तद् भवेत्।
तत्साध्यं चेद् भवेदेव सर्वेषामिति निश्चयः॥

नच कर्मादावधिकारस्य साधनतया क्लृप्तत्वेन कथं तदभावे ज्ञानोदय इति वाच्यम्। अधिकारस्यार्थित्वसमर्थत्वविद्वत्त्वादिरूपस्यान्येष्वपि सम्भवात्। अनादियोग्यतारूपस्य चाद्याप्यसिद्धेः। दृष्टश्चोक्ताधिकाराभावेऽप्यसात्त्विकजीवानामध्ययनादिमहाप्रयत्नेन वेदलाभः। नचानादियोग्यतायां प्रमाणमस्ति।

ननु कथं नास्ति? 'वर्तमानव्यतिरिक्तः कालः स्वेतरोत्कृष्टचतुर्मुखवान्। कालत्वात् वर्तमानकालवत्।', 'ब्रह्मा अतीतादिकालेऽप्यन्यतोऽधिको भवितुमर्हति। ब्रह्मत्वात्। एतत्कालवृत्तिब्रह्मवत्।', 'विमतः कालः ईश्वरादिव्यतिरिक्तावधिकाधिक्ययुक्तरुद्रवान्। कालत्वात्। सम्मतवत्।', 'विमतो रुद्रः अतीतादिकालेऽपीश्वरादिव्यतिरिक्ताधिकाधिक्यवान्। रुद्रत्वात्। सम्प्रतिपन्नरुद्रवत्।' नचाऽत्राऽद्यानुमाने हरिलक्ष्म्यादीनां स्वेतरत्वेन तदाधिक्यस्य

१. म. धर्मस्वरूपचित्रत्वात्

प्रमाणबाधितत्वाद् बाधितविषयत्वं शङ्कनीयम्। तदितरपरत्वस्याङ्गीकारात्। नच तैस्तैः प्रसिद्धैः कारणैस्तत्तत्पदप्राप्तौ तत्तदाधिपत्यप्रयुक्तोत्कर्षसिद्ध्या सर्वेष्वपि प्रयोगेष्वर्थान्तरत्वं शङ्कनीयम्। पदप्राप्तेः पूर्वं पश्चाच्चोत्कर्षस्याऽधिपत्यादिनाऽनुपपत्तेः। ततः कथं मानाभाव इति चेत्।

न। विपक्षे बाधकतर्काभावेनानुग्राहकप्रमाणाभावेन चाप्रयोजकत्वात्। अस्तु वाऽनादियोग्यता प्रमिता। तथाऽप्यसात्त्विकानां ज्ञानोदयाभावः कुतः? नचानादियोग्यतैव ज्ञानोदयं प्रतिबध्नाति। ब्रह्मादीनामपि तत्प्रसङ्गात्। नच, सा भिन्नभिन्ना विलक्षणकार्यप्रसवा च। ततः सात्त्विकेषु मिथ्याज्ञानं प्रतिबध्नन्ती तत्त्वज्ञानमुत्पादयति। केषाञ्चित् तत्त्वज्ञानं प्रतिबध्नन्ती मिथ्याज्ञानादीनुत्पादयतीत्यङ्गीक्रियत इति वाच्यम्। बहुकल्पनाप्रसङ्गात्।

अस्तु वा योग्यता नाना। तथाऽपि सात्त्विकेतरेषां महता प्रयत्नेनानादियोग्यतायाः मिथ्याज्ञानप्रसवहेतोरप्यभिभवेन तत्त्वज्ञानोदयसम्भवात्। अन्यथाकर्तुमशक्यत्वेन निश्चितानामपि क्षत्रियत्वादीनां महता प्रयत्नेनाभिभवदर्शनात्। तथाचानधिकारिकाणामपि[१] तदीयानादियोग्यतायाः महता प्रयत्नेनाभिभवेन ज्ञानोदये सति ज्ञानिनां च मोक्षनियमेन 'विभागः शतवत्' (३-४-११) इत्युक्तिविरोधः। 'प्राप्तेश्च समञ्जसम्' (ब्र.सू. ३.३.१०), 'यावदधिकारम्' (ब्र.सू. ३.३.३३) इत्याद्युक्तिश्चायुक्ता स्यादिति प्राप्तेऽभिधीयते।

सिद्धान्तः

अनुमानाच्छ्रुतेस्तर्कादन्यथानुपपत्तितः।
अनादियोग्यता सर्वैः शिरसाऽभ्युपगम्यताम्॥

१. म. अनाधिकारिकाणाम्

विमतो विरोचनस्तत्त्वज्ञानप्रतिबन्धकयत्किञ्चित्कर्मवान् । तत्साधन-देशकालगुरूपसत्तिश्रवणाद्यनेकोत्साहत्वेऽपि[1] तदुत्पत्त्यनधिकरणत्वात् । यद् यत्साधनसम्पन्नत्वेऽपि यदुत्पत्त्यनधिकरणं तत् तत्प्रतिबन्धकयत्किञ्चिद्धर्मयुक्तम् । यथा वन्ध्यादि । नचादृष्टेनार्थान्तरता । तस्याप्याकास्मिकत्वायोगेन नियामकगवेषणेनानवस्थापरिहारायोगात् । ततो अनादेः कस्यचिद्धर्मस्याङ्गीकार्यत्वात् । 'शृण्वे वीरम्' (ऋ. ६.४७.२६) इत्यादिश्रुतिस्मृतयश्चात्र भाष्यादावुदाहृताः सन्तीति नाप्रयोजकत्वशङ्का ।

अत एव 'विमतः कालः' इत्यादीनि प्रागुपन्यस्तान्यनुमानानि[2] निरवद्यान्येव । यदि हिरण्यगर्भस्यानादिः सर्वोत्कृष्टयोग्यतालक्षणो विशेषो न स्यात् तदा साम्प्रतं दृश्यमानं सर्वोत्कृष्टत्वं[3] न स्यात् । यदि च विरोचनस्यानादिः सर्वापकृष्ट-योग्यतालक्षणो विशेषो न स्यात् तदा साम्प्रतं दृश्यमानं महोत्साहेऽपि तत्त्व-ज्ञानोत्पत्त्यनधिकरणत्वं न स्यात् । कारणाभावे च कार्याभावस्य नियतत्वात् । अन्यथा सर्वेषामपि सर्वकार्यप्रसङ्गात् । इत्याद्यनुकूलतर्काणां सद्भावात् । जनताप्रवेशनिषेधान्यथानुपपत्त्या योग्यतानभिभवस्यापि सिद्धत्वान्न कश्चित् क्षुद्रोपद्रव इति ।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- **अधिकारिमात्रप्राप्यत्वेति** ॥ सात्त्विकजीवमात्रस्वरूप-भूतानादियोग्यताख्याधिकारवन्मात्रप्राप्यत्व इत्यर्थः । यद्यप्यत्र 'फलेऽप्य-विशेषः' इति विवरणवाक्यानुसारादधिकारिमात्रप्राप्यत्वरूपं मोक्षस्य माहात्म्यं वक्तव्यम् । तथाऽपि ज्ञानपादसङ्गत्यर्थं ज्ञानस्येत्युक्तम् । विवरणवाक्यं त्वेतदधि-करणफलपरम् । अत एवायोग्यानामपि मोक्षप्रसङ्गादिति वक्ष्यति ।

---

१. प. उत्साहवत्त्वेऽपि २. म. उपन्यस्तान्यप्यनुमानानि
३. म. पूर्वोत्कृष्टत्वम्

टीकायां पूर्वपक्षीयनिजस्वभावन्यायविवरणव्याख्यानम्

अत्र निजस्वभाव इत्युक्तन्यायमेकप्रकारत्वोपलक्षणमिति मत्वा साध्यप्रदर्शनेन विवृण्वत्

'नच सर्वजीवानामेकप्रकार एव निजस्वभावश्चैतन्यमिति फलेऽप्यविशेषः'

इति वाक्यं 'सर्वथाऽपि' इति सूत्रांशविवरणपरस्य 'सर्वप्रकारेणोत्साहेऽपि' इति भाष्याभिप्रायं व्यञ्जयन् तात्पर्यतो व्याचष्टे- **अनधिकारिभिरपि ज्ञानमाप्यत इति पूर्वः पक्ष इति** ॥ श्रवणादिफलत्वाज्ज्ञानमत्र फलशब्देन विवक्षितमिति भावः । अविशेष इत्यस्यानधिकारिभिराप्यत इति तात्पर्यमुक्तं वेदितव्यम् । एवं फलपदं ज्ञानपरतया व्याख्याय मोक्षपरतयाऽपि व्याकुर्वन्नसाङ्गत्यपरिहाराय पूर्वपक्ष-फलोक्तिपरतां व्याचष्टे- **अतोऽयोग्यैरपीति** ॥ तेन चेतनत्वरूपनिजस्वभावस्य सर्वजीवानामप्येकप्रकारत्वेनाविशेषान्मध्ये अनादियोग्यताकल्पनायां प्रमाणा-भावाच्च ज्ञानरूपं फलं सर्वेषामविशेषेणैव भवति । ततस्तत्फलं मोक्षोऽप्यविशेषेणैव इति विवरणं व्याख्यातं भवति । यद्वाऽत्रापि 'स्वरूपदाढर्यं च निजस्वभावः' इति न्यायमालायां चशब्देनाऽत्मस्वरूपदाढर्यन्याय एवैतदधिकरणसम्बन्धित्वेन व्यावर्तनीय इति सूच्यत इति भावेन तमेव न्यायमत्र पूर्वपक्षे तात्पर्यतः सङ्गमयति- **ननु महता प्रयत्नेनेति** ॥ 'नहि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्' (भ.गी. ३.५) इति न्यायेन सर्वजीवस्वभावत्वेनावगतप्रयत्नस्य दाढर्येन सङ्गतत्वेन महता प्रयत्नेन योग्यताया अप्यभिभवितुं शक्यत्वादयोग्यानामपि ज्ञानप्राप्तिः इत्येतदधिकरणपूर्वपक्षसम्बन्धो द्रष्टव्य इति भावः ।

टीकायां सिद्धान्तीयविभक्ततान्यायविवरणव्याख्यानम्

'निषेधसामान्यविधिक्रियाणां विभक्तता' इत्युक्तन्यायमेतदधिकरण-सम्बन्धित्वेन प्रमाणपूर्वं विवृण्वत्

'निषेधसामान्यविधिक्रियाणां विभक्तत्वात् । ''नादेवो देवपदमन्विच्छेदन्विच्छन्

यात्यधरं तमः। न देवः स्वीयं पदमन्विच्छन् विदुष्यति[१]। तदेव ह्यस्य स्वम्'' (न्या.वि.उ.श्रुतिः) इति निषेधविभागः। ''स्थिरं ज्ञानं स्थिरो हरावभिषङ्गः स्थिरमोजो बलं विराग एतद्धि सामान्यं देवानाम्। अथान्येषामस्थिराण्येतानि[२] सर्वाण्यथापि यथायोगं[३] विनेयानि'' इति सामान्यविभागः। ''ज्ञानदानमेव देवानां विहितं तप एवर्षीणां[४], आचार एव मनुष्याणां[५] तदविरोधेनान्यानि करणीयानि'' इति विधिविभागः। ''चरन्ति देवा विहितं समस्तमर्धमेव मुनयो दशांशतो मनुष्याः'' इति क्रियाविभागः।'

इति वाक्यमत्र सङ्गमयन्नवतारयति- **स्वभावत्वेऽप्यभिभव इति**॥ एकार्थत्वाद् भाष्येण सह युगपदभिप्रायोक्त्या व्याचष्टे- **स्वभावानभिभवस्येति** ॥ **श्रुतिसिद्धत्वादिति**॥ 'दैवीमेव सम्पत्तिं देवा गच्छन्ति' इति भाष्योदाहृतश्रुत्या 'नादेवो देवपदमन्विच्छेत्' इत्यादिविवरणोदाहृताभिर्निषेधसामान्यविधि-क्रियाविभागश्रुतिभिश्च सिद्धत्वादित्यर्थः।

तथाच निषेधसामान्यविधिक्रियाणां श्रुत्या विभक्तत्वाच्चेतनत्वाविशेषमात्रेण सर्वेषां न फलप्राप्तिः। तत्र निषेधविभागश्रुतिमुदाहरति- **नादेव इति**॥ देवत्व-रूपयोग्यतारहित इत्यर्थः। तर्हि देवोऽपि स्वोत्तमपदमन्विच्छन् किं न दुष्यति? नेत्याह- **न देव इति**॥ स्वीयं पदमन्विच्छन्नेव न दुष्यति। नतु परकीयमि-त्यर्थः। तदेव कुत इत्यत आह- **तदेव ह्यस्येति**॥ स्वकीयमेव पदं स्वस्य स्वभोक्तव्यं धनमिव। परकीयेच्छायां तु चोर इव कष्टभागी भवेदित्यर्थः।

सामान्यविभागश्रुतिमुदाहरति- **स्थिरं ज्ञानमिति**॥ विभाग इत्यतः स्थिरपदमनुकृष्यते। 'एतद्धि सामान्यम्' इति स्थिरज्ञानादि देवानां सामान्यो धर्मः। अतस्तैस्स्थिराण्येव तानि सम्पादनीयानि। नन्वेषामस्थिरज्ञानवत्त्वान्न

१. म. विदुष्यते २. म. यथायोग्यम् ३. ब. अस्थिराण्येव तानि
४. ब. तप एव ऋषीणाम् ५. ब. मानुषाणाम्

स्थैर्यं सम्पादनीयम्। नेत्याह- **यथायोगं विनेयानि**॥ तान्यपि स्थिरतया सम्पादनीयानीति। सामान्यविभागः सामान्यधर्मविभागः।

विधिविभागश्रुतिमुदाहरति- **ज्ञानदानमिति**॥ 'देवानां विहितम्' विशेषतयेति शेषः। कथमेषां विशेषधर्मत्वमित्यत आह- **तदविरोधेनेति**॥ ज्ञान-दानाद्यलोपेनेत्यर्थः। विहितशब्दस्य सर्वत्रानुवर्तनादियं विधिविभागश्रुतिः।

एवं 'चरन्ति देवाः' इति श्रुतिश्चरणरूपक्रियाविभागपरत्वात् क्रिया-विभागश्रुतिरित्युच्यते। देवा मुनयश्च स्वशक्त्यनुसारेण समस्तं धर्मं तत्तद्वर्णाश्रम-विहितं चरन्ति। प्रायो नाधर्मम्। मनुष्यास्तु तद्दशांशतः। बहुन्यूनतोपलक्षण-मेतत्। इति विवरणार्थो द्रष्टव्यः।

टीकायां सिद्धान्तीयस्थितिन्यायविवरणव्याख्यानम्

यद्वा, 'स्थितिश्च' इति न्यायमालायां चशब्देन स्थितिन्याय एवैतदधि-करणसम्बन्धित्वेन योज्य इति सूच्यत इति भावेन स्थितिन्यायमेतत्सिद्धान्त-सम्बन्धित्वेन सङ्गमयन् 'अन्तरा चापि तु तद्दृष्टेः'(३-४-३६) इति सूत्रं व्याख्याति- **अन्तरास्थितत्वमेवेति**॥ अस्मिन् पक्षे अनयोर्न्याययोर्विवरणाभावः 'सर्वथाऽपि' इत्यधिकरणमुत्तराधिकरणान्तर्भावेनापि योजयितुं शक्यत इति सूचनाय। अत एव सुधायामत्र युगपत् सूत्रद्वयमुदाहृतम्।

सूत्रक्रमः

अत्राऽद्ये सूत्रे देशकालगुरूपसत्तिश्रवणाद्यनेकोत्साहेऽपि त एव सात्त्विकजीवा एव ज्ञानं प्राप्नुवन्ति। तेष्वप्यवान्तरविशेषोऽस्ति। नेतरे जीवाः। उभयस्मिन्नप्यर्थे समप्रयत्नयोरिन्द्रविरोचनयोर्मध्ये इन्द्रस्यैव सम्यग्ज्ञान-प्राप्तिर्नेतरस्येति दर्शनरूपलिङ्गात्। दुर्योग्यतायाः ज्ञानप्रतिबन्धकत्वम्। सद्योग्य-तायाश्च तदानुकूल्यमिति सिद्ध्यतीत्यधिकरणार्थे लिङ्गरूपसाधकोक्तिः।

दुर्योग्यताया अभिभवसम्भावनया ज्ञानस्यान्यगामित्वे शङ्किते द्वितीय-तृतीयाभ्यां श्रुतिप्रमाणेन तन्निवारणम्। तत्राऽद्ये चशब्द एतच्छङ्कानिराकरण-समुच्चितस्यैव लिङ्गस्य विवक्षितार्थसाधकत्वाद् युक्तः। तृतीयेऽपिशब्दः 'मध्यम-मनुष्याणाम्' इत्यध्याहारं सूचयति। अन्तरेति पदमन्तरास्थिततत्वोपलक्षकम्। चशब्द एवार्थः। मानवानां सम्यग्विपरीतज्ञानयोरन्तरास्थितत्वमेव मिश्र-ज्ञानित्वमेव। न काचित् तत्स्वरूपाभिभवेन सम्यग्ज्ञानादिप्राप्तिः। तुशब्दात् तेष्वप्यवान्तरविशेषोऽस्ति। दाढर्यदृष्टेः। नित्यसंसारिणां सात्त्विकतामसजीववद् भोगप्रदेशक्लृप्तिर्नास्तीति विशेषसूचनाय योगविभागः[१]।

यामेव योग्यतां सिद्धां कृत्वा ज्ञानस्यान्यगामित्वनिषेधस्त्रिसूत्र्या कृतः तस्यां चतुर्थे स्मृतिरूपप्रमाणोक्तिः। एतत्प्रमाणसमुच्चितस्य लिङ्गस्य विवक्षितार्थ-साधकत्वात् समुच्चयार्थोऽपिशब्दः।

एवं चतुःसूत्र्या कण्टकोद्धारेण[२] लिङ्गाख्यप्रमाणमुक्त्वा भगवदनुग्रह-सदसद्भावाभ्यां च ज्ञानस्य देवेष्वेवोदयः नेतरेष्विति पञ्चमेनोच्यते। तत्र 'द्रव्यं कर्म च कालश्च' (स्मृतिः) इत्यादेरसुरेष्वपि भगवदनुग्रहप्रतीतेः विशेषेत्युक्तम्।

ननु योग्यतादेः सर्वस्य परमेश्वराधीनत्वात् तत्तत्स्वभावत्वेन प्रमितामपि योग्यतां यदि कदाचिदन्यथा कुर्यात् तदोक्तनियमभङ्गः स्यादेवेति चेन्न। यदि कदाचिद् देवसम्बन्धिनीं योग्यतामसुरेषु कुर्यात् तदा देवान् द्वेष्टि, असुरान् प्रति तुष्यतीति स्यात्। नचैतद् युक्तम्। 'शृण्वे वीर' (ऋ.सं. ६.४७.१६) इत्यादिश्रुतिषु देवेष्वनुग्रहविशेषस्यासुरेष्वाग्रहविशेषस्य च दर्शनादिति 'अपि स्मर्यते' इति सूत्रोक्ताक्षेपसमाधानज्ञापनाय तदानन्तर्यम्। अन्यथा 'अनभिभवं च दर्शयति' इति सूत्रानन्तर्यमेव स्यात्।

---

१. प. योग्यविभागः　　२. प. कण्टकोद्धरणेन।

यद्यपि षष्ठे तत्तत्स्वभावाभिभवे देवभागादितरस्यासुरभागस्य ज्यायस्त्वरूप-लिङ्गान्यथानुपपत्त्याऽनभिभव एव साध्यत इति अनभिभवसूत्रानन्तर्यमेव युक्तम्। तथाऽपि विशेषानुग्रहसूत्रोक्तं देवेषु भगवत्प्रीतिरसुरेषु प्रद्वेष इत्यादि-प्रमेयं नोपपद्यते। देवभागस्य कनीयस्त्वात्। असुरभागस्य ज्यायस्त्वात्। नहि कनीयस्यनुग्रहविशेषः ज्यायसि प्रद्वेष इति च सम्भवति। ज्यायस्त्वादेरनुग्रहादि-कार्यत्वादिति चेन्न। अतस्त्वदुक्तादेव ज्यायस्त्वलिङ्गात् स्वरूपानभिभवः सिद्धः। ज्यायस्त्वं तु न विशेषानुग्रहं ज्ञापयति। 'तस्मान्न जनतामियात्' (ब्र.सू. भा. उ. ब्राह्मवचनम्) इति पापहेतुत्वदर्शनादित्याक्षेपसमाधानसूच-नायात्रोक्तिः। अत एव सूत्रे उच्यत इति युज्यते। नन्वेवं विशेषानुग्रहा-क्षेपसमाधानाच्चशब्दो व्यर्थ इति चेन्न। श्रुतिसूचकत्वेन भाष्ये व्याख्यातत्वात्। अत एवास्यान्ते निवेश इति सूत्रक्रमो द्रष्टव्यः।

सङ्क्षेपभाष्यस्य एतदधिकरणपरतया योजना

एतदधिकरणतात्पर्यमुक्तम्- **विशेषस्तु ज्ञाने स्यादुत्तरोत्तरम् इति**॥ ब्रह्मज्ञाने जनयितव्ये उत्तरोत्तरं योग्यताविशेष एव प्रयोजको न प्रयत्न इति योजना-सम्भवात्।

॥ इति उभयलिङ्गाधिकरणम्॥ ९॥

॥ अथ आधिकारिकाधिकरणम् ॥ ६ ॥

सूत्रभाष्यम्

॥ ॐ न चाधिकारिकमपि पतनानुमानात् तदयोगात् ॐ ॥
॥ ३-४-४१॥

नच परमात्मैश्वर्यादिकमाकाङ्क्ष्यम् । ब्रह्मादीनामपि नाऽकाङ्क्ष्यं, किमु परस्येति सूचयितुमपिशब्दः । चशब्दस्तु ज्ञानार्थिनां पूर्वोक्तादित्थम्भावान्तरसूचकः । अयोग्यमारोढुं[1] प्रयतन् प्रपतन् हि दृश्यते । एवमयोग्यस्य परमात्मैश्वर्यस्य ब्रह्मादिपदस्य चाऽकाङ्क्षायां[2] पतनमनुमीयते ।

'न देवपदमन्विच्छेत् कुत एव हरेर्गुणान् ।
इच्छन् पतति पूर्वस्मादधस्ताद् यत्र नोत्थितिः ॥' इति ब्रह्माण्डे ।

'स्वकीयमिच्छमानं तु राजाद्याः पातयन्ति हि ।
एवमेव सुराद्याश्च हरिश्च स्वपदेच्छुकम्[3] ॥'

इत्याद्यनुमानरूपवाक्याच्च । 'मायाभिरुत्सिसृप्सत इन्द्र द्यामारुरुक्षतः । अव दस्यूँरधूनुथाः' (ऋ.सं.८-१४-१४) इति श्रुतिश्च[4] ॥ ४१ ॥

॥ ॐ उपपूर्वमपीत्येके भावशमनवत् तदुक्तम् ॐ ॥
॥३-४-४२ ॥

उपदेवपदं च नाऽकाङ्क्ष्यमित्येके[5] । भावशमनवद् ऋषिपदवदेव । तच्चोक्त-

१. ब. आरोढुम् २. ब. वाऽऽकाङ्क्षायाम्
३. ब. स्वपदेच्छकम् ४. ब. इति च श्रुतिः । ५. ब. नापेक्ष्यमित्येके

मिन्द्रद्युम्नश्रुतौ 'अथ यथर्षीन् प्रजापतीन्नाऽकाङ्क्षेदेवं[1] न गन्धर्वान्न विद्याधरान्न सिद्धान्' इति । बृहत्संहितायां च

'न दैवानभिकाङ्क्षेत कुत एव हरेर्गुणान् ।
प्राजापत्यान्न चाऽऽर्षांश्च गान्धर्वादीनपि क्वचित् ।
ऋष्यादिषु विशेषे तु दोषो नैवाविशेषतः[2] ॥'

इति विशेषदर्शनार्थमेक इत्युक्तम् ॥ ४२ ॥

॥ ॐ बहिस्तूभयथाऽपि स्मृतेराचाराच्च ॐ ॥
॥३-४-४३ ॥

देवर्षिगन्धर्वादिपदेभ्योऽन्यत्र शुभविषय आकाङ्क्षायामनाकाङ्क्षायां च न पतनम् ।

'देवर्षिगन्धर्वाणां पदाकाङ्क्षी[3] पतेद् ध्रुवम् ।
अन्यत्र शुभमाकाङ्क्षन्न पतेदविरोधतः ॥' इति स्मृतेः ।
'नानात्वमेव कामानां नाकामः क्व च दृश्यते ।
अतोऽविरुद्धकामः स्यादकामस्तेन भण्यते ॥'

इत्याचाराच्च ॥ ४३ ॥

॥ इति आधिकारिकाधिकरणम् ॥ ६॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र भगवत्प्राप्तिसाधनज्ञानस्य देवादिपदाकाङ्क्षाशून्यैरेव प्राप्यत्वमहिम्नो

१. ब. न काङ्क्षेदेवम् २. ब. नैवाविशेषितः ३. ब. पदाकाङ्क्षः

वर्णनादस्ति शास्त्रादिसङ्गतिः। अन्यथा यागाद्यतिशयासिद्धेरेतत् साध्यम्। देवादिषु नियतं ज्ञानं तदन्यैर्न प्राप्यमित्युक्तम्। तत्सङ्गतं देवतापदं विषयः। किमन्यैः प्राप्यं न वेति सन्देहः। लोकदृष्टिरतीताधिकरणन्यायश्च सन्देहबीजम्।

पूर्वपक्षः

देवतापदमन्यप्राप्यमिति पूर्वः पक्षः। 'स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरिञ्चतामेति' (भाग. ४.२४.२९) इत्यादेः देवत्वस्य स्वाभाविकत्वान्नान्यैस्तत्प्राप्यमिति चेन्न। प्रयत्नसाध्यत्वश्रवणात् तस्य स्वभावत्वानुपपत्तेः। यद्धि चेतनेषु चेतनत्वं तदेव स्वाभाविकम्। तच्च सर्वेषां सममेवेति न कश्चिद् देवत्वादिः स्वभावः। किं बहुना? प्रयत्नेन भगवदैश्वर्यमपि प्राप्तुं शक्यते किमु देवपदमित्यतो ज्ञानमप्ययोग्यप्राप्यमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **नचेति**॥ यदुक्तं देवतापदं भगवदैश्वर्यं चान्यैः प्राप्यमिति, न तद् युक्तम्। तदाकाङ्क्षाया एवायोगेन तत्प्राप्तेर्दूरोत्सारितत्वादिति भावः। सूत्रे ब्रह्मादिपदानाकाङ्क्षैवोच्यतेऽतःकथं न परमात्मैश्वर्यादिकमाकाङ्क्ष्यमिति भाष्यत इत्यत आह- **ब्रह्मादीनामिति**॥ ननु एतत्प्रतिपादनं न पादसङ्गतमित्यत आह- **चशब्दस्त्विति**॥ ननु भगवदैश्वर्याद्याकाङ्क्षायोगः कुत इति तत्राऽह- **अयोग्यमिति**॥

अत्रायं प्रयोगः। ब्रह्मादिपदाकाङ्क्षावान् पतति। अयोग्यारोहप्रयत्नवत्त्वात्। अयोग्यवृक्षारोहप्रयत्नयुक्तवदिति। इच्छाया अपि प्रयत्नविशेषत्वाङ्गीकारान्नासिद्धिः। नच जीवानां चैतन्यमेव निजस्वभाव इत्ययोग्यत्वविशेषणासिद्धिः। 'देवासुरनरत्वाद्या जीवानां तु निसर्गतः' इति वचनात्।

प्रयत्नस्य स्वभावाभिव्यक्तिहेतुत्वान्निर्मूलानुमानं न मानमिति तत्राऽह- **नेति**॥ यत्र पतितस्य।

नन्वयोग्यारोहप्रयत्नस्य पतनकारणत्वेऽपीच्छामात्ररूपस्य तददर्शनान्न तावन्मात्रं बाधकमित्यत इच्छाया अपि पातकारणत्वं स्मार्तानुमानेन दर्शयति- **स्वकीयमिति**॥ अयमत्र प्रयोगः। विमतो देवादिभिः पात्यते। अशक्यतत्पदेच्छुत्वात्। राजपदेच्छुवदिति। अत्र मूलभूतां श्रुतिं चाऽह- **मायाभिरिति**॥ हे परमेश्वर त्वं कुविद्याभिरुत्तमत्वं प्राप्तुमिच्छतः स्वर्गमारोढुं चेच्छतो दस्यूनन्धे तमस्यवाक्षिप इत्यर्थः॥४१॥

देवतापदं नाऽकाङ्क्ष्यमित्यस्य कैमुत्येन समर्थनम्

कैमुत्येनापि देवतापदाकाङ्क्षाऽयोगं समर्थयत् सूत्रं पठित्वा व्याचष्टे- **उपेति**॥ यदा मुनीनां देवानामुपवर्तमानानां गन्धर्वादीनामपि पदं नाऽकाङ्क्ष्यं किमु तदा वाच्यं देवपदं नाऽकाङ्क्ष्यमिति। ऋष्यादिपदाकाङ्क्षायोग एव कुतः? श्रुतेरेवेति भावः। ऋषीनित्यार्षानित्यादि ज्ञेयम्। मुनिपदस्य दृष्टान्तत्वेनोक्तिः श्रुत्यनुसारेण। सूत्रद्वयार्थे स्मृतिं दर्शयंस्तच्छेषं प्रमाणीकृत्यैक इत्यस्याभिप्रायमाह- **बृहदिति**॥ 'अहं कश्चिद् ऋषिः स्याम्' इत्यविशेषाकाङ्क्षायां न विरोधः। 'वसिष्ठः स्यां, विश्वामित्रः स्याम्' इति विशेषाकाङ्क्षायामस्त्येव दोष इति देवादिपदेभ्यो मुन्यादिपदाकाङ्क्षायां विशेषज्ञापनायैक इत्युक्तम्। नत्वेकस्मिन्नेव विषये विप्रतिपत्तिसूचनार्थमन्यतरस्याऽनिर्धारितत्वाद् वस्तुविकल्पासम्भवाच्चेति भावः॥ ४२॥

ज्ञानभक्त्यादिविषये आकाङ्क्षायामनाकाङ्क्षायां वा दोषो नास्तीति निरूपणम्

यथा देवादिपदं नाऽकाङ्क्ष्यमेवं ज्ञानभक्त्यादिकमाकाङ्क्ष्यं न वेति सन्देहं पराकुर्वत् सूत्रं पठित्वा व्याचष्टे- **बहिरिति**॥ आकाङ्क्षायामनाकाङ्क्षायां चेत्यनियमसूचनम्।

ननु 'विहाय कामान् यः सर्वान्' (भ.गी. २.६९) इति सर्वकामप्रहाण-विधानात् कथं शुभकामे न पतनमित्यत आह- **नानात्वमिति ॥** पुमानविरुद्ध-कामः स्यादेव । नचाकामत्वविधिविरोधः । अविरुद्धकामित्वेनाप्यकामो भण्यते। कुतः? यतः कामानां नानात्वं विलक्षणत्वमतोऽविरुद्धत्वमेव युज्यते नत्वकामत्वमेव, तादृशस्यादर्शनादित्यर्थः। आचारवाचकं वाक्यमाचारः। अतो ब्रह्मादिपदस्य तद्योग्यैकलभ्यत्वादुक्तं युक्तमिति सिद्धम्॥ ४३ ॥

॥ इति आधिकारिकाधिकरणम्॥ ६ ॥

शेषतात्पर्यचन्द्रिका

॥ अथाधिकारिकाधिकरणम्॥ ६ ॥

॥ ॐ न चाऽधिकारिकमपि पतनानुमानात् तदयोगात् ॐ ॥

॥ ३.४.४१ ॥

एतदधिकरणप्रतिपाद्यविषयः

अनया त्रिसूत्र्या न केवलं योग्यतया ज्ञानमाप्यते। किन्तु उत्तमदेवादिपदा-काङ्क्षाराहित्येनापीतीत्थम्भावान्तरं प्रतिपाद्यत इति पादसङ्गतिर्भाष्य एवोक्ता।

अनन्तरसङ्गतिः

ननु देवत्वादिस्वभावात्मकयोग्यतायाः 'नानयोरन्यथाभावः कदाचित् क्वापि विद्यते' इत्यादिस्मृत्या इतरज्यायस्त्वलिङ्गादिना चान्यथाभावाभावप्रतीतावपि स न युक्तः। 'स्वधर्मनिष्ठः' (भाग. ४.२४.२९) इत्यादिप्रमाणेषु मनुष्याणामेव महाप्रयत्नेन विरिञ्चत्वादिप्राप्तिश्रवणात्। यद्यपि पूर्वं विश्वामित्रादिदृष्टान्तेन महाप्रयत्नेन योग्यताभिभवमाशङ्क्यानभिभवसूत्रे परिहृतम्। तथाऽपि सम्भावना-मात्रेण प्राप्तशङ्कायाः परिहारेऽपि निश्चयमूलशङ्काया न परिहारः। अत एवात्र टीकायां 'स्वधर्मनिष्ठः' इत्यादिवाक्यमुदाहृतमित्युत्थानादनन्तरसङ्गतिः।

चिन्ताक्रमः

अत्र ज्ञानं स्वोत्तमपदाकाङ्क्षावद्भिः प्राप्यं न वा। तदर्थं तथाविधाकाङ्क्षायां प्रत्यवायोऽस्ति न वा। तदर्थं देवादित्वं प्रयत्नेनायोग्येनापि प्राप्तुं शक्यं न वेत्यादि चिन्तनीयम्।

पूर्वपक्षः

विरिञ्चपदवाञ्छादि सफलं श्रूयते यदा[1] ।
[2]तदोत्तमपदे वाञ्छा कुत एव निषिद्ध्यते ॥

अस्त्वयोग्यतायाः ज्ञानोदयप्रतिबन्धकता। 'नानयोरन्यथाभावः' इत्यादि-प्रमाणात्। तथाऽपि नोत्तमपदाकाङ्क्षाया अपि प्रतिबन्धकता कल्प्या। प्रमाणाभावात्। नच देवादिपदाकाङ्क्षायाः निषिद्धत्वात् तदाकाङ्क्षा प्रतिबन्धिकेति वाच्यम्। निषेधस्याद्याप्यश्रवणात्। नच ब्रह्मादिपदाकाङ्क्षावान् पतति अयोग्या-रोहप्रयत्नवत्त्वादयोग्यवृक्षारोहप्रयत्नयुक्तवत्। अत्र हेतौ प्रयत्नपदमिच्छाया अपि प्रयत्नविशेषत्वात् साधारणमिति न ब्रह्मादिपदकाङ्क्षामात्रवति पक्षे हेत्वसिद्धिरिति पतनानुमानात् सा निषिद्धेति वाच्यम्। यद्धि चेतनेषु चेतनत्वं तदेव स्वाभावि-कम्। नतु देवत्वादिकम्। येन तदन्येषामयोग्यमिति तदिच्छोरयोग्यारोहप्रयत्नः स्यादिति हेतुगतविशेषणासिद्धेः। नच 'असुरा दैवीं न देवा आसुरीम्' इत्यादिना देवत्वादीनामपि स्वाभाविकत्वमव्यवधानेन साधितमिति वाच्यम्। 'स्वधर्मनिष्ठः' (भाग. ४.२४.२९) इत्यादिना देवत्वादेः प्रयत्नसाध्यत्वश्रवणात्। पूर्वोक्त-वचनजातं बहुकालानुस्यूतिपरं भविष्यति। निर्मूलं चेदमनुमानम्। नचानुमानस्य स्वतः प्रामाण्यमिष्टम्। किन्तु तदिच्छायामपि प्रत्यवायस्तदा स्याद् यदीष्टं न लभ्येत विपरीतं वा प्राप्येत। नचैतदुभयमस्ति। 'विरिञ्चतामेति' (भाग. ४.२४.२९) इति स्पष्टं तल्लाभश्रवणात्। तदिच्छया तमःप्राप्त्याद्यश्रवणाच्च।

---

१. म. यथा। २. म. तथा।

यदि चैवमपि कामो निषिध्यते ज्ञानादिशुभकामस्तत्कृतः सत्प्रवृत्तिश्च न स्यात्। तथाच 'अग्निहोत्रादि तु तत्कार्यायैव' (ब्र.सू.४.१.१६) इत्युक्तिविरोधः।

किञ्च चैतन्यमेव जीवानां स्वभावः। तच्चेच्छाव्याप्तमिति तत्कामोऽवर्जनीयः। तस्मादुत्तमपदाकाङ्क्षिभिरपि ज्ञानप्राप्तौ बाधकाभावात् तदाकाङ्क्षाशून्यैरेव प्राप्यमिति नियमाभावात् कथं साधारण्यमिति पूर्वः पक्षः।

सिद्धान्तः

'न देवपदमन्विच्छेद्' इत्यादिवचनोत्थितात्।
अनुमानात् तदिच्छायाः पातित्यं पुरुषोऽश्नुते॥
स्वधर्मनिष्ठो वैरिञ्चं पदमाप्नोति पूरुषः।
इत्यादेर्ऋजुयोग्यैकगोचरत्वादबाधितात्॥
ज्ञानादिशुभकामे तु पातित्यं नैव जायते।
चेतनत्वादकामत्वं नैव स्यात् पुरुषे कचित्॥
इत्यादिमानबलतो व्यवस्थाश्रयणात् कथम्।
तत्पदाकाङ्क्षया दोषो न भवेत ततः कथम्॥
देवत्वादिकमस्य स्याद् वैष्णवं पदमेव वा।
तस्मादेवंविधाकाङ्क्षाशून्यैरेवाऽप्यते मतिः॥

इति सिद्धान्तः।

टीकायां पूर्वपक्षीयनिजस्वभावन्यायविवरणस्य व्याख्यानम्

टीकाक्षरार्थस्तु- निजस्वभाव इत्युक्तन्यायं विवृण्वत्

'नच सर्वजीवानामेकप्रकार एव निजस्वभावश्चैतन्यमिति फलेऽप्यविशेषः।'

इति वाक्यमेतदधिकरणसङ्गतत्वेनाप्यावृत्त्या योजयति- **यद्धि चेतनेष्विति**॥ निजस्वभाव इत्यस्यार्थः- **स्वाभाविकमिति**॥ एकप्रकार एवेत्यस्यार्थः- **सर्वेषां सममेवेति**॥

टीकायां सिद्धान्तीयविभक्ततान्यायविवरणस्य व्याख्यानम्

'निषेधसामान्यविधिक्रियाणां विभक्तता' इत्युक्तन्यायं विवृण्वत्

'निषेधसामान्यविधिक्रियाणां विभक्तत्वात्। "नादेवो देवपदमन्विच्छेदन्विच्छन् यात्यधरं तमः। न देवः[१] स्वीयपदमन्विच्छन् विदुष्यति तदेव ह्यस्य स्वम्" इति निषेधविभागः। "स्थिरं ज्ञानं स्थिरो हरावभिषङ्गः[२] स्थिरमोजो बलं विराग एतद्धि सामान्यं देवानाम् अथान्येषामस्थिराण्येवैतानि सर्वाणि अथापि यथायोगं विनेयानि" इति सामान्यविभागः। "ज्ञानदानमेव देवानां विहितं तप एवर्षीणाम् आचार एव मनुष्याणाम्। तदविरोधेनान्यानि करणीयानि" इति विधिविभागः। "चरन्ति देवा विहितं समस्तमर्धमेव मुनयो दशांशतो मनुष्याः" इति क्रिया-विभागः।'

इति वाक्यमेतदधिकरणसङ्गतत्वेनाप्यावृत्त्या 'न देवपदमन्विच्छेत्' इत्यादिभाष्यं न्यायविवरणोदाहृतवचनोपलक्षणमित्यभिप्रेत्य भाष्येण सहैवावतारयति- **निर्मूलानुमानमिति**॥ **तत्राऽहेति**॥ निगदव्याख्यानमेतद्विवरणम्।

परोक्ताश्रमकर्माधिकरणम्

अन्ये तु 'विहितत्वाच्चाऽऽश्रमकर्मापि' (ब्र.सू. ३.४.३२) इत्यारभ्य 'स्वामिनः फलश्रुतेः' (ब्र.सू. ३.४.४४) इत्यतः प्राक्तनानि द्वादशसूत्राणि अधिकरण-पञ्चकम्। तत्राऽऽद्यं सूत्रचतुष्टयमेकमधिकरणम्। 'सर्वापेक्षा च' (ब्र.सू. ३.४.२६) इत्यत्राऽऽश्रमकर्मणां विद्यासाधनत्वमवधारितम्। इदानीं तु किं मुमुक्षोराश्रमनिष्ठस्य विद्यामकामयमानस्य तान्यनुष्ठेयानि उत नेति चिन्त्यते। तदर्थं 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' (बृ. ६.४.२२) इत्यादिवाक्यं विविदिषायां यज्ञादीन् विनियुङ्क्ते न वेति संशयः।

अवश्यम्भावनावश्ये नैकत्रस्तो विरोधतः।
वस्तुनिष्ठविरोधो न वचनेनापनीयते॥

---

१. म. 'स्वीयं पदम्' २. म. हरावभिष्वङ्गः

आश्रमकर्माणि यावज्जीवादिश्रुतिभिर्नित्यं समीहितोपात्तदुरितक्षयहेतुतयाऽवश्यकर्तव्यानि विहितानि। तानि च विविदिषन्तीतीच्छार्थतया न विनियोक्तुमर्हन्ति । विविदिषायाश्चावश्यम्भावनियमाभावात् तत्साधनानामप्यनावश्यकत्वेन विरोधात् । नच यावज्जीववाक्येन यज्ञादिवाक्येन च वस्तुगतो विरोधः शक्योऽपनेतुमिति प्राप्तेऽभिदध्महे।

सिद्धे हि स्याद् विरोधोऽयं नतु साध्ये कथञ्चन।
विध्यधीनात्मलाभेऽस्मिन् यथाविधि मता स्थितिः ।।

सिद्धं हि वस्तु विरुद्धधर्मयोगेन बाध्यते । तस्य नित्यत्वेनानित्यत्वेन वा व्यवस्थितत्वेनान्यथाकर्तुमशक्यत्वात्। साध्यरूपं तु विधितः कर्तव्यमित्यध्यवसायाद् यथाविधि निष्पाद्यते । अतस्तस्य रूपं विधित एव ज्ञातव्यम् । विधितश्चाग्निहोत्रादेराश्रमकर्मणः आवश्यकत्वानावश्यकत्वयोरुभयोरपि प्रतीतेर्न विरोध इति।

तन्निरासः

तन्न । अस्य विचारस्य पूर्वतन्त्रे सङ्गतत्वेऽपीहासङ्गतत्वात् । 'खादिरं वीर्यकामस्य यूपं कुर्यात्' इत्यादिवाक्यं वीर्ये खादिरं विनियुङ्क्ते इत्यस्यार्थस्यैकस्यैवोभयार्थत्वे संयोगपृथक्त्वमित्येतस्मिन्नेवाधिकरणे पूर्वतन्त्रे सिद्धत्वेन पुनरधिकरणारम्भायोगाच्च।

भामतीमतप्रतिक्षेपः

संयोगपृथक्त्वन्यायोऽप्यत्राऽक्षिप्यत इति भामत्युक्तमसाधु। पूर्वतन्त्रसिद्धप्रमेयाक्षेपसमाधानस्योत्तरतन्त्रकार्यत्वाभावेनासङ्गतितादवस्थ्यात्। 'सर्वापेक्षा च' इत्येतदधिकरणानन्तर्यस्यैव युक्तत्वेन व्यवधानायोगाच्च।

कल्पतरुमतप्रतिक्षेपः

यथा शास्त्रान्तरविरोधाद् सर्वान्नत्ववचनं स्तुतिः एवं यज्ञादीनां नित्यत्वश्रुतिविरोधाद् विविदिषार्थत्ववचनं स्तुतिरित्यनन्तरसङ्गतिरिति कल्पतरूक्तेर्नैष

दोष इति चेत् न। ''अपूर्वत्वात् संयोगस्य विधिः परिकल्प्यते। नह्ययं यज्ञादीनां विविदिषासंयोगः पूर्वं प्राप्तः । येनानूद्येत। तस्मात् 'पूषा प्रपिष्टभागोऽदन्तको हि' इत्यादिषु चाश्रुतविधिकेष्वपि वाक्येषु अपूर्वत्वाद् विधिं परिकल्प्य पौष्णं पेषणं विकृतौ प्रतीयत इत्यादिविचारः प्रथमतन्त्रे प्रवर्तितः। तथाचोक्तम्- विधिर्वा धारणवदिति'' (ब्र.सू. ३.४.२०) इति 'शमदमाद्युपेतः स्यात्' (ब्र.सू. ३.४.२८) इत्यधिकरणस्थत्वद्भाष्ये 'यज्ञेन' इत्यादिवाक्यस्य विधायकत्वं पूर्वोत्तरतन्त्रयोः सिद्धमित्यवगमात् स्तावकत्वशङ्कोदयायोगात्। सर्वान्नत्वे तु अशक्यनिषिद्धान्नं वर्जयित्वा शक्यनिषिद्धान्नस्य रागतः प्राप्युक्तेस्तद्वचनस्य स्तुतित्वेऽपि विविदिषासंयोगस्याप्राप्तत्वेन न स्तुतित्वमिति वैषम्याच्च। कथञ्चित् पूर्वपक्षोदयेऽपि सिद्धान्तानुपपत्तेश्च । विधित एवाग्निहोत्रादेराश्रमकर्मणः आवश्यकत्वानावश्यकत्वस्वीकृतौ षोडशिग्रहणादेरिव विकल्पप्राप्तावग्निहोत्रादिपरित्यागे प्रत्यवायाभावप्रसङ्गात्। नहि षोडशिनः परित्यागे प्रत्यवायोऽस्ति। विविदिषादशायामप्यनुष्ठितस्याग्निहोत्रादेर्नित्यत्वाभावेन प्रत्यवायपरिहारार्थं पुनरनुष्ठेयत्वप्रसङ्गाच्च। गोदोहनादेस्तु नित्यचमसमात्रबाधेन नित्यप्रयोगे प्रवेशेन तद्घटितप्रयोगोऽपि नित्य एवेति न पुनः कर्तव्यतापत्तिः।

यदत्रोक्तम्- नित्यप्रयोगं बाधित्वाऽनित्यप्रयोगप्रवेशात् सान्तकर्मण उभयत्राप्यविशेषेणानित्यप्रयोगेऽपि नित्यप्रयोगस्य प्रसङ्गतः सिद्धेर्न प्रयोगावृत्तिप्रसङ्ग इति कल्पतरूक्तेर्नैष दोष इति। तदिदमसमीक्षितवचनम्। सान्तकर्मणोऽग्निहोत्रस्योभयत्राप्यविशेषेऽपि कुण्डपायिनामयनाङ्गप्रयोगेऽपि नैमित्तिकाग्निहोत्रप्रयोगस्य प्रसङ्गतः सिद्ध्यापत्त्या पुनःप्रयोगाभावप्रसङ्गात् । कर्मकाण्डविहितस्याग्निहोत्रादेः 'यज्ञेन' (बृ. ६.४.२२) इत्यादिब्रह्मकाण्डस्थवाक्येन विविदिषासंयोगासम्भवेन मासाग्निहोत्रादिवत् प्रकारान्तरवशेन नैमित्तिकाग्निहोत्रादिषु भिन्नत्वावश्यम्भावेन विधित एवाग्निहोत्रादेरावश्यकत्वानावश्यकत्वोक्त्ययोगाच्च।

यदत्रोक्तम्- यत्र कर्मैव धातुनोपादायाऽऽख्यातेन विधीयते- यजति ददाति जुहोतीत्यादौ तत्रैव विधेः कर्मविधायकत्वं स्वभावः[१]। इह तु यज्ञादिवाक्ये धातोरश्रवणेन विधायकाख्यातस्य विविदिषन्तीति सुब्धातूत्तरमेव श्रवणात् कथमस्य वाक्यस्य कर्मान्तरविधायकत्वसम्भव इति।

तन्न। विविदिषायाः फलत्वेन तत्र श्रूयमाणोऽप्याख्यातः विधातुमसमर्थः सन् तत उत्तीर्णो यज्ञादौ सङ्क्रममाणस्तद्विधायक इत्यङ्गीकारे बाधकाभावात्। 'यज्जुहोति तदाहवनीये' इति वाक्यस्येव 'यज्ञादिना विविदिषां भावयेत्' इत्यस्य वाक्यस्य कल्पनोपपत्तेश्च। विविदिषाभाव्यत्वानुपपत्तेरिच्छाविषयत्वानुपपत्तेश्च नुत्यर्थत्वग्रहणेन त्वयैव परिहृतत्वाद् इति।

परेषामधिकरणे विहितत्वाच्चेति प्रथमसूत्रव्याख्यानपरीक्षा

एतेन 'यावज्जीवमग्निहोत्रं जुहोति' इत्यादिना विहितत्वाद् अग्निहोत्राद्याश्रम-कर्माणि विविदिषाशून्येनापि कर्तव्यानीत्याद्यव्याख्यानं न साम्प्रतम्। अध्याहार-प्रसङ्गात्। चशब्दवैयर्थ्याच्च। नित्यकर्माणीति निर्देशापाताच्च।

परेषां सहकारित्वेन चेति द्वितीयसूत्रव्याख्यानपरीक्षा

आश्रमकर्मणः विद्यासहकारित्वेनाङ्गीकृतत्वेन च विद्यार्थिनाऽपि कर्तव्यम्। अतो विद्यासाधनत्वमपि न त्यक्तं भवतीति 'सहकारित्वेन च' इत्यनन्तर-सूत्रव्याख्यानं स्वसिद्धान्तविरुद्धम्। तथाहि। आश्रमकर्मणः विद्यासहकारित्वं नाम विद्याकार्ये तदपेक्षितत्वम्। स एव हि स्वकार्ये सहकारिणमपेक्षते यस्तु विहितः। इह च विद्या न विहितैव। श्रवणमनननिदिध्यासनसाक्षात्काररूपाणां चतसृणामपि विद्यानां पुरुषप्रयत्नागोचरत्वेन विधानानुपपत्त्या प्रथमसूत्रे एव 'द्रष्टव्यो निदिध्यासितव्यः' इत्यादेर्विधिस्वरूपार्थवादत्वेन विधित्वाभावस्य

१. म. स्वभावतः।

त्वयैवोक्तत्वात्। विद्योत्पत्तिसाधनत्वं विद्यासहकारित्वमिति चेन्न। अपदार्थ-त्वात्। विद्यासाध्यफले कर्मणोऽपि निर्वाहकत्वाभावे[१] सहकारित्ववचनस्य रिक्तत्वाच्च। 'सहैव दशभिः पुत्रैर्भारं वहति गर्दभी' इत्यादौ सत्स्वेव दशसु पुत्रेषु गर्दभ्येव भारवाहिकेति [२]गर्दभीकार्यभारवाहनक्रियानिर्वर्तकत्वाभावेऽपि सत्त्वमात्रेणैव पुत्राणां सहकारित्वव्यपदेशदर्शनान्नैष दोष इति भामत्युक्त-मयुक्तम्। 'सहैव दशभिः पुत्रैः' इत्यत्र सहभावमात्रस्य श्रुतत्वेऽपि सहकारित्व-स्याश्रवणात्। श्रवणेऽपि वा गर्दभीकार्यसदृशभारनिर्वहणक्रियानिर्वर्तकत्वस्य पुत्राणामपि सम्भवात्। असम्भवे वा भारनिर्वहणकाले सहभावमात्रेण सहकारि-त्वव्यपदेशोपपत्तावपीह विद्याकाले मिथ्यात्वेनाऽवेदितानां कर्मणां त्वन्मते सहभावस्याप्यनङ्गीकाराच्च। 'सर्वापेक्षा च' इति सूत्र एव विद्यासाधनत्व-स्योक्तत्वेन पुनः सूत्रवैयर्थ्याच्च।

परेषां सर्वथापीति तृतीयसूत्रव्याख्यानपरीक्षा

आश्रमकर्मत्वपक्षो वाऽस्तु। विद्यासहकारित्वपक्षो वाऽस्तु। सर्वथाऽपि पक्षद्वयेऽपि त एवाग्निहोत्रादिधर्मा अनुष्ठेयाः। उभयलिङ्गात् 'तमेतं वेदानुवचनेन' इति श्रुतेः। 'अनाश्रितः कर्मफलं कार्यं कर्म करोति यः' (भ.गी.६.१) इति स्मृतेश्च- इति तृतीयस्य व्याख्यानं सूत्रत्वघातकम्। नह्युक्तमेवार्थं सूचयतः सूत्रत्वं भवति। उभयलिङ्गशब्दस्य श्रुतिस्मृतिपरत्वेन च व्याख्यानं शास्त्राभिनिवेश-कौशलमाविष्करोति। 'आश्रमकर्मापि' इत्यनुवर्तमाने 'त एव' इतीह निर्देशा-योगाच्च। अवधारणस्वारस्याभावाच्च। 'त एव' इत्यवधारयन्नाचार्यो मासाग्नि-होत्रादिस्थल इव कर्मभेदशङ्कां निवर्तयतीति भाष्योक्तस्वारस्यं तु प्रागेव निरस्तम्।

१. क. निर्वाहकत्वाभावेन २. क. गर्दभ

परेषाम् अनभिभवमिति चतुर्थसूत्रव्याख्यानपरीक्षा

'रागादिभिः क्लेशैः एष ह्यात्मा न नश्यति यं ब्रह्मचर्येणानुविन्दते' (छा.उ. ८.५.३) इति श्रुतिः सहकारित्वस्यैवोपोद्बलकमनभिभवं च लिङ्गं दर्शयतीत्यन्तिमव्याख्यानं तु स्पष्टं सूत्रवैयर्थ्यं दर्शयति । अनभिभवशब्दस्य नाशे प्रयोगाभावात्। द्वितीयानन्तर्यापाताच्च।

अयोग्यानां भगवत्साक्षात्कारो नास्तीति ज्ञानमाहात्म्यप्रतिपादनस्यावश्यकर्तव्यस्याकरणाच्चात्यन्तमयुक्तं परकीयमधिकरणम्।

उभयोर्विधुराधिकरणशरीरम्

'अन्तरा चापि तु तद्दृष्टेः' इत्यादिचतुस्सूत्रीमुभयेऽप्येकमधिकरणं व्याचक्षते। विधुरादीनां द्रव्यादिसम्पद्रहितानां चान्यतमाश्रमप्रतिपत्तिहीनानामन्तरालवर्तिनां किं विद्यायामधिकारोऽस्ति न वेति संशये-

अप्यनाश्रमकर्मभ्यो ब्रह्मविद्या भवेद् यदि।
बह्वायासेषु वैयर्थ्यं स्यात् तदाश्रमकर्मसु॥

इति प्राप्तेऽभिधीयते -

तपोऽनशनदानेभ्यो जपाच्च ब्रह्मबोधनम्।
भवान्तरीययज्ञाच्च स्यादनाश्रमिणामपि॥ इति।

तन्निरासः

तन्न। अधिकारचिन्तनस्येहासङ्गतत्वात्[१]।

यदि विद्यासहकारिण्याश्रमकर्माणि हन्त तर्हि विधुरादीनामनाश्रमिणां विद्यासहकार्याश्रमकर्माभावाद् विद्यायामनधिकारः स्यादित्युत्थानादत्रापि सङ्गतमिदमधिकरणमिति भामत्युक्तमयुक्तम्। 'शमदमाद्युपेतः स्यात्' (ब्र.सू. ३.४.२८) इति पूर्वत्र शमदमादेरवश्यानुष्ठेयत्वप्रतिपादनेन तेषां तैरेव विद्योत्पादेन पुनश्शङ्कानुदयात् । नच शमदमादयोऽप्याश्रमधर्माः । 'एवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवाऽत्मानं पश्येत्' (बृ. ६.४.२३) इत्यादेरविशेषेण श्रवणात् । तत्राधिकारिविशेषकल्पने आश्रमान्तरलोपः स्यात् । 'सर्वापेक्षा च' इत्यत्रैव कर्मणां विद्याङ्गत्वप्रतिपादनात् तदानन्तर्ये सम्भवत्यपि व्यवधानायोगाच्च।

१. क. सङ्गत्यभावात्।

सिद्धान्तेऽपि 'सहकारित्वेन च' (ब्र.सू. ३.४.३३) इति पूर्वसूत्रे कर्ममात्रस्य विद्याङ्गत्वमभिप्रेत्य प्रवर्तते, उताऽश्रमकर्ममात्रस्य । नाऽद्यः । निषिद्धकर्मणामपि सहकारित्वप्राप्तेः । 'विहितत्वाच्चाऽश्रमकर्मापि' (ब्र.सू. ३.४.३२) इति पूर्वसूत्रे आश्रमकर्मणामेव प्रकृतत्वाच्च। अत एवानिषिद्धकर्मपरत्वं निरस्तम्। अत एव चाऽश्रमकर्मशब्दस्य सर्वकर्मोपलक्षकत्वमप्ययुक्तम्। विहितमात्रोपलक्षणकत्वे[१] तु द्वितीयपक्षान्तर्भाव एव। नहि किञ्चिदाश्रममनुपक्रम्यैव कर्माणि विधीयन्ते । 'एवविच्छान्तो दान्तः' इत्यादीनां कर्मविधित्वाभावात् । न द्वितीयः । असङ्गतत्वात् । नह्याश्रमकर्मणां विद्यासाधनत्वे विधुराणां विद्यायामधिकारस्सम्भवति। पत्न्यादिसाध्याश्रमकर्मणामननुष्ठानात्।

जन्मान्तरानुष्ठितैरपि चाऽश्रमकर्मभिस्तेषामपि विद्यायामधिकारः सम्भवतीत्यत्र भाष्योक्तं समाधानमसाधु । जन्मान्तरानुष्ठितैरुपनयनादिभिः शूद्राणामपि वेदविद्याधिकारसम्भवात्[२] । जन्मान्तरीयकर्मानुष्ठानशङ्कयाऽपीह जन्मनि कस्यापि विद्यार्थिनः कर्मानुष्ठानाभावप्रसङ्गाच्च।

'विविदिषोपहारेण कर्माणि विद्यामुत्पादयन्तीत्युक्तम्[३]। न सर्वेषां स्वतःसिद्धविविदिषाऽस्ति । किन्तु पुरुषधौरेयाणामेव केषाञ्चित् । तथाचोत्पन्नविविदिषाणां कर्मानुष्ठानवैयर्थ्येऽप्यनुत्पन्नविविदिषाणां कार्यादर्शनादेव

१. क. उपलक्षकत्वे २. म. वेदविद्याधिकारप्रसङ्गात् ३. क. इत्ययुक्तम्

जन्मान्तरेऽपि कर्म नानुष्ठितमिति निश्चयात् कर्तव्यमेव कर्मेति न केनाप्यननुष्ठितिप्रसङ्गः' इति भामत्युक्तं न रम्यम्। उत्पन्नविविदिषाणामपि यज्ञादीनां नित्यतया प्रत्यवायपरिहारार्थत्वेनावश्यानुष्ठेयत्वस्य 'विहितत्वाच्चाऽऽश्रमकर्मापि' इत्यत्र निर्णीतत्वात्। सच्छूद्रादीनामिह जन्मनि विविदिषातिशयदर्शनेन जन्मान्तरीयाश्रमकर्मानुष्ठाननिश्चयसम्भवेन विधुराणामिव तेषामप्यधिकारसम्भवाच्च। प्रतिषेधसद्भावान्नैवमिति चेन्न। प्रतिषेधसद्भावेनैव विधुराणामप्यधिकारासम्भवेन जन्मान्तरीयाश्रमकर्मानुष्ठानकल्पनाऽयोगात्।

पराभिमतस्यान्तरासूत्रार्थस्य निरासः

एतेन ये पुनराश्रमानन्तरा वर्तन्ते विधुरादयः तेषामन्तरा वर्तमानानामनाश्रमाणामपि[1] विद्यायामधिकारोऽस्त्येव। रैक्वाचक्नवीप्रभृतीना[2]मनाश्रमिणामपि ब्रह्मवित्त्वदर्शनादिति सूत्रयोजनं निरस्तम्। रैक्वादीनामनाश्रमित्वे प्रमाणाभावात्। नहि गार्हस्थ्यमेवाऽऽश्रमः। तथा सति 'अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः' इत्यादिना निषेधादाश्रमान्तरपरिग्रहो न[3] स्यात्। नैष्ठिकब्रह्मचर्यस्यापि विहितत्वेन तेषामनाश्रमत्वायोगाच्च[4]। तेषां विद्याधिकारदर्शनस्योक्तरीत्याऽऽश्रमित्वाङ्गीकारेणाप्युपपत्तेस्तदन्यथानुपपत्तेरसत्वाच्च।

परेषां 'अपि स्मर्यते' सूत्रव्याख्याननिरासः

एतेनैव संवर्तप्रभृतीनामाश्रमकर्मशून्यानां नग्नचर्यादौ प्रवृत्तानां महायोगित्वं स्मर्यते। अतो आश्रमकर्मरहितानामप्यधिकार इति द्वितीयव्याख्यानं निरस्तम्। 'द्रव्ययज्ञास्तपोयज्ञा ज्ञानयज्ञास्तथा परे।' (भ.गी. ४.२८) इत्यादिना तेषामपि यज्ञादिश्रवणाच्च। तत्तदाश्रमोचित[5]ग्रामैकरात्रत्वादिधर्मवत्त्वाच्च। नच नग्नचर्याया निषिद्धत्वात् ते नाऽऽश्रमिण इति वाच्यम्। 'अनाश्रमी न तिष्ठेत'

१. क. अनाश्रमिणामपि। २. म. रैक्वाचक्नवीभीष्मप्रभृतीनाम्
३. म. परिग्रहेण ४. क. अनाश्रमित्वायोगाच्च ५. म. तत्तदाश्रमोदित

इत्यादिवचनविरोधात्। संन्यासबाहुविध्यश्रवणविरोधाच्च। 'तद्दृष्टेः' इत्यनेनैव नग्नचर्यायां वर्तमानानां महायोगित्वदृष्टेरित्युक्तत्वात् सूत्रवैयर्थ्याच्च।

परेषां विशेषानुग्रहसूत्रव्याख्यानिरासः

यच्च तृतीयं 'विशेषानुग्रहश्च' इत्यपपठ्य विधुरादीनामपि पुरुषमात्रसाधारणैर्जपोपवासदेवताराधनादिभिर्विद्याया अनुग्रहः सम्भवतीति व्याख्यानं तदप्ययुक्तम्। विशेषपदविरोधात्। धर्माणां विद्योत्पादकत्वेनानुग्राहकत्वमात्रत्वाभावेनानुग्रहपदस्वारस्यासम्भवाच्च। आश्रमकर्मणामेव विद्यासाधनत्वश्रुतेः सामान्यधर्मैस्तदुत्पत्त्ययोगाच्च। तेषां जन्मान्तरानुष्ठिताश्रमकर्मास्तीति कल्प्यत इति तु निरस्तम्।

परेषाम् अतस्त्वितरत् सूत्रव्याख्याननिरासः

अतोऽन्तरालवृत्तित्वाद् इतरदाश्रमवर्तित्वं यज्ञाद्याश्रमधर्मजातं ज्यायः श्रेष्ठं विद्यासाधनम्। श्रुतिस्मृतिषु तथा प्रतिपादनलिङ्गात्[1] - इति चतुर्थवृत्तिरपवृत्तिरेव। वर्णधर्माणामेव 'जप्येनैव तु संसिद्ध्येद् ब्राह्मणो नात्र संशयः। कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते॥' इत्यादावसम्भवदाश्रमकर्मणोऽपि जपेनैव संसिद्धिश्रवणेन लिङ्गसाम्ये आश्रमधर्माणां ज्यायस्त्वायोगात्। आश्रमिणां कर्मभूयस्त्वादचिरेण विविदिषाऽन्येषां तु चिरेणैवेति युक्तं ज्यायस्त्वमिति चेन्न। यतीनां कर्मबाहुल्याभावेन ज्यायस्त्वाभावप्रसङ्गात्। नच तदिष्टम्। 'कृत्स्नभावात्तु गृहिणोपसंहारः' (ब्र.सू. ३-४-४७) इति सर्वाश्रमोत्तमत्वसाधनात्। यत्याश्रमस्य ज्ञानान्तरङ्गत्वाच्च। यत्याश्रमो हि प्रायत्यर्थः। अप्रयतत्वं हि प्रायो गृहस्थादीनामितरकर्मसूद्योगात्। तथाच कर्मणां बाहुल्यं प्रयतत्वविघातकमेवेति तस्य ज्यायस्त्वप्रयोजकत्वायोगाच्च। प्रत्युत संन्यासस्य भगवत्तोषार्थत्वेन ज्यायस्त्वाच्च। 'संन्यासे तु तुरीये वै प्रीतिर्मम गरीयसी।'

१. क. तथोपपादनलिङ्गात्

'तद्भक्तोऽपि हि यद् गच्छेत् तद्गृहस्थो न धार्मिकः' इति हि स्तूयते। नच संन्यासस्य प्रायतेर्भगवत्तोषार्थतया ज्ञानान्तरङ्गत्वेन ज्यायस्त्वे आश्रमान्तर-विलोपः। नहि कर्मकरणाद्यायासशून्ये ऋजुमार्गे सम्भवति तद्विरुद्धं मार्गमनुसरन् प्रेक्षावान् भवतीति वाच्यम्। सर्वेषां विषयेष्वलम्बुद्ध्यभावात्। नहीदृश एव बहुसुकृतपरिपाकसाध्ये पारिव्राज्येऽधिक्रियते। 'संन्यासः कोटिजन्मसु' इति श्रवणात्। आश्रमान्तरश्रवणं त्वत्राधिकारशून्यपुंविषयम्। येषामत्राधिकारिता न तेषां कर्मेति निश्चितमिति श्रवणात्।

किञ्च सर्वेषामधिकारिणां स्वस्वाश्रमविहितसाधनानुष्ठानेन जायमानाया विद्याया अद्वितीयब्रह्मात्मत्वसाक्षात्काररूपतया तत्फलब्रह्मभावरूपमुक्तेश्च तारतम्याभावेन तत्साधनानां वर्णाश्रमाणां च त्वन्मते ज्यायस्त्वकनीयस्त्वा-द्युक्त्यनुपपत्तिः।

परोक्तं तद्भूताधिकरणशरीरम्

'तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात् तद्रूपाभावेभ्यः' इत्यपपाठ्य पृथगधिकरणमन्ये व्याचक्षते। सन्त्यूर्ध्वरेतस आश्रमा इति स्थापितम्। तांस्तु प्राप्तस्य कथञ्चित् ततः प्रच्युतिरस्ति न वेति संशये पूर्वकर्मणां सम्यगनुष्ठान-चिकीर्षया रागादिवशेन वा प्रच्युतोऽपि स्यादिति प्राप्ते- 'अत्यन्तमात्मान-माचार्यकुलेऽवसादयन्' (छा. २.२३.१) इति 'अरण्यमियादिति यत् पदं ततो न पुनरेयात्' (शा.भा.उदा.श्रुतिः, पृ. ९०८) इत्यादिनियमश्रुत्यादिभ्यो न प्रच्युतिरिति सिद्धान्त इति।

तन्निरसनम्

तन्न। प्रच्युतानामपि दर्शने प्रच्युतिरस्ति न वेति संशयानुपपत्तेः। दृश्यमानाऽपि प्रच्युतिः प्रत्यवायकारिणी न वेति विमर्शार्थ इति चेन्न। विशिष्टानां विमानदर्शनेन तस्याप्यनुपपत्तेः। अत एव निर्दलत्वात् पूर्वपक्षोऽपि न युक्तः। 'आरोहवत्

प्रत्यवरोहोऽपि कदाचिदूर्ध्वरेतसां स्यादिति मन्दाशङ्कानिवारणार्थमिदमधि-करणम्' इति भामतीकारेण स्वयमेवाभिधानात्। पादसङ्गत्यभावाच्च। नह्यूर्ध्व-रेतसामवरोहे प्रामाणिके सति विद्यासाधनविचारसङ्गतिसम्भवः। ऊर्ध्वरेतसां पुनर्गार्हस्थ्यमापन्नानां सम्भवे तत्कृतयज्ञादीनां विधुरकृतवर्णमात्राश्रितधर्मवद् विद्यासाधनत्वं सम्भवति। तदसम्भवे तु नेह पादसङ्गतिस्तावदस्ति।

पूर्वत्रानाश्रमिकर्मणामपि विद्यासाधनत्वम् अनाश्रमिष्वपि विद्योपलब्धेरि-त्युक्तम्। तर्हि प्रच्युतकर्मणामपि विद्यासाधनत्वं स्यात्। नैष्ठिकत्वप्रच्युतस्यापि ब्रह्मव्यासस्य[1] ब्रह्मवित्त्वसिद्धेः। अन्यथाऽनाश्रमिकर्मणामपि विद्यासाधनत्वं न स्यात्। यथाहि 'अरण्यमियात् ततो नेयात्' इति प्रत्यवरोहनिषेधः तथा 'अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः' इति निषेधः श्रूयते। यथाऽनाश्रमित्व-निषेधातिक्रमे 'संवत्सरमनाश्रमी स्थित्वा कृच्छ्रद्वादशरात्रं चरेत्' इति प्रायश्चित्तमुपदिश्यते।

'तथा प्रच्याविता विप्राः प्रव्रज्याग्निजलादितः।
आर्द्रांशुकादि संयुज्य गृहस्थत्वं चिकीर्षवः॥
तांश्चारयित्वा त्रीन् कृच्छ्रान् त्रीणि चान्द्रायणानि च।
जातकर्मादयः कार्या मतेनाङ्गिरसेन तु॥'

'अग्निजलादिशब्देन वानप्रस्थं लक्ष्यते। ग्रीष्मे पञ्चाग्निमध्यस्थः आर्द्र-वासाश्च हैमन्ते इति तद्धर्मविधेः' इत्यादिना प्रकृतनिषेधलङ्घनेऽपि प्रायश्चित्त-मुपदिश्यते। तस्माद् विधुरकर्मवदेव प्रच्युतकर्मणामपि विद्यासाधनत्वं युक्तमिति शङ्कनात् पूर्वाधिकरणसङ्गतिः। सदलश्च पूर्वपक्ष इत्यमलानन्दोक्तमयुक्तम्। पुनर्गार्हस्थ्यमापन्नानां च।

---

१. क. वेदव्यासस्य

'चण्डालाः प्रत्यवसिताः परिव्राजकतापसाः ।
तेषां जातान्यपत्यानि चण्डालैः सह वासयेत् ॥'

इत्यादिना ब्राह्मण्यप्रत्यपगमनेन वर्णबाह्यत्वश्रवणाद् वर्णाश्रमधर्मेषु यज्ञादिष्वधिकाराभावात् । निन्दाश्रवणस्याकृतप्रायश्चित्तविषयत्वे ब्राह्मणाभासानामपि यज्ञाद्यधिकारप्रसङ्गः । एतदाच्छादनेन पूर्वपक्षे तु पुनर्निर्दलत्वानिस्तारः । नहि प्रच्युतानां पुनर्गार्हस्थ्यमापन्नानां प्रसङ्गे वेदव्यासस्य प्रसक्तिरस्ति । उत्तरकालेऽपि नैष्ठिकत्वस्यानुवृत्तेः ।

परोक्तमाधिकारिकाधिकरणशरीरम्

यच्च 'नचाऽधिकारिकमपि पतनानुमानात् तदयोगात्' इति सूत्रेण पूर्वपक्षयित्वा 'उपपूर्वमपि' इत्यनेन सिद्धान्तमभिधायाधिकरणान्तरमुक्तम् । ''यदि नैष्ठिको ब्रह्मचारी प्रमादादवकीर्येत किं तस्य प्रायश्चित्तमस्ति न वेति सन्देहे-

'आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः ।
प्रायश्चित्तं न पश्यामि येन शुद्ध्येत् स आत्महा ॥'

इत्यप्रतिसमाधेयपतनस्मरणान्नास्ति प्रायश्चित्तमिति प्राप्ते महापातकेष्वपरिगणनादप्रतिसमाधेयपतनानुपपत्तेः 'ब्रह्मचार्यवकीर्णी नैर्ऋतं गर्दभमालभेत' इति प्रायश्चित्तोपदेशाच्चास्त्यूर्ध्वरेतसामवकिरणे प्रायश्चित्तम् । नच यो वेदाध्ययनाङ्गत्वेन ब्रह्मचर्यव्रतमनुतिष्ठति, नतु यावज्जीवं कल्पयति, तमुपकुर्वाणनामकं ब्रह्मचारिणमधिकृत्येदं प्रायश्चित्तवचनम् । नतु नैष्ठिकानिति वाच्यम् । ब्रह्मचारित्वावकीर्णित्वादेरविशेषात् । प्रायश्चित्ताभाववचनं तु यत्नगौरवोत्पादनार्थम् । ततश्चाऽऽश्रमभ्रष्टस्यापि प्रायश्चित्तसद्भावेन विद्यायामधिकारसम्भवेन तत्कृतप्राणायामप्रणवजपादि विद्यासाधनम्'' इति ।

तन्निरासः

तदपि स्पष्टवचनेन प्रायश्चित्ताभावसिद्धेः, अन्यथा सर्वपतितानामप्येवं

प्रायश्चित्तसिद्धौ पतिताधिकाराभावशास्त्राणामपि यत्नगौरवार्थत्वोपपत्तेः तेषामपि विद्याधिकारादिप्रसङ्गादयुक्तम् ।

परोक्तबहिरधिकरणस्वरूपम्

यच्च ''कृतप्रायश्चित्तैरवकीर्णिभिर्व्यवहर्तव्यं न वेति संशये,

'प्रायश्चित्तेन पापानां नाशात् संव्यवहार्यता ।
तथाऽप्यव्यवहार्यत्वे प्रायश्चित्तमनर्थकम् ॥'

इति प्राप्य

'प्रायश्चित्तैर्निरस्येत पारलौकिक्यशुद्धता ।
नैष्ठिकी वचनस्यापि बाधो बालवधादिवत् ॥
बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः ।
शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न सम्पिबेत् ॥' (मनुस्मृतिः)

भोजनादिव्यवहारं नाऽचरेदित्यर्थः ।

'प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत् ।
कामतोऽव्यवहार्यस्तु वचनादिह जायते ॥' (याज्ञवल्क्यस्मृतिः)

अज्ञानतः कामतश्च कृतमेनः प्रायश्चित्तैरपैति । बालघ्नादिस्तु अव्यवहार्यो जायत इत्यर्थः । इत्यादिमनुयाज्ञवल्क्यस्मृत्याऽसंव्यवहार्यत्वमेव'' इति 'बहिस्तूभयथाऽपि स्मृतेराचाराच्च' (ब्र.सू. ३.४.४३) इति सूत्रमधिकरणान्तरमुक्तम् ।

तन्निरासः

तदपि न चतुरस्रम् । विद्यातदङ्गान्यतरनिरूपणाभावेनेहास्याविचार्यत्वात् । असंव्यवहार्यत्वेऽपि ब्रह्मविद्याधिकारस्याङ्गीकृतत्वेनेन्द्रियनिग्रहाभावादीनां पारलौकि-काशुद्ध्याधायकत्वाभावेन तन्निग्रहादेरनावश्यकत्वापाताच्च । महापातकस्य महापातकेनैवोपमेयत्वेन बालहननाद्युपपातकेनोपमानायोगाच्च ।

यदि चावकीर्णित्वाद्युपपातकमेव तदा प्रायश्चित्तेन पापनाशात् संव्यवहार्यत्वमेव। अन्यथा प्रायश्चित्तशास्त्रमनर्थकं स्यात्। बालघ्नादीनामसंव्यवहार्यत्ववचनं तु निर्दयत्वान्मामपि हन्यादिति शङ्कया प्राप्तासंव्यवहार्यत्वानुवादपरम्। अकीर्तिबाहुल्यपरं वेत्यन्यदेतत्।

रामानुजीयानां तद्भूताधिकरणस्यायुक्तत्वम्

केचित्तु पतितानां ब्रह्मविद्यायामधिकाराङ्गीकारः शास्त्रविरुद्ध इत्यन्यमतमुपेक्ष्य 'तद्भूतस्य' इत्यादिचतुष्कमेकमधिकरणं पतितानां ब्रह्मविद्यायामधिकाराभावसमर्थनार्थमित्याहुः।

तन्न। गुरुतल्पादिमहापातकिनां पतितत्वनिर्णयपूर्वकं वेदविहितयज्ञादिकर्मणि ब्रह्मविद्यायां चाधिकाराभावस्य मन्वादिभिरेव स्पष्टमुपपादितत्वेन मीमांसानपेक्षणात्। अपेक्षणे वा पूर्वतन्त्र एव मीमांस्यत्वात्।

उभयोः तद्भूतस्येति सूत्रव्याख्याननिराकरणम्

एतेन, तद्भूतस्य प्रतिपन्नोर्ध्वरेतोभावस्य नैष्ठिकाश्रमेणेति यावत्। अतद्भावः अतथाभावः अनाश्रमित्वेनावस्थानं न भवति। ततः प्रच्युतिर्न सम्पादनीयेति यावत्। 'न पुनरेयात्' (शा.भा.उ.श्रुतिः पृ. ९०८), 'आचार्येणाप्यनुज्ञातश्चतुर्णामेकमाश्रमम्। आविमोक्षाच्छरीरस्य सोऽनुतिष्ठेद् यथाविधि ॥' (शा.भा.उ.श्रुतिः पृ. ९०८) इत्यादिनियमवचनेभ्यः। 'ब्रह्मचर्यं समाप्य गृही भवेत्' (जा.४), 'ब्रह्मचर्यादेव प्रव्रजेत्' (जा.४) इत्याद्यारोहरूपवचनवत् प्रत्यवरोहरूपवचनाभावात्। शिष्टाचाराभावाच्च। एवं नियमात् तद्रूपाभावाच्चेत्येतेभ्यो हेतुभ्योऽतद्भावो नेष्यते। तथा तेषां नैष्ठिकादीनां रूपाणि वेषाः धर्मा इत्यर्थः। तेषामभावास्तेभ्यः शास्त्रैर्नियमात्। नैष्ठिकाद्याश्रमं प्रविष्टान् स्वाश्रमधर्मनिवृत्तिभ्यो नियच्छन्ति शास्त्राणि। 'न पुनरेयात्' (शा.भा.उ.श्रुतिः पृ.

९०८) इत्यादिशास्त्रैर्निषेधादित्यर्थः- इत्युभयोराद्यस्य व्याख्यानं निरस्तम्। नातद्भाव इत्यस्य नियमादिति पञ्चम्यन्तस्य मूलकोशेष्वदर्शनेनापपाठत्वाद् रूपशब्दस्वारस्यभङ्गाच्च।

उभयोः न चाधिकारिकमिति सूत्रार्थनिराकरणम्

यच्चाधिकारलक्षणे पूर्वतन्त्रगतषष्ठाध्याये निर्णीतम्- 'ब्रह्मचार्यवकीर्णी नैर्ऋतं गर्दभमालभेत' (शा.भा.उ.श्रुतिः पृ. ९०९) इत्यादि प्रायश्चित्तं 'अवकीर्णिपशुश्च तद्वदाधानस्याप्राप्तकालत्वात्' (जै.सू. ६.८.२१) इति सूत्रेण तदाधिकारिकमुच्यते। तदपि प्रायश्चित्तम् 'आरूढो नैष्ठिकं धर्मम्' इत्यादिपतनस्मरणान्न नैष्ठिकादीनां भवितुमर्हति। उपकुर्वाणस्य तु तादृक्पतनायोगात् तद्विषयमेवेदं प्रायश्चित्तशास्त्रम्। अतो न पतितस्य ब्रह्मविद्याधिकार इति 'नचाऽधिकारिकम्' इति सूत्रं पूर्वपक्षप्रापकम्। तथा पूर्वसूत्रोक्तानधि-काराक्षेपनिवारकं सिद्धान्तसूत्रम्। पूर्वशेषं च न पूर्वपक्षसूत्रम्। सिद्धान्तसूत्रत्वे सम्भवति तत्त्यागायोगात्। अक्षरयोजना तु पूर्ववदेव- इत्युभाभ्यां व्याख्यातम्।

तदपि न युक्तम्। आधिकारिकशब्दस्य षष्ठाध्यायोक्तप्रायश्चित्तपरत्वायोगात्। योगे वा तत्रैवास्य विचारस्य युक्तत्वात्। अपिशब्दवैयर्थ्याच्च। 'तदयोगाच्च' इति चशब्दसम्बन्धेन कथञ्चिच्चशब्दसार्थक्येऽपि व्यवधानदोषापरिहाराच्च।

उभयोः उपपूर्वमिति सूत्रव्याख्याननिरासः

यच्च 'अपि त्वेक आचार्या एतदवकिरणमुपपूर्वं पातकमेव मन्यन्ते। नतु महापातकम्। तस्मादुपकुर्वाणवन्नैष्ठिकस्याप्यशनवन्मधुमांसाशने भावमिव प्रायश्चित्तभावमेव अवकीर्णे प्रायश्चित्तसद्भावमिच्छन्ति। तदुक्तं प्रमाणलक्षणे प्रथमे- 'समा विप्रतिपत्तिः स्यात्' (जै.सू. १.३.८), 'शास्त्रस्था वा तन्निमित्तत्वात्' (जै.स. १.३.१९) इति 'न चाऽधिकारिकम्' इति सौत्राक्षेपस्य

'उपपूर्वमपि' इति समाधानम्। तथा केषाञ्चिदाचार्याणां मते प्रायश्चित्तसम्भवात् तद्रीत्या ब्रह्मविद्यायोग्यतामात्रमस्तीति मतान्तराभिधानमेवैतत्। योजना तु- तदुक्तं स्मृतिकारैः उत्तरेषां चैतदविरोधीति। गुरुकुलवासिनो यदुक्तं प्रायश्चित्तं तत्स्वाश्रमविरोध्युत्तरेषामप्याश्रमिणां भवतीत्यर्थः- इत्युभाभ्यां व्याख्यातम्।

तन्न। 'उपपूर्वमपि त्वेके भावमशनवत् तदुक्तम्' इत्यस्य मूलकोशेष्व- दर्शनेनापपाठत्वात्। तुशब्दवैयर्थ्याच्च। एवार्थत्वे त्वपिशब्दवैयर्थ्यापातात्। तस्य चार्थत्वं तु प्रकृतविरुद्धम्। नचावकीर्णादेरप्रतिसमाधेयत्वेन श्रुतस्य मधुमांसा- शनाद्युपपातकसाम्यं युक्तम्। तथात्वे वा कृतप्रायश्चित्तस्यैवोपपातकिन इवाव- कीर्णिनोऽपि कृतप्रायश्चित्तस्य संव्यवहार्यत्वोपपत्तेः। नच प्रायश्चित्तमुप- पातकिनमपि न शोधयति। तथा सति तदुपदेशवैयर्थ्यं स्यात्। तथाचाव- कीर्णादेर्महापातकत्वे प्रायश्चित्ताभावः ब्रह्मविद्यानधिकारः असंव्यवहार्यत्वं च इत्येतत् सर्वमप्यङ्गीकार्यम्। उपपातकत्वे तु प्रायश्चित्तमधिकारः संव्यवहार्यत्वं च इत्येतत् सर्वमङ्गीकार्यमिति प्रायश्चित्तमधिकारं चाभ्युपेत्य संव्यवहार्यत्व- मात्रनिराकरणेनार्धजरतीयानुपपत्तिः।

अत्रोक्तं वाचस्पतिना- 'ब्रह्मचार्यवकीर्णी नैर्ऋतं गर्दभमालभेत' (शां.भा.उ. स्मृतिः, पृ. ९०९) इत्यादिप्रायश्चित्तश्रुतिस्तावत् स्वरसतोऽसङ्कुचद्वृत्तिः ब्रह्म- चारिमात्रस्य नैष्ठिकस्योपकुर्वाणस्य चाविशेषेण प्रायश्चित्तं साक्षादेवोपदिशति। 'प्रायश्चित्तं न पश्यामि' (शां.भा.उ.स्मृतिः, पृ.९११) इति तु स्मृतिर्न श्रुतिः। तस्यामपि च 'प्रायश्चित्तं न कर्तव्यम्' इति साक्षात् तन्निषेधो नावगम्यते, 'न पश्यामि' इति तु दर्शनाभावेन सोऽनुमातव्यः। तथाच स्मृतिर्निषेधार्था इत्यनुमाय तदर्था श्रुतिरनुमातव्या। श्रुतिस्तु सामान्यविषयाऽपि विशेषमुपसर्पन्ती[1]

१. म. उपसर्पतीति

शीघ्रप्रवृत्तिरिति स्मार्तं प्रायश्चित्तादर्शनं यत्नगौरवार्थम्। अतः कृतनिर्णेजनैरपि एतैर्न संव्यवहारः कर्तव्य इति।

तन्न। उक्तरीत्या श्रुतेः प्राबल्यात् स्मृतेरत्यन्तबाधेन संव्यवहार्यत्वस्याप्यु- पपत्तेः। न हि[1] 'औदम्बरी वा सर्वा वेष्टयितव्या' इति स्मृतेर्बहुमानोत्पादनार्थत्वेन किञ्चिदवेष्टितमप्यङ्गीक्रियते। अथापि स्मृतौ यदि बहुमानस्तदा स्वकीय- दर्शनाभावमात्रेणाप्युपपत्तेर्नासंव्यवहार्यत्वपर्यन्तत्वं कल्प्यम्।

किञ्च, श्रुतिस्मृत्योः स्वभावतः प्राबल्यदौर्बल्ययोः व्यवस्थितत्वेऽपि साव- काशनिरवकाशत्वादिना वैपरीत्यं च बहुलमुपलभ्यते। श्रुतिस्तु सावकाशैव। सामान्यविषयत्वात्। 'न पश्यामि' इत्यनेन प्रत्यक्षमूलत्वं निरवकाशत्वं च स्मृतेः स्पष्टं प्रतीयते। नच तादृशो विश्वासः श्रुतावस्ति, यादृशः प्रत्यक्षे लौकिकानाम् सुतरां च योगिप्रत्यक्षे अनाशङ्कितदोषेऽधिको विश्वासः। येन हि स्वप्रत्यक्षात् परप्रत्यक्षे किञ्चिद् दौर्बल्यनिमित्तमुपलभ्यते तेन मूलश्रुत्यनुमानाभावात् स्मृतिरपि शीघ्रप्रवृत्तिरेव प्रबलमूला निरवकाशा चेति कथं प्रायश्चित्तसद्भावः।

यच्चोक्तम्- 'एके' इति सूत्रस्थेन पदेनाऽर्याणां विप्रतिपत्तिरेवोक्ता, तेनावकीर्णिनः प्रायश्चित्तसदसद्भावप्रसिद्ध्योरार्यप्रसिद्धित्वाविशेषात् साम्ये प्राप्ते 'शास्त्रस्था वा तन्निमित्तत्वात्' (जै.सू. १.३.१९) इति न्यायेन षाष्ठिकश्रुति- लक्षणशास्त्रमूला प्रायश्चित्तसद्भावप्रसिद्धिरेव भवतीति- तदपि न। षाष्ठिकश्रुतेः सामान्यविषयत्वेन दुर्बलायाः प्रत्यक्षमूलत्वनिरवकाशत्वादिना प्रबलया स्मृत्या बाधेन शास्त्रत्वायोगस्योक्तत्वात्।

किञ्च शाबरभाष्ये शिष्टानामेव मिथो विप्रतिपत्तिः केषाञ्चिद् वाक्यशेषानुगुणा केषाञ्चिदननुगुणा यत्र व्यवहारादौ तत्र वाक्यशेषानुगुणशिष्टप्रसिद्धेः शास्त्रस्थ-

१. स हि ?

त्वेन प्राबल्यमुक्तम् । नचात्र स दृष्टान्तो भवति । इह वाक्यशेषादर्शनात् । प्रायश्चित्तसद्भावप्रसिद्धेः शास्त्रमूलत्वस्य दूषितत्वेन प्रकारान्तरस्यादर्शनात् । यदि च वार्तिकरीत्या आर्यप्रसिद्धिम्लेच्छप्रसिद्ध्योः प्राबल्यदौर्बल्यप्रतिपादनपरं 'समा विप्रतिपत्तिः स्यात्' (जै.सू. १.३.८) इत्यधिकरणं व्याख्यायते तदा सुतरामिह तद्दृष्टान्तग्रहणानुपपत्तिः । 'उपपूर्वमपीत्येके' इत्युभयोरप्यार्यप्रसिद्धत्वंसूचनेन सूत्रविरोधापातात् । सर्वथाऽर्धजरतीयानुपपत्तिरुक्तैव । एतेन, योग्यतामात्र-सद्भावाङ्गीकारेण व्याख्यानं च प्रत्युक्तम् ।

उभयोः 'बहिस्तु' इति सूत्रव्याख्याननिरासः

यच्चावकीर्णस्य महापातकत्वमुपपातकत्वं वाऽस्तु । उभयथाऽपि तेऽवकीर्णिनो बहिस्तु= बहिष्कार्या एव ।

'आरूढपतितं विप्रं मण्डलाच्च विनिःसृतम् ।
उद्बद्धं कृमिदष्टं च स्पृष्ट्वा चान्द्रायणं चरेत् ॥' (शां.भा.उ.स्मृतिः,पृ. ९११)

इत्यादिस्मृतेः शिष्टानामाचाराच्च- इत्युभाभ्यां चतुर्थस्य व्याख्यानं तदपि बहिष्कार्यमेव । नतु ब्रह्मविद्यायामनधिकारिणः इत्यभिप्राये अर्धजरतीयानु-पपत्तेरुक्तत्वात् । अन्यथा तु पूर्वेण सूत्रसमूहेन गतार्थत्वाच्चायुक्तम् । नहि पतनानुमानेऽपि बहिष्कार्यत्वाभावशङ्का युक्ता । विस्तरस्तु न्यायकणिकासु द्रष्टव्यः ।

तदेवं 'विहितत्वाच्चाऽश्रमकर्मापि' (ब्र.सू. ३.४.३२) इत्यारभ्य पठितानां सूत्राणां मद्रीत्या तन्त्रान्तरासिद्धात्युपयुक्तज्ञानाधिकारतन्माहात्म्यादि-वर्णनपरत्वसम्भवे तद्वैपरीत्येन कुकविकृतिवन्न परकीयं व्याख्यानं युक्तमिति सिद्धम् ।

॥ इति आधिकारिकाधिकरणम् ॥ ६ ॥

॥ अथ फलश्रुत्यधिकरणम् ॥ ७ ॥

सूत्रभाष्यम्

॥ ॐ स्वामिनः फलश्रुतेरित्यात्रेयः ॐ ॥
॥३-४-४४ ॥

'ब्रह्मविदाप्नोति परम्' (तै.उ.२-१) इत्यादि फलं स्वामिनां देवानामेव भवति । 'यदु किञ्चेमाः प्रजाः शुभमाचरन्ति देवा एव तदाचरन्ति यदु किञ्चेमाः प्रजाः विजानते देवा एव तद् विजानते देवानां ह्येतद् भवति स्वामी हि फलमश्नुते नास्वामी कर्म कुर्वाणः' इति माध्यन्दिनायश्रुतेरित्यात्रेयो मन्यते ॥ ४४ ॥

॥ ॐ आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते ॥
॥ ३-४-४५ ॥

सत्रयागेष्वृत्विजामपि फलदर्शनादल्पं फलं प्रजानामपि भवतीत्यौडु-लोमिर्मन्यते । तदर्थं देवैः क्रियमाणत्वात् ॥ ४५ ॥

॥ॐ सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॐ॥
॥ ३-४-४६ ॥

तृतीयः स्वपक्षः । देवानां ज्ञानादिकर्मणि[१] सहकार्यन्तरत्वेन प्रजा विधीयन्ते । यथा प्रजावतो राज्ञः प्रजाः सहकारित्वेन विधीयन्ते । यथा वाऽऽचार्यस्य[२] शिष्याः ।

---

१. ब. ज्ञापनादिकर्मणि २. ब. चाऽर्धस्य

वाराहे च -

'ज्ञानादिदानं देवानां विष्णुना साधु चोदितम्।
वेदेषु[1] तेषां विहितं तत्राऽचार्यो महत्तरः॥
विहितस्सहकारित्वे सहकार्यन्तरं प्रजाः।
पातृत्वेन[2] यथा राज्ञो यथा शिष्या गुरोरपि॥
तस्माच्छ्रुतं फलं तासामाचार्याणां महत्तरम्।
ततो महत्तरं प्रोक्तं देवानामुत्तरोत्तरम्॥' इति॥ ४६॥

॥ इति फलश्रुत्यधिकरणम्॥ ७॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र भगवत्प्राप्तिसाधनज्ञानस्यास्वामिनोऽपि सन्निधिमात्रेण फलदान-महिम्नो वर्णनादस्ति शास्त्रादिसङ्गतिः। अन्यथा ज्ञानिनां मोक्षनियम इत्युक्तमयुक्तं स्यात्। अतस्तद् वर्णनीयम्। प्रकृतं ज्ञानमेव विषयः। किं देवानां फलप्रदं प्रजानां वेति सन्देहः। प्रयोजकत्वं कर्तृत्वं च सन्देहबीजम्।

पूर्वपक्षः

किं तावत् प्राप्तमिति तत्र सूत्रमुपन्यस्य व्याचष्टे- **स्वामिन इति॥** 'ब्रह्मविदाप्नोति परम्' (तै.उ. २.१) इत्यादिश्रुतिसिद्धं यद् भगवत्प्राप्त्यादि ज्ञानफलं तद् देवानामेव भवति न प्रजानाम्। कस्मात्? तेषामेवेन्द्रियादि-प्रेरकत्वेन ज्ञानस्वामित्वात्। लोके च स्वामिन एव फलदर्शनात्। नच कर्तृत्वेन प्रजानां फलम्। कर्तुरप्यस्वामिनः फलाभावदर्शनात्। नच वेतनादिरूपेण फलम्। अन्नादेर्दीयमानत्वात्। श्रुतिसिद्धं चैतत्। एवमाचार्य आत्रेयोऽपि

१. ब. वेदे च २. ब. पात्रत्वेन

मन्यत इति भावः। कुतो देवानां कर्मादिदेवानां ह्येतत् कर्मादिफलं भवतीत्यर्थः॥ ४४॥

सिद्धान्तः

एवमात्रेयमतावलम्बेन पूर्वपक्षिते सिद्धान्तयत् सूत्रं पठित्वा व्याचष्टे- **आर्त्विज्यमिति॥** न केवलं देवानामेव फलं किन्तु प्रजानामप्यस्ति। न चास्वामित्वात् फलाभावः। यथा खलु सत्रयागेष्वयजमानानामप्यृत्विजां च यज्ञफलम्। तथाऽस्वामित्वेऽपि प्रजानां ज्ञानफलसम्भवात्। नच श्रुतिमुनिमतविरोधः। प्रजानामल्पफलाभ्युपगमात्। तदभिप्रायकत्वाच्च श्रुत्यादेः। अल्पस्वे निःस्वप्रयोगदर्शनादित्यौडुलोमिराचार्यो मन्यत इति भावः। भवेदेतद् यदि प्रजानां फलाभावः सिद्ध्येत्। स एव कुत इत्यत आह- **तदर्थमिति॥** ननु ऋत्विजामस्वामित्वेऽप्यगृहीतदक्षिणत्वेन कर्तृत्वात् कथं तद्दृष्टान्तेन प्रजानां फलं सिद्ध्यतीत्यतो वाऽह- **तदर्थमिति॥** देवैरपि प्रजार्थमेव ज्ञानस्याऽपाद्यमानत्वाद् युक्तं तासां ज्ञानफलम्। तथा लोके दर्शनादिति भावः। उक्तं च- 'त्वरयैव मनुष्याणां सिद्धिरत्वरयैव तु। देवानां तत्प्रसादेन मुक्तिरेव सतां नृणाम्॥' इति॥ ४५॥

मुख्यकारणत्वेन देवानां मुख्यं फलं, प्रजानां सहकारित्वेनाल्पं फलमिति बादरायणीयमतवर्णनम्

यदि देवैः प्रजार्थं ज्ञानादि साध्यते तर्हि तत्फलं प्रजानामेव भवेन्न किञ्चिद् देवानामित्याशङ्कां परिहरत् सूत्रमुपन्यस्य व्याचष्टे- **सहकारीति॥** एतद् वक्ष्यमाणम् औडुलोमिना ज्ञातं किन्तु पक्षत्वेन तृतीयं तृतीयः पक्षः। स च भगवतो बादरायणस्य। कोऽसौ? प्रजार्थं ज्ञानसाधनेऽपि न देवानां फला-भावः। देवानां हि ज्ञानदानं कर्तव्यम्। तस्मिंश्च स्वविहिते प्रजानामनुग्रहाय सहकारित्वेन प्रजाः क्रियन्ते। अतो देवानामेव मुख्यकारणत्वान्महा-

फलम्। प्रजानां तु सहकारिमात्रत्वादल्पफलमिति। यथा खलु पालनस्य राज्ञा प्रजार्थं क्रियमाणत्वेऽपि न प्रजानामेव पालनफलम्। किन्तु राज्ञ एव मुख्यम्। तासां सहकारिमात्रत्वात्। यथाऽऽचार्येण शिष्यार्थमेव व्याख्यानस्य क्रियमाणत्वेऽपि न तत्फलं शिष्यस्यैव, किन्तु गुरोरेव मुख्यम्। शिष्यस्य सहकारिमात्रत्वात्। एवमेवात्रापि प्रजार्थं देवैर्ज्ञानस्याऽऽपाद्यमानत्वेऽपि न तासामेव फलम्, किन्तु देवानामेवेति भावः। तद्वत इत्येतत् प्रजावत इति व्याख्याय राज्ञ इति विवृतम्। अत्रैव स्मृतिमाह- वाराहे चेति ॥ श्रुतमिति ॥ यावत् तासां प्रामाणिकं तावद् भवतीत्यर्थः। अतः प्रजानामपि ज्ञानफलसद्भावादुक्तं युक्तमिति सिद्धम्॥ ४६॥

॥ इति फलश्रुत्यधिकरणम्॥ ७॥

शेषतात्पर्यचन्द्रिका

॥ अथ फलश्रुत्यधिकरणम्॥ ७॥

॥ ॐ स्वामिनः फलश्रुतेरित्यात्रेयः ॐ ॥ ३-४-४४ ॥

अत्र [1]अस्वामिनोऽपि सन्निधिमात्रेण फलवत्त्वाख्यं माहात्म्यं ज्ञानस्योच्यत इति टीकायामुक्तम्।

नन्वत्र किमिदं स्वामित्वम्? कर्तृत्वमात्रं तर्हि प्रजानामपि तदस्त्येव ज्ञानं प्रति। अन्यथा 'यदु किञ्चेमाः प्रजाः शुभमाचरन्ति विजानते' (ब्र.सू.भा.उ. माध्यन्दिनायनश्रुतिः ३.४.४४) इत्यादिकर्तृप्रत्ययप्रयोगविरोधः। यदि च स्वातन्त्र्यं तर्हि न देवानामपि तदस्ति। तथात्वे स्वातन्त्र्यस्य भगवदेकनिष्ठत्वव्याहतिः। नच साधने तद्दत्तं स्वातन्त्र्यमस्तीत्युक्तं फलनय इति वाच्यम्। तथाविधस्य प्रजानामपि सद्भावेन तत्रास्वामित्वोक्तिविरोधात्। यदि च कर्तृप्रयोजकत्वं[2] तच्च प्रेरकत्वोपकारकत्वादिमात्रं, तदा तथाविधस्वामित्वस्य

१. म. स्वामिनोऽपि २. म. कर्तृत्वप्रयोजकत्वम्

भार्यादेरपि सद्भावेन देवानामिव फलं स्यात्। यदि चेन्द्रियादिप्रेरकत्वं तदाऽग्न्यादीनामपि वागादिप्रेरकत्वेन स्वामित्वापत्त्या तदीयज्ञानफलं तत्राल्पं, तत्स्वामिष्विन्द्रादिषु महदिति व्यवस्था न स्यात्। तथा चेदृशस्वामित्वस्य फलं प्रत्यप्रयोजकतया प्रजानां फलाभावापादनानुपपत्तिः। 'लोके च स्वामिन एव फलदर्शनात्' इति टीकाविरोधश्च[1]। न हीन्द्रियप्रेरकत्वात्मकस्वामित्वं लौकिकम्।

किञ्चात्र कः सन्निधिः? यदि सहभावमात्रं तदा ज्ञानिशरीरे वर्तमानानां नाड्याद्यचेतनानामपि फलं स्यात्। ज्ञानिसहभूतपुत्रादीनां तदर्शनेन चेतनत्वविशेषणमप्ययुक्तम्। यदि च धर्मधर्मिभावस्तदा जगदाधारताप्रयोजकसम्बन्धेन ज्ञानधर्मिभूतकालादेरपि ज्ञानफलं स्यात्। कर्तृत्वगर्भधर्मधर्मिभावस्य विवक्षायां[2] तु तस्य स्वामित्वपर्यवसायित्वेन सन्निधिमात्रेणेति टीकायां मात्रशब्दव्यावृत्त्यभावः।

किञ्च कथमिदं ज्ञानस्य माहात्म्यम्? सन्निधिमात्रेण कर्मणोऽपि प्रजासु फलमल्पं देवानां तु स्वामित्वादधिकं फलमिति सिद्धान्तेऽपि स्वीकारात्। अत एव 'यदु किञ्चेमाः प्रजाः शुभमाचरन्ति' (ब्र.सू.भा.उ. माध्यन्दिनायनश्रुतिः ३.४.४४) इति कर्मण्यपि श्रुत्युदाहरणं दृश्यते।

किञ्च प्रेरकादीनामल्पं फलं, कर्तुस्तु सन्निधिमात्रेण महाफलमित्युक्तावेव ज्ञानमाहात्म्यं प्रतीयात्, नतु वैपरीत्येन। अत एव पुराणादौ प्रदीपप्रबोधादेरपि[3] साफल्यकथनद्वारा कर्तुः फलाधिक्यप्रतिपादनं दृश्यते। तत् कथं स्वामिनां फलाधिक्यकथनं न माहात्म्यविरोधि?

अत्रोच्यते। इन्द्रियादिप्रेरकत्वमेव स्वामित्वम्। तच्चाग्न्यादिष्वस्मदादि-

१. म. टीकाविरोधाच्च २. म. विवक्षणम् ३. म. परदीपप्रबोधादेः

वागादिप्रेरकतयाऽस्मदादीन् प्रत्यस्ति। इन्द्रादीन् प्रति तु तत्प्रेर्येन्द्रियादिकत्वादस्मदादेरिवास्वामित्वमप्यस्तीति तदीयज्ञानफलं तत्राल्पम् इन्द्रादावधिकमित्यादिव्यवस्था चोपपद्यते। इन्द्रियप्रेरकत्वस्यालौकिकत्वेऽपि प्रासादादिकर्तृतक्षादिशरीरादिरूपबाह्यपदार्थप्रेरकत्वस्याऽदिपदगृहीतस्य राजादौ लौकिकत्वेन टीकोक्तिरपि न विरुद्ध्यते।

यत्तु 'स्वातन्त्र्यहेतुः सूचितो भवति। यः सूत्रे स्वामिपदेनोक्तः' इति सुधावाक्यं तदिन्द्रियादिप्रेरकत्वात्मकस्वातन्त्र्यपरम्। नत्वन्यानपेक्षत्वरूपस्वातन्त्र्यपरम्। येन देवानां तन्न स्यात्। एवं सन्निधिरपि न सहभावादिमात्रम्। किन्तु यादृशेन सम्बन्धविशेषेण कर्तृत्वगर्भेण 'अयं ज्ञानी' इति व्यवह्रीयते तादृशसम्बन्ध एव। नचास्योक्तस्वामित्वपर्यवसानमस्ति। न वा मात्रपदव्यावर्त्याभावः। इन्द्रियादिप्रेरकत्वात्मकस्य स्वामित्वस्यैव तत्सम्भवात्। दन्दशूकादावुन्मत्तादौ च 'हिनस्ति', 'पूजयति' इत्यादिव्यवहारनिमित्तकर्तृत्वसम्बन्धविशेषात्मकसन्निधिमात्रेण शुभाशुभफलयोरदर्शनान्नास्य माहात्म्यं कर्मसाधारण्यम्। नचोन्मत्तादावपि ज्ञानमस्ति। परोक्षस्य कथञ्चित् सम्भवेऽपि मनोनैर्मल्यसाध्यस्यापरोक्षस्य तत्रासम्भवात्। अत एवाप्रयोजकत्वेन निश्चितसन्निधिमात्रस्यापि ज्ञानांशे प्रयोजकत्वमित्युक्तौ ज्ञानसामर्थ्यस्य पर्यवसिततया स्वामिनां फलाधिक्यकथनं न विरुद्ध्यत इत्यादि द्रष्टव्यम्। तस्माद् 'ज्ञानस्यास्वामिनोऽपि सन्निधिमात्रेण फलदत्वमहिम्नो वर्णनात्' इति साधूक्तम्।

सङ्गतिः

न केवलं ब्रह्मादीनां देवानां पारमेष्ठ्यादिस्थानं ज्ञानार्थिना नाऽकाङ्क्ष्यम्। किन्तु कर्तुरधिकफलभागित्वादिरूपं धर्मान्तरं च नाऽकाङ्क्ष्यमितीत्थम्भावान्तरप्रतिपादनाय देवानां फलाधिक्यं कर्तुश्च न्यूनत्वमत्र प्रतिपाद्यत इति वा। ननु यथाऽऽधिकारिकं पदं पतनानुमानान्नाऽकाङ्क्ष्यमेवं ज्ञानकर्मादिसाधनजातमपि

नाऽकाङ्क्ष्यम्। तत्फलस्य देवैरेव प्राप्यत्वेन तदाकाङ्क्षायामपि पतनानुमानसम्भवात्। अन्यथा पारमेष्ठ्यादिपदप्रापककर्मज्ञानाद्याकाङ्क्षायामपि पतनानुमानाभावप्रसङ्गात्। तथाच 'अन्यत्र शुभमाकाङ्क्षन्न पतेदविरोधतः' (ब्र.सू.भा.उ. स्मृतिः ३.४.४३)इत्ययुक्तमित्युत्थानाद्वाऽनन्तरसङ्गतिः।

विषयः चिन्ताक्रमश्च

अत एवैतत्पादप्रतिपाद्यमाहात्म्यवत्तया प्रकृतं ज्ञानं विषयः। देवेष्वेव फलं ददाति, उत मनुष्येष्वपीति चिन्तनीयम्। तदर्थं स्वामित्वमेव फलदानक्रियानियामकमुत कर्तृत्वगर्भधर्मधर्मिभावरूपसन्निधिरपि। तदर्थं स्वामित्वमात्रस्य नियामकत्वाङ्गीकारे साधकमस्ति, बाधकं च नास्ति। उत तद्विपरीतमिति। यदि स्वामित्वमेव नियामकं तदाऽपि स्वामित्वतारतम्यं फलतारतम्यप्रयोजकं न वेत्याद्यपरं चिन्तनीयम्।

पूर्वपक्षः

तत्र -

स्वामित्वमेव नियतं फलदाने प्रयोजकम्।
न कर्तृत्वं गृहादेर्हि फलं स्वामिनि दृश्यते॥

नच गृहादिकर्तुस्तक्षादेर्गृहादिनिर्माणप्रयुक्तं स्वामिना दीयमानं द्रविणरूपं फलं दृश्यत इति कथं कर्तृत्वमप्रयोजकम्। कथं च स्वामित्वाभावेऽपि गृहनिर्माणादिकर्मोक्तफलदं[1] दृष्टमिति स्वामित्वमेव प्रयोजकमिति वाच्यम्। नहि वयं फलसामान्यं प्रतिषेधामः। तक्षादौ वेतनारूपस्य गृहस्वामिना दीयमानफलस्यैव कर्मणि ज्ञानिनि च तत्स्वामिभिर्देवैर्दीयमानस्यान्नपानादेःफलस्याङ्गीकारात्। किन्तु तद्विवक्षितं स्वरूपानन्दाविर्भावादिरूपं तक्ष्णः

---

१. म. कर्मोक्तिफलदम्

गृहाद्युपभोगफलमिव निषेधामः। तथाचायं प्रयोगः। देवा एव स्वप्रेर्यप्रजाकृतकर्मज्ञानादिविवक्षितफलमाप्नुवन्ति। इन्द्रियादिप्रेरकत्वरूपस्वामित्ववत्त्वात्। वेतनादिना तक्षादिशरीरप्रेरकराजादिवत्। तथा प्रजाः न तत्तद्विवक्षितफलमाप्नुवन्ति। अस्वामित्वात्। तक्षादिवत्। तथा कर्मज्ञानादि न स्वामिनि फलदम्। साधनत्वात्। गृहनिर्माणादिकर्मवत्। एवं कर्मज्ञानादिफलं स्वामिन्येवोत्पत्तुमर्हति न कर्तरि। फलत्वात्। स्वर्गादिफलवत्। नहि स्वर्गादिफलं तत्साधनयागकर्तृषु ऋत्विक्षु उत्पद्यते इत्यादिः। अत्र सर्वत्र कर्मज्ञानपदाभ्यां शुभकर्मज्ञाने एव विवक्षिते। तेन देवानामशुभकर्मज्ञानाभ्यां प्रजाकृताभ्यां नरकादिफलं नास्तीत्यादिशङ्कानवकाशः। नचाऽद्ये प्रयोगे भगवति अवश्यवक्तव्यत्वादिविशिष्टविवक्षितफलप्राप्त्यभावेन व्यभिचारः शङ्कनीयः। निवारणकारणशून्यत्वे सति स्वामित्वादिति हेतुविवक्षणात्। 'असङ्गो ह्ययं पुरुषः' (बृ. ४.३.१५) इति श्रुत्यावेदितस्य पुण्यादिकृतनीचोच्चतानुभवनिवारणकारणस्यासङ्गत्वस्य भगवति सत्त्वेन विशेषणासिद्धेः।

एतेन, देवा एव स्वप्रेर्यप्रजाकृतपापकर्ममिथ्याज्ञानफलमाप्नुवन्ति। स्वामित्वात्। वेतनादिना किरातप्रेरकब्रह्महन्त्रादिवत्। तथा, प्रजाः न ब्रह्महननादिविवक्षितफलमाप्नुवन्ति। अस्वामित्वात्। तथा, ब्रह्महननादि नास्वामिनि फलदम्। साधनत्वात्। तथा, ब्रह्महननादिजन्यं निरयादिरूपं फलं नास्वामिन्युत्पत्तुमर्हति। फलत्वात्- इत्याद्याभाससाम्यमिति निरस्तम्। ईश्वरे व्यभिचारात्। निवारणकारणशून्यत्वे सति- इति विशेषणे त्वसिद्धिः। नहि देवेषु ब्रह्महननादिफलभोगनिवारणकारणं नास्ति। विचित्रतत्तत्कर्मनिमित्ततत्तज्जीवशरीरप्रवेशतत्तत्पुण्यपापेन्द्रियादिप्रेरणाद्यतिशयापादकभगवदुपासनाद्यायत्तसामर्थ्याख्यस्य तत्तद्देवाराधनसन्तुष्टस्य हरेः 'नैतद्देवान् प्रापत्' इत्याज्ञारूपस्य च कारणस्याङ्गीकारादिति पूर्वपक्षसङ्क्षेपः। यद्यप्ययं पूर्वपक्षो

भाष्यादौ न स्पष्टं प्रतीयते। वक्ष्यमाणरीत्या सूत्रभाष्ययोः सिद्धान्तपरत्वेन योजनसम्भवात्। तथाऽपि न्यायविवरणं निरवकाशमित्ययं पूर्वपक्षोऽभिमतो भाष्यकारस्य। अत एव सुधायामप्ययमेव विवृतः।

सिद्धान्तः

सिद्धान्तस्तु -

व्यभिचाराच्च देवानां ज्ञानदानफलत्वतः।
स्वामित्वं नच तन्त्रं स्यात् प्रजानामपि तत्फलम्॥

ज्ञानादिविवक्षितं फलं प्रजानां सर्वथा नास्तीत्युच्यते? किं वा सम्पूर्णं फलम्? नाऽद्यः। प्रजानां तत्र प्रवृत्त्यभावप्रसङ्गात्। नहि फलाभावे तदर्थं तत्साधने कश्चित् प्रवर्तते। यत्तु शरीररक्षणान्नपानादिसम्पत्तिरूपं फलं, न तज्ज्ञानस्य विवक्षितं फलम्। स्वरूपानन्दाविर्भावस्यैव तथात्वात्। अन्यथा 'विवृणुते तनूं स्वाम्' (मुण्ड. ३.२.३) इत्यादिश्रुतिविरोधः।

एतेन तक्षादिप्रतिबन्दी निरस्ता। तक्षादेर्गृहनिर्माणादिक्रियया वेतनाद्येवोद्देश्यं न गृहोपभोगादीति तदेव विवक्षितं प्रयोजनम्। ततश्च तल्लाभमात्रेण तस्य तत्र प्रवृत्त्युपपत्तावपीह स्वरूपानन्दाविर्भावलक्षणस्यैव फलस्य ज्ञानेनोद्देश्यत्वेन विवक्षितस्य लेशतोऽप्यभावे प्रवृत्तिस्तद्बोधकागमप्रामाण्यं च न स्यात्, इति वैषम्यात्।

किञ्च, नहि देवाः साक्षादेव राजादिर्विष्टिगृहीतपुरुषमिव बलात् प्रवर्तयन्ति। किन्तु स्वयं तदिन्द्रियेषु स्थित्वेष्टसाधनताबुद्धिमुत्पाद्यैव। 'न देवा यष्टिमादाय रक्षन्ति पशुपालवत्' इत्यादेः। तथाच कथं प्रजानां सर्वथेष्टसम्बन्धाभावः।

किञ्च, यथा सत्रयागे गृहपतिव्यतिरिक्तैः ऋत्विग्भिर्विना सत्रयागानिर्वृत्तेस्तदपेक्षावश्यम्भावेन तेषामप्यल्पं फलमङ्गीकृतं तथेहापि ज्ञानदान-

रूपयज्ञस्य प्रजाभिर्विना निर्वृत्त्यसम्भवेनावश्यापेक्षणीयत्वात् तासां ऋत्विक्त्वप्रयुक्तमल्पं फलमङ्गीकार्यमेव।

ननु सत्रेऽपि ऋत्विक्त्वप्रयुक्तं फलं मनुष्येषु नाङ्गीकार्यमेव। देवानामेव सर्वत्र ऋत्विक्त्वोपपत्तेः मनुष्येषु फलकल्पनावैफल्यात्। अत एव सोमयागे देवा एवाऽर्त्विज्ये व्रीयन्ते। 'अग्निर्मे होता आदित्योऽध्वर्युः चन्द्रमा ब्रह्मा पर्जन्य उद्गाता' इति ऋत्विक्प्रकरणे श्रवणात्। अत एव 'अग्निर्होता अश्विनावध्वर्यू त्वष्टाऽस्मिन् मित्र उपवक्ता पृथिवी होता द्यौरध्वर्युः रुद्रोऽग्निर्बृहस्पतिरुपवक्ता' (चित्तु. ३.१) इति दर्शपूर्णमासयोरग्न्यादिपृथिव्यादिदेवानामृत्त्विजां नियतत्वान्मन्त्रजपयोरपि नियतत्वम्। अत एव वैद्याः शमितार आरभध्वमुत मनुष्या इति देवशमितॄणां पशुशामित्रे प्रथमं प्रैषोऽप्युपपन्नः। नह्यार्त्विज्ये देवानां स्वातन्त्र्याभावे देवशमितॄणां प्रथमप्रैषो युज्यते। अतो देवस्वामिकयागादौ देवानामेव ऋत्विक्त्वेन मनुष्याणामनपेक्षणात् तत्फलकल्पनमप्यन्याय्यमिति चेत्।

सत्यम्। तथाऽपि मानुषर्त्विजो नाद्वारीकृत्य कुर्वन्तीति दक्षिणादानेनर्त्विजः कारयितुं कस्यचिद् यजमानस्य ऋत्विजां चापेक्षाऽस्त्येव। 'यं हि रक्षितुमिच्छन्ति बुद्ध्या संयोजयन्ति तम्' इति यत्किञ्चिद्द्वारीकरणेनैव देवानां प्रवृत्त्युक्तेः।

किञ्च, देवाः स्वफलार्थमेव प्रजाः प्रेरयन्त्युत तत्फलार्थम्। नाऽद्यः। ''देवानां 'सिद्धिरत्वरयैव तु' इत्यादिवचनविरोधात्, अत्वरया सिद्धिश्च स्वावरेभ्यः फलदानायैवेत्यङ्गीकारात्। देवान् प्रति ज्ञानादिदानविधानानुपपत्तेश्च। यदि नाम देवैर्दत्तेन ज्ञानादिना न किमपि फलं प्रजानां तर्हि तद्दानं नैव विधीयेत। नहि क्षुधितस्य कथञ्चिदप्यनुपकुर्वतः पाषाणादेर्दानं विधीयते। दृष्टानुसारिणी हि कल्पना। तस्माद् यस्य दानेन प्रतिग्रहीतुः फलमस्ति तस्यैव दानं विधेयमिति प्रजानामप्यङ्गीकार्यमेव। स्वामित्वमेव फले प्रयोजकं न कर्तृत्वमात्रम्, इति तु न

साम्प्रतम्। सत्रयागे उद्देश्यत्यागदक्षिणादानादिगृहपतिकार्यनियुक्तस्वामिभिन्नानामध्वर्य्वादीनामपि 'सप्तदशावराः सत्रमासीरन्' इत्यादिविधानान्यथानुपपत्त्या तत्फलाङ्गीकारात्। एतेन, 'देवा एव स्वप्रेर्ये'त्यादिप्रयोगाः समाहिता भवन्ति। सत्रस्थप्रजासु व्यभिचारात्।

न द्वितीयः। प्रजानां सम्पूर्णफलाभावेऽपि पूर्वोक्तदिशा ज्ञानमाहात्म्यहान्यभावेनास्माकमप्रतिपक्षत्वात्।

तत्त्वप्रदीपकृन्मतेन फलश्रुत्यधिकरणशरीरम्

समग्रसूत्रस्य पूर्वपक्षपरत्वं सूत्रकारशैलीविरुद्धम्। नचेतः प्राक् सूत्रकारो भाष्यकारो वा समस्तेन सूत्रेण पूर्वपक्षमचीक्लृपत्। तथाच 'स्वामिनः फलश्रुतेः' (ब्र.सू. ३.४.४४) इति सिद्धान्तसूत्रमेव। तद्विरुद्धः पूर्वपक्षस्तु सूत्रभाष्याभ्यां बहिरेवोन्नेय इति तत्त्वप्रदीपकृदन्यथाऽधिकरणशरीरमाह।

संशयः पूर्वपक्षश्च

तथाहि। एवमवसितो योग्यताप्रसङ्गानुषङ्गी विचारः। इदानीं तु यस्य यज्ज्ञानं जायते किं तस्यैव तत्फलम्, अथवा तत्प्रयोजकानां देवानामिति विचार्यते। तत्र प्राप्तम्। 'ब्रह्मविदाप्नोति परम्' (तै.उ. २.१) इति वचनाद् यदात्मसमवेतं ज्ञानं तस्यैव फलम्। नह्यन्य उपास्तेऽन्यः फलमश्नुते इति समञ्जसम्। नच ब्रह्मवित्पदेन ब्रह्मवेदनस्वामित्वाद् देवा एवोच्यन्त इति युक्तम्। तदितरेषां ज्ञानार्थं प्रवृत्तिर्न स्यात्। देवानां चोत्पन्नज्ञानत्वेनैतद्वाक्यनियोज्यत्वाभावात्।

ननु देवा इन्द्रियादिप्रेरका इति प्रसिद्धम्। नच तेषां फलाभावे इन्द्रियादिप्रेरणादौ प्रवृत्तिर्युज्यते- इत्यन्यथानुपपत्त्या ज्ञानप्रेरकाणां देवानां ज्ञानफलमवश्यमङ्गीकार्यमिति चेत्, प्रेरणविधीनां किमप्यदृष्टं फलमस्तीत्यङ्गीकारात्, दीपप्रबोधनाविधेरिव। ज्ञानादिफलं तु तद्वत एवाङ्गीकार्यम्। अन्यथा प्रयत्नवैयर्थ्यात्। नच कर्तुरप्यल्पं फलमस्ति, प्रेरकाणां तु महदिति वाच्यम्। दृष्टानुसारित्वात्

कल्पनायाः । अन्यथा ब्रह्मवधकर्तुरल्पमेव फलं तत्प्रेरकस्य महदित्यापातात् । नच कर्तुरधिकं फलं प्रेरकाणामिति प्रमाणपद्धतिमध्यास्त इति ।

सिद्धान्तः

अत्रोच्यते[१] । ज्ञानादिप्रवर्तकतया तत्स्वामिनां देवानामेव महत् फलम् । तत्प्रवर्त्यानां प्रजानां तदधीनज्ञानानां तदपेक्षयाऽत्यल्पफलत्वम् । नन्वस्मिन् पक्षे '"ब्रह्मविदाप्नोति परम्" (तै.उ.२.१) इत्यादिफलं स्वामिनां देवानामेव भवति' इत्यादिभाष्यमाद्यसूत्रव्याख्यानपरं कथं योज्यम् ? 'देवानामेव' इत्येवकारेण प्रजानां फलनिषेधादिति चेन्न । 'महानपि कृतो धर्मो ह्यज्ञानां निष्फलो भवेत्' इत्यादिवदल्पफलत्वापेक्षया फलनिषेधोपपत्तेः । नह्यज्ञानिनां धर्मः सर्वथा निष्फलो भवति । किन्तु सम्पूर्णफलरहित एव । अन्यथा 'देवा एव तदाचरन्ति देवा एव तद् विजानते' इति श्रौतनिषेधोऽप्यनुपपन्नः स्यात् । नह्यत्र प्रजागतं कर्म ज्ञानं च प्रतिषेद्धुं शक्यम् । प्रत्यक्षविरोधात् । 'कर्ता शास्त्रार्थवत्त्वात्' (ब्र.सू. २-३-३३) इत्यादेश्च । यदि च पराधीनं कृतं कर्म ज्ञानं च प्रजासु न निषिध्यते । किन्तु देवादाविव कर्त्रप्रैर्यं महच्च । तच्च प्रजासु नास्त्येवेति कथं प्रत्यक्षादिविरोध इति तदेहापि भाष्ये देवानामेव महत्फलमितरेषां त्वल्पमित्यस्तु ।

नन्वेवमपि 'स्वामी हि फलमश्नुते नास्वामी कर्म कुर्वाणः' इति वाक्यद्वयं कथं न विरुद्ध्यते । अतोऽस्वाम्यपि कर्ता फलमश्नुते । भृत्येष्वपि वेतनादिफलोपलब्धेः प्रत्यक्षत्वादिति चेन्न । 'अन्नवानन्नादो भवति' (तै.उ. ३.६,३.७) इत्यादाविव महत्त्वापेक्षयोपपत्तेः । अत उत्तमफलमपेक्ष्य नान्येषां फलमित्युच्यत इति सर्वत्र न विरोध इत्ययमेव सिद्धान्तः ।

एतेन, प्रजानां ज्ञानार्थं प्रवृत्तिर्न स्यादिति निरस्तम् । अल्पफलार्थमल्पप्रवृत्तेरुपपन्नत्वात् । महाप्रवृत्त्यभावस्त्विष्ट एव । नह्यन्य उपास्ते अन्यः फलमश्नुते

१. क. तत्रोच्यते

इति समञ्जसमित्यादिकोलाहलोऽपि निरस्तः । उपासकस्याल्पफलाङ्गीकारात् । 'यदु किञ्चेमाः प्रजाः शुभमाचरन्ति' इति माध्यन्दिनायनश्रुत्या आप्ततमात्रेयवचनेन च कर्तुरधिकं फलं प्रेरकाणामित्यवगमान्न प्रमाणपद्धतिमध्यास्ते- इत्यादि निरस्तम् ।

नन्वेवं देवानामेव फलं न प्रजानामित्यस्तु । किं प्रजानामल्पस्यापि फलस्याङ्गीकारेण प्रत्यक्षसिद्धप्रवृत्तिस्तु विष्टिगृहीतस्येव भविष्यति । न भविष्यति च कल्पनागौरवमिति चेन्नैवम् । प्रजानां देवैः क्रियमाणज्ञानयज्ञे ऋत्विक्त्वान्न तावत् प्रजानां सम्पूर्णमेव फलम् । नापि तत्सामान्याभावः । सत्रयागेषु गृहपतिव्यतिरिक्तानां प्रजानामुभयाभावदर्शनात् । सत्रयागेषु न केवलं गृहपतेरेव फलम् । किन्तु 'सत्रमुपेत्य अग्नीन् यजेरन् सर्वे दीक्षेरन् सर्वे सुनुयुः' इत्यादिश्रुतेरिष्टप्रथमयज्ञानां स्वान् स्वानग्नीन् तत्तदग्निषु समारोप्य दीक्षितानां अनाप्तदक्षिणानाम् ऋत्विजामल्पं फलं दृष्टं, नतु फलाभाव एव । नापि द्रव्या....[१] गृहपतेरिव महत्फलम् । यदि प्रजानां किमपि फलं न स्यात् तर्हि तासु स्थित्वा तत्करणानि व्यापारयद्भिर्देवैस्ताभिः कर्मादि न कार्येत । कार्यते च प्रजाभिर्देवैः कर्मादि । ततोऽल्पं फलं तासां युक्तमेव ।

किञ्च प्रजापालनविनियोज्यस्य व्याख्यानविधिनियोज्यस्य राज्ञ आचार्यस्य च यथा प्रजाः शिष्याश्च सहकारिणः, यथा च तेषामल्पफलमस्ति एवमेव ज्ञानदानादिविधिनियोज्यानां देवानां सहकारित्वेन प्रजानामपेक्षणात् तासामल्पं फलमङ्गीकार्यमेव । यत्तु न्यायविवरणे 'नच स्वातन्त्र्याद् देवानामेव ज्ञानादिफलं न किञ्चिदन्येषाम्' इति पूर्वपक्षाभिधानं तदात्रेयमतमुखेन मन्दाशङ्कापरमिति तत्प्रत्यनीकत्वं सिद्धान्तवादस्य न विरुद्ध्यत इति ।

१. अत्र स्पष्टतया तालपत्रे नोपलभ्यते

प्रकारान्तरेण फलश्रुत्यधिकरणरचनम्

केचित्तु - अधुना ज्ञानिनां ज्ञानकर्मादिः फलमस्येत्यनिर्धारणादयुक्तमुत निर्धारणसम्भवाद् युक्तमिति चिन्त्यते।

पूर्वपक्षस्तु- किं ज्ञानकर्मादिफलं तज्ज्ञानकर्मादिकर्तृमनुष्यनिखिलेन्द्रिय-प्रेरकतया स्वामित्वेनेन्द्रियाभिमानिदेवानामुत प्रत्येककर्तृताकतया सत्रयागे ऋत्विजामिव प्रजानाम्। नाऽद्यः। मनुष्यव्यापारवैफल्यापत्तेः। नहि क्रतुषु ऋत्विजामिव मनुष्ययजमानानामैहिकदक्षिणा दृश्यते। नापि दक्षिणात्वेन क्रतुज्ञानोत्थफलैकदेशो मनुष्याणामिति द्वितीयः पक्षः। 'अग्निर्मे होता आदित्योऽध्वर्युः' इत्याद्याम्नानाद् देवानामेव ऋत्विक्त्वेन मनुष्येषु फलकल्पना-वैफल्यात्। तदेवं पक्षद्वयेऽपि दोषसाम्यादनिर्धारणान्नैष्फल्यमेवेति।

सिद्धान्तस्तु- 'ब्रह्मविदाप्नोति परम्' (तै.उ. २.१) इति 'ज्योतिष्टोमेन स्वर्गकामो यजेत' (मानवश्रौतसूत्रम् ९, ३.१.११) इत्यादिवत् चोदित-ज्ञानादिफलं प्रेरकतयेन्द्रियाभिमानिदेवानामेव। 'यदु किञ्चेमाः प्रजाः' (ब्र.सू. भा.उ. माध्यन्दिनायनश्रुतिः ३.४.४४) इत्यादिश्रुतेः। मनुष्याणां फलमित्यादि-पक्षोऽप्यनवद्य एव। तेषामपि देवताप्रयोज्यकर्तृतया ऋत्विक्त्वेन दक्षिणात्वेन सत्रयागे ऋत्विजामिव फलांशाङ्गीकारात्। देवानां मनुष्यद्वारैव ऋत्विक्त्वं न साक्षादिति युक्तमेव तेषां फलकल्पनमित्यधिकरणशरीरमाहुः।

प्रथमसूत्रार्थः

सूत्रार्थस्तु- 'नलोपः प्रातिपदिकान्तस्य' (पा.सू. ८.२.७) इत्यादाविव फलेत्यविभक्तिकनिर्देशः। 'फलश्रुतेः' इति समस्तं च पदम्। 'यदु किञ्चेमाः प्रजाः' (ब्र.सू.भा.उ.माध्यन्दिनायनश्रुतिः ३.४.४४) इत्यादिना स्वामिनः फलश्रवणात् स्वामिन एव फलं 'ब्रह्मविदाप्नोति परम्' (तै.उ. २.१) इत्यादिना

श्रुतं ब्रह्मप्राप्तिलक्षणम्। न प्रजानाम्। यद्वा ब्रह्मप्राप्तिलक्षणं फलं स्वामिन एव, 'यदु किञ्चेमाः' (ब्र.सू.भा.उ.माध्यन्दिनायनश्रुतिः ३.४.४४) इत्यादिश्रुतेः इति आत्रेयो मन्यते। तन्मतावलम्बी तु पूर्वपक्षी प्रजानां फलसामान्यं निषेधतीति तावन्मात्रेणास्य पूर्वपक्षसूत्रत्वम्। वस्तुत आत्रेयस्य मते न सर्वासां प्रजानां फलाभावोऽभिप्रेतः। अत एवेदं सूत्रमुत्तरप्रस्थाने सिद्धान्त्यभिमतप्रमेयाणां बहूनां सूचकतया सविस्तरं विवृतम्। अत एव चात्र देवानां ज्ञानादिफलमिति पूर्वपक्षांशो ग्राह्य एव। अवधारणमात्रमेव त्याज्यम्। अतः 'पूर्वपक्षसूत्रार्थं विवृणोति' इत्यवतारसुधाऽपि दृश्यते। तेन सूत्रकारशैलीविरोधात् समस्तमिह पूर्वपक्ष-सूत्रमित्यपव्याख्यानमिति निरस्तम्। केवलाग्राह्यार्थपरत्वाभावात्। अत्र स्वामित्वेन फलप्राप्तौ सिद्धायां तत्सामर्थ्यात् स्वामित्वतारतम्यं फलतारतम्य-प्रयोजकमिति स्वामित्वतारतम्यात् फलतारतम्यमप्येतत्सूत्रप्रमेयमित्यवधेयम्।

द्वितीयसूत्रार्थः

'आर्त्विज्यम्' इति सिद्धान्त उच्यते। न केवलं देवानामेव फलमिति मन्तव्यम्। किन्तु प्रजानामपीति। नचास्वामित्वं बाधकम्। सत्रयागे गृहपति-भिन्नानामपि फलदर्शनादिति बहिरेवोक्ते कथं तर्हि 'यदु किञ्चेमाः' इत्यादिश्रुतिविरोधः परिहरणीयः इत्यत्रोच्यते- **आर्त्विज्यमिति ॥** सत्रयाग इत्यादौ ग्राह्यम्। सत्रयागे ऋत्त्विजामिव योग्यं फलं प्रजानामुच्यते। अल्पमिति सिद्ध्यति। सत्रयागे गृहपतेः फलाधिक्येऽपि ऋत्विजां सत्रयागफलमल्पमेव। यद्यार्त्विज्यमित्येवोच्येत तर्हि दर्शपूर्णमासादौ ऋत्त्विजां क्रतुफलवत्त्वाभाव-वदिहापि ज्ञानादिफलभागित्वाभावः प्रतीयेत। तथाच नासौ सिद्धान्तः स्यादि-त्यतः सत्रयाग इत्युक्तम्। दर्शपूर्णमासयोर्गृहीतदक्षिणत्वेन ऋत्त्विजां क्रतुफलभागित्वाभावेऽपि सत्रेऽगृहीतदक्षिणत्वाद् ऋत्त्विजां क्रतुफल-भागित्वमस्तीति न दोषः।

ननु 'यदु किञ्चेमाः' इत्यादिश्रुतेर्महाफलविषयत्वेन विरोधं परिहृत्य प्रजानां किमल्पफलाङ्गीकारेण, फलसामान्यनिषेध एव दर्शपूर्णमासिकऋत्विजामिव किं न स्यात्। सात्रर्त्विजामल्पफलदर्शनमप्रयोजकम्। दृष्टान्तमात्रस्य प्रतिदृष्टान्तस्यापि सम्भवेनासाधकत्वादित्यत्रोच्यते 'तस्मै हि परिक्रियते' तादर्थ्ये चतुर्थी। हि यस्मात् देवैः प्रजार्थं प्रजानां मुक्त्यर्थं तच्छरीरे स्थित्वा ज्ञानादि परिक्रियते उत्पाद्यते, तस्मात् तेषामपि फलमङ्गीकर्तव्यमिति शेषः। अत्र यद् यदर्थमनुष्ठीयते तत् तत्र फलदम्। यथा पित्रा पुत्रगतफलार्थमनुष्ठीयमानं जातेष्ट्यादिफलमिति व्याप्तिः।

यद्वा, आर्त्विज्यशब्देन ऋत्विग्भ्यो दीयमानदक्षिणोच्यते। तथाच प्रजानां देवैः क्रियमाणज्ञानयज्ञे यागे ऋत्विजामिवापेक्षितत्वाद् ऋत्विग्भ्यश्चावश्यं दक्षिणा दातव्येति नियमादन्नपानादेश्च ज्ञानयज्ञाधिकृतऋत्विग्दक्षिणात्वायोगेन ज्ञानफलमेव दक्षिणेत्यङ्गीकर्तव्यमिति युक्त्यन्तरमनेनोच्यते। एतावन्मात्रस्यैव ज्ञातत्वेऽपि वक्ष्यमाणयुक्तिविशेषस्याज्ञानादौडुलोमेर्मतं न मुख्यसिद्धान्तितमिति ज्ञातव्यम्।

तृतीयसूत्रार्थः

अथ मुख्यसिद्धान्त उच्यते। पक्षेण तृतीयं तृतीयः पक्ष उच्यते। स कः? सहकार्यन्तरविधिः। सहकार्यन्तरत्वेन प्रजानां विधिरिति तृतीयः पक्षः। 'ज्ञानादिदानं देवानां विष्णुना साधु चोदितम्। वेदे च तेषां विहितम्' इत्याद्यागमसिद्धे देवानां ज्ञानदानादिकर्मणि 'आचार्यः पूर्वरूपमन्तेवास्युत्तररूपम्' (तै. १.३.५) इति न्यायेन शिष्यः सहकारी तावत् सिद्धः। शिष्यकोटिनिविष्टप्रजास्तु 'सहकार्यन्तरं प्रजाः' इत्याद्यागमेन विधानात्। तद्वतो विध्यादिवदिति निदर्शनम्। तद्वतः प्रजावतः शिष्यवतः राज्ञ आचार्यस्य च प्रजाः शिष्या यथा सहकारित्वेन विधीयन्ते तथा प्रकृतेऽपीति। सूत्रक्रमस्तु स्पष्टः।

उभयोः स्वाम्यधिकरणस्वरूपम्

अत्रोभयेऽप्याहुः। 'ओमित्येतदक्षरमुद्गीथमुपासीत' (छा. १.१.१) इत्येवमाद्यङ्गाश्रितान्युपासनानि यजमानकर्तृकाण्युत ऋत्विक्कर्तृकाणीति संशये स्वामिनो यजमानस्यैवैतानि। 'वर्षति ह वा अस्मै वर्षयति ह य एतदेवं विद्वान् वृष्टौ पञ्चविधं सामोपास्ते' (छा. २.३.२) इत्यादिफलश्रुत्यनुसारादित्यात्रेयमतानुसारेण पूर्वपक्षयित्वा, नैतदस्ति स्वामिकर्माण्युपासनानीति। किन्तु ऋत्विक्कर्माण्येवैतानि स्युरित्यौडुलोम्याचार्यो मन्यते। तस्मै हि साङ्गाय कर्मणे ऋत्विक् परिक्रियते। तत्प्रयोगान्तःपातीनि चोद्गीथाद्युपासनान्यधिकृताधिकारत्वात्[१] गोदोहनादिनियमवदेव ऋत्विग्भिर्निर्वर्त्येरन्। तथा च 'तं ह बको दाल्भ्यो विदाञ्चकार। स ह नैमिशीयानामुद्गाता बभूव' (छा. १.२.१३) इत्युद्गातृकर्तृकतां श्रुतिश्च दर्शयति। 'वर्षति ह वा' इत्यादिकर्त्राश्रयफलश्रवणं ऋत्विजां परार्थकर्तृत्वान्नायुक्तम्। 'यां वै काञ्चन यज्ञ ऋत्विज आशिषमाशासते यजमानायैव तामाशासत इति होवाचेति' (छा. १.७.८), 'तस्मादु हैवंविदुद्गाता ब्रूयात् किं ते काममागायानि' (छा. १.७.९) इति श्रुतेश्च अङ्गोपासनानामृत्विक्कर्मत्वसिद्धिरिति।

तन्निराकरणम्

तन्न। श्रवणमनननिदिध्यासनानि तावन्नादृष्टफलानि। श्रवणस्याज्ञाननिवृत्तिः, निदिध्यासनस्य साक्षात्कारः फलमित्येवं दृष्टफललाभेऽदृष्टकल्पनायोगस्य तन्त्रद्वयसिद्धत्वात्। यत्तूपासनानां फलान्तरं श्रूयते तत्त्वभ्युच्चयं फलं न मुख्यम्। तथाच यद्युद्गीथाद्युपासनमृत्विक्कर्तृकं स्यात् तर्हि तत्रैव तज्जन्यं साक्षात्कारलक्षणं फलमङ्गीकार्यं स्यात्। ततश्च सर्वेऽपि धनिका उपासकं परिक्रयादिना स्वकीयं सम्पाद्य साक्षात्कारभाजः स्युरित्यलं स्वयमूर्ध्वरेतस्त्वादि-

१. म. अधिकृताधिकारित्वात्

नियमाश्रयणपरिक्लेशेनेति पूर्वोक्तसाधनानुष्ठानवैयर्थ्यापत्तेः। यद्यपि जातेष्ट्यादाविवादृष्टद्वारकं फलं कर्तुरन्यस्मिन्नुत्पद्यते। तथाऽपि न दृष्टमुत्पत्तुमर्हति। अन्यकृतजलपानौषधसेवनादिना पिपासाशूलादिनिवृत्तेरदर्शनात्। नचौद्गात्रसमाख्ययोद्गीथादेर्ऋत्विक्कर्तृत्वे सिद्धे तदाश्रयमुपासनमपि तत्कर्तृकमेव न्याय्यम्; गोदोहनाप्प्रणयनादिवदिति वाच्यम्। प्रणयनाश्रितस्य यजमानेनानुष्ठातुमशक्यत्वेन तत्र तत्कर्तृकत्वेऽपीहाशक्त्यभावात्। शक्यते ह्युद्गातृकर्तृकेऽप्युद्गीथे तस्योद्गीथादेः रसतमत्वाद्यनुसन्धानमात्रं यजमानेन कर्तुमिति वैषम्यात्। स्मर्यते च क्रत्वङ्गेष्वपि मन्त्रतदर्थदेवताहविष्वन्यकर्तृकेषु यजमानस्योपास्तिर्भागवते 'अनुसवनं चातुर्होत्रविधिना सम्प्रचरत्सु नानायोगेषु विरचिताङ्गक्रियेषु अपूर्वं यत्तत् क्रियाफलं धर्माख्यं परब्रह्मणि यज्ञपुरुषे सर्वदेवतालिङ्गानां मन्त्राणामर्थनियामकतया साक्षात्कर्तरि परदेवतायां भगवति वासुदेवे एव भावयान आत्मनैपुण्यमृदितकषायो हविःष्वध्वर्युभिर्गृह्यमाणेषु स यजमानो यज्ञभाजो देवांस्तान् पुरुषावयवेष्वध्यभावयत्' इति। नचोद्गातृकर्तृकेऽप्युपासनेऽस्तु परिक्रयद्वारोपासनस्य यजमानकर्तृकत्वमिति वाच्यम्। आश्रमान्तरस्वीकाराद्यायासवैयर्थ्यस्योक्तत्वात्। किञ्च त्वन्मते पृथग् अप्रतिबन्धः फलमित्यत्र उपासनानां क्रत्वङ्गत्वं नेत्युक्तम्। तथाच परिक्रयस्य साङ्गप्रधानमात्रविषयत्वेन क्रत्वनङ्गोपासनाविषयत्वाभावात् परिक्रयः कथं यजमानकर्तृतायां द्वारं स्यात्। अन्यथा परिक्रीतानामृत्विजामक्रत्वङ्गसोमविक्रयकत्वोपपत्तेरन्यस्तेभ्यः सोमविक्रयी न स्यात्।

अत्र 'यजमानगामिता फलस्य तन्मात्रकर्तृत्वे[1] उपासनस्य तदतिरिक्तकर्तृकत्वे च सम्भवति। ततः कांस्यभोजिन्यायेन निर्विशेषवाक्यशेषसमाख्ययोरनुग्रहार्थं फलश्रुतिः परिक्रयद्वारकं कर्तृत्वमाश्रयति। अतः समाख्यावाक्यशेषाभ्यां

१. क. कर्तृकत्वे

यजमानगामिफलसाधनानामप्युपासनानामृत्विक्कर्मत्वे[1] सिद्धे तदर्थमप्यृत्विक् परिक्रेतव्यः। एवं च सति कर्तुरेव फलमिति न्यायोऽपि न विरुद्ध्यते। यजमानस्यापि तद्द्वारा कर्तृत्वात्' इति कल्पतरूक्तमपि न चमत्कारमर्हति। परिक्रयस्य पुरुषार्थविषयत्वाभावस्योक्तत्वात्। अत एव फलस्य यजमानगामिता साक्षात्कर्तृत्व एवोपपद्यत इति कांस्यभोजिन्यायानवताराच्च। समाख्यावाक्यशेषयोस्तु निरवकाशफलश्रुतिविरोधाद् यथाकथञ्चिद् योजनोपपत्तिः।

ननु साक्षात्कारस्य दृष्टफलस्य साक्षाद्यजमानकर्तृतां विनाऽनुपपत्तावपीह श्रुतवर्षणादिफलस्यादृष्टद्वारकस्य न यजमानकर्तृतां विनाऽनुपपत्तिरिति चेन्न। कर्तुरेव फलमिति न्यायविरोधात्। परिक्रयद्वारा कर्तृत्वस्य क्रत्वनङ्गोपासनेऽशक्यवचनत्वात्।

किञ्चात्र 'वर्षति ह वा अस्मै' (छा. २.३.२) इति गुणकामः किं याजमान उतार्त्विज्य इति चिन्त्यते, उत क्रत्वङ्गोद्गीथाश्रितान्युपासनानि किं याजमानानि उताऽर्त्विज्यानीति चिन्त्यते। नाद्यः। 'तथाकामोऽर्थसंयोगात्' (जै. ३.८.१३) इति तार्तीयेऽधिकरणे ज्योतिष्टोमे सदोमाने गुणकामश्रुतयः 'यदि कामयेत वर्षुकः पर्जन्यः स्यान्नीचैः सदो मिनुयात्' इति। स किमाध्वर्यवः यदि कामयेताध्वर्युरिति, उत याजमानः यदि कामयेत यजमानः इति संशये तत्र मिनुयादित्यध्वर्योर्वचनात् तत्सामानाधिकरण्यादाध्वर्यवे च प्रवचनेऽध्वर्योस्समाख्ययाधिकृतत्वात् स एव कामयतिना निर्दिश्यत इति तस्यैवेदं फलमिति प्रापय्य मिनुयादिति परस्मैपदश्रुत्याऽऽध्वर्युव्यापारः परार्थः प्रतीयते। तया श्रुत्या विरोधाद् वाक्यगम्यं तत्सामानाधिकरण्यं कामयतेर्बाध्यते। तस्माद् यदि कामयेत यजमान इति सम्बन्धाद् याजमान्यं[2] गुणफलमिति निर्णीतत्वात् पुनरिह संशयानुदयात्। उदये वा पूर्वतन्त्रविरोधादेवार्त्विज्यत्वसिद्धान्तायोगाच्च।

१. म. ऋत्विक्कर्तृकत्वे २. क. याजमानम्

न द्वितीयः। 'शास्त्रफलं प्रयोक्तरि' (जै. ३.७.२०) इत्यधिकरणे- अन्यो वा स्यात् परिक्रयाम्नानादिप्रतिषेधात् प्रत्यगात्मनि इत्यज्ञानामृत्विक्कर्तृत्वस्य निर्णीतत्वाद् गोदोहनादाविव संशयानुत्पादात्।

ननु युक्तं गोदोहनादेर्ऋत्विक्कर्तृत्वं तत्कर्तृकाप्रणयनाश्रितस्याव्यापारात्मकस्य तस्यान्येन कर्तुमशक्यत्वात्, इह तु व्यापारात्मकस्योपासनस्यान्येन कर्तुं शक्यतया न ऋत्विक्कर्तृकत्वमिति अधिकाशङ्कयाऽधिकरणप्रवृत्तिरिति चेन्न। गोदोहनादेः स्वतोऽव्यापारात्मकत्वेऽप्युपादेयत्वसिद्धये कर्तृव्यापारविषयतासाम्यात्। उपासनानां च पूर्वोक्तरीत्या क्रत्वनङ्गतया परिक्रीतानां च ऋत्विजां साङ्गप्रधाने व्याप्रियमाणत्वेऽप्युपासनायां तदयोगेनाऽऽर्त्विज्यसिद्धान्तायोगाच्च।

टीकायां पूर्वपक्षीयस्वातन्त्र्यन्यायविवरणस्य व्याख्यानम्

टीकाक्षरार्थस्तु- स्वातन्त्र्यन्यायं साध्यप्रदर्शनेन विवृण्वत् -

'नच स्वातन्त्र्याद् देवानामेव ज्ञानादिफलं न किञ्चिदन्येषामिति वाच्यम्।'

इति वाक्यं 'स्वामिनः फलश्रुतेः' इति पूर्वपक्षसूत्रव्याख्यानरूपमिति मन्वानो सूत्रभाष्याभ्यां सहैव व्याचष्टे- **ब्रह्मविदाप्नोति परमित्यादीति॥** सिद्धान्तेऽपि देवानुष्ठितज्ञानादेः फलं देवानामेवेत्यङ्गीकृतमिति सिद्धसाधनतापरिहाराय 'ब्रह्मविदाप्नोति परम्' (तै. २.१) इत्यादिभाष्यं प्रवृत्तमिति भावः। न किञ्चिदन्येषामित्यस्यार्थः- **न प्रजानामिति॥** यद्यप्यल्पमपि फलं प्रजानां नास्तीति सिद्धान्तप्रतिद्वन्द्वितया वक्तव्यम्। अन्यथा किञ्चिदिति पदं न व्याख्यातं स्यात्। तथाऽपि समस्तसूत्रेण पूर्वपक्षकरणस्य सूत्रकारशैलीविरुद्धतयाऽऽत्यन्तिकपूर्वपक्षपरत्वाभावेन सामान्योक्तिः। विवरणे त्वात्रेयमतावलम्बिनः कस्यचिद् भ्रान्तस्य सिद्धान्तस्य पक्षोऽनूद्यते। नैतत्सूत्रार्थतयेति ध्येयम्।

सिद्धान्तीयात्वरयैवसिद्धिन्यायविवरणस्य व्याख्यानम्

'विभक्तता चात्वरयैव सिद्धिः' इत्यत्रोक्तात्वरयैव सिद्धिन्यायं प्रमाणपूर्वमेतदधिकरणसङ्गतत्वेन शेषोक्त्या विवृण्वत् -

' "त्वरयैव मनुष्याणां सिद्धिरत्वरयैव तु।
देवानां तत्प्रसादेन मुक्तिरेव सतां नृणाम्॥"

इति मानुषमुक्त्यर्थमेव देवानामत्वरया सिद्धिश्रुतेः।'

इति वाक्यं 'तस्मै हि परिक्रियते' इति सूत्रांशव्याख्यानमिति दर्शयन् व्याचष्टे- **उक्तं चेति॥** मनुष्याणां साधनसम्पत्तिस्त्वरया सम्पद्यते। देवानामत्वरयैव। तत्राप्युत्तमदेवानामतिविलम्बेनेति तुशब्दार्थः।

मनुष्याणामिव देवानामपि त्वरयैव सिद्धिः किं न स्यात्। देवानां मनुष्यापेक्षयाऽतिसमर्थत्वात्। अन्यथाऽसामर्थ्यं स्यात्। तत्रोच्यते। सतां नृणां मुक्त्यै मुक्त्यर्थमेव न त्वसामर्थ्यात्। नन्विदमसङ्गतमित्यत्रोच्यते। तत्प्रसादेन देवानां प्रसादेन सतां नृणां मुक्तिः क्लृप्तेति शेषः। यदि देवानां त्वरयैव सिद्धिः, मनुष्याणां च विलम्बेन तदा मुक्तदेवानां संसारीन्द्रियप्रेरकत्वाभावेन तदिन्द्रियप्रेरणाद्यनुकूलदेवताप्रसादाभावेन तद्द्वारकभगवदपरोक्षज्ञानं मनुष्याणां न स्यात्। अतः सर्वमुक्त्यनन्तरमेव देवानां मुक्तिरिति युक्त्यैवात्वरयैव सिद्धिर्देवानामिति विवरणार्थो द्रष्टव्यः। 'तद्वतो विध्यादिवत्' इति सूत्रांशं व्याचष्टे- **यथा खलु पालनस्येति॥** तच्छब्देन पाल्यरूपाः शिष्यरूपाश्च प्रजा गृह्यन्ते। **तद्वतः** प्रजावतः शिष्यवतो राज्ञ आचार्यस्य च, विधीयत इति विधिः पालनं व्याख्यानं च। तदेव आदिः कारणं यस्य तद्विध्यादिफलम्। तथाच पालनव्याख्यानजन्यफलवद् देवानामपि ज्ञानजन्यं फलं मुख्यमस्ति। नतु प्रजानाम्। यत आचार्यस्य सहकारित्वेन शिष्याणां सहकार्यन्तरत्वेन च देवैः क्रियमाणज्ञानदाने विधिरिति समग्रसूत्रार्थोऽनुसन्धेयः।

अणुभाष्यस्यैतदधिकरणतात्पर्यपरत्ववर्णनम्

'विशेषस्तु ज्ञाने स्यादुत्तरोत्तरम् । सर्वेऽपि पुरुषार्थाः स्युर्ज्ञानादेव न संशयः ॥' इत्यन्तेनैतदधिकरणतात्पर्यमपि सूचितम् । तथाहि । पुरुषार्थशब्द अर्शआद्यजन्तः । सर्वेऽपि स्वामिनोऽपि पुरुषार्थाः ज्ञानादेव निमित्तात् पुरुषार्थवन्तो भवन्ति । तज्जन्यपुरुषार्थभाजो भवन्तीति यावत् । नच 'यदु किञ्चेमाः प्रजाः' इत्यादिश्रुतिविरोधः । देवैर्मनुष्येषु ज्ञाने जनयितव्ये यतः स्वामित्वादिविशेषः स्यात् । सोऽप्युत्तरोत्तरमधिक एव । अत एव तत्फलमप्युत्तरोत्तरमधिकमेव । तथाच प्रजानामल्पं फलम् । ततोऽप्याचार्यस्याधिकम् । ततोऽपि स्वामिनां तत्त्वाभिमानिदेवानामधिकम् । ततोऽपि वागादिप्रेरकाग्न्यादिभ्यः इन्द्रादीनां, ततो रुद्रादीनां, ततो मुख्यप्राणस्येत्याद्युत्तरोत्तरमाधिक्येन फलाङ्गीकारात् प्रजानां सम्पूर्णफलाभावेन अल्पस्वे निस्व इति व्यवहारवत् प्रजानां फलाभावश्रुत्युपपत्तिरिति ।

॥ इति फलश्रुत्यधिकरणम् ॥

॥ अथ कृत्स्नभावाधिकरणम् ॥ ८ ॥

सूत्रभाष्यम्

॥ ॐ कृत्स्नभावात्तु गृहिणोपसंहारः ॐ ॥

॥ ३-४-४७ ॥

'कुटुम्बी[१] शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधत्' इत्युक्त्वा 'न च पुनरावर्तने न च पुनरावर्तते' (छा.उ.८-१५-१) इति गृहिणोपसंहारः क्रियते । तस्माद् गृहस्थस्यैवोत्तमत्वमिति न वाच्यम् । यतः कृत्स्नगृहस्थान् देवानपेक्ष्यैवोपसंहारः क्रियते । 'कृत्स्ना ह्येते[२] गृहिणो देवाः कृत्स्ना ह्येते[३] यतयोऽत एतेषां[४] न पुत्रा दायमुपयन्ति न चैते गृहान् विसृजन्त्यरागा अद्वेषा अलोभाः सर्वभोगाः सर्वज्ञाः सर्वकर्तारः' इति पौत्रायणश्रुतिः[५] ।

॥ ॐ मौनवदितरेषामप्युपदेशात् ॐ ॥

॥ ३-४-४८ ॥

न चाऽश्रमद्वयमेव देवानाम् । 'देवा एव ब्रह्मचारिणो देवा एव गृहस्था[६] देवा एव वनस्था[७] यथा ह्येते मुनय एवं सर्ववर्णाः सर्वाश्रमाः सर्वे ह्येते कर्म कुर्वन्ति' इति कौण्ठरव्यश्रुतौ यतित्वदृष्टान्तेनान्येषामप्युपदेशात् ॥ ४८ ॥

॥ इति कृत्स्नभावाधिकरणम् ॥ ८ ॥

---

१. ब. कुटुम्बे २. ब. ह्येव ३. ब. एते ४. ब. एषाम्
५. ब. इति हि पौत्रायणश्रुतिः । ६. ब. देवा गृहस्थाः
७. ब. देवा वनस्थाः

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र हरिप्राप्तिसाधने ज्ञाने विशेषाधिकारिणां यतीनां सर्वाश्रमिभ्योऽतिशयसमर्थनेन ज्ञानमहिम्न एव वर्णनादस्ति शास्त्रादिसङ्गतिः। कर्माधिकारिभ्यो ज्ञानाधिकारिणामतिशयाभावे ज्ञानस्यैवातिशयाभावप्रसङ्गात् समर्थनीयमेतत्। प्रकृतज्ञानाधिकारिषु देवर्षिमानुषेषु मनुष्या आश्रमभेदभिन्ना एव विषयः। किं सर्वेऽपि मोक्षे समा उत कस्यचिदुत्तमत्वमिति सन्देहः। द्वेधाऽपि दर्शनं सन्देहबीजम्।

पूर्वपक्षः

तत्र गृहस्थो मुक्तावुत्तम इति पूर्वः पक्षः। तस्य सर्वसत्कर्मस्वधिकारित्वात्। नह्यन्याश्रमिणां क्रत्वादावधिकारोऽस्ति। किञ्च छन्दोगोपनिषदि गृहस्थस्यैव मोक्षमुक्त्वोपसंहारः क्रियते। 'आचार्यकुलाद् वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बी शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधदात्मनि सर्वेन्द्रियाणि प्रतिष्ठाप्याहिंसन् सर्वाणि भूतान्यन्यत्र तीर्थेभ्यः स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते। न च पुनरावर्तते न च पुनरावर्तते' (छा. ८.१५.१) इति। तेन ज्ञायते गृहस्थस्यैव मुक्तावाधिक्यमिति। नह्याधिक्याभावे सर्वेषामपि मोक्षे समाने विशिष्योक्तिर्युक्ता। उपसंहाराच्च तात्पर्यमवगम्यते। अतः कर्मिणामेवोत्तमत्वान्न ज्ञानमतिशयितमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रं पठित्वा व्याचष्टे- **कृत्स्नेति**॥ यतेरेव सर्वाश्रमेषूत्तमत्वं न गृहिणः। यतिमोक्षस्य गृहिमोक्षादपि चिरकालसाध्यत्वादल्पकालापादितसाधनसाध्यान्मोक्षाद् बहुकालीनसाधनसाध्यस्याऽधिक्यनियमात्। गृहिणां बहुकर्माधिकारमात्रसद्भावेऽपि तदाचरणनियमाभावात्। नचैवं गृहिणोप-

संहारविरोधः। तस्य देवताविषयत्वात्। तेषां सम्पूर्णगृहस्थधर्मवत्त्वेन तद्योग्यत्वात्। नच देवानामपि यतेरुत्तमत्वं कथमिति वाच्यम्। सम्पूर्णयतिधर्मस्यापि तेषु सद्भावात्। अतो गृहिभ्यो यतीनामेवोत्तमत्वं तेभ्यो देवानामेवेत्याशयः। भवेदेतद् यद्याश्रमद्वयं सम्पूर्णं देवेषु भवेत् तदेव कुत इत्यत आह- **कृत्स्ना हीति**॥ 'एतेषां न पुत्रा दायमुपयन्त्यरागा अद्वेषा अलोभाः सर्वज्ञाः' (पौत्रायणश्रुतिः, सू.भा. ३.४.४७) इति यतित्वस्योपपादकम्, अन्यद् गार्हस्थ्यस्य। तथाचोक्तम्- गार्हस्थ्यं च यतित्वं च देवेष्वेकत्वमागतम्। प्राधान्योक्तिर्यतित्वस्य गार्हस्थ्यस्य क्वचित् क्वचित्' इति॥ ४७॥

युक्त्यन्तरेणैतत् समर्थयत् सूत्रमुपन्यस्य व्याचष्टे- **मौनवदिति**॥ न देवानामुक्ताश्रमद्वयकर्मित्वमेव। किन्तु सर्वाश्रमकर्मित्वमपि। श्रुतिबलात्। तथाच यदाऽऽश्रमद्वयकर्मित्वेनैव देवानां यतिभ्य उत्तमत्वं सिद्ध्यति, किमु वाच्यं तदा सर्वाश्रमकर्मित्व इति भावः। सर्वाश्रमा इति दार्ष्टान्तिकोक्तिः। न केवलमेतावत् सर्ववर्णाः। सर्वं सर्ववर्णाश्रमोचितम्। अयं तत्र हेतुः। अतोऽधमाधिकारिषु ज्ञानप्रचुराणां यतीनामेवोत्तमत्वाद् युक्तो ज्ञानस्यातिशय इति सिद्धम्॥ ४८॥

॥ इति कृत्स्नभावाधिकरणम्॥ ८॥

शेषतात्पर्यचन्द्रिका

॥ अथ कृत्स्नभावाधिकरणम्॥ ८॥

॥ ॐ कृत्स्नभावात्तु गृहिणोपसंहारः ॐ ॥ ३-४-४७ ॥

सङ्गतिः

ननु देवानामत्वरया सिद्धिश्रुतेर्ज्ञानफलं देवानां महत्, अल्पं तु मनुष्याणामिति पूर्वाधिकरणोक्तमयुक्तम्। सर्वेषामधिकारिणां मुक्तौ साम्याङ्गीकारेण ज्ञानफलस्य मुक्तेर्महदल्पप्रभेदानङ्गीकारात्। नच साधनतारतम्येन फलतारतम्यमपि

साधितमिति वाच्यम्। साधनतारतम्यस्यैवासम्प्रतिपत्तेः। बहुकालाल्पकाल-साधनानुष्ठानदर्शनेन तदनुमीयत इति चेन्न। तत्रैव मानाभावादप्रयोजकत्वाच्च।

किञ्च, 'कुटुम्बी[१] शुचौ देशे' (छा. ८.१५.१) इति छन्दोगवाक्याद् गृहस्थ-स्यैवोत्तमत्वम्। गार्हस्थ्यस्य च न देवेषु सम्भवः। 'अष्टवर्षं ब्राह्मणमुपनयीत' (आ.श्रौ.सू.) इत्याद्याश्रमधर्माणां मनुष्यविषयत्वात्। नहि देवानामुपनयनादि-वर्णाश्रमधर्माः श्रूयन्ते। तथाच गृहस्थस्यैव महत् फलमिति सिद्ध्यति। तत एव मनुष्याणामेव महत् फलं देवानामल्पफलमित्येव न्याय्यम्।

किञ्च, यतीनामेव मनुष्यत्वाद् गृहस्थत्वापेक्षया ज्ञानादिफलमल्पमिति प्राप्नोति। गृहस्थस्यैव छन्दोगश्रुतावुत्तमत्वावगमात्। तथाच कर्माधि-कारिणामुत्तमत्वात् कर्मण एवोत्तमत्वं न ज्ञानस्येति शङ्कनात् सङ्गतिः।

अन्तरागर्भिणीन्यायेनाधिकरणद्वयम्

अत्र 'यो हि त्वरया साधयेत् स मन्दसुखमाप्नुयात्। यो ह्यत्वरया स महत्' इति न्यायविवरणे श्रुतिविशेषोदाहरणेन मुक्तौ फलतारतम्यसाधनप्रतीतेरन्त-रागर्भिणीन्यायेन मोक्षे किं सर्वेऽपि समा उत कस्यचिदुत्तमत्वमिति सामान्याकारेण चिन्तां प्रस्तुत्याधिकरणं व्याख्याय समाप्यैवं कस्यचिदुत्तमत्वे सिद्धे, किं गृहस्थ उत्तम उत यतिरिति चिन्तां प्रस्तुत्य पुनरधिकरणं व्याख्येयम्। अन्यथाऽनन्तरा-तीताधिकरणसङ्गतेः स्फुटमलाभात्। 'यो ह्यत्वरया साधयेत्' इत्यादिश्रुति-विशेषोदाहरणस्य विवरणे स्फुटं फलतारतम्यप्रतिपादनमेव फलमिति प्रतीतेश्च। अत एव टीकायां 'किं सर्वेऽपि मोक्षे समाः' इत्यादिचिन्ताप्रदर्शनं नासङ्गतम्।

संशयः

तथाचास्याधिकरणस्येदं शरीरमाद्ये वर्ण्यते। मोक्षाधिकारिणः समा उत कस्यचिदुत्तमत्वमिति सन्देहः। कृष्याद्यधिकारिषु समादिदर्शनं सन्देहबीजम्।

१. म. कुटुम्बे

पूर्वपक्षः

अधिकारिणः सर्वेऽपि समाः- इति पूर्वः पक्षः। यतः

'प्रकृष्टोऽयं निकृष्टोऽयमिति नैवेह शक्यते।
निर्णेतुं गुणदोषाणां साम्यात् पक्षद्वयेऽपि च॥'

नच देवानां समर्थत्वेनोत्तमत्वनिर्णयसम्भव इति वाच्यम्। सामर्थ्यस्यैवा-सिद्धेः। सर्वकर्मसु गृहस्थस्यैवोत्तमत्वात्। 'कुटुम्बी शुचौ देशे' (छा. ८.१५.१) इत्यादिछन्दोगवाक्ये गृहस्थस्यैव मोक्षोक्त्योपसंहाराच्च। न च देवानामेव गार्हस्थ्याङ्गीकारेण न विरोध इति वाच्यम्। 'अष्टवर्षं ब्राह्मणमुपनयीत' (आ.सौ.सू.) इत्यादिनाऽऽम्नातवर्णाश्रमधर्माणां मनुष्येष्वेवोपलम्भात्। नचात एव 'मनुष्या उत्तमाः' इति निर्णयोऽस्त्विति वाच्यम्। देवानां सर्वाश्रमित्वाभि-धानविरोधात्। नच देवमनुष्ययोरुत्तमाधमभावनिर्णयायोगेऽपि मनुष्येष्वेकाऽ-श्रमभेदभिन्नेषु यतिगृहस्थयोः स युज्यत इति वाच्यम्। तत्रापि गुणदोषयोः साम्येन निर्णयायोगात्। यतेरुत्तमत्वप्रसिद्धेः सार्वजनीनत्वाद् यतिरुत्तम इति निर्णये गृहस्थस्य सर्वकर्मस्वधिकारित्वात्। छन्दोगोपनिषदि तस्यैवोपसंहृतत्वाच्च कुतो गृहस्थस्योत्तमत्वनिर्णयाभावः? नच तर्हि तथैवास्त्विति वाच्यम्। यतेः सकलभोगपरित्यागेन बहुक्लेशसोढृत्वरूपगुणाधिक्यदर्शनात्। तथाच समबलयोः निर्णायकत्वाभावेन कथं न संशयः? तस्मान्मोक्षे विनिगमनाभावेन सर्वेषामधिकारिणां साम्याद् देवानामुत्तमं फलं, मनुष्याणां तु नेत्याद्यनुपपन्नम् इति- अयमपि पूर्वः पक्षः। 'तस्माद् गृहस्थस्योत्तमत्वम्' इति भाष्यात् परं नेदमपि युज्यते। यतेः सर्वदुःखसहिष्णुत्वेन बहुकालसाधनानुष्ठानस्य 'अत्वरयैव तु यतयः' इत्यादिप्रमाणसिद्धत्वात्। तथाच गुणदोषयोः साम्यान्न निर्णय इति वाक्याध्याहारेण भाष्यारूढो ज्ञातव्यः।

सिद्धान्तः

सिद्धान्तस्तु - चिरकालेन केषाञ्चिन्मोक्षः केषाञ्चिदन्यथा।
श्रूयतेऽतस्तारतम्यं न नियामकवर्जितम्॥

'यो हि त्वरया साधयेत् स मन्दसुखमाप्नुयात्, यो ह्यत्वरया स महत्'' इति श्रुत्या चिरकालापादितसाधनसाध्यादल्पकालापादितसाधनसाध्यमोक्षस्य निकृष्टत्वमिति हि न्यायः समर्थितः। स एव च मुक्तौ कस्यचिदुत्तमत्वमिति निर्णयस्य नियामकः। नचात्राप्रयोजकत्वादिकं शङ्क्यम्। श्रुत्युक्तत्वात्। यदि मोक्षे सर्वेषामधिकारिणां साम्यं स्यात् तर्हि सुखमपि समं स्यात्। तथाच तत्साधनानामपि बह्वल्पकालीनानुष्ठानानुपपत्तिः। नहि सममेव फलं चिरकालीन-साधनसाध्यं तद्विपरीतं च भवतीति।

अन्तरागर्भिणीन्यायेन अधिकरणान्तरे पूर्वपक्षः

एवं सामान्यतस्तारतम्ये सिद्धे देवेषु 'गार्हस्थ्यं च यतित्वं च देवेष्वेकत्व-मागतम्' इति वचनेन गृहस्थादिव्यक्तिभेदाभावेन मुक्तमनुष्येषु चिन्त्यते। किं गृहस्थ उत्तम उत यतिरिति सन्देहः। उभयथाऽपि सम्भवः सन्देहबीजम्।

अत्र गृहस्थो मुक्तावुत्तम इति पूर्वः पक्षः। तत्र सर्वकर्मस्वधिकारित्वात्। यतेरुत्तमत्वप्रसिद्धिस्तु छन्दोगोपनिषन्मूलया गृहस्थोत्तमत्वप्रसिद्ध्या लौकिक-त्वाद् बाध्यते। महाफलसाधनत्वेन प्रसिद्धमहाव्रतयज्ञादौ यतेरधिकाराभावेन च स्फुटं निकृष्टताप्रतीतेश्च। तस्माद्

यतेर्गृहस्थः श्रेष्ठः स्यात् सर्वकर्मसु योग्यतः।
अतो न ज्ञप्तिमहिमा किन्तु कर्मण आपतेत्॥

अधिकरणान्तरे सिद्धान्तः

सिद्धान्तस्तु -
वर्णाश्रमोक्तधर्माणां पौष्कल्यं देवताजने।
पौत्रायणश्रुतिश्चाऽह ततो निर्णयसम्भवः॥

एतेन 'अष्टवर्षं ब्राह्मणमुपनयीत' (आ.सौ.सू.) इत्यादिनोक्ताः वर्णाश्रम-धर्माः मनुष्यविषया इति निरस्तम्। 'कृत्स्ना ह्येव[1] गृहिणो देवाः न चैते गृहान् विसृजन्ति' (ब्र.सू.भा.उ. पौत्रायणश्रुतिः ३.४.४७) इति स्पष्टं देवविषयत्व-श्रुतेः। युक्तं च तत्। देवानामतिसमर्थत्वेन कृत्स्नगृहस्थधर्मानुष्ठानसम्भवात्। नच देवेषु उपनयनाद्यदर्शनं दोषः। इन्द्रस्य प्रजापतौ ब्रह्मविद्याप्राप्त्यर्थं गुरुकुल-वासादिदर्शनात्।

एतेन छन्दोगश्रुतौ गृहिणोपसंहारोऽपि समाहितः। मुख्यगार्हस्थ्यापन्न-देवतानामुत्तमत्वाहानेः। ननु संन्यासो हि प्रायत्यार्थो भगवत्तोषार्थश्च। अप्रयतत्वं हि प्रायो गृहस्थादीनामितरकर्मसूद्योगात्। 'संन्यासे तु तुरीये वै प्रीतिर्मम गरी-यसी। तद्भक्तोऽपि हि यद् गच्छेत् तद् गृहस्थो न धार्मिकः॥' इत्यादिना यतेरुत्तमत्वावगमात्। देवानां कृत्स्नगार्हस्थ्यसद्भावेऽपि यतेरप्युत्तमत्वानुप-पत्तिरिति चेन्न। 'कृत्स्ना एव एते[2] यतयोऽतस्तेषां न पुत्रा दायमुपयन्ति अरागा अद्वेषा अलोभाः' (ब्र.सू.भा.उ. पौत्रायणश्रुतिः ३.४.४७) इत्यादिना सयुक्तिकं कृत्स्नयतिधर्मानुष्ठातृत्वादिना देवेषु यतित्वस्यापि श्रुत्यैवोपपादनात्। देवादितरमनुष्येष्वेव[3] गृहस्थाद् यतिरुत्तम इत्यादिनियमः, न सर्वत्र।

एतेन मनुष्येष्वपि यतिगृहस्थयोरुत्तमत्वाधमभावनिर्णयो न सम्भवतीति निरस्तम्। यतेर्बहुदुःखसहनपूर्वकं बहुकालीनसाधनानुष्ठानादुत्तमत्वनिर्णयोप-पत्तेः। नच गृहस्थस्य क्रत्वादिसर्वकर्मस्वधिकाराद् यतेस्तदभावेन पुनः संशय

१,२. 'ह्येते' इति ब्र.सू. भाष्ये। ३. म. देवादीतरमनुष्येष्वेव

एवेति वाच्यम्। समबलयोर्हि युक्त्योर्विरोधे संशयो भवति। नतु विषमबलयोः। सर्वकर्मस्वधिकारमात्रस्य बहुकालसाधनाद् दुर्बलत्वात्। नच सर्वकर्माधिकारित्व-युक्तेस्सर्वकर्मानुष्ठानपर्यन्तत्वात् तस्य च देवेषूत्तमत्वप्रयोजकतयाऽङ्गीकृतत्वान्न दौर्बल्यमिति वाच्यम्। मनुष्यगृहस्थेषु सर्वकर्माधिकारमात्रसद्भावेऽपि तदनुष्ठानपर्यन्तस्य तत्रायोगात्। अन्यथा तेषामपि कृत्स्नगृहस्थत्वापत्त्या पौत्रायणश्रुतिविरोधापातात्। तथाच सर्वकर्माधिकारमात्राख्ययुक्तेर्दुर्बलत्वेन गृहस्थोत्तमत्वानिर्णयकतया यतेरुत्तमत्वनिर्णायकबहुकालसाधनानुष्ठानाख्य-युक्तिबाधनाक्षमतया च निर्बाधया युक्त्या मनुष्यगृह्यपेक्षया ज्ञानाधिकारि-यतेरुत्तमत्वनिर्णयोपपत्तिरिति मुक्तौ सर्वेषामधिकारिणां साम्याभावेन ज्ञानफले महदल्पादिव्यवस्था ज्ञानमाहात्म्यं चोपपन्नमिति।

उभयोक्तसहकार्यन्तरविध्यधिकरणम्

अत्रोभयेऽप्याहुः। 'सहकार्यन्तरे'त्यादिसूत्रत्रयमेकमधिकरणम्। 'आत्मानं विदित्वा पुत्राद्येषणाभ्यो व्युत्थायाथ भिक्षाचर्यं चरन्ति' (बृ. ३.५.१) इत्युपक्रम्य 'तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्। बाल्यं च पाण्डित्यं च निर्विद्य, अथ मुनिरमौनं च मौनं च निर्विद्य, अथ ब्राह्मणः' (बृ. ३.५.१) इति बृहदारण्यके श्रूयते। तत्र संशयः। मौनं न विधीयते उत विधीयते इति।

एकवाक्यत्वलाभेन प्राप्ता पाण्डित्यशब्दतः।
बाल्यं स्तोतुमनूद्येत मुनिता न विधीयते॥

मुनिशब्दो हि ज्ञानवाची 'मननान्मुनिः' इति व्युत्पत्तेः। संन्यासवाची च गार्हस्थ्यमाचार्यकुलं मौनं वानप्रस्थमिति चतुर्थाश्रमे प्रयोगात्। वाङ्नियम-वाचिता 'मयूरा मौनिनस्तस्थुः' इति प्रयोगदर्शनात्। तत्राऽद्ये पक्षे मौनं पाण्डित्यशब्देन प्राप्तम्। पण्डाशब्दस्तु श्रवणजन्यज्ञानवाची। ततो मतुबर्थे इतच्प्रत्यये, ततो भावप्रत्यये च निष्पन्नस्य पाण्डित्यशब्दस्य ज्ञानवाचि-त्वेनैकार्थत्वात्। द्वितीये तु 'व्युत्थायाथ भिक्षाचर्यं चरन्ति' (बृ. ३.५.१) इति

पूर्ववाक्यादेव मौनशब्दाभिधेयस्य संन्यासस्य प्राप्तत्वात्। तृतीयपक्षेऽपि 'अथ मुनिः' (बृ. ३.५.१) इति साकाङ्क्षनिर्देशेन प्रतीतैकवाक्यत्वरक्षणाय विध्यनुषङ्गपरिहाराय च वाङ्नियमादेर्मौनशब्दार्थस्य प्राप्त्यवश्यम्भावेन च विधानायोगाद् बाल्यस्तुत्यर्थमेव मौनमनूद्यते। स्तुतिप्रकारश्च बाल्येऽनुष्ठीयमाने पाण्डित्यापरपर्यायं मौनं कृतं भवेत्, तस्माद् बाल्यं प्रशस्तमिति वा, बाल्य-मात्रानुष्ठानादुत्तमाश्रमी भवति, तस्मात् प्रशस्तमिति वा द्रष्टव्य इति प्राप्तेऽभिधीयते -

ज्ञानातिशयरूपस्य मौनस्याप्राप्तितोऽन्यतः।
समानकर्तृकत्वाच्च पाण्डित्येन विधेयता॥

ज्ञानोत्कर्षस्तु व्यासादिषु 'मुनीनामप्यहं व्यासः' (भ.गी. १०.३७) इत्यादिमुनिशब्दः प्रयुज्यते। शास्त्रजन्यज्ञानवत्सु पण्डितोपाध्यायशब्दा एव प्रयुज्यन्ते। तेन पाण्डित्यशब्देन ज्ञानमात्रवाचिना मौनस्याप्राप्तत्वात् विधेय-पाण्डित्येनैक-कर्तृकत्वनिर्देशाच्च पाण्डित्यशब्दोक्तं श्रवणं मननात्मकं बाल्यं निदिध्यासनात्मकं मौनं चापूर्वत्वाद् वाक्यं भित्वा त्रयमपि विधीयत इति।

तन्निरासः

तन्न। प्रथमोक्तस्य पाण्डित्यशब्दितस्य श्रवणस्यानन्तरोक्तस्य बाल्य-शब्दितस्य मननस्य च मुनिशब्दितनिदिध्यासनसाम्ये सति तयोर्विधेयत्वं सिद्ध-वत्कृत्य निदिध्यासनमात्रस्य विधेयत्वचिन्ताऽयोगात्। 'मौनं चामौनं निर्विद्याथ ब्राह्मणः' (बृ. ३.५.१) इत्यादिसमानकर्तृकप्रयोगस्याप्यविशिष्टत्वात्।

अथोच्येत। मौनशब्दितस्य निदिध्यासनस्य ब्रह्मविचारात्मकत्वेन दुर्विज्ञेय-वस्तुसाक्षात्कारे विचारस्यान्वयव्यतिरेकाभ्यां साधनत्वावगतेर्ब्रह्मसाक्षात्कारं प्रति साधनत्वस्य लोकत एव प्राप्तत्वान्न विधेयतेति तत्रैव चिन्तेति। तदा श्रवणस्यापि विचारात्मकत्वेन लोकतस्सिद्धत्वान्नाप्राप्तिः।

अथ मन्येत। तत्त्वमस्यादिवाक्याज्जायमानो ब्रह्मसाक्षात्कार: शाब्द:। तस्य श्रवणजन्यत्वं तु न लोकत: प्राप्तम्। इन्द्रियस्यैव लोके साक्षात्कारजनकत्व-दृष्टे:। शब्दस्य चानिन्द्रियत्वात्। तत: श्रवणस्यापूर्वत्वान्न तत्र शङ्केति। तदपि निदिध्यासने समम्। निदिध्यासनात्मकविचारस्य शाब्दापरोक्षं प्रति हेतुत्वस्य लोकसिद्धत्वाभावात्। लोके शाब्दापरोक्षस्यादर्शनादेव।

अथापि स्यात्। श्रवणस्यापूर्वविधिविषयत्वाभावेऽपि नियमपरिसङ्ख्ययो: सम्भवान्न तत्र शङ्कोत्पद्यते। निदिध्यासने तु नैवम्। अवघातो हि दलनाद्युपा-यान्तरसम्भवेन सत्यां पाक्षिक्यां प्राप्तौ तत्पूरणेन नियम्यते। 'इमामगृभ्णन् रशनामृतस्य' इति मन्त्रश्च 'अगृभ्णन्' इत्यादानलिङ्गाद् रशनाशब्दाच्चाश्व-गर्दभरशनयोरुभयत्र प्राप्तौ 'अश्वाभिधानीमादत्ते' इति गर्दभरशनातो व्याव-र्त्यते। निदिध्यासनसाध्यब्रह्मसाक्षात्कारे तूपायान्तरासम्भव:। शब्दैकगम्यत्वाद्[१] ब्रह्मण: यत्र निदिध्यासनस्य नियम: परिसङ्ख्या वा स्यात् इति। तदपि समं श्रवणे। यथोक्तम् -

'नात्रापूर्वविधि: प्राप्तेरनन्योपायतो न च।
नियम: परिसङ्ख्या वा श्रवणादिषु सम्भवेत्॥' इति।

तत एवं शङ्कापरिहारयो: साम्ये श्रवणादि विहाय निदिध्यासनमात्रे चिन्तनं निर्बीजम्।

सिद्धान्तस्योक्तरीत्या त्वन्मते विधिनियमपरिसङ्ख्यानामन्यतमाश्रयणा-योगादयुक्त:। समन्वयसूत्रे निदिध्यासनादेर्वस्त्ववगमं प्रत्यन्वयव्यतिरेकसिद्ध-त्वादविधेयत्वमिति त्वद्भाष्य एवोक्तत्वेनेह विधेयत्वाश्रयणे तद्विरोधाच्च। 'अन्वयव्यतिरेकसिद्धत्वेऽपि शाब्दज्ञानाद्[२] यस्तु आत्मानं कृतकृत्यं मन्यमानो ज्ञानातिशयरूपे निदिध्यासने न प्रवर्तते तं प्रत्यप्राप्तत्वाद् विधीयत इत्युच्यते'

१. म. शब्दैकसमधिगम्यत्वात् २. म. शास्त्रज्ञानात्

इति कल्पतरूक्तविषयभेदान्न विरोध इति चेन्न। अवघातस्यान्वयव्यतिरेकादि-सिद्धकारणताकत्वेऽपि नखविदलनाद्युपायान्तरेण तण्डुलनिष्पत्तिं कुर्वन्नात्मानं कृतकृत्यं मन्यमानो यस्त्ववघाते न प्रवर्तते तं प्रत्यप्राप्तत्वात् स विधीयत इति सुवचत्वान्नियमादिविध्यन्तरवार्तोच्छेदप्रसङ्गात्।

'अथ मुनि:' इत्यत्र विधिप्रत्ययाभावेन भाष्यभामत्योरपूर्वविधित्व-व्युत्पादनविरोधाच्च। अथ पाण्डित्यादिशब्दान्तरादप्राप्तिरपूर्वत्वम्, विधित्वं चार्थवादस्यैव सतो वाक्यस्य प्रशंसाद्वारेण प्रवृत्त्यतिशयकरत्वमिति विवक्षणं तु लोकोत्तरप्रज्ञतां गमयतीति दिक्।

परोक्तस्य सहकार्यन्तरसूत्रव्याख्यानस्य निरास:

एतेन तद्वत: संन्यासिन: शमदमाद्यपेक्षया सहकार्यन्तरं मौनशब्दितं निदिध्यासनं विधि:। कर्मणि प्रत्यय:। विधेयमेव। नतु निदिध्यासनमनूद्यम्। 'तस्माद् ब्राह्मण:' इत्यादिवाक्ये पाण्डित्यशब्देन प्राप्तं कथं विधेयमिति शङ्कानिरासाय तृतीयमिति विधेयविशेषणम्। तेन पाण्डित्यशब्देनैव मौनस्य न गतार्थत्वम्। तस्य श्रवणमननाभ्यां ज्ञानातिशयरूपतृतीयत्वात्। विद्यावत: ज्ञानातिशय: सिद्ध एवेति न मौनं पुनर्विधेयमिति शङ्काऽपाक्रियते- पक्षेणेति। यस्मिन् पक्षे भेददर्शनप्राप्त्या न प्राप्नोति ज्ञानेऽतिशय: तस्मिन् पक्षे विधेयमिदं भविष्यतीत्यर्थ:। विद्याङ्गत्वेन मौनं विधेयमित्यत्र दृष्टान्त उच्यते। आदिशब्दो मुख्यवाची। 'दर्शपूर्णमासाभ्याम्' इत्यादिविध्यादौ मुख्यविधौ सहकारित्वेनाग्न्या-धानप्रयाजादिविध्यन्तरवदित्यर्थ:- इत्याद्यस्य व्याख्यानं निरस्तम्। अन्तरशब्द-वैयर्थ्यात् स्वारस्यभङ्गात्। सहकार्यन्तरस्य विधिर्विधानमिति व्याख्याने तृतीय-मित्यस्यान्वयाभावात्। पक्षेणेति पदवैयर्थ्यात्। सर्वथा[१] प्राप्त्यभावात्। संन्या-सिनोऽपि निदिध्यासनस्य पक्षेणेति सार्थकमेवेति चेन्न। तथा सति नियमविधित्वा-

१. म. सर्वश:

पत्त्या 'अपूर्वत्वान्मुनित्वस्य विधित्वमाश्रियते।' 'तत्र श्रूयमाणविधित्वेऽ[1]प्य-पूर्वत्वाद् विधिरास्थेय इत्यर्थः' इति भाष्यभामतीभ्यां विरोधात्। त्वदभिमते शाब्दापरोक्षे वैतुष्ये नखविदलनादेरिवोपायान्तरस्याप्राप्तौ[2] नियमविधि-त्वासम्भवाच्च। विध्यादौ प्रयाजादिविध्यन्तरवदिति व्याख्यानस्य शब्दानुगत्य-भावाच्च।

परोक्तकृत्स्नसूत्रव्याख्यानिरासः

''नन्वेवं बाल्यादिविशिष्टकैवल्याश्रमे श्रुतिमति विद्यमाने 'अभिसमावृत्य कुटुम्बी शुचौ देशे स्वाध्यायमधीयानः' (छा. ८.१५.१) इत्यादिना छान्दोग्ये गृहिणोपसंहारः कस्मात् क्रियत इति चोद्यं परिह्रियते। कृत्स्नानां बहुलायास-साध्ययज्ञादीनां शमदमाद्याश्रमान्तरकर्मणामिन्द्रियसंयमनानां च गृहिणः सद्भावात् तेनोपसंहारो युक्तः'' इति द्वितीयव्याख्यानमप्ययुक्तम्। 'ज्ञान-यज्ञास्तपोयज्ञाः' इत्याद्यनेकविधयज्ञेषु केषाञ्चिद् यज्ञानामहिंसेन्द्रियसंयमनादीनां कृत्स्नानां साधनानां संन्यासिनोऽपि सद्भावात्। पश्वालम्भनाद्यभावस्य गृहिणो भिक्षाटनाद्यभाववददोषत्वात्। संन्यासस्योत्तमाश्रमत्वं त्वयाऽपि स्वीकृतमेवेति तद्विरुद्धव्याख्यानायोगात्।

परोक्तमौनसूत्रव्याख्यानिरासः

'यथा मौनं गार्हस्थ्यं चैतावाश्रमौ श्रुतिमन्तौ, एवमितरावपि वानप्रस्थ-गुरुकुलवासौ। ''तप एव द्वितीयः। ब्रह्मचार्याचार्यकुलवासी चेति तृतीयः'' (छा. २.२३.१) इत्युपदेशात्' इति तृतीयव्याख्यानं चायुक्तम्। मौनी गृहिवदिति निर्देशापातात्। इतरेषामिति बहुवचनविरोधाच्च। वृत्तिभेदापेक्षयाऽनुष्ठातृभेदापेक्षया वेति न विरोध इति समाधानं तु गत्यभावविषयम्। पूर्वेष्वधिकरणेषु चतुर्णामप्याश्रमाणां सद्भावस्य सयुक्तिकं सप्रमाणकं चोपपादितत्वात्

१. म. अश्रूयमाणविधित्वेऽपि २. म. अप्राप्त्या

'एतदाश्रमद्वयोपन्यासेन क्वचित् कदाचिदितराभावशङ्का मन्दबुद्धेः स्यादिति तदपाकरणार्थं सूत्रम्' इति भामतीग्रन्थाच्च सूत्रानुन्मेषापत्तेश्च।

केषाञ्चित् सूत्रयोजना क्वचिद्भिन्नाऽपि प्रमेयैक्यात् तद्दूषणेनैव निरस्तेति न पृथग् यत्नः। तस्माद् यथाभाष्यमेवाधिकरणार्थोऽनुसन्धेयो नान्यथेति सिद्धम्।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- ननु यतीनां गृहस्थादित आधिक्यसमर्थनं कथमिह पादे सङ्गतमित्यत आह- **ज्ञाने विशेषाधिकारिणामिति**॥ ज्ञानप्रचुरयोगिनामित्यर्थः ॥ **सर्वाश्रमिभ्य इति**॥ देवानां गार्हस्थ्यादेरव्यवस्थितत्वान्नाऽऽश्रमशब्देन देवगृहस्थानां प्राप्तिः। 'गार्हस्थ्यं च यतित्वं च देवेष्वेकत्वमागतम्' इत्यादेः। तथाच यतिभ्योऽपि देवानामुत्तमत्वसाधनं पुरस्तान्न विरुद्ध्यत इति भावः। उक्तोपष्टम्भकबलादन्तर्भेदाधिकरणमिदमिति सूचयन्नाद्ये वर्णके संशयमाह- **किं सर्वेऽपीति**॥ सर्वेऽपि समा इति पूर्वपक्षमुपपादयति- **[1]अत्र गृहस्थो मुक्ता-विति**॥ इति तावत् पूर्वपक्ष इति वाच्यम्। ग्राह्यम्। अतः कर्मिणामेवोत्तमत्वान्न ज्ञानमतिशयितमित्यतः नैवं निर्णेतुं शक्यम्। गृहस्थे सर्वकर्माधिकारित्ववद् बुहुकालसाधनानुष्ठातृत्वरूपातिशयस्य यतिष्वपि सद्भावात्। तथाच विनिगमना-भावान्न कस्याप्युत्तमत्वनिश्चय इति सर्वेऽपि समा एवेति वाक्यमध्याहरणीयम्। द्वितीयवर्णके तु न वाक्याध्याहार इति द्रष्टव्यम्।

यद्वा, 'यो हि त्वरया साधयेत् स मन्दसुखमाप्नुयात्' इत्यादिविवरण-पर्यालोचनया सामान्यतः कस्यचिदुत्तमत्वसिद्धान्तो ज्ञायत इति न तत्र व्युत्पादनापेक्षेति द्वितीये वर्णकेऽपि भाष्यादिपर्यालोचनया गृहस्थ उत्तम इति सन्देहः स्फुट एवेति।

पूर्वपक्षमाह- **अत्र[2] गृहस्थो मुक्ताविति**॥

१,२. 'तत्र' इति तत्त्वप्रकाशिकायाम्।

आपूर्णविशेषयोग्यतेत्युक्तपूर्वपक्षीयन्यायविवरणस्य व्याख्यानम्

'आपूर्णविशेषयोग्यता' इत्युक्तन्यायं सम्बन्ध्यादिप्रदर्शनेन विवृण्वत्

'नच गृहस्थानामशेषकर्मविशेषयोग्यत्वादाधिक्यं मुक्तौ ।'

इति वाक्यं तात्पर्यतो व्याचष्टे- **तस्य [1]सर्वकर्मस्वधिकारादिति ॥** अशेषेत्युक्तिस्वारस्यं व्यतिरेकमुखेन व्यञ्जयति- **नह्यन्याश्रमिणामिति ॥** तेन न्यायमालायां आङोऽर्थः- अशेषेति । पूर्यते स्वाभिलषितमनेनेति पूर्णं कर्मोच्यते । यतेरपि स्वाश्रमविहिताशेषकर्मस्वधिकारोऽस्तीति तद्व्यावृत्त्यर्थम्- विशेषेति । ज्ञानप्रचुरयोगिनां ज्ञान एव विशेषयोग्यतासद्भावादिति व्याख्यातमिति सूचितम् ।

अत्वरयैव सिद्धिरित्युक्तसिद्धान्तीयन्यायविवरणस्य व्याख्यानम्

'अत्वरयैव सिद्धिः' इत्युक्तन्यायमेवैतदधिकरणसङ्गतत्वेनापि प्रमाणेन विवृण्वत्

'' 'त्वरयैव गृहिणः साधयन्ति मुक्तिमत्वरयैव यतयस्तेभ्यश्चात्वरया देवास्तेषु च ब्रह्मा । तदेषः श्लोकः । शतं परानभिपश्यैव देवं ब्रह्माऽचरद् दुश्चरं यत् तपोऽग्र्यम् । विहाय रागं मनसा चोपरिष्टात्[2] ततोऽभवत् परमेष्ठी स मुक्तौ ॥' इति । 'यो हि त्वरया साधयेत् स मन्दसुखमाप्नुयात् । यो ह्यत्वरया स महत्' इति श्रुतेर्गृहिभ्यो यतीनां तेभ्यो देवानामत्वरया सिद्धेः । बहुकालसाधनाद् बहुकर्माधिकारमात्रस्य दुर्बलत्वात्'

इति वाक्यं वर्णकद्वयपूर्वपक्षमेकयैव सिद्धान्तोक्त्या निराकुर्वन् लेशतो व्याचष्टे- **यतेरेवाऽश्रमेषू[3]त्तमत्वमित्यादिना ॥**

१. 'सर्वसत्कर्मसु अधिकारित्वात्' इति तत्त्वप्रकाशिकायाम् ।
२. म. 'उपरिष्टं', ब. 'मनसश्चापि विष्ठां', क्वचित् 'मनसश्चापि विष्ठाः' इति पाठाः।
३. 'सर्वाश्रमेषु ' इति तत्त्वप्रकाशिकायाम् ।

'तदेषः श्लोकः' इत्यतः प्राक्तनश्रुतिवाक्ये सूचितयुक्तिमाह- **चिरकालसाध्यत्वादिति ॥** 'बहुकर्माधिकारमात्रस्य दुर्बलत्वात्' इत्यन्तिमवाक्यस्य तात्पर्यमाह- **बहुकर्माधिकारमात्रसद्भावेऽपीति ॥** तेन यतितस्त्वरयैव गृहिणो मुक्तिं साधयन्ति । अल्पकालापादितसाधनात् तेषां मुक्तिर्भवतीति तात्पर्यम् । एवमग्रेऽपि ।

सिद्धान्तीयन्यायविवरणाक्षरार्थः

यतयस्तु गृहिभ्योऽत्वरयैव विलम्बेनैव साधयन्ति । ब्रह्मपर्यन्ता देवास्तु तेभ्योऽप्यतिविलम्बेन साधयन्ति । तेषु च तेभ्यश्च चतुर्मुखस्ततोऽतिविलम्बेन मुक्तिं साधयति । यद्वा देवा इति ब्रह्मसहिता उच्यन्ते । तेष्विति निर्धारणे सप्तमी ।

तत् तस्मिन् चतुर्मुखस्यातिचिरकालानुष्ठितसाधनान्मुक्तिरित्यस्मिन् प्रमेये, **एषः** वक्ष्यमाणश्लोकः प्रमाणमिति श्रुतेरेव वाक्यम् ।

ब्रह्मा चतुर्मुखः **यद्** यस्मात् कारणात् **परान् शतं** वत्सरानाकल्पं **देवमभिपश्यैव** अभिपश्यापि **अग्र्यं** स्वयोग्यतापरिमितमोक्षनिदानं अन्यैश्चरितुमशक्यं **तपः रागं विहाय अचरत् । ततः** तस्मादेव कारणात् **स परमेष्ठी** चतुर्मुखः मनसा पञ्चम्यर्थे तृतीया । 'मनसश्चोपरिष्टात्' इति क्वचित् पाठः । **मुक्तौ उपरिष्टाद्** उत्तमो भवेत् इत्येष श्लोकः इति सम्बन्धः ।

बहुकालापादितसाधनसाध्यसुखवत्त्वेऽप्यन्यत आधिक्यं कुतः? इत्यतः श्रुतिरेव स्वयं व्याप्तिमुपपादयति- **यो हीति ॥** 'अत्वरया सिद्धेः' इति स्ववाक्यम् 'मुक्तावाधिक्यं न च' इत्यनेन सम्बन्धः । आपूर्णविशेषयोग्यतान्यायस्य कः प्रतीकार इत्यतः स्वयमाह- **बहुकालेति ॥** इति विवरणं योज्यमिति सूचितम् ।

सूत्रद्वयार्थः

सूत्रार्थस्तु- तुशब्द एवार्थः । ल्यब्लोपनिमित्ता पञ्चमी । कृत्स्ना धर्मा

भवन्त्येष्विति कृत्स्नभावाः देवाः। तानपेक्ष्यैव छान्दोग्ये गृहिणोपसंहारः कृतः। अतो मनुष्यगृह्यपेक्षया यतेरुत्तमत्वे न तेन बाधः।

तर्हि मनुष्ययत्यपेक्षयाऽपि देवानामुत्तमत्वमापतितमित्यतो नास्माकमनिष्टमिति कैमुत्येन देवानामुत्तमत्वं साध्यते 'यथा ह्येते मुनयः' इति। मुनेर्भावः मौनं मुनित्वं दृष्टान्तीकृत्य इतरेषां सर्ववर्णाश्रमधर्माणामप्युपदेशाद् देवानामुत्तमत्वं नानिष्टमिति।

सङ्क्षेपभाष्यस्य एतदधिकरणतात्पर्यपरत्वेन व्याख्यानम्

'विशेषस्तु ज्ञाने स्यादुत्तरोत्तरम्' इत्यत्र ज्ञाने सर्वाश्रम्युत्तमयत्यधिकारिकत्वलक्षणो विशेषः पूर्वोक्तो युक्तः स्यादेव। नच गृहिणोपसंहारविरोधः। यतोऽयमुपसंहारः देवगृहस्थोपसंहारलक्षणो विशेष एव। नच सामान्यगृहिणोपसंहारः। तर्हि यतेरुत्तमत्वं देवानां स्यादिति चेत्। स्यादेव। कुतः? यतस्तेषु यत्यादिकृत्स्नधर्मानुष्ठानलक्षणो विशेषः स्यात्। सोऽपि तेषूत्तरोत्तरम् इति ज्ञान एवायं विशेषो न कर्मणीति योजनयैतदधिकरणतात्पर्यमुक्तं वेदितव्यम्।

॥ इति कृत्स्नभावाधिकरणम्॥ ८॥

॥ अथ अनाविष्काराधिकरणम् (अन्वयाधिकरणम्) ॥ ९॥

सूत्रभाष्यम्

॥ ॐ अनाविष्कुर्वन्नन्वयात् ॐ ॥ ३-४-४९ ॥

'एतां विद्यामधीत्य ब्रह्मदर्शी वाव भवति। स एतां मनुष्येषु विब्रूयात्। यथा यथा ह वै ब्रूयात् तथा तथाऽधिको भवति' इति माठरश्रुतौ विद्यादानं श्रूयते। तच्च बहूनां स्वीकरणार्थमाविष्कारेणेति न मन्तव्यम्। अन्वयाद् युक्तेः। आविष्कारेऽयोग्यानामपि स्वीकारप्राप्तिः। तच्च निषिद्धम्-

'मा नः स्तेनेभ्यो ये अभिद्रुहस्पदे निरामिणो रिपवोऽन्नेषु जागृधुः।[1]
येषां नैतन्नापरं किञ्चनैकं ब्रह्मणस्पते ब्रूहि तेभ्यः कदाचित्॥
अथो शमेनोपरता मनुष्या ये धर्मिणो ब्रूहि तेभ्यः सदा नः।
आ देवानामोहते वि व्रयो हृदि बृहस्पते न परः साम्नो विदुः॥'
(ऋ.सं.२-२३-१६) इति।

'विद्या ह वै ब्राह्मणमाजगाम गोपाय मां शेवधिष्टे[2]ऽहमस्मि।
अनार्यकायानृजवे शठाय न मां ब्रूया[3] ऋजवे ब्रूहि नित्यम्॥'
(मुक्तिको. १.५१) इति च॥ ४९॥

॥ इति अनाविष्काराधिकरणम्॥ (अन्वयाधिकरणम्.पा) ॥ ९॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र भगवत्प्राप्तिसाधनज्ञानस्यातिगोप्यत्वमहिम्नः समर्थनादस्ति

१. इत आरभ्य ब. पाठे- 'विदुः' इत्यन्तो भागो नास्ति।
२. ब. शेवधिस्ते ३. ब. मा स्म ब्रूयाः।

शास्त्रादिसङ्गतिः। अन्यथाऽतिशयाभावप्रसङ्गात् समर्थनीयमेतत्। प्रकृतापरोक्षज्ञानसङ्गतं परोक्षज्ञानमत्र विषयः। तत् किमाविष्कारेणोपदेष्टव्यं न वेति सन्देहः। उभयथा सम्भवः सन्देहबीजम्।

पूर्वपक्षः

आविष्कारेणेति पूर्वः पक्षः। आविष्कारेणैवोपदेशेऽशेषज्ञानयोग्यानां ज्ञानलाभसम्भवात्। बहूनामुपदेशे चोपदेष्टुः फलाधिक्यसिद्धेः। 'यथा यथा ह वै ब्रूयात् तथा तथाऽधिको भवति' इति श्रुतेः। अत आविष्कारेण ज्ञानस्योपदेष्टव्यत्वात् तस्य रहस्यत्वातिशयो न सिद्ध्यतीति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **अनाविष्कुर्वन्निति**॥ यतः श्रुतौ विद्यादानस्याऽधिक्यानुसारेण फलप्रदमुच्यतेऽतोऽधिकफलार्थं बहूनां स्वीकरणाय तदाविष्कारेण कार्यमिति न मन्तव्यम्। किं त्वनाविष्कुर्वन्नेवोपदिशेदित्येतत् कुत इत्यतः सौत्रं हेतुमुपादाय व्याचष्टे- **अन्वयादिति**॥ काऽसावुपपत्तिरित्यत आह- **आविष्कार इति**॥ भवेदेतद् यद्याविष्कारेणोपदेशे योग्यानामेव ज्ञानप्राप्तिर्भवेद्। नचैवम्। सभाचत्वरादावुपविश्योपदेशेऽयोग्यानामपि तत्प्रसङ्गादिति भावः।

नन्वयोग्यानां ग्रहणप्रसङ्गेऽपि कुतोऽनाविष्कारेण वाच्यमित्यत आह- **तच्चेति**॥ तच्चायोग्येभ्यः कथनम्। एतद् वायुं प्रति विद्यादेवतानां प्रार्थनम्। येऽभितो द्रोहास्पदेऽन्धे तमसि स्थातुं योग्या रामविरुद्धास्तत एव तस्य रिपवो भोगेष्वेवाऽकाङ्क्षावन्तो येषामेतत्परं ब्रह्म तदवरं जगच्च नास्ति किन्तु किञ्चन एकं ब्रह्म अनिर्वाच्यं च जगत् तेभ्यः स्तेनेभ्योऽस्मान्मा ब्रूहि। किं नाम? ये विष्णुनिष्ठतया तस्मिन्नेव रता ये च देवानां वरत्वे सति नियामकं ब्रह्म हृदि

वहन्ति ततः परं च न विदुस्तेभ्यो ब्रूहित्यर्थः। ब्राह्मणं वायुम्। शेवधिर्निधिः। तितिक्षवः कारुणिका इत्याद्यार्यलक्षणरहितोऽनार्यकः। ऋजव इत्यार्यकाद्युपलक्षणम्। अविपरीतचित्तादिप्रवृत्तिमान् ऋजुः। अतोऽनाविष्कारेण ज्ञानस्योपदेष्टव्यत्वाद् युक्तस्तस्यातिशय इति सिद्धम्॥ ४९॥

॥ इति अनाविष्काराधिकरणम्॥ (अन्वयाधिकरणम्.पा)॥ ९॥

शेषतात्पर्यचन्द्रिका

॥ अथ अनाविष्काराधिकरणम् (अन्वयाधिकरणम्)॥ ९॥

॥ ॐ अनाविष्कुर्वन्नन्वयात् ॐ॥ ३-४-४९॥ अ० ९॥

सङ्गतिः

अत्रापरोक्षज्ञानस्यातिगोप्यत्वरूपमाहात्म्यसिद्ध्यर्थं तज्जनकपरोक्षज्ञानानुकूलाचार्योपदेशः विविक्ते प्रदेशे[१] अनाविष्कुर्वतैव कर्तव्यः। ननु सभाचत्वरादौ स्थित्वाऽऽविष्कारेणेत्यत्र समर्थ्यत इति पादसङ्गतिष्टीकायामेव स्पष्टा।

ननु प्रयतत्वाद्धि यतेरुत्तमत्वं पूर्वाधिकरणे साधितम्। 'अप्रयतत्वं हि प्रायो गृहस्थादीनामितरकर्मसूद्योगात्' इत्युक्तेः। तथाच सभाचत्वरादिषु स्थित्वा तत्त्वं प्रकटयन् तत्त्वोपदेशादिप्रयत्नोऽपि स्यादित्युत्थानादनन्तरसङ्गतिः।

विषयसंशयौ

प्रकृतमपरोक्षज्ञानं विषयः। अतिगोप्यं न वेति सन्देहः। तदर्थं तज्जनकं परोक्षज्ञानं गोप्यं न वा। तदर्थं तज्जनकस्तत्त्वोपदेश आचार्येण सभाचत्वरासु स्थित्वा प्रकटमेव कर्तव्य उत तद्वैपरीत्येनेति।

---

१. म. विविक्तप्रदेशे।

पूर्वः पक्षः

तत्र -

'यथा यथा ह वै ब्रूयात्' इत्यादेर्गुरुणा भृशम्।
उपदेष्टव्यमेतस्माद् बहूनां ज्ञानसिद्धितः ॥ इति पूर्वः पक्षः।

सिद्धान्तः

अनाविष्करणेनैव तत्त्वादेशो भवेद् यतः।
अयोग्यानामपि ज्ञानप्राप्तिर्दोषाधिका भवेत्॥ इति सिद्धान्तः।

उभयोरनाविष्काराधिकरणशरीरम्

अत्रोभयेऽपि 'बाल्येन तिष्ठासेत्' (बृ. ३.५.१) इत्यत्र बाल्यमनुष्ठेयतया श्रूयते। तत्र बालस्य भावः कर्म वा बाल्यमिति तद्धिते सति बालभावस्य वयोविशेषस्येच्छया सम्पादयितुमशक्यत्वाद् बालस्य कर्मैव तद्धितार्थः। तत् किं कामचारवादभक्षता[1], किं वा भावशुद्धिः दम्भदर्पादिरहिताप्ररूढेन्द्रियत्वादीति[2] संशये पूर्वं मौनशब्दस्य ज्ञानातिशये प्रसिद्धिमाश्रित्याप्राप्तमौनविधिराश्रितः। एवमत्रापि बाल्यशब्दस्य कामचारादौ प्रसिद्धेः कामचाराद्येव विधीयते। नहि शुद्धभावेऽपि तपस्विनि बालशब्दं वृद्धाः प्रयुञ्जते।

सकलं बालचरितमसङ्कोचाद् विधीयते।
अविद्वद्विषयत्वेन न निषेधैर्विरुद्धता॥

सामान्यविषयं हि शौचादिनियमविधानम्। निषेधशास्त्रं चानेन विशेषविधानेनाविद्वद्विषये व्यवस्थाप्यतामिति[3] प्राप्तेऽभिधीयते-

ज्ञानाङ्गत्वेन बाल्यस्य विधिः शिष्टाविरोधिनी।
शास्त्रान्तराविरुद्धा च भावशुद्धिर्विधीयते॥

१. 'कामचारवादभक्षणता' इति ज्ञा.भाष्ये।
२. म. डम्भदर्पाप्ररूढेन्द्रियत्वात्
३. म. व्यवस्थाप्यम्

'बाल्यं निर्विद्याथ मुनिः' (बृ. ३.५.१) इति क्त्वाप्रत्ययेन ज्ञानातिशयात्मकमौनं प्रति बाल्यमङ्गत्वेन, मौनं च प्रधानत्वेनावगतम्। नच यथेष्टचर्यया प्रधानसिद्धिः। तस्माच्छिष्टानुग्रहाय भावशुद्धिरेव बाल्यं विधीयते। एवं च नियमशास्त्रमपि न सङ्कोच्यम्।

यद्यपि केवलायां भावशुद्धौ बाल्यशब्दो न प्रसिद्धः। तथाऽपि कामचारादिमति बाले भावशुद्धिरस्ति। तावन्मात्रपरतया बाल्यशब्द उक्तहेतुद्वयवशेन सङ्कोच्य इति।

तन्निरासः

तत्र। एवंविधसङ्गतेः सर्वत्र सुलभत्वेनासङ्गतिवार्तोच्छेदप्रसङ्गात्। किञ्च जिज्ञासोः 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' (ब्र.सू. ३.४.२६) इत्यधिकरणे कामचारादेर्निषेधात् कथं पूर्वपक्षः? ज्ञानिनस्तु 'कुर्वन्नेवेह कर्माणि' (ईश. १) इत्यादिश्रुत्या कर्मलेपाभावाङ्गीकारेण कामचारादेः सिद्धान्ततया पूर्वपक्षत्वानुपपत्तेः। मौनशब्दस्य ज्ञानातिशयपरत्वे शास्त्रान्तरविरोधाभावेन प्रसिद्धेरबाधेऽपीह संन्यासिनोऽपि कामचारादौ पातित्यस्य प्रायश्चित्ताभावादेश्च बहुभिरधिकरणैरुपपादितत्वेन शास्त्रान्तरविरोधेन च प्रसिद्धिबाधेनार्थान्तरस्यैव ग्राह्यतया [1]पूर्वन्यायोपजीवनेनाऽक्षेपायोगाच्च। योगे वा बाल्यशब्दस्य भावशुद्धिपरत्वाङ्गीकारेण सिद्धान्तायोगः। बाल्यपाण्डित्यमौनशब्दानां श्रवणमनननिदिध्यासनपरतया पूर्वाधिकरणे व्याख्यातत्वात्।

किञ्च, त्वदीयपञ्चमाध्यायगतपञ्चमब्राह्मणबृहदारण्यकभाष्ये 'एषणाभ्यो व्युत्थाय ज्ञानबलभावेन तिष्ठासेत् स्थातुमिच्छेत्' इति व्याख्यानाद् बलस्य भावो बाल्यमिति विग्रहस्यैव स्वीकृतत्वेन 'बालस्य भावः कर्म च' इत्यादिविग्रहमाश्रित्य पूर्वपक्षसिद्धान्तयोः कथं प्रवृत्तिः स्यात्। प्रस्थानान्तरत्वाददोष इति चेन्न।

१. क. 'पूर्वपक्षोपजीवनेन'

असम्भवात्। व्याख्यानं सूत्रं, व्याख्येयं चेदं वाक्यम्। नहि व्याख्यानव्याख्येययोः प्रस्थानान्तरत्वम्।

एतेन,

'यं न सन्तं नचासन्तं नाश्रुतं न बहुश्रुतम्।
न सुवृत्तं न दुर्वृत्तं वेद कश्चित् स ब्राह्मणः ॥
गूढधर्माश्रितो विद्वानज्ञातचरितं चरेत्।
अन्धवज्जडवच्चापि मूकवच्च महीं चरेत् ॥'

इत्यादिस्मृत्या भावशुद्ध्यादि[१] ज्ञानिनो विधीयत इति निरस्तम्। बाल्यशब्देनैतेषां ग्रहणे प्रमाणाद्यनुक्तेः।

यच्च 'ज्ञानाध्ययनधार्मिकत्वादिभिरात्मानमनाविष्कुर्वन् अज्ञापयन् डम्भदर्पादिरहितो भवेत्। एवं ह्यस्य वाक्यस्य त्त्वाप्रत्ययावगतमौनप्राधान्यान्वय उपपद्यते; अन्यथा कामचारादेः ज्ञानातिशयविरोधित्वेन तयोरङ्गाङ्गिभावानुगमो न स्यात्।' इति सूत्राक्षरार्थकथनं, तदप्ययुक्तम्। प्रमाणस्य प्रमेयगत्यव्यवहित-साधनत्वादियुक्त्या श्रवणस्याङ्गित्वेन निदिध्यासनस्याङ्गत्वेन च समन्वयसूत्रे त्वन्मते निर्णीतत्वात्। अयोग्यव्यावृत्त्यादेरवश्यापेक्षितस्य मद्रीत्या प्रतिपादन-सम्भवे फल्गुपूर्वपक्षनिरासकतया व्याख्यानायोगाच्च।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु-

॥ **अतिगोप्यत्वेति** ॥ यथा स्वस्मिन्नपरोक्षज्ञानं वर्तत इति परो न जानीयात् तथा विधानमित्यर्थः।

ननु परमत इव नास्माकं मतेऽपरोक्षज्ञानं शब्दजन्यम्। येन तदुच्चारण-रूपोपदेशः आविष्कारेण कर्तव्यो न वेति चिन्ता स्यात्। किन्तु परोक्षज्ञान-

१. म. भावशुद्ध्यादिः

जन्यम्। अतः कथं चिन्ता प्रवर्तेतेत्यतो विषयमाह- **प्रकृतापरोक्षेति** ॥ परोक्ष-ज्ञानं परोक्षज्ञानसाधनं शास्त्रमित्यर्थः । शास्त्रे ज्ञानपर्यायस्य विद्याशब्दस्य प्रयोगात्। अन्यथा 'तत् किमाविष्कारेणोपदेष्टव्यं न वा' इत्युत्तरग्रन्थानुपपत्तेः। नहि ज्ञानमुपदेशस्य कर्मेति ध्येयम्।

आपूर्णविशेषयोग्यतेत्युक्तपूर्वपक्षीयन्यायविवरणम्

'आपूर्णविशेषयोग्यता' इत्युक्तन्यायं हेतुसाध्यप्रदर्शनेनैतदधिकरण-सङ्गतत्वेनापि विवृण्वत्

'नचाऽविष्कारेण कथनादशेषतोऽपि योग्या ज्ञानिनो भवन्तीत्यास्थान-चत्वरादिषु स्थित्वैव प्रकथनीयम्।'

इति वाक्यं तात्पर्यकथनेन व्याचष्टे- **आविष्कारेणेति पूर्वः पक्ष इति** ॥ तेन 'आस्थानचत्वरादिषु स्थित्वैव प्रकथनीयम्' इत्यस्यार्थ उक्तो भवति । 'आविष्कारेणोपदेशः' इत्यनेन 'आविष्कारेण कथनात्' इत्यस्य, 'अशेषज्ञान-योग्यानां ज्ञानलाभसम्भवात्' इत्यनेन 'अशेषतोऽपि योग्या ज्ञानिनो भवन्ति' इत्यस्य, पञ्चमीप्रयोगेन इतिशब्दस्येति विवेक्तव्यम्। ज्ञानिन आपूर्णविशेषयोग्यता यतो भवति तस्मादास्थानादिषु न प्रकथनीयम् इति न्यायस्य विवरणप्रकारोऽपि द्रष्टव्यः। अत्रैव हेत्वन्तरपरतया भाष्यं व्याचष्टे- **बहूनामुपदेशे चेति** ॥

अत्वरयैव सिद्धिरित्युक्तसिद्धान्तीयन्यायविवरणम्

'अत्वरयैव सिद्धिः' इत्युक्तन्यायमेतदधिकरणसङ्गतत्वेनापि विवृण्वत्

'नह्येवं त्वरमाणे सिद्धिर्भवति। अयोग्यानामपि श्रवणप्रसङ्गात्। तस्माद् विचार्य योग्यानामेवात्वरयैव कथयित्वा सिद्धिर्भवति। ''त्यक्त्वा त्वरां ब्रह्मविद्यां वदेत जनाय योग्याय सदैव विद्वान्'' इति श्रुतेः। ''मा नः स्तेनेभ्यः'' इत्यादि-श्रुतेश्च[१]।'

१. ब. इत्यादेश्च

इति वाक्यं सौत्रान्वयपदविवक्षितयुक्तिप्रदर्शनपरम् इत्यभिप्रेत्य व्याचष्टे- [१]**भवेद् यदीति** ॥ हिशब्दश्चेदित्यर्थः। तस्यार्थो- **यदीति** ॥ एवं त्वरमाण इत्यस्यार्थः- **आविष्कारेणोपदेश इति** ॥ 'सिद्धिर्भवति' इत्यस्यार्थः- **योग्यानामेव ज्ञानप्राप्तिर्भवेदिति** ॥ नैवम् इत्यस्यार्थः- **नचैवमिति** ॥ 'अयोग्यानामपि श्रवणप्रसङ्गात्' इत्यस्यार्थः- **अयोग्यानामपि तत्प्रसङ्गादिति** ॥ 'त्यक्त्वा त्वरां ब्रह्मविद्यां वदेत' इत्यादिप्रमाणोदाहरणांशं भाष्येण सह व्याख्या-तुमवतारयति- **नन्वयोग्यानामिति** ॥ तथाचैवं त्वरमाणे योग्यानामेव ज्ञान-सिद्धिः, नत्वयोग्यानामिति नियमसिद्धिर्यदि भवेत् तदाऽशेषज्ञानयोग्यानां ज्ञानलाभसम्भवादाविष्कारेण कर्तव्यं स्यात्। एवं त्वरमाणे सभाचत्वरादिषु स्थित्वा प्रकथनेऽपि श्रवणतज्जन्यज्ञानादिप्रसङ्गाद् अयोग्योपदेशापराधेनेष्ट-सिद्धिर्न भवति तर्ह्युपदेशेनैवालमिति शङ्कामुपसंहारव्याजेन परिहरति- **तस्माद् विचार्य योग्यानामेवेति** ॥ सहवासादिना तल्लक्षणैस्तदीययोग्यतां सम्यगनुमाय तदीययोग्यतानिश्चयदार्ढ्यानुसारेणैकस्मिन् सामान्यतस्तत्त्वस्योपदेशः, ततोऽन्यस्मिन् किञ्चिदुपपादनम्। ततः परस्मिन् दृढोपपादनमित्यादिक्रमेणैव सदाऽत्वरयैव कथयित्वाऽऽस्थितस्य पुंसो मोक्षलक्षणसिद्धिर्भवति। अन्यथाऽयोग्योपदेशादिनाऽपराधेन न सिद्धिर्भवतीति विवरणवाक्ययोजना।

ब्रह्मणा विरोचनं प्रत्युपदेशस्यादोषत्वम्

ननु 'सर्वथाऽपि तु त एव' इत्यधिकरणेऽयोग्यानां ज्ञानप्राप्तिनिषेधादाविष्कारेणोपदेशेऽपि ये योग्यास्तेषामेव ज्ञानलाभो नेतरेषाम्। तथाचायोग्य-ज्ञानदानप्रयुक्तापराध उपदेष्टुः कथं स्यात्। दृष्टं च विरोचनं प्रत्युपदेशनं ब्रह्मण इति चेत्। मैवम्[२]। यतोऽयोग्यानां दुरवबोधश्रुत्यभिप्रायो न ज्ञायते सम्यङ् महाप्रयत्नेनापीत्युक्तम्। नतु स्पष्टस्य पौरुषेयवाक्यस्येति। तथाचायोग्यं प्रति

२. 'भवेदेतद् यदि' इति तत्त्वप्रकाशिकायाम्। २. म. नैवम्

निरातङ्कं [१]स्पष्टमुदीरितं वाक्यं व्युत्पन्नस्य कुतः सम्यगर्थावबोधं न जनयेत्। अत एव चतुर्मुखोऽस्पष्टेन श्रुतिवाक्येनैवोपदिदेश। तथाच सभादौ स्थित्वा विस्पष्टोपदेशेऽयोग्यानामपि ज्ञानलाभो भवत्येवेति उपदेष्टुः प्रत्यवायोऽपि सिद्ध्यति[२]।

किञ्च यथा शूद्रसन्निधौ वेदानुच्चारयितुर्वेदग्रहणार्थावधारणादेः शूद्रस्याभावेऽपि तच्छ्रवणमात्रसम्भवेन तत्कृतः प्रत्यवायः शास्त्रीयः, तथाऽयोग्य-जनसन्निधौ क्रियमाणस्तत्त्वप्रसङ्गस्तच्छ्रुतिपथगमनमात्रेण प्रत्यवायहेतुः स्यादित्यलम्।

सर्वेऽपि योग्यजनाः सभादौ स्थित्वोपदेशे क्रियमाणे तेन च ज्ञाने जाते पुरुषार्थभाजः स्युरित्यत्र न संशयः। तथाऽप्ययोग्यानां ज्ञाने जाते प्रत्यवायाख्यो विशेषः स्यादेवेति 'विशेषस्तु ज्ञाने स्यादुत्तरोत्तरम्। सर्वेऽपि पुरुषार्थाः स्युर्ज्ञानादेव न संशयः ॥' इति सङ्क्षेपभाष्यस्यार्थो ज्ञातव्यः।

॥ इति अनाविष्काराधिकरणम् ॥ (अन्वयाधिकरणम्) ॥ ९ ॥

१. क. स्पष्टतरम् २. म. सिद्धः।

॥ अथ ऐहिकाधिकरणम् ॥ १० ॥

सूत्रभाष्यम्

॥ ॐ ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॐ ॥

॥ ३-४-५०॥

'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ.उ.४-४-५) इति दर्शनार्थं श्रवणादि विधीयते। तच्च दर्शनमैहिकमेव प्रारब्ध-प्रतिबन्धाभावे।

'श्रुत्वाऽऽत्मानं मतिपूर्वं ह्युपास्य इहैव[1] दृष्टिं परमस्य विन्देत्।
यद्यारब्धं कर्म निबन्धकं स्यात् प्रेत्यैव पश्येद् योगमेवान्ववेक्ष्य ॥'
इति सौपर्णश्रुतौ तद्दर्शनात्[2]।

'अनादिजन्मसम्बन्धं[3] निर्भेत्तुं पापपञ्जरम्।
यावत्या सेवया शक्यं तावत् कार्यं न संशयः ॥
यावद् दूरे स्थितो गम्यात् तावद् गन्तव्यमेव हि।
इह जन्मान्तरे वाऽपि तावत्यैव तु दर्शनम् ॥
श्रवणं मननं चैव निदिध्यासनमेव च।
परे गुरौ च या भक्तिः परिचर्यादिकं हरेः।
एषा सेवेति सम्प्रोक्ता यया तद्दर्शनं भवेत् ॥'
इति बृहत्संहितायाम्[4] ॥ ५० ॥

॥ इति ऐहिकाधिकरणम् ॥ १० ॥

---

१. ब. ह्युपास्यैहैव २. ब. दर्शनात्
३. ब. अनादिजन्मसम्बद्धं ४. ब. इति च बृहत्संहितायाम्

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्रेश्वरप्राप्तिसाधनज्ञानस्य प्रतिबन्धाभावे साधनसम्पत्तिजन्मन्येवोदय-समर्थनादस्ति शास्त्रादिसङ्गतिः। अन्यथा कदाऽपि तदनुदयप्रसङ्गादेतत् समर्थनीयम्। प्रकृतं ज्ञानमेव विषयः। किं साधनसम्पूर्तिजन्मन्येव भवति किं वा जन्मान्तर इति सन्देहः। कृष्यादौ यागादौ चोभयथादर्शनं सन्देह-बीजम्।

पूर्वपक्षः

साधनसम्पूर्तिजन्मन्येव दर्शनं भवतीति पूर्वः पक्षः। साधनसम्पूर्तावपि ज्ञानानुदये कारणाभावात्। नच स्वर्गादिवदुपपत्तिः। तस्यैतच्छरीरेण भोगायोगात् तत्पातानन्तरं प्राप्त्युपपत्तेः। नचात्र तादृशं कारणमस्ति। अतो ज्ञानस्यैहिकत्वेन प्राप्तत्वात् तदभावाच्च तदनुदय एवेति।

सिद्धान्तः

सिद्धान्तयत् सूत्रं पठित्वा व्याचष्टे- **ऐहिकमिति** ॥ श्रुतौ यद्ब्रह्मदर्शनार्थं यच्छ्रवणादि विधीयते तच्च दर्शनं तेषां श्रवणादीनां सम्पूर्तिजन्मन्येव भवतीति न नियमः। किन्तु जन्मान्तरेऽपि भवति। नचोक्तदोषः। प्रारब्धकर्मसद्भावे जन्मान्तरे, तदभावे त्वैहिकमेवेत्यभ्युपगमात्। तत् कुतः? 'श्रुत्वा' इति श्रुतेरेवेति भावः। 'योगमेवान्ववेक्ष्य' इति पुनः किञ्चिच्छ्रवणादिकमपे-क्ष्यैवेत्यर्थः। अत्र स्मृतिं चाऽऽह- **अनादीति** ॥ कथं सेवया ज्ञानैकसाध्यः पापपञ्जरनिर्भेद इति तत्राऽऽह- **इहेति** ॥ श्रवणाद्येकसाध्यं ज्ञानं कथं सेवया स्यादित्यत आह- **श्रवणमिति** ॥ नचायमेव सर्वत्र सेवाशब्दार्थः किन्तु ज्ञानसाधनविषय एवेत्युच्यते- **ययेति** ॥ अतो ज्ञानस्यैहिकत्वान्नोक्तानुप-पत्तिरिति सिद्धम् ॥ ५० ॥

॥ इति ऐहिकाधिकरणम् ॥ १० ॥

शेषतात्पर्यचन्द्रिका

॥ अथ ऐहिकाधिकरणम्॥ १० ॥

॥ ॐ ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॐ ॥ ३-४-५० ॥

सङ्गतिः

एवमभ्यर्हितत्वादाकाङ्क्षावशाद्[१] बहुत्वाच्च नवाधिकरण्याऽसाधारण-पेटिकयाऽनितरसाधारणानि माहात्म्यानि निरूप्यावशिष्टाधिकरणद्वयेन साधारणमाहात्म्यं निरूप्यत इति पेटिकासङ्गतिः।

नन्वत्र ज्ञानस्य साधनसम्पूर्तिजन्मन्येव कृष्यादिसम्पत्तिजन्मनीव धान्यादेः प्राप्तिनियमो नास्ति। यागादिसम्पतेर्जन्मान्तर एव स्वर्गादेः प्राप्तिः, न पुनस्तस्मिन् जन्मनीति यथा नियमस्तथा नियमोऽपि नास्तीति प्रतिपादनादैहिकत्वादिनियमाभावो माहात्म्यं प्रतिपाद्यत इति प्रतिभाति। तथाच कथं साधारणपेटिकायां सङ्गतिरिति चेन्न। अदृष्टफलेषु स्वर्गादौ तथाविधनियमदर्शनेऽपि दृष्टफलेषु भूत्यादेः प्रतिबन्धककर्माभावे भूतिसाधनयागादि-सम्पत्ति-जन्मन्येव 'अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते' (म.भा.) इति वचनादुदयस्य, तत्सद्भावे जन्मान्तरे तदुदयस्य चाङ्गीकारेणैहिकत्वनियमाभावरूपमाहात्म्यस्यानितरसाधारणत्वाभावात्। तथाच युक्तैवास्य साधारणपेटिकायां सङ्गतिः।

पूर्वपक्षः

अत्र भगवच्छास्त्रमतिगोप्यम्। अन्यथाऽयोग्यानामपि शास्त्रोपदेशेन ज्ञानोदयलक्षणप्रत्यवायप्रसङ्गादित्युक्तमयुक्तम्। शास्त्रज्ञानयोः कार्यकारणभावस्यैवायोगात्। नहि शास्त्राभ्यासजन्मनि ज्ञानोदयो दृश्यते। दृश्यते केषाञ्चिदिति चेत्, किं तावता। येषु न दृश्यते तेषु व्यभिचारापरिहारात्।

१. म. आकाङ्क्षावकाशात्

ननु नायमस्ति व्यभिचारः स्वर्गादिर्यागाद्यनुष्ठानजन्मन्यनुत्पत्तावपि तयोः कार्यकारणभावः दृश्यते। यदि स्वर्गादेरिहोपलब्धुमयोग्यत्वात् साधनव्यभिचारो न दोष इत्युच्यते तर्हि इहापि तथाऽस्तु। मैवम्। स्वर्गादेरिहोपलब्धुमयोग्यत्वस्य प्रमाणसिद्धत्वेन तच्छरीरपातानन्तरमेव यागादिकं साधयतीत्येव शास्त्रार्थपर्यवसानेन तत्र शास्त्रबोधितकारणभावस्य व्यभिचाराभावेऽपीह तथाविधकारणविशेषाभावेन व्यभिचारस्यापरिहार्यत्वात्। अथापि तद्देहपातानन्तरमेव शास्त्राभ्यासादिना ज्ञानमुदेति नत्विहैवेति कल्प्यते। 'स तपस्तप्त्वा। अन्नं ब्रह्मेति व्यजानात्' (तै.३.२) इति केषाञ्चिद् इहैव तदुदयदर्शनेन पुनर्व्यभिचारानुद्धार एव।

तस्माज्जन्मान्तरे ज्ञानमिति तज्जन्मनीति च।
श्रोतव्य इति वाक्यार्थे व्यभिचारो दुरुद्धरः॥

इति उत्थानादनन्तरसङ्गतिः।

सिद्धान्तः

सिद्धान्तस्तु -

श्रुत्वाऽऽत्मानमिति व्याख्याऽत इह च प्रत्यचेष्यते[१]।
श्रवणादेर्ज्ञानमिति वाक्यार्थोऽत्रावधार्यते॥
यदा तदा कथं ज्ञाने श्रवणव्यभिचारिता।
यदा कदाचिज्ज्ञानस्य चोत्पत्तेः स्वीकृतत्वतः॥ इति।

परेषामधिकरणशरीरम्

अन्ये तु 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' (ब्र.सू. ३.४.२६) इत्यारभ्य यज्ञादि शमादि श्रवणादि चोच्चावचं विद्यासाधनमवधारितम्। तत्फलं विद्या सिद्ध्यन्ती किमिहैव जन्मनि सिद्ध्यति उत कदाचिदमुत्रापीति चिन्त्यते।

१. क. प्रेत्य चेष्यते

वेदेनेच्छोपयोगित्वाद् यज्ञादेरविधानतः।
श्रवणादेश्च तज्जन्या विद्याऽत्रैव भवे भवेत्॥

न तावद् यज्ञादेर्विद्यासाधनत्वम्। एवं सत्यविधेयत्वेन तत्तत्फलस्य साक्षात्कारस्योत्पत्तिरिहामुत्र[1] वा भवेत्। किन्तु विविदिषायां साधनत्वम्। सा च जातैव। अन्यथा श्रवणादौ प्रवृत्त्ययोगात्। श्रवणादि च न विधेयमित्युक्तम्। तस्माद् भुक्तिफलतृप्तिवच्छ्रवणादिफलं विद्याख्यमप्यैहिकमेवेति प्राप्तेऽभिधीयते-

श्रवणादेः फले विद्याजन्मनि प्रतिबन्धकम्।
अघं निहन्ति यज्ञादि प्रतिबन्धोऽस्ति तस्य च॥
तद्ध्वंसानियतत्वेन यज्ञाद्यनियतं फले।
तत्सापेक्षत्वतो विद्या नैहिक्येव नियोगतः॥

इह हि 'श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यन्न विद्युः।' (कठ. २.७) इति शास्त्राद् यथा श्रवणादिस्वरूपनिष्पत्तये सत्त्वशुद्धिद्वारा विद्यायामभिरुचिः श्रवणादिप्रवृत्तिप्रतिबन्धकपापनिरासश्च यज्ञादिभिः कर्तव्यौ, एवं श्रवणादिना साक्षात्कारोत्पत्तये च यज्ञादिभिररुचिपापनिरासौ कर्तव्यौ। एवं च यज्ञादिभिरपि सत्त्वशुद्ध्यादिना श्रवणादिषूत्पादितेष्वपि विरोधिकर्मान्तरैः प्रारब्धफलैर्विद्याप्रतिबन्धाप्रतिबन्धौ सम्भाव्येते। तेनानियतफलयज्ञादिसापेक्षत्वाद् विद्याया नैहिकत्वनियम इति। इति।

तन्निरासः

तन्न। 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन' (बृ. ६.४.२२) इत्यादिश्रुतौ विविदिषया संयोगात् तस्याश्चेच्छारूपायाः कामनाविषयत्वाभावे उद्देश्यत्वानुपपत्त्या रुचिपरत्वमभ्युपेत्य तदुद्देशेन यज्ञादेः

१. क. अमुत्रैव

प्राचीनेष्वधिकरणेषु विधानाङ्गीकारेऽपि विद्यास्वरूपनिष्पत्तौ प्रमाणत्वाच्छ्रवणादेरेव हेतुतया तद्धेतुयज्ञादेर्विद्योत्पत्तौ साधनत्वायोगात्। येन यज्ञादेरनियतफलत्वाद् विद्याया अप्यनियतत्वं स्यात्। नच प्रारब्धफलैः कर्मान्तरैर्यज्ञाद्युपपादितश्रवणादिफलप्रतिबन्धात् तन्निरासाय पुनर्यज्ञादिरपेक्षित इति वाच्यम्। भोगादिनाऽपि तन्नाशसम्भवात् यज्ञादेः साक्षात्कारेऽप्यावश्यकत्वव्युत्पादनप्रयासायोगात्।

अत एव 'श्रवणायापि बहुभिर्यो न लभ्यः' (कठ. २.७) इत्यादिश्रुत्या श्रवणादिभिः साक्षात्कारोत्पत्तये यज्ञाद्यपेक्षेति च निरस्तम्। यज्ञादिसंयोगाभावात्। तन्नित्यकर्मान्तरप्रतिबन्धाश्रवणाच्च। प्रारब्धकर्मवतां बहुभिः श्रवणैरपि न लभ्य इति योजनायां[1] 'आश्चर्योऽस्य वक्ता' (कठ. २.७) इत्युत्तरार्धोक्तहेतुविरोधः। अत एव 'शृण्वन्तोऽपि बहवो यन्न विद्युः' (कठ. २.७) इत्यत्र को हेतुरिति उच्यते- आश्चर्य इति। 'यथावदात्मनो वक्ताऽऽश्चर्यः। अद्भुतवत् कश्चिदेव भवति' इति कल्पतरूक्तिरपि न प्रतिबन्धककर्मसद्भावं गमयति। अथ च कल्पने यज्ञादीनां शमदमादितुल्यत्वापत्त्या पूर्वोक्तमन्तरङ्गत्वबहिरङ्गत्वादिवैलक्षण्यं तयोर्न स्यात्। एवमेव विद्ययाऽपवर्गे जनयितव्ये प्रारब्धकर्मप्रतिबन्धकसद्भावात्[2] तन्निरासायापि यज्ञाद्यपेक्षायां फलोपकार्यङ्गत्वापत्त्याऽश्वदृष्टान्तेन स्वोत्पत्तावपेक्षितत्वेऽपि स्वफलेऽनपेक्षालक्षणस्य पूर्वोक्तस्य सन्निपत्योपकारकत्वस्यायोगापत्तेश्च।

किञ्च श्रवणादेः प्रमाणरूपस्य प्रमेयावगतिं प्रत्यव्यवहितसाधनत्वेन न मध्ये यज्ञाद्यपेक्षा- इत्यस्य कः परिहारः? कथं च श्रवणादेस्त्वन्मतेऽविधेयस्यानियतफलत्वम्। विधाने हि यज्ञादिवददृष्टादिसापेक्षत्वेन तद्विलम्बाद् विलम्बः सम्भाव्येत। तथाच यज्ञादेः श्रवणादेर्वा साक्षात्कारसाधनतया विधानसामर्थ्यात्

१. म. योजनायाः। २. म. प्रतिबन्धसद्भावात्

तत्फलमामुष्मिकमित्येव सिद्धान्तयितव्यम्। तत्रोक्तरीत्या यज्ञादेर्न विधिः। श्रवणादेस्तु समन्वयसूत्रे स्वयमेव वाचस्पतिना विचारज्ञानयोः कार्यकारण-भावस्यान्वयव्यतिरेकतः लोकसिद्धत्वाद् विधानं निराकृतमिति कथं सिद्धान्त-प्रवृत्तिरिति स्वयमेव विभावय। तथाच

विधिसामर्थ्यमाश्रित्य ब्रुवन्नामुष्मिकं फलम्।
श्रवणादेः कथङ्कारं वाक्पतिः स्याद्धि तद्वदेत्॥

इत्युपहासः सुदृढ एव।

किञ्च दृष्टफलस्याऽमुष्मिकफलत्वमदृष्टापेक्षत्वं च न क्वचिदुपलब्धम्। 'प्राग्भवीयगान्धर्वशास्त्राभ्यासस्येह षड्जादिस्वरूपसाक्षात्कारहेतुभावस्य देवताप्रणिधानाद्यपेक्षायाश्चोपलम्भात्' इति कल्पतरूक्तेर्नैष दोष इति चेन्न। गान्धर्वादिशास्त्राभ्यासस्य शब्दप्रमाणरूपत्वेन स्वरसाक्षात्कारजनकत्वा-योगात्। शाब्दापरोक्षप्रत्याशायाः पूर्वाचार्यैर्न्यायामृतादौ निपुणतरमपाकृत-त्वात्। यद् दृष्टफलं तन्नाऽमुष्मिकफलमिति प्रतिबन्धस्य साधनत्वगर्भतया गान्धर्वशास्त्राभ्यासस्य षड्जादिस्वरसाक्षात्कारे सहकारित्वेऽपि साधनत्वाभावेन व्यभिचाराभावादित्यलं विस्तरेण।

टीकायामधिकरणप्रतिपाद्यनिष्कर्षः

टीकाक्षरार्थस्तु- 'नच विरोधाभावात् साधनानुष्ठानजन्मन्येवापरोक्षज्ञानम्' इति विवरणानुसारात् साधनसम्पत्तिजन्मन्येव ज्ञानस्योदय इति पूर्वः पक्षः, नेति-सिद्धान्तश्चावगम्यते। नचासौ युक्तः। श्रवणादिसम्पत्तिसाधनजन्मन्येवोदयाभावे श्रवणादिज्ञानयोरन्वयतो व्यभिचारापत्त्या कार्यकारणभावग्रहानुपपत्तेः। अतोऽत्राधिकरणप्रतिपाद्यं दुर्विज्ञेयमित्यतः सिद्धान्तविवरणानुसारात् प्रतिपाद्यं निष्कृष्य दर्शयति- **प्रतिबन्धाभावे साधनेति**॥ तथाच प्रतिबन्धे सति साधन-

सम्पत्तिजन्मन्येव ज्ञानोदयाभावमात्रेण तयोः कार्यकारणभावग्रहाभावे करतलानलसंयोगादिसाधनसम्पत्तावपि दाहानुत्पत्तेस्तयोरपि कार्यकारणभाव-ग्रहो न स्यात्। किन्तु प्रतिबन्धाभावे सति साधनसम्पत्तिजन्मन्येव कार्योदया-भावः कार्यकारणभावग्रहप्रतिबन्धकः - इति सिद्धान्ते तदभावोऽत्र साध्यते। पूर्वपक्षे तु व्यभिचारप्रदर्शनाय साधनसम्पत्तिजन्मन्येव दर्शनं भवतीति साध्यत इति भावः।

नन्वस्येतरसाधारण्यात् प्रतिपादनं व्यर्थमित्यतः प्रयोजनं सूचयति- **अन्यथेति**॥ यदि प्रतिबन्धाभावेऽपि साधनसम्पत्त्यनन्तरं कार्यं नोदेति तदा तयोः कार्यकारणभावो नास्तीति दर्शनाच्छ्रवणादिज्ञानयोः कार्यकारण-भावानुपपत्तेः कदाऽपि श्रवणादिना ज्ञानोदयाभावप्रसङ्गेन 'द्रष्टव्यः श्रोतव्यः' (बृ. ४.५.६) इति श्रुत्यप्रामाण्यप्रसङ्गेन ज्ञानमसम्पाद्यमेव स्यादिति भावः।

संशयनिष्कर्षः

अत्र 'ज्ञानमेव विषयः' इत्यतः पूर्वं ज्ञानसम्पाद्यत्वप्रतिपादकं 'द्रष्टव्यः श्रोतव्यः' (बृ. ४.५.६) इत्यादिशास्त्रं प्रमाणमप्रमाणं वेति सन्देहः, तदर्थम्-इत्यन्तं वाक्यं ग्राह्यम्। साधनसम्पत्तिजन्मन्येवेति पूर्वपक्षकोटिनिर्देशः। साधनसम्पत्तिजन्मन्येव ज्ञानं भवतीति किं शास्त्रार्थः[1] उत तज्जन्मनि जन्मान्तरेऽपि वा भवतीति शास्त्रस्यार्थः- इति संशयनिष्कर्षो द्रष्टव्यः। यदि साधनसम्पत्ति-जन्मन्येव ज्ञानं भवतीति शास्त्रार्थस्तदा प्रतिबन्धे सति तादृशनियमादर्शनाद् 'द्रष्टव्यः श्रोतव्यः' (बृ. ४.५.६) इति शास्त्रमप्रमाणं स्यात्। यद्येतज्जन्मनि जन्मान्तरे वा श्रवणादिना ज्ञानं भवतीति शास्त्रार्थः स्यात् तदैतज्जन्मनि ज्ञानादर्शनेऽपि शास्त्रार्थाबाधात् प्रमाणमिति पूर्वपक्षसिद्धान्तयोः फलफलिभाव-सम्भवाद् यथाश्रुते न कश्चित् फलफलिभावो दृश्यत इति ध्येयम्॥ **कृष्यादौ**

१. म. शास्त्रस्यार्थः

यागादौ चेति ॥ कृष्यादिसाधनताग्राहकप्रमाणेऽदृष्टद्वारककारीर्यादियागादिसाधनताग्राहकप्रमाणे चोभयथाऽपि पर्यवसानदर्शनं सन्देहबीजमित्यर्थः ।

टीकायां विरोधहानिरूपपूर्वपक्षन्यायविवरणस्य व्याख्यानम्

'विरोधहानिः' इत्युक्तन्यायं विव्नरणसौकर्यायोत्तराधिकरणसङ्गतत्वेनापि तत्साध्यप्रदर्शनपूर्वकं विवृण्वत्

'नच विरोधाभावात् साधनानुष्ठानजन्मन्येवापरोक्षज्ञानं मुक्तिश्चेति नियमः ।'

इति वाक्यमेतदधिकरणसङ्गतत्वेन[1] व्याचष्टे- **साधनसम्पूर्तीति ॥** 'विरोधाभावात्' इत्यंशं व्याचष्टे- **साधनसम्पूर्तावपि ज्ञानेति ॥** विरुणद्धि कार्यानुत्पादमिति विरोधः कारणमिति भावः । प्रकारान्तरेण व्याचष्टे- **न चेति ॥** गूढाभिसन्धिनोक्तं पूर्वपक्षं फलोक्त्या विशदयन्नुपसंहरति- **अतो ज्ञानस्येति ॥** ततश्च श्रवणादिना ज्ञानोदयप्रतिपादकशास्त्रमप्रमाणमेवेति शेषो द्रष्टव्यः । तथाच श्रवणादिसम्पूर्तावपि ज्ञानानुदये कारणाभावात् तज्जन्मन्येवापरोक्षज्ञानं भवतीति नियमः शास्त्रार्थोऽभ्युपेतव्यः । न पुनर्यागात् स्वर्गो भवतीत्यादाविव तदनुष्ठानजन्मानन्तरमेवेति निश्चयः । स्वर्गादेरेतच्छरीरेण भोगायोग्यतादिकारणवत् तथा पर्यवसाने कारणाभावात् । ज्ञानस्यैतज्जन्मन्युत्पत्तेर्दर्शनात् । तथाच प्रतिबन्धदशायां ज्ञानस्यानुत्पत्तिः सर्वसम्मतेति पर्यवसितार्थबाधेन शास्त्रमप्रमाणम् । ततश्च ज्ञानं सम्पाद्यमेवेति विवरणार्थो द्रष्टव्यः ।

टीकायाम् अत्वरयैव सिद्धिरूपसिद्धान्तन्यायविवरणस्य व्याख्यानम्

'अत्वरयैव सिद्धिः' इत्युक्तन्यायं पूर्ववदुभयाधिकरणसम्बन्धित्वेन विवृण्वत्

'प्रतिबन्धे सति तन्निरासेनात्वरयैव[2] सिद्ध्युपपत्तेः । ''यद्यारब्धं कर्म निबन्धकं

१. क. सङ्गतत्वेनापि २. म. तन्निरासे चात्वरयैव

स्यात् प्रेत्यैव पश्येद् योगमेवान्ववेक्ष्य'' इत्यादिश्रुतेः । ''अनेकजन्मसंसिद्धस्ततो याति परां गतिम्'' इति भगवद्वचनम् ।'

इति वाक्यं भाष्येण सह व्याख्यातुं सङ्गतिसिद्धये भाष्योक्तं सूत्रार्थमाह- **श्रुताविति ॥ नचोक्तदोष इति ॥** स्वर्गादि-वदेतच्छरीरायोग्यताख्यकारणाभावान्नियम एव युक्त इत्युक्तदोषेत्यर्थः । प्रमाणोदाहरणांशमवतारयति- **कुत इति ॥** अनेन प्रतिबन्धे सति जन्मान्तरे ज्ञानं भवतीति शेषः । तन्निरासे च स्वत एव प्रतिबन्धनिरासे सिद्धेऽत्वरयैवेह जन्मन्येव ज्ञानसिद्धिरिति शास्त्रार्थोपपत्तेर्न शास्त्रस्याप्रामाण्यम् । नच, किमेवमर्थपरिकल्पनेन, अप्रामाण्यं त्विष्टमेवेति वाच्यम् । 'यद्यारब्धं कर्म निबन्धकं स्यात्' इति सौपर्णश्रुत्या 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' (बृ. ४.५.६) इति श्रुतेः स्वयमेव व्याख्यानात् । तर्हि प्रारब्धकर्मप्रतिबन्धशङ्कयैतज्जन्मनि श्रवणाद्यनुष्ठानमेव न प्राप्नोति । नेत्युच्यते । अनेकजन्मसंसिद्धः अनेकजन्मानुष्ठितश्रवणादिसाधनसम्पत्त्या संसिद्धो ज्ञानवान् भवतीति विवरणार्थो ज्ञातव्यः । भाष्यं सूत्रार्थकथनाय प्रवृत्तं, विवरणं तु न तथैवेति[1] ज्ञापनाय भाष्ये सौपर्णश्रुतेः पूर्वार्धोदाहरणम् । इह तूत्तरार्धमात्रोदाहरणमित्याद्यूह्यम् ।

एतदधिकरणसङ्गतत्वेन सङ्क्षेपभाष्यव्याख्यानम्

ज्ञाने उत्पद्यमाने प्रारब्धकर्मसद्भावे जन्मान्तरे, तदभावे त्विहैवेत्यादिविशेषः स्यादेव उक्तश्रुतेरङ्गीकार्य एव इति सङ्क्षेपभाष्यमपि व्याख्येयम् ।

॥ इति ऐहिकाधिकरणम् ॥ १० ॥

१. म. तदेवेति

॥ अथ मुक्तिफलाधिकरणम्॥ ११॥

सूत्रभाष्यम्

॥ॐ एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॐ॥
॥ ३-४-५१ ॥

एवमेव प्रारब्धकर्माभावे शरीरपातानन्तरमेव मोक्षः, तद्भावे जन्मान्तराणीत्यनियमः। 'धर्मी स्वर्गं विधर्मी निरयमित्येव ब्रह्मसंस्थोऽमृतत्वमेत्येव ब्रह्मसंस्थोऽमृतमेत्येव[1]' इति ब्रह्मसंस्थस्य मोक्षस्यैवावधारणात्।

'विद्वानमृतमाप्नोति नात्र कार्या विचारणा।
अवसन्नं यदारब्धं कर्म तत्रैव गच्छति।
न चेद् बहूनि जन्मानि प्राप्यैवान्ते न संशयः॥'
इति नारायणाध्यात्मे[2] ॥ ५१॥

॥ इति मुक्तिफलाधिकरणम्॥ ११॥

॥ इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये
श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते तृतीयाध्यायस्य चतुर्थः पादः॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र भगवत्प्राप्तिसाधनज्ञानस्य स्वोत्पत्तिजन्मानन्तरमेव प्रतिबन्धाभावे मुक्तिसाधनत्वमहिम्नो वर्णनादस्ति शास्त्रादिसङ्गतिः। अन्यथा ज्ञानस्य मुक्तिसाधनत्वाभावप्रसङ्गात् तत् समर्थनीयम्। प्रकृतज्ञानसाध्यो मोक्षोऽत्र

१. ब. ब्रह्मसंस्थोऽमृतमेत्येव ब्रह्मसंस्थोऽमृतम् २. ब. इति च नारायणाध्यात्मे

विषयः। किं यच्छरीरे ज्ञानमुत्पन्नं तत्पातानन्तरमेव भवत्युत नेति सन्देहः। उभयथाऽप्यदृष्टफलदृष्टिः सन्देहबीजम्।

पूर्वपक्षः

तद्देहानन्तरमेवेति पूर्वः पक्षः। कारणे सति कार्यानुदये कारणाभावात्। नच ज्ञानवदुपपत्तिः । तत्र प्रतिबन्धकसद्भावात्। न चात्र प्रतिबन्धकं पश्यामः। निष्कारणं कारणे सति कार्यानुदये कदाऽप्यनुदयः स्यात्। एवं च 'अनियमः' (ब्र.सू. ३.३.३२) इत्युक्तव्याघात इति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **एवमिति॥** यथा ज्ञानेऽनियमस्तथा मुक्तिफलेऽपि तच्छरीरपातानन्तरमेव मोक्ष इति नियमो नास्ति। किन्तु शरीरपातानन्तरं जन्मान्तरं प्राप्य वा। नच निष्कारणमनियमे कदाऽपि मोक्षाभावप्रसङ्गः। प्रारब्धप्रतिबन्धभावाभावयोरनियमकारणत्वात्। कुतोऽत्र प्रतिबन्धककल्पनम्। श्रुतौ हि ब्रह्मसंस्थस्य मोक्षावधारणात्। प्रतिबन्धकाभावे तदनुपपत्तेरिति भावः । अनियमे कदाऽपि मोक्षाभाव इत्येतद् युक्त्या परिहृतम्। तत्रैषा श्रुतिः प्रमाणम्। मोक्षानियमे वा। ज्ञानिनो मोक्ष एवावधार्यते नतु शरीरपातानन्तरमेवेति नियम इति भावः। नियमानुक्तिमात्रं नानियमसाधकमित्यत आह- **विद्वानिति॥** बहूनीति जन्मान्तरे तात्पर्यम्। सर्वस्य प्रामाणिकत्वसूचनाय द्विरुक्तिः। तदुक्तम्- 'सर्वप्रमाणसिद्धत्वं वक्तुमाध्यायमूलतः। अध्यायान्ते द्विरुक्तिः स्यात् पूर्वोक्तस्यावधारणे॥' इत्यतो ज्ञानिनां प्रतिबन्धाभावे मोक्षस्याविदूरत्वादुक्तं युक्तमिति सिद्धम्॥ ५२॥

॥ इति मुक्तिफलाधिकरणम्॥ ११॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्ब्रह्मसूत्रभाष्यस्य टीकायां श्रीमज्जयतीर्थमुनिविरचितायां तत्त्वप्रकाशिकायां चतुर्थः पादः॥

शेषतात्पर्यचन्द्रिका

॥ अथ मुक्तिफलाधिकरणम् ॥ ११ ॥

॥ॐ एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॐ॥

सङ्गतिः

अत्र भगवत्प्राप्तिसाधनज्ञानस्योत्पत्तिजन्मानन्तरमेव प्रतिबन्धकाभावे स्वफलजनकत्वरूपमाहात्म्यं वर्ण्यत इति टीकायामेवोक्तम्। इदं चैतच्छरीरेण भोगानर्हस्वर्गादिजनकयागादौ दृश्यत इति इतरसाधारणमेवेति पेटिकासङ्गतिः। अनन्तरसङ्गतिस्त्वातिदेशिकीति सूत्रादावेवंशब्दप्रयोगात् स्फुटम्।

ननु 'द्रष्टव्यः श्रोतव्यः' (बृ. ४.५.६) इति वाक्यस्येह जन्मनि जन्मान्तरे वा श्रवणादिना ज्ञानमुत्पद्यते। नत्विह जन्मन्येवेति नियमः। इत्यनियमपर्यवसानेन प्रामाण्यसाधनं युक्तम्। 'ज्ञानेनामृतीभवति' इत्यस्य त्विह जन्मनि कस्यापि मोक्षानुत्पत्तेरनुपलम्भादनियमपर्यवसानायोगेन प्रामाण्यं न युक्तमिति पूर्ववैषम्येण शङ्कनाद् वाऽनन्तरसङ्गतिः।

चिन्ताक्रमः

तत्र ज्ञानस्योत्पत्तिशरीरपातानन्तरं जन्मान्तरप्राप्त्यनन्तरं वेति यथाकथञ्चित् स्वफलं मोक्षं साधयति न वा। तदर्थं तत्र प्रमाणमस्ति न वा। तदर्थं 'ज्ञानेनामृतीभवति' इत्यादिवाक्यस्योक्तानियमपर्यवसानं युज्यते न वा इत्यादिसंशयः। टीकायां कथञ्चिन्मोक्षस्य प्रकृतत्वं सम्पाद्य तद्धर्मिकसंशयप्रदर्शनं तूत्तराध्यायप्रमेयोपक्षेपाय सूत्रभाष्यकृद्भ्यां मुक्तिफलादिशब्दप्रयोगात् तदनुसारेणाधिकरणार्थो वर्णनीय इत्येतदर्थं, नतूक्तसंशयस्येहाविवक्षणेन। अन्यथा पादसङ्गत्यभावापातात्।

पूर्वपक्षः

न ज्ञानस्य मोक्षजनकत्वरूपमाहात्म्यमस्ति। प्रमाणाभावात्। नच 'ज्ञानेनामृतीभवति' इत्यादिप्रमाणमस्तीति वाच्यम्। तस्य तात्पर्यानिर्धारणात्।

तथाहि। ज्ञानेन स्वोत्पत्तिदेहपातानन्तरमेव मोक्षो भवतीत्यत्रास्य तात्पर्यम्, उत तथा नियमाभाव इत्यत्र। नाऽऽद्यः। इन्द्रादीनां तदर्शनात्। नचेन्द्रादेस्तत्तद्देवताशरीरमेवापरोक्षज्ञानोत्पत्तिशरीरम्। 'नैव देवपदं प्राप्ता ब्रह्मदर्शनवर्जिताः' इति वचनाद् देवताशरीरप्राप्तेः[१] पूर्वं ब्रह्मदर्शनस्य वक्तव्यत्वात्। नच प्रारब्धकर्मादिप्रतिबन्धकाभावे तत्पातानन्तरमेव, तद्भावे तु वैपरीत्यम्- इत्यनियमः 'द्रष्टव्यः श्रोतव्यः' इत्यादाविव किं न स्यादिति द्वितीयः पक्षो युक्तः। प्रतिबन्धककल्पने प्रमाणाभावेन गौरवप्रसङ्गात्। अन्यथा शाक्यादिस्मृतेरप्येवमनियमपर्यवसानेन प्रामाण्यापातात्। 'श्रुत्वाऽऽत्मानं मतिपूर्वं ह्युपास्य इहैव दृष्टिं परमस्य विन्देत्। यद्यारब्धं कर्म निबन्धकं स्यात् प्रेत्यैव पश्येद् योगमेवान्ववेक्ष्य॥' इत्यादेः श्रवणादिज्ञानयोः प्रारब्धकर्मसद्भावनिबन्धनानियमपुरस्सरं कार्यकारणभावे तात्पर्यज्ञापकस्य वचनस्येव ज्ञानमोक्षयोरनियमेन कार्यकारणभावग्राहकस्य प्रमाणस्याभावात्। न हि वचनैकशरणानामीदृशी कल्पनोपपद्यते।

> 'न हि मोक्षेऽपि कर्मादेः प्रतिबन्धकता श्रुता।
> तस्मान्नियम एवात्र वक्तव्यो नात्र संशयः॥
> इन्द्रादौ नियमाभावात् सोऽपि चेदुपरुद्ध्यते।
> कथं प्रामाण्यमेतस्य ज्ञानान्मुक्तिविधेर्भवेत्॥'

इति पूर्वः पक्षः।

सिद्धान्तः

युक्तमेव ज्ञानस्योक्तं माहात्म्यम्। प्रमाणं तु 'ज्ञानेनामृतीभवति' इत्याद्येव। न च तात्पर्यनिर्धारणानुपपत्तिः। 'श्रोतव्यः' इत्यादाविवानियमे तात्पर्यनिर्धारणोपपत्तेः। न च तथा तात्पर्यनिर्णायकवचनाभाव इत्युक्तमिति वाच्यम्।

१. क. तत्तद्देवताशरीरप्राप्तेः

न हि वचनमेव तन्निर्णायकम्। युक्तेरपि तन्निर्णायकत्वाङ्गीकारात्। अन्यथा मीमांसावैयर्थ्यप्रसङ्गः।

तथाहि। 'ब्रह्मसंस्थोऽमृतत्वमेत्येव' (ब्र.सू.भा.उ.श्रुतिः ३.४.४१) इति ज्ञानिनो मोक्षोऽवधार्यते। अवधारणाच्च तत्र तात्पर्यं सिद्धम्। ज्ञानिनां च तच्छरीरपातानन्तरमेव मोक्षानुपलम्भश्च प्रामाणिकः। तदुभयान्यथानुपपत्त्या किञ्चित् प्रतिबन्धकं कल्पनीयम्। अन्यथा वाक्यप्रामाण्यानुपपत्तेः। तच्च ज्ञानप्रतिबन्धकत्वं प्रारब्धकर्मणः क्लृप्तमितीहापि तस्यैव प्रतिबन्धकत्वं कल्प्यते। न च युक्तेः कामचारित्वादनिर्णायकत्वमिति वाच्यम्। प्रमाणान्तरानुगृहीतायास्तदयोगात्।

विद्वानमृतमाप्नोति नात्र कार्या विचारणा।
अवसन्नं यदारब्धं कर्म तत्रैव गच्छति।
न चेद् बहूनि जन्मानि प्राप्यैवान्ते न संशयः॥

यदा यस्मिन् जन्मन्यारब्धं कर्मावसन्नं विनष्टं भवति भोगेन, तत्रैव तज्जन्मपातानन्तरमेवामृतत्वं गच्छतीति वचनस्य सद्भावात्।

'अवसन्नं यदारब्धम्' इत्यादिवचनैरिह।
प्रतिबन्धकसद्भावात् तदभावनिबन्धनः।
नियमाभाव एवार्थस्ततो ज्ञानं महत्तरम्॥ इति सिद्धान्तः।

परोक्तं मुक्तिफलाधिकरणशरीरम्

अन्ये तु, यथा मुमुक्षोर्विद्यासाधनावलम्बिनः साधनवीर्यविशेषाद् विद्यालक्षणे फलेऽचिरकालीनत्वचिरकालीनत्वलक्षणैहिकामुष्मिकफलत्वकृतो विशेषो दृष्टः एवं विद्याफले मुक्तिलक्षणेऽप्युत्कर्षापकर्षकृतः कश्चिद् विशेषः स्यादित्युत्थानात् सङ्गतिः।

तत्र मुक्तिः सातिशया तादृक्साधनसाध्यतः।
विद्याफलत्वतश्चैव विमुक्तिः सगुणा यथा॥

इति प्राप्तेऽभिधीयते -

आद्ये सव्यभिचारत्वं द्वितीये सगुणत्वतः।
सोपाधितोभयत्रापि श्रुतिभिर्बाधितार्थता॥

ऐहिकामुष्मिकत्वरूपातिशयवत्त्वाद् विद्यायाः तत्साध्ये मोक्षेऽतिशयसाधनमेतज्जन्मजन्मान्तरानुष्ठितयागसाध्यस्वर्गेऽनैकान्तिकम्। विद्यास्वरूपगतातिशयस्य हेतुत्वे त्वसिद्धिः। वेद्यब्रह्मणः ऐकरूप्येण तस्याप्येकरूपत्वात्। विद्याफलत्वादिति[1] द्वितीयानुमानं तु सगुणत्वेन सोपाधिकमिति।

तन्निरासः

तत्र। ऐहिकामुष्मिकलक्षणविशेषवत्त्वाद् विद्यायास्तत्फलमुक्तेरप्यैहिकामुष्मिकत्वलक्षणविशेषवत्त्वं स्यादिति शङ्कनात् सङ्गतिरुच्यते, किं वा मुक्तेः स्वरूपत एव कश्चन विशेषः स्यादिति शङ्कनात्। नाऽद्यः। 'न च मुक्तावैहिकामुष्मिकत्वलक्षणो विशेष उपपद्यते। ब्रह्मोपासनापरिपाकलब्धोत्पत्तिकविद्यायां सत्यप्यारब्धविपाककर्मप्रक्षये जीवतो विमुक्तेरवश्यम्भावनियमात्' इति भामतीग्रन्थेनैवंविधपूर्वपक्षस्य निरस्तत्वात्। अस्य सिद्धान्ताविरोधित्वेनावश्यनिरसनीयत्वाभावाच्च। न द्वितीयः। साधनस्य स्वसदृशसाध्यजननशक्तत्वेन तत्फलमुक्तावैहिकामुष्मिकत्वकृतविशेषः स्यादिति शङ्कनेऽपि साधने स्वरूपतो विशेषानुक्तेः मुक्तौ स्वरूपत एव विशेषः स्यादिति शङ्कनायोगात्। अन्यथा मुक्तेर्मिथ्यात्वं स्यादिति शङ्का स्यात्।

अथ सगुणानां विद्यानां गुणावापोद्वापकृतोत्कर्षापकर्षाभ्यां तत्फले ब्रह्मलोकादावुत्कर्षापकर्षौ दृष्टाविति मुक्तेरपि विद्याफलत्वाविशेषात् स्वरूपत एवोत्कर्षाप-

१. कः विद्याफलत्वाच्चेति।

कर्षौ स्यातामिति शङ्केत तर्हि पूर्वसङ्गत्यभावः स्फुट एव। नह्यस्मिन् पक्षे विद्यायाः ऐहिकामुष्मिकत्वलक्षणविशेषवर्णनोपजीवनमस्ति । किन्तु सगुणविद्याया आवापोद्वापवर्णनमुपजीव्यमिति तत्रैव सङ्गतं नेह। कथञ्चिदन्विष्यापि सङ्गतेरलाभात्।

किञ्च, अत्राविद्यानिवृत्तिमात्रं मोक्ष इत्याश्रित्य सिद्धान्तः प्रवर्तते, उत निश्शेषमविद्यानिवृत्तिर्मोक्ष इति। नाऽद्यः। जीवन्मुक्तेरपि मोक्षत्वापत्त्या तद्वतां कामक्रोधादितारतम्यदर्शनेनोत्कर्षापकर्षयोः प्रत्यक्षादिसिद्धत्वेन स्वरूपत एवोत्कर्षापकर्षसिद्ध्या तत्र तदभावसाधनायोगात्। एतेन, मुक्तिरतिशयवती ऐहिकामुष्मिकत्वरूपातिशयवत्साधनसाध्यत्वात्- इति प्रयोगे कालातीतत्वं निरस्तम्। यच्चास्यैतज्जन्मजन्मान्तरानुष्ठितयागसाध्यस्वर्गे अनैकान्तिकत्वाभिधानं तदसमीक्षिताभिधानम्। [1]'जन्मान्तरानुष्ठितयागस्याप्येतज्जन्मानुष्ठितयागवदैहिकत्वेनाऽमुष्मिकत्वायोगात्। आमुष्मिकं हि तदेवोच्यते यल्लोकान्तरे भवम्। जन्मान्तरानुष्ठितयागसाध्यस्वर्गे स्वर्गत्वेनाविशेषेऽपि सुखतारतम्यस्य सद्भावाच्च। अन्यथाऽल्पानल्पोपस्कराभ्यां यागे तज्जन्यस्वर्गे चातिशयाभावप्राप्त्या बहूपस्करसम्पादनप्रयासवैयर्थ्यापत्तेः।

किञ्च मुमुक्षूणां नैकविधमेव साधनम्। चतुर्णां वर्णानामाश्रमाणां तत्तद्योग्यसाधनानां तत्तदुचितेतिकर्तव्यताभेदानां च शास्त्रेष्वनाम्नानप्रसङ्गात्। नह्येकरूपं फलमुद्दिश्य दुस्सम्पाद्योर्ध्वरेतस्त्वादिधर्माम्नानमर्थवद् भवति। तथाच विविधसाधनाम्नानसामर्थ्यात् फलेऽपि वैचित्र्यं वक्तव्यमेव। एतेन द्वितीयोऽपि निरस्तः।

किञ्चाविद्यानिवृत्तेर्विशेषराहित्ये संसारध्वंसस्य सांसारिकघटादिध्वंसादपि विशेषाभावप्रसङ्गः। नचायमिष्टः। संसारमुक्त्योर्भेदाभावापातात्। घटादिध्वंसस्य

१. क. जन्मान्तरानुमित।

मुद्गरादिनैव सिद्धत्वेन मोक्षार्थं प्रवृत्त्यभावापाताच्च। स्वतो विशेषाभावेऽपि तत्तत्प्रतियोगिभेदेन निवृत्तेरपि भेदोऽस्तीति चेन्न। ज्ञानादाविव स्वत एव विशेषस्याङ्गीकार्यत्वात्। अन्यथा निवृत्तिकालेऽसतो व्यावर्तकत्वानुपपत्तेः। विस्तृतं चैतत् पूर्वाचार्यैरेवासतः साधकत्वभङ्गादौ। प्रतियोगिकृतविशेषस्यास्वरूपत्वे सति च अद्वैतभङ्गप्रसक्तेः। स्वरूपत्वे च स्वरूपतः सातिशयत्वप्राप्तेश्च।

किञ्च त्वन्मतेऽप्यैकैकावरणप्रक्षयेऽवशिष्टावरणतारतम्येन सूक्ष्मसूक्ष्मतरसूक्ष्मतमवस्त्रावृतरविमण्डलप्रकाशवद् ब्रह्मानन्दप्रकाशोऽपि तारतम्येन भवतीत्यङ्गीकृतमिति निश्शेषावरणनिवृत्तावपि तत् कुतो नाङ्गीक्रियते। कुड्यादिव्यवधानाभावसाम्येऽपि सूक्ष्मसूक्ष्मतरसूक्ष्मतमदृष्टीनां पुंसां दूरस्थवस्त्वनुभवस्य तारतम्येनैव दर्शनात्।

एतेन, मुक्तिः सातिशया सातिशयसाधनसाध्यत्वात् स्वर्गादिवदिति प्रयोगे साधनगतोऽतिशयः किं चिराचिरत्वकृतः, उत स्वरूपगत एव। आद्ये हेतुरप्रयोजकः। द्वितीये त्वसिद्धिः- इति कण्ठकोलाहलः प्रत्युक्तः। तत्तदाश्रमिणां साधनेन तत्तद्बुद्ध्यनुसारेण स्वाभाविकानां विशेषाणां दर्शनात्। वेद्यब्रह्मण एकरूपत्वश्रुत्या विद्याया अप्येकरूपत्वं श्रुतमिति चेन्न। सूक्ष्मादिवस्त्रप्रावृतरविमण्डलस्य वेद्यस्यैकरूपत्वेऽपि तत्साक्षात्कारस्य तदभावानुभवेन बाधितत्वात्। 'अन्यथात्वं च शब्दादिति चेन्नाविशेषात्' (ब्र.सू. ३.३.७) इत्यादौ विद्याभेदसाधनविरोधाच्च।

एतेन, विमता मुक्तिः सातिशया विद्याफलत्वात् सगुणमुक्तिवत्- इति प्रयोगे सगुणविषयत्वमुपाधिरिति प्रत्युक्तम्। उक्तरीत्याऽतिशयवति निर्गुणसाक्षात्कारे सगुणविषयत्वाभावेन साध्याव्याप्तेः। विद्याफलत्ववति निर्गुणमोक्षादौ सर्वत्र सगुणविषयत्वसद्भावेन साधनव्याप्तेश्च। निर्गुणविषयत्वेन प्रतीयमानानां युक्ति-

विरोधेनामानत्वात्। ततश्चोक्तानुमानद्वयान्निरातङ्कं मुक्तेः सातिशयत्वसिद्धेः सिद्धान्तो दुर्लभः।

नन्वतिशयो मुक्तेर्भिन्नः, अथाभिन्नः, उत भिन्नाभिन्नः। नाऽद्यः। अद्वैत-श्रुतिविरोधात्। न द्वितीयः। अतिशयानां परस्परवैलक्षण्यानापत्तेः। न तृतीयः। पक्षद्वयोक्तदोषात्। किञ्च साध्यं हि साधनविशेषाद् विशेषवद् भवति। न च नित्यस्य ब्रह्मणः स्वरूपावस्थानलक्षणा मुक्तिर्नित्या सती कस्यचित् साध्या भवितुमर्हति। न च सवासननिश्शेषक्लेशकर्माशयप्रक्षयः विद्याजन्योऽपि विशेषवान् भवति। येन तद्विशेषान्मोक्षो विशेषवान् भवेत्। न च सातिशयः क्लेशादिप्रक्षयो मोक्षाय कल्पते- इत्यादिभामतीकल्पतरूक्तयुक्तिबाधितमनुमानमिति चेन्न। युक्तेर्युक्त्यन्तरबाधकत्वादर्शनात्। आगमसाहाय्यं तु नास्तीत्युक्तम्। आभासा च युक्तिः। भेदाङ्गीकारे बाधकाभावात्। अद्वैतश्रुतीनां ब्रह्मानन्दादिविषय-त्वात्। अभेदेऽपि दोषाभावः। भेदप्रतिनिधिस्तु विशेषः परस्परवैलक्षण्यस्य व्यवहृतिकारणमित्युपपत्तेः। मुक्तिर्ब्रह्मस्वरूपतयाऽवस्थानं नेति चासकृदु-क्तम्। स्वरूपभूतस्यापि पुंस्त्वादेरभिव्यक्त्याद्यर्थमौषधसेवनादेर्दर्शनाच्च। मुक्तिकालीननिश्शेषक्लेशादिप्रक्षयस्योक्तरीत्या विशेषवत्त्वेन मुक्तेः सातिशयत्वसिद्धेश्च।

रामानुजोक्तं मुक्तिफलाधिकरणम्

केचित्तु इदमधिकरणद्वयमुपासनाविषयं व्याचक्षते। द्विविधं ह्युपासनम्। मुक्तीतरफलकं मुक्तिफलकं च। तत्र द्वयोरपि साधनं प्रवृत्तं निवृत्तं च कर्म द्विविधम्। 'चतुर्विधा भजन्ते मां जनास्सुकृतिनोऽर्जुन' (भ.गी. ७.६) इत्युपासनायाः सुकृतसाध्यत्वावगमात्। तत्राऽद्यमैहिकमुपासनं स्वसाधनप्रवृत्त-कर्मानन्तरमेवोत्पद्यते। उतानन्तरं कालान्तरे वेत्यनियम इति संशये साधने निर्वृत्ते विलम्बे हेत्वभावादनन्तरमेवेति प्राप्त उच्यते। प्रतिबन्धकाभावे तदनन्तरमेव तत्सत्त्वे

त्वनियम इति स्थिते तथाऽपि मुक्तिफलं स्वसाधननिवृत्तकर्मानुष्ठानानन्तर-मेवोत्पद्यत इति वक्तव्यम्। नचात्र पूर्ववत् प्रतिबन्धसद्भावशङ्कोत्पत्तुमर्हति। निवृत्तकर्मणः प्रबलत्वादिति प्राप्ते, ब्रह्मविदपचाराणां पूर्वकृतानां ततोऽपि प्रबलानां सम्भवात् प्रतिबन्धसम्भव इति सिद्धान्त इति।

तन्निरासः

तन्न। किमत्राधिकरणद्वये उपासनाफलस्याभ्युदयस्य मोक्षस्य चोत्पत्तिपर्यन्तं चिन्ता, अथोपासनास्वरूपोत्पत्तिपर्यन्तमेव। नाऽद्यः। अन्यमताभेदापातात्। उपासनासाधनकर्मावलम्बनेन चिन्तनस्य वक्रत्वाच्च। न द्वितीयः। पादासङ्गतेः। उपासनचिन्तानन्तरं तदङ्गचिन्तनं क्रियत इति पादार्थाभिधानात्। ऐहिकमुक्ति-फलदयोः सौत्रयोः स्वारस्यालाभाच्च। कर्मादेरपि कर्मान्तरसाध्यत्वाद् यज्ञादिकर्मापि नियतमुतानियतमिति चिन्तनप्रसङ्गाच्च।

उभयोक्तैहिकसूत्रार्थनिरासः

यच्च विद्याजन्मैहिकमसति प्रस्तुतप्रतिबन्धे, सति तु प्रारब्धकर्मप्रतिबन्धे ऐहिकं न भवतीति फले प्रतिनियमः साधने नियमसद्भावात्। 'श्रवणायापि बहुभिर्यो न लभ्यः' (कठ. २.७) इति श्रुत्याऽऽत्मनो दुर्बोधत्वदर्शनात्। यच्चैहिकमोक्षेतर-फलकमुपासनमुच्यते, अप्रस्तुतप्रतिबन्धे सति अनन्तरं भवति, सति च तस्मिन् उत्तरकालमित्यनियमः 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' (छा. १.१.१०) इति श्रुतौ तस्य प्रबलप्रतिबन्धाभ्युपगमस्य दर्शनात्-इत्याद्यं सूत्रमुभाभ्यां व्याख्यातम्, तदुक्तरीत्या दूषितमेव। आत्मनो दुर्बोधत्व-दर्शनेन प्रतिनियमसाधनस्य वक्रत्वाच्च। व्याख्यानान्तरे तु साध्यमेवाध्याहार्यमिति दोषः। अत्राप्रसिद्धपदेन पक्षग्रहणायोगश्च।

उभयोः मुक्तिफलसूत्रार्थनिरासः

यच्च यथा मुमुक्षोर्विद्यावलम्बिनः साधनवीर्यविशेषात् तत्फले विद्यालक्षणे

ऐहिकामुष्मिकत्वकृतः साधनगतविशेषप्रतिनियमः साध्ये दृष्टः, एवं मुक्तिलक्षणे विद्याफले न नियमोऽस्ति । ब्रह्मसाक्षात्कारगतविशेषप्रतिनियमो मुक्तिरूपे फले नास्तीति यावत् । तदवस्थाया मुक्त्यवस्थाया ऐकरूप्यावधृतेः । यच्च मुक्ति-फलस्याप्युपासनस्य स्वसाधनभूतैरतिशयितकर्मभिरुत्पत्तावेवमेव कालानियमः प्रतिबन्धाभाव एव फलोदयावस्थाया अवधृतेरिति द्वयोर्द्वितीयव्याख्यानं, तदप्ययुक्तम् । आद्यमतेऽतिदेशार्थकैवंशब्दानानुगुण्यस्योक्तत्वात् । ऐकरूप्यापत्तेश्च[1] निराकृतत्वाच्च । पूर्वसूत्रानुसाराल्लाघवेन चाऽमुष्मिकानियम इति सूत्रनिर्देशापत्त्या मुक्तिफलपदवैयर्थ्यं द्वितीयमत इत्याद्यूह्यम् ।

एवं प्रत्यधिकरणं प्रतिसूत्रं च परस्याननुकूलमेवेति नास्य कृत्स्नस्याध्यायस्य पररीत्या व्याख्यानं युक्तम् ।

परोक्ताः पादार्थाः संङ्गतयश्च

यद्यपि

'श्रुत्वाऽविरोधमुपपन्नसमन्वयोत्थब्रह्मात्मतामतिरयं पुनरप्युवाच ।
ब्रह्मात्मताफलशिरस्कमतिं प्रसूते यत्साधनं तदखिलं प्रतिपित्समानः ॥'

'ऐदम्पर्यमखण्डवस्तुविषयं वेदान्तवाक्यस्य यत्
पूर्वं वर्णितमप्यभूदपहतिर्मा नाम मानान्तरैः ।
किं त्वस्याः परिनिष्ठितस्वविषयध्वान्तच्छिदो जन्मने
विद्याया वचनादृते किमपरं कृत्यं भवेत् साधनम् ॥
वैराग्यस्य दृढत्वमेकमपरं तत्त्वम्पदार्थज्ञता
वाक्ये निर्गुणनिष्ठिते च सकले न्यायादियत्तामतिः ।

1. म. ऐक्यरूप्यावधृतेश्च

सम्यग्ज्ञानसमीपदूरभवयोर्हेत्वोर्विवेकज्ञता
वाक्यार्थप्रतिपत्तिसाधनमिदं यत्नेन कृत्यं यतेः ॥'

इत्यादिना पादार्थास्सङ्गतयश्चोक्ताः । तथाऽपि न स्वमतसमीक्षापूर्वकाः । तथाहि ।

परोक्तप्रथमपादार्थनिरासः

ब्रह्मात्मतामतिस्तावदितरमिथ्यात्वप्रत्ययेन भवति । अत एव 'तदनन्यत्व-मारम्भणशब्दादिभ्यः' (ब्र.सू.२.१.१५) इत्यादौ प्रतिपादितं च मिथ्यात्वम् । तथाच प्रतिपन्नसमन्वयार्थब्रह्मात्मतामतेरधिकारिणः ब्रह्मात्मताफलशिरस्क-मतिलिप्सया कथं तत्साधनजिज्ञासा स्यात् । नहि सिद्धेऽपि स्वर्गे कश्चित् साधनं जिज्ञासते । नच त्वन्मते विशेषतो ब्रह्मात्मतामतिजननाय तद्दाढर्याय वा तत्साधन-जिज्ञासा सम्भवति । निर्विशेषब्रह्मात्मतामते सामान्यविशेषभावायोगात् । दाढर्यस्यापि विषयगतासाधारणधर्मापेक्षस्याखण्डे ब्रह्मण्ययोगाच्च । सर्व-मिथ्यात्ववेदनेन साधनेष्वनादरप्राप्त्या तज्जिज्ञासानुपपत्तिश्च । अत एव वेदान्ता-नामखण्डार्थनिष्ठत्वनिश्चयस्य मानान्तराविरोधप्रतिपादनेन समुत्पन्नतया विषय-ध्वान्तनिवारकविद्याजन्मसाधनजिज्ञासाऽपि नोपपद्यते ।

अस्तु वा जिज्ञासा । तथाऽपि न तत्साधनं वैराग्यमुपदेष्टव्यं प्रथमपादे । अखण्डार्थनिष्ठवेदान्ततात्पर्यज्ञानस्य वैराग्यानपेक्षणात् । अपेक्षितत्वे वा सर्वमिथ्यात्वप्रतिपादनेनैव तत्सिद्धेर्विषयगतहेयत्वतारतम्येन वैराग्यदाढर्यं च भवतीति तु त्वन्मते नोपपद्यते । तारतम्यवैराग्ययोरपि मिथ्यात्ववेदनात् । अस्तु वा वैराग्यमावश्यकं, तथाऽपि प्रथमपादे तदनिरूपणात् पादार्थकथनम-युक्तम् ।

ननु यद्यपि वैराग्यस्वरूपप्रमाणफलादि नोच्यते । तथाऽपि संसार-दोषावधारणेऽधिकारिणश्चेतसि वैराग्यं स्वत एवोत्पत्स्यत इति स्वर्गगमना-

गमनादियोनिप्रवेशान्तक्लेशपरम्परोपपादनं त्वन्मत इव मन्मतेऽपि नायुक्तम्। यथोक्तम्-

'संसारदोषमवधारयतो यथावद् वैराग्यमुद्भवति चेतसि निष्प्रकम्प्यम्।
वैराग्यजन्मनि दृढे च सति प्रवृत्तिस्तत्त्वम्पदार्थपरिशोधनकर्मणि स्यात्॥'

इति चेन्न। मिथ्यात्वप्रतिपादनेनैव वैराग्योपपत्तेः। संसारगतिप्रदर्शनेन कृत्याभावात्। किञ्च यथा शुक्तिरजतादेरर्थक्रियाकारित्वाभावप्रतिपादनेन जुगुप्सा जायते तथा नश्वरत्वप्रतिपादने नेत्यनुभवसिद्धमेतत्। तथाच नश्वरत्वप्रतिपादने कथं वैराग्यदार्ढ्योपपत्तिः? अन्यथाऽऽरम्भणाधिकरणादौ मिथ्यात्वप्रतिपादनमनर्थकं स्यात्। तस्मात् सिद्ध आद्यपादस्तव प्रतिकूलः।

द्वितीयपादे स्वप्नावस्थानिरूपणवैयर्थ्यम्

एवं द्वितीयपादोऽपि। तत्त्वम्पदार्थयोः सत्त्वे हि परिशोधनं नान्यथेति तयोरपि सत्त्वप्राप्तेः। तत्त्वम्पदार्थलक्ष्यस्य परिशोधनं क्रियत इति चेन्न। स्वप्नादेर्लक्ष्यगतत्वाभावेन तत्प्रतिपादनवैयर्थ्यात्।

ननु कर्तृत्वभोक्तृत्वादिशबलितस्याखण्डार्थत्वानुपपत्तिं मन्यमानस्य किं कर्तृत्वादि स्वाभाविकमिति पृष्टवतस्तन्न स्वाभाविकं किन्त्वन्यहेतुकम्। अन्यथा स्वप्नेऽपि कर्तृत्वादिकं स्यात्। स्वाभाविकस्यानपायात्- इति वक्तुमिदं स्वप्नावस्थानिरूपणं क्रियते। यथोक्तम्-

'कर्तृत्वादिकमस्य किं निजमभूत् स्वाभाविकं जाग्रतः
किं वा तत्परतः कुतश्चिदभवच्चैतन्यधातोरिति।
यावत् त्वम्पदलक्ष्यवस्तुविषयो बोधो न मे वर्तते
तावन्मे बधिरेषु गीतमिव तच्छ्रौतं वचोऽनर्थकम्॥
तस्मात् त्वम्पदलक्ष्यवस्तुविषयः कर्तृत्वभोक्तृत्वयो-
र्जाग्रद्भूगतयोरपोहमुखतो बोधो ममोत्पद्यताम्।

कर्त्रादेरवभासकत्वमगमः शुद्धः स्वयं भास्वर-
श्चैतन्येन निजेन तेन भवतः कर्त्रादिबुद्धिर्भ्रमः॥
कूटस्थस्य चिदात्मनस्तव कुतः कर्तृत्वभोक्तृत्वयोः
शङ्का जागरितेऽपि कारकगणं कर्त्रादिकं पश्यतः।
व्यापारं सकलस्य भासयति यो भास्वत्करो भास्करो
नासौ कर्तृतया जनस्य विदितो भूमौ द्युलोकस्थितः।
एवं स्वे महिमन्यवस्थितवतः सङ्घातमुत्पश्यतः
स्वव्यापारसमन्वितं तव कुतः कर्तृत्वमुत्प्रेक्ष्यते॥
कर्त्रादिसन्निधिबलेन तवापि कर्तृभोक्तृप्रमातृवपुरापतति भ्रमेण।
तद्बुद्धिसंश्रयमनात्मगतं प्रतीचि शुद्धेऽपि पश्यसि तमःपटलावृताक्षः।
कर्तृत्वादि च दृश्यवर्गपतितं द्रष्टुः स्वभावः कथं
सम्भाव्येत तव प्रसन्नविमलस्वच्छप्रकाशात्मनः।
यद्यद् दृश्यतया जगत्यभिमतं सर्वस्य तत्तद् भवेद्
दूरं द्रष्टुरिति प्रसिद्धमखिलं भूभृत्समुद्रादिकम्।
एतस्माच्च न जाग्रतस्तव भवेत् स्वाभाविकी कर्तृता
यद्येषा स्वत एव किं न भवति स्वप्नेऽपि ते तिष्ठतः॥'

इत्यादि। इति चेत् - न। अध्यस्यमानस्य कर्तृत्वादेः क्वचित् सत्त्वनियमाद् बुद्धिगतं कर्तृत्वादि सदित्यापातेन बुद्ध्यादिसन्निधानावभातजीवगतकर्तृत्वस्य जपाकुसुमसन्निधानावभातस्फटिकगतलौहित्यस्येव सत्त्वावश्यम्भावात्। न हि लौहित्यं स्फटिके न सत्। निर्मललोचनेनापि तस्य तत्र प्रतीतेः। शुक्तौ तु रूप्यसन्निधानाभावात् तत्रावभातं रजतमसत्। अत एव परशुमण्यादिसन्निधानेनावभातं स्वर्णत्वं नासत्। बुद्धिगतकर्तृत्वादेरपि आरोपितत्वेऽनवस्थापातात्। कर्मणः कर्तर्येव फलजनकत्वनियमेन कर्तृत्वेन प्रतीतयोर्बुद्धिजीवयोरदृष्टजननासम्भवाच्च। नह्यारोपितकर्तृत्ववति शूद्रादौ कर्मजन्यमदृष्ट-

मुत्पत्तुमर्हति । 'कर्ता शास्त्रार्थवत्त्वात्' (ब्र.सू. २.३.३३) इत्यादिसूत्रविरोधाच्च । 'नाहं कर्ता न कर्ता त्वम्' इत्यादिकर्तृत्वनिषेधस्तु भगवदधीनकर्तृत्वस्य स्वाभाविकत्वेऽपि स्वतन्त्रकर्तृत्वविषयः । दृश्यत्वानुमानं त्वन्यत्र दूषितम् । अतः कर्तृत्वादिबुद्धिर्भ्रम इत्येतदनुपपन्नमेव ।

किञ्च, यदि स्वाभाविकी कर्तृता तर्हि स्वप्नेऽपि स्यादिति कोऽर्थः? किं स्वप्नेऽपि तस्याः सत्त्वं स्यादिति, उत प्रतीतिः स्यादिति । नाऽद्यः । इष्टत्वात् । नहि स्वाभाविकीं कर्तृतां मन्यमानः स्वप्नेऽपि तस्याः सत्त्वं न मन्यते । त्वयाऽपि ''श्रुत्यन्तरे 'स्वयं विहृत्य स्वयं निर्माय स्वेन ज्योतिषा प्रस्वपिति' (बृ. ४.३.९) इति जीवव्यापारश्रवणादिहापि 'य एष सुप्तेषु जागर्ति' (कठ. ५.८) इति प्रसिद्धानुवादाज्जीव एवायं कामानां निर्माता कीर्त्यते । तस्य तु वाक्यशेषे 'तदेव शुक्रं तद् ब्रह्म' (कठ. ५.८) इति जीवभावं व्यावर्त्य ब्रह्मभाव उपदिश्यते 'तत्त्वमसि' (छा. ६.८.७) इत्यादिवदिति न ब्रह्मप्रकरणं विरुद्ध्यते'' इति, सन्ध्याधिकरणभाष्येण जीवस्य कर्तृताया अभिधानाच्च ।

अत एव च न द्वितीयः ।

'यत् स्वप्ने परिपश्यसि त्वमखिलं तन्मायया निर्मितम् ।
कर्तृत्वादि न सत्यमत्र घटना कार्त्स्न्यानभिव्यक्तितः ॥'

इति सङ्क्षेपशारीरभाष्येण कर्तृत्वादिप्रतीतेरप्यङ्गीकृतत्वात् । प्रागेव सत्यत्वस्य साधितत्वात् । कार्त्स्न्यानभिव्यक्त्यादेर्मिथ्यात्वसाधकत्वाभावस्योक्तत्वाच्च । कर्तृत्वादेर्जागरणेऽप्येवं मिथ्यात्वसाधनसम्भवेन स्वप्नाद्यवस्थामधिकृत्य तत्साधनप्रयासवैयर्थ्याच्च । तस्माद् द्वितीयपादः परस्यासङ्गतोऽयुक्तः प्रतिकूलश्च ।

परोक्ततृतीयपादार्थनिरासः

एवं तृतीयपादोऽपि ।

'अद्याप्यवान्तरवचःपरिमाणबोधवैकल्यमस्ति मम तेन महावचोऽपि ।
वाक्यार्थबुद्धिमनुभूतिफलावसानां नोत्पादयत्यहरहः श्रुतमप्यशक्तेः ॥
विधिमुखेन परस्य निषेधकं[१] वचनजातमवान्तरसञ्ज्ञितम् ।
यदपि भेदनिषेधमुखेन तत्परिमितिं प्रतिपादय मे प्रभो ॥'

इति शिष्यजिज्ञासया हि पादोऽवतार्यः । नचाऽसौ युज्यते । 'तत्त्वमसि' (छा. ६.८.७) इत्यादिमहावाक्यार्थभूततत्त्वम्पदार्थैक्यस्यानुभवविषयतासम्पादनाय तथाविधदृष्टान्तबुभुत्सासम्भवेऽपि 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. २.१) इत्यादिविधिमुखानां 'एकमेवाद्वितीयम्' इत्यादिनिषेधमुखानां चावान्तरवाक्यानां परिमाणेयत्तानिश्चयस्य तदनुभवविषयीकरणहेतुत्वाभावात् तत्र बुभुत्सानुदयात् । इयत्ताप्रतिपादनस्य भेदवासनानिरूढिहेतुत्वेन प्रकृतैक्यविरोधाच्च ।

परोक्तचतुर्थपादार्थनिरासः

एवं चतुर्थपादोऽपि ।

'अन्तरङ्गबहिरङ्गसाधने भेदतः कथयद्बुभुत्सतः ।
ज्ञानजन्मन इदं जिघृक्षितं हेयमेव तदिति बोधयोपपत्तिः ॥'

इति शिष्यजिज्ञासया ह्ययं पादः प्रवर्तनीयः । नचात्रान्तरङ्गबहिरङ्गसाधने विविक्ते दर्शिते । दर्शयिष्यते च ज्ञानस्य बहिरङ्गसाधनादप्यन्तरङ्गसाधनस्याऽवश्यकता प्रतिपत्तये 'आवृत्तिरसकृदुपदेशात्' (ब्र.सू. ४.१.१) इत्यादिना ।

अत एव परमते अध्यायपादाधिकरणसूत्रार्थानामसङ्गतिप्रातिकूल्यादिरूपत्वेन सर्वशाखाविदग्रेसरप्रचुरतरशेमुषीमण्डितनिगूढश्रुतिहृदयाभिज्ञाचार्यवर्योक्तोऽध्यायादिप्रतिपाद्यविशेषः सङ्गतोऽनुकूलो युक्तोऽत्युपयुक्तः शास्त्रान्तराप्रतीतः साक्षात्सूत्रकृदुपदिष्टश्चेति मुमुक्षुभिः शिरसा वहनीय इति सिद्धम् ।

---

१. म. निवेदकम्

टीकायां न्यायविवरणवाक्ययोजना

टीकाक्षरार्थस्तु - नन्वत्र ज्ञानसामर्थ्यप्रतिपादनाभावेनाधिकरणस्य फलं न प्रतीयत इत्यत आह- **अन्यथेति**॥ 'अनियमः सर्वेषाम्' (ब्र.सू. ३.३.३२) इत्युक्तानियमसिद्धिः फलमिति भावः। विवरणसौकर्यायैतदधिकरणसङ्गतत्वेनापि विरोधहानिन्यायो विवृतः। अतोऽपरोक्षज्ञानमित्यंशं विहायेतरत् सर्वमत्राप्यनुवर्तनीयमित्यभिप्रेत्य साधनानुष्ठानजन्मन्येव मुक्तिरित्यंशं व्याचष्टे- **तद्देहपातानन्तरमेवेति पूर्वः पक्ष इति**॥ सामीपिकाधिकरणे सप्तमी। अनुष्ठानमुत्पत्तिः ज्ञानरूपसाधनोत्पत्तिजन्मानन्तरमेव मुक्तिरिति नियम इति विवरणयोजना द्रष्टव्या। विरोधः कारणपर इत्यभिप्रेत्य विरोधाभावादित्यंशं व्याचष्टे-**कारणेति**॥ प्रकारान्तरेण व्याख्याति- **नचेति**॥ विरोधपदं प्रतिबन्धकपरम्। अभावपदमनुपलम्भपरम्। तथाच प्रतिबन्धकानुपलम्भादिति सिद्ध्यतीति भावेन तदभिप्रायमाह- **नचात्र प्रतिबन्धकं पश्याम इति**॥ 'अत्वरयैव सिद्धिः' इति न्यायविवरणमत्रापि सङ्गतमिति भावेन 'प्रतिबन्धे सति तन्निरासे चात्वरयैव सिद्ध्युपपत्तेः' इत्यंशं व्याचष्टे- **प्रारब्धप्रतिबन्धकभावाभावयोरिति**॥ '"अनेकजन्मसंसिद्धस्ततो याति परां गतिम्" (भ.गी. ६.४९) इति च भगवद्वचनम्' इत्यंशमत्रापि सङ्गतं कुर्वन् व्याचष्टे- **नियमानुक्तिमात्रमिति**॥ 'विद्वानिति' इत्युपलक्षणम्। 'अनेकजन्मसंसिद्धः' (भ.गी. ६.४९) इति भगवद्वचनमपि ग्राह्यम्। अत एव 'विद्वान्' (ब्र.सू. भा.उ. नारायणाध्यात्मवचनम्) इति वचनं व्याचष्टे- **बहूनीति जन्मान्तरे तात्पर्यमिति**॥

सूत्रार्थः

सूत्रार्थस्तु- यथा ज्ञानलक्षणफलानियमः **एवं मुक्तिलक्षणफलानियमः**। प्रतिबन्धे सति जन्मान्तरे तदभावे सति तत्पातानन्तरमेवेति। प्रतिबन्धकं कुतः कल्प्यत इत्यतोऽर्थापत्तिरुच्यते **तदवस्थावधृतेः** ज्ञानावस्थितस्य मोक्षावधारणात्। अन्यथा तदनुपपत्तेरिति भावः।

एतदधिकरणसङ्गतया सङ्क्षेपभाष्ययोजना

एवं 'विशेषस्तु ज्ञाने स्यादुत्तरोत्तरम्।
सर्वेऽपि पुरुषार्थाः स्युर्ज्ञानादेव न संशयः॥
न लिप्यते ज्ञानवांश्च सर्वदोषैरपि क्वचित्।
गुणदोषैः सुखस्यापि वृद्धिह्रासौ विमुक्तिगौ॥
नृणां सुराणां मुक्तौ तु सुखं क्लृप्तं यथाक्रमम्॥'

इति सङ्क्षेपभाष्यमप्येतदधिकरणसङ्गततया योजनीयम्। तथाहि। यद्यपि सर्वेऽपि पुरुषार्थाः मुक्त्यादयः ज्ञानादेव भवन्ति। यतो वेदप्रामाण्यसंशयो नास्ति अतोऽस्मिन्नपि प्रमेये संशयो न कर्तव्यः। तर्हि तद्देहपातानन्तरमेव केषाञ्चिन्मोक्षानुपलम्भः कथमिति चेत्, ज्ञाने जातेऽपि प्रारब्धकर्माख्यप्रतिबन्धकविशेषोऽस्ति। नहि प्रतिबन्धकदशायां तदनुपलम्भोऽतत्कारणतामावहति।

ननु ज्ञानानन्तरं कियद्देहपातोऽपेक्षित इत्यत्रोच्यते। 'उत्तरोत्तरम्' इति। क्रियाविशेषणमेतत्। प्रतिबन्धकाख्यो विशेषस्तु अधिकारिषु मानुषादिब्रह्मान्तेषूत्तरोत्तरमाधिक्येन वर्तते, नतु साम्येन। येन यद्देहपातानन्तरं मुक्तिरिति निर्णेतुं शक्यम्। तत्तद्योग्यतानुसारेण निर्णेयम्। ननु येषां प्रतिबन्धकबाहुल्यं तेषामधिकशरीरलाभेन यावच्छरीरेषु परिवर्तमानस्य ब्रह्महननादिमहादोषाणामपि सम्भावितत्वाद् बहुकालव्यवधानाच्च भर्जितबीजादेरिव तदीयज्ञानस्य मोक्षजननशक्तिह्रासेन मोक्षजनकत्वं न स्यात्। तथाच 'अनियमः' (ब्र.सू. ३.३.३२) इत्युक्तव्याघात इति। नेत्युच्यते। सर्वदोषैः, चशब्दात् कालव्यवधानेऽपि ज्ञानवान्न लिप्यते। मोक्षाभावलक्षणप्रत्यवायवान्न भवति। बीजादिव्यावृत्त्यर्थमेवास्य पादस्याऽरब्धत्वान्न तत्प्रतिबन्दीग्रहणं युक्तम्। तर्हि ज्ञानिना सत् कार्यमसत् त्याज्यम्- इति नियमो न स्यात्। तथाच स्तुत्यधिकरणविरोधः। तत्रोत्तरम्- क्वचित्। सर्वदोषैः ज्ञानवांश्च लिप्यत इत्यत्रापि सम्बद्ध्यते। महा-

दोषाश्च श्रेष्ठापराधादयः तर्हि ज्ञानवानपि कश्चिदंशे लिप्यत एव। कश्चिदित्युक्तांश एव विव्रियते। 'गुणदोषैः सुखस्यापि वृद्धिह्रासौ' गुणैः सत्प्रवृत्तिभिः सुखस्य वृद्धिः, दोषैः असत्प्रवृत्तिभिः सुखस्य ह्रासः- मुक्तस्य विलीनप्रकृतित्वेऽपीश्वरेच्छालक्षणावरणाद् यावदानन्दानाविर्भावाख्यो ह्रासो भवति।

नन्विदं द्वयं बाह्यसुखस्योपचयापचयवत्त्वेन सम्भावितमपि स्वरूपसुखे न सम्भावितम्। स्वरूपस्य ह्रासायोगात्। तत्रोच्यते- **अपीति**॥ स्वरूपसुखस्यापि वृद्धिह्रासौ स्त एव। तदेवोपपाद्यते- **विमुक्तिगौ**॥ यतो विमुक्तिस्वरूपावेव तावपि तेषां स्वरूपं तथैव क्लृप्तम्।

नन्वेवं सुराणामपि सुखस्य वृद्धिह्रासयोरापत्त्याऽस्मादयं शतगुणानन्दोऽयं च शतं न्यूनानन्दः- इत्यादिव्यवस्था श्रुत्युक्ता न स्यात्। तत्राभिधीयते। नृणामेवायं नियमः। न देवानाम्। येनाऽनन्दतारतम्यश्रुतिविरोधः। कुत एतत्? इति चेत्। यतः सुराणां योग्यताक्रमानुसारेण शतगुणाधिक्यादिना सुखं क्लृप्तम् अवश्यं यावदनुभाव्यमेवाऽगमैरवसीयते, ततस्तत्रेच्छालक्षणावरणकल्पनं व्यर्थमेव।

ननु तर्हि सुराणामसन्न त्याज्यं प्राप्नोति। तत्र तुशब्देन समाधीयते। तेषामपि विशेषोऽस्ति। तथाहि। योग्या जनास्तावद् द्विविधाः। अधिकारिणोऽनधिकारिणश्चेति। अधिकारिणोऽपि द्विविधाः। महाधिकारिणोऽल्पाधिकारिणश्चेति। तत्र महाधिकारिणः प्राजापत्यादौ नियुक्तास्तत्त्वाभिमानिनो देवाः। ऋषीणामशीतिः पितॄणां सप्तकम् अप्सरसां शतम्, गन्धर्वाणां शतं राज्ञां विंशतिश्च अल्पाधिकारिणस्तु देवकुलमात्रे जाता देवाः। अनधिकारिणस्तु मनुष्यादयः।

तत्र महाधिकारिणामाधिक्येन प्रकाशनाख्य उन्नाहः सत्प्रवृत्तिसाध्योऽसत्प्रवृत्तिप्रतिबध्यश्चास्ति। अत एवेन्द्रादिदेवानां शतक्रत्वाद्यनुष्ठानं न व्यर्थम्। नाप्यात्यन्तिकमुन्नाहस्य ह्रासादि। किन्त्वल्पाभिभवमात्रम्। अल्पाधिकारिणां

तून्नाहस्य ह्रासोऽपि भवति । तथाऽपि न मनुष्यादिवदानन्दस्य ह्रासः । अनधि-कारिणां मनुष्यादीनां क्लृप्तानन्दस्य ह्रासः। तदुक्तं पञ्चमतात्पर्यनिर्णये (५.६.५)-

'देवानां नाशुभाद्ध्रासः शुभा काचित् सुखोन्नतिः।
आधिकारिकजीवानामेवमन्येषु तद्द्वयम्॥
अल्पाधिकारिणां तत्र ह्रासोऽपि भवति ध्रुवम्।
अशुभाभावजोन्नाहो महाधीकारिणामपि॥
अशुभे कृते न भवति तारतम्याच्च स स्मृतः।
प्रजापाश्च तथा देवाः महाधीकारिणः स्मृताः॥
ऋष्यशीतिस्तथा सप्त पितरोऽप्सरसां शतम्।
गन्धर्वाणां तथा राज्ञां विंशदन्यासु जातिषु।
अल्पाधिकारिणः प्रोक्ता अनधीकारिणः परे॥' इति।

ननु पुनरापतितस्तारतम्यश्रुतिव्याघातः। न। यतस्तेषां सुखं क्लृप्तमतः प्राप्तव्यसुखं तद्धानिश्च न स्वरूपसुखे परिगणनीयेति। अतो विरक्ति-भक्त्युपास्तिभिर्ज्ञातो मुक्तिफलं ददातीति सिद्धम्।

यत्पादार्पितमानसाद् दृढतरं रागं व्युदस्याखिलै-
राप्तैरब्जभवादिभिश्च नितरां सेव्यं रमावल्लभम्।
सेवित्वा निजयोग्यतापरिवृताश्चोपास्य दृष्टिं ययुः
तं वन्दे हरिमक्षरं यदवधिः संसारदावानलः॥

इन्द्रः स्वर्गपतिर्बिभेति भगवत्पूर्णप्रतीतेः कृतेः
तत्त्वज्ञो नच काम्यकर्म कुरुते यः कोऽपि मामेष्यति।

यद्दुर्भाव्यजयार्यनिर्मितमितव्याख्यानमात्रस्फुट-
त्सद्वाक्यार्थविवेकवञ्चितभवः स्वर्गेऽप्ययं निःस्पृहः ॥

॥ इति मुक्तिफलाधिकरणम् ॥ ११ ॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्याणां सर्वतन्त्रस्वतन्त्राणां श्रीलक्ष्मीनारायणतीर्थपूज्यपादानां शिष्येण रघुनाथयतिना कृतायां शिष्टतात्पर्यचन्द्रिकायां तृतीयाध्यायस्य चतुर्थः पादः समाप्तः ॥

श्रीमद्ब्रह्मसूत्रभाष्यम्

श्रीमत्तत्त्वप्रकाशिका-शेषतात्पर्यचन्द्रिकासहितम्

॥ चतुर्थाध्याये प्रथमः पादः ॥

॥ अथ आवृत्त्यधिकरणम् ॥ १ ॥

सूत्रभाष्यम्

फलं निगद्यतेऽस्मिन्नध्याये । कर्मनाशाख्यं फलमस्मिन् पादे । नित्यशः कार्यं सर्वथा भाव्यं साधनं प्रथमत उच्यते । प्रायिकत्वाच्चाध्यायानां पादानां च न विरोधः ।

ॐ आवृत्तिरसकृदुपदेशात् ॐ ॥ ४.१.१ ॥

'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ.उ. ४.४.५) इत्यादीनां नाग्निष्टोमादिवदेकवारेणैव फलप्राप्तिः । किन्त्वावृत्तिः कर्तव्या । 'स य एषोऽणिमैतदात्म्यमिदं सर्वम्' (छा.उ.६.८.७) इत्याद्यसकृदुपदेशात् ॥ १ ॥

तत्वप्रकाशिका

एतदध्यायप्रतिपाद्यविषयः

एतदध्यायप्रतिपाद्यं दर्शयति- **फलमिति** ॥ विरक्त्यादिसाधनैर्ब्रह्म-दर्शनमापाद्यमित्युक्तं पूर्वाध्याये । तत्र तद्दर्शनस्य किं फलं येन तदापाद्यं स्यादित्याशङ्कानिवृत्त्यर्थं यत् तस्य भगवत्प्रसादद्वारा फलं भवति तदस्मिन्न-ध्याये सूत्रकृता निगद्यत इति भावः । ननु पुरुषार्थाधिकरणे ज्ञानात् सर्वे पुरुषार्था भवन्तीत्युक्तत्वात् किमत्र वक्तव्यमस्तीति । मैवम् । मोक्षेतरपुरुषार्थाना-

मसाधारण्येन ज्ञानफलत्वाभावात् । मोक्षोऽपि ज्ञानेन भवतीत्युक्तमिति चेत्। सत्यम्। स एव कीदृश इति विचार्यतेऽत्रेति।

एतत्पादप्रतिपाद्यविषयः

एतत्पादार्थं दर्शयति- **कर्मेति ॥** ज्ञानफलं मोक्षलक्षणं चतुर्विधं भवति। कर्मक्षयोत्क्रान्तिमार्गभोगभेदात्। तत्र कर्मक्षयाख्यफलस्य प्राथम्यात् तत् प्रथमपादे निगद्यत इति भावः। नन्वावृत्तिरित्यादिसूत्रेषु कर्मक्षयोक्त्यप्रतीतेः कथमेतदित्यत आह- **नित्यश इति ॥** नैतेषु सूत्रेषु कर्मक्षयो निगद्यते किन्तु ज्ञानसाधनमेव। तत् तृतीये एव किं नोच्यते। उक्तमेव। पुनः किमुच्यते ? तस्यैव नित्यशः कार्यत्वमिति। किमिति ? तद्विना मोक्षलेशाभावात्। अतोऽत्र कर्मक्षयोक्त्यप्रतीतिर्युक्तैवेति भावः। यदि फलाध्याये कर्मक्षयपादे च साधनमेवोच्यते तर्ह्यध्यायपादानामर्थव्यवस्थाभावः स्यादित्यत आह- **प्रायिकत्वाच्चेति ॥** नार्थान्तरोक्तावपि व्यवस्थाभावविरोधः। योऽर्थो यत्र प्रायेणोच्यते सोऽध्यायादिस्तदर्थ इति व्यवस्थोपपत्तेः। अत एव एतेष्वधिकरणेषु नाध्यायादिसङ्गतिरन्वेषणीया।

सङ्गत्यादि

तत्रादौ भगवज्ज्ञानाय श्रवणाद्यावृत्तेः कर्तव्यतोपपादनादस्ति शास्त्रादिसङ्गतिः। अन्यथा श्रवणादीनां ज्ञानसाधनत्वासिद्धेः साधनीयमेतत्। श्रवणादिकं विषयः। किं सकृदनुष्ठेयमुत तदावृत्तिरिति सन्देहः। उभयविधसाधनदर्शनं सन्देहबीजम्।

पूर्वपक्षः

सकृदेवेति पूर्वः पक्षः। सकृदनुष्ठिताग्निष्टोमादिना स्वर्गफलदर्शनात् तद्वदेव सकृदनुष्ठितश्रवणादिनाऽपि ज्ञानसम्भवात्। श्रवणादिविधेश्चाग्निष्टोमादिविधिवत् सकृदनुष्ठानेन चरितार्थत्वात्। साधनावृत्तेरपि दर्शनादत्रापि तथा स्यादिति चेन्न। उभयथादर्शनेऽप्यनावृत्त्यैवापरोक्षज्ञानाभ्युपगमे सर्वसुशकत्वं ज्ञानस्येति गुणलाभादनावृत्त्या श्रवणस्यैव ज्यायस्त्वात्। अतोऽनावृत्त्यैव ज्ञानं सम्भवति। न च तथा भवति। अतो न श्रवणादि ज्ञानसाधनमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे **आवृत्तिरिति ॥** अग्निष्टोमादिवदेकवारेणैव फलसिद्धेरात्मेति श्रुत्युक्तानां श्रवणादीनामनावृत्तिरिति यदुक्तं न तद् युक्तम्। किन्तु श्रवणादीनामावृत्तिरेव कर्तव्या। उद्दालकेन नवकृत्वः श्वेतकेतुं प्रति तत्त्वस्योपदिष्टत्वात्। श्रवणादेः सकृदेव कर्तव्यत्वे किमर्थमसावसकृदुपदिशेत्। न चाग्निष्टोमादिवद् अनावृत्तिः। तस्यादृष्टफलत्वेन सकृदनुष्ठानसम्भवात्। तावतैव तद्विधिपूर्तेश्च। श्रवणादेः पुनरज्ञाननिवृत्त्यादिदृष्टफलसाधनत्वेन यावत् फलं कर्तव्यत्वात्। आवर्तन एव तद्विधिपर्यवसानाद् व्रीह्यवघातविधिवत्। न च सुशकत्वगुणलाभादनावृत्तिः। महाफलस्य तदभावस्यैव गुणत्वात्। सर्वेषां मोक्षप्रसङ्गाच्चेति भावः॥ १॥

सूत्रभाष्यम्

ॐ लिङ्गाच्च ॐ ॥ ४.१.२ ॥

'स तपोऽतप्यत.... पुनरेव वरुणं पितरमुपससार' (तै.उ.३.१.२) इत्याद्यावर्तनलिङ्गाच्च।

'नित्यशः श्रवणं चैव मननं ध्यानमेव च।
कर्तव्यमेव पुरुषैर्ब्रह्मदर्शनमिच्छुभिः॥' इति बृहत्तन्त्रे॥ २॥

॥ इति आवृत्त्यधिकरणम्॥

तत्त्वप्रकाशिका

हेत्वन्तरेण श्रवणाद्यावृत्तिं साधयत्सूत्रं पठित्वा व्याचष्टे- लिङ्गाच्चेति। 'तस्मा एतत्प्रोवाच अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचम्' इति श्रुतावन्नादि-रूपविषय एव पुनःपुनर्भृगोः प्रश्नस्तथैव वरुणस्योक्तिः श्रुतस्य पुनरा-लोचनेनापरोक्षितत्वमित्येतल्लिङ्गदर्शनाच्च श्रवणाद्यावृत्तिः कर्तव्येति भावः। अत्र स्मृतिं चाह- नित्यश इति। अतो ज्ञानार्थं श्रवणाद्यावृत्तेः कर्तव्यत्वाद्युक्तं श्रवणादीनां ज्ञानसाधनत्वमिति सिद्धम्॥ २॥ अ-१॥

शेषतात्पर्यचन्द्रिका

॥ अथ चतुर्थोऽध्यायः॥

॥ अथ आवृत्त्यधिकरणम्॥ १॥

मङ्गलाचरणम्

यद्दर्शनात् क्षीणकर्मा नाड्योत्क्रम्यार्चिरादिना।
गतः सुखमवाप्नोति तं भजे वल्लभं श्रियः॥

एतदध्यायप्रतिपाद्यविषयः

फलं निगद्यतेऽस्मिन्नध्याय इत्येतदध्यायप्रतिपाद्यं भाष्यादौ दर्शितम्।

प्रतिपाद्यैक्यान्न पादभेद इति शङ्का, तत्परिहारश्च

ननु ज्ञानस्य मोक्षाख्यफलमेकरूपमेव। अज्ञाननिवृत्तेः स्वस्वरूप-प्राप्तेरेकविधत्वात्। नच सञ्चितागामिकर्मक्षयोऽपि ज्ञानस्य फलमित्यैकविध्यं न युक्तमिति वाच्यम्। तस्य ज्ञानफलत्वे प्रमाणाभावात्। 'ज्ञानेनामृती भवति'[१] इति ज्ञानमोक्षयोरेव एककार्यकारणभावावगतेश्च। आन्तरालिकत्वमात्रेण तत्फलत्वे पुरुषार्थाधिकरणन्यायेन स्वर्गादीनामपि तत्प्रसङ्गात्। तथाच प्रतिपाद्यैक्यात् पादभेदो न युज्यत इति चेन्न। 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः'[१] इत्यादेर्यथाऽज्ञाननिवृत्तेर्ज्ञानफलत्वम्, तथा 'क्षीयन्ते चास्य कर्माणि'[२] इत्यादेः कर्मक्षयस्यापि ज्ञानफलत्वाङ्गीकारात्। ज्ञानफले व्यवह्रिय-माणमोक्षशब्दानुगतिसद्भावाच्च। एवं शरीराद् उत्क्रान्तिरपि मोक्ष एवेति साऽपि फलमेव। फलं हि तदुच्यते यदनिष्टनिवृत्तिरूपमिष्टप्राप्तिरूपं च। नचानिष्ट-निवृत्तिरिष्टप्राप्तिरूपमुख्यफलस्योपयोगिनीति फलत्वेनोपचर्यते न मुख्यं फलमिति वाच्यम्। विनिगमनाभावेनोभयोरपि मुख्यफलत्वात्। तथाच कर्मक्षयोत्क्रान्त्यो-रनिष्टनिवृत्तिरूपत्वेन फलत्वमनिवार्यम्। एवमुत्क्रान्तस्यास्माद् देहाद् विमुक्तिरप्यर्चिरादिदेवानां स्थानप्राप्तिरूपत्वादुत्तरोत्तरसुखप्राप्तिरूपैव। एवं लिङ्गशरीराद् विमुक्तिः सुखानुभूतिश्च कृत्स्नानिष्टनिवृत्तिसुखभोगरूपत्वात् फलमिति स्पष्टमेव। तथा च कर्मक्षयोत्क्रान्तिदेवयानभोगानामिष्टानिष्ट-प्राप्तिपरिहाररूपत्वेन फलत्वं मुक्तित्वं च युज्यत इति प्रतिपाद्यभेदात् पादभेदो युक्त एव।

ननु यद्यपि देवानां कर्मक्षयाभावे मोक्षाभावापत्त्या भोगाभावे पुरुषार्थत्वाभावापत्त्या च कर्मक्षयभोगयोः सद्भावेऽप्युत्क्रान्तिदेवयानमार्गयोः देवेष्वनुपपत्तिः। उत्क्रान्तिर्हि ब्रह्मनाड्या चरमशरीरपरित्यागः। नचासौ देवेषु सम्भवति। यतस्तेषां देहस्य स्वोत्तरोत्तरप्रवेशेन स्रष्टुर्ग्रासरूपत्वात् स्रष्टृशरीरे जीर्णभाव एव। तथा च तत्तत्पदस्थानां देवानां तत्तदेव चरमशरीरं, तच्च तत्तदधिष्ठितचेतनेन सहैव स्रष्टृशरीरे लीनमिति कथं सुषुम्नानाड्या बहिरुत्क्रमणं स्यात्? न च मनुष्यकुले जातानामर्जुनादीनां सुषुम्नानाड्योत्क्रान्तिर्दृश्यत इति वाच्यम्। लिङ्गभङ्गाव्यवहितायाश्चरमशरीरोत्क्रान्तेः कर्मक्षयानन्तरभाविन्या इह

१. ब्र.सू.भा.उ.श्रुतिः (३.१.७)

१,२. भागवतम् (१.२.२२)

विचार्यत्वात्। नचार्जुनादीनां शरीरं चरमं, न वा तदुत्क्रान्तिः कर्मक्षयानन्तर-भाविनी। इन्द्रादिपदपर्यवसानपर्यन्तमपि प्रारब्धकर्मसद्भावात्।

एवं देवयानमार्गोऽपि देवानामनुपपन्नः। अर्चिरादिदेवानां स्वस्वोत्तम-देवतायाः ग्रासरूपेण निगीर्णतया लीनत्वात्। अर्चिरादिदेवताप्राप्तिलक्षण-मार्गासम्भवात्। नहीन्द्रादिः स्वाधमदेवताभिः प्रागेव निगीर्णार्चिरादिदेवता अनुक्रम्य गच्छतीति युज्यते। तस्माद् देवानामुत्क्रान्तिर्मार्गश्च न युज्यत एव। नच देवानां फलद्वयमेवेति वक्तुं युक्तम्। सम्पूर्णमोक्षाभावप्रसङ्गात्। 'अथातो ब्रह्मजिज्ञासा' (ब्र.सू. १.१.१) इत्यारभ्य 'भोगेन त्वितरे क्षपयित्वा' (ब्र.सू. ४.१.१९) इत्यन्तसूत्रसन्दर्भैर्विवक्षितानां गुणपूर्णत्वनिर्दोषत्वज्ञान-वैराग्यभक्त्युपास्तिसाक्षात्कारतज्जन्यकर्मक्षयपर्यन्तानाम् देवतदितर-मुमुक्षुसाधारण्यावगमेनान्त्यपादे प्रतिपिपादयिषितभोगस्यापि साधारण्येन तन्मध्ये प्रतिपादितयोरुत्क्रान्तिमार्गयोरवैरूप्याय साधारण्यावश्यम्भावाच्च। स्रष्टुर्ग्रासरूपेण देहलयात्मकस्य देवानां चरमशरीरनाशात्मकस्य मोक्षस्य परिगणितमोक्षप्रभेदाप्रविष्टतया तदर्थं पादान्तरारम्भश्च स्यादिति चेन्न।

उत्क्रान्तिशब्देन देवतदितरसाधारणचरमदेहक्षयस्य विवक्षितत्वात्। ब्रह्मणो लये प्रत्यासन्ने सति प्रवेशार्थं तदभिसर्पणस्य मार्गशब्देन विवक्षितत्वाच्च। नचैतदुभयं देवेषु नास्ति। 'क्ष्माम्भोनलानिलवियन्मनइन्द्रियार्थभूतादिभिः परिवृतः प्रतिसञ्जिघृक्षुः। अव्याकृतं विशति यर्हि गुणत्रयात्मा कालं परं स्वमनुभूय परः स्वयम्भूः। एवं परेत्य भगवन्तमनुप्रविष्टाः' (भागवतम् ३.३.९-१०), अनुव्याख्यानम्, अ. ४, पा.२, श्लो. ८-९) इत्यादिवचनात्। न च 'उत्क्रान्ति-मार्गौ देवानां न प्रायेण भविष्यतः' (अनुव्याख्यानम्, अ.४, पा.२, श्लो.१) इत्यादिवचनैरुक्तयुक्तिभिश्च विरोधः। सुषुम्नानाड्योत्क्रान्तिरर्चिरादिमार्गश्च नास्तीत्यभिप्रायोपपत्तेः।

पादक्रमोल्लङ्घने कारणोक्तिः

ननु तथाऽपि ज्ञानेन प्रक्षीणकर्मणां चरमशरीराद् उत्क्रान्तानां मनुष्याणा-मर्चिरादिमार्गेण महरादिलोकं गतानां तेषु पुनश्चतुर्मुखाद्युपदेशादिना ज्ञानादिसाधनजातं विशदीकुर्वाणानां परान्तकाले प्रत्यासन्ने धर्मदेवे प्रवेशः, तस्य शरीरस्य स्वायम्भुवे मनौ, तस्य स्वोत्तमदैवते, तस्याप्येवमिति क्रमेण वारुणीसौपर्णीशेषगरुडवाणीविधिद्वारा भगवति प्रवेशस्ततो लिङ्गभङ्गादिद्वारा स्वस्वनियतस्थानेषु भोग इति क्रमो ह्यागमेषूपदिश्यते। तथाचानेनैव क्रमेण पादक्रमो वक्तव्यः। नचासाविह दृश्यते। 'वाङ्मनसि' इत्यादिद्वितीयपादादौ देवानां देहलयस्योक्तेः। तदन्त एव मनुष्याणामुत्क्रान्त्युक्तेश्च। एवं तृतीयपादे 'अर्चिरादिना' इत्यादिना देवासम्भावितमार्गोक्तेः पुनरुभयसम्भावितगम्योक्तेः क्रमभङ्गोऽपि दृश्यते। तत् कुतः क्रमभङ्ग इति चेन्न। अवश्य-प्रतिपादनीयार्थानां यथाकथञ्चित् प्रतिपादनमेव प्रतीक्षणीयं प्रेक्षावता। नतु क्रमोऽपि, व्यर्थत्वात्। नहि क्रमेणैव प्रतिपादिता अर्था बुध्यन्त इत्यस्ति नियमः।

ननु सत्यं यथाकथञ्चित् प्रमेयमेव प्रतिपाद्यं तथाऽपि क्रमं विहाय प्रतिपादने कोऽभिप्रायः सूत्रकारस्येति चेत्। नहि वयम् आगमापारवारिधिविहार-शालिनोऽगाधधिषणस्य सूत्रकारस्याभिप्रायमवगन्तुं क्षमाः। विज्ञास्यते चाभिप्रायविशेषस्तत्पादोपक्रमेष्विति न कुचोद्यावकाशः। अत एवैतेषां क्रमभावित्वात् प्रथमपादे कर्मक्षयो निरूप्यते। तत्रादौ सप्ताधिकरण्या सर्वप्रकारविघ्नेऽपि सर्वदा यावच्छक्त्यनुष्ठेयं साधनमुच्यते। तस्य फलसन्निकृष्ट-त्वात्। अध्यायादीनां प्रायिकत्वात् फलाध्याये कर्मक्षयपादेऽस्मिन् साधन-विशेषोपदेशो न विरुद्ध्यते। हानिन्यायेन ध्यानस्य फलावस्थासु प्रवेशितत्वान्नात्यन्तं विरोधोऽपि।

आवृत्त्यधिकरणे चिन्ताक्रमः पूर्वपक्षश्च

श्रवणमनननिदिध्यासनानां ज्ञानार्थं 'तन्निर्धारणार्थनियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम्' (ब्र.सू. ३-३-४३) इत्यादौ व्यस्तानां समस्तानां च कर्तव्यतायाः सिद्धत्वादावृत्त्यनावृत्ती चिन्त्येते। नन्वदृष्टार्थेऽग्निष्टोमादावावृत्त्यदर्शनेऽपि श्रवणादीनां ज्ञानफलत्वेन दृष्टार्थत्वाद् अदृष्टार्थानां च फलपर्यन्ततत्वस्यावघातादावोदनफलके पाकादौ च बहुस्थले दृष्टत्वेन सन्देहाभावान्नावृत्तिरिह चिन्तनीया। नच पुत्रकामेष्ट्यादौ दृष्टफलेऽप्यावृत्तिर्न दृश्यत इति वाच्यम्। अदृष्टाद्वारकदृष्टफले तद्दर्शनात्। अत एव पूर्वतन्त्रेऽपि लोकतः सिद्धत्वादेवावघातपेषणादेरावृत्तिर्नैव चिन्तिता। तदिह सा कुतश्चिन्त्यत इति चेन्न। अदृष्टाद्वारकेषु अवघातादिषु सन्देहाभावेन तदचिन्तनेऽपीहादृष्टद्वारकेषु श्रवणादिषु सन्देहसम्भवेनावृत्तेरवश्यं चिन्तनीयत्वात्। नच श्रवणादिरवघातादिवददृष्टाद्वारकः। 'कर्मणा त्वधमः प्रोक्तः प्रसादः श्रवणादिभिः। मध्यमः' (ब्र.सू.भा.उ. नारदीयवचनम् १-१-१) इति श्रवणात्। नच प्रसादोऽपि दृष्टफलमेवेति वाच्यम्। अतीन्द्रियत्वेन तदयोगात्। प्रसादोपयोगितया मध्येऽदृष्टस्याङ्गीकार्यत्वाच्च। अन्यथा कर्मादावपि प्रसादेनादृष्टापह्नवापत्त्याऽदृष्टाद्वारकत्वं स्यात्। तथाचादृष्टद्वारकेषु दृष्टफलेष्वपि पुत्रकामेष्ट्यादौ आवृत्त्यदर्शनात् सन्देहः कुतो न भवेत्?

किञ्च, श्रवणादेरावृत्तिः न श्रुतस्यैव वाक्यस्य पुनःश्रवणम् एकयैव युक्त्याऽनुसंहितस्य भूयोभूयस्तयैवानुसन्धानमित्यादिरूपा। येन तण्डुलार्थमुपात्तव्रीहीषूद्यमननिपतनाभ्यां मुसलेनावहतस्य यावत्तण्डुलनिष्पत्तिः पुनःपुनरुद्यमननिपतनाभ्यां मुसलाघातात्मकावघातस्येव लोकत एव प्राप्तत्वात् न पुनरिह विचारणीया स्यात्। किन्त्वेकेन वाक्येनावगतस्य तत्वस्य पुनस्तेनान्येन वाऽवगतिः श्रवणावृत्तिः। एवमेकया युक्त्याऽनुसंहितस्य भूयोभूयस्तयाऽन्यया

वाऽनुसन्धानं मननावृत्तिः इत्यादि। तथाच तेनैव पुनरवगतिरित्यंशस्यावघातादिवत् लौकिकप्रत्ययत्वेऽप्यन्येनावगतिरित्याद्यंशे तदभावात्। नन्वेवं चेत् 'सर्ववेदान्तप्रत्ययम्' (ब्र.सू. ३-३-१) इत्यनेनैव गतमेतत्। शाखान्तराध्ययनस्य श्रवणावृत्तिपर्यवसितस्य तत्रैव सिद्धत्वादिति चेन्न। तेनैव वाक्येन पुनरवगतिरित्यंशस्येहाधिकस्यापि प्रसाधनात्। अत्यन्तावश्यकत्वप्रदर्शनाय पुनरारम्भसम्भवाच्च। एतेन पूर्वपक्षस्य मन्दत्वादधिकरणानुत्थानशङ्का निरस्ता। उक्तरीत्या संशयादेरुपपादितत्वात्।

किञ्च, श्रवणादि ज्ञानसाधनं न भवति। सत्यपि श्रवणादाविह ज्ञानानुदयात्। नच तज्ज्ञानं स्वर्गादिवदेतच्छरीरेण भोगायोग्यम्। ऐहिकत्वस्याप्यङ्गीकारात्। नच सकृच्छ्रवणादिमात्रेण ज्ञानानुदयेऽप्यावृत्तेन तदुदयो दृश्यत इति वाच्यम्। 'श्रोतव्यो मन्तव्यः' (बृ.उ. ४-४-५) इत्यादिना श्रुतकार्यकारणभावभङ्गापरिहारात्। न च श्रवणादिविधेरसकृदनुष्ठानपर्यन्तत्वं विना प्रमाणेन वक्तुं शक्यम्। अग्निष्टोमादिविधेरपि तत्प्रसङ्गात्। नच सोमयागस्य सवनत्रयमभ्यस्यमानत्वादिष्टापत्तिरिति वाच्यम्। अग्निष्टोमप्रयोगस्य स्वर्गफलार्थमेवाभ्यस्यमानत्वाभावात्। यस्तु सवनत्रयं सोमयागस्याभ्यासः स तु वाचनिकत्वात् प्रधानयागमात्रधर्मो न सकलस्याप्यग्निष्टोमप्रयोगस्याऽवृत्तेर्ज्ञापकः। नचावघातादिविधीनामिवाऽवृत्तिपर्यन्तत्वम्। ज्योतिष्टोमादिविधेरपि तद्भावः किं न स्यादिति वक्तुं शक्यत्वात्। सुशक्यत्वरूपगुणलाभेनाग्निष्टोमादिविधिवदनावृत्तिपर्यन्तत्वस्यैवोचितत्वाच्च। तथा च श्रवणादिविधेरावृत्तिपर्यवसानस्याशास्त्रत्वाच्छ्रवणादिमात्रेणैव ज्ञानं भवतीति शास्त्रार्थस्य सकृदनुष्ठितश्रवणादिके पुंसि बाधान्न तयोः कार्यकारणभावो युक्त इति पूर्वत्र कर्तव्यतया निर्णीतमपि श्रवणादि न कर्तव्यम्। एवं तानि तानि

साधनान्यपीत्यादिक्रमेणाशेषप्रमेयाक्षेपेण पूर्वपक्षप्रवृत्तेः कथमात्थ नास्ति चोद्यमिति स्वयमेव विभावय।

श्रोतव्य इति शास्त्रार्थो नाऽवृत्त्यां पर्यवस्यति।
तेन शास्त्रार्थबाधोऽस्ति सकृच्छ्रवणके जने॥ इति **पूर्वः पक्षः**।

सिद्धान्तः

सिद्धान्तस्तु-

'आवृत्तिरपि शास्त्रार्थ उपदेशासकृत्त्वतः।
तेन कारणभावोऽस्य श्रवणादेरबाधितः॥'

यद्यपि 'द्रष्टव्य श्रोतव्यः' (बृ.उ. ४.४.५) इत्यत्राऽवृत्तिर्न श्रूयते। श्रवणादिव्यतिरिक्तस्यान्यस्य वाचकस्य शब्दस्याभावात्। तथाऽपि यथा 'स्वर्गकामो यजेत' (मानवश्रौतसूत्रम् ९.३.१.११) इत्यत्र गृहस्थब्राह्मणादि-वाचकशब्दाभावेऽपि 'जातपुत्रः कृष्णकेशोऽग्नीन् आदधीत' इत्यादिना गृहस्थस्यैवाऽधानश्रवणात् न्यासिनस्तदभावे सिद्धे क्रतोरग्निसाध्यत्वादियुक्त्या न्यासिनो व्यावृत्तिः, तथा 'अध्ययने जिह्वाच्छेदः' (गौतमधर्म- १२.४.७) इत्यादिना शूद्रस्याध्ययननिषेधे सिद्धे विद्यासाध्यक्रतौ न शूद्रस्याधिकार इत्यादियुक्त्या शूद्रस्य व्यावृत्तिः शास्त्रार्थ एव, तथेहाप्युद्दालकेन नवकृत्वः श्वेतकेतुं प्रति तत्त्वोपदेशयुक्त्याऽऽवृत्तिरपि तच्छास्त्रार्थ एव। नहि श्रवणस्य शिष्य-व्यापारस्य सकृत्कर्तव्यत्वे तदर्थ उपदेशलक्षणो गुरुव्यापारोऽसकृत् सम्भवति। अतः श्रवणस्याऽवृत्तिस्तावत् सिद्धा। श्रुतान्नादिरूपाष्टकब्रह्मविषय एव पुनःपुनः भृगोः प्रश्नः, तदैव वरुणस्योपदेशः, श्रुतस्य पौनःपुन्येनाऽलोच्यापरोक्षीकृतत्वम् इत्येतल्लिङ्गदर्शनाच्छ्रवणादि नित्यशः आवृत्तमेवापरोक्षज्ञानाय भविष्यतीति शास्त्रार्थः।

किञ्च देवानां स्वस्वयोग्यापरोक्षज्ञानार्थं बहुकालश्रवणमननादिप्रतिपादक-वचनं प्रमाणम्। तथाहि।

'लिङ्गाल्लातव्यतः पूर्वमृजोर्ब्रह्मत्वतः शतात्।
शुश्रावोग्रतपा नाम योग्यो रुद्रपदस्य यः॥
सार्धं परार्धं विष्णोस्तु गुणान् भक्त्या सदोद्यतः।
तत्त्रिभागमुपासां च चक्रे सम्भृतमानसः॥
दशमन्वन्तरं शक्रपदयोग्यो गरुत्मतः।
पदयोग्यात् सुमनसः सुनन्दो नाम चाशृणोत्॥
उपासां चक्र उद्युक्तो मन्वन्तरचतुष्टयम्।
सूर्याचन्द्रमसोश्चैव पदयोग्यौ सुतेजसौ॥
सुरूपः शान्तरूपश्च मन्वन्तरचतुष्टयम्।
अशृण्वतां सुमनसो मन्वन्तरमुपासताम्॥
ततः प्रोक्तास्तु ते सर्वे भक्त्योग्रतपआदयः।
अपश्यन् परमं विष्णुं तत्प्रसादैधिताः सदा॥' इति॥

(अनुव्याख्यानम्, अ.४, पा.१, श्लो.४-८)

यस्यैतस्माद् ब्रह्मकल्पात् शते गते ब्रह्मत्वं भविष्यति स लातव्य इत्युच्यते। शिष्यैरुपासितव्यत्वात्। उग्रतपोनामकस्य रुद्रस्य लातव्याच्छ्रवणकालः पञ्चसप्ततिसंवत्सरपरिमितः। मननध्यानयोस्तु पञ्चविंशतिसंवत्सरात्मकः। सुनन्दनामकस्येन्द्रपदयोग्यस्य जीवस्य गरुडपदयोग्यात् सुमनोनामकाद् दशमन्वन्तरमितः कालः श्रवणकालः। मननध्यानयोस्तु चतुर्मन्वन्तरकालः। सूर्यपदयोग्यस्य सुरूपनामकस्य चन्द्रपदयोग्यस्य शान्तरूपनामकस्य च सुमनोनामकगरुडादेव श्रवणकालश्चतुर्मन्वन्तरमितः। मननध्यानयोस्तु काल

एकमन्वन्तरमित इति श्रवणादीनां बहुकालमनुष्ठितिः प्रतीयते। न ह्यावृत्त्यभावे सा युज्यते। 'नित्यशः श्रवणं चैव' (ब्र.सू.भा.उ. बृहत्तन्त्रवचनम्) इति साक्षादेवाऽवृत्तिश्रवणाच्च। एतेन सुशक्यत्वरूपगुणलाभाद् यथाश्रुत एव शास्त्रार्थ इति निरस्तम्। महाफलत्वाज्ज्ञानस्य सर्वेषामशक्यताया एव गुणत्वात्। अन्यथा सर्वेषां मोक्षापत्तेः। तथाचाऽवृत्तेरशास्त्रार्थत्वे सकृच्छ्रवणके पुंसि ज्ञानानुदयेऽपि शास्त्रार्थबाधाभावाद् आवृत्तश्रवणादिके चैहिकनयोक्तदिशाऽसति प्रारब्धे ज्ञानोदयसद्भावाच्छास्त्रप्रामाण्याव्याहतेरुक्तं युक्तमिति सिद्धम्।

पराभिमताध्यायपादाधिकरणार्थपरीक्षा

अन्ये तु, तृतीये निर्गुणसगुणसाक्षात्कारसाधनोपासनादिविचारः प्रायेणात्यगात्। अथेह चतुर्थे फलविचारः करिष्यते। प्रसङ्गादागतं चान्यदपि किञ्चिच्चिन्तयिष्यते। तत्रापि जीवन्मुक्तिनिरूपणमाद्यपादार्थः। तत्राप्याद्येऽधिकरणे पूर्वपादचिन्तितश्रवणादीनामावृत्तिरुपोद्धातत्वेन चिन्त्यत इत्यध्यायपादाधिकरणार्थनाहुः। तन्न। निर्गुणसाक्षात्कारस्यैव फलत्वेन त्वन्मते फलसाधनयोर्भेदाभावात्। नहि मन्मत इव त्वन्मते मुक्तौ भोगोऽस्ति। नित्यशुद्धबुद्धमुक्तस्वभावब्रह्मानुभवात्मकत्वान्मुक्तेः।

अथोच्येत। परोक्षरूपो ब्रह्मानुभव उपासनाशब्दितः साधनम्, अपरोक्षरूपस्तु फलमिति। तन्न। उपासनाया गुणाध्यासरूपत्वेन सगुणब्रह्मसाक्षात्कारजनकत्वेऽपि निर्गुणब्रह्मानुभवसाधनत्वायोगात्। किञ्च साध्यस्यैव फलत्वं दृष्टमिति नित्यशुद्धबुद्धस्वभावब्रह्मानुभवस्य ब्रह्मात्मकत्वेन कथं फलत्वम्? उक्तं च पूर्वाधिकरणे भामत्यामेव- 'साध्यं हि साधनविशेषाद् विशेषवद् भवति। नच मुक्तिर्ब्रह्मणो नित्यस्वरूपावस्थानलक्षणा नित्या सती साध्या भवितुमर्हति' इति। तस्य च साधननिरपेक्षत्वेन सुतरां तदावृत्त्यपेक्षा नास्तीत्येतदधिकरणविचार्यसाधनावृत्तेरत्यन्तं सङ्गत्यभावः।

किञ्च त्वन्मते ब्रह्मत्वस्य सर्वदाऽनुभूयमानत्वात् तस्य चानुभवायोग्यत्वे सुतरामावृत्तिवैय्यर्थ्यप्रसङ्गः। सकृच्छ्रुतौ ब्रह्मात्मकत्वप्रतीत्यनुपपत्तेरावृत्तिरभ्युपगम्यत इति चेन्न। आवृत्तावपि तदनुपपत्तेः। यदि हि 'तत्त्वमसि' (छा.उ. ६.८.७) इत्यादिवाक्यं सकृच्छ्रूयमाणं ब्रह्मात्मकत्वप्रतीतिं नोत्पादयेत् ततस्तदेव वाक्यमावर्तमानं उत्पादयिष्यतीति का प्रत्याशा? तस्मात् त्वन्मते फलसाधनयोर्भेदाभावात् प्रतिपाद्यहीनमिदं तुरीयं लक्षणमनारम्भणीयमेव।

यच्च जीवन्मुक्तिनिरूपणमाद्यपादार्थ इत्युक्तं तत्र जीवन्मुक्तिः किं सगुणसाक्षात्कारफलम् उत निर्गुणसाक्षात्कारफलम्? नाद्यः। उद्गीथाद्युपासनाफलवत् सगुणसाक्षात्कारफलस्यापि मुमुक्षुणा हेयत्वात्। न द्वितीयः। वेदान्तजन्यनिष्प्रकारकचरमवृत्त्या निर्गुणब्रह्मानुभवेन च ब्रह्मेतरप्रपञ्चप्रविलयेन जीवन्मुक्त्यवस्थाया अपि प्रलीनत्वात्।

रामानुजीयाभिमताध्यायपादार्थादिविमर्शः

केचित्तु, यद्यप्यपहतपाप्मत्वादिगुणयुक्तस्वविशिष्टपरमात्मानुसन्धानात्मकविद्यायास्तादृशानुभवैकरूप्यम्, तथाऽपि कर्मवशत्वेन संसारिणः स्वयत्नसाध्याया विद्यायाः वर्णाश्रमधर्मेतिकर्तव्यत्वापेक्षत्वात् तदनुसन्धानस्य स्मृतिसन्तानरूपत्वेन साक्षादनुभवत्वाभावाच्च, फलरूपानुभवस्य च कृत्स्नपुण्यपापविधूननोत्तरभावित्वेनायत्नसाध्यत्वात् साक्षादनुभवत्वाच्च, ब्रह्मणः सर्वगतत्वेऽप्यर्चिरादिमार्गेणैव मुक्तस्य देशविशेषप्राप्तिपूर्वकं ब्रह्मानुभवश्रवणाच्च विद्यातत्फलयोः स्फुटो भेदः। तथा च तृतीयेऽध्याये पादद्वयेनोपासनोपायाब्रह्मविषयवैतृष्ण्यभगवत्तृष्णयोः जननार्थं यन्निरूपणीयं तन्निरूपितम्, तृतीये विद्याभेदाभेदचिन्ता, चतुर्थेऽङ्गचिन्तेति प्रधानतः विद्यैव चिन्तितेति तत्फलमेव तत्प्रधानतश्चतुर्थाध्याये चिन्त्यते। विद्यायाः पूर्वनिरूपितांशश्च चिन्त्यते। तत्रापि प्रथमद्वितीयपादौ फलचिन्ताया उपोद्घातः। तत्रापि प्रथमे पादे ब्रह्मोपासनफलं

वक्तुमुपासनास्वरूपमुपासनानुष्ठानप्रकारो विद्यामाहात्म्यं चोच्यते। द्वितीयपादे च विदुषो ब्रह्मप्राप्तिगतिप्रकारश्चिन्त्यते। तत्राप्याद्याधिकरणे पादोपोद्घाततत्वेन विद्यास्वरूपं चिन्त्यत इत्याहुः।

तदपि न साधु। तृतीयाध्याये वैराग्यभक्त्युपासनान्तस्य साधनस्य तदङ्गस्य च निरूपितत्वेऽपि भगवद्दर्शनाख्यसाधनस्यानिरूपितत्वात् तदनिरूप्यैव फलचिन्तनायोगात्। नच भगवद्दर्शनं फलमेव, नतु साधनमिति वाच्यम्। 'ज्ञानेनामृतीभवति' (ब्र.सू.भा.उ.श्रुतिः,३.१.७) इत्यादौ साधनत्वप्रतीतेः। तृतीयाध्यायोक्तमुपासनात्मकं परोक्षज्ञानं तत्रोच्यत इति चेन्न। 'दृष्ट्वैव तं मुच्यते नापरेण' (ब्र.सू.भा.दी.उ. श्रुतिः, ३.२.२७) इति श्रुतिविरोधात्।

किञ्च मनोवृत्तिरूपापरोक्षज्ञानस्यैव मुक्तित्वे मुक्तौ मनसो नाशेन तत्परिणामरूपवृत्तेरपि नाशादपुरुषार्थत्वप्रसङ्गः। वृत्तिभिन्नस्य जीवस्वरूपभूतस्य ब्रह्मविषयकानुभवस्य मुक्तित्वे तु तद्भिन्नस्य वृत्तिरूपस्य ब्रह्मसाक्षात्कारस्य कथं साधनत्वाभावः। जीवस्वरूपानुभवस्य च नित्यतया फलत्वानुपपत्तिः। अभिव्यक्तेस्तदुपपत्तिरिति चेन्न। तदभिन्नत्वभिन्नत्वयोः दोषतादवस्थ्यात्। अनित्यत्वे संसारसाम्यापत्तेः। नहि मन्मत इव त्वन्मते भेदप्रतिनिधिविशेषोऽङ्गीक्रियते। तस्मात् किञ्चित् साधनमुर्वरितं कृत्वेह फलचिन्तनमनुपपन्नमेव। पादद्वयस्योपोद्घातत्ववर्णनं तु सार्थादपि तस्करा बहव इति लौकिकमाभाणकं नातिवर्तते। एवमन्यत्रापि दूषणमूह्यम्।

पराभिमताधिकरणपरीक्षा

यच्चान्यैः अस्याधिकरणस्य शरीरमुक्तम्। प्रथमं तावत् श्रवणादीनि निर्गुणसाक्षात्कारसाधनानि अहंग्रहोपासनानि सगुणसाक्षात्कारसाधनानि चोदाहृत्य विचार्यते ? तानि च सकृत् प्रयोक्तव्यानि उतासकृदिति। तत्र

'अदृष्टा श्रवणादीनां मोक्षसाधनतोचिता।
चोदनालक्षणा चेति स्यात् प्रयोगः सकृत्सकृत्।'

न तावत् परोक्षावभासविज्ञानजननस्वभावे श्रवणमनने प्रत्येकं मिलिते वाऽऽवृत्ते वा साक्षात्कारम् इन्द्रियफलं प्रसोतुमर्हतः। अतिप्रसङ्गात्। यद्यपि निदिध्यासनात्मकं ध्यानमपरोक्षं प्रसौति कामिनीभावनाप्रकर्षेण कामिनीसाक्षात्कारदर्शनात्। तथाऽपि तदपरोक्षं न प्रमाणं प्रातिभासिकत्वात्। अतो दृष्टद्वारासम्भवात् मुक्तिफलस्य चात्यन्तपरोक्षत्वात् तदर्थानि श्रवणमननध्यानानि चोद्यमानानि यावद्विधानमनुष्ठेयानि। मोक्षस्य ज्ञानसाध्यत्वश्रुतयस्तु स्तुत्या व्याख्येयाः। उपासनानां तु उपासनाशब्दनिष्पत्तिपर्यन्तमेवाऽऽवृत्तिरिति प्राप्तेऽभिधीयते।

'दृष्टोऽत्र श्रवणादीनां साक्षात्कारफलोदयः।
मुक्तिर्यन्नान्तरीयेति तत्प्रयोगः फलावधिः॥'

न तावच्छ्रवणादीनां दृष्टे सम्भवत्यदृष्टोऽर्थः कल्प्यः। दृष्टासम्भवश्च मोक्षस्य श्रवणादिसाध्यत्वश्रवणाद्वा। सिद्धेऽपि च तस्मिन् श्रवणादिजन्यसाक्षात्कारानुपयोगाद्वा। तस्य श्रवणाद्यजन्यत्वाद्वा। तस्य जन्यत्वेऽप्यप्रमाणत्वाद्वा। तस्य तादृशविषयव्यभिचारदर्शनाद्वा। प्रमाकरणाजन्यत्वाद्वा। नाऽद्यः। मुक्तेः सवासनाविद्योच्छेदेनात्मनः स्वरूपावस्थानलक्षणायाः श्रुतिसिद्धत्वात् विमतोऽविद्यादिः तत्त्वसाक्षात्कारेण निवर्तते अविद्यादित्वाद् अहिविभ्रमवद् इत्यनुमानविरोधेन श्रवणादिसाध्यत्वाभावात्। श्रुतेः सम्भवन्मुख्यार्थायाः स्तुतिलक्षणायोगात्। न द्वितीयः। अपरोक्षभ्रमस्यापरोक्षागन्तुकज्ञानेन विना निवृत्त्ययोगात्। अन्यथा गुडे तिक्तताभ्रमस्योपदेशादिनाऽपि निवृत्तिप्रसङ्गात्। न तृतीयः। गान्धर्वशास्त्रश्रवणाद्याभ्याससचिवश्रोत्रेण षड्जादिसाक्षात्कारोपजननदर्शनेन ब्रह्मात्मत्वसाक्षात्कारस्य वेदान्तश्रवणाद्यभ्याससचिवमनो-

योनित्वस्यानुमानसिद्धत्वात्। नचाप्रामाण्यशङ्का। विषयतथात्वस्य यौक्तिकप्रमाणसिद्धत्वात्। नचाकरणजन्यत्वम्। मनोजन्यत्वात् तस्य। अतो दृष्टार्थश्रवणादेः साक्षात्कारपर्यन्तमावृत्तिरिति युक्तमिति।

तन्न। त्वन्मते श्रवणस्य प्रमेयावगतिं प्रत्यव्यवहितसाधनत्वेनाङ्गीकृतत्वेन शब्दरूपत्वात् तस्य च परोक्षज्ञानजननस्वभावस्य साक्षात्कारफलकत्वासम्भवात्। न खलु कुटजबीजाद् वटाङ्कुरो जायते।

भामतीमतनिरासः

यदत्रोक्तं भामत्यां न ब्रह्मसाक्षात्कारः साक्षादागमयुक्तिफलम्। अपि तु युक्त्यागमार्थज्ञानाहितसंस्कारसचिवं चित्तमेव ब्रह्मणि साक्षात्कारवर्तीं बुद्धिवृत्तिमाधत्ते। तस्माद्गान्धर्वशास्त्रार्थज्ञानाभ्यासाहितसंस्कारसचिवेन श्रोत्रेण षड्जादिस्वरग्राममूर्छनाभेदमध्यक्षेणेक्षते एवं वेदान्तज्ञानाहितसंस्कारो जीवः स्वस्य ब्रह्मभावमन्तःकरणेनेक्षत इति। तन्न। निदिध्यासनवैयर्थ्यापत्तेः। नच 'निदिध्यासितव्यः' (बृ.उ., ४.५.६) इति शास्त्रविहितस्य स्त्रैणस्य कामिनीसाक्षात्काराय कामिनीभावनाया इवाऽवश्यकस्य निदिध्यासनस्य वैयर्थ्यं युक्तम्। निदिध्यासनमप्यत्र विवक्षितमेवेति चेन्न। कामिनीसाक्षात्कारवदेव ब्रह्मसाक्षात्कारस्याप्यप्रमात्वापातात्। अनुमितभावितवह्निसाक्षात्कारे भ्रमत्वदर्शनात्। ननु तदानीं वह्निस्वरूपस्य परोक्षत्वेनापरोक्षत्वाभावात् तत्र साक्षात्कारस्याप्रमात्वेऽप्युपाधिरूषितस्य स्वतो ब्रह्मस्वरूपस्य जीवस्यापरोक्षत्वं सदातनमेव। नहि शुद्धबुद्धत्वादयो वस्तुतस्ततोऽतिरिच्यन्ते। जीव एव तु तत्तदुपाधिरहितः शुद्धादिस्वभावो ब्रह्मेति गीयते। नच तत्तदुपाधिविरहोऽपि ततोऽतिरिच्यत इति चेन्न। निर्गुणभावनाऽसम्भवेन सगुणस्यैव भावनीयतया सगुणगतसार्वज्ञादेश्चानुमितभावितवह्न्यपरोक्षत्वादेरिवासत्वेन तद्भावनाजन्यसाक्षात्कारस्याप्रमात्वावश्यम्भावात्।

अस्तु वा श्रवणादेर्दृष्टमपरोक्षं फलम्। तथाऽपि तदावृत्तिरफलैव। सा किं ज्ञानस्वरूपनिष्पत्तावुपयुज्यते। उत तद्गते कस्मिंश्चिदतिशय इति। नाऽद्यः। नित्यशुद्धबुद्धमुक्तस्वभावब्रह्मात्मकस्फुरणस्यैवापरोक्षत्वेन तस्याजन्यत्वात्। तथाभूतब्रह्मविषयत्वाद् वृत्तिरप्यपरोक्षेति विवक्ष्यत इति चेन्न। ब्रह्मणो वृत्तिव्याप्यत्वानङ्गीकारात्। अनाधेयातिशयोक्तब्रह्मविषयवृत्तावावृत्तिवैयर्थ्याच्च। अत एव न द्वितीयः। किञ्च यदि 'तत्त्वमसि' (छा.उ. ६.८.७) इति वाक्यं सकृच्छ्रूयमाणं ब्रह्मात्मत्वप्रतीतिं नोत्पादयेत् ततस्तदेव वाक्यमावर्तमानमुत्पादयिष्यतीति का प्रत्याशा ? केवलवाक्यस्य साक्षात्कारजनकत्वाशक्तेः युक्त्यनुसन्धानमपेक्षणीयमिति चेत्, तथाऽप्यावृत्तिवैयर्थ्यमेव। युक्तिरपि सकृत् प्रवृत्तैव हि स्वार्थमनुभावयिष्यति। ननु युक्त्या वाक्येन च सामान्यविषयमेव विज्ञानं क्रियते न विशेषविषयम्। यथा 'अस्ति मे हृदये शूलम्' इति वाक्याद् गात्रकम्पादिलिङ्गाच्च शूलसद्भावसामान्यमेव पुनः प्रतिपद्यते। न पुनर्यथा स एव शूली विशेषमनुभवति तथा विशेषानुभवं परः प्रतिपद्यते इति चेत्। तत्र किमनेनोक्तं स्यादिति वक्तव्यम्। युक्तिवाक्ययोः परोक्षज्ञानजनकत्वादपरोक्षानुभवो नास्तीत्यभिप्रायस्तु न युज्यते। केवलवाक्यादेस्तत्र सामर्थ्याभावेऽपि श्रवणादिसंस्काराहितस्य तस्यान्तःकरणस्य वा तत्सम्भवेन साक्षात्कारोपपत्तेः। साक्षात्कारविशेषो नोत्पद्यत इत्यभिप्रायस्तु न समञ्जसः। विषयिविशेषस्य विषयविशेषायत्ततया निर्विशेषे तदयोगात्। अनेकांशोपेते हि लौकिके पदार्थे दीर्घप्रपाठकादौ सामान्यविशेषवत्येकेनावधानेनैकमंशमवधारयति, अपरेण अपरमिति दृष्टत्वात् स्यादप्यभ्यासोपयोगः। न तु निर्विशेषब्रह्मणि सामान्यरहिते चैतन्यमात्रात्मके अभ्यासापेक्षा युक्ता । अत्रोक्तं भाष्ये- 'नहि दृष्टेऽनुपपत्तिर्नाम। दृश्यन्ते हि सकृच्छ्रुताद् वाक्यात् मन्दप्रतीतं वाक्यार्थमावर्तयन्तः तत्तदाभासव्युदासेन सम्यक् प्रतिपद्यमानाः' इति।

तदसाधु। वाक्यार्थस्य सखण्डत्वेन सम्यक्त्वासम्यक्त्वविशेषोपपत्तावपि अखण्डे तदयोगात्। सर्वदुःखविनिर्मुक्तैकचैतन्यात्मकोऽहमित्येव ह्यात्मानुभवः। स चायं पदार्थशोधनसाध्यः। ततः पदार्थपरिशोधनायाऽवृत्तिः श्रवणमननादीनां युक्तेति चेन्न। निर्दुःखत्वादेर्ब्रह्ममात्रत्वेन तस्य च प्रकाशत्वेन अहम्प्रत्यये विनाऽपि श्रवणादिना विना च पदार्थशोधनेन भासमानतया सुतरामावृत्तेरनपेक्षितत्वात्। अहम्प्रत्यये शुद्धो न भातीत्येतत्तु आदावेव दूषितं पूर्वाचार्यैरितीह सङ्क्षिप्यते।

परोक्तसूत्रार्थविमर्शः

एतेन प्रत्ययावृत्तिः कर्तव्या। 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ.उ. ४.५.६)इत्याद्यसकृदुपदेशादिति सूत्रव्याख्यानं निरस्तम्। असकृदुपदेशो ह्येकप्रकाराम्नानेषु 'स एषोऽणिमैतदात्म्यमिदं सर्वम्' (छा.उ. ६.८.७) इत्यादिश्रुतिषु प्रसिद्धः। नचेदमाम्नानमेकप्रकारकम्। श्रुणोत्यादेर्भिन्नभिन्नतया श्रवणात्। प्रत्ययैक्यमात्रेणासकृदुपदेशत्वे यजति ददाति जुहोतीत्यादावपि प्रत्ययैक्येनासकृदुपदेशत्वप्राप्त्या शब्दान्तरत्वाभावेन कर्मभेदो न स्यात्। धात्वर्थभेदस्यात्रापि सत्त्वात्। श्रुणोत्यादीनां त्रयाणामपि धातूनां वेदनमेकमेवार्थ इति वैषम्यमिति चेन्न। सहप्रयोगानुपपत्तेः। तत्त्वज्ञानावधारणादीनां श्रुणोत्याद्यर्थतयैकत्वाच्च। 'ब्रह्मविदाप्नोति परम्' (तै.उ. १.१) 'आत्मानमेव लोकमुपासीत' इत्यादौ प्रत्ययावृत्तेरप्यभावाद् असकृदुपदेशादित्युक्तहेतुनाऽऽवृत्तिसाधनायोगाच्च।

यदत्रोक्तं भाष्ये- उपासनं निदिध्यासनं चेत्यन्तर्णीतावृत्तिगुणैव क्रियाऽभिधीयते। तथा हि लोके गुरुमुपास्ते राजानमुपास्त इति च यस्तात्पर्येण गुर्वादीननुवर्तते स एवमुच्यते। 'ध्यायति प्रोषितनाथा पतिम्' इति या निरन्तरस्मरणा पतिं प्रति सोत्कण्ठा सैवमुच्यते। विद्युपास्त्योश्च व्यतिरेकेण

प्रयोगदर्शनाद् विदेरप्यावृत्तिगुणक्रियाभिधायित्वमिति तत्राप्यावृत्तिसिद्धिरिति- तदेतदपभाष्यमेव। असकृदुपदेशस्य सौत्रस्य हेतोस्तत्राभावात्। उपास्तेः कथञ्चिदावृत्तिगुणकत्वेऽपि वेदनस्य तदयोगाच्च। वेदान्तेऽव्यतिरेकेण प्रयोगमात्रेणाभिन्नार्थत्वेऽतिप्रसङ्गाच्च। अनेन न्यायेनैव सर्वत्राऽवृत्तिसिद्धौ असकृदुपदेशस्याव्यापकस्य सूत्रकृद्विवक्षायोगाच्च।

पराभिमतद्वितीयसूत्रार्थनिरासः

उद्गीथविज्ञानं प्रस्तुत्य 'आदित्य उद्गीथः' (छा.उ. १.५.१) इत्येतदेकपुत्रतादोषेणापोद्य 'रश्मींस्त्वं पर्यावर्तयात्' (छा. १.५.२) इति रश्मिबहुत्वविज्ञानं बहुपुत्रतायै विदधद्वाक्यरूपलिङ्गाच्च श्रवणादिप्रत्ययावृत्तिरिति हेत्वन्तरमुच्यत इति द्वितीयवृत्तिरपि न समीचीना। उद्गीथविज्ञानस्याऽवृत्तिसिद्धावपि सर्वप्रत्ययेष्वावृत्तौ लिङ्गानुपन्यासात्। तत्सामान्यात् सर्वप्रत्ययेष्वावृत्तिसिद्धौ मोक्षेतरपुत्रादिफलकत्वस्याप्यापाताच्च। फलविशेषं प्रत्यावृत्तौ लिङ्गं तत्सामान्यात् प्रत्ययान्तरेष्वपि फलविशेषं प्रत्येवाऽवृत्तौ लिङ्गं स्यात्। न मुक्तिफलं प्रतीत्यापाताच्च। अत एवानावृत्तस्य 'आदित्य उद्गीथः' (छा. १.५.१) इत्यस्य विज्ञानस्यैकपुत्रताफलं श्रूयते। अनेन लिङ्गेन सर्वत्र प्रत्ययानामावृत्तानामेव फलजनकत्वे सिद्धेऽनावृत्तस्योद्गीथविज्ञानस्यैकपुत्रताफलमपि न स्यात्।

किञ्च सर्वप्रत्ययानां पूर्वोक्तन्यायेनाऽवृत्तिसिद्धौ पुनरिहाऽवृत्तिविधानं न स्यात्। विधीयते चाऽवृत्तिस्तेन ज्ञायते यन्नाम तन्नामेत्यतिदेशेन विद्याभेद इवात्रैवाऽवृत्तिः कार्या नान्यत्रेति। ततो विपरीतमेव लिङ्गम्। यथा च 'मृडमृदगुधकुषक्लिशवदवसः क्त्वा' (पा.सू. १-२-७) इति पुनर्विधानसामर्थ्याद् एभ्य एव क्त्वा नेतरेभ्य इति गम्यत इति।

रामानुजाभिमताधिकरणपरीक्षा

केचित्तु 'ब्रह्मविदाप्नोति परम्' (तै.उ. १.१) इत्यादिषु ब्रह्मप्राप्तिसाधनतया विहितं वेदनं सकृत् कृतमेव शास्त्रार्थ उत असकृदावृत्तमिति संशये, 'ब्रह्म वेद ब्रह्मैव भवति' (मु.उ. ३.२.९) इति वेदनमात्रस्यैव विधानाद् असकृदावृत्तौ प्रमाणाभावात् सकृत् कृतमेव शास्त्रार्थः । अवघातादिवद् यावत्कार्यमावृत्तिरिति चेन्न । ज्योतिष्टोमादिकर्मणां वेदनस्य च परमपुरुषाराधनरूपत्वेनादृष्टार्थत्वोपपत्तेरिति प्राप्ते प्रचक्ष्महे । असकृदावृत्तं वेदनमेव शास्त्रार्थः । ध्यानोपासनपर्यायेण वेदनशब्देनोपदेशात् । तत्पर्यायत्वं च विद्युपास्तिध्यायतीनामेकस्मिन् विषये वेदनोपदेशपरवाक्येषु प्रयोगदर्शनादवगम्यते । तथा हि । 'मनो ब्रह्मेत्युपासीत' (छा.उ. १-१८-१) इत्युपासिनोपक्रान्तोऽर्थः 'भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद' (छा.उ. ३-१८-३) इति विदिनोपसंह्रियते । तथा 'यस्तद्वेद यत् स वेद स मयैतदुक्तः' (छा.उ. ४-१-४) इति रैक्वस्य ज्ञानं 'अनु म एतां भगवो देवतां शाधि यां देवतामुपास्से' (छा.उ. ४-२-२) इत्युपासिनोपसंह्रियते । तथा 'ब्रह्मविदाप्नोति परम्' (तै.उ. १-१) इत्यादिवाक्यसमानार्थेषु वाक्येषु 'आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ.उ. ४-४-५), 'ततस्तु तं पश्यते निष्कलं ध्यायमानः' (मु.उ. ३-१-८) इत्यादिषु ध्यायतिना वेदनमभिधीयते । ध्यानं च चिन्तनम् । चिन्तनं च स्मृतिसन्ततिरूपम् । न स्मृतिमात्रम् । उपास्तिरपि तदेकार्थः, एकाग्रवृत्तिचित्तनैरन्तर्ये प्रयोगदर्शनात् । तदुभयैकार्थ्याद् असकृदावृत्तस्मृतिसन्ततिरिह 'ब्रह्म वेद ब्रह्मैव भवति' (मु.उ. ३-२-९) इत्यादौ वेदनादिशब्दैरभिधीयत इति निश्चीयत इत्याहुः । तन्न । विदिना साक्षात्कारस्यैवोक्ततयोपास्तिध्यायतिपर्यायत्वायोगात् । ध्यानातिरिक्तस्य दर्शनस्य 'आत्मा वा अरे द्रष्टव्यः' (बृ.उ. ४.५.६) इत्यादौ विधानात् । यद्यपि विदिः श्रवणादि-

रूपपरोक्षेऽपरोक्षेऽपि ज्ञानेऽनुशिष्टः । तथाऽपि 'दृष्ट्वैव तं मुच्यते नापरेण' (ब्र.सू.भा.दी.उ.श्रुतिः, ३.२.२७) इति श्रुत्यनुसारायापरोक्षज्ञानपरः । न चापरोक्षज्ञानस्याऽवृत्तिरिह साध्यते । तत्साधनश्रवणाद्यावृत्तेरेवेह प्रस्तुतत्वात् । ज्ञानसामान्यवाचिनो विदेस्तद्विशेषवाचिभ्यामुपास्तिध्यायतिभ्यां पर्यायत्वायोगाच्च । उदाहृतवाक्येषु उपक्रमोपसंहारानुगुण्याय विदेरुपास्तिपरत्वेऽपि 'ब्रह्मविदाप्नोति परम्' (तै.उ. १.१) इत्यादावुपास्तिध्यायतिभ्यामुपक्रमोपसंहाराभावेन तदर्थपरत्वायोगाच्च ।

रामानुजोक्तस्य प्रथमसूत्रार्थस्य विमर्शः

यच्च वेदनशास्त्रार्थ आवृत्तिरसकृदसकृदावृत्तं वेदनं ध्यानमित्यर्थः । वेदनविधायिसमानशास्त्रे 'ध्यातव्यः' 'उपासीत' इत्युपदेशादिति सूत्रव्याख्यानं तदयुक्तम् । वेदनं शास्त्रार्थ इत्यध्याहृतस्य प्रथमान्तस्य धर्मिवाचिन आवृत्तिरिति धर्मवाचिना सामानाधिकरण्येनान्वयायोगात् । आवृत्तिरित्येतन्मात्रस्यैव साध्यसमर्पकत्वोपपत्तावसकृदित्यस्यापि साध्यकोटौ प्रवेशे वैयर्थ्यपुनरुक्त्योरापाताच्च । 'उपदेशात्' इत्यस्यासकृदित्यनेनान्वयोपपत्तावध्याहारेण हेत्वंशस्य व्याख्यानायोगाच्च । 'ब्रह्मविदाप्नोति परम्' (तै.उ. १.१) इत्यत्रोक्तरीत्या दर्शनपरत्वोपपत्तौ ध्यानपरत्वायोगाच्च ।

रामानुजोक्तस्य द्वितीयसूत्रार्थस्य विमर्शः

यच्च 'मां ध्यायन्त उपासते । तेषामहं समुद्धर्ता मृत्युसंसारसागरात् । तद्रूपप्रत्यये चैका सन्ततिश्चान्यनिस्पृहा । तद्ध्यानं प्रथमैः षड्भिरङ्गैर्निष्पाद्यते तदा ॥' इत्यादिना मोक्षसाधनभूतवेदनस्य सन्ततस्मृतिरूपत्वस्मरणाच्चेति द्वितीयस्य व्याख्यानं तन्न साधु । लिङ्गशब्दस्य स्मृतिपरत्वायोगात् । नचोदाहृतस्मृतौ वेदनस्य सन्ततस्मृतिरूपत्वमुच्यते । ध्यानादिस्वरूपस्यैव कथनात् । ध्यानस्य विदि-

पर्यायत्वाद् वेदनमुच्यत इति चेन्न। साक्षाद्धेतुत्वसम्भवे परम्परया तदयोगात्। तस्मान्नैवमधिकरणार्थः।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- **अत एव एतेष्वधिकरणेष्विति** ॥ यद्यपि हानिन्यायेन ध्यानलक्षणोपासनस्य मुक्तावप्यनुवृत्तेः फलरूपत्वं श्रवणमननयोस्तूपासना-शब्दवाच्यत्वाद् ध्यानवदेव फलरूपत्वमस्तीत्यध्यायादिसङ्गतिरपि ऊह्या। तथाऽप्युक्तरीत्याऽऽवश्यकत्वज्ञापनाय साधनविचारस्यापि सम्भवेनाध्यायादि-सङ्गतिगवेषणक्लेशो युक्तः। तदिदमुक्तम्- **अन्वेषणीयेति** ॥ सप्ताधि-करण्यामाद्याधिकरणप्रतिपाद्यमाह- **तत्रादाविति** ॥ आवृत्तेस्सप्ताधि-करणीप्रमेयेष्वात्मत्वोपासनादिष्वपि सर्वत्राऽवश्यकत्वेनाभ्यार्हितत्वात् सैवाऽदौ प्रतिपाद्यत इति भावः। **कर्तव्यतोपपादनादिति** ॥ 'श्रोतव्यः' इत्यादि-शास्त्रार्थत्वसमर्थनद्वारेति शेषः। तेन श्रवणादीनां दृष्टार्थानां लोकवदेवाऽ-वृत्तिसिद्धेरधिकरणारम्भो व्यर्थ इति निरस्तम्। **अस्ति शास्त्रादिसङ्गतिरिति** ॥ आदिशब्देनाधिकरणसङ्गत्यादिः गृह्यते। अत एवाधिकरणसङ्गतिमाह- **अन्यथा श्रवणादीनामिति** ॥ 'तन्निर्धारणार्थनियमः' (ब्र.सू. ३-३-४३) इत्यादौ श्रवणादीनां ज्ञानसाधनत्वोपजीवनेन प्रवृत्तानामधिकरणानामयुक्तत्वा-पत्त्योपासनापादीयाधिकरणैः सङ्गतिः। अनन्तरसङ्गतिस्तु नाध्यायादौ गवेष-णीया। यदि कस्यचित्तथाऽऽग्रहः, तदा श्रवणादीनां ज्ञानसाधनत्वासिद्ध्या तन्न्यायेन ज्ञानस्य मोक्षसाधनत्वस्याप्यसिद्ध्या 'तदवस्थावधृतेः' इत्यध्यायान्तिमाधिकरणोक्तं न सिद्ध्यतीति पूर्वाक्षेपेण प्रवर्तनात् साऽप्यूह्येति भावः। **किं सकृदनुष्ठेयमिति** ॥ सकृदनुष्ठितमेव श्रवणादि शास्त्रार्थ उताऽवृत्तमेवेति विमर्शार्थो द्रष्टव्यः। 'एकवारेणैव फलप्राप्तिः' इति भाष्यानुसारात् पूर्वपक्षमाह- **सकृदेवेति पूर्वः पक्ष इति** ॥ सकृदेवानुष्ठितं श्रवणादि 'आत्मा वा अरे द्रष्टव्यः'

(बृ.उ. ४.५.६) इत्यादीनां श्रवणादिविधीनामर्थो न त्वावृत्तेन फलप्राप्तिरितीति **पूर्वः पक्ष** इत्यर्थः।

सुशक्यताख्यपूर्वपक्षन्यायविवरणम्

अत्र न्यायमाला -

'सुशक्यता शश्वदतिप्रसिद्धिर्विवेकविन्यासविचारसञ्ज्ञाः।
नानाप्रवृत्तिः कृतकृत्यता च विपक्षतर्काः ॥' इति।

तत्र सुशक्यतान्यायं सम्बन्धिसाध्यप्रदर्शनाभ्यां विवृण्वत्,

'न च श्रवणाद्यनावृत्त्याऽपरोक्षज्ञानोदये सर्वेषां सुशक्यत्वमिति गुणः' इति वाक्यं भाष्यसूचितपूर्वपक्षयुक्त्याक्षेपसमाधानाय प्रवृत्तमिति सूचयन् अवतारयति- **साधनावृत्तेरपीति** ॥ अग्निष्टोमादिवाक्यानां सकृदनुष्ठिताग्नि-ष्टोमादिरेवार्थः। तेनैव फलदर्शनात्। तद्वत् सकृदनुष्ठितश्रवणादिरेव श्रवणादिविधेरर्थ इत्येतन्नोपपद्यते। 'व्रीहीन् अवहन्ति' इत्यादिशास्त्रस्याव-घाताद्यावृत्तिरर्थ इति दर्शनाद् अत्राप्यावृत्तिरेव श्रवणादिविध्यर्थः किं न स्यात्? दृष्टान्तमात्रस्यासाधकत्वे तवापि नेष्टसिद्धिरित्याक्षेपाभिप्रायः। तत्परिहाराय विवरणं योजयति- **उभयथा दर्शनेऽपीति** ॥ अनेन ज्ञानोदय इत्येतदभ्युपगमपर्यन्तं व्याख्येयमित्युक्तं भवति।

नन्वनेन श्रवणादिज्ञानयोः कथं साध्यसाधनभावाक्षेप इत्यतो भाष्यादिसूचितां युक्तिं स्वयमाह- **नच तथा भवतीति** ॥ अनावृत्तश्रवणादिरेव शास्त्रार्थ इति सकृच्छ्रवणमात्रेण ज्ञानं भवतीति साधनत्वमुपपन्नमिति वक्तव्यम्। नच सकृच्छ्रवणमात्रेण ज्ञानं भवति। तथा क्वाप्यदर्शनादिति श्रवणादिशास्त्रमप्रमा-णम्। अतः प्रमाणाभावाच्छ्रवणादि न ज्ञानसाधनमित्यर्थः।

'इत्यादीनाम्' इति भाष्यस्यान्वयाप्रतीतेः 'एकवारेणैव फलप्राप्तिः' इत्यनेन

व्यवहितेनान्वयं दर्शयन् विवक्षितमर्थमाह- **आत्मेति** ॥ 'श्रुत्युक्तानां श्रवणादीनामनावृत्तिः' इत्यनेनेत्यादीनां श्रुतीनां प्रतिपाद्यानां श्रवणादीनामित्यध्याहारः। अत 'आत्मा वा अरे द्रष्टव्यः' (बृ.उ. ४.५.६) इत्यादिश्रुतीनामग्निष्टोमादिवाक्यवदेकवारेणैव फलप्राप्तिरर्थ इत्यावृत्त्यादिना भाष्यं योजनीयमिति सूचितम्।

महाफलत्वाख्यसिद्धान्तन्यायविवरणम्

अत्र न्यायमाला -

'महाफलत्वं प्रविविक्तता च सन्धिग्रहः साधनमाप्तकृत्यम्।
विशेषकार्यं कृतिसंस्थितिश्च सुयुक्तयो निर्णयगाः स्वपक्षे॥' इति॥

तत्र महाफलत्वन्यायं साध्यप्रदर्शनेन 'विविक्तता च' इत्युक्तचशब्दोऽत्रापि गृह्यत इति तदर्थं चानिष्टप्रसञ्जनेन च विवृण्वत्,

'महाफलत्वात् सर्वेषामशक्यताया एवोपपन्नत्वात्। अन्यथा सर्वसुशकस्यैव साधनतया सर्वेषां मोक्षापत्तेः।'

इति वाक्यं व्याख्यातुमवतारयति- **नच सुशक्यत्वगुणलाभादिति**॥ 'अन्यथा' इत्युत्तरार्धं व्याचष्टे- **सर्वेषामिति** ॥ अनेन ज्ञानस्य महाफलत्वात् सर्वेषां दुर्लभत्वस्यैव माहात्म्योपपादकतया युक्तत्वात्, सर्वसुलभस्यैव ज्ञानसाधनत्वापत्त्या ज्ञानोदयेऽयोग्यानामपि मोक्षप्रसङ्गाच्च सुशक्यत्वं न गुण इति विवरणयोजनं सूचितम्।

सङ्क्षेपभाष्यम्

अत्र सप्ताधिकरणीप्रमेयसङ्ग्राहकम्-

'विष्णुर्ब्रह्म तथाऽऽदातेत्येवं नित्यमुपासनम्।
कार्यमापद्यपि ब्रह्म तेन यात्यपरोक्षताम्॥'

इति सङ्क्षेपभाष्यम् आकाङ्क्षाक्रमेण प्रवृत्तानामपि सूत्राणां शिष्यबुद्ध्युपारोहायार्थक्रमेणाधिकरणानां तात्पर्यं व्याचष्टे। तत्र नित्यमुपासनं कार्यमिति श्रवणादीनामावृत्तिः कर्तव्येत्येतदधिकरणप्रपञ्चनमिति ज्ञातव्यम्।

॥ इत्यावृत्त्यधिकरणम्॥ १॥

॥ अथ आत्मोपगमाधिकरणम् ॥ २ ॥

सूत्रभाष्यम्

ॐ आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॐ ॥ ४.१.३ ॥

आत्मेत्युपदेश उपासनं च मोक्षार्थिभिः सर्वथा कार्यमेव। 'नान्यं विचिन्तय आत्मानमेवाहं विजानीयामात्मानमुपास आत्मा हि ममैष भवति' इति ह्युपगच्छन्ति। 'आत्मेत्येवोपास्व आत्मेत्येव विजानीहि नान्यं किञ्चन विजानथ आत्मा ह्येवैष भवति' इति ग्राहयन्ति च।

'आत्मेत्युपासनं कार्यं सर्वथैव मुमुक्षुभिः।
नानाक्लेशसमायुक्तोऽप्येतावन्नैव विस्मरेत् ॥' इति भविष्यत्पर्वणि ॥

'आत्मा विष्णुरिति ध्यानं विशेषणविशेष्यतः।
सर्वेषां च मुमुक्षूणामुपदेशश्च तादृशः।
कर्तव्यो नास्य हानेन कस्यचिन्मोक्ष इष्यते ॥' इति ब्राह्मे ॥ ३ ॥

॥ इति आत्मोपगमाधिकरणम् ॥ २ ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र भगवज्ज्ञानसाधनात्मत्वोपासनस्य नित्यशः कार्यत्वसमर्थनादस्ति शास्त्रसङ्गतिः। स्व-स्वामिभावसम्बन्धस्य नित्यमुपास्यत्वाभावे वेदानां तत्र महातात्पर्यमयुक्तं स्यादिति समर्थनीयमेतत्।

प्रकृतात्मत्वं विषयः। नित्यश उपास्यं न वेति सन्देहः। उपासनस्य नित्यशः कर्तव्यत्वं गुणान्तरसाम्यप्रतीतिश्च सन्देहबीजम्।

पूर्वपक्षः

तत्रात्मत्वं न सर्वथा सदोपास्यमिति पूर्वः पक्षः। हरेर्जगत्स्वामित्वस्य शश्वदतिप्रसिद्धत्वात्। शश्वदतिप्रसिद्धस्य नित्यमुपासनं व्यर्थमेव किन्त्वप्रसिद्धगुणोपासनस्य ज्यायस्त्वेन तदेव नित्यशः कर्तव्यम्। अतः स्वामित्वस्य नित्यमनुपास्यत्वाद् वेदानां तत्र महातात्पर्यं व्यर्थमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **आत्मेति।** विष्णुरात्मेत्युपासनं सदा सर्वथा कार्यमेव। तस्यैव मोक्षसाधनत्वात्। अन्यथा तदसिद्धेः। न केवलं तथोपासनमावश्यकं किन्तु तथोपदेशश्च कर्तव्यः। तदभावेऽपि मोक्षाऽसिद्धेः। न केवलमात्मत्वोपासनोपदेशान्वयव्यतिरेकित्वात् तस्य सर्वदा सर्वथोपास्यत्वं किं तर्हि 'नान्यं विचिन्तय' इति तस्य सर्वथोपास्यत्वोपदेश्यत्वयोः श्रुतिसद्भावाच्चेति भावः। आत्मा हि ममैष भवतीत्याद्यविद्यमानोपासनं नैतदिति वक्ति। उपगच्छन्त्युपासते। ग्राहयन्त्युपदिशन्ति। न च शश्वदतिप्रसिद्धत्वात् सदा सर्वथोपास्यत्वाभावः। उपासनस्य फलार्थस्य प्रसिद्ध्यप्रसिद्धिभ्यां कर्तव्यत्वाद्यसिद्धेः। आत्मत्वोपासनस्य मुक्तिहेतुत्वात् तत् सर्वथा कर्तव्यमित्येतत् कुत इत्यत आह- **आत्मेति ॥** विष्णुरात्मतया जीवत्वेनोपास्य इत्यहङ्ग्रहं केचनात्र वर्णयन्ति तदयुक्तमिति भावेनाऽह- **आत्मेति ॥** आत्मत्वं विष्णुविशेषणमित्येवोपासनं कार्यं न तु तज्जीवत्वविधानेनेति भावः। अतो विष्णोः सर्वस्वामित्वस्य सर्वदा सर्वथोपास्यत्वाद् युक्तं तत्र वेदानां तात्पर्यमिति सिद्धम् ॥ ३ ॥ अ-२ ॥

शेषतात्पर्यचन्द्रिका

॥ ॐ आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॐ ॥ ४.१.३ ॥

सङ्गतिः

ननु पूर्वोक्ता श्रवणाद्यावृत्तिर्न युक्ता। 'आत्मा वा अरे द्रष्टव्यः' (बृ.उ. ४.५.६) इत्यादिवाक्यस्थात्मशब्दोक्तस्वामित्वस्य सकृदेवोपास्यत्वात्। स्वामित्वस्यातिप्रसिद्धत्वेनाऽवृत्तिं विनाऽपि भानसम्भवेन तदर्थं तत्र श्रवणाद्यावृत्तेर्वैयर्थ्यात्। नच शास्त्रबलादेव तत्राप्यावृत्तिः पततीति वाच्यम्। अप्रसिद्धगुणविषयत्वोपपत्तेः। शास्त्रसङ्कोचे च प्रयोजनाभाव एव निमित्तम्। तस्मात् स्वामित्वं न सर्वदोपास्यमित्यावृत्तिर्न सर्वगुणविषयिणी। किञ्च, श्रवणाद्यावृत्तिर्न शास्त्रार्थः। तथा सति कस्याप्यधिकाराभावप्रसङ्गात्। सर्वोऽपि हि जन आध्यात्मिकादितापत्रयेण विक्षिप्तमानस एवानुभूयते। नच विक्षिप्तमानसे श्रवणादीनामावृत्तिः सम्भवति। नच स्वयोग्यसर्वगुणेष्वावृत्त्यसम्भवेऽप्येकस्मिन् गुणे तत्सम्भव इति वाच्यम्। विनिगमनाभावेन क्वाप्यपर्यवसानात्। स्वामित्वे पर्यवसानं चोक्तरीत्याऽनुपपन्नम्। शास्त्रस्याशक्तेतरविषयत्वात् शक्तं प्रत्यावृत्तिर्विधीयत इति चायुक्तम्। सर्वेषामाधिव्याधिनिमित्ताशक्तिसद्भावस्योक्तत्वात्। आध्याननयेन सर्ववेदानामुपासनायां महातात्पर्यमुक्तमयुक्तं स्यात्। नहि सकृदेवोपास्ये स्वामित्वे महातात्पर्यं युज्यते। तत्सामान्यादितरेषु महातात्पर्यमपि न स्यादित्याद्यावृत्त्यधिकरणोक्तप्रमेयोपजीवनेन शङ्कनात् सङ्गतिः। पादसङ्गतिस्तु नास्तीत्युक्तमेव।

पूर्वपक्षः

अतिप्रसिद्धं स्वामित्वं नोपास्यं नित्यशो भवेत्।
तस्मादावृत्तिसूत्रोक्तं युक्तं न प्रतिभाति नः॥
इति प्राप्तेऽभिधीयते।

सिद्धान्तः

स्वामित्वं नास्य हानेन कस्यचिन्मोक्ष इष्यते।
नानाक्लेशसमायुक्तोऽप्येतावन्नैव विस्मरेत्॥
इत्यादेः सर्वदोपास्यं न ह्यस्ति वचने क्वचित्।
शङ्का तेन प्रसिद्धिस्तु कथमावृत्तिबाधिका॥
अतो नियामकादेव प्रयत्नादापदोऽपि च।
उपमर्द्य सदोपास्यं ततश्शास्त्रं नियोज्यवत्॥ इति।

परामिभमताधिकरणपरीक्षा

अन्ये तु, यश्शास्त्रोक्तविशेषणः परमात्मा स किमहमिति ग्रहीतव्यः, किं वा मदन्य इति संशयः। तदर्थं 'तत्त्वमसि' (छा.उ. ६.८.७) 'अहं ब्रह्म' इति सामानाधिकरण्यं गौणं मुख्यं वेति चिन्तनीयम्। तत्र नाहमिति ग्रहीतव्यः।

विरुद्धधर्मयोगित्वात् समारोपानिरूपणात्।
सामानाधिकरण्यादि गौणं जीवपरात्मनोः॥

न ह्यपहतपाप्मत्वादिगुणो विपरीतगुणत्वेन शक्यते ग्रहीतुम्। विपरीतगुणो वा अपहतपाप्मत्वादिगुणत्वेन। तथा सतीश्वरस्य संसार्यात्मत्वमीश्वराभावः शास्त्रानर्थक्यं च स्यात्। प्रत्यक्षादिविरोधश्च। पुरोवर्तिनि द्रव्ये सामान्यरूपेणावलोकिते विशेषेणागृहीतेऽपि च विशेषान्तरसमारोपो दृष्टः। आत्मनस्तु निर्विशेषसामान्यस्य नागृहीतमस्ति किञ्चिद्रूपमिति समारोपासम्भवाद् औत्पत्तिकविरुद्धगुणसंसर्गो जीवं ब्रह्मणो भिनत्तीति तयोः सामानाधिकरण्यं गौणं प्रतीकोपदेशपरमिति प्राप्तेऽभिधीयते।

आत्मेत्येव परमेश्वरः प्रतिपत्तव्यः। 'त्वं वा अहमस्मि भगवो देवतेऽहं वै त्वमसि देवते' (जाबालोपनिषत्) 'अहं ब्रह्मास्मि' (बृ.उ. १.४.१०), 'एष

त आत्मा सर्वान्तरः' (बृ.उ. ३-४) 'एष त आत्माऽन्तर्याम्यमृतः' (बृ.उ. ३-७-३) 'तत् सत्यं स आत्मा तत्वमसि' (छा.उ. ६-८-७) इत्यादिनैनमीश्वरं वेदान्तवाक्यानि आत्मत्वेनैव ग्राहयन्तीति सिद्धान्त इति।

तत्र प्रत्यक्षस्य जात्योपजीव्यत्वादिना स्वान्याबाध्यत्वादिना च प्राबल्यम्। आगमस्य च पूर्वेणोत्तरेण प्रमाणान्तरेण चाविरुद्ध एवार्थो वक्तव्यः। तत्राप्युपपत्तेः सर्वतः प्राबल्यं तात्पर्यग्राहकेषु। उपपत्तिविरुद्धेऽर्थे च न श्रुतेस्तात्पर्यम्। अन्यथा मीमांसावैयर्थ्यात्। सर्वज्ञत्वाल्पज्ञत्वादिविरुद्धगुणानां न मिथ्यात्वम्। त्वयैव पञ्चधा निरुक्तस्य मिथ्यात्वस्यात्यन्तासत्वानतिरिक्तमप्रसिद्धत्वं च, तत्साधकानुमानानां कृत्स्नदोषवत्वम्, तद्बोधकागमानामतत्त्वावेदकत्वम्, मिथ्यात्वस्य च मिथ्यात्वे जगत्सत्यत्वम्, अमिथ्यात्वे तु अद्वैतहानिः, ब्रह्मणः सर्वधर्मविनिर्मुक्तत्वे तद्ग्रहणोपायाभावः श्रवणादेर्वैयर्थ्यं चेत्यादीनि दूषणानि जिज्ञासाधिकरणादौ अनुव्याख्यानसुधयोरुक्तानि। विवृतानि च न्यायामृतादाविति नेह तत्प्रतिक्षेपाय पुनः प्रयतितव्यम्। किन्तु यत् स्वप्रक्रियया कल्पितप्रमेयमेतत्सूत्रानुबद्धतया व्याख्यातं यच्च तदुपयुक्तं किञ्चिद् बाधकपरिहारादि भाषितं तदेव दूष्यते। न तावत् श्रुतिबलादात्मत्वेन गृहीतव्य ईश्वरः। श्रुतेस्तत्र तात्पर्याभावात्। न ह्युपपत्तिविरुद्धेऽर्थे श्रुतेस्तात्पर्यमवगन्तुं शक्यते। अन्यथा 'मनो ब्रह्मेत्युपासीत' (छा. ३.१८.१) 'आकाशो ब्रह्म' (छा. ३.१९.१) इत्यादावपि मन आदेर्ब्रह्मत्वेन ग्रहणे तात्पर्यनिश्चये उत्तराधिकरणविरोधात्। तत्र जडचेतनयोरन्यत्वे निश्चिते तादात्म्यदर्शनमेव कर्तव्यम्, प्रतिमादिष्विव विष्ण्वादिदर्शनम्। अतो वस्तुतो मनसि ब्रह्मत्वाभावान्न तत्र ब्रह्मत्वमस्तीति चेत्। समं प्रकृतेऽपि। जडचेतनयोरन्यत्ववत् सर्वज्ञाल्पज्ञचेतनयोरप्यन्यत्वावश्यम्भावात्।

यदप्युक्तं प्रतिमान्यायेन गौणत्वप्रसङ्ग इति। तन्न। अतद्योग्ये सामानाधि-

करण्यस्य सारूप्यगमकत्वनियमस्य 'सिंहो माणवकः' इत्यादौ दृष्टत्वेनानिष्टत्वाभावात्। यच्चात्रोच्यते। यत्र हि प्रतीकदृष्टिरभिप्रेयते सकृदेव तत्र वचनं भवति यथा 'मनो ब्रह्म' (छा.उ. ३-१८-१) 'आदित्यो ब्रह्म' (छा.उ. ३-१९-१) इत्यादि, इह पुनस्त्वमहमस्मि अहं च त्वमसीत्याह, अतः प्रतीकश्रुतिवैरूप्यादभेदप्रतिपत्तिरेवेति। तत्रोच्यते- 'तत्त्वमसि' 'अहं ब्रह्मास्मि' इति सकृदेव वचनं भवतीति नात्राभेदप्रतिपत्तिः। खण्डान्तरेषु पुनरुच्यत इति चेत्, प्रतीकश्रुतावपि शाखान्तरे पुनरुक्तिरस्त्येव। यच्चोक्तम् 'अथ योऽन्यां देवतामुपास्ते' (बृ.उ. १-४-१०) 'मृत्योः स मृत्युमाप्नोति' (बृ.उ. ४-४-१९) 'सर्वं तं परादाद्योऽन्यत्राऽत्मनः सर्वं वेद' (बृ.उ. ४-५) इत्येवमाद्या भूयसी श्रुतिर्भेददर्शनमपवदतीति तदप्ययुक्तम्। प्रतीकश्रुतिविषयेऽपि तादात्म्यदर्शनानुपपत्तेः। अन्यशब्दस्य चेतनमात्रविषयत्वे निष्कारणं सङ्कोचापत्तिः। असर्वज्ञचेतनमात्रपरत्वापत्तिश्च। 'पूर्वदेहेऽन्योऽन्यश्चाहमस्मिन् देहे' इति ज्ञातुरेव निन्दोपपत्तेश्च। अयुक्तश्चेश्वरस्याऽत्मत्वग्रहः। विरुद्धगुणयोरन्योन्यात्मत्वासम्भवात्। विरुद्धगुणताया मिथ्यात्वमिति चेन्न। ईश्वराभावप्रसङ्गात्। शास्त्रप्रामाण्यान्नेश्वराभावप्रसङ्ग इति चेन्न। शास्त्रे बहुमानवता सार्वज्ञादिगुणानां सत्त्वस्यैवाङ्गीकार्यत्वात्।

जीवस्यैव संसारित्वापोहेनेश्वरत्वमत्र प्रतिपाद्यत इति परोक्तस्य विमर्शः

यच्चोक्तम् 'न हीश्वरस्य संसार्यात्मत्वं प्रतिपाद्यत इत्यभ्युपगच्छामः। येनेश्वरस्य संसारित्वापत्त्या ईश्वराभावप्रसङ्गः स्यात्। किं तर्हि ? संसारिणः संसारित्वापोहेनेश्वरात्मत्वं प्रतिपादयिषितमिति। एवं च सत्यद्वैतेश्वरस्यापहतपाप्मत्वादिगुणता, विपरीतगुणता त्वितरस्य मिथ्येति व्यवतिष्ठत इति, तदप्यसत्। अधिकार्यभावप्रसङ्गस्य दुर्वारत्वात्। न ह्यपोढसंसारित्वादिगुणक आत्मा विधिनिषेधशास्त्रे अधिक्रियेत। तथा सति ब्रह्मेश्वरमुक्तानामप्यधिकारित्व-

प्रसङ्गात् । संसारित्वापोहमात्रेणेश्वरत्वप्रतिपादनायोगाच्च । अन्यथा मुक्तस्यापीश्वरत्वापत्तेः । नचाद्वैतमते मुक्तस्येश्वरत्वापत्तिरस्ति । सार्वज्ञादिगर्भस्य तस्य मिथ्यात्वात् । अन्यथा चैतन्यस्य निर्धर्मकत्वहानेः । एतेनेश्वरस्यापहतपाप्मत्वादिगुणता सतीत्यपि निरस्तम् । किञ्च त्वमहमस्मि इतिवद् अहं त्वमसीत्यपि श्रवणाद् ईश्वरस्येश्वरत्वापोहेन संसार्यात्मत्वप्रतिपादनसम्भवेन दुर्वार ईश्वराभावप्रसङ्गः । तस्मादीश्वरस्य संसारित्वेन तद्वैपरीत्येन वाऽत्र प्रतिपादनेऽधिकार्यभावः प्रत्यक्षादिविरोधश्च ।

प्राक् प्रबोधात् संसारित्वाभ्युपगमान्नाधिकार्यभावः । प्रत्यक्षादेश्च ब्रह्मज्ञानात् पूर्वं सतः संसारित्वादेः ग्राहकतया न वा तद्विरोध इति चेन्न । प्रबोधानन्तरमपि प्रत्यक्षादिसद्भावे बाधकाभावात् । प्रबोधानन्तरमविद्याकार्याणां नाशात् प्रत्यक्षादि किंविषयकं स्यादिति चेत्, यदस्ति जीवत्वपारतन्त्र्यपरिमितत्वादि तद्विषयकं स्यात् । नच तेषामपि ज्ञानेन निवृत्तिरज्ञानकार्येतरत्वात् । ज्ञानानन्दादिवत् । 'यत्र त्वस्य सर्वमात्मैवाभूत् केन कं पश्येत्' (बृ.उ. २-४-१४) इत्यादिश्रुतिस्तु भेदस्य भोगव्यापकतां वक्तुं व्यतिरेकव्याप्तिमाह इत्यन्यत्रोक्तत्वेन न प्रबोधे प्रत्यक्षाद्यभावं दर्शयति । अन्यथा श्रुतेरप्यभावप्रसङ्गात् । अत्रापीष्टापत्तिं कुर्वाणो वेदबाह्य इव कथायामनर्हः । 'अत्र पिताऽपिता भवति' (बृ.उ. ४-३-२२) इत्युपक्रम्य 'वेदा अवेदाः' (बृ.उ. ४-३-२२) इति श्रुत्यैव तदभावस्योक्तेर्नायं दोष इति चेन्न । मुक्तेः प्राग्वेदनकरणानां वेदानां ततः परं वेदनकरणता नास्ति स्वरूपस्यासाध्यत्वादिति वा पूर्वं स्वात्मानमधिकृत्य विदधतो निषेधन्तश्च वेदा इदानीं तदुभयाभावेन वाऽवेदा इत्यर्थप्रतीतेः । अन्यथाऽवेदा इत्यनेनैव विवक्षितार्थलाभसम्भवेन वेदा इति व्यर्थं स्यात् । पित्रादिजीवानामप्यभावापातेन स्वरूपनाशात्मके मोक्षे प्रवृत्तिश्च न स्यात् । पितृत्वादिकमेव निषिध्यते जीवचैतन्यं तु सत्यत्वान्न निषिध्यत इति चेत् । अत्रापि विधायकत्वाद्येव निषिध्यते न तु स्वरूपम् । अन्यथा संसार्यन्तरं प्रति विधायकाभावप्रसङ्गात् ।

किञ्च, जीवस्यैव संसारित्वापोहेनेश्वरात्मत्वं यद्यत्र प्रतिपिपादयिषितं स्यात् तर्ह्येवं प्रबोधेऽज्ञानं न कस्यापि स्यात् । ईश्वरस्य सर्वज्ञत्वात् । तत्स्वरूपमापन्नस्य सार्वज्ञनियमादिति शिष्येण पृष्टवतस्तवोत्तराभावप्रसङ्गः । यस्त्वं पृच्छसि तस्य त इति वदाम इति चेत् । नन्वहमीश्वर एवेति श्रुत्युक्तः, अतः कथं मय्यज्ञानमिति पुनः पृच्छेदेव । यद्येवं प्रतिबुद्धोऽसि नास्ति कस्यचिदप्रबोध इति प्रतिवक्ष्याम इति चेन्न । एवं त्वदुक्तव्याख्यानेन श्रुत्यर्थपरिज्ञानस्य सत्वेऽप्यज्ञानदर्शनात् । दृढतरज्ञानं नास्तीति वदन् पाषण्डिसखः । तेनापि दृढनिश्चयाभावेन मण्डलान्तःप्रवेशादिना विप्रत्वाद्यभावस्योपपादितत्वात् ।

किञ्च त्वन्मतेऽपि जीवब्रह्मणोरैक्ये श्रुतीनां तात्पर्यम्, न तु जीवेश्वरयोर्विशिष्टत्वात् । ईश्वरस्य प्रपञ्चोपाधिकत्वेन चिन्मात्रतामापन्नस्य निष्प्रपञ्चस्य तदनुपपत्तेश्च । तथा च कथमीश्वरस्याऽत्मग्रहः सूत्रार्थः स्यात् ? ब्रह्मण एवाऽत्मत्वग्रहोऽत्राभिप्रेत इति चेन्न । 'यः शास्त्रोक्तविशेषणः परमात्मा' इत्यादिनाऽपहतपाप्मत्वादिगुणश्च परमेश्वरः, विपरीतगुणः संसारीति 'आत्मेत्येव परमेश्वरः प्रतिपत्तव्यः' 'तस्मादात्मेत्येवेश्वरे मनो विदधीत' इति चाऽदिमध्यान्तेषूक्तिविरोधात् ।

किञ्चेश्वरस्याऽत्मत्वेन ग्रहे प्रतिहारादिनिकृष्टस्वात्मना गृहीतस्य राज्ञ इव दुःखशिरस्कात्मतया गृहीतस्य कोपोदयेनानर्थप्राप्तिप्रसङ्गः । निकृष्टदृष्टिर्नोत्कृष्ट इति लौकिकन्यायातिपातश्च । किञ्चेश्वरस्याऽत्मत्वेन ग्रहः

'उच्चेषु नीचबुद्धिर्या महतामपि नाशकृत् ।
असतामपि नष्टानां जायते ह्यनिमित्ततः ।
उद्धृते नीचबुद्धिः सा नाशयेत् तस्य सत्कुलम् ।
ईश्वरेऽनीश्वरज्ञानाद् याति संसृतिबीजताम् ।
यथा तस्मिन् तथा ज्ञानादमृतत्वमियान्नरः ॥' (गारुडवचनम्)

इति गारुडपुराणे काश्यपेन स्पष्टं निन्दितः। नचेश्वरजीवयोरुच्चनीचभाव एव कुतः ? ईश्वरेऽनीश्वरत्वज्ञानमेवात्र संसारबीजतया निन्द्यते। नत्वात्मत्वग्रह इति वाच्यम्।

'उभौ सुष्ठु तथा ब्रूतां व्याघ्रि(घ्रा)मत्यौ महामती।
उभयोस्सद्विवादः स्यान्न वादस्य विपर्ययः ॥'

इत्युपक्रम्य,

'समस्तहेयरहितः परमात्मेति सूनृतम्।
सर्वदोषाश्रयो जीव इति सुष्ठु समीरितम्॥

इत्यादिना तत्रैव भगवतेश्वरजीवस्वरूपयोः निर्दोषत्वसदोषत्वाभ्याम् उत्कृष्टत्वानुत्कृष्टत्वयोर्निर्णीतत्वात्। उत्कृष्टे निकृष्टैक्यबुद्धेः कलिकालीनत्वेन विपरीतबुद्धित्वस्य

'प्राप्ते कलियुगे घोरे सर्वं स्यादधरोत्तरम्।
मतिश्च प्राणिनां सत्सु विपरीता च जायते॥
असच्च सत् स्यादुत्कृष्टो निकृष्टः स्यात् कलौ युगे।
अनित्यानि च नित्यानि ह्यकृतानि कृतानि च॥
शूद्रस्तु द्विजधर्मः स्याच्छूद्रधर्मो द्विजो भवेत्।
पतिं तु भार्या त्यजति शिष्यश्च गुरुमव्ययम्॥'

इत्यादिना तत्रैव काश्यपेन वर्णितत्वाच्च। असन्निकृष्टं सदुत्कृष्टतयोपासितं स्यात्। एवमुत्कृष्टो निकृष्टतया, अनित्यानि च नित्यतया, अनुत्पन्नानि च कृष्यादीन्युत्पन्नतया चोपासितानि स्युः। अव्ययम् अपतितमित्यर्थः। तस्मादात्मन्येवेश्वरदृष्टिः कर्तव्येत्येव सिद्धान्तयितव्यम्। 'तत्त्वमसि' (छा. ६.८.७), 'अहं ब्रह्मास्मि' इत्यादिशास्त्रस्य साधारणत्वात्। नामादिप्रतीकेषु ब्रह्मदृष्टेर्वक्ष्यमाणत्वेन पूर्वोत्तरविरोधः 'निकृष्टे उत्कृष्टदृष्टिरध्यवसितव्या' इति न्यायानुगतिश्च

स्यात्। अन्यथा विपर्ययप्रत्यवायप्रसङ्गात्। नहि क्षत्तृदृष्टिगृहीतो राजा निकर्षं नीयमानः श्रेयसे स्यादिति तद्भाष्यविरोधः वक्ष्यमाणोत्कर्षयुक्तेरत्रैव व्यभिचारापातश्च। एतेन सूत्रार्थोऽपि निरस्तः। 'त्वं वा अहमस्मि भगवो देवतेऽहं वै त्वमसि देवते' (वा.उ. २.३४), 'अहं ब्रह्मास्मि' इत्यादिश्रुतिवाक्ये एतत्सूत्रगृहीतत्वेन त्वयैव व्याख्याते अहंत्वमादिशब्दमात्रस्यैव श्रवणेनाऽत्मशब्द-श्रवणाभावात् सूत्रे आत्मशब्दानुपपत्तेश्च।

'एष त आत्मा सर्वान्तरः' (बृ.उ. ३.४.१) इत्यादिषु 'ग्राहयन्ति च' इति सूत्रांशगृहीतेष्वात्मशब्दश्रवणान्नायं दोष इति चेन्न। तत्राऽत्मशब्दस्य स्वात्मपरत्वे त इति षष्ठीनिर्देशानुपपत्तेः। 'एष ईश्वरस्ते आत्मा त्वत्स्वरूपम्' इति व्याख्याने तु षष्ठीस्वारस्यभङ्गः 'य आत्मनि तिष्ठन् य आत्मानं वेद' (बृ.उ. ५.७.२२) इत्यादौ जीवाद्भिन्नत्वेन विनिर्दिष्टस्यैवेश्वरस्य एष इत्यनेन परामर्शविरोधश्च। नहि त्वद्भिन्न ईश्वरः त्वत्स्वरूप इत्युपदेष्टुं शक्यते। सर्वान्तर इति सर्वान्तर-त्वोक्तिविरोधश्च। नहि सर्वात्मकः सर्वान्तरो भवति। सर्वान्तरः सर्वस्वरूपमिति व्याख्याने तु त आत्मेति पुनर्व्यर्थं सर्वस्वरूपत्वोक्त्यैव तत्सिद्धेः। अन्तरशब्दस्य तद्भिन्न एव प्रसिद्धत्वेन लक्षणापत्तिश्च। तस्मान्नैवमधिकरणार्थः।

रामानुजाभिमताधिकरणपरीक्षा

केचित्तु वेदनस्याभ्यस्तस्यैव शास्त्रार्थत्वप्रसाधनद्वारा स्वरूपे शोधिते उपास्यविषयानुसन्धानस्यैव शास्त्रार्थत्वप्रसाधनादत्र तत्स्वरूपमेव शोध्यते। किमुपास्यं ब्रह्म उपासितुरन्यत्वेनोपास्यम् ? उतोपासितुरात्मत्वेन वेति संशयेऽन्यत्वेनैवोपास्यम्। उपासितुः प्रत्यगात्मनोऽर्थान्तरत्वाद् ब्रह्मणः। अर्थान्तरत्वं च 'अधिकं तु भेदनिर्देशात्' (ब्र.सू. २.१.२२), 'अधिकोपदेशात्' (ब्र.सू. ३.४.८), 'नेतरोऽनुपपत्तेः' (ब्र.सू. १.१.१७) इत्यादिषूपपादितम्। यथावस्थितं च ब्रह्मोपास्यम्। अयथोपासने हि 'ब्रह्मप्राप्तिरप्ययथाभूता

स्यात्। यथाक्रतुरस्मिन् लोके पुरुषो भवति तथा इतः प्रेत्य भवति' (छा.उ. ३.१४.१) इति न्यायादिति प्राप्तेऽभिधीयते। उपासितुरात्मेत्येवोपास्यम्। उपासिता 'प्रत्यगात्मा स्वशरीरस्य स्वयं यथाऽऽत्मा तथा स्वात्मनोऽपि परं ब्रह्माऽऽत्मा' इत्येवोपासीत। अत एव पूर्वे उपासितारः 'त्वं वा अहमस्मि भगवो देवतेऽहं वै त्वमसि' (वारा.उ. २.३४) इत्युपासते। तस्मादुपासितुरात्मत्वेनैवोपास्यं ब्रह्मेति सिद्धान्त इत्याहुः।

तदपि न समीचीनम्। तत्र संशयभाष्यस्य किं ब्रह्माहमर्थवैयधिकरण्येनोपास्यम् किं वा तत्सामानाधिकरण्येनेत्यर्थः ? अथवाऽऽत्मशब्दः शरीरप्रतिसम्बन्धिशरीरपर इत्यर्थमुपेत्य शरीरशरीरिभावसम्बन्धशून्यत्वेनोपास्यम् उत जीवं प्रति शरीरित्वेनोपास्यमित्यर्थः ? नाद्यः। सूत्रानुसारादात्मत्वेनोपास्यम् उतानात्मत्वेनेत्यादिसंशयस्यैव युक्तत्वेन उक्तविमर्शस्य सूत्रानभिमतत्वात्। आत्मशब्दस्य स्ववाचित्वेऽप्यहमर्थसामानाधिकरण्यपरत्वायोगात्। सिद्धान्तेऽपि जीवब्रह्मणोः भेदाङ्गीकारेण सामानाधिकरण्येनोपासनायोगाच्च। 'त्वं वा अहमस्मि भगवो देवते' (वा.उ. २.३४) इत्यादौ सामानाधिकरण्यस्य श्रुतत्वेऽपि शरीरशरीरिभावेनोपासनमभ्युपगच्छतां सामानाधिकरण्यस्योपासनागोचरत्वाच्च। दृष्टिमात्रं तु नात्र विधेयमिति त्वयैवोक्तत्वाच्च।

न द्वितीयः। शरीरशरीरिणोः जीवतच्छरीरयोर्भेददर्शनेनाऽत्मत्वेनोपासने 'अधिकं तु भेदनिर्देशात्' (ब्र.सू. २.१.२३) इत्याद्युक्ताजीवत्वं मिथ्योपासनापत्तिश्च इत्यादिपूर्वपक्ष्युक्तदूषणस्यालग्नकत्वापत्तेः। नहि ब्रह्मणः शरीरित्वेनोपासने भेदानुपपत्तिरस्ति। एतेन सिद्धान्तोऽपि निरस्तः। अर्थान्तरत्वादन्यत्वेनोपास्यमिति पूर्वपक्षेऽनर्थान्तरत्वान्नान्यत्वेनोपास्यमिति सिद्धान्तयितव्ये शरीरित्वादात्मत्वेनोपास्यमिति वक्तुः आम्रान् पृष्टस्य कोविदारानाचक्षाणस्येवासमीक्षितवचनत्वप्रसङ्गात्।

अत एवाऽत्मनः शरीरित्वसद्भावे 'यस्याऽत्मा शरीरम्' (बृ.उ. ५.७.२२) इत्यादिवचनोदाहरणं सिद्धान्ते न सङ्गतम्। नहि पूर्वपक्षिणा ब्रह्मणः शरीरित्वे प्रमाणाभावेऽनुपपत्तिरुपन्यस्ता। किन्त्वन्यत्वेनोपासने। किञ्च, 'त्वं वा अहमस्मि भगवो देवते' (वा.उ. २.३४) इत्यादिश्रुत्युदाहरणविरोधः। अत्र हि उपासका ऐक्येनोपासत इत्युच्यते। न तूपासितुः शरीरित्वादिनाऽर्थान्तरभूतस्य ब्रह्मण ऐक्येनोपासना-योगात्।

यदत्रोक्तम्- 'य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्याऽत्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः' (बृ.उ. ५.७.२२) 'सन्मूलाः सोम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' (छा.उ. ६.८.४), 'ऐतदात्म्यमिदं सर्वम्' (छा.उ. ६.८.७), 'सर्वं खल्विदं ब्रह्म तज्जलान्' (छा.उ. ३.१४.१) इत्यादीनि वाक्यानि सर्वस्य चिदचिद्वस्तुनो नियम्यत्वतज्जत्वतल्लत्वतदनत्वादिभिः भगवच्छरीरत्वोपपादनद्वारा सर्वस्यायमात्मा, स त आत्मेति प्रतिपादनादविरोधं ग्राहयन्ति। यथा प्रत्यगात्मनः स्वशरीरं प्रत्यात्मत्वाद् देवोऽहं मनुष्योऽहमित्याद्यनुसन्धानं न प्रत्यक्षादिविरुद्धं तथा प्रत्यगात्मनोऽप्यात्मत्वात् परमात्मनः तस्याप्यहमित्यनुसन्धानं न प्रमाणान्तरविरुद्धमिति। तत्रोच्यते। देवोऽहं मनुष्योऽहमित्यादौ देवादिशब्दैः शरीरविशिष्टचैतन्योक्तौ विशेष्यस्य विशिष्टानतिरिक्तत्वात् देवोऽहमित्याद्यनुसन्धानं युज्यते। प्रमा च भवति। न चात्र प्रत्यगात्मवाचकाहमादिशब्दस्य स्वान्तस्थचेतनविशिष्टवाचित्वमस्ति। प्रयोगप्रत्यययोरदर्शनात्। तथाच कथं तद्दृष्टान्तेनाविरोधवर्णनम्। केवलदेवादिशरीरवाचित्वे तु 'देवोऽहम्' इत्याद्यनुसन्धानमेव न जायेत। 'गौरोऽहम्' इत्यनुसन्धानवद् अप्रमा वा स्यात्। स्फुटतरभेदाग्रहनिमित्तं व्यवहारमात्रं वा स्यात्। नच प्रकृते तथा सम्भवति। प्रमाणजन्यत्वात्। एवं च ब्रह्म स्वान्यत्वेन नोपास्यम्। किन्तु स्वात्मत्वेनेति सिद्धान्ते ऐक्यविवक्षायां

'पृथगात्मानं प्रेरितारं च मत्वा' इति पृथक्त्वानुसन्धानविरोधोऽपसिद्धान्तश्च। शरीरशरीरिभावविवक्षायां तु 'अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न स वेद' (बृ.उ. ३.४.१०) 'अकृत्स्नो ह्येष आत्मा आत्मेत्येवोपासीत' (बृ.उ. ३.४.७) 'सर्वं तं परादाद्योऽन्यत्राऽत्मनः सर्वं वेद' (बृ.उ. ६.५.७) इत्यादिस्वात्मत्वानुसन्धाननिषेधविरोधः छलोत्तरत्वं च पूर्वपक्षसिद्धान्तयोरसाङ्गत्यं च स्यात्।

एतेनाहमिति स्वात्मतयाऽनुसन्धानाद् अन्यत्वानुसन्धाननिषेधो रक्षित इति निरस्तम्। अन्यत्वानुसन्धाननिषेधरक्षणं हि ऐक्यानुसन्धानाभ्युपगमे एव स्यात्। नतु शरीरशरीरिभावात्मकस्वात्मतयाऽनुसन्धानाभ्युपगमे। प्रत्युतान्यत्वानुसन्धानस्यैव प्राप्तेः। अन्यथा 'स्वशरीरात् स्वात्मनोऽधिकत्वानुसन्धानवत् स्वात्मनोऽपि परमात्मनोऽधिकत्वानुसन्धानात् पृथक्त्वानुसन्धानविधानं च रक्षितम्' इति स्वोक्तिविरोधापातात्।

एतेन प्रकारवाचिशब्दानां 'देवोऽहम्' 'मनुष्योऽहम्' इत्यादौ प्रकारिपर्यवसानदर्शनात् जीवात्मनः परमात्मशरीरत्वेन परमात्मप्रकारत्वादहमिति प्रकारभूतजीवप्रत्ययस्य गौरित्यादिप्रकारप्रत्ययानां प्रकारिपिण्डादिपर्यवसानवत् प्रकारिपरमात्मपर्यवसानं युक्तम्। अत आत्मतयाऽनुसन्धानश्रुतीनां च न बाधः। एवमुभयश्रुत्यबाधोपपत्तावन्यतरश्रुतिबाधो न युक्तः। एवं च भेदश्रुतेरपि मुख्यार्थत्वम्, 'अहमस्मि' 'अहं हरिः सर्वमिदं जनार्दनो नान्यत्ततः कारणकार्यजातम्॥' इत्यादिश्रुतिस्मृतीनां मुख्यार्थता चेति निरस्तम्। 'देवोऽहं मनुष्योऽहम्' इत्यादावपि प्रकारवाचिमनुष्यादिशब्दानां प्रकारिपर्यवसानं च नीलो घट इत्यादाविव लक्षणयैव न तु मुख्यत इत्यङ्गीकारात्।

त्वंशब्दस्य प्रकारविशिष्टप्रकारिपरत्वमहंशब्दस्य प्रकारिविशिष्टप्रकारत्वम्। तथाच सामानाधिकरण्याद् विशिष्टयोरैक्यं बोध्यत इति चेन्न।

सर्वत्र त्वमादिपदानां प्रकारविशिष्टप्रकार्यादिवाचित्वे 'त्वं नो गुरुः परमं दैवतं च' इत्यादावपि तदापत्तेः। न हि स्वात्मविशिष्टपरमात्माऽस्मच्छब्दनिर्दिष्टस्य परमात्मविशिष्टप्रत्यगात्मनो गुर्वादिर्भवति। आत्माश्रयादिदोषप्रसङ्गात्। प्रयोगप्रत्यययोरभावेन विशिष्टवाचित्वानुपपत्तेश्च। विशिष्टद्वयस्यैक्यायोगाच्च। अत्रैव विवक्षायां लक्षणापाताच्च। परमात्मविशिष्टो जीवः जीवविशिष्टपरमात्मैवेति वा जीवविशिष्टपरमात्मा परमात्मविशिष्टजीव इति वा परमात्मा जीवविशिष्ट इति वा जीवः परमात्मविशिष्ट इति वा परमात्मा परमात्मविशिष्ट इति वा व्याख्यानस्योपपत्तिविरुद्धत्वाच्च। नहि त्वन्मते परमात्मविशिष्टो जीवोऽस्ति। परमात्मनः प्रकारत्वशेषत्वाप्राधान्याद्यापत्तेः। जीवस्य तद्वैपरीत्यापत्तेश्च। नहि नीलपीतविशिष्टयोर्घटयोर्विरुद्धविशेषणयोरैक्यं दृष्टचरम्। तस्मात् सुस्थस्त्वत्सिद्धान्ते ऐक्यागमविरोधः।

एतेन उपासितुरात्मेत्येवोपास्यं ब्रह्म, यत एवं ह्युपगच्छन्ति त्वं वाऽहमस्मीत्याद्युपासते पूर्वे उपासितारः। इममेवार्थं 'य आत्मनि तिष्ठन्' इत्यादिशास्त्राणि उपासितॄन् प्रत्यविरुद्धं ग्राहयन्तीति सूत्रयोजनाऽपि निरस्ता।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- अधिकरणप्रतिपाद्यं सङ्गत्यादि सूचयन्नाह- **अत्रेति**॥ भगवदित्यनेन शास्त्रसङ्गतिः। ज्ञानसाधनेत्यनेनावश्यकसाधनप्रतिपादकसप्ताधिकरण्यामन्तर्भावलक्षणा पेटिकासङ्गतिश्च सूचिता। 'आत्मत्वोपासनस्य' इति प्रतिपाद्योक्तिः। नित्यश इत्युपलक्षणम्। सर्वथेत्यपि ग्राह्यम्। तेन 'नित्यशः कार्यं सर्वथा भाव्यं साधनं प्रथमत उच्यते' इत्यादिभाष्योक्तदिशा नित्यशः कर्तव्यत्वं प्रसाध्याधुना सर्वथा भाव्यत्वं समर्थ्यत इति सङ्गत्यन्तरं सूचितम्। एतेनैवाऽवृत्त्यधिकरण एव नित्यशः कर्तव्यत्वस्य समर्थनान्नेदमारम्भणीयमिति निरस्तम्। नानाक्लेशसमायोगेऽपि कर्तव्यत्वसमर्थनात्। एवमग्रेऽपि। तथाऽपि

कोऽत्र विषय इति न ज्ञायते। अतो निष्कृष्य दर्शयति - **प्रकृतेति**॥ 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' (बृ.उ. ४.४.५) इति पूर्वाधिकरणोदाहृतवाक्ये आत्मशब्देन प्रकृतात्मत्वमित्यर्थः।

शश्वदतिप्रसिद्ध्याख्यपूर्वपक्षन्यायविवरणम्

शश्वदतिप्रसिद्धिः इत्युक्तन्यायं साध्यप्रदर्शनेन विवृण्वत्

'नच शश्वदतिप्रसिद्धत्वाद् आत्मशब्दोदितं स्वामित्वं न नित्यश उपास्यम्'

इति वाक्यं व्याचष्टे - **तत्रात्मत्वं न सर्वथेति**॥ विवरणे नित्यश इत्येतत् सर्वथेत्यस्याप्युपलक्षणमिति भावः।

यद्यपि नित्यश इत्यंश आवृत्त्यधिकरण एव सिद्धः। तथाऽपि शश्वदतिप्रसिद्धियुक्त्याऽऽत्मत्वांश आक्षिप्य समाधीयत इति न दोषः।

'नित्यशः श्रवणं चैव मननं ध्यानमेव च।
कर्तव्यमेव पुरुषैर्ब्रह्मदर्शनमिच्छुभिः॥' (ब्र.सू.भा. बृहत्तन्त्रवचनम्)

इति बृहत्तन्त्रवचनं निर्विषयमापन्नमिति पृच्छति- **किन्त्विति**॥ उत्तरमाह- **अप्रसिद्धेति**॥ प्रसिद्धस्वामित्वमात्र आक्षेपः। न त्वप्रसिद्धगुणेष्विति भावः। पूर्वपक्षफलमाह- **वेदानां तत्र महातात्पर्यं व्यर्थमिति**॥ यद्यपि पूर्वाधिकरणोक्तं नित्यशः कार्यत्वं स्वामित्वांशेऽनुपपन्नमिति फलं वक्तुं शक्यं तथाऽपि सर्वथा कर्तव्यत्वांशस्यापीह साधनात्। तस्य च पूर्वाधिकरणप्रमेयत्वाभावेनाऽध्यानाधिकरणोक्तप्रमेयाक्षेप एव फलमिति ध्येयम्।

प्रविविक्तताख्यसिद्धान्तन्यायविवरणम्

'प्रविविक्तता' इत्युक्तन्यायं वैलक्षण्यपरतया तत्राऽसिद्धिपरिहाराय हेतूक्त्याऽस्य धर्मिप्रदर्शनेन च विवृण्वत्

'अन्येभ्योऽधिकफलत्वेन सविशेषत्वादात्मत्वस्य'

इति वाक्यं सूत्रार्थकथनव्याजेन विवृणोति- **तस्यैव मोक्षसाधनत्वादिति**॥ अनेनाधिकं फलं यस्मात्तदधिकफलम्, तस्य भावः अधिकफलत्वं, फलं प्रत्यन्तरङ्गसाधनत्वमिति यावत्। विशेषेण सह वर्तत इति सविशेषः। तस्य भावः सविशेषत्वम्। 'अन्येभ्यः' इत्युभयत्रापि सम्बद्ध्यते। आत्मपदोदितस्य स्वामित्वस्याऽऽनन्दादिभ्यो गुणेभ्योऽधिकं मोक्षं प्रत्यन्तरङ्गसाधनत्वमस्तीत्यानन्दादिभ्यो विशेषवत्त्वात् स्वामित्वमेव नित्यशः सर्वथोपास्यम्। अतिप्रसिद्धत्वाद् अनुपासने मोक्षाभावप्रसङ्गेन तस्य तत्राप्रयोजकत्वादिति विवरणं व्याख्येयमिति सूचितम्।

सूत्रार्थः

सूत्रार्थस्तु- आत्मेत्यावर्तते। तुशब्दोऽवधारणार्थः। स च क्रियासङ्गतः। लिङर्थे लट्। आत्मा विष्णुः। आत्मेत्युपगच्छन्ति। स्वामीत्युपगन्तव्य एव। आत्मत्वमुपास्यमेवेति यावत्। न केवलमेतावत्। **आत्मेति ग्राहयन्ति च**। स्वामीत्युपदेष्टव्यश्च। तदभावे मोक्षाभावादित्यध्याहारः।

उपासनस्यैव विचिकित्सितत्वेऽपि तत्त्वोपदेशस्यापि कर्तव्यत्वप्रतिज्ञानम्

'आचार्यात् पादमादत्ते पादं शिष्यः स्वबुद्धितः।
पादं सब्रह्मचारिभ्यः शेषं व्याख्यानकौशलात्॥'

इत्यादेः व्याख्यानस्य ध्यानान्तरङ्गत्वनिष्कर्षेणात्युपयोगिताज्ञापनार्थमिति।

सङ्क्षेपभाष्यस्यैतदधिकरणतात्पर्यसूचकत्वम्

एतदधिकरणतात्पर्यमप्युक्तम्- 'विष्णुरादातेत्येवम् आपद्यप्युपासनं कार्यम्' इति सङ्क्षेपभाष्येण।

॥ इति आत्मोपगमाधिकरणम्॥ २॥

॥ अथ नप्रतीकाधिकरणम् ॥ ३ ॥

सूत्रभाष्यम्

ॐ न प्रतीके न हि सः ॐ ॥ ४.१.४ ॥

'नाम ब्रह्मेत्युपासीत' (छा.उ.७.१-५) इत्यादिना शब्दभ्रान्त्या न प्रतीके ब्रह्मदृष्टिः कार्या। किन्तु तत्स्थत्वेनैवोपासनं कार्यम्। ब्रह्मतर्के च-

'नामादिप्राणपर्यन्तमुभयोः प्रथमात्वतः।
ऐक्यदृष्टिरिति भ्रान्तिरबुधानां भविष्यति॥
नामादिस्थितिरेवात्र ब्रह्मणो हि विधीयते।
सर्वार्था प्रथमा यस्मात् सप्तम्यर्था ततो मता॥' इति॥ ४॥

॥ इति नप्रतीकाधिकरणम् ॥ ३ ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र भगवज्ज्ञानसाधनस्य विष्णुप्रतीकैक्योपासनवर्जनस्याऽऽवश्यकत्व-साधनादस्ति शास्त्रसङ्गतिः। तथोपासने यदुक्तं सर्वस्वामित्वेनोपासनं कार्यमिति तदयुक्तं स्यादतः साधनीयमेतत्।

यन्नामवागादिकं भगवत्प्रतिमारूपं प्रकृतं तदत्र विषयः। ब्रह्मतयोपास्यं न वेति सन्देहः। श्रुतिरन्यत्वं च सन्देहबीजम्।

पूर्वपक्षः

ब्रह्मतयोपास्यमिति पूर्वः पक्षः। 'नाम ब्रह्मेत्युपासीत' इत्यादिश्रुतेः। न च ब्रह्मप्रतीकयोर्भिन्नत्वादभेदेनोपासनायोगः। यथा खलु पूर्वत्र प्रसिद्ध्यादे-

रप्रयोजकत्वमुक्त्वा फलमात्रस्योपासनप्रयोजकत्वेनात्मत्वोपासनं समर्थितं तथात्रापि प्रतीके ब्रह्मत्वोपासनसम्भवात्। फलस्योपासनाप्रयोजकत्वेन भेदादेरप्रयोजकत्वात्। श्रूयते खलु प्रतीके ब्रह्मत्वोपासनस्य फलं 'नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य कामचारो भवति' इत्यादि। अतः प्रतीके ब्रह्मत्वोपासनस्य कर्तव्यत्वादुक्तमयुक्तमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रं पठित्वा व्याचष्टे- न प्रतीक इति। नाम ब्रह्मेत्यादिना सामानाधिकरण्येन जातयात्रैक्योपासनं विधीयत इति शब्दभ्रान्त्या यत्परेणोक्तं प्रतीके ब्रह्मदृष्टिः कार्येति न तद्युक्तम्। यतः स विष्णुः प्रतीकं न भवति। न हि भिन्नयोरभेदेनोपासनं युक्तम्। न च वाच्यं फलस्यैव प्रयोजक-त्वाद्युक्तमुपासनमिति। अन्यथोपासनस्य निष्फलत्वात् प्रत्युताऽनर्थ-फलत्वाच्चेति भावः। ननु यदि नाभेदेनोपासनं युक्तं कथं तर्हि कार्यम्। न तु न कार्यमेव। श्रुत्यप्रामाण्यप्रसङ्गादित्याशङ्क्य परिहरति- **किं त्विति** ॥ कार्यमेव श्रुत्युक्तमुपासनं तच्च ब्रह्मणः प्रतीकस्थितत्वेनैव। न च नैतच्छ्रुतिर्वक्तीति वाच्यम्। अपवादेन प्रथमादिविभक्तेरेव सप्तम्यर्थत्वोप-पत्तेः। सप्तसु प्रथमा षट्सु द्वितीयेत्यादेरेवेति भावः। उक्तार्थे स्मृतिं चाऽऽह- **ब्रह्मतर्के चेति** ॥ उभयोर्नामादिब्रह्मपदयोरैक्यदृष्टिरत्र कर्तव्यतयोच्यत इति भ्रान्तिः। कस्मादियं भ्रान्तिरिति तत्राऽऽह- **नामादीति** ॥ प्रथमायास्तर्हि का गतिरित्यत आह- **सर्वेति** ॥ न च वाच्यं क्षत्तरि राजदृष्ट्या फलदर्शनादत्राप्येवं स्यादिति। क्षत्तैव राजेत्यस्योपचारत्वात्। तथा ज्ञानेऽनर्थदर्शनाच्चेति। अतः प्रतीके ब्रह्मत्वोपासनस्यायोगादुक्तं युक्तमिति सिद्धम्॥ ४॥ अ-३॥

शेषतात्पर्यचन्द्रिका

॥ न प्रतीके न हि सः ॥ ४.१.४ ॥

सङ्गत्यादि

नन्वत्र प्रतीकस्य ब्रह्मत्वाभावः सूत्रे प्रतिपाद्योऽवगम्यते। तत्कथं सप्ताधिकरण्यामिदं सङ्गतम्? नित्यशः कर्तव्यस्य सर्वथा भाव्यस्य वा साधनस्यात्राप्रतीतेः।

न चैवमुक्तं नित्यशः कार्यं सर्वथा भाव्यं च साधनम्। एवमात्मत्वाहानेन नित्यमुपासनायां क्रियमाणायाम् अधिकारिविशेषेण 'स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नोगतम् तत्रास्य यथा कामचारो भवति' (छा. ७.१.५) इति यावन्नामवागादिब्रह्मोपासनं मोक्षार्थं 'स चमसेनापः प्रणयेत् गोदोहनेन पशुकामस्य' इति गुणफलविधिवत् तत्तदवान्तरफलाय च विहितम्। तत् किं नामादिप्रतीकस्वरूपतया भगवदुपासनम्, किं वा तत्प्रतीकगततया तन्निखिलशक्तिप्रबोधकतयेति प्रसङ्गाच्चिन्त्यत इति वाच्यम्। 'नित्यशः कार्यं सर्वथा भाव्यं साधनं प्रथमत उच्यते' इति सप्ताधिकरणीप्रमेयसङ्ग्राहकभाष्यविरोधात्। भाष्ये प्रायपदप्रयोगाभावाच्च। न च ब्रह्मप्रतीकयोर्भेदोपासनं सर्वथा कर्तव्यमित्यत्रोच्यत इति वाच्यम्। स्वामित्वोपासनं सर्वथा कर्तव्यमिति समर्थनेनैव तत्प्राप्तेरिति चेद् अत्रोच्यते- यथा स्वामित्वोपासनं सर्वथा कर्तव्यं तथा प्रतीकैक्योपासनवर्जनमप्यवश्यं कर्तव्यमित्युच्यते। न च स्वामित्वोपासनेनैव तत्प्राप्तिरिति वाच्यम्। अर्थात् प्राप्तत्वेऽपि साक्षात्प्राप्त्यभावात्। वक्ष्यमाणरीत्याऽधिकाशङ्कयाऽपोदितस्य पुनः प्रसूयमानत्वाच्च। अत एवोपासनापादेऽधिष्ठानत्वेन प्रकृतं नाम वागादिप्रतीकं विषयः। तत् किं ब्रह्मतयोपास्यं न वा। तदर्थमुपासनायां फलवत्त्वं प्रयोजकमुत वस्तुनस्तथात्वमिति सन्देहः।

पूर्वपक्षः

प्रतीकं ब्रह्मतयोपास्यमिति पूर्वः पक्षः। न च स्वामित्वस्य सर्वदा सर्वथोपास्यत्वान्न प्रतीकैक्योपासनस्यावसरः। न हि नामादिसर्वस्वामित्वं सर्वदा सर्वथोपास्यं, तदैक्यमपि तथेति सम्भवति। विप्रतिषिद्धत्वादिति वाच्यम्। 'स यो नाम ब्रह्मेत्युपास्ते' (छा.उ. ७.१.५) इति सामानाधिकरण्यैनैक्योपासनस्यैव प्रतीतेः। न च स्वामित्वोपासनमपि श्रुत्यैव प्रतीतमिति वाच्यम्। विकल्पसम्भवात्। न च 'यावन्नाम्नो गतम्' (छा.उ. ७.१.५) इत्यादिनैक्योपासनस्य फलान्तरश्रवणान्मोक्षैकफलकस्वामित्वोपासनेन कथं विकल्प इति वाच्यम्। 'गोदोहनेन पशुकामस्य प्रणयेत्' इत्यादिना पश्वाद्यवान्तरफलार्थत्वेन श्रुतस्य प्रणयनस्य स्वर्गफलकत्ववद् इहापि प्रतीकैक्योपासनस्य मोक्षार्थत्वोपपत्तेः। न च ब्रह्मप्रतीकयोर्भिन्नत्वादभेदोपासनायाः कर्तव्यतायां न श्रुतेस्तात्पर्यमिति वाच्यम्। फलवत्त्वस्यैवोपासनाकर्तव्यत्वे प्रयोजकतया भेदस्याप्रयोजकत्वात्। अन्यथाऽप्रसिद्धत्वस्यैवोपासनाकर्तव्यताप्रयोजकत्त्वापत्त्या स्वामित्वोपासनेऽपि श्रुतेस्तात्पर्यं न स्यात्। श्रूयते चात्रापि 'यावन्नाम्नो गतं तत्रास्य कामचारो भवति' (छा.उ. ७.१.५) इति अवान्तरं फलं प्रकरणान्महाफलं मोक्षश्च। तस्मात्

'स्वामित्वं सर्वथोपास्यमित्युक्तं नैव युज्यते।
यतः प्रतीकैरैक्येन तूपासा सा विकल्प्यते ॥' इति पूर्वः पक्षः।

सिद्धान्तः

सिद्धान्तस्तु-

'फलवत्त्वमात्रं तात्पर्यज्ञापकं सत्यमेव तत्।
न हि प्रतीके ब्रह्मैक्यदृष्टिः फलवती भवेत्॥
प्रत्युतानर्थहेतुः स्याद् अन्यथेत्यादिवाक्यतः।
मिथ्योपासात्वमेतस्या यतो ब्रह्म प्रतीकतः॥

भिन्नमेव ततो ब्रह्मदृष्टौ तत्परता कथम्।
नाम ब्रह्मेत्यादिवाक्यजातस्य स्यात् कथं वद॥
सप्तम्या वाक्यमेतच्च योज्यते नान्यशेषयुक्।
विकल्पो नाभ्युपेयः स्यादुक्तं सर्वं समञ्जसम्॥' इति॥

अद्वैत्यभ्युपगताधिकरणपरीक्षा

अन्ये तु 'मनो ब्रह्मेत्युपासीतेत्यध्यात्मम्। अथाधिदैवतम् आकाशो ब्रह्मेति' (छा.उ. ३.१८.१) तथा 'आदित्यो ब्रह्मेत्यादेशः' (छा.उ. ३.१९.१) 'स यो नाम ब्रह्मेत्युपास्ते' (छा.उ. ७.१.५) इत्येवमादिषु प्रतीकोपासनेषु संशयः। नामादिप्रतीकेषु ब्रह्मणीवाऽऽत्मत्वग्रहः कर्तव्यो न वेति। तत्र ब्रह्मणः श्रुतिषु आत्मत्वेन प्रसिद्धत्वात् प्रतीकानामपि ब्रह्मविकारत्वेन ब्रह्मत्वात् 'मनो ब्रह्म' (छा.उ. ३.१८.१) इत्युक्तावपि आत्मेति पदाध्याहारेण न्यायसाम्यान्मनआदिषु आत्मतयोपास्यमुपासकेनेति प्राप्ते, ब्रूमः। न तावदहं ब्रह्मेत्यादिभिर्यथाऽहङ्कारास्पदस्य ब्रह्मत्वमुपदिश्यते एवं 'मनो ब्रह्म' (छा.उ. ३.१८.१) इत्यादिभिः मनःप्रभृतीनां प्रतीकानामहङ्कारास्पदत्वमुपदिश्यते। येन प्रतीकेष्वात्मदृष्टिः कर्तव्या स्यात्। प्रत्युत तेषां ब्रह्मत्वेनोपास्यत्वमेवोच्यते। अहङ्कारास्पदस्य ब्रह्मतया ब्रह्मत्वेनोपासनीयेषु मनःप्रभृतिष्वहङ्कारास्पदत्वेनोपासनकल्पने आकाशादेरपि ब्रह्मविकारत्वेन ब्रह्मात्मकत्वाद् ब्रह्मप्रतिबिम्बत्वेन ब्रह्माभिन्नजीवदृष्टिवत् तदभिन्नाकाशादिदृष्टिरपि नामादिप्रतीकेषु स्यात्। तस्माद् यस्य यन्मात्रतयोपासनं विहितं तस्य तन्मात्रतया प्रतिपत्तव्यम् 'यावद्वचनं वाचनिकम्' इति न्यायात्, नाधिकमध्याहर्तव्यमतिप्रसङ्गादिति व्याचक्षते।

तदसाधु। प्रतीकेष्वात्मत्वेनोपासनमविहितत्वान्न कर्तव्यमित्युच्यते उत बाधकसद्भावात्। नाऽऽद्यः। 'अहं ब्रह्म' इत्यादिवाक्यैः परमात्माऽऽत्मतया

ग्रहीतव्य इति विधिसामर्थ्यादेव स्वात्मतया गृहीत-ब्रह्मात्मकप्रतीकानामपि स्वात्मतया ग्रहणस्यापि विहितत्वात्। न च सामर्थ्याल्लब्धमविहितं भवति। अन्यथा स्रुवादीनां द्रवद्रव्याद्यवदानेषु व्यवस्थितेः अर्थप्राप्तायाः असिद्धिः स्यात्। उक्तं च वार्तिके -

'यथैव पाठः प्रतिपत्त्युपायः तथैव सामर्थ्यमपि श्रुतीनाम्।
तेनैव चैतान्न समामनन्ति सहस्रभागं तु समामनेयुः॥' इति॥

न हि ब्रह्माऽऽत्मतया गृह्णतः तदभिन्नप्रतीकानि आत्मतया ग्रहीतुं सामर्थ्यं नास्ति। येनार्थप्राप्तिरपि न स्यात्। साक्षाद्विधानाभावस्तु प्रपञ्चमिथ्यात्वादावप्यविशिष्टः। तदपि 'नासदासीन्नो सदासीत्' इति प्रपञ्चासत्त्वोक्त्याऽर्थात् सदसद्विलक्षणत्वरूपं सिद्ध्यतीत्युक्तम्। न द्वितीयः। तत् किं बाधकं ब्रह्मैवाऽऽत्मतयोपास्यम् नान्यत् किञ्चित् प्रतीकादीत्यादिनिषेधशास्त्रम् उत जीवप्रतीकयोः भेदाद् ग्राह्यग्राहकयोश्चैक्यमन्तराऽऽत्मत्वेनोपासनायोगाद् इत्यादिका युक्तिः। नाऽऽद्यः। तदनुपलम्भात्। न द्वितीयः। जीवप्रतीकयोः व्यावहारिकभेदेऽपि परमार्थत ऐक्यस्यैव सम्भवात्। तथाहि। ब्रह्मप्रतीकयोस्तावदैक्यमावश्यकम्। अन्यथा प्रतीके ब्रह्मदृष्टिरप्यकर्तव्या स्यादिति 'मनो ब्रह्म' (छा.उ. ३.१८.१) इत्यादिवाक्यमप्यसमञ्जसं स्यात्। 'तदात्मानं स्वयमकुरुत। सच्च त्यच्चाभवत्' (तै.उ. २.६) 'स इदं सर्वमसृजत' (तै.उ.) इत्यादिना ब्रह्मप्रतीकयोः विकारिविकारभावश्रवणाच्च। एवं जीवब्रह्मणोरप्यैक्यमावश्यकम्। अन्यथाऽहं ब्रह्मास्मि ब्रह्मैव स्वाविद्यया संसरति स्वविद्यया मुच्यत इत्यादिशास्त्रमसमञ्जसं स्यात्। तथा च प्रतीकं जीवाभिन्नं तदभिन्नब्रह्माभिन्नत्वात्। यद् यदभिन्नाभिन्नं तत् तदभिन्नम्। यथा पृथिव्यभिन्नकपालाद्यभिन्नं घटादि पृथिव्यभिन्नम्। जीवो वा प्रतीकाभिन्नः तदभिन्नब्रह्मात्मकत्वाद् इत्यादिप्रयोगेण ऐक्यस्यैव सम्भवात्। व्यावहारिकभेद-

सद्भावान्नैवमिति चेन्न । जीवब्रह्मणोरपि व्यावहारिकभेदसम्भवेनाऽत्मत्वेन ग्रहणाभावापातात्। एतेन भामत्यां एकब्रह्मविकारित्वेन जीवप्रतीकयोरैक्ये तत एव जीववन्नामाद्याकाशयोरपि ऐक्यप्राप्त्याऽऽकाशाद्येव नामादित्वेन तद्वैपरीत्येन वा ग्राह्यं स्यादित्यतिप्रसङ्गदुष्टमनुमानमित्युक्तं निरस्तम्। अधिष्ठानचैतन्यरूपेण ऐक्याद्यापादनस्येष्टत्वात्। विकाररूपेण तदापादने विरुद्धधर्मयोगात् प्रत्यक्षादि-विरोधाभावात्।

ननु जीवप्रतीकयोरपि कथमैक्यापादनम्? तत्रापि चैतन्यरूपेणापादने त्विष्टम्। विशिष्टरूपेण चेत् प्रमाणविरोध इति वाचोयुक्तेः सम्भवादिति चेन्न। जीवब्रह्मणोः यादृशमैक्यमात्मत्वेन ग्रहणं चेत्यादि स्वीकृतं तादृशस्यैव जीवप्रतीकयोरप्यापादनात् । तथाच संसारित्वगर्भजीवत्वपरित्यागेन चिन्मात्रलक्षणया यथा जीवेन स्वात्मतया ब्रह्म ग्राह्यमुच्यते तथैव प्रतीकमपि नामत्वादिविरुद्धधर्मत्यागेन विकारिचैतन्यात्मना स्वात्मतया आत्माकाशत्वादि-विरुद्धधर्मत्यागेन तदन्तर्गतचिन्मात्ररूपेणाऽकाशाद्यात्मतया च ग्राह्यमित्युक्तौ बाधकाभावः।

यदप्यत्रोक्तं भाष्ये- विकारस्वरूपोपमर्देन हि नामादिजातस्य ब्रह्मत्व-मेवाऽश्रितं भवति। स्वरूपोपमर्दे च नामादीनां कुतः प्रतीकत्वमात्मग्रहो वा? किन्तु प्रतीकाभाव एव प्राप्नोतीति वैषम्यमिति। विवृतं चैतद् भामत्यां प्रधानीभूतानां प्रतीकानामुच्छेदो न युक्तः। न च तदुच्छेदे विधेयस्याप्युपपत्तिरिति। तदपि न। अवच्छिन्नस्वरूपोपमर्देन हि जीवजातस्य ब्रह्मत्वमेवाश्रितं भवति। स्वरूपोमर्दे च जीवानां कुत आत्मतया ब्रह्मगृहीतृत्वम्? कुतश्चाऽत्मग्रह इति जीवाभाव-प्रसङ्गस्यापि साम्यात्। किञ्च 'यावद्वचनं वाचनिकम्' इति वचने चेद् बहुमानः कुतस्तव 'यस्सर्वज्ञः' (मु.उ. १.१.९) इत्यादिवचने स न स्यात्। न हि सार्वज्ञादीनां काल्पनिकत्वं वचनादवगम्यते। आर्थिकत्वं चेत् 'नाम ब्रह्म' (छा.उ.

७.१.५) इत्यादावपि प्रवेशः कुतो न स्यात्? कुतश्च 'तत्त्वमसि' (छा.उ. ६.८.७) इत्यादौ पदद्वयलक्षणा? कुतश्च प्रमाणेषु तत्त्वावेदकत्वव्यवस्थेत्यलं प्रपञ्चेन।

विशिष्टाद्वैत्यभिमतसूत्रार्थविमर्शः

एतेन, नामादिप्रतीके नाऽत्मत्वमतिं बध्नीयात् स उपासकः यतः प्रतीकं न भवति। येन तान्यात्मत्वेनाऽकलयेदिति सूत्रयोजनाऽपि निरस्ता। जीवस्य ब्रह्मात्मकत्वाभावेऽपि यथा ब्रह्मण्यात्मत्वमतिं बध्नाति तथोपासकोऽपि स्वभिन्नेऽपि प्रतीके आत्मत्वमतिं बध्नातीत्युक्ते बाधकाभावात्। मिथ्या-दृष्टावनर्थप्राप्तेरिव मिथ्योपासनेऽप्यनर्थप्राप्तेः श्रवणात्। चैतन्यविवक्षया ब्रह्मण्यात्मत्वदृष्टेः मिथ्यादृष्टित्वाभावे च नामाद्यधिष्ठानचैतन्यादिविवक्षया मिथ्योपासनत्वासम्भवात्। व्यावहारिकभेदविवक्षा चोभयत्राप्यविशिष्टैव। प्रतीके ब्रह्मदृष्टेरप्यभावापातश्च। व्यावहारिकभेदस्य प्रतीकब्रह्मणोरपि सद्भावादिति।

टीकाक्षरार्थः

विवेकाख्यपूर्वपक्षन्यायविवरणम्

टीकाक्षरार्थस्तु -

विविच्यतेऽस्मादिति विवेको माहात्म्यमिति निर्वचनं मनसि निधाय विवेकेत्युक्तन्यायं पूर्वाधिकरणसङ्गतिसूचनेन साध्यप्रदर्शनेन विवृण्वत्,

'तर्हि विशेषवत्त्वादेव प्रतीकमपीश्वर इत्युपास्यमिति च नास्ति'

इति वाक्यं विवृणोति- **ब्रह्मतयोपास्यमिति पूर्वपक्ष इति ॥** अनेन प्रतीकमपीत्याद्युक्तार्थम्। पूर्वार्धमवतारयति- **नच ब्रह्मप्रतीकयोर्भिन्नत्वा-दिति॥** अनेन मोक्षाख्यविशेषफलवत्त्वादात्मत्वमप्रसिद्धत्वाभावेऽपि यद्युपास्यं स्यात्, तर्हि प्रतीकैक्यमपि 'स यो नाम ब्रह्मेत्युपास्ते' (छा.उ. ७.१.५) इत्यादिना विशेषफलवत्त्वादुपास्यं स्यात्। यथा फलवत्त्वरूपविशेषवत्त्वमेव

स्वामित्वोपासने प्रयोजकं तथैक्योपासने विशेषवत्त्वमेव प्रयोजकमित्यवर्जनीयमेव तदुपासनमिति वा विवरणार्थः सूचितः ।

सन्धिग्रहाख्यसिद्धान्तन्यायविवरणम्

सन्धीयते अनयेति सन्धिरुपपत्तिः । ग्रहशब्दश्च सद्भावलक्षकः । तथा चोपपत्तिसद्भावो न्यायः । यद्वा ग्रह उपादानं स्वीकारः । तथाचोपपत्त्या स्वीकार इत्यर्थ इत्यभिप्रेत्य सन्धिग्रहन्यायमेतदधिकरणसङ्गतत्वेन विवृण्वत्

'यत्र सन्धिरुपपत्तिर्विद्यते तस्यैव ग्राह्यत्वात् । अन्यस्येशत्वग्रहणस्य मिथ्याज्ञानत्वादेवानुपपत्तेः ।'

इति वाक्यं सूत्रार्थकथनव्याजेन व्याचष्टे- **न तद्युक्तमित्यादिना ॥** तथाच यादृशोपासने फलवत्त्वादिरूपोपपत्तिरस्ति तादृशोपासनस्यैव कार्यत्वात् प्रतीकमीश्वर इत्युपासनं न कर्तव्यमेव । ईश्वरादन्यस्य प्रतीकस्येश्वरत्वेनोपासनस्य मिथ्योपासनत्वादेव फलवत्त्वरूपयुक्तेरभावादिति विवरणार्थो द्रष्टव्यः । **प्रथमादिविभक्तेरेवेति ॥** 'वाचं ब्रह्मेत्युपास्ते' इत्यादौ श्रुतद्वितीयाविभक्तिः आदिशब्दार्थः । अत एव द्वितीयायाः सप्तम्यर्थत्वे सूत्रमुदाहरति- **षट्सु द्वितीयेति ॥** षट्स्वपि विभक्त्यर्थेषु द्वितीया भवतीत्यर्थः । अत्र चाधिकरणकारके प्रथमाद्वितीययोरुपपत्तिरिति भावः । ननु 'उभयोः प्रथमात्वतः' (ब्र.सू.भा.उ. ब्रह्मतर्कवचनम्) इत्ययुक्तम् । नामादिप्रकरणे पठितानां शब्दानां बहुत्वात् इत्यतो व्याख्याति - **उभयोरिति ॥** यद्यपि नामादिप्रकरणे नामवागादयः शब्दाः बहवः । तथा तत्र तत्र श्रुताः ब्रह्मशब्दाश्च बहवः । तथाऽपि नामादिशब्दा एको राशिः ब्रह्मशब्दाश्चैको राशिरिति राशिद्वयाभिप्रायेण द्विवचनमुपपन्नम् । ननु तथाऽपि 'उभयोः प्रथमात्वतः' (ब्र.सू.भा.उ. ब्रह्मतर्कवचनम्) इत्यनुपपन्नम् । 'वाचं ब्रह्म' इत्यादौ प्रथमान्तत्वाभावात् । तत्र द्वितीयायाः प्रथमार्थे लक्षणेत्यभिप्राय इति चेन्न । सुब्विभक्तौ लक्षणायोगात् । सामानाधिकरण्येनैक्यभ्रान्तेः वाग्ब्रह्मादिशब्दयोः द्वितीयान्तत्वेनोपपत्तेश्चेति चेन्न । प्रथमा च प्रथमा च प्रथमे, तयोर्भावः प्रथमात्वमिति सरूपाणां भिन्नार्थानामेकशेषाश्रयणेन द्वितीयाविभक्तेरपि ग्रहणोपपत्तेः । द्वितीयायाः प्रथमात्वं च तृतीयाद्यपेक्षया युक्तम् । अन्यथा 'प्रथमयोः पूर्वसवर्णः' (पा.सू. ६.१.१०२) इत्यादौ प्रथमान्तत्वेन द्वितीयाया अपि ग्रहणं न स्यात् । इष्यते च प्रथमाद्वितीययोरचि परे पूर्वसवर्णदीर्घः स्यादिति वृत्तिकृता । प्रथमात्वत इत्युपलक्षणम् । द्वितीयात्वत इत्यपि ग्राह्यमिति केचित् ।

अत्र सङ्क्षेपेण परमतमनूद्य व्याचष्टे- **न च वाच्यं क्षत्तरीति ॥** तत्प्रपञ्चस्तु प्रागेव कृतोऽनुसन्धेयः ।

सङ्क्षेपभाष्ये एतदधिकरणतात्पर्यसूचनम्

विष्णुर्ब्रह्मेत्येव गुणपूर्ण इत्येवोपासनं कार्यं न तु प्रतीकात्मतयेति योजनया सङ्क्षेपभाष्येणाप्येतत्तात्पर्यमभिहितम् ।

सूत्रार्थः

सूत्रार्थस्तु- 'ब्रह्मदृष्टिरुत्कर्षात्' इति समग्रसूत्रमाकृष्यते । **प्रतीक** इति नाधिकरणसप्तमी । नामादिप्रतीकविषये ब्रह्मदृष्टिः **न** कार्या । व्यर्थत्वात् । वैयर्थ्यं कुत इति चेन्न । प्रतीके ब्रह्मत्वदृष्टेः मिथ्यादृष्टित्वात् । तदपि कुत इति चेत्, स ब्रह्मशब्दोदितो विष्णुः प्रतीकं **न** भवति । किन्तु ततोऽत्यन्तं विलक्षण एव । तदपि कुत इति चेन्न । उत्कर्षात् प्रतीकतः विष्णोराधिक्यात् । विष्णुतः प्रतीकस्यापकर्षादित्यपि ग्राह्यम् । विष्णुप्रतीकयोरुत्कर्षापकर्षलक्षणविरुद्धधर्माधिकरणत्वाद् अत्यन्तभेद एवेति तयोरैक्यमत्यन्तासदेव । अतस्तयोरैक्यविषयिणी मिथ्यादृष्टिरेव । मिथ्यादृष्टिश्च निष्फला । अतः प्रतीके ब्रह्मदृष्टिर्न कार्येति समग्रसूत्रार्थः ।

॥ इति नप्रतीकाधिकरणम् ॥ ३ ॥

॥ अथ ब्रह्मदृष्टयधिकरणम् ॥ ४ ॥

सूत्रभाष्यम्

ॐ ब्रह्मदृष्टिरुत्कर्षात् ॐ ॥ ४.१.५ ॥

ब्रह्मदृष्टिश्च सर्वथा कार्यैव परमेश्वरे। उत्कृष्टत्वात्।

'ब्रह्मदृष्ट्या सदोपास्यो विष्णुः सर्वैरपि ध्रुवम्।
महत्त्ववाची शब्दोऽयं महत्त्वज्ञानमेव हि।
सर्वतः प्रीतिजनकमतस्तत्सर्वथा भवेत्॥
आत्मेत्येव यदोपासा तदा ब्रह्मत्वसंयुता।
कार्यैव सर्वथा विष्णोर्ब्रह्मतत्वं न परित्यजेत्॥' इति ब्रह्मतर्के ॥ ५ ॥

॥ इति ब्रह्मदृष्टयधिकरणम् ॥ ४ ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र ब्रह्मदर्शनसाधनब्रह्मत्वोपासनस्याऽवश्यकत्वसमर्थनादस्ति शास्त्रसङ्गतिः। अन्यथा भूम्नो ज्यायस्त्वमित्युक्तहानिप्रसङ्गात् समर्थनीयमेतत्। भूम्न इत्यत्र प्रकृतं ब्रह्मत्वमेव विषयः। किं सदा सर्वथोपास्यं न वेति सन्देहः। उभयथापि दर्शनं सन्देहबीजम्।

पूर्वपक्षः

न ब्रह्मत्वं सदा सर्वथोपास्यमिति पूर्वः पक्षः। भगवत्प्रसादाय हि तदुपासनं कर्तव्यम्। स च प्रतिदिनं विविधगुणोपसंहारेणोपासने सिद्ध्यति। तथा च किं ब्रह्मत्वस्यैकस्यैव विशिष्य सदोपासने कारणमस्ति। तदुपासनमपि भगवत्प्रसादजनकमिति चेत् तथाऽपि गुणान्तरसाम्यमेव स्यात्। न चाऽत्मत्ववद्

गुणत्वविशेषेऽपि नित्योपास्यत्वे विशेषहेतुरस्ति। अतो ब्रह्मत्वस्य नित्योपास्यत्वाभावादुक्तं ज्यायस्त्वमयुक्तमिति।

सिद्धान्तः

सिद्धान्तयत्सूत्रं पठित्वा व्याचष्टे- **ब्रह्मेति ॥** परमेश्वरे सदा सर्वथा ब्रह्मत्वोपासनं कार्यम्। तत्र सर्वगुणान्तर्भावेन भगवदुत्कृष्टत्वसिद्धेः। भगवदुत्कृष्टत्वं हि ब्रह्मत्वम्। तथा च ब्रह्मत्वोपासनं नाम उत्कृष्टत्वोपासनमेव। सर्वोत्कृष्टत्वोपासनं चान्योपासनेभ्योऽतिशयेन भगवत्प्रसादहेतुरिति भावः। ब्रह्मदृष्टिः प्रतीके कार्येति केचित् तदतीतसूत्रेणैव निरस्तमिति भावेनोक्तं परमेश्वर इति। अत्र स्मृतिं चाऽह- **ब्रह्मेति ॥** शब्दोऽयं यत इति शेषः। सर्वतो महत्त्वज्ञानमित्यन्वयः। गुणान्तरोपासनादाधिक्येनेति वा। आत्मत्वोपास्तिवद् ब्रह्मत्वोपासनं विनापि मोक्षासम्भवाच्च तत्कार्यमिति भावेनाऽह- आत्मेति। ब्रह्मत्वस्याप्यावश्यकत्वे चतुर्गुणोपासननियमभङ्गः स्यादित्यतो वाऽऽह- **आत्मेति ॥** आत्मत्वविशेषणत्वेनोपासनाददोष इति भावः। अतो ब्रह्मत्वस्य विशिष्योपास्यत्वादुक्तं युक्तमिति सिद्धम् ॥ ५ ॥ अ-४ ॥

शेषतात्पर्यचन्द्रिका

॥ अथ ब्रह्मदृष्टयधिकरणम् ॥ ४ ॥

॥ 'ॐ ब्रह्मदृष्टिरुत्कर्षात् ॐ' ॥ ४.१.५ ॥

अनन्तरसङ्गतिः

अत्र ब्रह्मत्वोपासनस्य सर्वोपासनेष्वनुवृत्तिः समर्थ्यते। न चेदं भूमाधिकरणेन गतार्थम्। तदुक्तस्य सर्वत्र ब्रह्मत्वानुवर्तनस्य दाढर्याय सर्वथा कर्तव्यत्वस्येह समर्थनात्। नन्वेवं तदानन्तर्यमेव स्यात्। न स्यात्। तत्रैवोक्तावावश्यकर्तव्यता न विज्ञायेतेत्युक्तत्वात्।

ननु स्वामित्वं सर्वथोपास्यमित्यात्मनयोक्तमयुक्तम्। ब्रह्मणो जीवात्मकत्वेन स्वामित्वस्यैवाभावात्। भावे वा तस्य सर्वसाधारणत्वेन सर्वथोपास्यत्वायोगात्। न हि राजादिर्भृत्यादेर्न स्वामी। किञ्च, प्रतीके ब्रह्मदृष्टिर्न कर्तव्येति पूर्वोक्तमयुक्तम्। आत्मन्यपि तदभावप्रसङ्गात्। न च 'नेदं यदिदमुपासते' (के.उ. १.५) इति प्रतीकस्य ब्रह्मनिषेधवद् आत्मनस्तन्निषेधाभाव इति वाच्यम्। 'नाम ब्रह्म' (छा.उ. ७.१.५) इत्यादौ सामानाधिकरण्यत्यागेनेवेहापि यस्मिन् कस्मिन् जीवे ब्रह्म नास्ति। अन्यदेव जीवस्वरूपं ब्रह्म विधीयत इति तत्त्यागेन योजनोपपत्तेरित्यादिशङ्कया वा, ब्रह्मण उत्कृष्टत्वेन निकृष्टस्य जीवस्य तदभेदायोगाद् ब्रह्मणः स्वामित्वमस्त्येव। स्वामित्वमात्रस्य सर्वसाधारण्येऽपि उत्कृष्टस्वामित्वस्य तदभावः प्रतीकस्योत्कृष्टत्वाभावेन ब्रह्मदृष्टेरकर्तव्यत्वेऽपि आत्मनस्तद्भावात् कथं तत्र ब्रह्मदृष्टेरकर्तव्यत्वप्रसङ्गः? 'नाम ब्रह्म' (छा.उ. ७.१.५) इत्यादौ योग्यताविरहात् सामानाधिकरण्यत्यागेन विभक्तेरर्थान्तराश्रयणेऽपि 'नेदं यदिदम्' (के.उ. १.५) इत्यत्रार्थान्तराश्रयणे कारणाभावः। प्रत्युत जीवे नास्तीत्यस्य बाधः। ब्रह्मण उत्कृष्टत्वेन सर्वत्रावस्थित्यवश्यम्भावात् इत्यादिपरिहारस्य प्रतीत्या वाऽत्र सङ्गतत्वाच्च। एतेनानन्तरसङ्गतिः सिद्ध्यति।

एतेनैव प्रतीकनयाव्यवधानं कुत इति चोद्यं निरस्तम्। तत्प्रमेयस्याप्यत्रोक्तरीत्याऽऽक्षिप्य समाधानात्। एतेनाऽऽनन्दनयविरोधोऽपि परिहृतः। चतुर्ष्वपि गुणेष्वशक्तावत्यन्तायामापदि गुणिनि ब्रह्मत्वं न त्याज्यम्। पृथक् च नोपास्यम्। आत्मत्वस्यैकस्यैवोपास्यत्वाभिधानात्। अतः उत्कृष्टस्वामी विष्णुरिति न क्वचिदपि विस्मर्तव्यमित्यर्थस्यात्र पर्यवसानात्। न हि पूर्णत्वमात्मत्वमिव पृथक् सर्वथोपास्यमित्यत्रोच्यते। येनाऽनन्दविरोधः स्यात्।

पूर्वपक्षः

प्रत्यहं विविधानां तु गुणानां न्यसनेन हि।
भगवत्प्रीतिरधिका ततो ब्रह्मत्वसंयुता॥

स्वामित्वोपास्तिरित्येतत् वृथा नियमकल्पनम्।
गुणान्तरयुताऽपि स्यात्ततो भूमनयोऽपि न॥ इति पूर्वः पक्षः।

सिद्धान्तः

महत्त्वमेव ब्रह्मत्वं महत्वज्ञानमेव यत्।
सर्वतः प्रीतिजनकमतो ब्रह्मत्वसंयुतम्॥
आत्मत्वमथवाऽन्यच्च ध्यातव्यं सर्वथा भवेत्।
ब्रह्मत्वहीनधर्माणां विन्यासो नातितुष्टिदः॥ इति सिद्धान्तः।

अद्वैत्यभ्युपगताधिकरणपरीक्षा

अन्ये तु तेष्वेवोदाहरणेष्वन्यः संशयः किमादित्यादिदृष्टयो ब्रह्मण्यध्यसितव्याः किं वा ब्रह्मदृष्टिरादित्यादिष्विति। तत्र

'फलवच्च प्रधानं च संस्कार्यमिति वैदिकात्।
न्यायान्निश्रित्य शास्त्रार्थमुपेक्ष्यो लौकिको नयः॥

ब्रह्मणः फलप्रसवसामर्थ्येन फलवत्त्वात् अत एव प्रधानत्वाच्च ब्रह्मैवाऽदित्यादिदृष्टिभिः संस्कर्तव्यम्। ब्रह्मदृष्ट्या तेषामुपासने त्वन्यदुपास्यम् अन्यत् फलं ददातीति वैयधिकरण्यं स्यात्। चैत्रोपासने मैत्रोऽपि फलं दद्यादित्यतिप्रसङ्गाच्चायुक्तेति शास्त्रीयन्यायान्निर्णीते वाक्यार्थे निकृष्टदृष्टिः नोत्कृष्ट इति लौकिको न्यायोऽनादरणीयः। अन्यथा पूर्वाधिकरणसिद्धं ब्रह्माभिन्नजीवदृष्टेः नामादिषु कर्तव्यत्वे तदभिन्नजीवदृष्टेः घटादिष्वपि कर्तव्यत्वप्रसङ्गान्न प्रतीके ब्रह्माभिन्नजीवदृष्टिः कर्तव्येत्यादिप्रमेयं न स्यादिति प्राप्तेऽभिधीयते।

स्वपरोपासने तुल्या ब्रह्मणः फलदातृता।
कांस्यभोजिनयेनातो लोकन्यायोऽनुगृह्यताम्॥

ब्रह्मणः सर्वकर्माध्यक्षतया स्वपरोपासनयोः फलदातृत्वाविशेषस्य 'फलमत उपपत्तेः' (ब्र.सू. ३.२.२९) इत्यत्रैवोक्तत्वात् प्राधान्यविधानाच्च शास्त्रार्थसन्देहे निकृष्टदृष्टिर्नोत्कृष्ट इति लौकिकन्यायोऽपि गृह्यते ब्रह्माऽदित्यादावारोप्यमिति, न पुनरादित्यादि ब्रह्मण्यारोप्यमिति। तथाच 'राजपुरुष आगतः' इत्यादौ राज्ञः शब्दतो गुणत्वेऽप्यर्थतः प्राधान्यवद् ब्रह्मप्राधान्याविघाताच्चरमश्रुतत्वादिति-शब्दशिरस्कत्वाच्च ब्रह्मशब्दस्य प्रतीतिलक्षकत्वं युक्तम्। आदित्यादौ ब्रह्मदृष्टिं कृत्वा आदित्यादीनुपासीतेत्येव तत्र वाक्यार्थ इति व्याचक्षते।

तत्र। ब्रह्मण्येवाऽदित्यदृष्ट्यध्यासाङ्गीकारे शब्दतोऽपि प्राधान्यप्राप्तेः। ब्रह्मचैतन्यस्य मोक्षेऽप्यनुगतस्याऽदित्यादिदृष्टिसंस्कृतस्य तत्स्वरूपापत्ति-रूपफलोपयोगित्वेन भूतभाव्युपयोगलाभेन ब्रह्मदृष्टिसंस्कृतानामादित्यादीनां च भूतभाव्युपयोगादर्शनेन तत्र तद्दृष्टेर्विफलत्वाच्च। 'आदित्यो ब्रह्म' (छा.उ. ३.१९.१), 'प्राणो ब्रह्म', 'विद्युद् ब्रह्म' इत्यादिसमानविभक्तिनिर्देशात् प्रतीयमानं सामानाधिकरण्यमर्थान्तरवाचित्वेन प्रसिद्धानां ब्रह्मादित्यप्राणादि-शब्दानां मुख्यं न सम्भवतीति तु दूषणं सिद्धान्तेऽपि समम्। प्रकृतिविकारभावाद् ब्रह्मादित्यादीनां मृच्छरावादिवत् सामानाधिकरण्यं युक्तमिति समाधानं चाविशिष्टम्।

अत्र यदुक्तम् प्रकृतिविकृतिभावेनात्र सामानाधिकरण्यनिर्वाहे विकारप्रविलयो ह्येवं प्रकृतिसामानाधिकरण्यात् स्यात्। नह्यधिष्ठानतत्त्वज्ञानेऽपि तत्राध्यस्तं रूप्यादि ज्ञायते। ततश्च प्रतीकाभावप्रसङ्गेनोपासनानुपपत्तिः। जीवस्यापि ब्रह्मण्यध्यस्ततया तद्विकारत्वेन तस्यापि प्रविलयेऽधिकार्यभावप्रसङ्गश्च। जगन्मात्रस्य ब्रह्मण्यध्यस्तत्वेन 'सर्वं ब्रह्म' इत्येव निर्देष्टव्ये 'आदित्यो ब्रह्म' इत्यादिपरिमितविकारोपादानवैयर्थ्यापत्तिश्चेति। तदयुक्तम्। मृद्घटादिवद् विकारिविकारभावे दोषाभावात्। न हि मृदादौ ज्ञाते तद्विकारो घटादिर्न

ज्ञायते। 'निर्विकारोऽक्षरः शुद्धः' इत्यादिश्रुतिस्तु रज्वास्सूत्रयोरिव मायाब्रह्मणोर्जगदुपादानत्वेऽपि केवलब्रह्मपरा वा, मायोपरागाद् ब्रह्मण उपादानत्वेऽपि तदनुपरक्ताभिप्राया वा, तन्तुद्वारांशोः पटं प्रतीव मायाद्वारा ब्रह्मणः प्रपञ्चं प्रत्युपादानत्वेऽपि साक्षाद्विकारनिषेधिका वाऽस्तु।

एतेन 'ब्राह्मणोऽग्निर्वैश्वानरः' इत्यादाविव सामानाधिकरण्यस्य बाधितत्वाद् अन्यत्रान्यतरदृष्टिवद् 'आदित्यो ब्रह्म' (छा.उ. ३.१९.१) इत्यादावपि अन्यत्रान्यतरदृष्टिरेवात्राभिप्रेतेति निरस्तम्। अन्यत्रान्यतरदृष्ट्यध्यासेऽपि सामानाधिकरण्यबाधावश्यम्भावेनाविशेषाद् ब्रह्मशब्दे प्रथमायाः सप्तम्यर्थोपपत्तेश्च। 'ब्राह्मणोऽग्निर्वैश्वानरः' इत्यादावप्यन्यत्रान्यतर-दृष्ट्यध्यासासम्मतेश्च।

किञ्च न तावदन्यत्रान्यतरदृष्टिः ब्रह्मादित्यादिशब्दशक्त्या बोध्यते। तत्र तस्य प्रयोगप्रत्ययाभावात्। न तावल्लक्षणया। तस्या एव दोषत्वात् सामानाधि-करण्यानुपपत्त्यपरिहाराच्च। नहि ब्रह्मादिदृष्टिरेवाऽदित्यादिः, किन्तु ब्रह्मदृष्टिविषय एव। तत्रैव लक्षणाऽस्त्विति चेन्न। तथाऽपि सामानाधिकरण्यानुपपत्तेः। नहि ब्रह्मादिदृष्टावादित्यादिर्विषयो भवितुमर्हति। घटादेः पटादिदृष्टिविषयत्वा-दर्शनात्। अन्यथा गवादिदृष्टिविषयोऽश्वादिरपि भवतीति गौरश्व इत्यादि-सामानाधिकरण्यमप्यबाधितं स्यात्। अत एव शुक्तिदृष्टे रजतदृष्टित्वदर्शनात्र सामानाधिकरण्यानुपपत्तिरिति निरस्तम्। भ्रान्तेः शास्त्रविधेयत्वानुपपत्तेश्च। तया पुरुषार्थसिद्ध्यनुपपत्तेश्च।

ननु न शास्त्रैकशरणानामस्माकं लौकिकी रीतिरनुसर्तव्या। तेन युक्तमयुक्तं वा यच्छास्त्रमभिदध्यात् तथैव प्रतिपत्तव्यम्। विधानसामर्थ्यादेव तदनुष्ठातुः फलं च कल्प्यत इति चेन्न। दृष्टिलक्षणानुपपत्तेः। वेदे शक्तीतरवृत्त्यभावप्रसङ्गाच्च। तत्त्वंपदार्थयोरैक्यदृष्ट्या विधानसामर्थ्यात् पुरुषार्थसिद्ध्युपपत्त्या चिन्मात्र-

लक्षणाश्रयणायोगाच्च । 'न हि सः' इति पूर्वसूत्रे ऐक्याभावरूपबाधकोपन्यासानुपपत्तेश्च । प्रथमाविभक्तेः सप्तम्यर्थत्वाश्रयणेन सत्यवक्रे मार्गे उक्तकुसृष्टिमार्गानुसरणायोगाच्च । न भवति च लक्षणा । 'सुपां सुलुक्' (पा.सू. ७.१.३९) इत्यादिना सप्तम्याः सोरादेशस्य विधानात् 'सप्तसु प्रथमा' इत्यनुशासनाच्च ।

एतेन कांस्यभोजिन्यायेन निकृष्टदृष्टिर्नोत्कृष्ट इति लौकिकन्यायोऽनुसरणीय इति निरस्तम् । साक्षात् फलदातृत्वप्राधान्यादिसमाधानासम्भवात् । विधानसामर्थ्यादिव निकृष्टदृष्टिरपि फलदेत्युपपत्तेः । एतेन चरमश्रुतत्वाद् ब्रह्मशब्दे लक्षणेत्ययुक्तम् । 'सोमेन यजेत' इत्यादौ वैपरीत्यदर्शनाच्च । यच्चेतिपरत्वाद् ब्रह्मशब्दस्य दृष्टिलक्षणा युक्तेत्युक्तं तदपि न । दृष्टिपरत्वेऽन्वयानुपपत्तेरुक्तत्वात् ।

भामत्युक्तप्रतिक्षेपः

यदप्यत्रोक्तं भामत्याम् इतिपरत्वमपि ब्रह्मपदस्यामुमेव न्यायमवगमयति । तथा हि । स्वरसवृत्त्या आदित्यादिशब्दा यथा स्वार्थे प्रवर्तन्ते तथा ब्रह्मशब्दोऽपि स्वार्थे वर्त्स्यति यदि स्वार्थोऽस्य विवक्षितस्स्यात् । तथा चेतिपरत्वमनर्थकम् । तस्मादितिना स्वार्थात् प्रच्याव्य ब्रह्मपदं ज्ञानपरं स्वरूपपरं वा कर्तव्यम् । न च ब्रह्मपदमादित्यादिपदार्थ इति प्रतीतिपर एवायमितिपरः शब्दो यथा गौरिति मेऽभवद् गवय इति । तथा चाऽदित्यो ब्रह्मेति प्रतिपत्तव्य इत्यर्थो भवतीति । तदपि न । 'गौरित्ययमाह' 'न वेति विभाषा' (पा.सू. १.१.४४) इत्यादावितिपरशब्दस्य स्वरूपपरत्वस्यैव दर्शनेन ज्ञानपरत्वस्यादर्शनात् । 'गौरिति मेऽभवद् गवयः' इत्यत्रापि तस्य गोशब्दस्य गोशब्दपरत्वमेव । गवय इति व्यपदेशस्तु 'अयं वै लोकः प्रथमा महानाम्नी' इत्यादाविव प्रतिपाद्यप्रतिपादकयोरपि दृष्टः । ज्ञानपरत्वेऽपि सामानाधि-करण्यानुपपत्त्यपरिहाराच्च । यथा ह्यादित्यादिपदार्थो न ब्रह्मपदं तथा न ब्रह्मज्ञानं च । तस्मादादौ स्थितत्वाद् आयुराद्यादानाद्

वाऽऽदित्यो विष्णुर्गुणपूर्णत्वात् ब्रह्मेत्युपास्यः, ब्रह्म वा गुणपूर्णत्वाद् विष्णुः आदौ स्थितत्वादिनोपास्य इति योजनाश्रयणे न कश्चिदपि दोष इति त्वदीयपूर्वपक्षसिद्धान्तावप्ययुक्तावेव ।

परोक्तसूत्रयोजनानिरासः

एतेन ब्रह्मदृष्टिरेवाऽदित्यादिषु कर्तव्या । उत्कर्षात् । एवं ह्युत्कर्षेणाऽदित्यादयो दृष्टा भवन्ति । उत्कृष्टदृष्टेः तेषु अध्यासादिति सूत्रयोजनं निरस्तम् । उत्कर्षशब्दस्य तद्दृष्टौ लक्षणापातात् । यथाश्रुतेऽन्वयानुपपत्तेः । नहि ब्रह्मदृष्ट्या वस्तुत आदित्यादावुत्कर्षो भवति । रजतदृष्ट्या शुक्तिशकलादौ तददर्शनात् । ब्रह्मदृष्ट्यध्यासस्य दोषघटितसामग्रीसाध्यत्वेन विध्यनपेक्षणाच्च । यथाऽऽदित्यादयः ब्रह्मतया दृष्टा उत्कृष्टदृष्टा भवन्ति तथाऽऽदित्याद्यात्मना दृष्टं ब्रह्मापि निकृष्टदृष्टं च स्यात् । एतेन वाक्यशेषोऽपि द्वितीयानिर्देशेनादित्यादिनेवोपासिक्रियया व्याप्यमानात् दर्शयति 'स य एतमेवं विद्वानादित्यं ब्रह्मेत्युपास्ते' (छा.उ. १.१९.४) 'यः सङ्कल्पं ब्रह्मेत्युपास्ते' (छा.उ. ७.४.३) इतीति निरस्तम् । उक्तरीत्या योजनाद्वयाश्रयणात् । द्वितीयायाः सप्तम्यर्थत्वोपपत्तेश्च । 'षट्सु द्वितीया' इति हि सूत्रम् ।

किञ्चेदमादित्यादावुत्कृष्टदृष्ट्यध्यस्तत्वं न तावच्छुक्तौ रजततादात्म्यारोपवद् आदित्यादावुत्कृष्टदृष्टितादात्म्यारोपः । साक्षिग्राह्यतया दृष्टेस्तदन्यत्र तादात्म्यारोपादर्शनात् । नहि घटादौ वल्मीकादितादात्म्यारोपवत् सुखदुःखज्ञानेच्छाप्रयत्नादितादात्म्यारोपो दृष्टः । नाप्युत्कृष्टत्वारोपः दृष्टिपर्यन्तविवक्षाविरोधात् । आदित्यस्योत्कृष्टत्वेन तत्र तदारोपायोगाच्च । ब्रह्मगतोत्कृष्टत्वविवक्षायां तदारोपस्य सर्वत्र सुलभत्वेनाऽदित्ये ब्रह्मदृष्टिं प्रति हेतुत्वानुपपत्तेः । एतेन द्वितीयादिनिर्देशाददित्यादीनामेवोपास्यत्वे निर्णीते अतिथ्याद्युपासनादिव आदित्याद्युपासनादपि प्रसन्नं ब्रह्मैव फलं ददातीति निरस्तम् । प्रतिमायां

विष्ण्वादीनामिव आदित्यादिप्रतीके साक्षाद् ब्रह्मण एव उपास्यत्वसम्भवे प्राधान्यादिभङ्गेनापि सामानाधिकरण्यव्यसनायोगादित्यलं पल्लवेन।

रामानुजोक्तमधिकरणम्

केचित्तु, आत्मत्वेनोपासनमुक्तं तत्प्रतीकोपासनेष्वप्यात्मत्वानुसन्धानं कार्यमुत नेति चिन्तायां 'मनो ब्रह्मेत्युपासीत' (छा.उ. ३.१८.१) इति ब्रह्मोपासनत्व-साम्याद् ब्रह्मणश्चोपासितु-रात्मत्वादात्मेत्येवोपासीतेत्येवं प्राप्तेऽभिधीयते। न प्रतीके आत्मत्वेनोपासनम्। न ह्युपासितुरात्मा प्रतीकः। प्रतीकोपासनेषु प्रतीक एवोपास्यो, न ब्रह्म। तत्तु दृष्टिविशेषणमात्रम्। न पुनर्ब्रह्मोपास्यम्, मनआदिः दृष्टिविशेषणमिति युक्तम्। मनआदीनामनुत्कृष्टत्वात् ब्रह्मणस्तु मनआदित उत्कृष्टत्वादिति 'न प्रतीके' इत्यादिसूत्रद्वयमेकमधिकरणं व्याचक्षते।

तन्निरासः

तन्न। आवश्यकत्वद्योतनाय भिन्नप्रमेयप्रतिपादनमुखेनाधिकरणभेदस्यैव न्याय्यत्वात्। 'त्वं वा अहमस्मि भगवो देवते' (जा.उ., वा.उ.) इत्यादावहमादिशब्दश्रवणात् त्वंशब्दनिर्दिष्टब्रह्मण आत्मतयोपासनेऽभिहितेऽपि 'मनो ब्रह्मेत्युपासीत' (छा.उ. ३.१८.१) इत्यादावहमादिशब्दाश्रवणात् प्रत्युत ब्रह्मशब्दश्रवणात् संशयस्य निर्बीजत्वाच्च।

किञ्चात्र प्रतीकवाचिनामादिशब्दैः किं चेतनमभिधेयमुत जडम्? नाऽद्यः। चेतनस्योपासकं प्रत्यात्मत्वसम्भवेन प्रतीकस्यैवोपास्यत्वेऽपि ब्रह्मवत् स्वात्मतयोपास्यत्वसम्भवात्। नहि त्वन्मते स्वात्मत्वं स्वात्माभिन्नत्वम्, किन्तु 'यस्याऽत्मा शरीरम्' इत्यादिश्रुतिप्रतिपादितजीवशरीरकत्वात्मक-स्वान्तर्यामित्वमेव। न चैतत्प्रतीकेषु दुर्घटम्। नामादिदेवतानां स्वान्तर्यामि-त्वोपपत्तेः। तथाच श्रुतिः- 'चन्द्रमा मनो भूत्वा हृदयं प्राविशत्' इत्यादिः।

स्वशरीरान्तःस्थितेन्द्रियादिप्रेरकत्वमेव ह्यन्तर्यामित्वम्। ब्रह्मणो मुख्यान्तर्यामित्वेऽपि तदितरदेवानाममुख्यान्तर्यामित्वसम्भवात्। न च तदुपासनं व्यर्थम्। 'यस्तान् द्वेष्टि स मां द्वेष्टि यस्ताननु स मामनु' (म.भा), 'तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः' (भ.गी. ३.१२), 'इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञ भाविताः' (भ.गी. ३.१२), 'अपूजिता अधर्मादिदातारस्ते तथाविधाः' इत्यादिवचनैस्तदुपासनस्यापि कर्तव्यत्वात् फलवत्वाच्च। ततश्च नामादिदेवतानां ब्रह्मण इव स्वान्तर्यामितयोपास्यत्वसम्भवेन सिद्धान्तानुपपत्तिः।

न द्वितीयः। अचेतनमनःप्रभृतेरुपास्यत्वासम्भवाद् अभिमान्यधिकरण-विरोधाच्च। तेषामपि स्वशरीरान्तःस्थत्वेन स्वप्रवृत्तिनियामकत्वेन चोपासकं प्रत्यात्मत्वोपपत्तेरात्मत्वेनानुसन्धानस्यावर्जनीयत्वाच्च। किञ्च 'मनो ब्रह्म' (छा.उ. ३.१८.१) इत्यादौ ब्रह्मण एवोपास्यत्वाश्रयणं युक्तम्। प्राधान्यात् साक्षात्फलदातृत्वात्। ब्रह्मविद्यात्वाच्च। अन्यथा हि प्रतीकविद्यैव स्यात्। ब्रह्मपदं व्यर्थं च स्यात्। न च पूर्वमत इव इतिशब्दशिरस्कब्रह्मशब्दस्य प्रतीतिलक्षकत्वेन प्रतीतौ च ब्रह्मणो विशेषणत्वात् प्रतीके ब्रह्मत्वदृष्टिः कार्येत्यत्रोच्यत इति नैष दोष इति वाच्यम्। भ्रमरूपदृष्टेः श्रुत्या विधानायोगात्। प्रमितेस्तु प्रतीके विधानासम्भवात्। न ह्यब्रह्मणि प्रतीके ब्रह्मत्वप्रकारकदृष्टिः प्रमितिर्भवति। ब्रह्मणः प्राधान्यविरोधितया स्वस्थानादुत्कृष्टस्येतिशब्दस्य मनआदिशब्दैः सम्बन्धे बाधकाभावाच्च। 'तत् प्रतिष्ठेत्युपासीत' इत्यादिसमाख्यानाच्च। सूत्रद्वय-योजनाऽप्यन्ययोजनान्नातिरिच्यत इति तत एव निरस्ता ज्ञातव्या।

विन्यासाख्यपूर्वपक्षन्यायविवरणव्याख्यानम्

टीकाक्षरार्थस्तु- विन्यासेत्युक्तन्यायं हेत्वन्तरोपस्थापकतया तत्साध्यप्रदर्शनेन विवृण्वत्

'न च प्रतिदिनं विविधगुणन्यासेन भगवत्प्रीत्युपपत्तेः न ब्रह्मतादृष्टिनियम इति वाच्यम्।'

इति वाक्यं व्युत्क्रमेण व्याचष्टे- **न ब्रह्मत्वमिति**॥ अनेन न ब्रह्मतादृष्टिनियम इति व्याख्यातम्। भगवत्प्रीत्युपपत्तेरित्यस्यार्थः- **भगवत्प्रसादाय हीति**॥ प्रतिदिनं विविधगुणविन्यासेनेत्यस्यार्थः- **स च प्रतिदिनमिति**॥

साधनाख्यसिद्धान्तन्यायविवरणव्याख्यानम्

साधनन्यायं भावप्रधानतया विवृण्वत्

'अशेषगुणान्तर्भावेन तस्यैवाधिक-साधनत्वात्'

इति वाक्यं सूत्रयोजनाप्रदर्शनव्याजेन व्याचष्टे- **'तत्र सर्वगुणान्तर्भावेन' इत्यादिना 'हेतुरिति भावः' इत्यन्तेन**। अनेन ब्रह्मत्वे अशेषगुणान्तर्भावेन ब्रह्मत्वोपासनस्यैव अधिकभगवत्प्रीतिसाधकत्वाद् ब्रह्मतादृष्टिनियमो युक्त इति योजना द्रष्टव्या।

सङ्क्षेपभाष्ये एतदधिकरणतात्पर्यसूचनम्

ब्रह्माऽदातेत्येवोपासनं कार्यम्। न तु केवलं ब्रह्मत्वं स्वामित्वं वेत्यादियोजनेन सङ्क्षेपभाष्येणाप्येतत्तात्पर्यमुक्तम्।

सूत्रार्थः

सूत्रार्थस्तु- प्रतीक इति निवृत्तम्। आत्मेतिसूत्रात् प्रथमान्तमात्मपदं विपरिणामेन सप्तम्यन्ततयाऽनुवर्तते। आत्मनि स्वामिनि **ब्रह्मदृष्टिः** ब्रह्मत्वोपासनं कार्यं पूर्णत्वसंयुतमेवाऽत्मत्वमुपास्यमिति यावत्। **उत्कर्षात्** तस्य स्वामित्वोत्कर्ष-वत्त्वात्। उत्कर्षस्य ब्रह्मशब्दप्रवृत्तिनिमित्तत्वादेवेति।

॥ इति ब्रह्मदृष्टयधिकरणम्॥ ४॥

॥ अथ आदित्यादिमत्यधिकरणम्॥ ५॥

सूत्रभाष्यम्

ॐ आदित्यादिमतयश्चाङ्ग उपपत्तेः ॐ ॥ ४.१.६ ॥

'चक्षोः सूर्यो अजायत' (ऋ.सं.१०.९०-१३) इत्याद्युपासनं च देवानां कार्यमेव। स्वोत्पत्तिस्थानत्वात् स्वात् स्वाश्रयत्वान्मुक्तौ तत्र लयस्यापेक्षितत्वाच्चोपपन्नं तेषां तथोपासनम्। नारायणतन्त्रे च-

'आधिव्याधिनिमित्तेन विक्षिप्तमनसोऽपि तु।
गुणानां स्मरणाशक्तौ विष्णोर्ब्रह्मत्वमेव तु॥
स्मर्तव्यं सततं तत्तु न कदाचित् परित्यजेत्।
अत्र सर्वगुणानां च यतोऽन्तर्भाव इष्यते॥
स्वोत्पत्त्यङ्गं च देवानां विष्णोश्चिन्त्यं सदैव तु।
तेषां तत्र प्रवेशो हि मुक्तिरिच्युते बुधैः।
तदाश्रिताश्च ते नित्यं ततश्चिन्त्यं विशेषतः॥' इति॥ ६॥

॥ इति आदित्यादिमत्यधिकरणम्॥ ५॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र भगवदपरोक्षसाधनस्याङ्गाश्रितत्वेन देवतोपासनस्याऽवश्यकत्व-समर्थनादस्ति शास्त्रसङ्गतिः। अन्यथा तन्न्यायेनाऽत्मत्वस्याप्यावश्यकत्वा-भावप्रसङ्गात् समर्थनीयमेतत्। भगवदङ्गाश्रितत्वेन देवतोपासनं देवाना-मुक्तम्। तत्र स्वस्य स्वोत्पत्त्यङ्गाश्रितत्वेनोपासनं विषयः। सदा सर्वथा कार्यं न वेति सन्देहः। द्विविधोपास्तिदर्शनं सन्देहबीजम्।

पूर्वपक्षः

न सदा सर्वथा तथोपासनं देवैः कार्यमिति पूर्वः पक्षः। सूर्यादीनां विविधस्थानेषु सञ्चरणेन सदा भगवच्चक्षुराद्याश्रितत्वाभावात्। सदा चक्षुराद्याश्रितत्वाभावेऽपि तथोपासनस्यानर्थफलत्वात्। गुणान्तरेषु सत्सु भगवदङ्गाश्रितत्वेन विशिष्य स्वचिन्तने कारणविशेषाभावाच्च। अतः सत्यप्याश्रयिभावसम्बन्धे तस्य सर्वथोपास्यत्वाभावात् तद्वत् स्वस्वामिभावे सत्यपि नात्मत्वोपासनमावश्यकमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रं पठित्वा व्याचष्टे- आदित्यादीति। 'चक्षोः सूर्यो अजायत' इत्यादिना यदुक्तं स्वाश्रयत्वेन भगवदङ्गोपासनं तदादित्यादिदेवैः सदा सर्वथा कार्यमेव। को विशेषहेतुः। मुक्तौ तत्र लयस्यापेक्षितत्वात्। उपासनस्य फलसाम्येन कार्यत्वात्। मुक्तौ तत्र लय एव कुतः। स्वोत्पत्तिस्थानत्वात्। यतो यस्योत्पत्तिस्तत्र तस्य लयनियमात्। न चान्यथोपासनप्रसङ्गादेतद-युक्तम्। नित्यं रूपान्तरेणाङ्गानां स्वाश्रयत्वादिति भावः। अतीताधिकरण-सहितैतदधिकरणार्थे स्मृतिं चाऽह- **नारायणेति**॥ स्वोत्पत्त्यङ्गं स्वाश्रय-त्वेन चिन्त्यम्। अत एतदुपासनस्याऽवश्यकत्वादुक्तमपि युक्तमिति सिद्धम्॥ ६॥ अ-५॥

॥ इति आदित्यादिमत्यधिकरणम्॥ ५॥

शेषतात्पर्यचन्द्रिका

॥ ॐ आदित्यादिमतयश्चाङ्ग उपपत्तेः ॐ ॥ ४.१.६ ॥

सङ्गतिः

एवं सर्वसाधारण्येन निदिध्यासनेऽवश्यम्भाव्यात्मत्वब्रह्मत्वलक्षण-गुणद्वयमभिहितम्। अधुना देवानां निदिध्यासनेऽवश्योपास्यगुणानुपक्षिपतीति सङ्गतिः।

नन्वस्तु स्वामित्वं ब्रह्मत्वं च सर्वैरवश्यमुपास्यम्। 'ब्रह्मदृष्ट्या सदोपास्यो विष्णुः सर्वैरपि ध्रुवम्' (ब्र.सू.भा.उ. ब्रह्मतर्कवचनम्) इत्यादिस्पष्टप्रमाण-दर्शनात्। स्वस्वाश्रयचक्षुष्मत्त्वादिगुणास्तु न देवताभिः सर्वदोपास्याः। तथा सति स्वात्मनः चक्षुराद्यङ्गाश्रितत्वेन सर्वदा चिन्तनं कार्यमित्युक्तं स्यात्। न चैतद् युक्तम्। स्पष्टप्रमाणाभावात्। सूर्यादिदेवानां विविधदेशेषु सञ्चरणेन सर्वदा चक्षुराद्याश्रितत्वाभावेन तथाविधचक्षुष्मत्त्वादेः भगवति सर्वदाऽभावेन मिथ्योपासनस्य च निन्दितत्वेन सर्वदा देवैस्तथोपासनायोगाच्च। सार्वकालिकेषु भगवदपत्यत्वादिषु स्वात्मनि सत्सु चक्षुराद्याश्रितत्वस्यैव विशिष्य सर्वदोपासने हेत्वभावाच्च। तथाच 'स्वोत्पत्त्यङ्गं च देवानां विष्णोश्चिन्त्यं सदैव तु' (ब्र.सू.भा.उ. नारायणतन्त्रवचनम्) इति निरवकाशप्रमाणप्राप्तमपि स्व-स्वाश्रयचक्षुष्मत्तादिगुणोपासनं त्याज्यमेव। 'ब्रह्मत्वं न परित्यजेत्' (ब्र.सू.भा.उ. ब्रह्मतर्कवचनम्) इति निरवकाशप्रमाणावगतमपि ब्रह्मत्वाद्युपासनं त्याज्यमिति प्रमाणप्रमेयनिमित्ताश्रिताभिरभ्यधिकाशङ्काभिः पुनरुत्थानाद्वा सङ्गतिः।

पूर्वपक्षः

सूर्यादिदेवताभिस्तु न स्वात्मा चक्षुराश्रितः।
चिन्त्यो विविधदेशेषु सञ्चारस्य प्रतीतितः। इति पूर्वपक्षः।

सिद्धान्तः

रूपान्तरेण सूर्यादिदेवानामङ्गसंस्थितेः ।
स्वोत्पत्त्यङ्गतया तत्र लयोऽपि प्रमितो यतः ॥
नारायणीयतन्त्रोक्तवचनाच्चापि नित्यशः ।
देवैरुपासनं कार्यं नान्यथा मोक्ष इष्यते ॥ इति सिद्धान्तः ।

परेषामधिकरणम्

अन्ये तु 'य एवासौ तपति तमुद्गीथमुपासीत' (छा.उ. १.३.१), 'लोकेषु पञ्चविधं सामोपासीत' (छा.उ. २.२.१), 'वाचि सप्तविधं सामोपासीत' (छा.उ. २.८.१), 'इयमेव ऋग् अग्निस्साम' (छा.उ. १.६.१) इत्येवमादिष्वङ्गावबद्धेषूपासनेषु पूर्ववदुत्कर्षनिकर्षविशेषादर्शनात् किंदृष्टिः क्व विधित्सितेति संशयः ।

कूटदृष्ट्या क्रियाभावात् संस्कार्यस्त्वक्रियात्मकः ।
प्राथम्यादुपचाराच्च सामाधारत्वकीर्तनात् ॥

यद्यपि 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' (छा.उ. १.१.१०) इति विद्यायाः क्रियासहकारित्वश्रुतेः, अनुपकारिण्याश्च सहकारित्वायोगात् ज्ञानस्य स्वगोचरप्रकाशाख्यसंस्कारजनकत्वस्य दृष्टचरत्वात् समारोपरूपस्याप्यादित्यादिज्ञानस्योद्गीथादिसंस्कारः ऐन्द्र्या इव गार्हपत्यसंस्कारः क्रियाद्वारा फलवत्त्वं च गम्यते । तथाऽप्युद्गीथादेरादित्यदृष्टिदृष्टस्य रजतदृष्टिदृष्टस्य पुरोवर्तिनः शुक्तिकाशकलस्य स्वरूपमिव क्रियात्वमेवाभिभूयते । आदित्यादेः पुनः उद्गीथादिक्रियात्मना दृष्ट्या संस्क्रियमाणस्य क्रियात्वोद्भवात् क्रियैव संस्कृता स्यात् । प्रथमश्रुताश्चाऽदित्यादयः । 'तदेतदेतस्यामृच्यध्यूढं साम' (छा.उ. १.६.१) इति पृथिव्यग्न्योः ऋक्-

सामशब्दोपचारः तद्दृष्टिविषयत्वसादृश्याद्भवति । 'लोकेषु सामोपासीत' इति लोकानां सामाधारत्वं कीर्त्यते । तस्मात् ज्योतिष्टोमादिकर्मानङ्गेष्वादित्यादिषु तदङ्गोद्गीथादिदृष्टिरेव कर्तव्येति प्राप्तेऽभिधीयते ।

फलवत् क्रियमाणं च निर्दिष्टं च द्वितीयया ।
आदित्यादिधियोपास्यमुद्गीथाद्यङ्गमिष्यते ॥

स्वतो वीर्यवतः क्रियमाणस्य 'यदेव विद्यया करोति' (छा.उ. १.१.१०) इत्यादिना विद्यासंस्कार्यत्वश्रवणाद् उद्गीथादेश्च तथाभावात् । गुणज्ञानस्य च क्रियात्वातिरोधायकत्वात् । सामोद्गीथमिति च कर्मत्वनिर्देशात् । अत एव तदेकवाक्यतया लोकेष्विति सप्तम्याः तृतीयार्थत्वात् । 'इयमेवर्क्' (छा.उ. १.६.१) इति चैवकारसंयुक्तपृथिव्यादेरुपायत्वावगमात् प्राथम्यस्याकिञ्चित्करत्वात् पृथिव्यग्न्योर्ऋक्सामशब्दस्याधिष्ठानारोप्यसम्बन्धेन लाक्षणिकत्वोपपत्तौ गौणत्वकल्पनाया अन्याय्यत्वात् उद्गीथादिष्वेवाऽदित्यादिदृष्टिरिति सिद्धमित्याहुः ।

तन्निरासः

तत्र । किमत्राऽदित्योद्गीथादिशब्दानां देवतापरत्वमभिप्रेयते उत जडपरत्वम् । नाऽद्यः । उद्गीथादेः क्रियात्ववर्णनानुपपत्तेः । आदित्यादिवत् सिद्धरूपत्वापत्त्या तत्र तद्दृष्टिविधाने विनिगमनाभावाच्च । 'यदेव विद्यया' (छा.उ. १.१.१०) इत्यत्र करोतिनोद्गीथशब्दाभिधेयस्याक्रियात्मकस्य चेतनस्य निर्देशानुपपत्तेश्च । ऐन्द्र्या गार्हपत्यस्येव आदित्यादिचेतनदृष्ट्या उद्गीथादिचेतनस्य संस्कार्यत्वोपपत्तेश्च । पूर्वपक्षायुक्तेश्च । अत एव फलभावाभावाभ्यां वैषम्यमप्ययुक्तम् । गीत्यात्मकस्योद्गीथस्य फलवत्कर्माङ्गत्वेन फलवत्त्वेऽपि चेतनात्मकस्योद्गीथस्य तदयोगात् । गीत्यात्मकस्य कर्माङ्गतया तद्देवताया अपि

तत् सिद्धमिति चेन्न । विष्णुक्रमणादावादित्यमण्डलप्रेक्षणादेरपि विधानेनाऽदित्यमण्डलस्यापि कर्माङ्गत्वेन तद्देवताया अपि फलवत्त्वावश्यम्भावात् । उपासनायाः पृथक् कर्मत्वेन तदङ्गस्योभयत्राप्यविशेषाच्च । कर्मकाण्डविहितकर्माङ्गोद्गीथादेः ब्रह्मकाण्डे प्रसक्त्ययोगाच्च । 'य एषोऽन्तरक्षिणि पुरुषो दृश्यते' (छा.उ. ४.१५), 'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म' (छा.उ. ४.१०) इत्यादौ कर्माङ्गत्वरहितेषु प्राणादिषु सुखत्वादिदृष्टिविधानानुपपत्तेश्च । प्राणादीनां कथञ्चित् कर्माङ्गत्वे आदित्यादेः तत् कुतो न स्यात् ? अत एव न द्वितीयः । 'अचेतनासत्यायोग्यानुपास्यान्यफलत्वविपर्ययाभ्याम्' इति सङ्कर्षणसूत्रविगानं चाधिकम् ।

किञ्चात्र आदित्यादिमतय उद्गीथादिषु विधीयमानाः प्रमितिरूपा उताध्यासरूपाः ? नाऽद्यः । आदित्यादय उद्गीथादिषु सन्तीत्यादीनां मतीनामिह तवानभिप्रेततया तादात्म्यदृष्टेरेव वक्तव्यतया परस्परानात्मत्वेन प्रसिद्धयोरादित्योद्गीथयोरैक्यदृष्टेः प्रमितत्वायोगात् । अन्यथा नामादिप्रतीकेष्वात्मदृष्टौ बाधकाभावप्रसङ्गात् । ततश्च प्रतीकाभावप्रसङ्ग इत्यादित्वद्भाष्यविरोधः । आत्मदृष्टिदृष्टस्य प्रतीकस्य स्वरूपमेवाभिभूयेत रजतदृष्टिदृष्टस्य शुक्तिकाशकलस्येवेति तत्र प्रतीकाभाव आपादनीयः । न चासौ प्रमितिपक्षे युज्यते । 'अग्निर्माणवकः' इत्यादाविवान्यत्रान्यदृष्टिविधानेऽपि स्वरूपाभिभावाभावात् । उक्तं च भामत्याम् । भवेदेतदेवम् । यद्यध्यासेन कर्मरूपमभिभूयेत, अपि तु माणवक इवाग्निदृष्टिः केनचित्तीव्रत्वादिना गुणेन गौणी, अनभिभूतमाणवकत्वात् तथेहापि । नहीयं शुक्तिकायां रजतधीरिव वह्निधीः । येन माणवकत्वमभिभवेत् । किन्तु गौणी, तथेयमुद्गीथादावादित्यादिदृष्टिर्गौणी । तस्मात् प्रमितिविवक्षायां प्रतीकेष्वात्ममतिर्दुर्वारेति पूर्वाधिकरणविरोधः स्थिर एव स्यात् । ननु प्रतीके आत्मत्वदृष्टेर्गौणत्वेऽपि गौणवृत्तिघटकत्वेनाध्यस्तभावरूपसम्बन्ध एव

वक्तव्य इति प्रतीकात्मनोरधिष्ठानाध्यस्तभावे वाच्ये पुनः प्रतीकाभावप्रसङ्गो दुर्वार इति चेन्न । इहाप्यादित्योद्गीथयोर्गौणीघटकत्वेनाधिष्ठानाध्यस्तभावे वाच्ये उद्गीथाद्यभावापातात् । अत्र तद्घटकः सम्बन्धोऽन्योऽन्विष्यते चेत् तत्रापि न कुत इति सममेव ।

एतेन द्वितीयोऽपि निरस्तः । अप्रमितेर्वेदेन विधानानुपपत्तिश्च । एतेनाऽदित्यादीनां प्राप्यतया फलात्मकत्वादुद्गीथादिभ्य उत्कर्ष इति निरस्तम् । उद्गीथदेवताया वायोरपि प्राप्यत्वेन फलात्मकत्वसम्भवात् ।

यच्च 'ओमित्येतदक्षरमुद्गीथमुपासीत' '(छा.उ. १.१.१.) एतस्यैव खल्वक्षरस्योपव्याख्यानं भवति' (छा.उ. १.१.१०) इति चोद्गीथमेवोपास्यत्वेनोपक्रम्याऽदित्यादिमतीर्विदधातीत्यादिना द्वितीयानिर्देशाद् उद्गीथादीनां प्राधान्यमुक्तम् । तन्न । 'य एवासौ तपति तम्' (छा.उ. १.३.१) इति द्वितीयानिर्देशस्यात्रापि सत्त्वात् । उपासनावाक्ये सर्वत्र 'वाचं धेनुमुपासीत' (बृ.उ. ५.८.१) इत्यादौ प्रकारप्रकारिणोरुभयोरपि द्वितीयानिर्दिष्टत्वाच्च । 'य एवासौ तपति' (छा.उ. १.३.१) इति सामर्थ्यविशेषकथनाद् आदित्यस्यैव प्राधान्यप्रतीतेश्च । युक्तश्चोद्गीथत्वेनाऽदित्यस्योपास्यत्वम् । अत एवेयमेवर्गित्यत्र पृथिव्यग्न्योरादित्यादिवत् कर्माङ्गयोरपि कर्माङ्गऋक्सामत्वेनोपास्तिरभिधीयते । न चात्रापि विवादः । यतः 'तदेतदस्यामृच्यध्यूढं साम' (छा.उ. १.६.१) इति ऋक्शब्देन पृथिवीं निर्दिशति । अग्नेराधेयत्वेनाधारत्वाभावात् । अत एव सामशब्देनाग्निम् । तच्च पृथिव्याग्न्योर्ऋक्सामदृष्टिचिकीर्षायामेव कल्पते न पुनः ऋक्सामयोः पृथिव्यग्निदृष्टिचिकीर्षायाम् । निर्देशविपर्ययप्रसङ्गात् ।

यदत्रोक्तं भाष्ये 'तदेतदेतस्यामृच्यध्यूढं साम' (छा.उ. १.६.१) इति तु लाक्षणिक एव पृथिव्यग्न्योर्ऋक्सामशब्दप्रयोगः । लक्षणा च यथासम्भवं सन्निकृष्टेन विप्रकृष्टेन वा स्वार्थसम्बन्धेन प्रवर्तत इति । विवृतं चैतद्भामत्याम् । अन्यथापि

लक्षणयोपपत्तौ न ऋक्सामेत्यध्यासकल्पनं पृथिव्यग्न्योरिति । तस्य च कल्पतरुरीत्या 'इयमेवर्गग्निः साम' (छा.उ. १.६.१) इत्यत्र ऋगादिशब्दस्य पृथिव्यादौ लक्षणया प्रयोगसम्भवेन तत्रोपास्तिरभिप्रेतेत्यभिप्रायः । न चासौ युज्यते। 'नाम ब्रह्म' (छा.उ. ७.१.५) इत्यादाविवोपासार्थत्वोपपत्तौ लक्षणाश्रयणायोगात् प्रयोजनाभावात् शक्यसम्बन्धाभावाच्च। ऋक्सामाध्यस्तत्वरूपशक्यसम्बन्धोऽस्तीति चेन्न । ऋक्सामाध्यासाधिष्ठानत्वस्यापि लक्षणाघटकसम्बन्धत्वोपपत्तेः । वाक्यं चेदुपासनार्थकं सत् सार्थकं भविष्यति । तथाचाग्निर्माणवक इत्यादाविव 'इयमेवर्ग्' (छा.उ. १.६.१) इत्यादावपि ऋगादिशब्दानां पृथिव्यादावध्यस्तत्वरूपसम्बन्धाश्रयणेन गौण्या वृत्तेः सम्भवेन 'नाम ब्रह्म' (छा.उ. ७.१.५) इत्यादाविवोपासनार्थत्वमेवास्तु। किं लक्षणाश्रयणेन। गौणीतो लक्षणा प्रबलेति चेन्न। प्रयोजनाभावेन दुर्बलवृत्त्याश्रयणस्य न्याय्यत्वात्। अन्यथा 'नाम ब्रह्म' इत्यादावपि लक्षणाश्रयणेन नामादौ ब्रह्मदृष्टिरपि न स्यात् । नास्ति च लक्षणायाः गौणीतः प्राबल्यम् । मन्थरप्रवृत्तिकत्वादित्युक्तमधस्तात्। इयमृगेवेति निर्देशापत्तिरिति त्व नियामकशून्यम्। ऋक्त्वेनेयमेव प्रतिपत्तव्या। आधारत्वसाम्यात् न त्वग्निः। इत्यर्थप्रतिपादनायेयमेव ऋगित्यक्षरविन्यासोपपत्तेश्च। 'य एवं विद्वान् साम गायति' (छा.उ. १.७.७) इत्युपसंहारविरोधोऽपि नास्ति। यत्सामसदृशोऽग्निरुपास्य उक्तस्तत्साम य एवं विद्वान् गायतीत्यर्थोपपत्तेः।

वस्तुतस्तु नास्माकं मते जडानामुपास्यत्वम्। किन्तु चेतनानामेव। तत्रापि तत्तद्गतभगवद्रूपाणामेव मुख्यमुपास्यत्वम्। तथाऽपि सामशब्दविवक्षितभगवत उपास्यत्वेऽभिप्रेतेऽग्निशब्दः अङ्गं नयतीत्यादिव्युत्पत्त्याऽङ्गनेतृपरो यौगिक एव। अग्निशब्दवाच्यस्य भगवत उपास्यत्वे समत्वात् सामेति सामशब्दो निर्दोषपर इत्युद्देश्यविधेयभावसाङ्कर्यं न दोषायेति किमनुपपन्नम् । 'लोकेषु पञ्चविधं

सामोपासीत' (छा.उ. २.२.१) इत्यादिसप्तमीनिर्देशश्च पृथिव्यादिलोकानामेवोपास्यत्वं गमयति। सप्तविधं सामेति द्वितीया तु उपास्तेस्सकर्मकत्वादेव। 'वाचं धेनुमुपासीत' (बृ.उ. ५.८.१) इत्यादौ चात्रैव 'य एवासौ तपति तम्' (छा.उ. १.३.१) इति च प्रकारवाचिनि शब्देऽपि द्वितीयादर्शनात् । लोकानामुपास्यत्वेऽप्यागारं गवां सञ्चरणेन पवित्रीक्रियतां प्रावारशब्दितवस्त्रं कुसुमैः सुगन्धीक्रीयतामित्यनयोरर्थयोरागारे गावो वास्यन्तां प्रावारे कुसुमानि वास्यन्तामित्यादौ सप्तम्या द्वितीयार्थत्वदर्शनान्न सप्तमीविरोधश्च । एतेन साम्नेति वक्तव्यत्वेनोभयत्र विभक्तिस्वारस्यभङ्ग इति चायुक्तम्। 'वाचं धेनुमुपासीत' (बृ.उ. ५.८.१) इत्यादावुभयत्र द्वितीयादर्शनादित्युक्तत्वात्। 'एतद्गायत्रं प्राणेषु प्रोतमथ खल्वमुमादित्यं सप्तविधं सामोपासीत' (छा.उ. २.११.१) इत्यादिषु बहुषु स्थलेषु विभक्तिस्वारस्यभङ्गापाताच्च। 'पृथिवी हिङ्कारः' (छा.उ. २.२.१) इत्यादिनिर्देशानुपपत्तिश्च। हिङ्कारानुवादेन पृथिवीदृष्टिविधाने 'हिङ्कारः पृथिवी' इत्येव निर्देशापातात् । उत्सर्गतः प्राप्तस्योद्देश्यपदप्राथम्यस्य बलवद्बाधकं विना त्यागायोगाच्च। एतेन सूत्रार्थोऽपि निरस्तः।

विचाराख्यपूर्वपक्षन्यायविवरणयोजनम्

टीकाक्षरार्थस्तु- विचारेत्युक्तन्यायं विशिष्टार्थकथनेन साध्यादिप्रदर्शनेन च विवृण्वत्

'न च विविधस्थानेष्वादित्यादीनां चरणे विष्ण्वङ्गेष्वाऽदित्यादिमतिनियमो नास्तीति वाच्यम्।'

इति वाक्यमाकाङ्क्षाक्रमेण व्याचष्टे- **न च सर्वथा तयोपासनं देवैः कार्यमिति पूर्वपक्ष इति ॥** अनेन विष्ण्वङ्गेष्वादित्यादीत्युत्तरार्धं व्याख्यातम् । नियमो नास्तीत्यस्यार्थः- **न सदा सर्वथेति ॥** मतीत्यस्यार्थः- **उपासनमिति ॥** आदित्यादीनामित्येतद् देहलीदीपन्यायेनोभयत्र सम्बध्यत इति तस्यार्थः ।

पूर्वार्धमपेक्षितपूरणेन व्याचष्टे- **सूर्यादीनामिति** ॥ चरण इति निमित्तसप्तमी। यद्वा 'सुपां सुपो भवन्ति' इति तृतीयैकवचनस्य सप्तम्येकवचनादेश इत्यभिप्रेत्य विवरणस्थचरणपदमनूद्य व्याचष्टे- **सञ्चरणेनेति** ॥ सदा भगवच्चक्षुराश्रितत्वाभावादित्यादिः शेषोक्तिः । उपपत्तेरिति सूत्रांशसूचितां युक्तिं चाऽह- **गुणान्तरेष्विति** ॥

आप्तकृत्याख्यसिद्धान्तन्यायविवरणयोजनम्

आप्तकृत्यन्यायं आप्तं कृत्यं यैस्तेषां भाव इति च विगृह्याऽद्यन्तयोः सम्बन्धिप्रदर्शनेन विवृण्वत्

'तत्कृतावेव कृत्यस्याऽऽप्तत्वादादित्यादीनाम्।'

इति वाक्यं भाष्येणैकार्थ्यात् सहैव तात्पर्यतो व्याचष्टे- **मुक्तौ तत्र लयस्यापेक्षितत्वादिति** ॥ एतेन तत्कृतावेव तथोपासनकरण एवाऽऽदित्यादीनां कृत्यस्य मोक्षस्याऽऽप्तत्वादाप्तव्यत्वादन्यथा तन्मोक्षानाप्तेः उपासनस्य फलानुसारेण कर्तव्यत्वनियमादिति व्याख्यातं भवति। 'स्वोत्पत्तिस्थानत्वात् स्वाश्रयत्वान्मुक्तौ तत्र लयस्यापेक्षितत्वाच्चोपपन्नं तेषां तथोपासनम्' इत्यन्तं भाष्यम्। तत्रान्तिमं वाक्यमादौ व्याख्यायाऽद्यं पञ्चम्यन्तं न स्वातन्त्र्येण हेतुसमर्पकमित्यभिसन्धिरवतारयति- **मुक्तौ तत्र लय एव कुत इति** ॥ इत्यत आहेतीति चाद्यन्तयोर्ग्राह्यम् । कथमनेनोक्तशङ्कापरिहार इत्यतो नियमं दर्शयति- **यतो यस्येति** ॥ स्वाश्रयत्वादिति मध्यगतं भाष्यमधिकमित्यतः विवरणोक्तविचारन्यायप्रतिक्षेपाय प्राप्तमित्यभिसन्धिरवतारयति- **न चान्यथोपासनेति** ॥ व्याख्याति- **नित्यं रूपान्तरेणेति** ॥ यदाकदाचिद्भगवदङ्गानां चक्षुरादीनां स्वाश्रयत्वमात्रेण न सूर्यादीनां सर्वदा तथोपासना प्राप्नोतीति नित्यमित्युक्तम्। तद्घटयति- **रूपान्तरेणेति** ॥ तेन मेर्वादौ विविधदेशसञ्चारेऽपि रूपान्तरेण भगवच्चक्षुरादौ सूर्यादयो नित्यं वर्तन्त इति बाधकाभावान्नित्यं सूर्याद्याश्रयत्वं

भगवदङ्गानां युज्यत इति पूर्वोक्तबाधकपरिहारोऽनेन क्रियत इति नेदमधिकमिति सूचयति।

सङ्क्षेपभाष्येण एतदधिकरणतात्पर्यवर्णनम्

तथाशब्देनान्यदप्यवश्यं देवानां कर्तव्यमुपासनमस्तीति सूचनात् एतदधिकरणतात्पर्यमपि सङ्क्षेपभाष्यकृतोक्तमिति ज्ञातव्यम्।

सूत्रार्थः

सूत्रार्थस्तु अङ्ग इत्यावर्तते । उपपत्तेरिति च । भगवदङ्गे चक्षुरादौ **आदित्यादिमतयः** सूर्यादयो वर्तन्त इति नित्यमुपास्तयः सूर्यादिभिः कर्तव्याः तत्करण एव मुक्तौ तदपेक्षितलय**स्योपपत्तेः** भगवदङ्गे रूपान्तरेणाऽदित्यादीनां नित्यमवस्थानस्योपपत्तेश्च। तथा वचनसद्भावाच्चेति चशब्द इति।

॥ इति आदित्यादिमत्यधिकरणम् ॥ ५ ॥

॥ अथ आसनाधिकरणम् ॥ ६ ॥

सूत्रभाष्यम्

ॐ आसीनस्सम्भवात् ॐ ॥ ४.१.७ ॥

सर्वदोपासनं कुर्वन्नप्यासीनो विशेषतः कुर्यात् । तदा विक्षेपाल्पत्वेन सम्भवात् ॥ ७ ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र भगवद्दर्शनसाधनध्याने आसनादिनियमसमर्थनादस्ति शास्त्रसङ्गतिः। अन्यथा तदुपदेशानर्थक्यप्रसङ्गात् समर्थनीयमेतत्। प्रकृतभगवदुपासनार्थमासनाद्युच्यते 'उपविश्यासने युञ्ज्याद् योगमात्मविशुद्धये' इत्यादौ। तदासनमत्र विषयः। सर्वथापेक्षितं न वेति सन्देहः। द्विविधसाधनदर्शनं सन्देहबीजम्।

पूर्वपक्षः

नासनं सर्वथाऽपेक्षितमिति पूर्वः पक्षः। तत्कृत्याभावात्। भगवत्सन्दर्शनार्थं हि सर्वमुपासनाद्यन्वेष्टव्यं प्रयोजनान्तराभावात्। तस्य च ज्ञानस्य मनसो भगवद्विषयत्वमात्रेण सम्भवात् किमस्यासनादिना कृत्यम्। न च वाच्यं मनसः सम्यग्भगवद्विषयत्वस्यैव ज्ञानसाधनत्वेऽपि तदर्थमेवाऽसनमिति। आसनं विना मनसो भगवति निवेशनाऽसम्भवे 'स्मर्तव्यः सततं विष्णुः' इत्यादिविधीनामनुपपत्तिप्रसङ्गात्। तस्मादासनादेरावश्यकत्वाभावात् तदुपदेशाप्रामाण्यमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **आसीन इति** ॥ जिज्ञासुरासीन एवोपासनं विशेषतः सर्वथा कुर्यात्। उपासनस्यैव ज्ञानसाधनत्वेऽपि तस्यासने सत्येव सम्भवादन्यथाऽसम्भवात्। आसीनस्य चित्तविक्षेपासम्भवादन्यस्य तन्नियमात्। नन्वासीनस्योपासने सर्वदोपासनाभावः। मैवम्। सदोपासनं कार्यम्। आसनं चापेक्षितमेवेति भावः ॥ ७ ॥

सूत्रभाष्यम्

ॐ ध्यानाच्च ॐ ॥ ४.१.८ ॥

'स्मरणोपासनं चैव ध्यानात्मकमिति द्विधा।
स्मरणं सर्वदा योग्यं ध्यानोपासनमासने ॥
नैरन्तर्यं मनोवृत्तेर्ध्यानमित्युच्यते बुधैः।
आसीनस्य भवेत् तत्तु न शयानस्य निद्रया ॥
स्थितस्य गच्छतो वाऽपि विक्षेपस्यैव सम्भवात्।
स्मरणात् परमं ज्ञेयं ध्यानं नास्त्यत्र संशयः ॥' इति नारायणतन्त्रे ॥

अतो ध्यानत्वाच्च ॥ ८ ॥

तत्त्वप्रकाशिका

नन्वेतद्विरुद्धं सर्वदोपासनमासनस्य सर्वथापेक्षितत्वं च। तत्र सर्वदोपासनमेवोपादेयं विहितत्वात्। अतो नासनमावश्यकमित्याशङ्कां परिहरत्सूत्रमुपन्यस्य सप्रमाणकं व्याचष्टे- **ध्यानाच्चेति** ॥ न सर्वदोपासनासननियत्योर्विरोधादासनस्य नावश्यकत्वम्। उपासनं हि द्वेधा भवति स्मरणं ध्यानमिति। तत्र स्मरणस्य सर्वदा योग्यत्वात् सर्वदोपासनविधेस्तद्विषय-

तयोपपत्तेः। उपासनविशेषस्य च ध्यानत्वात् तस्य चासनमन्तरेणासम्भवादासनस्यावश्यकत्वं सिद्ध्यति। न च स्मरणेनैवालम्। ध्यानस्य ततोऽधिकत्वात्। कुत एतत्। यतः स्मृतावुक्तमत एवेति भावः॥ ८॥

सूत्रभाष्यम्

ॐ अचलत्वं चापेक्ष्य ॐ ॥ ४.१.९ ॥

'अचलं चेच्छरीरं स्यान्मनसश्चाप्यचालनम्। चलने तु शरीरस्य चञ्चलं तु मनो भवेत्' इति ब्रह्माण्डे॥ ९॥

तत्त्वप्रकाशिका

ननु ध्यानार्थमपि नासनमावश्यकं प्रत्याहारादिना चित्तविक्षेपपरिहारादित्याशङ्कां परिहरत्सूत्रं पठित्वा स्मृत्यैव व्याचष्टे- **अचलत्वं चेति॥** न केवलप्रत्याहारादिना विक्षेपाभावो भवति। किन्तु शरीराचलत्वं चापेक्ष्य। तच्चासने सत्येवेति तदावश्यकमिति भावः॥ ९॥

सूत्रभाष्यम्

ॐ स्मरन्ति च ॐ ॥ ४.१.१० ॥

'समं कायशिरोग्रीहं धारयन्नचलं स्थिरः। सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चाऽनवलोकयन्' इत्यादि॥ १०॥

तत्त्वप्रकाशिका

स्मृतिभिरप्यासनस्याऽऽवश्यकत्वं साधयत्सूत्रमुपन्यस्य ताः स्मृतीरुदाहरति- **स्मरन्ति चेति॥** स्थिरः स्थिरमनाः। अस्योपविश्यासन इत्यनेन सम्बन्धाद् विवक्षितसिद्धिः॥ १०॥

सूत्रभाष्यम्

ॐ यत्रैकाग्रता तत्राविशेषात् ॐ ॥ ४.१.११ ॥

देशकालावस्थादिषु यत्रैकाग्रता भवति तत्रैव स्थातव्यम्।

'तमेव देशं सेवेत तं कालं तामवस्थितिम्।
तानेव भोगान् भुञ्जीत मनो यत्र प्रसीदति॥
न हि देशादिभिः कश्चिद् विशेषः समुदीरितः।
मनः प्रसादनार्थं हि देशकालादिचिन्तना॥' इति वाराहे॥ ११॥

॥ इति आसनाधिकरणम्॥ ६॥

तत्त्वप्रकाशिका

आसनादिनियतिवदेव देशकालादीनामपि नियतिरस्ति। 'पर्वताग्रे नदीतीरे', 'ब्राह्मे मुहूर्ते चोत्थाय' इत्यादेरित्याशङ्कां निवारयितुं सूत्रं पठित्वा व्याचष्टे- **यत्रेति॥** देशकालादीनां किमासनादिवद् ध्यानोपयोगितयाऽऽवश्यकत्वं स्यादुत पृथगेव ज्ञानोपयोगित्वात्। नाऽद्यः। नियतदेशकालादिना ध्याने विशेषाभावात्। अतो यत्र देशादौ ध्यानस्यैकाग्रताविशेषः स एव देशादिराश्रयणीयः। नापि द्वितीयः। स्वतन्त्रदेशादिना ज्ञाने विशेषाभावादेवेति भावः। स्थातव्यमित्युपलक्षणम्। अस्मिन्नेवार्थे स्मृतिमाह - **तमेवेति॥** अत्रापि पूर्ववद् विकल्पः। तमेवेति प्रथमस्य दूषणम्। तत्र हेतुर्न हीति। नियतदेशादिना ध्याने न कश्चिद्विशेष इत्यर्थः। द्वितीयस्यापि न हीत्यनेन दूषणम्। केवलदेशादिना ज्ञाने न विशेष इत्यर्थः। तत्र हेतुर्मनःप्रसादनार्थमिति। प्रायेण मनःप्रसादनार्थत्वात् पर्वताग्राद्युक्ति। अवस्थितिरासनं तच्च वीरं पद्ममेवेति न नियतिरिति भावः। अत आसनस्याऽऽवश्यकत्वात् तदुपदेशाऽवैयर्थ्यमिति सिद्धम्॥ ११॥ अ-६॥

शेषतात्पर्यचन्द्रिका

॥ अथासनाधिकरणम् ॥ ६ ॥

॥ 'ॐ आसीनः सम्भवात् ॐ' ॥ ४-१-७ ॥

सङ्गतिः

ननु 'तदाश्रिताश्च ते नित्यं ततश्चिन्त्यं विशेषतः' (ब्र.सू.भा.उ. नारायणतन्त्र-वचनम्) इति वचनाद् रूपान्तरेण सूर्यादीनामङ्गाश्रितत्वमङ्गीकृत्य सर्वदोपासनं यद्यङ्गीक्रियते तर्हि 'स्मर्तव्यः सततं विष्णुः विस्मर्तव्यो न जातुचित्' (सदाचास्मृतिः), 'श्रवणादि विना नैव क्षणं तिष्ठेदपि क्वचित्' इति वचनाद् ध्यानमपि सर्वदा कार्यम्। ततः ध्यान आसनमनावश्यकम्। ततश्च

'उपविश्याऽसने युञ्ज्याद् योगमात्मविशुद्धये' (भ.गी. ६.१२),

'आसनं स्वस्तिकं प्रोक्तं पद्ममर्धासनं तथा।
साधनां च सर्वेषामेतत्साधनमुत्तमम् ॥
ऊर्वोरुपरि विप्रेन्द्राः कृत्वा पादतले शुभे।
समासीताऽत्मनः पद्ममेतदासनमुत्तमम् ॥
एकपादमथैकस्मिन् विन्यस्योरुणि सत्तमाः।
आसीतार्धासनमिदं योगसाधनमुत्तमम् ॥
उभौ कृत्वा स्वपदौ हि जानूर्वोरन्तरेण च।
समासीतात्मनः प्रोक्तमासनं स्वस्तिकं परम् ॥'

इत्यादिशास्त्रप्रामाण्यमनङ्गीकार्यं स्यादित्युत्थानात् सङ्गतिः।

विषयसंशयौ

अवश्यकर्तव्यसाधननिरूपणप्रसङ्गसन्निधापितस्वामित्वाद्युपासनाङ्गत्वेन 'उपविश्यासने युञ्ज्यात्।' (भ.गी. ६.१२)

'नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः।
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥
युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥' (भ.गी. ६.१६-१७)

इत्यादिना श्रूयमाण आसनाहारविहारनियमादिर्विषयः। आवश्यकः न वेति सन्देहः। तदर्थं तस्योपासने उपयोगोऽस्ति न वा। तदर्थं मनश्चाञ्चल्यमुपासन-प्रतिबन्धकं न वा। तदर्थं कायचलनं मनश्चलनप्रयोजकं न वेत्यादिचिन्तनीयम्।

पूर्वपक्षः

तत्र पूर्वपक्षः

उपासनेऽप्यासनादेरुपयोगो न दृश्यते।
मनसो योगमात्रं तु गच्छतोऽपि न कुप्यति ॥

तथा हि किमासनादि यागस्वरूपनिर्वर्तकव्रीह्यादिवद् उपासनस्वरूप-निर्वर्तकत्वेनाऽवश्यकम्। उत प्रयाजादिवत् फलोपकार्यङ्गत्वेन ? नाऽद्यः। आसनादिना विनाऽप्युपासनास्वरूपनिर्वृत्त्युपपत्तेः। उपासनं हि श्रवण-मनननिदिध्यासनाद्यन्यतममेव। नान्यत्। तेषां च मनोयोगसाध्यत्वेऽ-प्यासनादिसाध्यत्वादर्शनात्। न हि तिष्ठतो व्रजतो वा मनोयोगो नास्तीति शक्यते वक्तुम्। गच्छतामेवास्मदादीनां स्मरणीये प्रमेये मनोयोगदर्शनात्। विधीयते च स्पष्टमेव सर्वदोपासनं, 'स्मर्तव्यस्सततं विष्णुः' (सदाचारस्मृतिः) इत्यादौ।

न द्वितीयः। 'ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात्' (ब्र.सू. ३-४-५०) इति न्यायेन ज्ञानस्योत्पत्तावुपकारान्तरानपेक्षणात्। न चोपासनस्य दर्शनादन्यत् प्रयोजनं दृष्टमिष्टं वा। यद्येवम् 'उपविश्याऽसने' (भ.गी. ६.१२) इत्यादिवाक्यश्रद्धालुनाऽऽसनादिनियमोऽप्यपेक्षित इत्युच्यते तदा

'अदेशकालयोगस्य दर्शनं हि न विद्यते।
अग्न्यभ्याशे जले वाऽपि शुष्कपर्णचये तथा॥
जन्तुव्याप्ते स्मशाने च जीर्णगोष्ठे चतुष्पथे।
सशब्दे सभये चापि चैत्यवल्मीकसञ्चये॥
अशुभे दुर्जनाक्रान्ते मशकादिसमन्विते।
नाऽचरेद्देशसम्बाधे दौर्मनस्यादिसम्भवे॥
सुषुप्ते शयने देशे गुहायां पर्वतस्य तु।
नद्यास्तीरे पुण्यदेशे देवतायतने तथा॥
गृहे वा सुशुभे देशे विजने जन्तुवर्जिते॥
युञ्जीत योगी सततमात्मानं मत्परायणः॥
पर्वताग्रे नदीतीरे गोष्ठे वृन्दावने तथा।
ब्राह्मे मुहूर्ते उत्थाय अन्तकाले तु पूरुषः॥
आगते गतसाध्वसः॥'

इत्यादिवाक्याद् देशकालादीनामप्युपासनेऽवश्यापेक्षणीयत्वप्रसङ्गः। यदि च तेषां मनःप्रसादनार्थत्वात् स्वतःसिद्धमनःप्रसादानां तदपेक्षाभावान्नाऽवश्यकता तर्हि प्रकृतेऽपि तथाऽस्तु। न च चित्तविक्षेपस्य गत्यादिमत्सु प्रायिकत्वात् तत्परिहाराय आसनमावश्यकमिति वाच्यम्। विषयेभ्यो मनसः प्रत्याहारादेः चित्तविक्षेपपरिहारोपायस्य दर्शनात्। तस्मात् सर्वथा नाऽसनादेरुपयोगोऽस्तीति नावश्यकतेति पूर्वपक्षः।

सिद्धान्तः

सिद्धान्तस्तु-

विक्षिप्तमनसो ध्यानं नास्तीति नियमो यतः।
तत आसनमत्यर्थं ज्ञानेच्छूनामपेक्षितम्॥

तथा हि - किमासनादि उपासनामात्रे नापेक्षितमित्युच्यते, उत ध्यानेऽपि। नाऽद्यः। अस्माकमप्रतिपक्षत्वात्। नहि वयं श्रवणादावप्यासनमावश्यकमिति ब्रूमः। 'स्मर्तव्यः सततं विष्णुः' (सदाचारस्मृतिः), 'श्रवणादि विना नैव क्षणं तिष्ठेदपि कचित्' इत्यादिविरोधात्। गत्यादिमतोऽपि खण्डस्मरणादेर्दर्शनात्। किन्तु ध्यानाख्योपासन एव। न द्वितीयः। ध्यानं हि मनोवृत्तिनैरन्तर्यात्मकमखण्डस्मरणम्। तत्र च मनोविक्षेपः प्रतिबन्धकः। न हि मनसो विषयान्तरसञ्चारे तद्वृत्तेर्नैरन्तर्यं विवक्षितप्रमेये सम्भवतीत्यनुभवसिद्धमेतत्। गत्यादिमतश्च मनसो विषयान्तरसञ्चारोऽपि सिद्धः। ततो ध्यानप्रतिबन्धकचित्तविक्षेपपरिहारायाऽसनस्यापेक्षणीयत्वात्। चित्तविक्षेपपरिहारद्वारा मनोयोगलक्षणस्य ध्यानापेक्षितदृष्टोपकारस्य सिद्ध्यर्थे व्रीह्यादिवदासनस्याप्यवश्यापेक्षणात्। आसीनस्यैव प्रत्याहारोऽपि सम्यग्घटते नान्यस्येत्यस्याऽनुभाविकत्वात्।

किञ्च मनश्चाञ्चल्यं ध्यानप्रतिबन्धकम्। ध्येयवस्तुनि मनःसंयोगस्याखण्डस्मरणात्मके ध्यानेऽन्तरङ्गत्वात्। न चेदं चित्तविक्षेपात्मकमेव। विषयान्तरसञ्चारात्मकस्य ध्येयवस्तुविभागात्मकत्वायोगात्। मनश्चाञ्चल्यं च कायचाञ्चल्याधीनम्। तथाऽनुभवात्। गत्यादिमतश्च कायचाञ्चल्यमवर्जनीयम्। ततश्चाऽसनं गत्यादेर्निवर्तकं तत्प्रयुक्तकायचाञ्चल्यस्यापि निवर्तकं सत् मनश्चाञ्चल्यनिवृत्तिरूपदृष्टमुपकारं कुर्वत् कथं ध्यानेऽवश्यापेक्षितं न स्यात्। न च प्रत्याहारेण मनश्चाञ्चल्यनिवृत्तिर्भवति। विषयान्तरसंयोगरूपचित्तविक्षेपनिवर्तने तस्योपक्षीणत्वात्।

एतेन देशकालावस्थाप्रतिबन्दी निरस्ता। न ह्येवं तत्र दृष्टोपकारः सम्भवति। यद्यपि मनसोऽप्रसन्नत्वे ध्येयवस्तुसंयोगो नास्तीत्यादिप्रणाड्या मनःप्रसन्नता ध्यानान्तरङ्गसाधनं भवति। तथाऽपि सा देशकालादिनैवेति नास्ति नियमः। कदाचित् कस्यचित् पुण्यदेशेऽपि मनःप्रसादादर्शनात्। कस्यचिद्वैपरीत्यदर्शनाच्च।

एतेन 'स्मर्तव्यः सततं विष्णुः' इत्यादिवाक्यविरोधोऽपि परिहृतः। गत्यादिमतः स्मरणरूपोपासनविधानेऽपि ध्यानरूपोपासनविधानाभावात्। अन्यथा

'अष्टाङ्गं हि परं योगं ब्रुवते योगवित्तमाः।
यमश्च नियमश्चैव तृतीयं त्वासनं मतम्।
प्राणायामस्तथा तत्र प्रत्याहारश्च पञ्चमः।
धारणा च तथा ध्यानं समाधिश्चेति सङ्ग्रहः।
आनृशंस्यमनालस्यं वैराग्यं चाऽर्जवं परम्।
अचापलं धृतिस्सत्यं ज्ञानं चेति यमं विदुः।
शौचमाहारनियमो निर्मलत्वमसङ्गता।
शान्तिः क्षमा दमस्तुष्टिरित्यष्टौ नियमः स्मृतः।
आसनं स्वस्तिकादीनि तथा तज्ज्ञाः प्रचक्षते।
कामं निस्सरतो वायोः एकत्र नियमश्शनैः।
चलस्य मनसः स्थित्यै प्राणायामं च तं विदुः।
इन्द्रियाणां च सर्वेषां प्रत्याहरणमिष्यते।
विषयेभ्यः प्रयत्नेन प्रत्याहारस्तु पण्डितैः।
धारणा नाम मनसो लक्ष्ये ब्रह्मणि संस्थितिः।
संशीलनं च मनसः तत्तद्ध्यानं पुनःपुनः।
तदेकरसतापत्तिं समाधिं ब्रुवते जनाः॥'

इत्यादिना गारुडे निर्दिष्टानां वैराग्यभक्त्यादीनामप्यावश्यकतापत्तिः।

आसीनेत्यादिसूत्रचतुष्टयस्य परोक्तार्थपरीक्षा

अत्रान्ये 'आसीनः सम्भवात्' इत्यारभ्य 'यत्रैकाग्रता' इत्यतः प्राक् सूत्रचतुष्टयमेकमधिकरणम्। किमुपासनेष्वनियमेन तिष्ठन् आसीनः शयानो वा

प्रवर्तेत उत नियमेनाऽसीन एवेति संशये मानसत्वादुपासनस्यानियमः शरीरस्थितेरिति प्राप्ते, ब्रवीति। उपासनं नाम विजातीयप्रत्ययाव्यवधानेन मानसप्रत्ययप्रवाहकरणम्। न चैतद् गच्छतो वा धावतो वा सम्भवति। गत्यादीनां चित्तविक्षेपकरत्वात्। तिष्ठतोऽपि देहधारणव्यापृतं मनो न सूक्ष्मवस्तुनिरीक्षणक्षमं भवति। शयानस्याप्यकस्मादेव निद्रयाऽभिभूयेत। आसीनस्य त्वेवंजातीयको भूयान् दोषः सुपरिहर इत्यासीन एवोपासीतेति।

तन्न। 'य एवासौ तमुद्गीथमुपासीत' (छा.उ. १.३.१) इत्यादौ उद्गीथादरेवोपास्यत्वम्। उद्गीथादिश्च कर्माङ्गमेव। गोदोहनादिवत्। तदुपासनं पुरुषार्थम्। कर्ममध्य एवानुष्ठेयम्। तदनुष्ठानं च यजमानार्थम् ऋत्विग्भिरेवाध्व-रादिकर्मसु व्यापृतैरिति त्वयैव पूर्वाधिकरणेषु सिद्धान्तितत्वेन इहाऽसीनस्य चित्ताविक्षेपादिना आसननियमसमर्थनायोगात्। यद्यङ्गावबद्धेषूपासनेषु कर्मसु व्यापृतमपि मनः कथञ्चिन्महता प्रयत्नेन निगृह्यैकाग्रतां नीयत तर्ह्यासीनत्व-नियमोऽकिञ्चित्करः स्यात्। तिष्ठतो गच्छतो वा सामगानादीनां चोदितत्वात् तत्सम्बन्धिन उपासनस्यापि तिष्ठदादिकर्तृकत्वस्यैव दर्शनेनान्यत्रापि तस्यैव कर्तृत्वोपपत्त्याऽऽसननियमस्यायुक्तत्वाच्च।

किञ्च त्वन्मते श्रवणमननध्यानाभ्यासवासितमानससाक्षात्कारात्मक-सम्यग्ज्ञानमप्युपासनशब्देन विवक्षितम्। तथा चोक्तम्- 'सम्यग्ज्ञानस्य प्रमाणवस्त्वन्यतराधीनत्वेनाऽसननियमापेक्षत्वायोगः। 'ध्यानादिसंस्कृतमप्रति-बद्धं चित्तं प्रदीपवत् स्वयमेव प्रमां करोति' इति कल्पतरूक्तेः। तथा च सम्यग्ज्ञानरूपोपासनेऽप्यासनापेक्षाया अभावान्न युक्तः सिद्धान्तः।

ननु कर्माङ्गसम्बन्धिषूपासनेषु सम्यग्ज्ञानेषु चाऽसननियमायोगेऽपि तदतिरिक्तोपासनेषु तन्नियमः साध्यते। बहुप्रयत्नसाध्योपासनमेवात्र विषयः।

न पुनः प्रयत्नमात्रानपेक्षं सम्यग्दर्शनम्। न वाऽल्पप्रयत्नसाध्यमङ्गावबद्धोपासनम्। तस्मान्महता प्रयत्नेन विनोपासितुमशक्यं यथा प्रतीकादि, यथा वा सम्यग्दर्शनसाधनतत्त्वमस्यादिवाक्यजनितज्ञानाभ्यासात्मकं तत्रैषा चिन्तेति वाचस्पत्युक्तेरिति चेन्न। प्रतीकोपासनस्य महाप्रयत्नसाध्यत्वायोगात्। प्रत्युताङ्गावबद्धस्यैव कर्मसु व्यापृतमनःप्रत्याहरणाय महतः प्रयत्नस्याऽवश्यकत्वात्। तत्त्वमस्यादिवाक्यजनितज्ञानाभ्यासात्मकस्याप्युपासनस्यानल्पप्रयत्नं विनाऽयोगाच्च।

मानसप्रत्ययप्रवाहकरणमुपासनमिति निर्वचनं चायुक्तम्। कृतेर्ज्ञानात्मकत्वाभावात्। उपासनं च ज्ञानरूपमिष्टमावयोः। अन्यथा तृतीयावैयर्थ्यात्। एतेनाऽसीन एवोपासीत तस्यैव मनोविक्षेपाभावादित्याद्ययोजना चायुक्ता। कर्माविबद्धेषु सम्यग्ज्ञानात्मकेषु चोपासनेषु अनासीनस्यापि चित्तविक्षेपाभावस्योक्तरीत्या सम्भवात्।

एतेन, अपि चोपासनं ध्यानमेव। ध्यानं चाप्रशिथिलाङ्गचेष्टेषु प्रतिष्ठितदृष्टिष्वेकविषयाक्षिप्तचित्तेष्वेव सम्भवति। ध्यायति बकः, ध्यायति प्रोषितबन्धुरित्यादिप्रयोगदर्शनात्। तथा चाङ्गचेष्टादिशून्यपुरुषमात्रनिष्ठध्यानात्मकत्वादुपासनस्याऽसननियमापेक्षत्वमिति युक्त्यन्तरं द्वितीयेनोच्यत इति चायुक्तम्। 'तमुद्गीथमुपासीत' (छा.उ. १.३.१) इत्यादौ ध्यायत्यर्थविधुरेऽप्युपास्तेः प्रयोगदर्शनेन ध्यायत्युपास्त्योरेकार्थत्वाभावाच्च।

'ध्यायतीव पृथिवी' (छा.उ. ७.६.१) इत्यत्र पृथिव्यादिष्वचलत्वमेवापेक्ष्य ध्यायतिवादो दृष्ट इति ध्यानकर्तुरचलत्वमपेक्ष्याऽसननियमोऽङ्गीकार्य इत्यचलत्वं चापेक्ष्य इत्येतद्व्याख्यानं चायुक्तम्। ध्यातुरासननियमेऽप्युपासितुस्तन्नियमाप्राप्तेः।

'शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः' (भ.गी. ६.४१) इत्यादिना उपासनाङ्गत्वेनाऽसनं 'स्मरन्ति च' इत्यन्तिमस्य व्याख्यानं चायुक्तम्। उपासनामात्रे आसनावश्यकतायास्त्वयैवानभ्युपगमात्। पद्मस्वस्तिकाद्यासनविशेषाणामप्युपासनाङ्गत्वस्मरणेन तेषामप्यावश्यकतापाताच्च। न चेष्टापत्तिः। अचलत्वापादकतयाऽऽसनस्याऽवश्यकत्वेऽपि पद्मस्वस्तिकादिसंस्थानविशेषस्याऽवश्यकत्वे कारणाभावात्। अन्यथा 'अचलत्वं चापेक्ष्य' इत्युक्तहेतोराभासतापातात्।

'यत्रैकाग्रता' इति सूत्रस्य परोक्तार्थपरीक्षा

यच्चेदमुच्यते 'यत्रैकाग्रता' इत्येकं सूत्रमधिकरणान्तरम्। पूर्वोक्तोपासनेष्वेव सन्देहः। किं तेषु दिग्देशकालनियमोऽपेक्षितो न वेति। तत्र ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यां दिशि ग्रामादिति दिङ्नियमः। प्राचीनप्रवणे वैश्वदेवेन यजेतेति देशनियमः। अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्तीति कालनियमः। तदेतन्नियमत्रयं यथा कर्मणि दृश्यते तथोपासनेऽपि द्रष्टव्यम्। वैदिकत्वस्याविशेषादिति प्राप्ते उच्यते। ध्यानस्य हि ऐकाग्र्यं मानसं प्रधानं साधनम्। न च तस्य दिगादिनियत्या कश्चिदतिशयो विद्यते। अतो नास्ति नियम इति।

तन्न। देशकालादिनियमस्योपासनामात्रेऽपेक्षाभाव उच्यते। किं वोपासनाविशेषे? नाऽद्यः।

'समे शुचौ शर्करावह्निवालुकाविवर्जिते शब्दजलाशयादिभिः।
मनोनुकूले न तु चक्षुपीडने गुहानिवाताश्रयणे प्रयोजयेत्॥' (श्वे.उ. २.१०)

इति समाम्नानविरोधात्। न हि क्वचिदप्यनुपयुक्तमङ्गत्वेन समाम्नायते। अन्यथा 'स्मरन्ति च' इत्याद्युक्तव्याघातः। न द्वितीयः। आसनसमानयोगक्षेमत्वाद् आसनस्यापि कर्माङ्गोपासने नियमाभिधानात्। यद्यपि मन्मतेऽप्युपासनं द्विविधम्। स्मरणात्मकं ध्यानात्मकं चेति। स्मरणात्मके 'स्मर्तव्यः सततं विष्णुः'

(स.स्मृ.) इति स्मृत्याऽऽसननियमाभावः। ध्यानात्मके तु तन्नियमः देशकालादीनां चानियमश्च। तथाऽपि ध्यानात्मक एवोपासने आसनस्य नानियमः। उपासना चोदनाचोदितानामपि प्रतीकाद्युपासनानामुद्गीथाद्युपासनानां चाऽसननियमस्याङ्गीकृतत्वादिति वैषम्यम्।

रामानुजमतपरीक्षा

केचित्तु इमां पञ्चसूत्रीं पूर्वमत इव सङ्गतिसंशयपूर्वपक्षसिद्धान्तसूत्रयोजनाश्चाभिधायैकमधिकरणं चक्रुरित्येतावन्मात्रेणैव विशेष इति न तन्मतं पृथङ्निराकृतमिति ध्येयम्।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- **आसनादिनियमसमर्थनादिति** ॥ यद्यपि 'आसीनः सम्भवात्' इति सूत्रानुसारेणाऽसननियममात्रसमर्थनमधिकरणार्थ इति युक्तम्। तथाऽपि 'स्मरन्ति च' इति सूत्रोपात्तगीतावाक्ये 'समं कायशिरोग्रीवम्' (भ.गी. ६.१) इत्यादिना नासिकाग्रन्यस्तदृष्टित्वदिगनवलोकनादिधर्मनियमस्यापि समर्थनप्रतीतेः आसनादीत्युक्तमिति ध्येयम्। **तदासनमत्र विषय इति** ॥ नासिकाग्रदृष्टित्वादेरप्युपलक्षणमेतत्। एवमग्रेऽपि।

सञ्ज्ञाख्यपूर्वपक्षन्यायविवरणव्याख्यानम्

सञ्ज्ञाशब्दो ज्ञानपर्यायः। 'न प्रेत्य सञ्ज्ञाऽस्ति' (बृ.उ. ४.५.१३) इत्यादौ ज्ञाने प्रयोगदर्शनात् तत्पूर्त्युपलक्षणार्थश्चेति हृदि निधाय सञ्ज्ञेत्युक्तन्यायं तत्साध्यादिप्रदर्शनेन विवृण्वत्

'न च ज्ञानस्य सम्यक् तद्विषयत्वमात्रेण पूर्तेरासनादिना
न कार्यमिति वाच्यम्।'

इति वाक्यं व्युत्क्रमेण व्याचष्टे- **नाऽसनं सर्वथाऽपेक्षितमिति पूर्वपक्ष इति** ॥

अनेनाऽसनादिना न कार्यमित्येतदुक्तार्थं भवति। तत्र हेत्वाकाङ्क्षायाम् इदमेवोत्तरमिति मन्वानः प्रकारान्तरेण व्याचष्टे- **तत्कृत्याभावादिति** ॥ आसनादिनोपकाराभावादित्यर्थः। पूर्वार्धवैयर्थ्यमाशङ्क्य हेतूपपादकत्वेन सार्थक्यं वदन् व्याचष्टे **भगवत्सन्दर्शनार्थं हीत्यादिना** ॥ आसनादिनोपकारोऽस्तीति वदन् प्रष्टव्यः। उपासनेन स्वफले निर्वर्तयितव्ये किं तज्जन्योपकारोऽस्ति उतोपासनस्वरूपे निर्वर्तयितव्ये इति। आद्येऽप्युपासनस्य भगवत्सन्दर्शनमेव फलमुतान्यत्किञ्चिदिति विकल्प्याऽद्यपरिग्रहणपूर्वकं द्वितीयं तावन्निराचष्टे- **भगवत्सन्दर्शनार्थमिति** ॥ आद्यपक्षनिराकरणपरतया ज्ञानस्य सम्यक् तद्विषयत्वमात्रेण पूर्तेरिति पूर्वार्धं व्याचष्टे- **तस्य च ज्ञानस्येति** ॥ उपासनाफलत्वेनाभिमतस्येत्यर्थः। मनस इति शेषोक्तिः। भगवदिति पूर्वाधिकरणप्रकृतविष्णुपरतच्छब्दार्थोक्तिः। सम्भवादिति पूर्तेरित्यस्यार्थः।

इदमुक्तं भवति। उपासनस्यापरोक्षज्ञानमेव फलम्। तस्मिन्ननेनोत्पादयितव्ये मध्ये आसनजन्य उपकारः कश्चिदपेक्षित इत्ययं पक्षो नोपपद्यते। मनसो भगवद्विषयत्वसम्पादनान्वयव्यतिरेकानुविधानदर्शनेन ज्ञानस्य तदुत्पत्तौ तद्व्यतिरिक्तोपकारान्तरानपेक्षणात्। ध्यानं च मनसो भगवद्विषयत्वसम्पादनमेव। तदेव निरपेक्षं कारणं ज्ञानस्येति कथं मध्ये उपकारान्तरापेक्षा ? अतः प्रथमपक्षे किमस्त्यासनादिना कृत्यमिति। द्वितीयं पक्षं स्वयमाशङ्क्य निराकरोति- **न च वाच्यमित्यादिना** ॥ उपासनं हि श्रवणादिभेदेन त्रिविधम्। तत्र श्रवणमननयोरासननियमस्योपयोगो न विद्यते। गत्यादिमतोऽपि श्रवणादिदर्शनात्। नापि ध्याने तस्योपयोगः। मनसः सम्यक् भगवद्विषयत्वसम्पादनरूपस्य ज्ञानसाधनस्य ध्यानस्याऽसनं विनाऽपि भगवति मनोनिवेशसम्भवेन तदनपेक्षत्वात्। अन्यथा 'स्मर्तव्यः सततं विष्णुः' (स.स्मृ.) इति विध्यनुपपत्तिप्रसङ्ग इति भावः।

'ध्यानाच्च' इति सूत्रं व्याकुर्वन्नेव भाष्योदाहृतनारायणतन्त्रवचनं व्याख्याति- **न सर्वदोपासनेति** ॥ 'उपासनं हि द्वेधा भवति' इत्येतदाद्यपादद्वयस्य व्याख्यानम्। स्मरणात्मकमुपासनं ध्यानात्मकमुपासनं चेत्यर्थः। 'स्मरणं सर्वदा योग्यम्' (ब्र.सू.भा.उ. नारायणतन्त्रवचनम्) इत्येतच्छेषपूर्त्या व्याख्याति- **तत्र स्मरणस्येति** ॥ तेन यतः स्मरणात्मकमुपासनं सर्वदा योग्यम् अतः 'स्मर्तव्यः' इत्यादिवचनविरोधो नास्तीत्यध्याहारः। 'विक्षेपस्यैव सम्भवात्' (ब्र.सू.भा.उ. नारायणतन्त्रवचनम्) इत्यन्तस्यार्थमाह - **उपासनाविशेषस्य चेत्यादिना** ॥ 'ध्यानत्वात्' इत्यनेन ध्यानाच्चेति सूत्रं भावप्रधानं व्याख्येयमित्युक्तं भवति। 'आसीनस्य भवेत्' (ब्र.सू.भा.उ. नारायणतन्त्रवचनम्) इत्यादेः तात्पर्यम्- **तस्य चाऽसनमन्तरेणेति** ॥ 'स्मरणात्परमं ज्ञेयम्' (ब्र.सू.भा.उ. नारायणतन्त्रवचनम्) इत्यादिपादद्वयं प्रकृतानुपयुक्तमित्यतोऽवतारयति । न च स्मरणेनेति पादद्वयतात्पर्यमाह- **ध्यानस्य ततोऽधिकत्वादिति** ॥ इदमुक्तं भवति । उपासनेन ज्ञाने निर्वर्तनीये स्मरणरूपोपासनास्वरूपनिर्वर्तने आसनस्योपयोगादर्शनेऽपि उपासनाविशेषे उपयोगोऽस्त्येव। कुत एतत्। तस्य ध्यानत्वात् । ध्यानात्मकत्वात् । निरन्तरमनोवृत्तिर्हि ध्यानम् । मनोवृत्तेः खण्डितत्वाभावो हि विषयान्तरसञ्चाररूपमनोविक्षेपाभाव एव भवति तथाऽनुभवात्। विक्षेपाभावस्त्वासीनस्यैव भवति। शयानस्य स्थितस्य गच्छतो वा निद्रादिना विषयान्तर-सञ्चारस्यैवानुभूयमानत्वात् । ततश्चाऽसनाभावे ध्यानस्वरूपनिर्वृत्तिः भगवद्दर्शनं च न स्यात्। ध्यानमेव ह्यधिकं साधनम्। तथा हि वक्ष्यति सूत्रकृत् । अन्यथा श्रवणमात्रेणैव भगवद्दर्शनसम्भवात् स्मरणात्मकमुपासनमप्यनपेक्ष्यं स्यात् । वचनं तु स्मरणोपासनाविषयत्वेन ध्यानात्मकोपासनेऽपि न प्रवर्तते । अतो 'ध्यानत्वाच्च' इति भाष्यं व्याचष्टे- **यत इति** ॥ यतो नारायणतन्त्रस्मृतावासनमावश्यकमित्युक्तम् । अत उपासने

तदपेक्षणीयमेव । ज्ञानान्तरङ्गसाधनस्योपासनविशेषस्य ध्यानात्मकत्वात् । ध्यानस्याऽसनं विनोक्तरीत्याऽयोगादुक्तं युक्तमिति भाष्यार्थो द्रष्टव्यः।

विशेषकार्याख्यसिद्धान्तन्यायविवरणम्

विशेषकार्यमित्युक्तन्यायं तदुपपत्त्युपलक्षकं मन्वानः सम्बन्धिदर्शनेन विवृण्वत्

'आसनादिना निश्चलत्वादिर्विशेषकार्योपपत्तेः'

इति वाक्यम् 'अचलत्वं चापेक्ष्य' इति सूत्रयोजनाप्रदर्शनमुखेन व्याचष्टे- **तच्चाऽसने सत्येवेति** ॥ नासाग्रदृष्ट्यादिरादिशब्दार्थः। मनोविक्षेपाभावादिः द्वितीयादि-शब्दार्थ इति भावः। 'स्मरन्ति च' इति सूत्रे बहुवचनोपपत्तये सूत्रमवतारयति- **स्मृतिभिरपीति** ॥ अनेन 'नात्यश्नतस्तु योगोऽस्ति' (भ.गी. ६.१६) इत्यादेः मिताहारादिसङ्ग्राहकस्याप्युपलक्षणमेतद्भाष्यम्। अत एव विवरणे आसनादि-नेत्यसकृदुक्तिः। तेन 'समं कायशिरोग्रीवम्' (भ.गी. ६.१) इत्येकस्मृतेरेव भाष्ये उदाहरणाच्छ्रुतिस्मृतिभिरपीति टीकोक्तिरयुक्तेति निरस्तम् । यद्वा, नासिकाग्रदृष्ट्यवलोकनविरहादिविशेषरूपभिन्नार्थप्रतिपादकत्वात् प्रतिप्रमेयं वाक्यं भिद्यत इत्येकोऽपि श्लोको बहुस्मृतिरूप इत्यदोषः । अचलमित्यनेनैव कायस्थैर्यस्य सिद्धेः स्थिर इति व्यर्थम्। अतोऽनूद्य व्याचष्टे- **स्थिरः स्थिरमना इति** ॥ नन्वत्र कायसाम्यादेरेवाऽवश्यकताप्रतीतेः स्मृतिभिरप्यासनस्याऽवश्यकत्वं साधयत् सूत्रमुपन्यस्येत्यादिसूत्रावतारः कथमित्यत आह- **अस्येति** ॥

सङ्क्षेपभाष्येण एतदधिकरणतात्पर्यवर्णनम्

न केवलं विष्णुर्ब्रह्मेत्याद्युपासनमावश्यकं योगिनः। किन्तु तथाऽन्यच्चाऽ-सनादिकमिति तथाशब्देन सूचनात् सङ्क्षेपभाष्ये एतदधिकरणतात्पर्यमप्युक्तं ज्ञातव्यम्।

सूत्रक्रमः

सूत्रार्थस्तु टीकायामेव स्पष्टः । आद्ये सम्भावनोक्तिः । द्वितीये तत्र विरोधपरिहारः । तृतीये चतुर्थे निश्चायकोक्तिः । पञ्चमे प्रतिबन्ध्युद्धार इति क्रमो द्रष्टव्यः ।

॥ इति आसनाधिकरणम् ॥ ६ ॥

॥ अथ प्रायणाधिकरणम् ॥ ७ ॥

सूत्रभाष्यम्

ॐ आप्रायणात्तत्रापि हि दृष्टम् ॐ ॥ ४.१.१२ ॥

यावन्मोक्षस्तावदुपासनादि कार्यम् ।

'स यो ह वै तद्भगवन्मनुष्येषु प्रायणान्तमोङ्कारमभिध्यायीत' (प्र.उ.५-१) इति हि श्रुतिः ॥

'सर्वदैनमुपासीत यावद्विमुक्तिर्मुक्ता अपि ह्येनमुपासते' इति सौपर्णश्रुतिः ॥

'श्रुणुयाद् यावदज्ञानं मतिर्यावदयुक्तता ।
ध्यानं च यावदीक्षा स्यान्नेक्षा क्वचन बाध्यते ॥
दृष्टतत्वस्य च ध्यानं यदा दृष्टिर्न विद्यते ।
भक्तिश्चानन्तकालीना परमे ब्रह्मणि स्फुटा ।
आ विमुक्तेर्विधिर्नित्यं स्वत एव ततः परम् ॥' इति ब्रह्माण्डे ॥ १२ ॥

॥ इति प्रायणाधिकरणम् ॥ ७ ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र भगवज्ज्ञानसाधनध्यानस्य प्रायणान्तत्वसमर्थनादस्ति शास्त्र-सङ्गतिः । अन्यथा ज्ञानिनां ध्यानफलाभावप्रसङ्गेन मुक्तौ तारतम्याभावप्रसङ्गात् समर्थनीयमेतत् । प्रकृतं ध्यानमेव विषयः । किं ज्ञानपर्यन्तमेवावश्यकमुत मुक्तिपर्यन्तमपीति सन्देहः । ज्ञानसाधनत्वं ज्ञानिनामपि तद्दर्शनं सन्देह-बीजम् ।

पूर्वपक्षः

ज्ञानपर्यन्तमेवावश्यकमिति पूर्वः पक्षः । दर्शनार्थमेव श्रवणादिविधानात्। ज्ञानार्थं विहितस्य मुक्तिपर्यन्तमनुष्ठाने कारणाभावात्। न च ज्ञानसाधनस्यापि ध्यानस्य मोक्षोपयोगित्वात् तावदावश्यकत्वमिति वाच्यम्। ज्ञानमात्रस्यैव मोक्षे सामर्थ्यात् । न चानन्दातिशयार्थं ध्याननियतिः । आनन्दातिशयार्थं श्रवणादिसाधनान्तरस्याऽपि कर्तुं शक्यतया तन्नियमायोगात् । ज्ञान एव ध्यानस्य प्राबल्यात् । न ह्येकत्र यस्य प्राधान्यं तस्य सर्वत्रापीति। अतो यावन्मोक्षं ध्यानस्य कर्तव्यत्वाभावाज्ज्ञानिनां शुकादीनां तद्व्यर्थमिति।

सिद्धान्तः

सिद्धान्तयत्सूत्रमुपन्यस्य व्याचष्टे- आ प्रायणादिति। मुमुक्षुणा मोक्षपर्यन्तं ध्यानमवश्यं कर्तव्यमेव। ध्यानं विनाऽपरोक्षज्ञानाभावेन तावज्ज्ञानपर्यन्तमावश्यकत्वादिति भावः। तथापि मुक्तिपर्यन्तं तदनुवृत्तिः कुत इत्यतो दृष्टं हीति सूचितश्रुतिं दर्शयति- **स इति**॥ एतदेतेषु। ॐकारो हरिः। कैमुत्येनापि ध्यानस्य मुक्तिपर्यन्तत्वं साधयन्नाह- **सर्वदेति**॥ ज्ञानात् पूर्वं श्रवणादियुतध्यानस्य कर्तव्यत्वाज्ज्ञानानन्तरं च सम्यग्ध्यानालाभे श्रवणादीत्यत उपासनादीत्यादिपदम्। उक्तं हि। 'भोक्तव्यकर्मण्यक्षीणे जपेन कथयाऽपि वा । वर्तयन्ति महात्मानस्तन्निष्ठास्तत्परायणाः' इति । ज्ञानपर्यन्तं श्रवणादियुक्तं ध्यानम्। ततः प्रायेण केवलं कर्तव्यमेवेत्यत्र स्मृतिं चाह- शृणुयादिति । नेक्षा क्वचन बाध्यत इति । कादाचित्क्यपि मोक्षसाधनं भवतीत्यर्थः। दृष्टतत्वस्य च ध्यानं निरवधिकम्। ज्ञानोत्तरमपि निरवधिकं ध्यानं किं विहितत्वात् क्रियतेऽन्यथा वा । नाद्यः। मोक्षविरोधात्। न द्वितीयः । करणानुपपत्तेरित्यत आह- **आविमुक्तेरिति** ॥ स्वत एव स्वभावेनेत्यर्थः । न च वाच्यं ज्ञानोत्तरध्यानस्य फलाभावादकर्तव्यत्व-

मिति। आनन्दातिशयफलत्वात्। न चोक्तदोषः। 'योगारूढस्य तस्यैव शमः कारणमुच्यते' इति वचनादानन्दवृद्धौ ध्यानस्यैव प्रधानसाधनत्वात्। अतो मोक्षपर्यन्तं ध्यानस्य कर्तव्यत्वेन ज्ञानिनामपि तद्विचित्रफलेन मुक्तौ तारतम्यसिद्धिरिति सिद्धम्॥ १२॥ अ-७॥

॥ इति प्रायणाधिकरणम्॥ ७॥

शेषतात्पर्यचन्द्रिका

॥ अथ प्रायणाधिकरणम्॥ ७॥

॥ ॐ आप्रायणात् तत्रापि हि दृष्टम् ॐ ॥ ४-१-१२ ॥

सङ्गतिः

ननु अविक्षेपाचलत्वादिप्रयोजनदर्शनाद् ध्याने आसनस्यावश्यापेक्षितत्वेऽपि मोक्षे ध्यानेन प्रयोजनादर्शनात् तत्र तन्त्रापेक्षितमिति नाऽप्रायणान्तत्वं ध्यानस्येति । यथा मनःप्रसादस्य देशकालादिना विनाऽपि सम्भवाद् ध्याने तदपेक्षाभावः तथा ध्यानेन विनाऽपि ज्ञानसामर्थ्येनैव मोक्षसम्भवात् तत्र तन्त्रापेक्षितमिति न तस्य प्रायणान्तत्वमिति वा शङ्कनाद् एवमासननियमेन कर्तव्यस्य ध्यानस्योत्तरावधिरधुना चिन्त्यत इति सङ्गतिः।

पूर्वपक्षः

तत्र ध्यानं न मोक्षपर्यन्तमपि कर्तव्यम्। तत्कृत्याभावात्। तथा वदन्निह प्रष्टव्यो जायते । किं ज्ञानस्वरूपनिर्वृत्त्यर्थं तदावश्यकमिति उत ज्ञानेऽतिशयाधानार्थम् अथवा मौक्तिकानन्दाभिवृद्ध्यर्थम् । नाऽद्यः । तेन मोक्षपर्यन्तमनुष्ठेयत्वसाधनस्य व्यधिकरणत्वात्। न हि यागस्वरूपनिर्वर्तकोऽवघातादिः स्वर्गपर्यन्तमनुष्ठीयते। न द्वितीयः। ज्ञानमात्रस्यैव मोक्षे समर्थत्वेन अनाधेयातिशयत्वात्। न तृतीयः। श्रवणमननाभ्यामपि तत्सम्भवात्। ध्यानस्य

ज्ञाने प्राधान्येऽप्यानन्दातिशयेऽपि प्राधान्यमित्यत्र नियामकाभावात्। चित्तशुद्धौ प्रधानस्यापि कर्मणो ज्ञाने तदभावदर्शनाच्च। अस्याः कल्पनाया ध्यानस्याऽप्रायणान्तत्वसिद्ध्युत्तरकालीनत्वाच्च। न च ज्ञानिनां शुकादीनामेव ध्यानानुष्ठानरूपाचारदर्शनाद् ध्यानफलं किञ्चिन्मोक्षेऽप्यङ्गीकर्तव्यमिति वाच्यम्। मुक्तानामिव तदाचारस्य व्यर्थत्वोपपत्तेः । अन्यथा श्रवणादेरप्याप्रायणान्तत्वप्रसङ्गोऽविशेषात्। विशेषो वा वक्तव्यः। तथाच ध्यानस्याऽप्रायणान्तत्वकल्पकाभावेन तन्निमित्तकमौक्तिकातिशयस्याप्यसिद्ध्या वृद्धिह्रासभात्त्वमित्यादिनोक्तं मुक्तावानन्दतारतम्यमयुक्तम्।

ध्यानस्याऽप्रायणान्तत्वमप्रामाणिकमेव तत्।
मुक्तौ ध्यानफलाभावात् तारतम्यं न युज्यते॥ इति पूर्वपक्षः।

सिद्धान्तः

सिद्धान्तस्तु-

सर्वदैनमुपासीत यावन्मुक्तीति वाक्यतः।
आप्रायणान्ततासिद्धेर्ध्यानं सफलमिष्यते॥
शृणुयाद्यावदज्ञानमिति ब्रह्माण्डवाक्यतः।
विशेषावगमादेव प्रतिबन्दी न युज्यते॥ इति।

शाङ्करभाष्योक्तमेतदधिकरणशरीरम्

अन्ये तु, आवृत्तिस्सर्वोपासनेष्वादर्तव्येति स्थितमाद्येऽधिकरणे । तत्र संशयः। कियन्तंचित्कालं प्रत्ययमावर्त्योपरमेद् उत यावज्जीवमावर्तयेदिति। तत्र कियन्तंचित्कालं प्रत्ययमभ्यस्योत्सृजेद् आवृत्तिविशिष्टस्योपासनशब्दार्थस्य कृतत्वादित्येवं प्राप्ते ब्रूमः। आ प्रायणादेवाऽवर्तयेत् प्रत्ययम्। अन्त्यप्रत्ययवशाद् अदृष्टफलप्राप्तेः। 'स यावत्क्रतुरयमस्माल्लोकात्प्रैति' (शां.भा.उ. श्रुतिः) इति प्रायणकालेऽपि प्रत्ययानुवृत्तिदर्शनादिति।

ते तु न समीक्षिताभिधायिनः। आवृत्त्यधिकरणे हि प्रत्ययानामवघातादिवद् दृष्टार्थत्वमुक्तम्। दर्शनपर्यवसानानि हि श्रवणादीन्यावर्त्यमानानि दृष्टार्थानि भवन्ति यथाऽवघातादीनि तण्डुलनिष्पत्तिपर्यवसानानीति तदधिकरणभाष्यम्। अत्र पुनरदृष्टफलप्राप्तिरुच्यत इति।

ननूपासनानि कानिचित् सम्यग्दर्शनार्थानि यथा तत्त्वमस्यादीनि। कानिचित् अतथाभूतानि प्रतीकोपासनादीनि यथा नाम ब्रह्मेत्येवमादीनि। तत्राऽऽद्येषु दृष्टार्थत्वम्। इतरेषु तद्वैपरीत्यमिति कथं विरोधः ? अत एवात्र भाष्ये तत्र यानि तावत् सम्यग्दर्शनार्थानि तान्यवघातादिवत् कार्यपर्यवसानानि। यानि पुनरभ्युदयफलानि तेष्वेषा चिन्तेति। मैवम्। मोक्षेतरफलान्युपासनानि ह्यभ्युदयफलान्युच्यन्ते। तानि किं स्वस्वविषयगोचरबुद्धिमुत्पादयन्ति न वा, आद्येऽपि तज्जनिता बुद्धिर्यदि प्रमा तदा पूर्वोक्तद्वैविध्यानुपपत्तिः। यदि न प्रमा तदाऽभ्युदयफलानुपत्तिः। न हि भ्रमेणाभ्युदयः क्वचिद् दृष्टः। स्वाप्नगजारोहादिज्ञानमपि न भ्रम इत्युक्तमेव। वेदविहितस्य ज्ञानस्य भ्रमत्वायोगाच्च। प्रतीकादौ ब्रह्मत्वारोपस्य माणवकादौ सिंहत्वाद्यारोपस्येव भ्रमत्वायोगात्। नहीयं शुक्तिकायां रजतधीरिव सिंहधीः येन माणवकत्वमभिभवेत्। किन्तु गौणी। तथेहोद्गीथादावादित्यादिदृष्टिर्गौणीति । युक्तं चैतत् । अन्यथोपासनावाक्यानामप्रमाण्यप्रसङ्गात्। तेषामतत्वावेदकत्वे सम्यग्दर्शनार्थोपासनावाक्यनामपि तत्प्रसङ्गात्। 'श्रोतव्यः' (बृ.उ. ४.५.६) इत्यादौ तव्यः 'विष्णुरुपांशु यष्टव्यः' इत्यादाविव विधिस्तुतिरूपार्थवादमात्रमिति दुराशा तु न्यायामृतादौ दूरीकृतैव । द्वितीये तदनुष्ठानानुपपत्तिः । अभ्युदयसाधनदेवताप्रसादादेस्तत्साक्षात्कारसाध्यत्वात् । तस्माद् उपासनाद्वैविध्यकल्पनमसाम्प्रदायिकम् । अस्तु वा द्वैविध्यम् । तथाऽप्यभ्युदयसाधनेषूपासनेष्वपि सम्यग्दर्शनार्थेष्विव यत्किञ्चित्कालमेवाऽवृत्तिरस्तु। नतु यावज्जीवम्। नियामकाभावात्।

नन्वस्ति नियामकम् । 'सोऽन्तवेलायामेतत् त्रयं प्रतिपद्येत' (शां.भा.उ.श्रुतिः) 'प्रयाणकाले मनसाचलेन' (भ.गी. ८.१०), 'यं यं वाऽपि स्मरन् भावं त्यजत्यन्ते कळेवरम् । तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥' (भ.गी. ८.६) इत्यादिवचनैः तत्तदुपायगोचरचरमशरीरोत्क्रान्तिकालीनानुस्मरणस्य यावज्जीवमुपासनावृत्तिं विनाऽयोगेन यावज्जीवमावृत्तिरावश्यकी । 'प्रत्ययास्त्वेते स्वरूपानुवृत्तिं मुक्त्वा किमन्यत् प्रायणकालभावि भावनाविज्ञानमपेक्षेरन्' इति भाष्योक्तेः । न चैवं सम्यग्ज्ञानार्थेषूपासनेषु सम्भवति । न हि सम्यग्दर्शने कार्ये निष्पन्ने प्रयत्नान्तरं किञ्चिच्छासितुं शक्यम् । अनियोज्यब्रह्मात्मत्वप्रतिपत्तेः शास्त्राविषयत्वादिति चेन्न । सम्यग्दर्शने निष्पन्ने प्रयत्नान्तरं न शासितुं शक्यं सम्यग्ज्ञानिनः कृतकृत्यत्वाद् उपासनावृत्त्यादिविधानं नोपपद्यत इति वा । ब्रह्मात्मैक्यप्रतिपत्त्यनन्तरमविद्यातत्कार्ययोः समूलमुन्मूलितत्वात् नियोज्यादिभेदशून्ये शास्त्राप्रवृत्तेरिति वा । नाऽद्यः । त्वन्मतेऽपि प्रारब्धकर्मणो नाशाभावेनोत्पन्नसम्यग्दर्शनस्यापि कृतकृत्यत्वाभावात् । अन्यथा क्षुद्बाधादिनिवृत्तये भिक्षाटनादौ प्रवृत्तिर्न स्यात् । 'कुर्वन्नेवेह कर्माणि' (ई.उ. श्लो. २) इति ज्ञानिनोऽपि कर्मविधानाच्च । यावज्जीवं यथेष्टं कर्म कुर्वतोऽपि न लेपोऽस्तीति तस्यार्थ इति तु प्रागेव निरस्तम् । अत एव न द्वितीयः । अविद्यातत्कार्ययोः समूलकाष्ठं विद्यमाने प्रारब्धकर्मणि निवृत्त्ययोगाच्च । अन्यथा तदैव तच्छरीरपातः जीवन्मुक्त्यवस्थाभावश्च स्यात् । तदर्थमविद्यालेशानुवृत्तौ तत एव नियोज्यादिसम्भवेन विधिगोचरत्वादिसम्भवाच्च ।

किञ्च 'सविज्ञानो भवति सविज्ञानमेवान्ववक्रामति' (बृ.उ. ४.४.२), 'यच्चित्तस्तेनैष प्राणमायाति' (प्र.उ. ३.१०), 'प्राणस्तेजसा युक्तः सहाऽत्मना यथासङ्कल्पितं लोकं नयति' (प्र.उ. ३.१०) इत्यादिश्रुतिभ्यः, तृणजलूकानिदर्शनाच्च कर्मणामन्त्यप्रत्ययमपेक्ष्यैव स्वर्गादिहेतुत्वं यथा कल्प्यते तथा 'स

यो ह वै तत्प्रायणान्तमोङ्कारमभिध्यायीत' (प्र.उ. ५.९) इत्यादिवचनैः सामान्यन्यायाच्च सम्यग्दर्शनस्याप्यन्त्यप्रत्ययमपेक्ष्यैव स्वफलहेतुत्वं कल्प्यते । उक्तञ्च भामत्यामपि- ' ''सविज्ञानो भवति'' (बृ.उ. ४.४.२) इत्यादिश्रुतेर्यत्र स्वर्गादिफलानामपि कर्मणां प्रायणकाले स्वर्गादिविज्ञानापेक्षकत्वं तत्र कैव कथाऽतीन्द्रियफलानामुपासनानाम्' इति । सम्यग्दर्शनसाधनोपासना नातीन्द्रियफला इति तु न युक्तम् । 'यस्य प्रसादात् परमार्तिरूपादस्मात् संसारान्मुच्यते नापरेण' इत्यादिश्रुत्या प्रसादरूपातीन्द्रियफलावगमात् । प्रसादस्यापि दृष्टत्वे स्वर्गफलेषु कर्मस्वभ्युदयफलोपासनेष्वपि यावदान्तरालिकं दृष्टमेव स्यात् । मोक्षतदितरफलोपासनयोः मात्रयाऽपि भेदादर्शनाच्च । प्रतीकाद्युपासनानामपि ब्रह्मोपासनत्वे सम्यग्दर्शनसाधनत्वे चाविशिष्टे तेषामेवाऽप्रायणान्तत्वसिद्धान्तायोगाच्च । अन्यथा ब्रह्ममीमांसायां तद्विचारानुपपत्तेः । पूर्वतन्त्रे शाक्यादिस्मृतीनामिवोत्तरतन्त्रे च त्वन्मतेऽङ्गदेवतोपासनानामिव प्रासङ्गिकत्वात् तद्विचारो न विरुद्ध इति चेन्न । सर्वत्र प्रतीकोपासनाविचारस्यैवेह व्याख्यातत्वेन सम्यग्दर्शनार्थोपासनावार्ताया अप्यदर्शनात् । तदिदं सार्थादपि तस्करा बहवः इत्याभाणकमप्यतिवर्तते ।

किञ्च सम्यग्दर्शनार्थोपासनं सविषयं निर्विषयं वा । नाऽद्यः । निर्धर्मकस्य ब्रह्मण उपासनाविषयत्वायोगात् । न च ज्ञानात्मकं ब्रह्म त्वन्मते वृत्तिव्याप्यम् । दृश्यत्वस्य व्यभिचारापातात् । सगुणब्रह्मण उपासनाविषयत्वे तस्य मिथ्यात्वेन तद्विषयोपासनायाः सम्यग्दर्शनसाधनत्वायोगात् । मणिप्रभायां मणिबुद्धेरपि न सम्यग्दर्शनसाधनत्वम् । मणिसाक्षात्कारस्य प्रमाणजन्यत्वाभावेन सम्यक्त्वासिद्धेः । सिद्धौ वा यज्जातीयानन्तरमेव नियमेन यदुत्पत्तिस्तदेव हि तस्य साधनमुच्यते । अन्यथा यादृच्छिकसंवादिनि वह्निज्ञाने लिङ्गविभ्रमस्य करणत्वापत्त्या लक्षणस्यातिव्याप्तिः स्यात् । इह च मणिबुद्धिं विनाऽपि

मणिप्रभायां मणिसाक्षात्कारदर्शनान्न साधनत्वम् । प्रतीकाद्युपासनस्याप्युक्तन्यायेन सम्यग्दर्शनसाधनत्वापातश्च। न द्वितीयः। उपासनात्वव्याहतेः। उपासना हि ज्ञानम् । न हि ज्ञेयविहीनं ज्ञानमस्ति । तस्मात् त्वदभिमतसम्यग्दर्शनसाधनमुपासनं तृतीयपञ्चमपादविचार्यं वा पञ्चमाध्यायविचार्यं वा स्यादिति नेह तद्व्यवहर्तव्यमित्यलं दुर्बलहिंसया।

एतेनाऽप्रायणात् प्रत्ययमावर्तयेत् 'स यावत्क्रतुरस्माल्लोकात् प्रैति' (शां.भा.उ.श्रुतिः) इति प्रायणकालेऽपि प्रत्ययावर्तनं दृष्टं यत इति सूत्रयोजना च निरस्ता। आप्रायणपदस्वारस्येनायतिघटितश्रुतिग्राहकतया सूत्रव्याख्यानसम्भवे धात्वन्तरघटितश्रुतिग्राहकतया व्याख्यानायोगाच्च।

रामानुजाभिमतसूत्रार्थनिरासः

एतेनाऽप्रायणादहरहरुपासनं कार्यम् । 'स खल्वेवं वर्तयन् यावदायुषम्' (छा.उ. ८-१५-१) इति दर्शनात् इति केषाञ्चिद् व्याख्याऽपि अनादरणीयैव।

नानाप्रवृत्त्याख्यपूर्वपक्षन्यायविवरणयोजनम्

टीकाक्षरार्थस्तु- नानाप्रवृत्तिरित्युक्तन्यायं नानाशब्दोऽन्यपर्यायः प्रवृत्तिशब्दः प्रकृतिपर इत्यभिप्रेत्य तत्साध्यप्रदर्शनेन विवृण्वत्

'न चान्यस्यापि साधनस्य कर्तुं शक्यत्वात् न यावन्मुक्ति ध्यानं कार्यमिति वाच्यम्'

इति वाक्यं व्याचष्टे- **ज्ञानपर्यन्तमेवाऽवश्यकमिति पूर्वपक्ष इति** ॥ अनेन न यावन्मुक्ति ध्यानं कार्यमित्येतदुक्तार्थं भवति । मुक्त्यनन्तरमपि ध्यानस्य कर्तव्यत्वेनापि ज्ञानात् पूर्वमकर्तव्यत्वेनापि विवरणपर्यवसानं मा भूदित्येतदर्थं ज्ञानपर्यन्तमेवाऽवश्यकमिति तात्पर्योक्तिरिति द्रष्टव्यम् । पूर्वार्धमत्र साक्षान्न सङ्गतमित्यतो मध्येऽध्याहार्यमाह- **दर्शनार्थमेवेति** ॥ ज्ञानोदयानन्तरमपि

मोक्षपर्यन्तं किं ध्यानं मोक्षार्थं विहितत्वात् कर्तव्यमुच्यत उत ज्ञानमात्रस्य मोक्षजनने सामर्थ्याभावात्, किं वा मोक्षे फलान्तरसिद्ध्यर्थमिति त्रेधा विकल्प्याऽद्यद्वयं बहिरेव निराकृत्य तृतीयनिराकरणाय पूर्वार्धमवतारयति- **न चाऽनन्दातिशयार्थमिति**॥ एवमवतार्य व्याचष्टे- **आनन्दातिशयार्थमिति**॥ अनेनाऽनन्दातिशयार्थमिति तन्नियमायोगाद् इति चान्यस्यापि साधनस्य कर्तुं शक्यत्वादिति पूर्वार्धस्याऽद्यन्तयोर्यथाक्रममध्याहर्तव्यमिति सूचितं भवति।

विशेषकार्याख्यसिद्धान्तन्यायविवरणयोजनम्

विशेषकार्यमित्युक्तन्यायं तदनुपपत्तिलक्षकं मत्वा तत्सम्बन्धिप्रदर्शनेन विवृण्वत्

'ध्यानं विनाऽपरोक्षज्ञानाख्यविशेषकार्यानुपपत्तेः'

इति वाक्यं व्याचष्टे- **ध्यानं विनेति** ॥ अनेन न यावन्मुक्ति ध्यानं कार्यमिति कोऽर्थः ? किं ध्यानं कदाऽपि न कर्तव्यमित्यर्थः । उत ज्ञानोदयानन्तरं न कर्तव्यमित्यर्थ इति द्वेधा विकल्प्याऽद्यः पक्षो विवरणे निरस्तः ।

यद्यप्यानन्दवैचित्र्यादिविशेषकार्यस्याप्यन्यथोपपत्त्या ध्यानं नाऽवश्यकमिति विवरणोपक्षिप्तपूर्वपक्ष एव सिद्धान्तविवरणेन निरसनीयः । तथाऽपि सूत्राक्षरार्थकथनेन भाष्य एव तन्निरासः प्रत्येष्यत इति मत्वा तत्रापि साक्षात्कारानन्तरमपि ध्यानं कर्तव्यमिति सूत्रमनुरुध्य साक्षात्कारपर्यन्तं तस्य कर्तव्यताऽत्र साध्यत इति ध्येयम् । द्वितीयनिराकरणाय सूत्रयोजनेन[1] भाष्यमवतारयति- **तथाऽपीति** ॥ यद्वाऽपरोक्षज्ञानेन प्राप्ये मोक्षे आनन्दवैचित्र्यात्मकविशेषकार्यानुपपत्तेराप्रायणं ध्यानं कार्यमिति विवरणं भाष्येण सह व्याख्येयमित्याह- **तथाऽपीति** ॥ 'आप्रायणं तमभिध्यायीत' इति स्पष्टं ज्ञानानन्तरं मोक्षपर्यन्तं ध्यानविधानात्। नहि वचनस्यातिभारोऽस्तीति भावः।

---

१. सूत्रं योजयन्नेव इति पाठान्तरम्

नन्वत्र विवरणानुसारात् ध्यानमात्रस्यैवाप्रायणान्तत्वसाधनं कर्तव्यं प्रतीयते। युक्तश्चैतत् 'प्रायणान्तमोङ्कारमभिध्यायीत' (प्र.उ. ५.१) इति सूत्रसूचितश्रुतौ ध्यानस्यैव विधानात् तत्कथं यावन्मोक्षस्तावदुपासनादि कार्यमिति भाष्ये सामान्यशब्द आदिशब्दश्च ? प्रत्युत 'शृणुयाद्यावदज्ञानम्' (ब्र.सू.भा.उ. ब्रह्माण्डवचनम्) इति श्रवणमननयोः प्रायणान्तत्वनिषेधाद् इत्यतो भाष्याभिप्रायमाह- **ज्ञानात्पूर्वमिति** ॥ सम्यग्ध्यानलाभे तु ध्यानमेव कर्तव्यम्। न तु श्रवणादीत्यर्थः । ज्ञानानन्तरं सम्यग्ध्यानालाभः कदाचिद्भवति चेत् तदा भगवत्कथाश्रवणादिरित्यत्र प्रमाणं वक्तुमाह- **उक्तं हीति** ॥ नन्वेतावता प्रारब्धकर्मप्रतिबन्धे श्रवणादि कार्यमित्यस्य प्राप्तावपि ज्ञानपर्यन्तं श्रवणादियुक्तं ध्यानं कार्यं, ततः प्रायेण केवलमेव ध्यानं मुक्तिपर्यन्तं कार्यमित्यस्याप्राप्तिरेवेत्यत आह - **ज्ञानपर्यन्तमिति** ॥ प्रायेणेति प्रारब्धकर्मप्रतिबन्धदशाव्यावृत्त्यर्थमुक्तम्। 'प्रायणान्तमोङ्कारमभिध्यायीत' (प्र.उ. ५.१) इति ध्यान-मात्रस्य श्रवणात् केवलध्यानकर्तव्यता श्रुत्या प्राप्तेत्यतः स्मृतिं चाऽहेत्युक्तम्। ईक्षायां बाधाभावः किंरूप इत्यतो दर्शयति- **कादाचित्क्यपि मोक्षसाधनं भवतीत्यर्थ इति** ॥ दृष्टतत्त्वस्य च ध्यानमित्यत्र न बाध्यत इति क्रियानुषङ्गवारणाय 'आविमुक्तेः विधिर्नित्यं स्वत एव ततः परम्' (ब्र.सू.भा.उ. ब्रह्माण्डवचनम्) इति वाक्यशेषानुगुण्येनाऽध्याहार्यं दर्शयति- **निरवधिकमिति** ॥ नन्वेवं 'प्रायणान्तमोङ्कारमभिध्यायीत' (प्र.उ. ५.१) इति श्रुतौ सूत्रे चावध्युक्तेः कथं ध्यानं निरवधिकमित्यतो वाक्यशेषमवतारयति- **ज्ञानोत्तरमपीति** ॥ मोक्षे विहितत्वेनाननुष्ठानात् न मोक्षत्वव्याघातः । न वा प्रायणान्तश्रुतिविरोधः । स्वभावतः तत्राप्यनुष्ठानात् निरवधिकत्वं च युज्यत इति भावः ।

ततश्चायं ब्रह्माण्डवचनस्यार्थः । यावदज्ञानम् अज्ञाननाशपर्यन्तं श्रवणं कर्तव्यम्। यावदयुक्तता विपर्ययनाशपर्यन्तं मतिः मननं कर्तव्यम्। यावदीक्षा

ज्ञानं स्यात् तावद् ध्यानं च कर्तव्यम् । आहत्य श्रवणादित्रयं ज्ञानात् पूर्वं कर्तव्यम्। न तावता श्रवणादिसाम्यं ध्यानस्य। दृष्टतत्त्वस्य च ध्यानं निरवधिकं यतः । अपरोक्षज्ञानानन्तरमपि अनन्तकालीनमेव ध्यानं प्रवर्तते । अतो ध्यानस्याऽधिक्यं युक्तम्। ज्ञानेनैव मोक्षसिद्धेः दृष्टतत्वस्यपि ध्यानं कुतः प्रवर्तत इत्यत्रोच्यते- **नेक्षा क्वच न बाध्यत इति** ॥ यद्यपि तथाऽपीति ग्राह्यम्। यद्यपि ज्ञानं क्वापि न बाध्यते । मोक्षाजनकं न भवति । मोक्षजननसामर्थ्यवदेवेति यावत्। तथाऽपि मोक्षपर्यन्तं ध्यानं कर्तव्यमिति विधिसद्भावाद् ध्यानं प्रवर्तते। ततः परं तु स्वभावत एवेत्युत्तरेणास्य सम्बन्धः। दृष्टतत्त्वस्य च ध्यानं निरवधिकमित्यस्य क्वचिदपवादोऽस्तीति सूचयति- **यदा दृष्टिर्न विद्यत इति** ॥ भगवद्दर्शनौत्सुक्यान्मानसावलोकनं ध्यानं न प्रवर्तत इति भावः। न केवलं ध्यानमेव निरवधिकमिति प्रसङ्गादुच्यते- **भक्तिश्चेति** ॥ तर्हि ध्यानस्य को विशेष इति चेन्न । भक्तेः साधनेषूत्तमत्वेन ततोऽतिशयाभावस्यादोषत्वात् । ध्यानभक्त्योरेकदेशैकदेशिभावापन्नत्वेनात्यन्तभेदाभावाच्च। यद्वाऽनन्तकालीना भक्तिः दृष्टिश्च यदा न विद्यते तदा ध्यानं निरवधिकमिति योज्यमिति।

यद्यप्यानन्दातिशयस्य ध्यानान्यश्रवणादिनैव सम्भवाद् ध्यानाङ्गीकारो व्यर्थ इति विवरणोक्तपूर्वपक्षनिरासकतयाऽपीदं विवरणं सूत्रभाष्यव्याख्यानव्याजेन सूचनया व्याख्यातम् । तथाऽपि स्पष्टं व्याख्यातुमवतारयति- **न च वाच्यमिति** ॥ **न चोक्तदोष इति** ॥ अन्यस्यापि साधनस्य कर्तुं शक्यत्वाद् इत्युक्तदोष इत्यर्थः। योगारूढस्यापरोक्षज्ञानिनः मुक्तावानन्दातिशयस्य शमो ध्यानमेव कारणमुच्यते वेदादाविति वचनस्यार्थः।

सङ्क्षेपभाष्येण एतदधिकरणार्थकथनम्

यद्यपि ब्रह्मत्वेनोपासनेनापरोक्षतां याति । तथाऽप्यानन्दातिशयार्थं

विष्णुर्ब्रह्मेत्येवं ध्यानं नित्यं मुक्तिपर्यन्तं कार्यमेवेति योजनया सङ्क्षेपभाष्यमपि व्याख्येयम्।

॥ इति प्रायणाधिकरणम्॥ ७॥

॥ अथ तदधिगमाधिकरणम्॥ ८॥

सूत्रभाष्यम्

ॐ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॐ ॥ ४.१.१३ ॥

ब्रह्मदर्शन उत्तराघस्याश्लेषः पूर्वस्य विनाशश्च।

'तद्यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते(लिप्यते)' (छा.उ.४.१४-३)।

'तद्यथेषीकातूलमग्नौ प्रोतं प्रदूये(य)तैवं हैवास्य सर्वे पाप्मानः प्रदूयन्त' (छा.उ.५.२४.३) इति तद्व्यपदेशात्॥ १३॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र प्रासङ्गिकं समाप्य भगवज्ज्ञानेन कर्मक्षयलक्षणफलसिद्धिसमर्थनादस्ति शास्त्रादिसङ्गतिः। अन्यथा मोक्षाभावप्रसङ्गेनोक्तव्याहतेः समर्थनीयमेतत्। प्रकृतं ज्ञानमेव विषयः। मोक्षं साधयति न वेति सन्देहः। उभयविधार्थदृष्टिः सन्देहबीजम्।

पूर्वपक्षः

न ज्ञानेन मोक्ष इति पूर्वः पक्षः। प्रागापादितकर्मणां भावात्। न च तानि ज्ञानजन्मनि भुज्यन्ते। बहुशरीरफलकर्मणां भावात्। न च तानि क्रमेण भुज्यन्त इति वाच्यम्। तथा सति बहुकालान्तरितज्ञानस्य जीर्णबीजवदमोक्षहेतुत्वापातात्। न च युगपत्कायव्यूहेन भोगसम्भवः। अनियतदेशकाल-

विपाकत्वात्। न च योगप्रभावेन तादृशानामपि भोगः। तथा सति भोगस्याप्यभावप्रसङ्गात्। तद्भोगकाले च पुनः कर्मान्तरसम्भवेनासमाप्तेश्च। न च ज्ञानी न करोति। 'न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्' इत्यादिविरोधात्। न च वाच्यं ज्ञानेनैव प्राचीनकर्मणां क्षयः पश्चात्तनानामलेप इति। 'नाभुक्तं क्षीयते कर्म' इति स्मृतिविरोधात्। न च प्रायश्चित्तेनेव ज्ञानेन कर्मक्षय इति। विप्रतिपत्तेः। 'ब्रह्महा द्वादशाब्दं व्रतं चरेत्' इत्यादेर्दग्धगेहेष्टिविधिवदुपपत्तेः। अस्तु वा प्रायश्चित्तेन कर्मक्षयो विशेषप्रमाणबलात्। न चात्र तथा प्रमाणमस्ति येन स्मृतिबाधः स्यात्। किञ्च ज्ञानेनैव कर्मक्षये ज्ञानोदयानन्तरं मोक्षः स्यात्। अथ न ज्ञानान्तरमेव मोक्षस्तर्हि कर्मक्षय एव न प्राप्नोति। निष्कारणावस्थानायोगात्। न च वक्तव्यमुत्पन्नं ज्ञानं न तदैव कर्म क्षिणोतीति। तथा सति कदापि कर्मक्षयाभावप्राप्तेः। न हि ज्ञानस्य विरम्य व्यापारः सम्भवति। अतो ज्ञानेन मोक्षासिद्धेरुक्तमयुक्तमिति।

सिद्धान्तः

सिद्धान्तयत्सूत्रं पठित्वा व्याचष्टे- **तदिति**॥ सम्भवत्येव ज्ञानेन मोक्षः। ब्रह्मदृष्टिरिति प्रकृतब्रह्माधिगमादेव पूर्वपापविनाशादुत्तरस्याश्लेषाच्च। 'नाभुक्तं क्षीयते कर्म' इति स्मृतिविरोध इति चेन्न। यथा खलु प्रायश्चित्तविधिबलादेतत्स्मृतेरकृतप्रायश्चित्तविषयत्वं कल्प्यते तथाऽज्ञविषयत्वस्यापि सम्भवात्। न चात्र बाधकाभावः। 'तद्यथा' इति श्रुतिसद्भावादेवेति भावः। यदप्युक्तं प्रायश्चित्तविधिर्दग्धगेहेष्टिविधिवदतत्परिहारार्थ इति तन्न। प्रयोजनान्तराभावेन तद्वैयर्थ्यप्रसङ्गात्। दग्धगेहपदेनाग्निनाशनिमित्तप्रत्यवायवत उपलक्षणात्॥ १३॥

सूत्रभाष्यम्

ॐ इतरस्याप्येवमसंश्लेषः पाते तु ॐ॥ ४.१.१४॥

पुण्यस्याप्येवमसंश्लेषः पाते। तुशब्दोऽनुत्थानवाची।

'यथाऽश्लेषो विनाशश्च मुक्तस्य तु विकर्मणः। एवं सुकर्मणश्चापि पततस्तमसि ध्रुवम्' इति चाऽग्नेये॥ १४॥

तत्त्वप्रकाशिका

एवं ब्रह्मज्ञानिनो मुक्तिसिद्ध्यर्थं ज्ञानादेवाघविनाशाश्लेषावुक्त्वा तत्समानन्यायत्वाद् भगवद्वेषिपुण्यस्यापि मिथ्याज्ञानादेव विनाशाश्लेषौ तमःसिद्ध्यर्थं वदत्सूत्रमुपन्यस्य व्याचष्टे- इतरस्यापीति। भगवद्वेषिणः पाते प्रत्यासन्ने यथा ज्ञानिपापस्यैवं पुण्यस्याश्लेषो विनाशश्च भवतीति भावः। पातार्थमिति तादर्थ्ये वा सप्तमी। पाते प्राप्तेऽपि तदनुभवानन्तरं पुण्यभोगसम्भवात् किं तदश्लेषादिनेत्यत आह- तुशब्द इति। अनुत्थानपाते प्रत्यासन्ने तदर्थमावश्यकावेव भगवद्विषां पुण्याऽश्लेषविनाशाविति भावः। सूत्रार्थे स्मृतिं चाऽह- यथेति॥ १४॥

सूत्रभाष्यम्

ॐ अनारब्धकार्ये एव तु पूर्वे तदवधेः ॐ॥ ४.१.१५॥

अनारब्धकार्ये एव पूर्वे पुण्यपापे विनश्यतः।

'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्यते' (छा.उ.६-१४-२) इति तदवधेः।

तुशब्दः स्मृतिद्योतकः।

'यदनारब्धपापं स्यात् तद्विनश्यति निश्चयात्।
पश्यतो ब्रह्म निर्द्वन्द्वं हीनं च ब्रह्म पश्यतः।

द्विषतो वा भवेत् पुण्यनाशो नास्त्यत्र संशयः ॥
तस्याप्यारब्धकार्यस्य न विनाशोऽस्ति कुत्रचित् ।
आरब्धयोश्च नाशः स्यादल्पयोः पुण्यपापयोः ॥'

इति नारायणतन्त्रे ॥ १५ ॥

तत्त्वप्रकाशिका

नन्वेवं यदि ब्रह्मज्ञानिद्वेषिणोर्ज्ञानादिनैव पापपुण्यक्षये ज्ञानाद्युदय एव मोक्षादिप्रसङ्ग इत्याशङ्कां परिहरत्सूत्रं पठित्वा व्याचष्टे- **अनारब्धेति** ॥ नास्माभिः सर्वपापादिक्षयो ज्ञानादिनोच्यते येन तदैव मुक्त्यादिप्रसङ्गः किन्तु यस्य पापस्य कार्यं दुःखं भोक्तुमनारब्धं तस्यैव ज्ञानेन विनाशो यस्य च पुण्यस्य कार्यं सुखं न भोक्तुमनारब्धं तस्यैव मिथ्याज्ञानेन नाश इति भावः । ज्ञानानन्तरं प्रारब्धप्रतिबन्धकसद्भावः कुत इत्यत आह- **तस्येति** ॥ अत्र यावत्प्रतिबन्धेन न विमोक्षेत तावदेव ज्ञानिनो मोक्षाय चिरमिति मोक्षस्य प्रतिबन्धनिवृत्त्यवधित्वश्रवणाज्ज्ञानोत्तरमपि कर्मसद्भावो ज्ञायत इति भावः । तथापि प्रारब्धकर्मसद्भावोऽत्र स्फुटं न प्रतीयत इत्यत आह- **तुशब्द इति** ॥ चार्थस्तुशब्द इत्युक्तं भवति । काऽसौ स्मृतिरिति तामुदाहरति- **यदिति** ॥ एतेन नाभुक्तमिति स्मृतिः प्रारब्धविषयेत्यपि लभ्यते ॥ १५ ॥

सूत्रभाष्यम्

ॐ अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॐ ॥ ४.१.१६ ॥

अग्निहोत्राद्यपि तु मोक्षेऽनुभवायैव । तुशब्दाद् ब्रह्मदर्शनवतः ।

'स एनमविदितो न भुनक्ति यथा वेदो वाऽननूक्तोऽन्यद्वा कर्माकृतं यदि ह वा अप्यनेवंविन्महत्पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयत एवाऽऽत्मानमेव

लोकमुपासीत स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयतेऽस्माद्ध्येवाऽत्मनो यद्यत् कामयते तत्तत् सृजते' (बृ.उ.३-४-१५) इति तद्दर्शनात् ॥ १६ ॥

तत्त्वप्रकाशिका

ननु ज्ञानिकृतपुण्यस्य पूर्वोत्तरस्य विनाशाश्लेषौ विद्येते न वा । आद्येऽघशब्दवैयर्थ्यं द्वितीये मोक्षासिद्धिः । पुण्यस्यापि बन्धकत्वादित्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे- **अग्नीति** ॥ किं पूर्वोत्तरपुण्यस्याकाम्यस्य नाशाश्लेषौ विकल्प्येते उत काम्यस्य । आद्ये न नाशाश्लेषाविति ब्रूमः । न च तावता बन्धानिवृत्तिः । पूर्वकृताग्निहोत्राद्यकाम्यं कर्म तदधिगमाख्यकार्याय भवत्युत्तरकालकृतं च ज्ञानकार्यमोक्षातिशयानुभवाय भवतीत्युभयस्यापि मोक्षानुप्रवेशितत्वादिति भावः । पूर्वं ज्ञानिद्वेषिणोरनुवृत्तत्वादत्राप्युभयोरेतदुच्यत इति शङ्का मा भूदिति भावेनाऽह- **तुशब्दादिति** ॥ इति तमन्यस्माद्विशिनष्टीति शेषः । ननु ब्रह्मदर्शिकृतस्यैव पूर्वोत्तरपुण्यस्य मोक्षानुप्रवेशे नाबन्धकत्वं कुत इत्यत आह- **स इति** ॥ अत्र 'स एनम्' इत्यादिनाऽज्ञकृतकर्मणोऽल्पफलत्वमुक्त्वा 'स य' इति ज्ञानिनः पूर्वोत्तरपुण्यस्योक्तरीत्या मोक्षानुप्रवेश उच्यते । यो जिज्ञासुरुपास्ते तस्य पुण्यं ज्ञानद्वारेणाक्षयमोक्षफलदं भवतीत्ति तथा य उपास्ते जानीते तस्य पुण्यमक्षयमोक्षातिशयाय भवतीति । एतच्च कर्माकाम्यमेव । काम्यस्य स्वल्पफलप्रदत्वात् ॥ १६ ॥

सूत्रभाष्यम्

ॐ अतोऽन्यदपीत्येकेषामुभयोः ॐ ॥ ४.१.१७ ॥

मुक्तावनुभवकारणाद्यन्यत् (तत्)पुण्यमपि विनश्यति, अप्रारब्धमनभीष्टं च। तथा ह्येकेषां पाठ उभयोस्त्यागेन-

'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्' (शाट्यायनशाखा) इति।

'अनभीष्टमनारब्धं पुण्यमप्यस्य नश्यति।
किमु पापं परब्रह्मज्ञानिनो नात्र संशयः॥' इति पाद्मे॥ १७॥

तत्त्वप्रकाशिका

द्वितीयपक्षोत्तरत्वेन सूत्रं पठित्वा व्याचष्टे- **अत इति** ॥ यदकाम्यपुण्यमतोऽन्यत्पूर्वोत्तरकाम्यपुण्यं तदपि नाशाश्लेषौ प्राप्नोति। तत्राप्यस्ति विशेषः। पूर्वतनं काम्यपुण्यं द्विविधं प्रारब्धमप्रारब्धं च। तत्र प्रारब्धं न नश्यति। अप्रारब्धं च द्विविधम्। इष्टमनिष्टं च। तत्रेष्टमपि न नश्यति। अनिष्टमेव नश्यति। तथोत्तरकालीनमपि द्विविधम्। इष्टमनिष्टं च। तत्रेष्टस्य संश्लेषोऽनिष्टस्याऽश्लेष इति भावः। कुत एतदित्यत आह- **तथा हीति** ॥ अत्रापि साधुकृत्याशब्देन काम्यमप्रारब्धमनिष्टं पुण्यमुच्यते। अकाम्यस्य विनियुक्तत्वात् प्रारब्धस्य भोक्तव्यत्वात्। इष्टनाशस्यापुरुषार्थत्वात्। तथाप्ययं विशेषोऽत्र स्फुटं न प्रतीयतेऽत आह- **अनभीष्टमिति** ॥ १७॥

सूत्रभाष्यम्

ॐ यदेव विद्ययेति हि ॐ ॥ ४.१.१८ ॥

ब्रह्मदर्शिकृतमल्पमपि पुण्यं महत्तममनन्तं च भवति।

'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' (छा.उ. १-१-१०) इति श्रुतेः।

'न ह्यस्य कर्म क्षीयते' (बृ.उ.३-४-१५) इति च।

'अल्पमात्रः कृतो धर्मो भवेज्ज्ञानवतो महान्।
महानपि कृतो धर्मो ह्यज्ञानां निष्फलो भवेत्॥'

इति च भारते॥ १८॥

तत्त्वप्रकाशिका

कथं ज्ञानिकृतोत्तरकालीनाकाम्यपुण्यस्य मोक्षानुप्रवेशः कर्मणो नाशशिरस्काल्पफलत्वादित्याशङ्कां परिहरत्सूत्रं पठित्वा व्याचष्टे-**यदेवेति** ॥ यद्यप्यज्ञकर्मणो नाशशिरस्काल्पफलत्वं तथाऽपि ज्ञानिकृताकाम्यकर्मणो महानन्तफलत्वाद्युक्तस्तस्य मोक्षानुप्रवेश इति भावः। कुत एतदित्यत उक्तार्थे क्रमेण श्रुतिस्मृती दर्शयति- **यदेवेति** ॥ एतत्सूत्रत्रयन्यायो द्वेषिपुण्ये पापे चानुवर्तितव्यः। तत्पूर्वपुण्यस्याप्रारब्धस्य विनाश उत्तरस्याश्लेष उक्तः। तत्रानिष्टं चेन्न नश्यतीत्यादि ग्राह्यम्। तेषामपि किञ्चित्पुण्यसंश्लेषदर्शनात् पापस्य तु पूर्वकृतस्य कियतश्चिद् द्वेषाभिवृद्धिहेतुत्वेनोत्तरस्य तु साक्षात् तमोऽनुप्रवेश इति॥ १८॥

सूत्रभाष्यम्

ॐ भोगेन त्वितरे क्षपयित्वाऽथ सम्पत्स्यते ॐ ॥४.१.१९॥

आरब्धपुण्यपापे भोगेन क्षपयित्वा ब्रह्म सम्पत्स्यते। अथेति नियमसूचकः।

'आरब्धपुण्यपापस्य भोगेन क्षपणादनु।
प्राप्नोत्येव तमो घोरं ब्रह्म वा नात्र संशयः॥

ब्रह्मणां शतकालात्तु पूर्वमारब्धसङ्क्षयः।
नियमेन भवेन्नात्र कार्या काचिद्विचारणा॥' इति च नारायणतन्त्रे॥१९॥

॥ इति तदधिगमाधिकरणम्॥ ८॥

॥ ॐ श्रीमदानन्दतीर्थभगवत्पादविरचिते श्रीमद्ब्रह्मसूत्रभाष्ये चतुर्थाध्यायस्य प्रथमः पादः ॥ ४ ॥ १ ॥

तत्त्वप्रकाशिका

तथापि न ब्रह्मज्ञानिविद्वेषिणोर्मुक्तितमसी सिद्ध्यतः । उभयोरपि प्रत्येकं प्रारब्धपुण्यपापसद्भावादित्याशङ्कां परिहरत्सूत्रं पठित्वा व्याचष्टे- **भोगेनेति॥** न प्रारब्धकर्मसद्भावेन मोक्षाभावः। प्रारब्धं भोगेन क्षपयित्वा मोक्षादिप्राप्तिसम्भवादिति भावः। ज्ञानिनः प्रारब्धभोगे विशेषसूचकस्तु-शब्दः। यदुक्तमुपमर्दं चेति। यथा ज्ञानाद्यनन्तरमपि न मोक्षादिनियमस्तथा कर्मक्षयानन्तरमपीति शङ्का मा भूदिति भावेनाह- **अथेति॥** शब्द इति शेषः। कुतो नियम इत्यत आह- **आरब्धेति ॥** आरब्धभोगस्य निरवधिकत्वे ब्रह्मादिप्राप्त्यनुपपत्तिरिति तत्राऽह- **ब्रह्मणामिति ॥** ब्रह्मणां शतस्य यः कालस्तत्समाप्तेः पूर्वमेवेत्यर्थः। न च वाच्यं पुनःपुनरिष्टकाम्यपुण्या-पादनादमुक्तिरिति। 'प्रजहाति यदा कामान्' इत्यादेस्तदापादनस्य कादाचित्कत्वात्। अतो ज्ञानेन क्षीणकर्मणां मोक्षसम्भवादुक्तं युक्तमिति सिद्धम्॥ १९॥ अ.८॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्ब्रह्मसूत्रभाष्यस्य टीकायां श्रीमज्जयतीर्थमुनिविरचितायां तत्वप्रकाशिकायां चतुर्थाध्यायस्य प्रथमः पादः ॥

शेषतात्पर्यचन्द्रिका

॥ इति तदधिगमाधिकरणम्॥ ८॥

'ॐ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॐ' ॥ ४-१-१३ ॥

सङ्गत्यादि

यदर्थं श्रवणाद्यनुष्ठानं सेतिकर्तव्यताकमुक्तं तदधुना चिन्त्यते। दृष्टतत्त्वस्य च ध्यानं निरवधिकमित्यादिब्रह्माण्डवचनबलात् मुक्तिपर्यन्तं ध्यानं कर्तव्यम् अत एव चाऽनन्दाभिवृद्धिलक्षणं तत्फलं चाङ्गीकर्तव्यमिति यथोच्यते तथा 'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि' (ग.पु., प्रे.कां. १-४६) इति वचनात् कर्मणां सर्वथा भोक्तव्यत्वे सिद्धे 'न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्' (भ.गी. ३.५) इत्यादिवचनेन बहूनां कर्मणां पुनरार्जनस्य सिद्धेः 'कर्मणा बध्यते जन्तुः' (गी.भा.उ.स्मृतिः २.१) इत्यादिना कर्मणां बन्धकत्वसिद्धेश्च न ज्ञानकर्म-क्षयादिरूपमोक्षयोः कार्यकारणभावो युक्त इत्युत्थानात् सङ्गतिः।

ज्ञानपादे प्रकृतं ज्ञानं विषयः। मोक्षं साधयति न वा। तदर्थं ज्ञानस्य मोक्षसाधनत्वे बाधकं नास्त्युतास्तीति। तदर्थं 'नाभुक्तं क्षीयते कर्म' (गारुड-वचनम्) इत्यादिवाक्यं सावकाशम् उत निरवकाशमिति चिन्तनीयम्।

पूर्वपक्षः

बहुभिर्देशकालाद्यैरुपभोग्यस्य कर्मणः क्षयो ज्ञानेन न भवेदिति तद्धेतुता कथम्? ज्ञानमोक्षयोः कार्यकारणभावं वदन् प्रष्टव्यः। कर्मणां मोक्ष-प्रतिबन्धकत्वमङ्गीकृतं न वेति। द्वितीये 'कर्मणा बध्यते जन्तुः' (सन्न्यासोपनिषत्) इत्यादिवाक्यविरोधः। आद्ये तेनैव प्रतिबद्धस्य ज्ञानस्य मोक्षसाधनत्वासम्भवः। न च ज्ञानेन प्रतिबन्धककर्मनिवृत्तौ मोक्षो भविष्यतीति वाच्यम्। 'ज्ञानेनामृतीभवति' (ब्र.सू.भा.उ. श्रुतिः ३.१.७) इत्यादिवाक्येन

ज्ञानस्य मोक्षे सामर्थ्यावधारणे तत्रैवोपयुक्तत्वेन प्रतिबन्धकनिवृत्तौ हेतुत्वानुपपत्तेः । किञ्च भुक्तभोगानां कर्मणां ज्ञानेन नाश उताभुक्तभोगानाम् । नाऽद्यः भोगनाश्यानां कर्मणां भोगसमाप्तौ नाशस्य स्वत एव सिद्धत्वेन ज्ञानानपेक्षणात् । अन्यथा स्वर्गार्थं कृतकर्मणां स्वार्गिकभोगसमाप्तावपि ज्ञानाभावेन नाशाभावप्रसङ्गात् । 'न हि कश्चित् क्षणमपि' (भ.गी. ३.५) इति न्यायेन भोगसमये पुनर्नूतनानां कर्मणामार्जनसम्भवेन ज्ञानेन तन्निवृत्तेः कपोणिगुडायितत्वाच्च । न द्वितीयः । 'नाभुक्तं क्षीयते कर्म' (गारुडवचनम्) इति वचनविरोधात् । न च ज्ञानस्य तादृशं सामर्थ्यं कल्प्यते मोक्षसाधनत्वश्रुत्यबाधाय । 'नाभुक्तं क्षीयते' (गारुडवचनम्) इति वाक्यं तु ज्ञानाभावविषयमिति वाच्यम् । ज्ञानोत्पत्तिसमनन्तरक्षणमेव मोक्षापातात् । नहि अन्धकारनिवर्तनस्वभावस्य दीपस्य विरम्य व्यापारो दृश्यते । प्रारब्धव्यतिरिक्तकर्मनाशे सामर्थ्यं कल्प्यत इति चेन्न । बहुजन्मप्रापकप्रारब्धकर्मानुभवकाले ज्ञानस्य बहुकालान्तरितत्वेन जीर्णबीजस्येव मोक्षेऽपि शक्तिकुण्ठनप्रसङ्गात् ।

किञ्च सञ्चितागामिपुण्यकर्मणोरपि नाशप्रसङ्गः । न चेष्टापत्तिः । मौक्तिकानन्दातिशयस्याऽकस्मिकत्वप्रसङ्गात् । न चेष्टेतरपुण्यनाशे सामर्थ्यं कल्प्यत इति वाच्यम् । ईश्वरप्रसादादुपोद्बलितस्य प्रारब्धस्य प्रबलत्वेन तन्नाशे ज्ञानस्य सामर्थ्यसम्भवेऽपि दुर्बलसञ्चितागामिपुण्यनाशेऽप्यसामर्थ्यायोगात् । अन्यथाऽविशेषादन्यत्रापि तत् स्याद् ज्ञानेन कर्मनाशायोगात् मोक्षसाधनत्वमयुक्तमिति पूर्वपक्षः ।

सिद्धान्तः

सिद्धान्तस्तु-

तद्यथेत्यादिवाक्येन ज्ञानात् कर्मक्षये सति ।
मोक्षो भवेन्न चात्रास्ति शङ्का वाचनिके कचित् ॥

अत्र कर्मणां प्रतिबन्धकत्वमङ्गीकृतमेव । ज्ञानस्य तन्नाशकत्वं च । न च मोक्षं प्रत्यन्यथासिद्धत्वं ज्ञानस्येति वाच्यम् । कर्मनाशस्य मोक्षाभिन्नत्वात् । चतुर्दलात्मको मोक्ष इति हि प्रागेवोक्तम् ।

किञ्च किं प्रारब्धस्य प्रतिबन्धकत्वमाशङ्क्यते उत सञ्चितागामिनोः । आद्ये वक्ष्यामः । द्वितीयेऽपि किं पापरूपयोरुत पुण्यरूपयोः । द्वितीये वक्ष्यामः । नाऽद्यः । ज्ञानेन तयोर्नाशाद्यङ्गीकारात् । नचात्र प्रमाणाभावः । 'तद्यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते' (छा.उ. ४-१४-३), 'तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयत एवं हैवास्य सर्वे पाप्मानः प्रदूयन्ते' (छा.उ. ५-३४-३) इति श्रुतिभ्यामुत्तराघस्याश्लेषः पूर्वाघस्य विनाश इति प्रतीतेः । अतः न कर्मणामनुभवेन क्षयः, येन ज्ञानशक्तिह्रासः ज्ञानवैफल्यं च स्यात् । किन्तु ज्ञानेनैव । नापि भोगकाले पुनरघस्योत्पत्त्याऽनवस्था । तस्याश्लेषाङ्गीकारात् । अतः पापकर्मरूपप्रतिबन्धकसद्भावान्न ज्ञानं मोक्षहेतुरित्येष पक्षस्तावन्नोपपद्यते ।

नन्वेवं तमोयोग्यस्यापि तदीयज्ञानेन उत्तरपूर्वाघयोरश्लेषविनाशापत्तिः । न चेष्टापत्तिः, दुःखकारणाभावेन तमसि मग्नस्य दुःखानुभवाभावापत्तिः । तथाच 'अपि सप्त' (ब्र.सू. ३-१-१६) इत्याद्युक्तविरोध इति चेन्मैवम् । एवंविदीति विशेषणेन तत्त्वज्ञानस्यैवाघाश्लेषादिहेतुत्वावगमात् । नच तमोयोग्ये तत्त्वज्ञानमस्ति । न च मिथ्याज्ञानस्याघनाशकत्वे प्रमाणमस्ति । नन्वेवं पुण्यनाशकत्वेऽपि प्रमाणाभावान्मिथ्याज्ञानस्य पुण्यनाशकत्वाभावापत्या मिथ्याज्ञानदशायां पूर्वोत्तरपुण्ययोः सुखसाधकत्वसम्भवेन पुनरपि तमसि निरन्तरदुःखानुभवाभावप्रसङ्गः । अन्यथा मुक्तियोग्यस्यापि सुखानुभवाभावप्रसङ्गः । पुण्यकर्मसद्भावस्य त्वयैवाप्रयोजकीकृतत्वादिति चेन्न । तस्य तत्त्व-

ज्ञानित्वाभावात्। तत्त्वज्ञानं हि न पुण्यविरोधि 'यदेव विद्यया करोति' (छा.उ. १.१.१०) इति तेन तत्रातिशयाधानस्यैवाभिधानात्। किन्तु अघस्यैव। अतः मुक्तियोग्यस्य उत्तरपूर्वाघयोरश्लेषविनाशाभ्यां पुण्यस्यानाशेन पुनर्दुःखानुभवाभावेऽपि मिथ्याज्ञानिनां पापाविरोधितत्त्वज्ञानाभावात् प्रत्युत पापोद्बलकस्य पुण्यविरोधिनः मिथ्याज्ञानस्यैव सत्त्वात् तदीयपुण्यस्यापि मुक्तियोग्यानां तत्त्वज्ञानेन पापस्येव निबिडमिथ्याज्ञानेनाश्लेषविनाशयोरुपपत्तेः । प्रमाणं चात्र। विमतः पुण्यनाशवान् तथात्वेनेश्वरेणेष्टत्वात्। यो यथेश्वरेणेष्टः स तथैव। यथा मुक्तियोग्यः सुखित्वेनेष्टः सुखी। विमतः पुण्यनाशवत्तयेश्वरेणेष्टः तद्द्वेषित्वात्। यो द्वेषी स तेन सुखसाधनहीनतयेष्टः यथा राजद्वेषी धनहीनतयेति। विमतो न नित्य ईश्वरेण तथेष्टत्वादित्याद्याभाससाम्यमिति चेन्न।

'यथाऽश्लेषो विनाशश्च मुक्तस्य तु विकर्मणः।
एवं सुकर्मणश्चापि पततस्तमसि ध्रुवम्॥ (ब्र.सू.भा.उ.आग्नेयवचनम्)
इत्यादिवचनात्।

ननु सम्यङ्मिथ्याज्ञानाभ्यां पापपुण्ययोर्यदि विनाशस्तर्हि सम्यङ्मिथ्याज्ञानोत्तरकालं दुःखसुखानुभवौ न स्याताम् तयोः पापपुण्यसाध्यत्वादिति चेन्न। याभ्यां पापपुण्याभ्यामनिष्टमिष्टं वा कार्यं नाऽरब्धं तयोरेव पापपुण्ययोः सम्यङ्मिथ्याज्ञानाभ्यां विनाशाङ्गीकारेऽपि विपरीतयोः तदनङ्गीकारात्। नचात्र विनिगमनाभावः। 'तस्य तावदेव चिरम्' (छा.उ. ६.१४.२) इति मुक्तौ विलम्बोक्तेः। न हि कर्ममात्रस्यापि नाशे मुक्तौ विलम्बो युज्यते। ईश्वरकोपप्रसादोपोद्बलितत्वेन तयोः प्राबल्याच्च। यथा चैतत् तथोपपादितमस्माभिः फलाधिकरणे। एतेन ज्ञानस्य विरम्यव्यापारायोगोऽपि समाहितः। ज्ञानप्रेरकस्येश्वरस्य तदुपपत्तेः। यथोक्तम्-

'तथोपास्याञ्जसा दृष्टं ब्रह्म पापं च भस्मसात्।
करोति निखिलं पूर्वं पाश्चात्यस्याप्यसङ्गताम्।
करोति द्विषतश्चैवं पुण्यनाशोऽप्यसङ्गता॥' इति।

तथा च यावत्सदसन्मुक्ति प्रारब्धपापपुण्ययोः सद्भावाद् योग्यायोग्यजनयोर्दुःखसुखानुभवौ सम्भवतः।

ननु तदा ज्ञानोत्तरपूर्वपुण्ययोः प्रतिबन्धकत्वं स्यादेव। न च तयोरप्युक्तरीत्या विरोधाभावेन ज्ञानेन विनाशः शक्यते वक्तुम्। तयोरपि देहान्तरारम्भकत्वेन प्रतिबन्धकत्वावश्यम्भावात्। अन्यथा 'पुण्यपापे विधूय' इति न श्रूयेत। मैवम्। किं प्रारब्धपुण्यस्य मुक्तिप्रतिबन्धकतोच्यते। उत तदन्यस्य। आद्ये वक्ष्यामः। द्वितीयेऽपि काम्यस्योताकाम्यस्य। आद्ये किमभीष्टस्योतानभीष्टस्य। नाऽद्यः। ज्ञानेऽतिशयाधायकत्वेन तस्य मुक्तिप्रतिबन्धकत्वायोगात्। न द्वितीयः। तस्य ज्ञानविरोधित्वेन पापस्येव नाशादेरभ्युपगमात्। न द्वितीयः। मौक्तिकानन्दातिशयहेतुत्वेन सुतरामप्रतिबन्धकत्वात्। तस्मात् परिशेषाद् अप्रारब्धमनभीष्टं काम्यं पुण्यमेव प्रतिबन्धकम्। तत्तु ज्ञानं स्वाश्रयादुत्कृष्य सुहृत्सु गमयति पापं तु कार्त्स्न्येन द्विषत्सु गमयतीत्यङ्गीकारे कथं प्रतिबन्धकसद्भावः ? एतेन 'नाभुक्तं क्षीयते कर्म' (गारुडवचनम्) इति वचनविरोधोऽपि परिहृतः। तस्याज्ञानिविषयत्वात्। ज्ञानिविषयत्वेऽपि प्रारब्धविषयत्वात्। अप्रारब्धविषयत्वेऽपि पुरुषान्तरभोगपरत्वाच्च।

ननु अथापि ज्ञानेन प्रारब्धनाशानुक्तेः कथं मोक्ष इति चेन्न। तन्मात्रस्य भोगेन क्षये प्रतिबन्धकनिवृत्त्यनन्तरं ज्ञानेन मोक्षोपपत्तेः। नहि प्रारब्धान्यनन्तानि येन भोगासम्भवः। न च प्रारब्धस्य विचित्रत्वात् तद्भोगावधिनिश्चयाभावेन मोक्षानिश्चयप्रसङ्ग इति वाच्यम्। विरिञ्चस्य ब्रह्मकल्पानां शतेन प्रारब्धक्षयः,

शेषस्य ब्रह्मकल्पपञ्चाशता, पुरन्दरस्य तु ब्रह्मकल्पविंशत्या सूर्यादिदेवानां तु ब्रह्मकल्पदशकेन। इतरेषामेकेन ब्रह्मकल्पेनेत्येवं क्रमेण प्रारब्धभोगावधेः।

'ब्रह्मणां शतकालात्तु पूर्वमारब्धसङ्क्षयः।
ब्रह्मणस्त्वेव तावत्त्वं पञ्चाशद् ब्रह्मणस्तथा।
रुद्रस्य विंशदेव स्यादिन्द्रस्यार्कादिके दश।
अन्येषां ब्रह्ममात्रस्य त्वन्त आरब्धसङ्क्षयः।
ब्रह्मणैव सहातश्च परं नारायणं व्रजेत्॥' (अ.व्या. अ.४, श्लो.६१)

इति वचनेन निर्णयसम्भवात्। तस्माच्छ्रवणादिनोपासितः साक्षात्कृतः प्रसन्नो विष्णुः पूर्वोत्तरपापानि नाशयित्वाऽश्लेषयित्वा च निखिलकामधुक् निजपरम-मङ्गलपादारविन्दपदवीमनुगमयन् सकलानर्थनिदानं शरीरबन्धनमपगमयतीति सिद्धम्।

अद्वैत्यभ्युगततदधिगमाधिकरणपरीक्षा

अन्ये तु, तदधिगमेत्येकमेव सूत्रमेकमधिकरणम्। गतस्तृतीयशेषः साधनगोचरो विचारः। इदानीमेतदध्यायगतफलविषया चिन्ता प्रतन्यते। प्रथमं तावदिदं विचार्यते ब्रह्मज्ञाने सति दुरितं कर्म क्षीयते न वेति संशयः। तत्र फलार्थत्वात् कर्मणः फलमदत्वा न सम्भाव्यते क्षयः। अन्यथा शास्त्राप्रामाण्यप्रसङ्गात्। अदत्तफलं चेत् कर्मापूर्वं विनश्यति कर्मणः फलप्रसवसामर्थ्यबोधकशास्त्रमप्रमाणं भवेत्। न च प्रायश्चित्तमिव ब्रह्मज्ञानमदत्तफलान्यपि कर्मापूर्वाणि क्षिणोतीति साम्प्रतम्। प्रायश्चित्तानामपि तत्र क्षयहेतुत्वासम्मतेः। तद्विधानस्य चैनस्विनो नरस्याधिकारिणः प्राप्तिसम्पादनमात्रेणोपयोगाद् दुरितनिबर्हणफलकत्वा-योगात्। ब्रह्महत्यादिपापिनः सत्कर्मस्वधिकारायोगेन कृतप्रायश्चित्तस्य तु शास्त्रप्रामाण्यात् कृतक्षामवतेष्टेः अग्निहोत्रादाविव अधिकारसम्भवप्रदर्शनेन शास्त्रस्य कृतार्थत्वात्। अस्तु वा प्रायश्चित्तस्य दुरितनिवर्तकत्वम् 'ब्रह्महा

द्वादशाब्दव्रतं चरेत्' इति दोषसंयोगेन श्रवणात्। तथाऽपि न ब्रह्मज्ञानस्य दुरितनिवर्तकत्वम्। दोषसंयोगेनाश्रवणादिति प्राप्त उच्यते।

स्यादेवम् यदि कर्मविधिविरोधः स्यात्। न त्वयमस्ति। शास्त्रं हि फलोत्पाद-सामर्थ्यमात्रं कर्मणामवगमयति, न तु कुतश्चिदागन्तुकान्निमित्ततः। प्रायश्चित्तादेस्तदप्रतिबन्धमपि। तस्य तत्रौदासीन्यात्। यदि हि शास्त्रबोधितं फलप्रसवसामर्थ्यमागन्तुकेन केनचित् कर्मणा न प्रतिबद्धं तदा स्वफलं प्रसूत एवेति न शास्त्रव्याघातः। दोषसंयोगाश्रवणेऽपि स्वभावपर्यालोचनादेव ब्रह्मज्ञानस्य दुरितक्षयप्रसवसामर्थ्यं कल्प्यत इति।

तन्न। तथा हि। किमत्र ब्रह्मज्ञानं विवक्षितम्, यस्माद् दुरितक्षयश्चिन्त्यते? न तावद् ब्रह्मरूपं ज्ञानं तस्य नित्यसिद्धत्वेन सर्वदुरितक्षयप्रसङ्गात्। वैराग्योपासनादिसाधनसाध्यस्य मोक्षसाधनस्यैव ज्ञानस्येह विचार्यत्वाच्च। 'तदधिगमे सति' इत्येतत्सूत्रव्याख्यानभाष्यविरोधाच्च। न हि ब्रह्मरूपे ज्ञाने त्वन्मते षष्ठीप्रयोगः सम्भवति। कर्तृकर्मभावविरोधात्।

नाप्यखण्डार्थनिष्ठवेदान्तजनितनिष्प्रकारकचरमवृत्तिरूपं ज्ञानम्। तस्य त्वन्मते प्रपञ्चमात्रनिवर्तकत्वेन दुरितमात्रविषयचिन्तायोगात्। तत्राप्युत्तरपूर्वाघ-योरध्यस्तत्वाविशेषात्। 'भूयश्चान्ते विश्वमायानिवृत्तिः' (श्वेता.उ. १.१०) इति श्रुतेश्च विनाशस्यैव वक्तव्यत्वेनोत्तराघस्याश्लेशवचनासङ्गतेश्च। न च त्वत्पक्षे उत्तराघं नामास्ति।

'तत्त्वमस्यादिवाक्यार्थसम्यग्धीजन्ममात्रतः।
अविद्या सह कार्येण नाऽसीदस्ति भविष्यति॥'

इति वचनेन, 'पूर्वसिद्धकर्तृत्वभोक्तृत्वविपरीतं हि त्रिष्वपि कालेषु अकर्तृत्वाभोक्तृत्वस्वरूपं ब्रह्माहमस्मि नेतः पूर्वमपि कर्ता भोक्ता वाऽहमासं

नेदानीं नापि भविष्यति काल इति ब्रह्मविदवगच्छति' इत्यत्रत्यभाष्येण च विरोधात् ब्रह्मान्यस्याज्ञानकल्पितत्वेन तन्नाशादनन्तरमप्युत्तराघस्योत्पत्त्ययोगात्। न हि निरुपादानकं भावकार्यं दृष्टम्। न वा कर्तुरभावे कर्म। कर्मणः साधनादि-गोचरवृत्त्यपेक्षानैयत्येन ब्रह्मज्ञानानन्तरमपि दुरितापूर्वसाधनगोचरवृत्त्य-वश्यम्भावेन तस्य चरमवृत्तित्वव्याघातश्च। शरीरेन्द्रियादिसापेक्षत्वाद् दुरितस्य चरमवृत्त्या तन्नाशे तदयोगश्च। तदनाशे त्वविशेषान्न कस्यापि प्रपञ्चस्य नाशः स्यात्। तथाच साधु समर्थितमद्वैतम्। 'नहि तत्त्वमसिवाक्यार्थपरिभावना-जनितेन तत्त्वज्ञानेन निर्मृष्टनिखिलकर्तृत्वभोक्तृत्वादिविभ्रमो जीवः फलोपभोगेन युज्यते। न हि रज्जुभुजगसमारोपनिबन्धनाः भयकम्पादयः सति रज्जुतत्व-साक्षात्कारे भवन्ति। किन्तु संस्कारशेषात् कश्चित् कालमनुवृत्ता अपि निवर्तन्त एव' इति भामत्युक्तेः। केषाश्चिदध्यस्तानां निवृत्तावपि तच्छरीरेन्द्रियादिमात्रस्या-ध्यस्तस्यापि न ज्ञानेन निवृत्तिः। अत एवोत्तराघमपि सम्भावितमेवेति चेन्न। रज्जुभुजगसमारोपजनितसंस्कारदोषभयकम्पादे रज्जुतत्वाज्ञानकल्पितत्वाभावेन रज्जुतत्वसाक्षात्कारेण तदज्ञाननिवृत्तावपि संस्कारदोषादेरुपादानान्तरेऽव-स्थानसम्भवेऽपीह प्रपञ्चारोपजनितसंस्कारदोषादेः ब्रह्माज्ञानोपादानकत्वेन ब्रह्मतत्त्वसाक्षात्कारेण तन्निवृत्त्यवश्यम्भावेन संस्कारदोषाद्यवस्थानायोगात्। योगे वा तन्नाशकाभावेनाद्वैतभङ्गप्रसङ्गात्। न च ब्रह्मज्ञानमचेतनं कालं देशं वाऽपेक्ष्य शनैः शनैः विरम्याज्ञानं निवर्तयतीति युक्तम्।

किञ्च ''सगुणासु तावद्विद्यासु विद्यत एव विधानम्। तासु च 'स सर्वेषु लोकेषु सर्वेष्वात्मस्वन्नमत्ति' (छा.उ. ५.१८.१), 'तद्यथेषीकातूलम्' (छा.उ. ५.२४.३) इत्यादिवाक्यशेष ऐश्वर्यप्राप्तिः पापनिवृत्तिश्च विद्यावत उच्यते। तयोश्चाविवक्षा-कारणं नास्तीत्यतः पापप्रहाणपूर्वकैश्वर्यप्राप्तिस्तासां फलमिति निश्चीयते'' इति भाष्येण 'दोषक्षयोद्देशेनापरविद्यानामस्ति प्रायश्चित्तवद्विधानम्

ऐश्वर्यफलानामप्युभयसंयोगाविशेषात्' इति भामत्या च विरोधः। न हि परविषयकायां निर्गुणायां विद्यायामत्र विवक्षितायां सगुणविद्याप्रस्तावो युक्तः। प्रायश्चित्तानां दोषसंयोगेन विधानाद् भवेद् दोषक्षपणार्थता। नैवं ब्रह्मविद्यायां विधानमस्तीति पूर्वपक्षीयचोद्यस्योत्तराभावप्रसङ्गश्च।

'निर्गुणायां तु विद्यायां यद्यपि विधानं नास्ति। तथाऽप्यकर्त्रात्मत्वबोधात् कर्मप्रदाहप्रसिद्धिः' इत्यादिना भाष्येण 'यत्रापि निर्गुणायां परविषयायां दोषोद्देशो नास्ति तत्रापि स्वभावालोचनादेव तत्प्रक्षयप्रसवसामर्थ्यमभिधीयते' इति भामत्या चास्योत्तरमुक्तमिति चेन्न। स्वभावस्यानपायेनोत्तराघोपयुक्तप्रपञ्चक्षयोऽपि स्यादित्युक्तत्वात्।

नापि सगुणोपासनाजन्यसगुणविषयं ज्ञानम्। तस्य चरमवृत्तिरूपत्वाभावेन प्रपञ्चनिवर्तकत्वायोगेन सुतरां तदन्तर्गतदुरितनिवर्तकत्वायोगात्। नहि सगुणविद्यया प्रपञ्चोपादानमज्ञानं निवर्तते, निर्गुणविद्यावैयर्थ्यात्। नच प्रपञ्चोपाधिकसगुणविषयकं ज्ञानं प्रपञ्चं निवर्तयितुं शक्नोति, विरोधाभावात्। निष्प्रपञ्चज्ञानमेव हि विरोधात् प्रपञ्चस्य निवर्तकम्। अन्यथा रजतज्ञानमपि नेदं रजतमिति ज्ञानादिवत् शुक्लमिति ज्ञानादपि निवर्तेत। अथेदानीं 'ब्रह्मविद्याफलं प्रति चिन्ता प्रतायते' इति भाष्यविरोधाच्च। नहि कर्मक्षयादि सगुणब्रह्मविद्या-फलम्। तथा सति 'स सर्वेषु लोकेष्वात्मस्वन्नमत्ति' (छा.उ. ५.२४.३) इत्याद्यैश्वर्यादिफलश्रवणविरोधात्। नहि लोकादिनिमित्तेषु कर्मसु क्षीणेषु लोकादीनामवस्थानं युज्यते।

किञ्चैवं सति चतुर्ष्वपि वेदेषु कर्मक्षयादेः सगुणविद्ययाक्रान्तत्वात् निर्गुणविद्यायाः फलाभावेन दोषोद्देशाद्यभावेन च स्वरूपस्यैवाभावप्राप्त्या पञ्चमवेदप्रतिपाद्यतैवेति सुष्ठूपहसितमार्यैः।

अथ मतं परापरविद्याद्वयं निर्गुणसगुणसञ्ज्ञितं ब्रह्मज्ञानशब्देन विवक्षितम्। अत एव भाष्यभामत्योः उभयविषयिणी कथा प्रवर्तते। उत्तराघशब्दश्च युक्तः सगुणविद्यया सर्वनाशाभावात्। शास्त्राप्रामाण्यं च न भवति निर्गुणविद्यया कर्मणां फलप्रसवसामर्थ्यविरोधादिति। मैवम्। मोक्षान्तरङ्गसाधनफलयोर्विचारावसरे बहिरङ्गसगुणविद्यायास्तत्फलस्य च निरूपणायोगात्।

किञ्च सर्वमतेऽपि 'नाभुक्तं क्षीयते कर्म' (गारुडवचनम्) इति स्मृतिविरोधो दुर्वारः। नहि मन्मत इव त्वन्मते ज्ञानप्रसन्न ईश्वरस्तदधिकारानुसारेण कानिचित्कर्माणि क्षपयति, कानिचित्कर्माणि देहेन्द्रियादीनि च न क्षपयतीत्यङ्गीक्रियते। किन्तु ज्ञानमेव दीप इवान्धकारं क्षपयतीति। तथाच कथमभुक्तस्य क्षयः स्यात्। मन्मते त्वीश्वरस्य समर्थत्वाच्चेतनत्वाद् अभुक्तमपि क्रमेण क्षपयतीति युज्यते।

परोक्ततदधिगमसूत्रयोजनानिरासः

एतेन तदधिगमे ब्रह्मणोऽधिगमे सति उत्तरपूर्वाघयोरश्लेषविनाशौ भवतः। उत्तरस्याश्लेषः पूर्वस्य विनाशः। 'तद्यथा पुष्करपलाशे' (छा.उ. ४.१४.३), 'तद्यथेषीकातूलम्' (छा.उ. ५.२४.३) इत्यादिनाऽश्लेषविनाशयोः व्यपदेशात्। इति सूत्रयोजना निरस्ता। ब्रह्मरूपाधिगमे विवक्षिते षष्ठ्यनुपपत्तेः, वृत्तिरूपाधिगमे चोत्तराघशब्दानुपपत्तेश्चोक्तत्वात्।

रामानुजाभिमततदधिगमाधिकरणपरीक्षा

केचित्तु- एवं विद्यास्वरूपं विशोध्य विद्याफलं चिन्तयितुमारभ्यते। ब्रह्मविद्याप्राप्तौ पुरुषस्योत्तरपूर्वाघयोरश्लेषविनाशौ 'तद्यथा पुष्करपलाशे', (छा.उ. ४.१४.३) 'तद्यथेषीकातूलम्' (छा.उ. ५.२४.३) इत्यादिना श्रूयेते। तावुपपद्येते न वेति संशयित्वा पूर्ववदेव पूर्वपक्षसिद्धान्तावाहुः। तत्र। ब्रह्ममीमांसाशास्त्रे ब्रह्मण एव प्राधान्येन प्रकृतत्वेन तत्र प्रयुक्ततदादिशब्दानाम् उत्सर्गतो ब्रह्मपरत्वस्य बाधकं विना त्यागायोगात्। अधिगमशब्दवैयर्थ्याच्चेति।

अद्वैत्यभिमतेतरस्यापीतिसूत्रार्थनिरासः

यच्चोक्तम्, 'इतरस्याप्येवम्' इत्येकमधिकरणान्तरम्। 'अधर्मस्य रागादिनिबन्धनत्वेन शास्त्रीयेण ब्रह्मज्ञानेन प्रतिबन्धो युक्तः, धर्मज्ञानयोस्तु शास्त्रीयत्वेन ज्योतिष्टोमदर्शपौर्णमासवदविरोधान्नोच्छेद्योच्छेदकभावो युक्तः। पाप्मनश्च विशेषतो ब्रह्मज्ञानोच्छेद्यत्वश्रुतेर्न धर्मस्य तदुच्छेद्यत्वम्। विशेषविधानस्य शेषप्रतिषेधनान्तरीयकत्वेन लोकतः सिद्धेः। यथा देवदत्तो दक्षिणेनाक्ष्णा पश्यतीत्युक्ते न वामेन पश्यतीति गम्यते। 'उभे ह्येवैष एते तरति' (बृ.उ. ४.४.२२) इति वचनं च यथासम्भवं ब्रह्मज्ञानेन दुष्कृतं भोगेन सुकृतं तरतीति व्याख्येयम्। 'क्षीयन्ते चास्य कर्माणि' (मु.उ. २.२.८) इति च सामान्यवचनं 'सर्वे पाप्मानः' (छा.उ. ५.२४.३) इति विशेषश्रवणाद् दुष्कृतविषयम्। तस्माद् ब्रह्मज्ञानाद् दुष्कृतस्यैव प्रक्षयः न सुकृतस्येति प्राप्ते पूर्वाधिकरणराद्धान्तोऽतिदिश्यते। नो खलु ब्रह्मविद्या केनचिददृष्टेन द्वारेण दुष्कृतमपनयति। अपि तु दृष्टेनैव भोक्तृभोक्तव्यभोगादिप्रविलयद्वारेण। तच्चैतत्तुल्यं सुकृतेऽपीति कथमेतदपि नोच्छिन्द्यात्। एवञ्च न शास्त्रीयत्वसाम्यमात्रम् अविरोधे हेतुः। नच जलानालदीनां प्रत्यक्षत्वसाम्यमात्रादविरोधोऽस्ति। न च सुकृतशास्त्रमनर्थकम्। अब्रह्मविदं प्रत्यर्थवत्त्वात्' इति।

तदपि न समीचीनम्। तथाहि। किं पूर्वसूत्रेऽघशब्दो यथाश्रुत एव व्याख्यायते, उत सुकृतोपलक्षकः ? नाऽद्यः। 'एवमवस्थिते पाप्मश्रुत्या पुण्यमपि ग्रहीतव्यम्। ब्रह्मज्ञानमपेक्ष्य पुण्यस्यापि निकृष्टफलत्वात्। तत्फलं हि क्षयातिशयाभ्यां युक्तम्। नत्वेवं मोक्षः। निरतिशयत्वान्नित्यत्वाच्च। दृष्टप्रयोगश्चायं पुण्यपापयोः पाप्मशब्दो वेदे तद्यथा- 'नैनं सेतुमहोरात्रे तरतः' (छा.उ. ८.४.१) इत्यत्र दुष्कृतेन सह सुकृतमप्यनुक्रम्य 'सर्वे पाप्मानोऽतो निवर्तन्ते' इत्यविशेषेणैव प्रकृते पुण्ये पाप्मशब्दप्रयोगात्' इत्यादिभाष्यभामतीभ्याम् अघपर्यायस्य पाप्मशब्दस्य

सुकृतोपलक्षकत्वाङ्गीकारात् । श्रुतावेवोपलक्षणं न सूत्र इत्यत्र नियामकाभावात्। एतत्सूत्रगृहीतश्रुतौ लक्षणाश्रयणे श्रुतिसूत्रयोरैकार्थ्यनिर्वाहाय सूत्रेऽपि लक्षणाया अवश्याश्रयणीयत्वाच्च।

न द्वितीयः। एतदधिकरणवैयर्थ्यात्। नहि विशेषाशङ्कयाऽपि साक्षाद्विचारित एव प्रमेयेऽधिकरणान्तरारम्भो दृष्टः। निर्मन्थ्यादीनां न्यायसाम्येन पूर्वाधिकरणे विचारितत्वेऽपि न साक्षाद्विचारविषयताऽस्ति। पुण्यस्यापि बन्धकत्वेन प्रसिद्धेः 'विधूय पुण्यं च पापं च', 'पुण्यपापे विधूय' (मु.उ. ३.१.३) इत्यादौ स्पष्टमेव श्रवणाच्चाभ्यधिकाशङ्काया अवकाशाभावाच्च । कथञ्चित् तदवकाशेऽपि परिहारोऽप्यसङ्गतः। नहि ब्रह्मज्ञानं दुष्कृतमपनयद् दृष्टेनैव द्वारेण, नतु अदृष्टेन द्वारेण इत्यत्र प्रमाणमस्ति। 'यस्य प्रसादात्परमार्तिरूपादस्मात्संसारान्मुच्यते नापरेण' (न्या.सु.उ.वचनम्) इति श्रुत्या ब्रह्मज्ञानद्वारीभूतस्य प्रसादस्यादृष्टस्यैव प्रमितत्वाच्च। ब्रह्मज्ञानप्रसादयोर्द्वारद्वारिभावश्च 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः' (भ.गी. ७.१७), 'ज्ञानी त्वात्मैव मे मतम्' (भ.गी. ७.१८), 'नच तस्मात् प्रियतरः' (भ.गी. १८.६९), 'ज्ञानी प्रियतमो मतः' इत्यादिवाक्यैः 'नान्यः पन्था अयनाय' (श्वे.उ. ३.८) 'प्रसादान्मुच्यते नापरेण' इत्यादिश्रुतिसाफल्यान्यथानुपपत्त्या च सिद्धः।

तथाच ब्रह्मज्ञानस्य प्रसादद्वारा दुष्कृतनाशकत्वात् तत्र ब्रह्मज्ञानेन दुष्कृतनाशोपपत्तावपि कोपसाध्यपुण्यनाशस्य ब्रह्मज्ञानफलत्वायोगेन ब्रह्मविदि कोपस्य द्वारलोपात् कुसूलादाववघातादेरिव, पुण्यनाशस्य लोपो युक्तः । पुण्यनाशश्च 'नतु मामभिजानन्ति तत्वेनातश्च्यवन्ति ते' (भ.गी. ९.२४) इति निन्दाश्रवणाद् ब्रह्मकोपसाध्योऽवगम्यते । दृष्टं द्वारं चात्र न लभ्यते । भोक्तृभोक्तव्यभोगादिप्रविलयस्य प्रमाणाभावेन स्वरूपत एवासत्त्वात्। नहि दीपस्यान्धकारप्रविलय इव भोक्त्रादिप्रविलयः ब्रह्मज्ञानस्य साक्षात् कार्यम्।

तथा सति निरवशेषम् अज्ञानतत्कार्ययोर्नाशेऽविद्यालेशस्याप्यभावेन भिक्षाटनादौ प्रवृत्तिरपि न स्यात्। तथाच ज्ञानमज्ञानं निवर्तयदीश्वरप्रसादाद्यदृष्टद्वारेणैवेति त्वयाऽपि स्वीकार्यमेव।

किञ्च तत्त्वज्ञानिनामिव मिथ्याज्ञानिनामप्यनावृत्तिफलस्यापि सत्त्वेत्येतस्मिन् तृतीयप्रथमपादीयाधिकरणे समर्थितत्वेन तेषां तमःप्राप्तिप्रतिबन्धकोत्तरपूर्वपुण्ययोरश्लेषविनाशप्रतिपादनस्यावश्यकर्तव्यस्य परित्यागः स्यात्। 'पाते तु' इत्यस्य सूत्रांशस्य वैयर्थ्यं च।

शाङ्करभाष्योक्तस्य 'पाते तु' इति सूत्रशकलव्याख्यानस्य विमर्शः

यच्चोक्तमत्र भाष्ये- 'पाते त्विति तुशब्दोऽवधारणार्थः। एवं धर्माधर्मयोश्च बन्धहेत्वोर्विद्यासामर्थ्यादश्लेषविनाशसिद्धेरवश्यम्भाविनी विदुषः शरीरपाते मुक्तिरित्यवधारयति' इति तत्तु 'अनियमः सर्वेषाम्' (ब्र.सू. ३.३.३१) इत्यादौ विदुषां मुक्तिनियमस्य साधितत्वात् पुनरुक्तमनुपयुक्तश्चेति नैवमधिकरणार्थः।

रामानुजोक्तस्येतरस्यापीतिसूत्रार्थस्य निरासः

केचित्तु पूर्ववदेव विषयविशयपूर्वपक्षसिद्धान्तानुक्त्वा सूत्रमेवं योजयन्ति 'इतरस्य पुण्यस्याप्येवम् उक्तन्यायेनासंश्लेषविनाशौ विद्याफलविरोधित्वादिसामान्यात्। ननु विदुषः पापविनाशादिर्युक्तः पापस्यानिष्टत्वात्। न पुनः पुण्यस्य विनाशः सेतिकर्तव्यताकोपासनानिर्वृत्तये वृष्ट्यन्नारोग्यादिफलस्येष्टत्वाच्च। नहीष्टनाशो विदुषो युक्तः। तत्राऽह- पाते त्विति॥ शरीरपातादूर्ध्वमेव तस्य पुण्यस्य विनाशः न ततः प्रागिति। तदप्ययुक्तम्। उपासनोपयुक्तेष्टपुण्यस्य तच्छरीरपातानन्तरं शरीरान्तरस्वीकारानन्तरमपि तत्र पुनरुपासनानिर्वृत्तयेऽपेक्षितत्वेन तदनन्तरमपि नाशायोगात्। नच ज्ञानिनः शरीरान्तरमेव नास्तीति वाच्यम् । अनेकजन्मप्रसवसमर्थस्य प्रारब्धकर्मणः सत्त्वे

शरीरान्तरप्राप्तेरवर्जनीयत्वात्। उक्तश्चोभाभ्यामपि ज्ञानिनोऽपि शरीरान्तरं 'यावदधिकारमवस्थितिराधिकारिकाणाम्' (ब्र.सू. ३.३.३३) इत्यादाविति।

परोक्तस्य अनाराब्धेति सूत्रार्थस्य निरासः

यच्चोक्तम् - अनारब्धकार्ये इत्येतदेकमधिकरणान्तरम्।

'उत्सृष्टस्तत्त्वबोधेन विलयः सर्वकर्मसु।
कर्मस्वारब्धकार्येषु स इदानीमपोद्यते॥'

तथाहि- 'यद्यद्वैतज्ञानस्वभावालोचनया उत्तरपूर्वसुकृतदुष्कृतयोः अश्लेषविनाशौ हन्तारब्धारनारब्धकार्ययोश्चाविशेषेणैव विनाशः स्यात्। कर्तृकर्मादिप्रविलयस्योभयत्राविशेषात्। 'उभे उ है वैष एते तरति' (बृ.उ. ४.४.२२) इत्येवमादिषु श्रुतिषु विशेषाश्रवणाच्चेति प्राप्ते प्रत्याह- अनारब्धकार्ये एव त्विति। अप्रवृत्तफले एव तु पूर्वे जन्मान्तरसञ्चिते अस्मिन्नपि च जन्मनि प्राग् ज्ञानोत्पत्तेः सञ्चिते सुकृतदुष्कृते तदधिगमात् क्षीयेते। न तु सामिभुक्त-फले। याभ्यामेतद् ब्रह्मज्ञानायतनं जन्म निर्मितं 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये' (छा.उ. ६.१४.२) इति शरीरपातावधिकरणाक्षेमप्राप्तेरिति (?)।

तन्न। 'तस्य तावदेव चिरम्' (छा.उ. ६.१४.२) इति वाक्ये क्षिप्रताया अवधेश्चेत्युभयोर्विधाने वाक्यभेदापत्त्या क्षिप्रतैव प्रतिपाद्यते। एतावन्मे चिरं यत् स्नातवतो भुञ्जानस्येतिवत् स्नानादि कुर्वतो यच्चिरविलम्बनं तावदेव न ततोऽधिकमित्यर्थप्रतीतेः।

अत्रोक्तं भामत्याम्- 'तावदेव चिरम्' (छा.उ. ६.१४.२) इति तु न चिरता विधीयते। अपि तु श्रुत्यन्तरसिद्धां चिरतामनूद्य देहपातावधिमात्रविधानम्' इति। तदपि न साधु। तथाविधश्रुत्यन्तरस्यादर्शनात्। 'तस्मिन् दृष्टे' (मु.उ. २.२.८), 'क्षीयन्ते चास्य कर्माणि' (मु.उ. २.२.८) इत्यादेः सावकाशतया क्षिप्रतापरत्वायोगात्। दीपस्यान्धकारनिवर्तन इव ज्ञानस्याप्यज्ञानादिनिवर्तने वस्तुसामर्थ्यालोचनयैव क्षिप्रताया लोकत एव प्राप्तत्वेन श्रुत्यन्तरप्राप्त्युक्ति-विरोधाच्च। अत एव देहपातावधिमात्रविधानमपि न युज्यते। प्रत्यक्षतः क्षिप्रताया एव गृहीतत्वात्। तस्याप्रामाण्ये च नियामकाभावः। विधानार्थानुवादस्य 'दध्ना जुहोति' इत्यादाविव प्रमाणमूलत्वनियमेन प्रत्यक्षाप्राप्तक्षिप्रतानुवादानुप-पत्तिश्च।

किञ्च वस्तुबलेनैवाकर्त्रात्मबोधः कर्माणि क्षपयन् कथं कानिचित्क्षपयेत् कानिचिच्चोपेक्षेत। नहि समानेऽग्निबीजसम्पर्के केषाञ्चिद् बीजशक्तिः क्षीयते केषाञ्चिन्न क्षीयत इति शक्यमभ्युपगन्तुमिति चोद्यस्य परिहाराभावः।

ननु कथं तदभावः? 'न तावद् अनाश्रित्यारब्धकार्यं कर्माशयं ज्ञानोत्पत्ति-रुपपद्यते। आश्रिते च तस्मिन् कुलालचक्रवत् प्रवृत्तवेगस्यान्तराले प्रतिबन्धासम्भवाद् भवति वेगक्षयप्रतिपालनम्' इति भाष्योक्तेरिति चेन्न। अत्राकर्त्रात्मबोधस्य शरीरजन्यत्वात् तस्य च स्वप्रारम्भककर्मजन्यत्वात् तद्द्वारा प्रारब्धकर्माण्युपजीव्यानीत्युपजीव्यबाधने न सामर्थ्यमित्यभिप्रायो न युक्तः। प्रारब्धकर्मणोऽपि उपजीव्याया अविद्यायाः शरीरादिद्वारा तज्जन्यस्याकर्त्रात्म-बोधस्योपजीवकतया तेन तस्या बाधानुपपत्तेः। 'उपजीव्याया अप्यविद्यायाः ज्ञानेन बाधात् प्रारब्धकर्माण्याश्रित्य ज्ञानोदयः तदनिर्वतर्कत्वे स्वतन्त्र्युक्तिर्न भवति' इति कल्पतरूक्तेश्च। 'औचित्यमात्रतया आह स्म भगवान् भाष्यकारः' इति भामत्युक्तेश्च।

'यथा कुलालकराभिघातनिमित्तभ्रमणवति चक्रे निवृत्तेऽपि कुलाल-कराभिघाते वेगाख्यभ्रमणसंस्काराद् भ्रमणानुवृत्तिः, एवमत्रापि

निवृत्तायामप्यविद्यायामविद्यालेशानुवृत्तेः कर्मानुवृत्त्युपपत्तिः’ इत्यभिप्राये तु वैषम्यम्। युक्ता तत्र भ्रमणानुवृत्तिः वेगाख्यसंस्कारस्य सत्त्वात्। तत्सत्त्वमपि न कुलालकराभिघातकल्पितम्। इह तु शरीरस्य कर्मणोऽविद्यालेशस्य सर्वस्याप्यविद्याकल्पितत्वेन तद्विरोध्यात्मबोधोदये तदनुवृत्तेरयोगात्। अन्यथा पूर्वयोः पुण्यपापयोरपि निवृत्तिर्न स्यात्।

किञ्च वस्तुन एवानुवृत्तिः, नतु कल्पितस्येति व्याप्तेः चक्रभ्रमणादेः वस्तुत्वेनानुवृत्तत्वसम्भवेऽपि पुण्यपापयोः तत्संस्कारस्य च त्वन्मते मायामात्रत्वेन कल्पकमायानिवृत्तावनुवृत्त्यसम्भवः।

नन्ववस्तुनोऽप्यनुवृत्तिर्दृश्यते। तथाहि। रज्जौ तावदारोपितं सर्पादि, तद्विषयो भ्रमः, तज्जनितभयकम्पादि च रज्जुतत्वाज्ञानकल्पितत्वादवस्त्वेव निवृत्ते च सर्पादिभ्रमे यतो न निवर्तने भयकम्पादि। तथाच वस्तुन एवानुवृत्तिरिति कथं व्याप्तिरिति चेन्न। तत्राप्यध्यस्तसर्पादिमात्रस्यासत्त्वेऽपि तदज्ञानस्य सत्त्वेन तज्जनितानां भयकम्पादीनां तत्संस्कारादीनां च वस्तुतस्सत्त्वेन व्यभिचाराभावात्। नहि सर्पादिरिव रज्ज्वादौ तद्भ्रमादिरप्यध्यस्तः। ‘एतावन्तं कालं रज्जुं सर्पत्वेन प्रतिपन्नोऽस्मि’ इति भ्रान्त्युत्थितानुसन्धानविरोधात्। नात्र सर्प इतिवत् मयि न सर्पभ्रमः, भयकम्पादिर्वेति वा बुद्ध्यभावाच्च रज्ज्वज्ञाननिवृत्तौ कारणीभूतस्य रज्जुत्वप्रकारकबोधस्य रज्जुतत्त्वाज्ञानमात्रविरोधित्वेन तत्कल्पितसर्पानिवर्तकत्वेऽपि तदितरस्य तदज्ञानजन्यभयकम्पादेः सर्पाध्यासाधिष्ठाने कल्पितत्वाभावेन तत्र तेन तदनिवृत्तावपीह ब्रह्मणि जगदारोपाधिष्ठाने तत्तत्त्वाज्ञानकल्पितानां जगत्तदज्ञानतज्जनितार्थक्रियादीनां च सर्पादिवदध्यस्तत्वेन ज्ञानविरोधित्वाद् उत्पन्ने च प्रबोधे तेषामनुवृत्त्यभावस्य दुर्वारत्वाच्च। तदुक्तम्-

तत्त्वमस्यादिवाक्यार्थसम्यग्धीजन्ममात्रतः।
अविद्या सह कार्येण नासीदस्ति भविष्यति॥’ इति।

‘अविद्यायाः कार्येण सह ज्ञानेन निवृत्तिर्बाधः’ इति च।

एतेन सर्पादिज्ञानस्य सत्यत्वे तदवच्छेदकस्य सर्पादेरपि सत्त्वमेवेति कथं तस्यापि बाधः। किञ्चावच्छेदकस्य सर्पादेरसत्त्वेन तदवच्छेद्यस्य तज्ज्ञानस्यापि सत्त्वाभावेनावस्तुतया कथं वस्तुन एवानुवृत्तिरिति प्रतिबन्ध इति निरस्तम्। स्वत एव ज्ञाने विशेषाङ्गीकारेण विषयस्य तदवच्छेदकत्वाभावस्य सपरिकरमन्यत्रोपपादितत्वात्। ननु सर्पज्ञानस्य भयकम्पादिजनकत्वमङ्गीकुर्वता सर्पस्याप्यनुवृत्तिरङ्गीकार्यैव। अन्यथा गुञ्जापुञ्जे वह्निभ्रमादपि दाहापत्तेरिति चेन्न। ज्ञानेतरकार्याणां वस्तुसत्त्वापेक्षायामपि ज्ञानकार्याणां तदभावात्। न हि भयकम्पादि सर्पसत्त्वकार्यम्। सत्यपि सर्पे तदज्ञाने तदभावात्। तथा चाद्वैतब्रह्मतत्त्वसाक्षात्कारस्यानाद्यविद्योपदर्शितप्रपञ्चमात्रविरोधितया तन्मध्यपतितसकलकर्मविरोधित्वावश्यम्भावेनाऽरब्धानामपि त्वन्मते निवृत्तिर्दुर्वारैव।

‘यथा खलु स्वयंप्रकाशप्रत्यगात्मभूतब्रह्मसाक्षात्कारे नित्यमेव भवितुं युक्तेऽपि नास्ति ब्रह्म न प्रकाशते चेति तद्भ्रमान्यथानुपपत्त्याऽऽच्छादिकाऽविद्या कल्प्यते, एवमत्रभवतां हिरण्यगर्भादीनां तत्त्वसाक्षात्कारवतामपि श्रुतिस्मृतिप्रतीतदेहधारणान्यथानुपपत्त्या तत्त्वसाक्षात्कारस्य प्रारब्धकर्मफलप्रतिबन्धात् तत्स्वरूपतत्कार्यभोगसम्पादकाविद्यालेशं प्रत्यनिवर्तकत्वं भोगसमाप्तौ कर्मक्षये च प्रतिबन्धनिवृत्तौ सततमनुवृत्तसाक्षात्कारेण तस्याप्यविद्यालेशस्य निवृत्तिरिति कल्प्यते। न चैकदेशनिवृत्ताया अविद्याया अनुवृत्त्यसम्भवः। शाब्दबोधेन निवृत्तायामप्यविद्यायां साक्षात्कारनिरस्यस्यैकदेशान्तरस्य दर्शनात्’ इति कल्पतरूक्तं समाधानमस्त्विति चेन्न। उपनिषदेकगम्यस्य ब्रह्मणः कदाचिदपि

साक्षात्कर्तुमशक्यत्वेन तत्र प्रतिबन्धकाकल्पनात्। न हि दाहप्रतिबन्धकं घटादौ कल्प्यते। प्रत्यगात्मा त्वन्मतेऽपि स्वयम्प्रकाशः। नित्यमेव साक्षात्कारी भवितुमर्हतीति चेत्, किं तावता ? ब्रह्मणस्तदात्मकत्वादिति चेन्न। तदेव कफोणीगुडायितमित्युक्तत्वात्। त्वन्मतेऽपि परमाच्छादिकाऽङ्गीकृतेति चेन्न। मन्मते ब्रह्मणः सखण्डत्वेन एकदेशेन ज्ञाते साकल्येन तद्ज्ञाननिवारणार्थत्वात्। अस्तु वाऽन्यत्र यथा तथा। आच्छादिकाविद्यासमये ब्रह्मतत्त्वसाक्षात्काराभावात्। इह तु ब्रह्मतत्त्वसाक्षात्कारस्योत्पन्नत्वात् तन्निवृत्त्यर्हस्य प्रारब्धकर्मणः प्रतिबन्धकत्वासम्भवः। अन्यथा सञ्चितस्यापि तदापत्तिः।

किञ्चेह कल्पकाभावः। न तावत् हिरण्यगर्भादीनां देहधारणादि कल्पकम्। तेषां निर्विशेषब्रह्मसाक्षात्काराभावेन तदुपपत्तेः। 'न चैते महाधियो न ब्रह्मविदो ब्रह्मविदश्चाल्पपुण्यमेधसो मनुष्या इति श्रद्धेयम्' इति भामत्युक्तेर्नैष दोष इति चेन्न। महाधियामल्पधियां च निर्विशेषसाक्षात्कारे विशेषाभावेन महाधीत्वादेरप्रयोजकत्वात्। हिरण्यगर्भादीनां जीवन्मुक्तत्वव्यपदेशस्य सगुणसाक्षात्कारेणोपपत्तेः। किञ्च सञ्चिततवत्प्रारब्धस्यापि कर्मत्वाविशेषात् कथं प्रतिबन्धकत्वम्। प्रारब्धं प्रबलमिति चेत् तदेव कथम् ? सामिभुक्तत्वादेः प्राबल्यप्रयोजकत्वे बहुकालानुवृत्तत्वादेरपि तदापत्तिः। बोधं प्रत्युपजीव्यत्वं तु तदुपजीव्यायामविद्यायां व्यभिचीर्णम्। मन्मते तु कर्मणां न फलप्रसवसामर्थ्यं स्वत एवास्ति। 'कर्मणा त्वधमः प्रोक्तः प्रसादः श्रवणादिभिः' (ब्र.सू.भा.उ. ना.पु.वचनम् १.१.१) इति प्रसादोक्तिवैय्यर्थ्यात्। जडत्वादस्वतन्त्रत्वाच्च। एवं विकर्मणामपि न स्वफलप्रसवसामर्थ्यम्। किन्तु ईश्वरकोपादेव। तथा च प्रसादकोपौ न कर्मान्तरमेवापूर्ववदुत्पद्येते। महापातकप्रायश्चित्ताभ्यामपूर्वनाशवत् तयोर्विनाशापातात्। अमोघत्वव्याघाताच्च। किन्तु स्वफलप्रसवाव्यभिचरितपूर्वक्षणयोरेव तयोरुत्पत्तिः। तथा च सामिभुक्तकर्मणोऽमोघप्रसादाद्युपो-

द्बलितस्य कथं न प्राबल्यम्। कथं च तद्विपरीतस्य सञ्चितादेः प्राबल्यमिति वैषम्यम्।

किञ्च निरंशस्याज्ञानस्य लेशतोऽवस्थानं कथमुच्यताम्। यच्चोक्तं शाब्दबोधेन निवृत्तायामित्यादि तत्र। धर्मादिसद्भावे शब्देन बोधिते सामस्त्येन निवृत्तिदर्शनात्। तत्रापि नित्यत्वानित्यत्वविषयकमज्ञानमस्तीति चेन्न। शब्देन नित्यत्वप्रतिपादने तदयोगात्। तदप्रतिपादने विरोधिन एवाभावात्। न हि धर्मादौ पशुभूतिस्वर्गादिसाधनत्वनित्यत्वानित्यत्वादिविशेषवत् त्वन्मते ब्रह्मणि विशेषोऽस्ति यो धर्मादिस्वरूपे यत्किञ्चिद्विशेषणविशिष्टेऽवगतेऽप्यनवगत इव यत्किञ्चिद्विशेषणविशिष्टे ब्रह्मण्यवगतेऽप्यनवगतः स्यात्। शब्दात् साक्षात्कारनिरस्यमज्ञानं तु न निवर्तते। तत्र तस्यासामर्थ्यादेव। अन्यथा पीतः शङ्खः इत्यादिप्रत्यक्षमूलाज्ञानस्यापि शब्देनानुमानेन च निवृत्तिः स्यात्।

किञ्च सञ्चितबाधकत्वेनाभिमतोऽकर्त्रात्मबोधः स्वयं स्वेन बाध्यते न वा। नाऽद्यः। साक्षात्कारजन्मानुवृत्तविद्यालेशानुवृत्तिप्रसङ्गात्। निवर्तकस्य बाधितत्वात्। तदन्यस्य च तेनैव बाधितत्वात्। अविद्यालेशस्य ज्ञाननिवर्त्यत्वरूपमिथ्यात्वाभावापाताच्च। नान्त्यः। ब्रह्मज्ञानस्य मिथ्यात्वाभावापातात्। तावत्कालं स्थितस्याकस्मादेव निवृत्त्ययोगाच्च। स्वेनैव निवृत्तौ प्रागपि तदापातात्। आरब्धकर्मणः त्वन्मते प्रतिबन्धकत्वायोगस्योक्तत्वात्। तावत्पर्यन्तमनुवर्तमानज्ञानसामर्थ्यादेव हिरण्यगर्भादीनां देहधारणाद्युपपत्तेश्च।

एतेनाप्रारब्धफले एवापूर्वे सुकृतदुष्कृते क्षीयेते। 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये। अथ सम्पत्स्यते' (छा.उ. ६.१४.२) इति शरीरपातावधीकरणाद् इति त्वन्मते सूत्रयोजनाऽप्ययुक्ता। युक्तिविरुद्धेऽर्थे श्रुतेरपि तात्पर्यावधारणायोगात्। कल्पतरुरीत्या हिरण्यगर्भादीनां साक्षात्कारवतामपि श्रुति-

स्मृतिप्रतीतदेहधारणान्यथानुपपत्तेरेव प्रारब्धकर्मणः प्रतिबन्धकत्वकल्पकत्वेन देहधारणश्रुतिस्मृत्यादेरुक्तान्यथानुपपत्त्यादेर्वा सूत्रयितव्यत्वेन तदवधेरिति सूत्रांशायोगाच्च।

अनारब्धकार्यसूत्रे रामानुजाभिमताधिकरणपरीक्षा

केचित्तु सिद्धान्तरीतिमनुसृत्यैव विषयसंशयपूर्वपक्षानभिधायापि कुलालचक्रभ्रमणादिवत् संस्कारवशादेवोत्तरकालीनशरीरस्थित्युपपत्तिमाशङ्क्य 'न च पुण्यापुण्यकर्मजन्यभगवत्प्रीत्यप्रीतिव्यतिरेकेण शरीरस्थितिहेतुभूतसंस्कारसद्भावे प्रमाणमस्ति' इत्याहुः। तन्न। स्वाप्नपदार्थोपादानभूतस्य पूर्वानुभवजनितसंस्कारस्य तृतीये साधितत्वेन भगवत्प्रीत्यात्मकत्वे उपादानाभावप्रसङ्गेन च स्वप्नदृष्टराजादिशरीरोत्पत्तिस्थितिहेतुभूतस्य भगवत्प्रीत्यादिव्यतिरिक्तस्यावश्यमङ्गीकार्यत्वात्। केवलसंस्कारपरम्पराभिः शरीरस्थित्यङ्गीकारे सुखाद्युपलब्धिर्न स्यात् सुखादेः कर्मफलत्वादिति चेन्न। संस्कारवत् सुखानुभवाभावस्यैष्टत्वात्। 'वास्यैकं तक्षतो बाहुं चन्दनेन विलिम्पतः। नाकल्याणं न कल्याणं चिन्तयेत्स मुनिर्भवेत् ॥', 'जडान्धबधिराकृतिः', 'यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम्। नाभिनन्दति न द्वेष्टि' (भ.गी. २.५७), 'स योगी परमो मतः' इत्यादेः पूर्वसंस्कारवशादेव ज्ञानिनां प्रवृत्तिः, न मनःपूर्विका। मनसो दग्धपटायमानत्वादित्येवंविधिवैलक्षण्यस्य शास्त्रे तत्र तत्र व्युत्पादितत्वाच्च। सुखादिलेशस्याप्यननुभवापादने कारणाभावात्। अन्यथा स्वप्नेऽपि तदभावापातात्।

अग्निहोत्रादीति सूत्रद्वयेऽद्वैताभिमताधिकरणनिरासः

यच्चोक्तमग्निहोत्रादीत्यादि सूत्रद्वयमेकमधिकरणम्। उत्पन्नविद्याजन्यकर्मक्षयस्य प्रारब्धकर्मस्वपवाद उक्तः। इदानीमप्रारब्धफलेष्वपि केषुचित्तस्यापवादोऽभिधीयते। पुण्यस्याप्यश्लेषविनाशयोरघन्यायोऽतिदिष्टः। सोऽतिदेशः

सर्वपुण्यविषय इत्याशङ्क्योच्यते। यन्नित्यं कर्म वैदिकमग्निहोत्रादि तत्तत्कार्यायैव भवति ज्ञानकार्यायैव भवति 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' (बृ.उ. ६.४.२२) इत्यादिदर्शनादिति। तन्न।

किमत्र ज्ञानात्पूर्वभाविनोऽग्निहोत्रादेर्ज्ञानेन नाशोऽपोद्यते, उत तदुत्तरभाविनोऽश्लेषः, उत उभावपि। नाऽद्यः। पूर्वभाविनोऽग्निहोत्रादिनित्यकर्मणो 'यज्ञेन दानेन' इत्यादिश्रुत्या ज्ञानार्थत्वावगमेन यागादिजन्यापूर्ववत् फलविनाश्यत्वनियमेनाग्निहोत्रादिजन्यपुण्यस्यापि ज्ञानलक्षणफलविनाश्यत्वावश्यम्भावेन तत्र विनाशापवादायोगात्। न च नित्यकर्मणो मोक्षः शक्यते फलमिति वक्तुम्। मोक्षस्याऽरभ्यत्वप्रसङ्गात्। 'नान्यः पन्थाः' (तै.आ. ३.१२) इत्यादिविरोधात्। 'विविदिषन्ति' इति श्रवणादतिपरम्परया चित्तशुद्ध्यादिद्वारा ज्ञानोपयोगिनः मोक्षहेतुत्वायोगाच्च। ज्ञानस्यैव हि प्रापकं सत्कर्म प्रणाड्या मोक्षकारणमित्युपचर्यत इति त्वद्भाष्यविरोधाच्च। अवघातादिवत् सन्निपत्योपकारकस्याग्निहोत्रादेः ज्ञानस्वरूपनिर्वृत्त्यनन्तरमप्यवस्थाने कारणाभावाच्च। न हि त्वन्मते ज्ञाने मोक्षे विशेषोऽस्ति। यदर्थं तदवस्थानमङ्गीक्रियते।

किञ्चात्र ज्ञानशब्देन निर्गुणविद्याजन्योऽकर्त्रात्मबोध उच्यते, उत सगुणविद्याजन्यः कर्त्रात्मबोधः। नाऽद्यः। अकर्त्रात्मबोधानन्तरं ब्रह्मेतरस्य सर्वस्य मिथ्यात्वसिद्धये ज्ञाननिवर्त्यत्वाङ्गीकारेण नित्यकर्मणोऽविनाशायोगात्। 'निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः। ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैः ॥' इत्युक्तेः, अकर्त्रात्मबोधजनके सगुणसाक्षात्कारेऽपि चित्तशुद्ध्यादिप्रणाड्याऽतिपरम्परया उपयुक्तस्याग्निहोत्रादिसत्कर्मणः सगुणसाक्षात्कारात् पूर्वमेव चित्तशुद्ध्युत्पादनेन नाशावश्यम्भावाच्च। किञ्च पूर्वकालीनाग्नि-

होत्रादेर्नाशाभावो नाम तत्फलभोग एव । न ह्यद्वैतमात्मानं विदुषो विगलितकर्तृत्वभोक्तृत्वादिप्रपञ्चविभ्रमस्य भोगोऽस्ति ।

न द्वितीयः । 'तदधिगमे' इत्यादावकर्त्रात्मबोधस्यैव प्रकृतत्वेन तत्पूर्वकालीनाग्निहोत्रादेः विनाशापवादस्य सङ्गतत्वेऽपि कर्त्रात्मबोधपूर्वकालीनस्य तदसङ्गतेः । तत्रैव सोऽपि प्रकृत इति चेत् क्व तर्हि निर्गुणसाक्षात्कारस्यावकाशः । मोक्षशास्त्रे तत्प्रतिपादनवैय्यर्थ्यं च । ज्ञानात् पूर्वमिह जन्मनि जन्मान्तरे वाऽनुष्ठितं यदग्निहोत्रादि नित्यकर्म तस्यापि काम्यकर्मवद् अकर्त्रात्मबोधवस्तुमहिम्ना नाशोऽभ्युपेय इति भारतीतीर्थोक्तिविरोधश्च ।

एवं द्वितीयोऽपि निराकरणीयः । ज्ञानशब्देन सगुणसाक्षात्कारोक्तौ प्रसक्त्यभावात् । न हि ब्रह्मैक्यापत्तिलक्षणफलप्रतिपादके चतुर्थेऽध्याये सगुणसाक्षात्कारकालीनाग्निहोत्रादेः संश्लेषप्रतिपादने प्रसक्तिरस्ति । निर्गुणसाक्षात्कारोक्तौ च नित्यकर्मणः प्राप्तेरभावात् । न हि विगलितनिखिलकर्तृकरणाधिष्ठानादिसमये तत्सापेक्षाग्निहोत्रादिक्रिया सम्भवति । येन तदश्लेषोऽपोद्येत ।

अत एव न तृतीयः । उक्तं च भामत्याम् । न ह्यद्वैतमात्मानं विदुषो विगलितनिखिलकर्तृत्वभोक्तृत्वादिप्रपञ्चविभ्रमस्य पूर्वोत्तरे नित्यक्रियाजन्ये पुण्यपापे सम्भवत इति ।

कथं चात्र पूर्वपक्षः ? यदि भाष्यरीत्याऽघन्यायातिदेशः सर्वपुण्यविषय इति तदाज्ञानिनामप्यग्निहोत्राद्यनुष्ठानदर्शनेन पूर्वपक्षानुदयः । यदि भामतीरीत्या 'यदि पुण्यस्याप्यश्लेषविनाशौ हन्त नित्यमप्यग्निहोत्रादि न कर्तव्यं योगमारुरुक्षुणा । तस्यापि इतरपुण्यवद् विद्यया विनाशात् । प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्, इति न्यायात्' इति पूर्वपक्षः, तदाऽसङ्गतिः । न हि ज्ञानात्पूर्वकाले

ज्ञानार्थमनुष्ठीयमानस्य काम्यपुण्यवद् विद्याया नाशोऽस्ति । योगारूढस्य विद्योत्पत्तेः ततः पूर्वं विद्यायाः एवाभावात् । विनष्टुं योग्यत्वादिति व्याख्यानेऽप्यनुपपत्तिरेव । अपूर्वन्यायेन विद्यालक्षणफलोत्पत्त्यनन्तरं विनाशेऽपि ततः पूर्वं विद्योत्पत्त्यर्थमग्निहोत्रादीनामनुष्ठानसम्भवात् । अन्यथा स्वर्गानन्तरमपूर्वस्य विनाशात् तदर्थमपूर्वमपि ततः पूर्वं न सम्पाद्येत ।

ननु यदि विद्या पुण्यस्य कस्यचिन्निवर्तिका तर्हि पुण्यान्तरादपि नोदेतुम् अर्हति । न हि तमोनिवर्तकः प्रदीपः तमोऽन्तरादुदेति, विरोधस्य जात्युपाधित्वादिति कल्पतरूक्तेः नैष दोष इति चेन्न । घटस्वर्गविनाश्ययोः प्रागभावापूर्वयोः घटस्वर्गजनकत्वदर्शनात् । किञ्च विमतं ज्ञानं न स्वनिवर्त्यजन्यम् । तन्निवर्तकत्वात्, यो यन्निवर्तको नासौ तज्जन्यः । यथाऽन्धकारनिवर्तकः प्रदीपो नान्धकारजन्य इति प्रयोगे व्यावहारिकत्वमुपाधिः । यत्र स्वनिवर्त्त्यजन्यत्वं तत्र व्यावहारिकत्वमिति व्याप्तेः । अग्निहोत्रादिनिवर्तकत्ववति पक्षे त्वन्मते आविद्यकत्वाद् व्यावहारिकत्वाभावेन साधनाव्यापकत्वात् । केवलान्वयिसाध्यके व्यतिरेकव्याप्तेरभावे व्यभिचारित्वादेरापत्त्याऽत्र व्यतिरेकव्याप्तावन्वयव्याप्तौ च घटादौ व्यभिचारापाताच्च । अत एवैतत्सङ्कटाद्बिभ्यत् ''सगुणविद्याविषयं वर्णकान्तरम् । अत्र वर्णके 'सुकृतदुष्कृते अपि विधूनुते' इत्यविशेषश्रवणात् अग्निहोत्रादिलय इति पूर्वपक्षः । सगुणविद्याफलस्य कर्मसाध्यत्वयोग्यत्वाद् 'यक्ष्यमाणो ह वै भगवन्तोऽहमस्मि' इत्यादिसमुच्चयलिङ्गात् सुकृतशब्दस्य च काम्यविषयत्वात् नित्यकर्मसगुणविद्ययोः समुच्चय इति सिद्धान्तः'' इति भाष्यभामत्यौ व्यासाश्रमो व्याचख्यौ (व्यासाशयं व्याचख्यतुः(?)। तदेतदकाण्डताण्डवन्यायेन निरस्तम् ।

किञ्चैवं वर्णकद्वयेऽपि 'तस्य पुत्रा दायमुपयन्ति' (ब्र.सू.भा.उ. शाठ्यायनश्रुतिः) इत्यादिश्रुतीनां निर्विषयत्वापातः । तथा हि 'सुहृदः

साधुकृत्याम्' (ब्र.सू.भा.उ. शाठ्यायनश्रुतिः) इत्यत्र न तावदुपास्य-साक्षात्कारात् प्राचीनं काम्यं कर्म विषयः । तस्य साक्षात्कारादेव विनाशात् । नापि तत्पाश्चात्यं कर्म सुहृद्भिः साधुकृत्याग्रहणसिद्ध्यर्थम् । क्रममुक्तिफले दत्तदृष्टेर्विरक्तस्य तद्विरोधिनि काम्यकर्मणि बुद्धिपूर्वमनुष्ठानाप्रसक्तेः । नापि वासनावशात् प्रवृत्तमपूर्वं कर्म । तस्यासङ्कल्पितफलत्वात् कचिदपि फल-साधनत्वाभावेन सुहृद्भिः ग्रहणायोगात् । कथञ्चित् फलसाधनकाम्य-कर्मानुष्ठानसम्भवेऽपि तस्याश्लेषवचनविषयत्वेनैतद्वचनविषयत्वानुपपत्तेश्च । अन्यथाऽश्लेषवचनं निर्विषयं स्यात् । न चैकमेव कर्म विद्योत्पत्त्यनन्तरमनुष्ठितं काम्यं तत्कर्तरि विदुष्यसंश्लिष्टमेव देहपातकाले सुहृदि सङ्क्रान्तमिति वचनद्वयस्यापि विषयलाभ इति वाच्यम् । तावत्पर्यन्तं तस्य कर्मणो निराधारत्वापातात् । न च कर्ता ज्ञानी तस्याऽधारः, अश्लेषवचनेन तत्संयोगनिषेधात् । नापि सुहृदः । ज्ञानिनो देहपातसमये सुहृत्संयोगाभिधानात् । अत एव 'पापकृत्याम्' इत्यस्यापि विषयो दुर्निरूपः । नन्वश्लेषो न संयोगाभावः । किन्तु विद्वांसं प्रति फलजननानर्हतैव । देहवियोगकाले सुहृद्गामित्वं च फलजननार्हतोत्पत्तिरूपम् । अतो न निराधारत्वापत्तिरिति चेन्न । 'तस्य पुत्रा दायमुपयन्ति' इति दृष्टान्तानुसारेण यावद्देहधारणमुपासकं प्रति फलजननयोग्यतयावस्थितयोरेव पुण्यपापयोः देहवियोगकाले सुहृद्द्विषतः प्रति तद्योग्यताविर्भावप्रतीतेः । न हि पितरि यावद्देहधारणं फलजननायोग्यतयाऽवस्थितमेव दायं पुत्रा गृह्णन्ति । न च त्वन्मतेऽकर्त्रात्मबोधानन्तरं विदुषो यत्किञ्चिदाधारता सम्भवति । येन तत्संयुक्तमपि कर्म तत्र फलानाधानमात्रेणाश्लेषवचनविषयो भवेत् ।

एतेन 'तस्य पुत्रा दायमुपयन्ति' (ब्र.सू.भा.उ. शाठ्यायनश्रुतिः) इति इत्येतद्देहपातकालोपलक्षणमात्रम् । न तु दृष्टान्तपरम् । तत्परत्वेऽपि वा सर्वात्मना साम्यं न विवक्षितम् । किन्त्वन्यसङ्क्रमणमात्रेणेति च निरस्तम् । निराधारस्य कर्मणः सङ्क्रमणकालपर्यन्तमवस्थानायोगाद् इत्युक्तत्वात् ।

यदत्रोक्तं नवीनैः उपासकस्याभ्युदयफलानिच्छायामपि तामजानद्भिः पुत्रादिभिः पुत्राभ्युदयेच्छया पित्रा कृतजातेष्ट्यादीनीव पित्रभ्युदयेच्छयाऽनुष्ठितानि तटाकप्रतिष्ठादीनि काम्यकर्माणि सन्ति । किञ्च द्वादशवार्षिकसत्र-वाक्यानामयनादिषु तत्तत्फलेच्छया प्रवृत्तस्य मध्ये वीतफलेच्छस्य क्रममुक्ति-फलेच्छया ब्रह्मोपासनायां प्रवृत्तस्य तन्मध्य एव लब्धोपास्यसाक्षात्कारस्य प्रक्रमात्तु नियम्येतेति पूर्वतन्त्रन्यायेन (जै. अ.६,पा.२,सू.१३) अवश्यसमापनीयत्वेन प्राप्तानि द्वादशवार्षिकसत्रादीनि काम्यकर्माणि जन्मान्तरेषु ज्ञानिव्यतिरिक्ता-नामवश्यभोक्तव्यफलानि सन्ति । किं बहुना ? उपासनासहकारित्वेन नित्यत्वेन चोपासनाकालेऽप्यनुष्ठेयानां दर्शपूर्णमासादीनामङ्गान्यग्न्यन्वाधानप्रस्तरयागादीनि 'ममाग्ने वर्चो विहवेष्वस्तु' (ऋ.सं. १०.१२८.१), 'आयुराशास्ते सुप्रजास्त्वमाशास्ते' इत्यादिकरणमन्त्रप्राकाश्यवर्चःप्रभृतिफलवन्ति । एतेभ्यश्च सङ्कल्पाभावेऽपि फलान्यवश्यं भवन्त्येव । अन्यथोक्तमन्त्रप्राकाश्ययजमान-गामितत्फलप्रार्थनानामनुष्ठेयार्थसम्बन्धित्वाभावेन तद्वारैतेषामनुष्ठेयार्थ-प्रकाशकत्वाभावप्रसङ्गात् । तथाऽस्य पापकर्माण्यपि परैराचरितान्युपासक-सङ्क्रमणायोग्यानि सम्भवन्ति । 'यदन्यकृतमारिमा' इत्यादिश्रौतलिङ्गात् । एवम्भूतपुण्यपापकर्मविषया तदश्लेषाद्युक्तिरिति ।

तदपि न स्वसिद्धान्तसमीक्षिताभिधानम् । यतः स्वसिद्धान्तेऽकर्त्रात्म-बोधानन्तरं न कस्यापि क्रियाकारककल्पस्य सत्त्वमस्ति । अद्वैतभङ्गप्रसङ्गात् । पित्रादिकृतजातेष्ट्यादिना पुत्रेऽपूर्वसम्बन्ध इव पुत्रादिकृतकर्मणा विदुषि पितरि तज्जन्यापूर्वसम्बन्धाभावेनान्यत्र सङ्क्रमणायोगाच्च । द्वादशवार्षिकसत्रानुष्ठानमध्ये जातसाक्षात्कारस्य निष्प्रपञ्चब्रह्मस्वरूपमनुभवतः कर्मशेषसमापन-विध्यगोचरत्वात् । कर्मनिर्वर्तकानां समिद्दर्भादीनां ज्ञानेन निवृत्तत्वाच्च । अन्यथा तेषां मिथ्यात्वासिद्धेः । 'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ।' (भ.गी.

४.३३) इति वचनविरोधाच्च। वर्चःप्रभृतीनां फलानां यजमानगामित्वनियमेऽपि प्रत्यवायेन वैगुण्येन वा कारणविशेषेण तद्गामित्वाभाववद् इह प्रबोधलक्षण-कारणविशेषेण ज्ञानियजमानगामित्वाभावोपपत्तेः। तस्मात् त्वन्मतेऽपरिहार्य उपायनाश्लेषवचनयोर्विषयलाभ इत्यलं पल्लवितेन।

अग्निहोत्रादीति आद्यसूत्रस्य परोक्तार्थनिरासः

एतेन यन्नित्यमग्निहोत्रादि तत्तत्कार्यायैव, ज्ञानस्य यत्कार्यं तदेवास्यापि कार्यमित्यर्थः। कुतः 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' (बृ.उ. ६.४.२२) इत्यादिदर्शनात्। यद्वा, तस्य कर्मसाध्ययोगफलस्य सगुणविद्यासाध्यमुक्तौ दर्शनादित्याद्यस्य व्याख्यानं निरस्तम्। 'यज्ञेन दानेन' इत्यादिश्रुत्या विविदिषाद्वारा ज्ञानं प्रत्येव हेतुत्वाभ्युपगमात्। ज्ञानस्यैव प्रापकं सत्कर्म प्रणाड्या मोक्षकारणमित्युपचर्यत इति तु प्रलापमात्रम्। तच्च तत्कार्यं चेति कर्मधारयोपपत्तौ षष्ठीसमासमाश्रित्य कारणत्वमौपचारिकमित्यभ्युपगमस्यायुक्तत्वात्। न भविष्यति च हेतोरसङ्गत-त्वम्। न चैवमेवास्तु व्याख्यानमिति वाच्यम्। आगामिनोऽग्निहोत्रादेः ज्ञानाख्यकार्यं प्रति हेतुत्वायोगात्। तदर्थं षष्ठीसमासाश्रयणे त्वन्मते मोक्षे ज्ञानोत्तरकृतकर्मसाध्यानन्दाभिवृद्ध्यादेरनङ्गीकारेण मोक्षस्य कर्मसाध्यत्वा-भावात् सौत्रहेत्वसङ्गतेश्च। द्वितीयव्याख्यानं तु प्रकरणविरुद्धम्। नहीह सगुणविद्याफलं प्रकृतम्।

अतोऽन्यदपीति द्वितीयसूत्रस्य परव्याख्यानिरासः

यच्च 'अतोऽन्याऽपि' इत्यपपाठेन द्वितीयं पठित्वा, अतोऽग्निहोत्रादेः नित्यात् कर्मणोऽन्या ह्यस्ति साधुकृत्या या फलमभिसन्धाय क्रियते। तस्याः सुहृदः साधुकृत्यामित्येकेषां शाखासु विनियोग उक्तः। तस्या एव चेतरस्याप्यसंश्लेष इत्यश्लेषविनाशनिरूपणम्। काम्यस्य कर्मणो विद्यां प्रत्यनुपकारकत्वे जैमिनि-

बादरायणयोराचार्य-योरुभयोरपि सम्प्रतिपत्तिरिति योजनीयमित्युक्तम्। तदेतन्मद्रीत्या सम्भवदपि त्वद्रीत्याऽसम्भवीत्युक्तमेव।

अग्निहोत्रादीत्यादिसूत्रद्वयस्य रामानुजाभिमतव्याख्यानिरासः

एतेन एतत्सूत्रद्वयस्य रामानुजीयं व्याख्यानं चानादेयम्। तन्मतेऽपि ज्ञानोत्तरकृतकर्मणः ज्ञानकार्यमोक्षार्थत्वाभावात् मौक्तिकानन्दादेर्न्यूनाधिकभाव ईर्ष्यासूयादिदोषप्राप्तिभयेन सर्वसाम्याङ्गीकारादिति।

यदेवेति पराभिमताधिकरणपरीक्षा

यच्चोक्तम् 'यदेव विद्ययेति हि' इत्येकं सूत्रमधिकरणान्तरम्। पूर्वोक्ताग्नि-होत्रादिष्वेवाङ्गावबद्धोपास्तिसाहित्यानियम इह चिन्त्यते। समधिगतमेतदनन्त-राधिकरणे नित्यमग्निहोत्रादिकं मुमुक्षुणा मोक्षप्रयोजनोद्देशेन कृतमुपात्त-दुरितक्षयहेतुद्वारेण सत्वशुद्धिकारणतां प्रतिपद्यमानं मोक्षप्रयोजनब्रह्माधिगम-निमित्तत्वेन ब्रह्मविद्यया सहैककार्यं भवतीति। तत्र 'य एवं विद्वान् जुहोति, य एवं विद्वान् यजति, य एवं विद्वान् शंसति, य एवं विद्वान् गायति, तस्मादेवंविदमेव ब्रह्माणं कुर्वीत' (छा.उ. ४.१७.१०), 'तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद' (छा.उ. १.१.१०) इत्यादिवचनेभ्यः। कर्माङ्गव्यपाश्रयविद्या-संयुक्तमग्निहोत्राद्यस्ति, केवलं चास्ति। तत्रेदं विचार्यते। अङ्गावबद्धोपास्ति-सहिताग्निहोत्रादिकमेव कर्तव्यमुत केवलमपीति। 'यदहरेव जुहोति तदहः पुनर्मृत्युं जयति एवं विद्वान्', 'बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि' (भ.गी. २.३९) इत्यादिवचनेभ्यः विद्यासंयुक्तमेवाग्निहोत्रादिकं कर्तव्यमिति प्राप्ते 'तमेतमात्मानं यज्ञेन विविदिषन्ति' इत्याद्यविशेषेणाग्निहोत्रादेः विद्याहेतुत्व-श्रवणान्नात्यन्तमनपेक्षमेव विद्यारहितं कर्म। अत एव 'यदेव विद्यया करोति तदेव वीर्यवत्तरं भवति' इति तरप्प्रयोगो युज्यते। वीर्यवतोऽभावे वीर्यवत्तर-

स्याभावात्। स्वप्रयोजनसाधनसहत्वरूपवीर्यवत्त्वं विद्याहीनस्याग्निहोत्रादेरस्तीति गम्यत इति।

तन्न। प्राप्ताप्राप्तविवेकेनाङ्गावबद्धोपास्तिकर्तव्यचिन्तापर्यवसानेन तस्याश्च 'तन्निर्धारणार्थनियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम्' इत्यधिकरण एवानङ्गत्व-प्रतिपादनेन गतत्वात्।

अत्रोक्तं भामत्याम्- 'ब्राह्मणाय हिरण्यं दद्यात्' इत्युक्ते विदुषे ब्राह्मणाय दद्यात्। न ब्राह्मणब्रुवाय मूर्खायेति विशेषप्रतिलम्भः। तत् कस्य हेतोः ? तस्यातिशयवत्त्वात्। एवं विद्यारहिताद् यज्ञादेः विद्यासहितमतिशयवदिति तस्यैव परविद्यासाधनत्वमुपात्तदुरितक्षयद्वारा नेतरस्य' इति। कल्पतरौ चैतद् विवृतम्। विद्यायुक्तकर्मप्रशंसया विद्याविहीननिषेधः कल्प्यते। न च विधि-विरोधः। केवलं कर्म कुर्यादित्यश्रवणात् कर्मस्वरूपविधेश्च पारशाखिकाङ्गनियमे इवोपास्तिनियमेऽप्युपपत्तेः। अतश्च विद्यानां पुनरङ्गत्वोन्मज्जने तन्निवृत्त्यर्थमारम्भ इति। तन्न। प्रशंसामात्रेण निषेधकल्पनायोगात्। अन्यथाऽपशवो वाऽन्ये गोअश्वेभ्यः इति गवाश्वप्रशंसयाऽप्यजादिनिषेधः कल्प्येतेत्यभ्यधिकाशङ्का-न्यायस्यैवानुदयात्।

किञ्च, अनाश्रमिकृतानामपि कर्मणां तृतीये विद्यासाधनत्वं प्रतिपादितम्। पत्न्यादिरहितानाश्रमिणां च तत्साध्यकर्मसु नाधिकारः। सुतरां चोद्गीथादि-कर्माङ्गावबद्धोपास्तिषु। तथा च तदनङ्गत्वस्याऽऽश्रमकर्मस्वनुक्तिसिद्धत्वेन न सर्वथाऽभ्यधिकाशङ्कोदयः। यथोक्तं भट्टपादेन-

विद्यार्थत्वं यदा यायुरनाश्रमिकृताः क्रियाः।
तदोपास्तिविहीनेषु का कथाऽऽश्रमकर्मसु॥' इति।

यदत्रोक्तम् (कल्पतरुपरिमले) अनाश्रमिणां यज्ञाद्यनधिकारिणां जपादिना,

शूद्रस्य शुश्रूषामात्रेणेव सिद्धिरस्तीत्येतावता न तदधिकारिणामपि यज्ञाद्यङ्ग-वैकल्येऽपि सिद्धिरस्तीति कल्पयितुं शक्यम्। यथोक्तम्-

नाऽश्रमोक्तक्रियास्वस्ति विधुरादेरधिक्रिया।
ततस्तदीयजप्यादि विद्यासाधनमीरितम्।
विद्योपेतेषु शक्तस्य तत्त्यागादन्यकारिणः।
न विद्या सेत्स्यतीत्येषा शङ्का केन निवार्यते॥ इति।

तदिदं कर्णप्रश्ने कटिचालनन्यायमनुकरोति। विधुराणामङ्गोपास्तिरहितानि कर्माणि विद्यां साधयन्तीत्युपास्तीनामङ्गत्वमेव नास्तीत्यस्य विधुरेतरेषामङ्गवैकल्ये फलं नास्तीत्यस्यानुत्तरत्वाच्च। तस्मादभ्यधिकाशङ्काया एवानवकाशः। कथञ्चिदवकाशेऽपि तृतीयान्तर्भावस्यैव युक्तत्वाच्च। प्रासङ्गिकत्वं तु न सम्यक् समाधानम्। मद्रीत्या ब्रह्मदर्शिकृतपुण्यस्याविनाशेऽपेक्षितयुक्तिसूचनार्थ-त्वेनैकाधिकरणत्वे सम्भवत्यधिकरणभेदमाश्रित्य सङ्गतिगवेषण-प्रयासासम्भवाच्च।

रामानुजोक्तस्य यदेवेति सूत्रार्थस्य निरासः

केचिदिदं पूर्वशेषमङ्गीकृत्याप्यनुष्ठितस्यापि कर्मणः फलप्रतिबन्धसम्भवं पूर्वोक्तं स्मारयति 'सुहृदस्साधुकृत्याम्' इत्यस्य विषयलाभायेत्यवतार्य 'यदेव विद्यया करोति' (बृ.उ. ६.४.२२) इत्युद्गीथविद्यायाः क्रतुफलाप्रतिबन्ध-फलकत्ववचनेनानुष्ठितस्यापि कर्मणः फलप्रतिबन्धः सूच्यत इति व्याख्यान्ति। तदेतद्वैय्यर्थ्यं प्रकारान्तरेण प्रतिपादितमित्युक्तमेव। प्रतिबन्धफलस्य कर्मणः सुहृद्भिः ग्रहणायोगाच्च। ज्ञानिन्यपि प्रतिबन्धवशात् फलमजनयत् सुकर्माज्ञे तत्सुहृदि साधयिष्यतीति च दुराशामात्रम्। सौभर्यादौ ज्ञानस्यानुष्ठितकर्म-फलप्रतिबन्धकत्वादर्शनाच्च।

भोगेनेति परोक्ताधिकरणस्य परीक्षा

यदप्युच्यते 'भोगेन त्वितरे' इत्येतदेकमधिकरणान्तरम्। 'अनारब्धकार्ये' इत्यस्य नञः फलं भोगेन निवृत्तिं दर्शयत्यनेन सूत्रेण। एवमत्र पूर्वपक्षः। येषां विद्यायोनिशरीरावसानं प्रारब्धं तेषां विद्याफलमस्तु नाम। येषां त्वनेकशरीरानुयायि, तेषां तत्फलं न सम्भवति। जन्मान्तरस्य पूर्वसंस्कारप्रमोषकतया शरीरान्तरे विद्याविहीनैः क्रियमाणानां कर्मणां बन्धहेतुत्वेन ततो जन्मपरम्पराया एव प्राप्तेः। न च तेषां जन्मान्तरं न संस्कारप्रमोषकम् इति कल्प्यम्। दृष्टनियमसङ्कोचकाभावात्। न च 'यावन्न विमोक्ष्ये' इति प्रारब्धकर्मविमोक्षावधिवचनं सङ्कोचकम्। 'धूत्वा शरीरम्' इति श्रुत्यन्तरानुसारेण तस्य शरीरविशेषावधिपरतया येषां विद्यायोनिशरीरावसानं प्रारब्धं तद्विषयत्वोपपत्तेः। न च 'धूत्वा शरीरम्' इत्यत्र शरीरग्रहणं प्रारब्धकार्ययावच्छरीरपरम्। एकवचनग्रहणात्। 'अस्माच्छरीरात् समुत्थाय' इति श्रुत्यन्तरेऽस्मादिति विशेषणेन विद्यायोनिशरीरस्यैव विवक्षितत्वाच्च। मृतिजन्मान्तरायेण विद्याविस्मृतिसम्भवात् विद्वद्देहान्तरोपात्तकर्माश्लेषो न विद्ययेति।

सिद्धान्तस्तु-

अप्रमृष्टा स्मृतिः प्राचां स्मर्यते नैकजन्मसु।
अवधारणसामर्थ्यादन्येषामपि कल्प्यते॥

देहान्तरे संस्कारप्रमोष आधिकारिकाणामपि कल्प्यते, अस्मदादीनां वा। आधिकारिकाणां तत्कल्पना न सम्भवति। आगमविरोधात्। नास्मदादीनाम्। मुक्त्यर्थविद्यानुष्ठानप्रतिपादकबहुशास्त्रप्रामाण्यात्। 'तस्य तावदेव चिरम्' इति विवक्षितावध्यवसाने मुक्त्यवश्यम्भावप्रतिपादकावधारणप्रामाण्याच्च। 'यावन्न विमोक्ष्ये' इत्यस्य प्रारब्धकर्मावधिपरत्वं, विदुषां जन्मान्तरस्य संस्कारे प्रमोषानापादकत्वं च कल्प्यम्। अतः प्रारब्धभोगानन्तरं मुक्तिर्नियतेति।

तन्न। अखण्डार्थनिष्ठवेदान्तजन्यब्रह्मतत्वज्ञानस्य तस्मिन्नारोपिताशेषप्रपञ्चस्य च त्वन्मते निवृत्त्यङ्गीकारेण तदन्तःपातिविद्यायोनिशरीरस्य जन्मान्तरस्य तन्निमित्तकर्मदेर्वा तन्निमित्तकसुखदुःखानुसन्धानरूपभोगस्य तद्धेतुमनआदेर्वा निवृत्त्यवश्यम्भावस्योक्तत्वात्।

ननु चन्द्रैकत्वदर्शनेऽपि द्विचन्द्रदर्शनमनुवृत्तं दृश्यते। तथा ब्रह्मैकत्वज्ञानेऽपि द्वितीयप्रपञ्चदर्शनं मिथ्याज्ञानमप्यनुवर्तते। तत्कृतं च शरीरं तदारम्भककर्माद्यनुवर्तते। यदा लोकेऽपि विरोधिनोश्चन्द्रैकत्वतद्वित्वज्ञानयोः किञ्चित् कालमनुवृत्तिरूपलब्धा तदेहागमबलाद् दीर्घकालमपि भवतीति न शक्या निवारयितुम्। प्रमाणसिद्धस्य नियोगपर्यनुयोगानुपपत्तेरिति चेन्न।

द्विचन्द्रज्ञानमनुवर्तत इति कोऽर्थः। यदि जले चन्द्रप्रतिबिम्बितस्य ज्ञानमित्यर्थः, तदा प्रतिबिम्बितचन्द्रान्तरविषयप्रतीतेः प्रतिबिम्बस्य सत्त्वादेव भ्रमत्वानुपपत्तेः। चन्द्रैकत्वज्ञानानुवृत्त्यसम्भवाच्च। अङ्गुल्यवष्टम्भादिना जनितद्विचन्द्रज्ञानं चेत् तदा चन्द्रैकत्वज्ञानस्याऽनुमानिकत्वेन 'पीतः शङ्खः' इत्यादाविवाविरोधात्। न चेहाप्यद्वैतज्ञानं द्वैतभ्रमाविरोधीति वक्तुं शक्यम्। उत्तरपूर्वाघविनाशाद्यनुपपत्तेः।

किञ्च यथा देहपातात् प्राक् सत्यपि सम्यग्दर्शने भेददर्शनं द्विचन्द्रन्यायेनानुवर्तते तथा देहपातात् पश्चादपि भेददर्शनं कुतो नानुवर्तते। ननूपभोगशेषक्षपणं हि तत्रानुवृत्तिनिमित्तमस्ति। ततः पश्चादपि भेददर्शनानुवृत्तौ निमित्ताभाव इति चेन्न। भेदवासनादेरेव निमित्तत्वोपपत्तेः। वासनादेरप्यनुवृत्तौ निमित्तं नास्तीति चेत्। भोगशेषक्षपणानुवृत्तौ किं निमित्तं दृष्टमिति तुल्यम्।

किञ्चापरः कर्माशयः अभिनवमुपभोगमारप्स्यते। तस्योपभोगस्य क्षपणं भेदज्ञानानुवृत्तौ निमित्तं भविष्यति। ननु मिथ्याज्ञानावष्टम्भं हि कर्मान्तरं देहपाते

उपभोगान्तरमारभते। तच्च मिथ्याज्ञानं सम्यग्ज्ञानेन दग्धमिति दग्धबीजत्वान्न भेदज्ञानावष्टम्भं कर्मान्तरं भोगान्तरमुत्पादयेदिति चेन्न । दग्धबीजत्वादेव देहादिनोपभोगशेषक्षपणकार्योत्पत्तेरप्यनुपपत्तिप्रसङ्गात्।

एतेन नियमसूचनार्थमावश्यकाथशब्दस्योद्धापेन 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये' इति श्रुत्यनुसारिणः सम्पत्स्यत इति पाठस्यापि अपलापेन सम्पद्यत इति पाठकल्पनेन च सूत्रव्याख्यानं निरस्तम् । सम्प्रदायागतपाठातिक्रमेण व्याख्यानायोगात्।

रामानुजोक्तस्य भोगेनेत्यधिकरणस्य परीक्षा

केचित्तु आरब्धकार्ये पुण्यपापे किं विद्यायोनिशरीरावसाने, उत तच्छरीरावसाने शरीरान्तरावसाने वेत्यनियम इति संशये 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये' इति तच्छरीरविमोक्षावसानत्वश्रवणात् तदवसाने, इति प्राप्ते ते पुण्यपापे एकशरीरोपभोग्यफले चेत्, तच्छरीरावसाने सम्पद्यते । अनेकशरीरभोग्यफले चेत् तदवसान इत्यनियमः । भोगेनैव क्षपयितव्यत्वाद् आरब्धफलयोः कर्मणोरवधिवाक्ये च देहावधिनियमाश्रवणात्। तदेवं ब्रह्म-विद्यायाः प्रागनुष्ठितमभुक्तफलमनारब्धफलं पुण्यपापरूपं कर्मानादि-कालसञ्चितमनन्तं विद्यामाहात्म्याद् विनश्यति । तदुत्तरकालमनुष्ठितं च न श्लिष्यति । तत्र पुण्यरूपं विदुषः सुहृदो गृह्णन्ति, पापं च द्विषन्त इति सिद्धान्तयित्वाऽथशब्दयोगेन सूत्रं पठित्वाऽपि सम्पद्यत इत्येव पठन्ति।

तेषां पूर्वपक्षोत्थानं निर्दलमेव । अवधिवाक्ये शरीरविमोक्षावसानत्व-श्रवणादतिरिक्तवचनेन पूर्वपक्षानुत्थानात्। यच्च ज्ञानोत्तरकृतकर्मणोऽश्लेष एव 'सुहृदः साधुकृत्याम्' इत्यादिश्रुत्यभिप्रेत इत्युक्तम्। तन्न। देहपातसमय एव सुहृदादिभिः ग्रहणानुशासनात् । तावत्पर्यन्तं निराधारकर्मावस्थानानुप-

पत्तेरुक्तत्वात्। 'सम्पद्यते' इति पाठस्तु श्रुत्यननुगुणः अपपाठ एव। श्रुतौ हि यावन्न विमोक्ष्येताथ सम्पत्स्यत इति वक्तव्ये 'लोपस्त आत्मनेपदेषु' इति छान्दसे तकारलोपे विमोक्ष्ये सम्पत्स्य इति जायत इति सूचनाय सम्पत्स्यत इति पाठः आचार्योदाहृतः सुपाठ इति दिक्।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- सप्ताधिकरण्यामिव नात्राध्यायादिसङ्गत्यभाव इत्याह- **अत्र प्रासङ्गिकमिति** ॥ कर्मक्षयेति पादसङ्गतिः, फलेत्यध्यायसङ्गतिश्चोक्तेति ध्येयम्।

'पश्यतो ब्रह्म निर्द्वन्द्वं हीनं च ब्रह्म पश्यतः।
द्विषतो वा भवेत्पुण्यनाशो नास्त्यत्र संशयः॥'

इत्यादौ सम्यग्ज्ञानमिथ्याज्ञानयोस्तत्फलयोश्च विचारौ सङ्कलय्य भगवद्दर्शनं दृढतरमिथ्याज्ञानं च विषयः, मुक्तिं पतनं च जनयतो, न जनयतो वेति सन्देह इत्यादिक्रमेण द्विपर्वाऽयं विचार इति केचिद्व्याचक्षते। तत्तु[1] टीकाकृदाचार्यो न मेने[2]।

इतरस्याप्येवमसंश्लेषः पाते तु,

'यथाऽश्लेषो विनाशश्च मुक्तस्य तु विकर्मणः।
एवं सुकर्मणश्चापि पततस्तमसि ध्रुवम्॥'

इति सूत्रभाष्ययोरेवंशब्दप्रयोगात् सम्यग्ज्ञानस्यैव मुख्यविषयत्वावगमात्। अत एव तत्समानन्यायत्वादित्यादिनाऽप्रधानप्रमेयत्वाभिप्रायेण तत्सूत्रावतार-

१. तच्च इति पाठान्तरम्।
२. 'नानुमेने' इति म. पाठः।

टीकाऽपि दृश्यते। तदेतदाह - **प्रकृतं ज्ञानमेव विषय इति** ॥ न त्वन्येषामिव मिथ्या-ज्ञानमपि। तस्य प्रकृतत्वाभावादिति भावः।

कृतकृत्यतेति पूर्वपक्षन्यायविवरणव्याख्यानम्

कृतकृत्यता चेत्युक्तन्यायं सम्बन्ध्यादिप्रदर्शनेन विवृण्वत्

'न च ज्ञानोदयेऽशेषकर्मक्षये कृतकृत्यत्वात् तदैव मुक्तिः, न चेत् कर्माक्षय इति वाच्यम्।'

इति वाक्यं न ज्ञानेन मोक्ष इति पूर्वपक्षस्य न साक्षादुपपादकमिति मनसि निधाय उत्तरसूत्रसन्दर्भसूचितां युक्तिं मध्येऽध्याहरन्नवतारयति- **प्रागापादितकर्मणां भावादिति** ॥ अश्लेषविनाशोक्त्या सूचितेयं युक्तिः। सूत्रेऽनारब्धपदप्रयोग-सूचितां युक्तिमाह- **नाभुक्तं क्षीयते कर्मेति स्मृतिविरोधादिति** ॥

पूर्वतन्त्रेण गतार्थतां प्रतिक्षिपति- **न च प्रायश्चित्तेनेति** ॥ पूर्वतन्त्राक्षेपेणैव प्रवृत्तेर्नैष दोष इति समाधत्ते- **विप्रतिपत्तेरिति** ॥ द्वादशाब्दव्रताचरणेन ब्रह्महत्याक्षयस्यास्माकमसम्मतेः। यतो गतार्थता स्यादिति भावः। तर्हि 'ब्रह्महा द्वादशाब्दव्रतं चरेत्' इति प्रायश्चित्तविधेः निरालम्बनत्वप्रसङ्ग इत्याशङ्क्य नात्र ब्रह्महत्याया द्वादशाब्दव्रताचरणेन निवृत्तिरुच्यते। 'नाभुक्तं क्षीयते' इति वचनविरोधादेव। किन्तु ब्रह्महत्याजनिताशुचित्वादिप्रत्यवाय एव निवर्तत इत्युच्यते। सम्मतं चैतन्मीमांसकानामपि। अन्यथा 'यस्य गृहान् दहत्यग्रये क्षामवते पुरोडाशमष्टाकपालं निर्वपेत्' इत्यादौ गत्यभावप्रसङ्गः। न हि गृहदाहनिवृत्तिः इष्ट्या भवतीति वक्तुं शक्यम्। गृहस्य पुनरुन्मज्जनप्रसङ्गात्। परं तु गृहदाहेन लौकिकाग्निसम्पर्कादिजनितप्रत्यवाय एव परिह्रियते। तथा चैवं तदुपमर्देन वृत्तेर्न गतार्थतेत्याह- **ब्रह्महेति** ॥ नन्वेवमस्याधिकरणस्य पूर्वतन्त्रे निवेशः

स्यादित्याशङ्क्य समाधानान्तरमाह- **अस्तु वेति** ॥ अभ्यधिकाशङ्कया पुनः प्रवृत्तेर्न पूर्वतन्त्रेण गतार्थतेति भावः।

यत्सङ्गत्यर्थं ज्ञानेनैव प्राचीनकर्मणां क्षयः पश्चात्तनानामश्लेष इति पक्षमाशङ्क्य 'तद्व्यपदेशात्' इति सूत्रसूचितस्मृतिविरोधाख्यं दूषणं स्वयमुक्तवान् तत्रैव दूषणान्तरपरतया विवरणं योजयति- **किञ्च ज्ञानेनैवेति** ॥

विवरणार्थः

अनेन ज्ञानोदयेऽशेषकर्मक्षयो भवतीति वदन् किं ज्ञानानन्तरमेव मुक्तिमङ्गी-करोति, उत कालान्तरे। आद्ये 'एवं मुक्तिफलनियमः' इत्यादौ कालान्तरे तत्प्राप्युक्तेः तदैव मुक्तिः सिद्धान्तिनोऽनिष्टैव। तथा चोक्तरीत्या तस्य कृतकृत्य-त्वान्मुक्तिसामग्रीसम्पूर्णत्वात् तदैव मुक्तिरनिवारिता स्यात्। न चैवं दृश्यत इति ज्ञानानन्तरमेव मुक्तिरित्यङ्गीकर्तुं न शक्यते। द्वितीयपक्षो दूष्यते- **न चेत् कर्माक्षय इति** ॥ ज्ञानानन्तरमेव मोक्ष इति न चेदङ्गीक्रियते तर्हि ज्ञानेन कर्मक्षयाभावो बलादापतितः तावत्पर्यन्तं शरीरावस्थानस्याऽवश्यकत्वेन तस्य च निष्कारणमव-स्थानायोगेन निमित्तकर्मणामवस्थानावश्यम्भावादिति विवरणार्थो द्रष्टव्यः।

न चेत् कर्माक्षय इत्यंशं प्रकारान्तरेण व्याख्यातुमवतारयति- **न च वक्तव्य-मिति** ॥ नञ्व्यत्यासेन वाक्यं व्याख्याति- **तथा सतीति** ॥ कदाऽपीत्यध्या-हारः। ज्ञानं कर्म तदेव क्षिणोति चेत् कदाऽपि कर्मक्षयो न स्यादित्यर्थः।

कृतसंस्थित्याख्यसिद्धान्तन्यायविवरणव्याख्यानम्

कृतसंस्थितिश्चेत्युक्तन्यायं सम्बन्ध्यादिप्रदर्शनेन विवृण्वत्

'प्रारब्धस्यैव कृतस्य यावद्भोगं संस्थितेः।

''कर्माणि क्षपयेद्विष्णुरप्रारब्धानि विद्यया।
प्रारब्धानि तु भोगेन क्षपयन् स्वपदं नयेत्॥''

इत्यादिवचनाच्च।

इति वाक्यमनारब्धकार्ये एव' इति सूत्रव्याख्यानपरमित्यभिसन्धिर्व्याचष्टे- **नास्माभिरित्यादिना॥**

विवरणार्थः

अनेन, ज्ञानेनाशेषकर्मक्षयो भवति, किञ्चित्कालमवस्थानं चेत्युभयमङ्गीक्रियते। अतः प्रतिबन्धकनाशात् कालान्तरे मुक्तिः सम्भवति। न च शरीरावस्थानानुपपत्तिः, तदर्थं कर्मसद्भावाङ्गीकारेऽशेषकर्मक्षयनाशानुपपत्तिरित्युभयतः पाशा रज्जुरिति वाच्यम्। प्रारब्धस्यैव कृतस्य कर्मणः यावद्भोगं संस्थितिरित्यङ्गीक्रियते। नान्येषाम्। तेन देहाद्यवस्थानोपपत्तिः ज्ञानेन कर्मक्षयोक्तिश्चोपपन्ना। न चैवं ज्ञानेनानिवृत्तस्य प्रारब्धस्य कदाऽपि निवृत्तिर्न स्यादिति वाच्यम्। 'प्रारब्धानि तु भोगेन' इत्यादिवचनेन भोगपर्यन्तमेवावस्थानाङ्गीकारादिति विवरणार्थो द्रष्टव्यः।

सूत्रार्थः

सूत्रार्थस्तु- तदधिगम इत्यसकृदावृत्तं प्रथमान्तं सप्तम्यन्तं च तन्त्रेणोपात्तम्। यतो भवतोऽत इति चाध्याहार्यम्। अघपदं पुण्यस्याप्युपलक्षकम्। 'तद्यथा पुष्करपलाश आपो न श्लिष्यन्ते', 'तद्यथेषीकातूलम्' इति श्रुतिभ्यां यथाक्रमं तयोः उत्तरपूर्वाघयोः। एवं 'तस्य पुत्रा दायमुपयन्ति' इति श्रुत्या तयोरुत्तरपूर्वाघयोः तयोरश्लेषविनाशयोः। व्यपदेशात् उत्तरपूर्वाघपुण्ययोरश्लेषविनाशौ यतो भवतः तदधिगमे ब्रह्मज्ञानेन, अतस्तदधिगमे। ब्रह्मज्ञानेनेति निमित्तसप्तमी। तदधिगमः तस्य ब्रह्मणोऽधिगमः प्राप्तिर्मोक्षो भवत्येव। ननु 'तद्यथा पुष्कर' इत्यादिश्रुतेः ब्रह्मज्ञानस्तुत्यर्थत्वोपपत्तेः कुतोऽश्लेषविनाशावङ्गी-

कार्यावित्यत्रापि तदधिगमे इत्येवोत्तरम्। 'चर्मणि द्वीपिनं हन्ति' इत्यादाविव तादर्थ्ये सप्तमी। मोक्षार्थं तावङ्गीकर्तव्यावेव। अन्यथा अनन्तानां सञ्चितानामागामिनां चाघादीनां भोगेन क्षयासम्भवान्मुक्तिप्रतिबन्धः स्यात्।

अत्र पुण्यविषये चतुर्थपञ्चमाभ्यां विशेषो वक्तव्योऽस्तीति पुण्यस्य स्वशब्देनानुपादानम्। उत्तरपूर्वाघपुण्ययोरिति यद्युच्येत तर्हि अघन्यायेन सर्वाश्लेषविनाशौ प्रतीयेताम्। ज्ञानाभिवृद्ध्यर्थं मौक्तिकानन्दाभिवृद्ध्यर्थं च पूर्वोत्तरपुण्ययोः अनाशश्लेषावावश्यकौ। तस्मात् पुण्यस्य स्वशब्देनाग्रहणं युक्तम्। यद्यप्यत्रेतरस्येत्युत्तरसूत्रस्थपदानुगुण्याय ब्रह्मद्वेषिप्रतिद्वन्द्वितया तदधिगन्तुः ब्रह्मज्ञानिनि इत्यर्थप्रत्यायनाय षष्ठ्यन्तमेव युक्तम्। तथाऽप्युक्तरीत्याऽनेकार्थलाभाय सप्तम्यन्तं कृतम्। उत्तरसूत्रे 'पाते तु' इति सप्तम्यन्तोपादानात् तदानुगुण्यं च सिद्ध्यति।

उक्तन्यायोऽन्यत्रातिदिश्यते द्वितीयेन। तत्रेतरशब्द आवर्तते। तदधिगमशब्दप्रकृततात्तदधिगन्तुरितरस्य भगवद्द्वेषिणोऽघशब्दप्रकृतपापादितरस्य पुण्यस्यापिशब्दाद् भगवद्द्वेषिपापस्याप्यसंश्लेषः अविनाशोप-लक्षणमेतत्। ज्ञानिपुण्यविषये यावती विवक्षा चतुर्थपञ्चमाभ्यां वक्ष्यते तावती सर्वाऽप्यत्रातिदेष्टव्येति ज्ञापनायैवंशब्दः। तत्प्रकारश्च तत्पूर्वपुण्यस्याप्रारब्धस्य विनाशः उत्तरस्याश्लेषस्तत्राप्यनिष्टं चेन्न नश्यतीत्यादि ग्राह्यम्। तेषामपि किञ्चित्पुण्यसंश्लेषदर्शनात्। पापस्य तु पूर्वकृतस्य कियतश्चिद् द्वेषाभिवृद्धिहेतुत्वेनोत्तरस्य तु साक्षात्तमस्येवानुप्रवेश इति टीकायामेव व्यक्तः। ननु व्यर्थोऽयं भगवद्द्वेषिणः पुण्यपापविनाशाश्लेषातिदेशप्रयासः। नेत्युच्यते। पाते पातार्थं तमसीति योग्यतया लभ्यते। 'मातरि वर्तितव्यम्' इत्यादाविव तुशब्दस्ततोऽनुत्थानवाची।

अत्र बाधकपरिहारः क्रियते- नाऽरब्धं कार्यं याभ्यां तेऽनारब्धकार्ये भगवद्ज्ञानितद्द्वेषिगतपुण्यपापे अनारब्धकार्ये एव विनश्येते। न तु आरब्ध-कार्ये। 'तस्याप्यारब्धकार्यस्य न विनाशोऽस्ति कुत्रचित्' इति स्मृतिद्योतनाय तुशब्दः। अतः पुण्यपापयोः नाशाङ्गीकारे ज्ञानोत्तरक्षणमेव देहपातो मुक्तिश्च स्यादिति बाधकं न शङ्कनीयम्। उत्तरपूर्वकालीनपुण्यपापयोः प्रसक्तत्वेऽपि पूर्वकालीनयोर्देहारम्भकत्वमिति सूचनाय पूर्वे इति विशेषणम्। एवं भगवद्द्वेषिणः पापस्य नाशोऽपि। ननु तर्हि पुनर्मोक्षाभाव आपतितः। प्रारब्धकर्मण एव प्रतिबन्धकत्वात्। मैवम्। तदवधेर्मोक्षस्येति शेषः। मोक्षस्य प्रारब्धकर्मावधित्व-श्रवणात्। न हि मोक्षस्य प्रारब्धकर्मावधित्वान्यथानुपपत्त्या कल्प्यमानं प्रारब्धं कर्म मोक्षप्रतिबन्धकं भवति। अस्य विवरणं सप्तमे भविष्यति।

ननु ज्ञानिनः पुण्यस्य नाशो न युक्तः। तस्य तं प्रतीष्टत्वात्। न हि भगवत्प्रेमास्पदस्येष्टनाशो युक्तः। एवं भगवद्द्वेषिणः पापस्य नाशोऽप्ययुक्तः। तस्यानिष्टत्वात्। न ह्यनिष्टनिवृत्तिः भगवद्द्वेषिणः सम्भवतीति बाधकान्तरं चतुर्थे परिह्रियते। अग्निहोत्रादिपुण्यं ब्रह्मदर्शनवतस्तत्कार्यायैव तदधिगमलक्षणकार्यायैव भवति पूर्वतनं चेद्। उत्तरकालीनं चेद् ज्ञानकार्यमोक्षातिशयानुभवाय भवति। न तु विनश्यति। अतो ज्ञानिन इष्टनाशापत्तिर्नास्ति। एवं द्वेषिणोऽपि नानिष्टनिवृत्त्यापत्तिः। तत्पूर्वपापस्य द्वेषाभिवृद्धिहेतुत्वेनोत्तरस्य साक्षात् तमस्येवानुप्रविष्टत्वेन नाशाभावात्। 'न ह्यस्य कर्म क्षीयते' इत्यादिना भगवद्ज्ञान्यादिकृतस्य पुण्यादेरक्षयत्वदर्शनात्।

नन्वथापि व्याहतिर्दुरुद्धरा प्राप्नोति। यतोऽघशब्देन पुण्यमपि विवक्षितमिति बाधकान्तरं पञ्चमेनोद्ध्रियते मुक्तावनुभवकारणाद् अन्यत् पुण्यं विनश्यतीति शेषः। अपिशब्दादप्रारब्धमनभीष्टं च लभ्यते। पापं चेत्यपि। न केवलं ज्ञानिनः

पापमेव विनश्यति। किन्त्वप्रारब्धमनभीष्टं मुक्तावनुभवकारणादन्यत् पुण्य-मपि। 'तस्य पुत्रा दायमुपयन्ति' इति पुण्यपापयोर्त्यागेन एकेषां शाखिनां यतः पाठोऽस्ति। तथा चाघशब्देनोपलक्षणम् न मुक्तावनुभवकारणाग्निहोत्रादि पुण्यकर्म इति कथं व्याहतिः?

ननु तत्कार्यायैवेत्युक्तमनुपपन्नम्। ज्ञानोत्तरकालीनपुण्यस्य नाशशिरस्काल्प-फलत्वादिति पञ्चमोक्तप्रमेये बाधकं निराकरोति 'यदेव विद्यया करोति' इति ज्ञानिकृतकर्मणो नाशशिरस्काल्पफलाभावं यतो दर्शयति, अतो नैतद्बाधक-मित्यर्थः।

प्रारब्धकर्मणो नाशाभावे सप्तमेन बाधकं निराक्रियते। इतरे ज्ञानिद्वेषिगते प्रारब्धपुण्यपापे भोगेन क्षपयित्वा नियमेन ब्रह्म सम्पत्स्यते सम्पद्यते। सम्पत्स्यत इति प्रयोगेण 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये' इति श्रुतौ तकारलोपः छान्दस इति सूचयतीति।

अत्राद्ये कर्मक्षये साधनोक्तिः। इतरेष्वपि तृतीयादिषु पञ्चसु सूत्रेषु बाधकोद्धारः। द्वितीये तु पुण्येऽतिदेशः। बाधकोद्धारस्याविशेषज्ञापनाय क्रमोल्लङ्घनम्। तत्राप्यवान्तरक्रमः टीकायामेव व्यक्तः।

सङ्क्षेपभाष्यस्यैतदधिकरणतात्पर्यसूचकत्वम्

एतदधिकरणतात्पर्यमप्युक्तम्-

'प्रारब्धकर्मणोऽन्यस्य ज्ञानादेव परिक्षयः।
अनिष्टस्योभयस्यापि सर्वस्यान्यस्य भोगतः॥' इति

प्रारब्धकर्मणोऽन्यस्योत्तमस्यानिष्टस्य सञ्चितागामिरूपस्य पापस्य पुण्यस्य

च ज्ञानादेव परिक्षयः। तदन्यस्य प्रारब्धस्य कर्मणः सर्वस्यापि भोगत एव क्षयः न ज्ञानेनेत्यर्थः।

॥ इति तदधिगमाधिकरणम्॥ ८॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्याणां सर्वतन्त्रस्वतन्त्राणां
श्रीलक्ष्मीनारायणतीर्थपूज्यचरणानां शिष्येण रघुनाथयतिना कृतायां
शिष्टतात्पर्यचन्द्रिकायां चतुर्थाध्यायस्य प्रथमः पादः॥

॥ अथ द्वितीयः पादः॥

॥ अथ वाङ्मनसाधिकरणम्॥ १॥

सूत्रभाष्यम्

देवानां मोक्ष उत्क्रान्तिश्चास्मिन् पाद उच्यते-

ॐ वाङ्मनसि दर्शनाच्छब्दाच्च ॐ॥ ४.२.१॥

वागभिमानिन्युमा मनोऽभिमानिनि रुद्रे विलीयते। वाचो मनोवशत्वदर्शनात्। 'तस्य यावन्न वाङ्मनसि सम्पद्यते' (छा.उ.६.१५-१) इति शब्दाच्च।

'उमा वै वाक् समुद्दिष्टा मनो रुद्र उदाहृतः।
तदेतन्मिथुनं ज्ञात्वा न दाम्पत्याद् विहीयते॥' इति स्कान्दे॥ १॥

तत्त्वप्रकाशिका

एतत्पादार्थं दर्शयति- **देवानामिति॥** ज्ञानभोगाभ्यां क्षीणकर्मणामत्र देहक्षयक्रमो वक्तव्यो भवति। स च द्विविधः। देवानां स्वोत्तमप्रवेशेन तत्र देहलयः। अन्येषां तु ब्रह्मनाड्या देहोत्क्रान्तिरिति। तदुभयमस्मिन् पादेऽधिकार्याधिक्यक्रमेणैव निगद्यत इति भावः। न चैवं सति पादभेदप्रसङ्गः। उपासनावदेकस्यैवार्थस्याधिकारिभेदेन द्वैविध्यात्। तत्र यत्र देवतालये विवादस्स विचार्यते। अत्राऽदौ भगवत्प्राप्तिलक्षणमोक्षार्थं वाचो मनसि लयसमर्थनादस्ति शास्त्रादिसङ्गतिः। अन्यथा मोक्षाभावप्रसङ्गेनोक्तविरोधः स्यादतः साधनीयमेतत्। प्रकृतज्ञानिनामन्तर्गता वाग्विषयः। मनसि लीयते न वेति सन्देहः। 'तत्पूर्वकत्वात्' इति मनोजातत्वोक्तिर्विशेषप्रमाणादर्शनं च सन्देहबीजम्।

न वाङ्मनसि लीयत इति पूर्वः पक्षः। तथा हि। तदधीनस्य तत्र लयो वक्तव्यः। न च वाङ्मनसयोर्नियम्यत्वादि निश्चेतुं शक्यते। 'वाक् पूर्वरूपं मन उत्तररूपम्', 'मनः पूर्वरूपं वागुत्तररूपम्' इति व्यामिश्रत्वोक्तेः। न चान्यतरग्रहणं युक्तं वचनद्वयस्यापि साम्यात्। अतो वाचो मनसि लयाभावेन मोक्षाभावादिनियम इत्युक्तव्याघात इति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **वागिति ॥** अस्त्येव वाचो मनसि लयः। प्रत्यक्षत एव वाचो मनोवशत्वदर्शनात्। न चोक्तेर्व्यामिश्रत्वेन मनःप्राधान्यानिश्चयः। अत्र खलु वाक् पूर्वरूपमित्यादिना वाङ्मनसयोः पूर्वोत्तरवर्णदेवतात्वे गुणप्रधानभावे च मुनिमतयोर्विवाद उच्यते। तत्र वर्णदेवतात्वविषये तूक्त्योः साम्यम्। अन्यतरपक्षे विशेषदर्शनात्। न च तत्र व्यामिश्रताऽपि। उभयोरपि वर्णदेवतात्वोपपत्तेः। गुणप्रधानभावे तु साम्यमेव नास्ति। 'मनसा वा अग्रे सङ्कल्पयत्यथ वाचा व्याहरति' इति युक्त्या मनःपूर्वकत्वस्य विशेषश्रवणात् प्रत्यक्षानुसारित्वाच्चेति भावः। न च वाचो मनोऽधीनत्वेऽपि देवतयोः कुतस्तदिति वाच्यम्। अचेतनस्यान्योन्यवशत्वस्य देवतानिमित्तत्वात्। अस्तु वाचो मनोऽधीनत्वं तथापि तत्र कुतो लयो नियामकानामनेकत्वेन निश्चयायोगादित्यत आह- **तस्येति ॥** नन्वेतच्छ्रुति-सूत्रगतौ वाङ्मनःशब्दावुमारुद्रपरौ कुत इत्यत आह- **उमेति ॥** अत्रोमापदेन वारुणी सुपर्णी चोच्येते। रुद्रपदेन च शेषसुपर्णाविति ज्ञातव्यम्॥ १॥

सूत्रभाष्यम्

ॐ अत एव च सर्वाण्यनु ॐ ॥ ४.२.२ ॥

अत एव च शब्दात् सर्वाणि दैवतानि यथानुकूलं विलीयन्ते।

'अग्नौ सर्वे देवा विलीयन्तेऽग्निरिन्द्रे इन्द्र उमायामुमा रुद्रे विलीयते एवमन्यानि दैवतानि यथाऽनुकूलम्' इति हि गौपवनश्रुतिः॥ २॥

॥ इति वाङ्मनसाधिकरणम्॥ १॥

तत्त्वप्रकाशिका

अस्त्येवं वाचो लयनिर्णयस्तथापि न सर्वदेवानां मोक्षो लयानिश्चयादित्याशङ्कां परिहरत् सूत्रं पठित्वा व्याचष्टे- **अत एवेति ॥** न देवानां मोक्षाभावः। सर्वेषामपि देवानां स्वनियम्यनियामकभावानुसारेण लयनिश्चयात्। न च नियामकबाहुल्येनानिश्चयः। श्रुत्या निर्णयोपपत्तेरिति भावः। काऽसौ श्रुतिरित्यतस्तामुदाहरति- **अग्नाविति ॥** अत्रोमारुद्रपदाभ्यां सुपर्णीसुपर्णावुच्येते। अग्नेस्तु सूर्यद्वारेणेन्द्रे लयो ज्ञातव्यः। अतो वागादीनां मनआदिषु लयनिश्चयाज्ज्ञानिनां मुक्तिनियम इति सिद्धम्॥ २॥ अ. १॥

शेषतात्पर्यचन्द्रिका

॥ अथ चतुर्थाध्यायस्य द्वितीयः पादः ॥

मङ्गलाचरणम्

देवानां मानुषादीनामनर्थैकाश्रया तनुः।
यत्प्रसादान्निवर्तेत तं भजे वल्लभं श्रियः॥

एतत्पादप्रतिपाद्यविषयः

'कर्मक्षयस्तथोत्क्रान्तिर्मार्गो भोगश्चतुष्टयम्' इति निर्दिष्टेषु चतुर्षु फलेषु कर्मक्षयाख्यमाद्यं निरूपितम्। द्वितीयमुत्क्रान्तिरूपफलमत्र निरूप्यते। ननु क्षीणकर्मणां देहलयः क्रमप्राप्तो निरूपणीयः। तं विना मार्गप्राप्त्ययोगात्। उत्क्रान्तिश्च देहलये कश्चित् प्रकारविशेष एव। यदि चैतावताऽपि तन्निरूपणं

तदा तदानीन्तनपीडाविशेषोऽपि निरूपणीयः स्यात्। देवानामुत्क्रान्तिरूपप्रकारस्यायोगेन तस्य पादार्थत्वानुपपत्तिश्च। स एव हि पादार्थः यः सर्वानप्यधिकारिणो व्याप्नोति। मैवम्। उत्क्रान्तिशब्दः देहक्षयपर इति प्रागेवोक्तत्वात्। स च देवानां स्वोत्तमप्रवेशेन तत्रैव जीर्णतया, तदितरेषां ब्रह्मनाडीद्वारोत्क्रान्त्या चेति द्वेधा सम्भवति। तथा च ग्रासरूपेण देहलयः 'तदोकोग्रज्वलनम्' इत्यतः प्राक्तनेन प्रतिपाद्यते। तदुत्तरेणोत्तरः प्रतिपद्यते। ननु कर्माक्षयानन्तरभावित्वाद् देहक्षयः प्रतिपाद्योऽस्तु । तथाऽपि मनुष्यादीनां ब्रह्मनाड्या चरमशरीरादुत्क्रान्त्या महरादिलोके स्थितानां स्वप्रणेतारं चतुर्मुखमपीक्षमाणानां ब्रह्मप्रलये देवताशरीरप्राप्त्यनन्तरमेव देवानां स्वस्वोत्तमशरीरे[1] स्वस्वशरीरस्य लयः इति क्रमावश्यम्भावेन देवतानां शरीरलयः कथं प्रथमं निरूप्यते । अत्रोच्यते । एकपुन्निष्ठफलेषु व्यतिक्रमानुसरणमेवैतत्। न ह्युत्क्रान्तिर्देवेष्वस्तीत्युक्तमेव। देवानामाधिक्येनाधिकारक्रमानुसारेण तल्लयविचारस्य प्राथम्योपपत्तिश्च।

नन्वेवमपि देवानां देहलय इतरेषामुत्क्रान्तिरित्युक्तं स्यात् । न चैतद् युज्यते । ब्रह्मनाड्योत्क्रम्य महरादिलोके चतुर्मुखसहायमपेक्षमाणानां मनुष्याणामपि देहावश्यम्भावेन देवताशरीरेषु देहलयस्य देवानामिवापेक्षितत्वात्। अन्यथा सशरीराणामवस्थानप्रसङ्ग इति चेन्न। देवतानां देहलयोक्तावेव तदन्तःप्रविष्टानां मानुषादीनां सर्वेषामपि तत्रैव देहलयस्यानुक्तिसिद्धत्वात्। यथोक्तं तत्त्वप्रदीपे- 'प्रागेव शरीरादुत्क्रान्तानां देवयानेन गतानामन्येषामपि देवमोक्षोक्तावेव मोक्षः सिद्धः । तत्प्रवेशात्मकत्वात्तस्य' इति । देवानां मोक्षो देहलयाख्यः मनुष्याणामुत्क्रान्तिश्चास्मिन् पादे उच्यत इति व्यवस्थोक्तिस्तु चरमशरीरत्यागविषया । न हि महरादिलोके स्थितानां मानुषाणां शरीरं चरमम्। ब्रह्मनाड्या प्रागेव तस्य त्यक्तत्वात्।

---

१. स्वस्वोत्तमदेवताशरीरे इति पाठान्तरम्।

॥ 'ॐ वाङ्मनसि दर्शनाच्छब्दाच्च ॐ' ॥ ४-२-१ ॥

सङ्गत्यादि

पूर्वत्रोक्तोऽपि ज्ञानमोक्षयोः कार्यकारणभावो नोपपद्यते । देहसद्भावे मोक्षानुपपत्तेः। न च कर्मक्षये निमित्ताभावान्नैमित्तिकं शरीरं स्वत एवैनं जहातीति वाच्यम्। तत्प्रकारानिरूपणादित्युत्थानात् सङ्गतिः। मोक्षाधिकारित्वेन बहुशः प्रकृता देवा विषयाः। मुच्यन्ते न वा। तदर्थं तेषां देहलय उपपादयितुं शक्यत उत न शक्यत इत्यादि चिन्तनीयम्।

पूर्वपक्षः

तत्र देवा न मुच्यन्ते नाड्युत्क्रान्तिनिषेधतः।
नाप्युत्तमे देहलयः व्यामिश्रोक्तिर्यतः श्रुतौ॥

न देवानां मुक्तिर्युक्ता प्रतिबन्धकीभूतस्य देहस्य सत्त्वात्। न च तत्त्यागो देवानां घटयितुं शक्यते। स हि उत्क्रान्त्या वा स्वोत्तमप्रवेशेन वा भवेत्। तत्र नाऽद्यो युक्तः। 'क्ष्माम्भोनलानिलवियन्मनः' इत्यादिभागवतवचनेन स्वोत्तमदेवताप्रवेशोक्तेः। न हि चरमशरीरादुत्क्रान्तस्यान्यत्र प्रवेशो युज्यते। नापि द्वितीयः पक्षः। निर्णायकाभावात्। न च यस्य यो नियामकः स तस्मिन् नियामके लीयते इति नियमान्नैवमिति वाच्यम् । नियामकानां बहुत्वेन पुनर्निर्णयानुपपत्तेः। अग्नेः तावन्नियामकाः स्कन्देन्द्राद्यो बहवः श्रूयन्ते समा एव । तत्राग्निः कस्मिन् स्वनियामके लीयतामिति सन्देहापरिहारात् । न चैकस्योभयत्र लयः सम्भवति। अस्तु वा कथञ्चिदग्न्यादेर्लयनिर्णयः। तथाऽपि न वारुणीशेषयोस्तन्निर्णयः। नियम्यनियामकभावस्य निर्णेतुमशक्यत्वात्। न च 'मनः पूर्वरूपम्। वागुत्तररूपम्' इति पूर्वोत्तरशब्दौ कारणकार्यपरौ। मनःकारणं वाक्कार्यमित्यर्थ इति श्रुत्या 'तत्पूर्वकत्वाद्वाच' (ब्र.सू. २.४.५) इति द्वितीयस्य

चतुर्थपादे मनसो वाक्कारणत्वमुक्तमेव । कारणे च कार्यस्य लयनियमोऽपि सिद्धः । कार्यं नियम्यम् । कारणं च नियामकमिति च सिद्धमेवेति वाच्यम् । 'वाक् पूर्वरूपम् । मन उत्तररूपम्' इति प्रतिपक्षस्यापि श्रवणात् । न च व्यामिश्रोक्तौ निर्णयः सुशको भवति । कथञ्चिद्वाङ्मनसयोर्लयनिश्चयेऽपि वारुणीशेषयोः तदनिश्चयाच्च । न च तावेव तच्छब्दाभिधेयाविति युक्तम् । वाङ्मनश्शब्दयोः अनेकार्थत्वान्निर्णयानुपपत्तेः । पूर्वोत्तरवर्णदेवतात्वाभिधानेन तयोश्चेतनत्वनिश्चयेऽप्यग्नीन्द्रादेरपि ग्रहणशङ्कया कथं निर्णयः ? वाक्शब्दस्य वारुणीपरत्वेऽपि मनश्शब्दः कथं शेषपरः ? गरुडपरत्वस्यापि सम्भवात् । कथं च वाक्छब्दो वारुणीपरः ? सौपर्णीपरत्वस्यापि सम्भवात् । तस्मात् व्यामिश्रोक्तेः शब्दार्थनिर्णयानुपपत्तेर्न लयो निर्णेतुं शक्य इति 'अनियमः सर्वेषाम्' (ब्र.सू. ३.३.३२) इत्युक्तमयुक्तं स्यादिति पूर्वः पक्षः ।

सिद्धान्तः

नियामकत्वं शेषस्य वारुण्यास्तन्नियम्यता ।
प्रत्यक्षैव श्रुतेश्चापि देवदेहलयो भवेत् ।।

यद्यप्युत्क्रान्तिर्देवानां नास्ति । तथाऽपि तेषां देवताप्रवेशेन देहलये मोक्ष उपपद्यते । नियामके नियम्यस्य लयनिर्णयसम्भवात् । यद् यद्वशं तत् तन्नियम्यमिति निश्चयसम्भवात् । वाग् हि मनोवशेति सर्वप्रत्यक्षसिद्धम् । यतः सर्वोऽपि जनः 'इदं वक्ष्यामि' इत्यभिसन्धायैव किञ्चिदुच्चारयति । नन्विदं प्रत्यक्षमप्रमाणम् । 'वाक् पूर्वरूपम्', 'मन उत्तररूपम्' इति श्रुत्या विरुद्धत्वात् । न हि कारणं कार्यस्य वशं भवति । न च तत्पूर्वकत्वाद् वाच इत्यत्र 'मनःपूर्वरूपं वागुत्तररूपम्' ति श्रुत्या मनसः कारणत्वं निर्णीतमिति वाच्यम् । उक्तप्रतिपक्षश्रुतेरस्याः निर्णायकत्वायोगात् । न च व्यामिश्रोक्तौ निर्णयः क्वचिद् दृष्टः । न चोभयोरपि प्रामाण्यम् । वस्तुनि विकल्पासम्भवात् । अन्यतरप्रामाण्यस्य च निर्णायकाभावात् । वचनान्तरस्यापौरुषेयत्वाच्च । मैवम् । उभयोरपि प्रामाण्ये बाधकाभावात् । श्रुतिद्वयगतपूर्वरूपोत्तररूपयोर्विष्णुनामगतपूर्वोत्तरवर्णदेवतात्वपरत्वात् । एकस्या एव देवतायाः वर्णद्वयदेवतात्वेऽविरोधात् । यद्यपि वाङ्मनसयोः गुणप्रधानभावेऽस्ति विरोधः । तथाऽपि 'मनःपूर्वरूपम्' इत्यस्य प्राबल्यं पूर्वोक्तयुक्तियुक्तत्वात् । यथोक्तम्-

'युक्तोऽयुक्तश्च यत्रार्थ आगमस्य प्रतीयते ।
स्यात्तत्र युक्त एवार्थः.................. ।।' इत्यादि ।

न च युक्तेराभासत्वम् । 'मनसा वाऽग्रे सङ्कल्पयति' इति श्रुत्यनुग्रहात् । न च 'वाक् पूर्वरूपम्' इति श्रुतेरप्यपौरुषेयत्वेनाप्रामाण्यायोगः । मतान्तरानुवादरूपत्वात् । दृश्यते हि वेदेऽपि 'असद्वा इदमग्र आसीत्' (तै.उ. २.२७) इत्यादिः बौद्धमतानुवादः । न चात्राऽत्यन्तिकाप्रामाण्यम् । वर्णदेवतात्वांशे प्रामाण्यस्योपपादितत्वात् । तस्मात् 'मन एव पूर्वरूपम्' इत्यादिश्रुतेः युक्तिसाहित्येन प्राबल्यात् तदनुगृहीतत्वाद् वाचो मनोवशत्वप्रत्यक्षस्य बाधायोगेन ततो नियम्यनियामकभावनिर्णयसम्भवेन देवानां देहलयनिर्णयोपपत्तिः ।

नन्वेतद् व्यधिकरणम् । वागवृत्तेः मनोवृत्त्यधीनत्वं प्रत्यक्षेणावगम्यते । न तु वाग्देवताया मनोदेवताधीनत्वम्, तयोरप्रत्यक्षत्वात् । तथा च कथं देवानां गुणप्रधानभावः प्रत्यक्ष इति चेन्न । अचेतनेऽन्योन्यवशत्वस्य देवतानिमित्तत्वात् । देवतानामन्योन्यवशत्वाभावे तदभिमन्यमानानामचेतनानां तदयोगात् । तथा च वाग्देवता मनोदेवताधीना भवितुमर्हति । मनोदेवताभिमन्यमानजडाधीनजडदेवतात्वात् । सामान्येन खद्योताभिमानिदेवतावदित्यन्योन्यवशत्वनिर्णयः ।

नन्वथापि मनोऽभिमानिनो देवाः इन्द्रादयो बहवः सन्ति । एवं वागभि-

मानिनोऽप्यग्न्यादयः। तथा च कथं वारुण्याः शेषे लयो निश्चेतुं शक्यते। मैवम्। 'तस्य यावन्न वाङ् मनसि सम्पद्यते' (छा.उ. ६.१५.१) इति श्रुत्या निर्णयोपपत्तेः। वाङ्मनःशब्दयोरभिमानिमात्रवाचित्वेऽपि 'मुखे मुख्यः प्रकीर्तितः' इति न्यायेन वारुणीशेषयोरेव वाङ्मनश्शब्दाभ्यां ग्रहणोपपत्तेः। ततोऽपि मुख्याभिमानिनां ब्रह्माणीब्रह्मादीनां ग्रहणशङ्कया पुनरनिर्णय एवेति चेन्न। 'उमा वै वाक् समुद्दिष्टा मनो रुद्र उदाहृतः' (स्का.पु.) इति स्कान्दवचनेन एतच्छ्रुत्यर्थनिर्णायकेन निर्णयोपपत्तेः। स्कान्दवचने उमारुद्रपदाभ्यां वारुणीशेषयोरेव विवक्षितत्वात्। देवतानां चरमदेहलयप्रसङ्गे उमारुद्रयोः प्रसक्त्यभावात्। न च तयोः शरीरं चरमम्। 'महादेव परे जन्मंस्तव मुक्तिर्निरूप्यते' इति वचनविरोधात्। ननु स्यादेवम्। यदि 'तस्य यावन्न वाङ् मनसि सम्पद्यते' (छा.उ. ६.१५.१) इति छान्दोग्यवाक्यं देवतानां चरमदेहलयमपेक्ष्य प्रवृत्तं स्यात्। न चैवम्। 'पुरुषं सौम्योपतापिनं ज्ञातयः पर्युपासते जानासि मां जानासि माम्' (छा.उ. ६.१४.१) इत्युपक्रमानुसारेण तस्य वाक्यस्य प्रत्यक्षदृष्टनिदर्शनैर्जीवस्य भगवदधीनत्वप्रदर्शनाय प्रवृत्तत्वेन मुमूर्षुविषयत्वादिति चेन्न। छान्दोग्यवाक्यस्योक्तोपक्रमबलात् मुमूर्षुविषयत्वेऽपि शाखान्तरस्थस्य 'तस्य यावन्न वाङ् मनसि सम्पद्यते' (छा.उ. ६.१५.१) इति वाक्यस्य देवतालयविषयत्वसम्भवात्। अत एव 'प्राणः परस्यां देवतायाम्' (ब्र.सू.भा.उ.श्रुतिः) इति वाक्यमेतच्छेषत्वेनोदाहरिष्यति भाष्यकृदध्यक्षाधिकरणे। अन्यथा 'प्राणस्तेजसि तेजः परस्यां देवतायाम्' (ब्र.सू.भा.उ.श्रुतिः) इत्युदाहरिष्यत्।

अस्तु वा छान्दोग्यशाखास्थस्योदाहरणम्। तथाऽपि नानुपपत्तिः। न हि वयमेतच्छ्रुत्यवष्टम्भेन देवतालयं साधयामः। किन्तु यद् यद्वशं तत्तत्र लीयत इति व्याप्तिमवष्टभ्य। तत्र च नियामकानेकत्वेन प्राप्तानिर्णयशङ्का श्रुत्युदाहरणेन

निराक्रियते। अस्तु वा तयोर्लयानिर्णयः। तथाऽपि नानुपपत्तिः। यतः श्रूयमाणोऽप्ययं मुमूर्षोर्लयो ब्रह्मप्रलयकालीनदेवतालयक्रममनुसृत्यैव प्रवर्तते। नान्यथा।

एतेनेतरदेवतानां लयो निर्णेतुं न शक्यत इति निरस्तम्। 'अग्नौ सर्वे देवा विलीयन्ते। अग्निरिन्द्रे, इन्द्र उमायाम्, उमा रुद्रे विलीयते। एवमन्यानि दैवतानि यथानुकूलम्' (ब्र.सू.भा.उ.गौपवनश्रुतिः ४.२.२) इति श्रुत्यनुसारेण निर्णयोपपत्तेः।

परेषां पादार्थकथनं वाङ्मनसाधिकरणशरीरं च

अन्ये त्वथापरासु विद्यासु फलप्राप्तये देवयानं पन्थानमवतारयिष्यन् प्रथमं तावद् यथाशास्त्रमुत्क्रान्तिक्रममन्वाचष्टे। समाना हि विद्वदविदुषोरुत्क्रान्तिरिति वक्ष्यति। अस्ति प्रायणविषया श्रुतिः 'अस्य सोम्य पुरुषस्य प्रयतो वाङ् मनसि सम्पद्यते, मनः प्राणे, प्राणस्तेजसि, तेजः परस्यां देवतायाम्' (छा. ६.८.६) इति। किमिह वाच एव वृत्तिमत्याः मनसि सम्पत्तिरुच्यते, उत वाग्वृत्तेरिति विशये तत्र वागेव तावन्मनसि सम्पद्यते। तथा हि श्रुतिरनुगृहीता भवति। इतरथा लक्षणा स्यात्। श्रुतिलक्षणाविशये च श्रुतिरेव न्याय्या न लक्षणेति प्राप्ते अभिधीयते। वाग्वृत्तिर्मनसि सम्पद्यते। मनोवृत्तावविस्थितायामपि वाग्वृत्तिः पूर्वमुपसंह्रियते। दृश्यते हि वाग्वृत्तेः पूर्वोपसंहारो मनोवृत्तौ विद्यमानायामपि। न तु वाच एव वृत्तिमत्या मनस्युपसंहारः केनचिद् द्रष्टुं शक्यते। किञ्च यस्य यत उत्पत्तिः तस्य तत्र प्रविलयो न्याय्यः मृदीव शरावस्य। न च मनसो वागुत्पद्यत इति किञ्चन प्रमाणमस्ति। वृत्त्युद्भवाभिभवौ त्वप्रकृतिसमाश्रयावपि दृश्येते। पार्थिवेभ्यो हीन्धनेभ्यस्तैजसोऽग्निरुद्भवति। अप्सु चोपशाम्यति। 'वाङ् मनसि सम्पद्यते' इत्यादिशब्दस्तु वृत्तिवृत्तिमतोरभेदोपचारात्। एवञ्च चक्षुरादीनामपि

सवृत्तिके मनस्यवस्थिते वृत्तिलोपदर्शनाद् वृत्तिद्वारेणैव सर्वाणीन्द्रियाणि मनोऽनुवर्तन्त इति प्राहुः।

परोक्तपादार्थनिरासः

तत्र तावदथेदानीं ब्रह्मविद्याफलं प्रति चिन्ता प्रतयत इति तदधिगमः सूत्रभाष्यात् पूर्वपादे निर्गुणविद्याफलस्यैव प्रकृतत्वात् परविद्याफलाप्तये तदनुगुणस्यैव कस्यचित् चिन्तयितव्यत्वेन तत्प्रतिकूलस्य देवयान-पथादेश्चिन्तनायोगात् पादार्थकथनमनुपपन्नम्। तत्र ब्रह्मविद्याशब्देन सगुणब्रह्मविद्याया अपि विवक्षणे 'अथेह चतुर्थे फलाश्रय आगमिष्यति विचारः' इति चतुर्थाद्यभाष्यविरोधः। तत्रापि फलशब्देन सगुणप्राप्तिविवक्षायां मुमुक्षुपादेये शास्त्रे तदसङ्गतिः। न हि मुमुक्षुरिहाऽमुष्मिकफलभोगविरक्तः मिथ्याभूतं सगुणब्रह्म प्राप्तुमिच्छति। तृतीये निर्गुणब्रह्मविद्यासाधनस्यैव विचारितत्वादिहापि तत्फलस्यैव विचार्यत्वेनान्यस्यानवकाशश्च। न च 'तृतीये परापरासु विद्यासु साधनाश्रयो विचारः प्रायेणात्यागात्' इति चतुर्थाद्यभाष्येण विद्याद्वयसाधनमपि विचारितमिति वाच्यम्। पूर्वद्विकेऽप्येतन्निर्वाहाय परापरब्रह्मणोरुभयोरपि विचार्यत्वप्राप्त्या सर्वमपीदं शास्त्रं शुद्धमुमुक्षूपादेयं न स्यात्। अपरब्रह्मतद्विद्या-तत्फलानां द्वैतज्ञानसापेक्षत्वेन द्वैतवासनादार्ढ्यहेतावस्मिन् शास्त्रे शुद्धमुमुक्षोः प्रवृत्त्यसम्भवात्। तत्सम्भवे चोक्तरीत्या चतुर्ष्वध्यायेषु सगुणस्यैव जिज्ञासा विहितेत्यापत्त्या निर्गुणस्य काप्यवकाशाभावेन तत्स्वरूपसाधनफलादि-प्रतिपादनाय पञ्चमः पादोऽध्यायो वा शास्त्रान्तरं वेदान्तरं वा गवेषणीयमिति तस्येहापि प्रवेशायोगः।

अस्तु वोभयोरपि विद्ययोः प्रकृतत्वम्। तथाऽपि मुमुक्षुणाऽवश्यापेक्षित-परविद्याफलप्राप्त्यादिकमनभिधाय तद्विपरीतस्याभिधाने कारणाभावः। न च भेदवासनादिहेत्वपरविद्याफलप्राप्तिर्द्वारम् येनेयमौपोद्घातिकी चिन्ता स्यात्।

अस्तु वा द्वारम्। तथाऽप्युत्क्रान्तिचिन्तनं कथमत्र सङ्गतं स्यात्। समाना हि विद्वदविदुषोरुत्क्रान्तिरिति त्वयैवोक्तत्वात्। न ह्यविद्वत्साधारणं वाग्वृत्त्युप-रमादिकमिह शास्त्रे वक्तव्यम्।

एतेन सगुणविद्याफलस्य ब्रह्मणोऽलौकिकस्यार्चिरादिगतिप्राप्यस्यानुत्क्रम्य प्राप्त्यसम्भवात् तदर्थमुत्क्रान्तिनिरूपणं व्यापिब्रह्मात्मभावे निर्गुणविद्याफले निषेधार्थं चेति पादस्याध्याये सङ्गतिरिति कल्पतरूक्तं निरस्तम्। यथाऽनुत्क्रम्य सगुणप्राप्त्यसम्भवः तथाऽप्राप्य श्वासकासाद्यन्यतमपीडामपीति तदर्थं तदुत्पत्तिप्रकारादेरपि निरूपणप्रसङ्गात्। किञ्च व्यापिब्रह्मभावे निर्गुणविद्याफले निषेधार्थं चोत्क्रान्तिनिरूपणमिति कोऽर्थः? अर्चिरादिगतिनिषेधार्थमिति वा, उत्क्रान्तिनिषेधार्थमिति वा, उभयनिषेधार्थमिति वा? नाऽद्यः। अर्चिरादि-गतिनिषेधार्थमुत्क्रान्तिनिरूपणस्य सङ्गत्यभावात्। न द्वितीयः। असम्भवात्। न हि त्वन्मतेऽपि चरमदेहादनुत्क्रान्तस्य ब्रह्मभावात्मकनिर्गुणविद्याफल-प्रवृत्तिरभ्युपेयते। समाना हि विद्वदविदुषोरुत्क्रान्तिरिति स्ववचनविरोधात्। तत्र विद्वच्छब्देन सगुणविद एव ग्रहणे उभयोरपि प्रकृतत्वोक्तिव्याघातः। श्वासकासादिपीडानिमित्तव्यथाया निर्गुणफले निषेधार्थं तस्या अपि निरूपण-प्रसङ्गाच्च। अत एव न तृतीयः। किञ्चैषामुत्क्रान्त्यादीनामलौकिकत्वेन सगुणविद्याफलसम्बन्धस्यापि शब्देनैव बोधनीयतया तद्बोधने निर्गुणविद्या-फलसम्बन्धनिषेधबोधने चैषां सूत्राणां तात्पर्याद् वाक्यभेदावृत्त्यादि स्यात्। कथं चेदुत्क्रान्तिनिरूपणं निर्गुणविद्याफले निषेधार्थमित्यवगतं भवता? इह शास्त्रे क्वापि निर्गुणविद्यायास्तत्फलस्य वा तत्र कस्यचिन्निषेधस्य वाऽप्रतीतेः। प्रमाणान्तरागोचरस्यार्थात् प्रतीत्ययोगः। अन्यथा ब्रह्मगोचरश्रवणमनन-निदिध्यासनतत्साक्षात्कारफलादिनिरूपणमपि शशविषाणविद्याफले निषेधार्थमिति स्यात्। सगुणविद्याफले निषेधार्थमिति च कुतो न स्यात्। तस्मादयमुत्क्रान्तिपादः परपक्षे सर्वथा व्यर्थ एव।

एतेनानुष्ठितविद्यस्य गतिः कीदृशीत्याकाङ्क्षायां तत्प्रकारं वक्तुमत्रोत्क्रान्तिश्चिन्त्यत इति कैश्चिदुक्तं निरस्तम् । मद्रीत्या स्रष्टुः ग्रासरूपेण सृज्यस्य देहलयाख्यमोक्षांशप्रतिपादकत्वेन साक्षात्फलविचारसम्भवे उपोद्घातत्वाश्रयणायोगात् ।

रामानुजरीत्या परोक्ताधिकरणनिरासः

अत्र केचित् ''मनसि वागिन्द्रियस्यैव सम्पत्तिः वागिन्द्रियपरत्वे 'वाङ् मनसि' इत्यादिश्रुतेर्मुख्यार्थतालाभात् । 'तस्मादुपशान्ततेजाःपुनर्भवमिन्द्रियैर्मनसि सम्पद्यमानैः' (प्रश्न. ३.९) इत्यत्र इन्द्रियशब्दश्रवणाच्च । तत्रापीन्द्रियाणां मनः-प्रकृतित्वाभावादेव सम्पत्तिश्रुतिः संयोगपरैव । अतो न मनसि वागवृत्तेर्लयः'' इति पूर्वपक्षसिद्धान्तयोः विनिमयेनाधिकरणं व्याचख्युः ।

तन्निरासः

तन्न । 'वाङ् मनसि' इत्यादिश्रुतेर्वाग्वृत्तिपरत्वे 'दर्शनाच्च' इति सौत्रहेतु-सङ्गतिवद् इन्द्रियपरत्वे तदभावात् । न हि मनसि वागिन्द्रियस्य लयः संयोगो वा दृश्यते । वागिन्द्रिये उपरते मनःप्रवृत्तिमात्रं दृश्यत इति चेन्न । वागिन्द्रियोपरमस्य मनःप्रवृत्तेश्चाप्रत्यक्षत्वात् । न हीन्द्रियकार्यस्य वाग्वृत्तेः मनःप्रवृत्तिकार्यस्य चेष्टाविशेषादेर्वा प्रत्यक्षत्वेऽपि नाडीविशेषोपसरणात्मकोपरमस्याऽन्तरस्य मनःपरिणामात्मकप्रवृत्तेर्वा प्रत्यक्षता सम्भवति । दृशेः ज्ञानोपलक्षकत्वे च तदेव दूषणम् । 'न हि तदानीं वृत्त्युपरमे वागिन्द्रियं प्रमाणान्तरेणोपलभ्यते । येन वृत्तिमात्रमेव सम्पद्यत इत्युच्येत' इति त्वद्भाष्यविरोधाच्च । किञ्च त्वन्मतेऽपि मनसो वाक्प्रकृतित्वाभावाद् वाचो मनसि सम्पत्तिर्नोपपद्यते । ननु मनसि वाक् संयुज्यत इत्येवार्थः, न तु लीयत इति । संयोगस्त्वप्रकृतावपि सम्भवति इति चेन्न । 'सता सोम्य तदा सम्पन्नो भवति' इत्युक्तायाः सम्पत्तेः 'स्वमपीतो भवति' इति पिधानार्थेनापीतिना विवरणात् 'वाङ् मनसि' इत्यत्रापि सम्पत्तिः

लय एवेति निश्चयात् । सम्पद्यत इत्यस्य क्रियापदत्वेन प्राधान्यात् तत्र लक्षणानुपपत्तेश्च । वाक्पदस्य तदभावेन सौत्रहेतुस्वारस्येन च लक्षणोपपत्तेश्चेति । तस्मान्नैवं परकीयाधिकरणदूषणम् ।

स्वमतरीत्या परोक्तवाङ्मनसाधिकरणनिरासः

अत्रोच्यते । 'वाङ् मनसि' इति श्रुतिसूत्रयोः वाक्शब्दस्य वृत्तिविवक्षा किं साधकसद्भावात्, उत इन्द्रियविवक्षायां बाधकसद्भावात् । नाऽद्यः । तदनुपलम्भात् । न तावत् प्रत्यक्षम् । परकीयस्य मनसोऽप्रत्यक्षत्वात् । वाग्वृत्तेः प्रत्यक्षत्वेऽपि उपरमस्य नाडीविशेषोपसरणरूपत्वे वागिन्द्रियस्य तत्सम्भवेऽपि तद्वृत्तेः तदसम्भवात् । लयात्मकत्वे च वृत्त्युपादानभूते वागिन्द्रिय एव युक्तत्वेन मनसि तदयोगाच्च । नापि वाग्वृत्तिर्मनसि लीयते विद्यमानायामपि मनोवृत्तौ तदुपरमदर्शनादित्यनुमानम् । यद्वृत्तौ विद्यमानायामपि यदुपरमते तत्तत्र लीयत इत्यस्य विद्यमानायामपि प्राणादिवृत्तौ तत्र वाग्वृत्तिलयानङ्गीकारेण, कदाचिच्चक्षुःश्रोत्रादिवृत्तौ विद्यमानायामपि पूर्वं वाग्वृत्तेरुपरमदर्शनेन च व्यभिचारादनुमानं न साधकम् । वाग्वृत्तेः तत्परिणतायाः शरावादेः मृदीव वाच्येव लयस्य सिद्ध्या बाधाच्च । नापि शब्दः । सूत्रे श्रुतौ चेन्द्रियवाचकशब्ददर्शनात् । वृत्तिपरत्वेऽपि वृत्तिवृत्तिमतोरभेदाङ्गीकारेणेन्द्रियपरत्वाविरोधः । 'उपशान्ततेजाः पुनर्भवमिन्द्रियैर्मनसि सम्पद्यमानैः' (प्रश्न. ३.९) इति स्पष्टमिन्द्रियश्रुति-विरोधश्च । अत्रापीन्द्रियशब्दः तद्वृत्त्युपलक्षक इति त्वतिसाहसम् । न द्वितीयः । तदभा-वात् । अप्रकृतौ मनसि तदविकारस्य वागिन्द्रियस्य लयानुपपत्तिर्बाधिकेति चेन्न । 'तस्मान्मन एव पूर्वरूपम्', 'मनसैवाग्रे सङ्कल्पयत्यथ वाचा व्याहरति' इति सयुक्तिकं वाचो मनोजातत्वश्रवणेन प्रकृतिविकारभावोपपत्तेः । प्रत्युत वाग्वृत्तिपक्षे वाग्विकारत्वात् तस्याः तत्रैव लयस्य न्याय्यत्वेन मनसि तल्लयायोगादित्युक्तत्वाच्च । यच्चोक्तम् उद्भवाभिभवावित्यादि । तन्न । क्वचिद्दर्शनमात्रेणोत्सृष्टस्य न्यायप्राप्तस्य कारणे कार्यलयस्य त्यागायोगात् ।

अरणीन्धनादेः शुद्धपार्थिवत्वाभावेन तत्संसृष्टस्वोपादानवायुभागादेव तैजसस्याग्नेरुत्पत्त्युपपत्तेश्च। एवमप्सु संसृष्टे वायावेवोपशमोपपत्तेश्चेति।

परोक्तवाङ्मनसीति सूत्रव्याख्याननिरासः

एतेन वाग्वृत्तिः वागिन्द्रियं वा मनसि लीयते। वाग्वृत्तेः पूर्वमुपसंहारदर्शनादिति व्याख्यानद्वयमयुक्तम्। शब्दाच्चेत्यस्य व्यर्थत्वाच्च। 'कथं तर्हि वृत्तिपक्षे वाङ् मनसि सम्पद्यत इति शङ्कायामाह- शब्दाच्चेति। वृत्तिवृत्तिमतोरभेदोपचारादयं शब्दोऽप्यस्मिन् पक्षेऽवकल्पते' इति वैय्यर्थ्यशङ्कापरिहारोऽपूर्वः कुशल-बुद्धीनामास्तां तावत्।

परोक्तस्य अत एवेति सूत्रव्याख्यानस्य निरासः

'तस्मादुपशान्ततेजाः' इति श्रुत्युक्तान्यपीन्द्रियाणि सर्वाण्यत एव वृत्तिलोपदर्शनाद् लक्षणाद्याश्रयणादेव सम्पत्तिशब्दस्य संयोगमात्रार्थत्वा-श्रयणादेव च मनोऽनुवर्तन्त इत्युच्यत इति द्वाभ्यां द्वितीयं सूत्रं व्याख्यातम्। तदयुक्तम्। श्रुतिसूत्रस्थपदानां निष्कारणं लक्षणाश्रयणाद्ययोगात्। सर्वविषयेण द्वितीयेनैव विवक्षितार्थसिद्धेः प्रथमवैय्यर्थ्याच्च। उदाहरणानुरोधेन वाचः पृथग्ग्रहणं युक्तमिति समाधानं तु सूत्रत्वव्याघातकमनुशब्दवैय्यर्थ्यं चेति दिक्।

यदत्रोक्तं भाष्ये- 'पठिष्यति तु परस्तादविभागो वचनादिति। तस्मादत्र वृत्त्युपरममात्रं विवक्षितमिति गम्यते। तत्वप्रलयविवक्षायां तु सर्वत्रैवाविभाग-साम्यात् किं पुनरत्रैव विशिंष्यादविभाग इति' इति- तल्लक्षणाश्रयणे ज्ञापकम्। तद्वृत्त्युपरममात्रमत्र विवक्षतीत्यत्र न ज्ञापकम्।

'मृतिकाले जहत्येनं प्राणा भूतानि पञ्च च।
भागतो भागतस्त्वेनमनुगच्छन्ति सर्वशः॥'

इति वचनेनाविदुष एकदेशेन तत्वप्रलये सिद्धे विदुषः सामस्त्येन तत्प्रविलय-मविभाग इति पठिष्यतीत्युपपत्तेरिति सङ्क्षेपः।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- नन्वेतत्पादीयसूत्रेषु नैकं प्रतिपाद्यं दृश्यते। मनसि वाचो लयः, मनसः प्राणे लयः, प्राणस्याऽत्मनीत्याद्यनेकार्थप्रतीतेः- इत्याशङ्क्य एकवाक्यतासिद्ध्यर्थं भाष्यमवतारयति- **एतत्पादार्थमिति**॥ नन्वथापि भाष्ये प्रतिपाद्यैक्यं न दृश्यते। प्रत्युत, देवानां मोक्ष इतरेषामुत्क्रान्तिश्चेति प्रतिपाद्यद्वयस्यैव प्रतीतेरत आह- **देहक्षयक्रमो वक्तव्य इति**॥ मोक्षस्य उत्क्रान्तेश्च देहक्षयक्रमत्वेन क्रोडीकारे न दोष इति भावः। ननूषास्वाहादौ लयचिन्तापूर्वमेव वाचो मनसि लयश्चिन्तनीयः। तत्कथं तत्परित्याग इत्यत आह- **तत्र यत्रेति**॥ वाङ्मनसलये मुनिमतयोर्विवादवदन्यत्र विवादाभावादिति भावः।

टीकायां पूर्वपक्षीयव्यामिश्रतान्यायव्याख्यानम्

अत्रैतत्पादीयपूर्वपक्षन्यायमाला-

'व्यामिश्रता कार्यकरत्वमर्थक्लृप्तिः सुदार्ढ्यं परतन्त्रता च।
समानधर्मः कृतशेषता च लोकोपमा पूर्वमतानुसाराः॥' इति।

तत्र व्यामिश्रतान्यायं सम्बन्धिसाध्यप्रदर्शनेन विवृण्वत्

''न च 'वाक् पूर्वरूपम्। मन उत्तररूपम्।' 'मनः पूर्वरूपम्। वागुत्तररूपम्' इत्युक्तेः व्यामिश्रत्वादनिर्णीतिरेव।''

इति वाक्यं व्याख्यातुमध्याहार्यभागं दर्शयति- **न वाङ् मनसि लीयत इति पूर्वपक्ष इति**॥ तदधीनत्वाद्यनिर्णयस्य लयाभाव-व्याप्तिसिद्ध्यर्थमाह- **तदधीनस्य तत्र लयो वक्तव्य इति**॥ एवं सङ्गतिं कृत्वाऽनिर्णीतिरेवेत्यंशं व्याख्याति- **न च वाङ्मनसयोरिति**॥ नियामकत्वमुत्पाद्यत्वमुत्पादकत्वमित्यादिरादिशब्दार्थः। ननु तत्पूर्वकत्वाद्वाच इत्यत्र मनस उत्पादकत्वं वाच उत्पाद्यत्वं च निर्णीतमिति कुतोऽशक्तिरिति शङ्कते- **कुत इति**॥ तत्परिहाराय पूर्वार्धं व्याचष्टे- **वाक्**

पूर्वरूपमित्यादिना ॥ मनःपूर्वरूपमित्यनेन साम्यमिति सिद्धान्तन्यायविवरणानुरोधेन वचनद्वयस्यापि साम्यादित्यंशोऽध्याहार्य इति भावेन तद्व्यावर्त्याशङ्कामनूद्य प्रतिक्षिपति- न चान्यतरेति ॥ अनेन 'नियम्यत्वादेरित्यध्याहारः । अतो न वाचो मनसि लय इति च । वाक् पूर्वरूपमित्याद्युक्तेः व्यामिश्रत्वात् सङ्कलितत्वात् । नियम्यनियामकभावादेरनिर्णीतिरेव । न चान्यतरस्यान्यतरेण बाधः । वचनद्वयस्यापि समत्वात् । न ह्यन्यतरवचनस्य प्राबल्ये हेतुः दृश्यते । अतो न वाचो मनसि लयः ।' इति विवरणार्थो द्रष्टव्यः ।

टीकायां सिद्धान्तीयविशेषसाम्यश्रुतिन्यायव्याख्यानम्

अत्रैतत्पादीयसिद्धान्तन्यायमाला-

'विशेषसाम्यश्रुतिराढ्यता च समानलोपो महिमा विशेषः ।
कृतार्थता शश्वदनुप्रवृत्तिः सिद्धान्तनिर्णीतिविशिष्टहेतवः ॥' इति ।

तत्र विशेषसाम्यश्रुतिरित्युक्तन्यायं विशेषश्च साम्यं च विशेषसाम्ये तयोः श्रुतिःश्रवणमिति व्युत्पत्तिमभिप्रेत्य सम्बन्ध्यादिप्रदर्शनेन विवृण्वत्

'' 'वाक् पूर्वरूपं मन उत्तररूपम्' इति वाचः पूर्ववर्णदेवतात्वनिर्देशमात्रेण मनः पूर्वरूपमित्यनेन साम्यम् । 'मनसा वा अग्रे सङ्कल्पयति । अथ वाचा व्याहरति' इति युक्तितो विशेषो मनःपूर्वकत्वस्यैव श्रुत इति प्राधान्यं मनस एव हि ज्ञायते ।

'सृष्टौ च विलये चैव सदा पूर्वप्रवर्तने ।
नियन्तृत्वे च वचसो मनोऽधीशं शिवो हि तत् ॥'

इति श्रुतेश्च ।''

इति वाक्यं निश्चयप्रतिबन्धकव्यामिश्रोक्तेः अन्यथासिद्ध्यादिप्रतिपादनपरतया व्याचष्टे- **अत्र खल्वित्यादिना मनःपूर्वकत्वस्य विशेषश्रवणादित्यन्तेन** ॥

विवरणार्थः

तथा च किमियं विरुद्धोक्तिः समबला सती निश्चयप्रतिबन्धिका, उत विषमबला ? आद्येऽपि पूर्वोत्तरवर्णदेवतात्वनिश्चयप्रतिबन्धिका, उत गुणप्रधानभावनिश्चयप्रतिबन्धिका। नाऽद्यः । 'वाक् पूर्वरूपम्', 'मनःपूर्वरूपम्' इत्यनयोः श्रुत्योः पूर्ववर्णदेवतात्वांशेऽन्यतरपक्षे युक्त्यादिविशेषादर्शनेन समबलत्वेऽपि विरुद्धोक्तिताया एवाभावादुभयोरप्येकवर्णदेवतात्वोपपत्तेरित्याह- **वाक् पूर्वरूपमिति** ॥ मनःपूर्वरूपमित्यनेन वचनेन वाक्पूर्वरूपमिति वचनस्य पूर्ववर्णदेवतात्वांश एव साम्यमस्ति, न तु गुणप्रधानभावांशे । तथाऽपि न तन्निश्चयप्रतिबन्धकम् । विरुद्धोक्त्योः साम्यमेव हि तन्निश्चयप्रतिबन्धकम् । न च वर्णदेवतात्वांशे विरोधोऽस्ति । एकस्यैव वर्णस्य अनेकदेवताकत्वोपपत्तेरिति भावः । द्वितीयं दूषयति- **मनसा वा इति** ॥ हि यस्मात् 'मनसा वा अग्रे' इत्यादिश्रौतयुक्तितो वाचो मनःपूर्वकत्वस्य मनःप्रधानकत्वस्य विशेषः प्राबल्यं श्रुत एव इति तस्मात् गुणप्रधानभावयोः साम्यमेव नाऽस्ति । विरोधस्त्वस्ति । एकस्यैव गुणत्वप्रधानत्वयोरदर्शनात् । तथाऽपि प्रबलस्य दुर्बलबाधकत्वस्य सर्वसम्मतत्वात् मनस एव प्राधान्यं ज्ञायते निश्चीयते । अतः प्रधानेऽप्रधानस्य लयोऽपि युक्त एव । अत एव न द्वितीयः । प्रबलेन मनःप्राधान्येन दुर्बलवाक्प्राधान्यबाधेन विषमबलोक्त्योर्निर्णयप्रतिबन्धकत्वायोगादित्यर्थः । न केवलं युक्त्यैवैतत् सिद्धम् ; श्रुतं चेत्याह- **सृष्टौ चेति** ॥ सृष्टिलयपूर्ववचनविन्यासकत्वस्वावरनियन्तृत्वेषु मनोऽधीशं नियामकं यतः, अतः रुद्रे उमाया लयो युक्तः । न चैतदसङ्गतम् । तन्मनः यस्माच्छिव एव । उपलक्षणमेतत् । वचो यस्मादुमैव । अत उक्तं युक्तमिति श्रुत्यर्थः । इति विवरणं व्याख्यातं भवति ।

न चेयं युक्तिराभासः । श्रुतत्वात् प्रत्यक्षानुसाराच्च इति सूत्रांशस्यार्थान्तरमाह- **प्रत्यक्षानुसारित्वाच्चेति** ॥ 'अचतुरविचतुर' (पा.सू. ५-४-७७) इत्यादिना

अर्थपरत्व एव निपातनम् ; न तु शब्दपरत्वेऽपि । ततो **वाङ्मनश्शब्दाविति** साधु ।

यद्यप्यग्नीन्द्रादौ विरुद्धोक्तिर्नास्ति । तथाऽप्यग्निनियामकानां बहूनां सद्भावाल्लयानिर्णय इति पूर्वपक्षशेषस्य कः परिहार इत्यतः सूत्रमवतारयति- **अस्त्वेवमिति** ॥ ननु 'अग्नौ सर्वे देवा विलीयन्ते । अग्निरिन्द्रे । इन्द्र उमायाम्' (गौपवनश्रुतिः) इति श्रौतो व्यपदेशोऽनुपपन्नः । गरुडमार्गशेषमार्गभेदेन तद्गन्तॄणामधिकारिणामपि द्वैविध्याद् इन्द्रस्य गरुडमार्गगन्तृत्वेन सिद्धान्तात्, पूर्वोक्तरीत्या उमारुद्रपदाभ्यां वारुणीशेषयोरुक्त्यसम्भवादित्यतो उमारुद्रशब्दौ व्याचष्टे- **अत्रोमारुद्रशब्दाभ्यां सुपर्णीसुपर्णावुच्येते इति** ॥ कुतस्तर्हि 'उमापदेन वारुणी सुपर्णी चोच्येते । रुद्रपदेन च शेषसुपर्णाविति ज्ञातव्यम्' इत्युक्तम् ? तत्रापि सुपर्णीसुपर्णयोरेव ग्रहणे बाधकाभावाद् इति चेन्न । वारुणीशेषयोरपि लय-क्रमस्यात्र वक्तव्यत्वादिति भावः । अत्राग्नेरिन्द्रे साक्षान्न प्रवेशोऽभिप्रेतः इत्याह- **अग्नेस्त्विति** ॥

सूत्रार्थः

सूत्रार्थस्तु- वाक्शब्दिता वारुणी सुपर्णी च मनश्शब्दिते शेषे सुपर्णे च ब्रह्मप्रलये प्रत्यासन्ने लीयेते । तत्र प्रवेशेन तत्रैव तयोर्देहः क्षीयते । वारुण्याद्यभिमन्यमानजडस्य वचसो शेषाद्यभिमन्यमानमनोवशत्वस्य चेतनगुण-प्रधानभावनिमित्तत्वात् 'तस्य यावन्न वाङ्मनसि सम्पद्यते' (छा.उ. ६.१५.१) इति शब्दाच्च ।

अत एव च 'अग्नौ सर्वे देवा विलीयन्ते' इति श्रुतेरेव सर्वाणि दैवतान्यपि यथानुकूलं स्वोत्तमदेवेषु लीयन्त इति ।

यद्यपि देवतासामान्यस्य लयाभिधानानन्तरं तद्विशेषस्य लयो वक्तव्य इति

सूत्रयोः वैपरीत्यं युक्तम् । तथाऽपि देवताविशेषपूर्वपक्षस्यातिप्रबलत्वान्महा-मल्लभङ्गन्यायेन तन्निरास एव पूर्वं कृत इति सूत्रयोः क्रमोऽपि द्रष्टव्यः ।

॥ इति वाङ्मनसाधिकरणम् ॥ अधि. १ ॥

॥ अथ मनोऽधिकरणम् ॥ २ ॥

सूत्रभाष्यम्

ॐ तन्मनः प्राण उत्तरात् ॐ ॥ ४.२.३ ॥

'मनः प्राणे' (छा.उ.६.१५-१) इत्युत्तराद् वचनान्मनोऽभिमानी रुद्रः प्राणे वायौ विलीयते।

'वायोर्वाव रुद्र उदेति वायौ विलीयते तस्मादाहुर्वायुर्देवानां श्रेष्ठः' इति च कौण्डिन्यश्रुतिः ॥ ३ ॥

॥ इति मनोऽधिकरणम् ॥ २ ॥

तत्त्वप्रकाशिका

सङ्गतिः

अत्र मनसो ब्रह्मप्राप्त्यर्थं प्राणे लयसमर्थनादस्ति शास्त्रादिसङ्गतिः। अन्यथा मोक्षाभावप्रसङ्गेनोक्तव्याहतिरेव स्यादित्यतः समर्थनीयमेतत्। प्रकृतं मन एव विषयः। प्राणे लीयते न वेति सन्देहः। तस्य प्राणोत्पन्नत्वं विशेषादर्शनं च सन्देहबीजम्।

पूर्वपक्षः

न प्राणे मनो लीयते इति पूर्वः पक्षः। मनसः प्राणादनूनत्वात्। सर्वप्रवृत्तिहेतुर्हि प्राणः। मनोऽपि प्रत्यक्षत एवान्वयव्यतिरेकाभ्यां सर्वप्रवृत्तिकारणं दृश्यते। नच 'इयदामननात्' (३-३-३५) इति मनसः प्राणादूनत्वमुक्तमिति वाच्यम्। तत्र मनःशब्दस्यान्यपरत्वात्। नच स्मरशब्देन तद्ग्रहणम्। मनःप्राणयोरुक्तन्यायेन साम्यात्। तत्पदस्याप्यन्यपरत्वोपपत्तेः। न च मनसः प्राणोत्पन्नत्वात् तत्र लयः। 'तत्प्राक् श्रुतेश्च' (ब्र.सू. २-४-४) इति मनसो भगवदुत्पन्नत्वस्योक्तत्वात्। अतो मनसो लयाभावेन मोक्षाभावादनियम इत्युक्तहानिरिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रं पठित्वा व्याचष्टे- **तदिति** ॥ मनः प्राणे लीयत एव। 'मनः प्राणे' इति 'वाङ्मनसि सम्पद्यते' इति पूर्वोदाहृतोत्तरवाक्यसद्भावादिति भावः। अत्र प्राणपदेन चतुर्मुखः। तत्र च मनसो लयो वाणीद्वारा। ननु कथं प्राणादनुत्पन्नस्य मनसः प्राणे लय इत्यत आह- **वायोरिति** ॥ न च भगवदुत्पन्नत्वोक्तिविरोधः। प्राणद्वारा तदुपपत्तेः। न च तयोश्चेष्टकत्व-साम्यम्। 'मनः उदक्रामन्मीलित इवाश्नन् पिबन्नास्तैव प्राण उदक्रामत् तत्प्राण उत्क्रान्तेऽपद्यत। मनः प्राविशदशयदेव प्राणः प्राविशत् तत्प्राणे प्रपन्न उदतिष्ठत्' इत्यादेः। अतो मनसः प्राणे लयसद्भावादुक्तं युक्तमिति सिद्धम् ॥ ३ ॥अ. २॥

शेषतात्पर्यचन्द्रिका

॥ 'ॐ तन्मनः प्राण उत्तरात् ॐ' ॥ ४-२-३ ॥

सङ्गतिः

ननु वाचो मनोवशत्वस्य प्रत्यक्षसिद्धत्वाद् यथा लयनिर्णयः, तथा मनःप्राणयोरनूनत्वस्यापि प्रत्यक्षसिद्धत्वेन साम्येऽन्योन्यवशत्वस्यापि सम्भवेन लयानिर्णयः किं न स्यादिति, 'मनसा वा अग्रे सङ्कल्पयत्यथ वाचा व्याहरति' (त.प्र.उ.श्रुतिः ४.२.१) इति श्रौतयुक्तिबलाद् व्यामिश्रोक्तेरबाधकत्वेऽपि 'प्राणान्मनः', 'मनः सर्वेन्द्रियाणि च' इत्युक्त्योः व्यामिश्रत्वापरिहाराद् गुणप्रधानभावानिर्णयाल्लयानुपपत्तिरिति वा शङ्कनाद् अधिकार्याधिक्यक्रमेणात्र मनःप्राणयोर्लयो विचार्यत इति वा सङ्गतिः।

पूर्वपक्षः

लीयते न मनः प्राणे तस्य साम्यं यतो जनैः ।
सर्वव्यापारहेतुत्वं मनसोऽप्यनुभूयते ।।
छन्दोगोक्तमनश्शब्दस्मरशब्दौ शचीपतेः ।
स्कन्दस्य वाचकौ तेन नेयं नयविरोधिता ।।
यद्यपि प्राणजातत्वं मनसः श्रूयते क्वचित् ।
तत्प्राक्छ्रुतेरिति ह्याह विष्णुजत्वं तथाऽपि यत् ।।
स्वयमेव ततोऽन्यस्मादन्यस्य स्यादनूनता ।

सिद्धान्तः

इति प्राप्तेऽभिधास्यामो मनःप्राणे प्रलीयते ।।
इति यस्मादुत्तरस्थं वाक्यं स्पष्टं प्रतीयते ।
न चास्यान्यार्थता युक्ता पूर्ववाक्यविरोधतः ।।
मनःपदं पूर्ववाक्ये शेषवाचीति निश्चितम् ।
बाधकं नैव चात्रास्ति मनस्था सर्वयन्तृता ।।
मनःस्थेन विशेषेण कार्मैः कर्मकृदेव च ।
इत्यादिवचनैः प्राणान्न स्वतोऽतस्तदूनता ।।
ऐतरेये च मनसः प्राणाधीनत्वमीरितम् ।
न साक्षाद् विष्णुजातत्वं मनसः सूत्रकृन्मतम् ।
प्राणद्वारेण तज्जत्वमुत्कृष्टत्वं न साधयेत् ।।' इति ।

परकीयं मनोऽधिकरणम्

अन्ये तु यदि स्वप्रकृतौ विकारस्य लय इति नियमोऽभ्युपेयते तदा 'मनः प्राणे सम्पद्यते' (छा.उ. ६.८.६) इत्यत्र मनःस्वरूपस्यैव प्राणे सम्पत्त्या भवितव्यम् । मनःशब्दमुख्यार्थलाभात् । प्राणमनसोः प्रकृतिविकारभावः

प्राणादिकः सम्भवति । 'आपोऽन्नमसृजन्त' इति श्रुतिरन्नस्याबात्मकत्वमाह । 'अन्नमयं हि सौम्य मनः' (छा.उ. ६.५.४) इति श्रुतिः मनसोऽन्नात्मकताम् 'आपोमयः प्राणः' (छा.उ. ६.५.४) इति श्रुतिः प्राणस्याबात्मकताम् प्रकृतिविकारयोः अन्नशब्दोदितपृथिवीमनसोरप्प्राणयोश्च तादात्म्यात् प्राणमनसोरपि प्रकृतिविकृतिभावो युज्यत इत्यभ्यधिकाशङ्कया मनस इन्द्रियस्यैव प्राणे लये प्राप्तेऽभिधीयते । सत्यम्, 'आपोऽन्नमसृजन्त' इति श्रुतेः अबन्नयोः प्रकृतिविकारभावोऽवगम्यते । न तु तद्विकारयोः प्राणमनसोः । स्वयोनिप्रणाडिकया तु मिथो विकारयोः प्रकृतिविकारभावाभ्युपगमे सङ्कराद् घटशरावयोरपि मृद्विकारयोः प्रकृतिविकारभावापत्त्या घटस्यापि शरावे लयापत्तिः । तस्माद् यो यस्य साक्षाद्विकारः तस्य तत्र लय इत्यन्नस्याप्सु लयः । न त्वब्विकारे प्राणेऽन्नविकारस्य मनसो लयः । तथा चात्रापि मनोवृत्तेः वृत्तिमति प्राणे लयः। न तु वृत्तिमतो मनस इति सिद्धमित्याहुः ।

रामानुजाभिमतमनोऽधिकरणम्

तत् केचिदिदमक्षमन्तः 'स्यादयं सिद्धान्तः यदीह सम्पत्तिर्लयः । तदा साक्षात् प्रकृतावेव विकारस्य लयनियमात् प्राणस्य साक्षात् प्रकृतित्वाभावेनेन्द्रियस्य मनसस्तत्र लयो न सम्भवतीति मनश्शब्दस्येन्द्रियवाचकस्य वृत्तिलक्षकत्वमिति । न त्वेवम् । सम्पत्तिशब्दस्य संयोगपरत्वाङ्गीकारात् संयोगस्तु प्रकृतिविकारभावानापन्नयोरपि प्राणमनसोः दण्डपुरुषयोरिव युक्त इतीन्द्रियस्यैव ग्रहणोपपत्तेर्न मनश्शब्दे लक्षणा । न चैवं सम्पत्तिशब्देन लक्षणापत्तिर्दोषः । गत्यन्तराभावेनादोषत्वात् । विकारस्य विकारिणि लयस्य नियतत्वान्मनसः प्राणविकारत्वाभावेन तस्य तत्र लयासम्भवेन सम्पत्तिशब्दस्य मुख्यार्थत्यागावश्यम्भावाच्च । न च 'अन्नमयं हि सौम्य मनः' (छा.उ. ६.२.४) इति वचनान्मनसोऽन्नप्रकृतिकत्वमवगम्यते । अन्नस्य च 'ता अन्नमसृजन्त' (छा.उ.

६.६.५) इत्यम्मयत्वं सिद्धम् । आपोमयः प्राण इति चाप्प्रकृतिकत्वं प्राणस्यावगम्यते। अतो 'मनः प्राणे सम्पद्यते' इत्यत्र प्राणशब्देन प्राणप्रकृतिभूता अपो निर्दिश्य तासु मनःसम्पत्तिप्रतिपादने परम्परया स्वकारणे लयः सम्पद्यत इति सम्पत्तिशब्दो मुख्यार्थ एवेति वाच्यम्। 'अन्नमयं हि मनः', 'आपोमयः प्राणः' इत्यनेन मनःप्राणयोः अन्नेनाद्भिश्चाऽप्यायनमुच्यते। न तु तत्प्रकृतित्वम् । आहङ्कारिकत्वान्मनसः आकाशविकारत्वाच्च प्राणस्य । प्राणशब्दे लक्षणापत्तिश्चेत्यत्रापि पूर्वपक्ष-सिद्धान्तयोर्विनिमय इत्याहुः।

उभयोक्तसम्पत्तिशब्दार्थविमर्शः

तत्र वक्तव्यं संयोगमात्रकथनस्य कोपयोग इति । अनुवादमात्रस्य व्यर्थत्वात् । लयकथनस्य च चिन्तनार्थत्वेन सार्थक्यम् । संयोगस्य लयवन्नियतस्थानकत्वाभावेन तच्चिन्तनस्य वैय्यर्थ्यमेव। मनसः संयोगनिरूपकत्वपक्षे मनसा प्राणः सम्पद्यत इत्यापत्तिः । संयोगधर्मित्वे च मनः प्राणेन सम्पद्यत इत्यापत्तिश्च। एवं प्राणस्यापि निरूपकत्वधर्मित्वपक्षयोरपि प्राणेनेति वा मनसेति वा सम्पत्तिरिति प्रयोगापत्तिः । सर्वथा मनः प्राण इति प्रयोगानुपपत्तिरेव । प्राणमनसोः प्रकृतिविकारभावेन सम्पत्तिशब्दमुख्यार्थसम्भवे लक्षणायोगश्च । यद्यप्यत्र प्राणमनसोः वायुवैकारिकाहङ्कारिकत्वेन प्रकृतिविकारभावानुपपत्तिः । तथाऽप्यत्र प्राणमनश्शब्दाभ्यां न जडमात्रं विवक्षितम्। किन्तु तत्तदभिमानिचैतन्यमपि। ततश्च प्राणशब्दोक्तहिरण्यगर्भस्य मनःशब्दितशेषं प्रति जनकत्वेन प्रकृतिविकारभावोपपत्तिः । चैतन्यस्यानादित्वेऽपि ब्राह्मणादिशब्दवत् मनश्शब्दस्य देहविशिष्टवाचित्वान्न विरोधः । जडवाचकस्य शब्दस्य चैतन्यवाचित्वमभिमान्यधिकरणसिद्धम्। 'ओषधयः संवदन्ते सोमेन सह राज्ञा' (ऋ.सं. १०.७७.२२) इति बहुप्रयोगसिद्धं चेति न मनआदिशब्दे लक्षणादोषोऽपि। शब्दाभिधेयेषु बहुष्वर्थेषु सत्सु केषुचित् प्रकृतिविकारभाव एव लये नियामकः, केषुचित् तदभिमानिनोर्नियम्यनियामकभाव एव लये नियामकोऽ-

भ्युपेय इति जडयोः प्रकृतिविकारभावाभावेऽपि न दोषः । तस्मादत्र देवानां देहलयक्रम एवाभिधीयत इति न सम्पत्तिशब्दः पीडनीयः ।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- **प्राणे लीयते न वेति सन्देह इति ॥** स्त्रीणां पृथक्स्वातन्त्र्याभावात् प्राणे लयोक्त्यैव वाण्यां लयस्य प्राप्तेरिति भावः । **विशेषादर्शनं चेति ॥** प्राणादुत्पत्तिश्रुतेः भगवत उत्पत्तिश्रुतेश्च प्राबल्यदौर्बल्याविवेक इत्यर्थः । उभयोः सर्वप्रवृत्तिकारणत्वांशे विशेषादर्शनमिति वाऽर्थः । सर्वप्रवृत्तिकारणत्वानुभवस्य भ्रमत्वसम्पादकविशेषस्यादर्शनमिति वाऽर्थः ।

कार्यकरत्वरूपपूर्वपक्षन्यायविवरणम्

कार्यकरत्वमित्युक्तन्यायं साध्यप्रदर्शनेन विवृण्वत्

'न च मनःपूर्वकत्व-नियमादशेषदृष्टादृष्टव्यापाराणां तस्य प्राणादनूनता'

इति वाक्यं प्रतिज्ञाध्याहारेण व्याचष्टे- **न प्राणे मनो लीयत इति पूर्वः पक्ष इति ॥** अनेन यतो मनसः प्राणादनूनता निकृष्टत्वाभावः, अतो मनसः प्राणे लयो नोपपन्नः । निकृष्ट एव ह्युत्कृष्टे लीयते । निकृष्टभावश्च प्राणगतसर्वव्यापारकर्तृत्वाभाव एव स्यात्। न चासौ मनसो युज्यते। अशेषव्यापाराणां मनःपूर्वकत्वनियमस्यान्वयव्यतिरेकाभ्यामनुभवात्। न च वागादीनामपि सम्भाविताशेषव्यापारकारणत्वमनुभूयत इति वाच्यम्। दृष्टादृष्टाशेषव्यापारकारणत्वस्याननुभूयमानत्वात्। यद्यपि वाचो दृष्टादृष्टविषयकवाक्योच्चारणप्रवृत्तिकारणत्वमस्ति। तथाऽपि अशेषादृष्टप्रवृत्तिहेतुता नास्ति। न ह्यदृष्टजनकयागादिप्रवृत्तिः वाचा भवतीत्यर्थ उक्तो भवति। ननु छन्दोगे नामादिदेवता अनुक्रम्योत्तरोत्तराधिक्यक्रमेणाधिकारिवर्गस्य प्राणावधित्वाभिधानात् 'इयदामननात्' (ब्र.सू. ३-३-३५) इति सूत्रकृता च सयुक्तिकं मनसः प्राणस्योत्तमत्वसाधनात् तेनैवेदं गतार्थमित्याशङ्क्य परिहरति- **न चेति ॥** नन्वनूनत्वेऽपि तज्जन्यत्वेन लयो वक्तुं शक्यत एव । न चायं

नियमोऽस्ति- असमानानामेव लय इति। प्रमाणाभावात्। अस्ति त्वयं नियमः- तदुत्पन्नानां तत्र लय इति। तथा च मनसः प्राणोत्पन्नत्वस्य द्वितीयादौ व्यवस्थापितत्वात् पुनर्गतार्थताऽनिस्तार इत्याशङ्क्य परिहरति- **न च मनस इति**॥ 'प्राणान्मनो मनसश्च विज्ञानम्' (ब्र.सू.भा.उ.श्रुतिः २.१.१५), 'एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च' (मु.उ. २.१.३) इति श्रुत्योस्सूत्रयोश्च व्यामिश्रत्वेनानिश्चायकत्वादिति भावः।

आढ्यतारूपसिद्धान्तन्यायविवरणव्याख्यानम्

आढ्यता चेत्युक्तन्यायं सप्रमाणकं ज्ञानोपलक्षणतया विवृण्वत्

' ''इन्द्रियस्थैः स्वरूपैस्तु ज्ञानानि जनयत्यसौ ।
मनःस्थेन विशेषेण कार्मैः कर्मकृदेव च ॥
पृथक्स्थितेन रूपेण जीवं धारयति प्रभुः ।
जीवस्थितेन रूपेण वेदयत्यहमित्यपि ॥
प्राण एको वशी नित्यं बाह्यान्तःकरणेश्वरः ।
तान्येतान्यवशान्येव तथाऽपि कृपयैव सः ॥
पृथक्शक्तोऽपि तद्वैस्तु स्वरूपैस्तद्भकार्यकृत् ।
तस्येशो भगवान् विष्णुरेवमेष यथाऽन्यगः ॥''

इत्यादिश्रुतेः प्राणस्यैवाऽढ्यतावगमात्।'

इति वाक्यमवतारयति-**न चोभयोश्रेष्टकत्वसाम्यमिति** ॥ विवरणोदाहृतश्रुतिव्याख्येयत्वाद् विशेषविषयत्वादादिशब्दगृहीतत्वाच्चैतरेयश्रुतिं स्वयमुदाहरति- **मन उदक्रामदित्यादिना**॥ आदिशब्देन विवरणोक्तश्रुतिसङ्ग्रहः।

विवरणार्थः

ततश्चायं श्रुत्यर्थः। प्राण एकः प्राण एव वशी स्वतन्त्रः, न तु मन-

आदीन्द्रियदेवताः। कुत एतत्? यतोऽयं बाह्यकरणानां चक्षुरादीनाम् अन्तःकरणस्य मनसः। उपलक्षणमेतत्। करणवतां प्रमातॄणां जीवानां च स्वामी। नन्वेतत् कथम्? 'आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशत्। चन्द्रमा मनो भूत्वा हृदयं प्राविशत्' (ऐ.उ. २.१.४) इत्यनेन च बाह्यकरणानां मनसश्च जडतया कार्याक्षमत्वाद्धि तत्तद्देवताप्रवेशस्तेषु तेषूच्यते। अत आदित्यादिदेवानामेव बाह्यान्तःकरणेश्वरत्वमुच्यते। इन्द्रियस्थैश्चक्षुरादीन्द्रियेष्वन्तःप्रविष्टैः प्राणरूपैः प्राण एक एव रूपादिज्ञानानि जनयति। नत्वन्यः सूर्यादिः।

ननु सूर्यादिदेवता विना प्राणः ज्ञानानि जनयितुं शक्नोति न वा। आद्ये आदित्यादीनां चक्षुरादिप्रवेशोक्तिः व्यर्था स्यात्। द्वितीये कथं प्राणस्य स्वातन्त्र्यम्। अत्रोच्यते- यद्यप्यसौ ज्ञानानि जनयितुं पृथक् शक्तः। तथाऽपि चक्षुरादीन्द्रियगतैः सूर्यादिदेवैरेव ज्ञानानि जनयति। तेषु कृपयैव इन्द्रियप्रेरकत्वप्रयुक्तफलं तेषामपि स्यादिति दययैव न तु स्वस्याशक्त्या। नन्वेवं प्राणस्य कावस्थानम्। न तावच्चक्षुरादौ जडे। सूर्यादिनाऽक्रान्तत्वात्। न चासावपि तत्रैवावस्थातुमर्हति। प्रेरकानेकत्वस्यान्याय्यत्वात्। विरुद्धक्रियं च चक्षुराद्यापद्येत। नापीन्द्रियदेवेषु। विकल्पासहत्वात्। तथा हि पृथक् स्थितः देवैः ज्ञानानि जनयितुं शक्नोति न वा। आद्ये तदन्तरवस्थानं व्यर्थम्। द्वितीये स एवाशक्तिर्दोष आपतितः। किञ्चासौ चक्षुर्देवान्तःप्रविष्टः श्रोत्रदेवताद्वारा श्रोत्रगतशब्दज्ञानादिजनकत्वं नियामयति न वा। द्वितीये चक्षुर्गतप्राणस्य तथाविधकार्यजनकत्वाभावेनाशक्त्यापत्त्या स्वातन्त्र्यहानिः। आद्ये तु श्रोत्रगतदेवतान्तःप्राणस्यावस्थानं व्यर्थम्। तथा चेन्द्रियस्थैः स्वरूपैः ज्ञानानि जनयतीत्युक्तव्याहतिः इत्यत्रापि इदमेवोत्तरम्। यद्यपि पृथक्स्थिता देवताः नियमयितुमेकेनैव रूपेण समस्तेन्द्रियदेवताकार्यं कर्तुं च शक्नोति। तथाऽपि तेष्वादित्यादिषु

कृपयैव आदित्यादिगतैः रूपविशेषैः चक्षुरादिगतकार्यं करोति। न त्वव्यवस्थया। 'तदकार्यकृत्' इति पाठे देवताऽसाध्यकार्यकृदित्यर्थः।

ननु तथाऽपि जीव एव बाह्यान्तःकरणेश्वरः तस्य तत्कर्मार्जितत्वात्। न चोक्तन्यायेन प्राणस्य रूपान्तरमङ्गीकर्तुं शक्यम्। चक्षुरादिस्थसूर्यादिदेवतान्तःप्रविष्टरूपेणैव ज्ञानोदयसम्भवात्। तत्रोत्तरम्- **तान्येतान्यवशान्येवेति ॥** न तावत् जीवकर्मनिर्मितत्वमात्रेण इन्द्रियाणां तदधीनत्वम्। यतः तानीन्द्रियाणि हिताकरणाहितकरणादिना स्वानधीनान्येवानुभूयन्ते। रूपान्तरेण प्राणेनानुप्रविष्टत्वाच्च न तदीश्वरत्वं जीवस्य। न च तत्प्रवेशो व्यर्थः। यतस्तेन रूपेण जीवं धारयति प्राणः। अन्यथा जीवस्य पात एव स्यात्। नन्वेवं जीवं धारयतीत्यनुपपत्तिः बहिष्ठस्यैव धारकत्वदर्शनादित्यत उक्तम्- **पृथक्स्थितेन रूपेण बहिष्ठेन रूपेणेति ॥** जीवधारणस्वस्वरूपवेदनरूपकार्यभेदाद् रूपद्वयमप्यङ्गीकार्यमेव । एवं बाह्यान्तःकरणजीवेश्वरत्वात् प्राण एव स्वतन्त्रः। ननु तथाऽपि मनस एव प्राणे लयोक्तिः कथम्? प्राणस्य सूर्यादीन् प्रत्यपि नियामकत्वादित्यत आह- **मनःस्थेनेति ॥** मनःस्थेन रूपविशेषेणैव यतो जीवस्याशेषकर्माणि ज्ञानानि च साधयति। तस्योपपादनं **कामैरिति**। तत्तदिच्छाभिरित्यर्थः। मनो हि ज्ञानकर्मेन्द्रियाणां तत्तद्विषयेच्छोत्पादनद्वारा सहकारीति सर्वसम्मतम्। अन्यथा मनोऽनधिष्ठितत्वादेरिन्द्रियदोषत्वं न स्यात्। तथा च मनसीव सन्निधानविशेषाधिक्यस्य सूर्यादावभावान्न तस्य तत्र साक्षाल्लय इति भावः। नन्वेवं ईश्वरस्य सर्वोत्कृष्टत्वहानिः। नेत्याह- **तस्येशो भगवान् विष्णुरिति ॥** तत्प्रसादादेवोक्तेन्द्रियप्रेरकत्वं प्राणस्य न स्वत एवेत्यर्थः। ननु जीवस्य जीवान्तरनियम्यत्वेऽनवस्थापातेन विष्णुनियम्यत्वमेवाङ्गीकार्यम् इत्यत उच्यते- **एवमेष यथाऽन्यग इति ॥** एष प्राणः विष्णुवदेवेश्वरः। न जीववदत्यन्तमस्वतन्त्रः। यतो यथा च विष्णुरन्यग एव मनसाऽप्यन्यगः। नियामकतया प्रसिद्ध इति वा। एषः प्राणो यथाऽन्यजीवग एवमेव विष्णुरपि स्वान्यप्राणग इति वा। एष जीवो यथाऽन्यवशगः, एवमेव प्राणोऽप्यन्यविष्णुवशग इति वा योज्यम्। तथा च प्राणस्य नाऽत्यन्तिकं स्वातन्त्र्यमस्वातन्त्र्यं वाऽस्तीति भावः।

॥ इति मनोऽधिकरणम् ॥ २ ॥

॥ अथ अध्यक्षाधिकरणम् ॥ ३ ॥

सूत्रभाष्यम्

ॐ सोऽध्यक्षे तदुपगमादिभ्यः ॐ ॥ ४.२.४ ॥

स प्राणः परमात्मनि विलीयते। 'सर्वे प्राणमुपगच्छन्ति प्राणः परमुपगच्छति प्राणं देवा अनुप्राणन्ति प्राणः परमनुप्राणिति तस्मादाहुः प्राणस्य प्राण इति', 'प्राणः परस्यां देवतायाम्'।

'मुक्ताः सन्तोऽग्निमाविश्य देवाः सर्वेऽपि भुञ्जते।
अग्निरिन्द्रं तथेन्द्रश्च वायुमाविश्य सोऽपि तु।
आविश्य परमात्मानं भुङ्क्ते भोगांस्तु बाह्यकान्॥
न ह्यानन्दो निजस्तेषां परैर्लभ्यः कथञ्चन।
किमु विष्णोः परानन्दो न ते विष्णाविति (विष्णविति) श्रुतेः॥
प्राणस्य तेजसि लयो मार्गमात्रमुदाहृतम्।
सर्वेशितुश्च सर्वादेस्तस्यान्यत्र लयः कथम्॥'

इत्यादिश्रुतिस्मृतिभ्यः॥ ४॥

॥ इत्यध्यक्षाधिकरणम्॥ ३॥

तत्त्वप्रकाशिका

सङ्गतिः

अत्र प्राणस्य मोक्षसिद्ध्यर्थं परमात्मनि लयसमर्थनादस्ति शास्त्रादि-सङ्गतिः। अन्यथा कस्यापि मोक्षाभावप्रसङ्गात् समर्थनीयमेतत्। प्रकृतः प्राणोऽत्र विषयः। किं परमात्मनि लीयते न वेति सन्देहः। पूर्वोक्तं सन्देहबीजम्।

पूर्वपक्षः

प्राणो न परमात्मनि लीयत इति पूर्वः पक्षः। तस्य तदधीनत्वानिश्चयात्। न च वाच्यं 'चक्षुरादिवत्' (ब्र.सू. २.४.११) इत्यादौ तदुक्तमिति। तस्यानन्याधीनत्वेऽपि श्रुतिसद्भावात्। न च तस्या गत्यन्तरं चोक्तमिति वाच्यम्। अनन्याधीनत्वे प्राणस्य श्रुतिबाहुल्यसद्भावात्। बाहुल्यस्य प्राबल्यहेतुत्वात्। न हि प्रबलस्य दुर्बलेन बाधः। वैपरीत्यस्यैवोचितत्वात्। 'महान्तमस्य महिमानमाहुरनद्यमानो यदनन्नमत्ति' इति प्राणस्य लयाभावोक्तेश्च। अतः प्राणस्य परमात्मनि लयाभावेन कस्यापि मोक्षाभाव इति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **स इति** ॥ प्राणो हिरण्यगर्भः परमात्मनि लीयत एव तस्य तदधीनत्वात्। न च तदनिर्णयः। तदधीनत्वेऽपि श्रुत्यादिबाहुल्यसद्भावात्। न च साम्यम्। तदधीनत्वश्रुतीनां निरवकाश-त्वात्। स्वातन्त्र्यश्रुतीनां तु 'सर्वे प्राणमुपगच्छन्ति' इति न्यायेन सावकाश-त्वात्। सावकाशनिरवकाशयोश्च निरवकाशस्य प्राबल्यात्। अनद्यमान इति चान्यैरनद्यमान इत्यर्थोपपत्तेरिति भावः। बाह्यकानित्येतदेवोपपादयति- **न हीति** ॥ ननु 'प्राणस्तेजसि' इति श्रुतेः प्राणस्य रमायां लयो न परमात्मनीत्यत आह- **प्राणस्येति** ॥ चतुर्मुखस्य तेजसि लयो नाम तत्प्राप्तिमात्रं न तु तत्र देहलयः। तस्य साक्षात् परमात्मनि लययोग्यत्वादिति भावः। प्राणत्वेऽस्त्येव तेजसि लयः। अतो विरिञ्चस्य हरौ लयसद्भावाद्युक्तः सर्वज्ञानिनां मोक्ष इति सिद्धम्॥ ४॥ अ.३॥

॥ इत्यध्यक्षाधिकरणम्॥ ३॥

शेषतात्पर्यचन्द्रिका

'ॐ सोऽध्यक्षे तदुपगमादिभ्यः ॐ' ॥ ४-२-४ ॥

सङ्गत्यादि

यथा मनसः सकाशात् प्राणस्याऽढ्यत्वात् तस्य तत्र लयः, तथा प्राणादपि विष्णोराढ्यत्वात् तस्य तत्र लय इत्यतिदेशनात्[१] सङ्गतिः। अत्र 'मनः प्राणः' (छा.उ. ६.८.६) इति श्रुतौ प्रकृतः प्राणशब्दाभिधेयो हिरण्यगर्भो विषयः। परमात्मनि सम्पद्यते न वेति सन्देहः। श्रेष्ठश्चेत्यत्र च द्वितीयोक्तायाः प्राणस्य परमात्मन उत्पत्तिश्रुतेः, 'अनद्यमानो यदनन्नमत्ति' (छा.उ. ४.३.७) इत्यादि-श्रुतेश्च, प्राबल्यदौर्बल्ये विशेषादर्शनं सन्देहबीजम्।

पूर्वपक्षः

न हिरण्यगर्भः परमात्मनि लीयत इति पूर्वपक्षः। तस्य परमात्मानूनत्वात्। ननु 'चक्षुरादिवत्तु तत्सहशिष्टत्वादिभ्यः' (ब्र.सू.२.४.११) इति द्वितीयनयेन चक्षुरादिसाधारण्येन भगवदधीनत्वमुपपादितमिति चेन्न। 'प्राणो वाव सर्वेभ्यो भूयान्न हि प्राणाद्भूयान् प्राणो ह्येव भूयान् तस्मात् भूयान्नाम' इति कौण्ठरव्य-श्रुतितस्तस्येहाक्षेपात्। न च तस्याः 'अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत्' (ब्र.सू. ३.३.३७) इत्यत्रान्येभ्यः प्राणस्योत्तमत्वं, तस्मात् परमात्मनो ह्युपदिष्टमिति गत्यन्तरं चोक्तमिति वाच्यम्। 'न प्राणः किञ्चिदाश्रितः', 'यस्मिन्निदं सर्वमध्यार्प्रोतं' (बृ.उ. ३.९.९) 'प्राणस्यैतद्वशे सर्वं त्रिदिवे सम्प्रतिष्ठितम्' (प्रश्न.उ. २.१३), 'वायुना वै गौतम सूत्रेण' (बृ.उ. ३.७.२) इति श्रुतिबाहुल्यादुक्तगत्यन्तरस्याश्रद्धेयत्वात्। न च 'शतमप्यन्धानां न पश्यति' इति न्यायात् बाहुल्यमप्रयोजकमिति वाच्यम्। 'द्विविधं बलवत्त्वं च बहुत्वाच्च

१. अतिदेशात् इति पाठान्तरम्।

स्वभावतः' (वि.त.नि.उ. ब्रह्मतर्कवचनम्) इति बाहुल्यस्य प्राबल्यहेतुत्वेन निर्णीतत्वात्। न च 'तयोः स्वभावो बलवानुपजीव्यादिकश्च सः' (वि.त.नि.उ. ब्रह्मतर्कवचनम्) इति बहुत्वकृतप्राबल्यापेक्षया निरवकाशत्वादिकृतप्राबल्यं ज्यायः। 'आत्मत एषः' (प्रश्न.उ. २.३)इति श्रुतिश्च निरवकाशैवेति वैपरीत्य-मुचितमिति वाच्यम्। 'महान्तमस्य महिमानमाहुरनद्यमानः' (छा.उ. ४.३.७) इति साक्षादेव लयाभावप्रतिपादनात् ततोऽप्यस्याः श्रुतेर्निरवकाशत्वात्। तस्मात् प्राणः परेशे न लीयते। निरवकाशोक्तश्रुत्या लयाभावोपपादनात्।

सिद्धान्तः

इति प्राप्ते वदामोऽत्र विष्णुगत्वस्य निश्चयः।
त्वदुक्तं श्रुतिबाहुल्यं यतोऽत्रापि च दृश्यते॥

श्रुतिबाहुल्यं च 'प्राणः परमुपगच्छति प्राणं देवा अनुप्राणन्ति प्राणः परमनुप्राणिति' (ब्र.सू.भा.उ.श्रुतिः ४.२.४), 'प्राणः परस्यां देवतायाम्' (ब्र.सू.भा.उ.श्रुतिः ४.२.४), 'सोऽपि त्वाविश्य परमात्मानम्' (ब्र.सू.भा.उ. श्रुतिः ४.२.४)इत्यादिभाष्योदाहृतं द्रष्टव्यम्। न च तावता संशयः। निरव-काशत्वकृतप्राबल्यस्य ज्यायस्त्वात् तदधीनत्वश्रुतीनां च निरवकाशत्वात् 'सर्वे प्राणमुपगच्छन्ति' (ब्र.सू.भा.उ.श्रुतिः ४.२.४)इति श्रुत्यनुसारात्। स्वातन्त्र्यश्रुतीनां भगवदितरविषयत्वोपपत्तेः। एतेन 'अनद्यमानः' इति श्रुतिः निरवकाशेति निरस्तम्। ननु तथाऽपि भगवदधीनत्वमात्रेण न तत्र प्राणस्य लयः। अग्न्यादीनामपि तत्प्रसङ्गात्। किन्तु साक्षादुत्तमे लक्ष्मीतत्वे लयो वक्तव्यः। सति चैवं तदधीनस्य तत्र लय इति प्रतिबन्धोऽपि स्वस्थो भवति। 'प्राणस्तेजसि' (छा.उ. ६.८.६) इति श्रुतिरप्यनुगृहीता भवति। तत् कथं परमात्मनि लयः? उच्यते। द्विविधो ह्यत्र प्राणो भूतपूर्वो वर्तमानश्चेति। लयोऽपि द्विविधः। मुक्त्यर्थोऽतदर्थश्चेति। भूतपूर्वस्य मुक्त्यर्थो लयोऽत्र विचार्यते। 'विलीनो

हि प्रकृतौ संसारमेति' (ब्र.सू.भा.उ.सौपर्णश्रुतिः ४.२.८) इति विशेषवचनाल्लक्ष्मीतत्वे लयश्च न मुक्त्यर्थ इति वक्ष्यते। 'प्राणस्तेजसि' (छा.उ. ६.८.६) इति वचनं तु वर्तमानप्राणविषयं भविष्यति। तस्यैव पुनर्विरिञ्चरूपेणोत्पत्त्यङ्गीकारात्। भूतपूर्वविषयत्वेऽपि मार्गमात्रत्वेन तत्र देहलयाभावेनेदानीमविचार्यत्वात्। 'प्राणः परस्यां देवतायाम्' इति साक्षादेव लयश्रुतिश्चास्तीति न किञ्चिदनुपपन्नम्। नन्वसौ श्रुतिश्छन्दोगैर्न पठ्यत इति चेत्, मा पाठि। सर्वशाखाविदग्रेसरेणाऽचार्येण शाखान्तरेऽस्य वाक्यस्य देवतालयप्रकरणे आम्नानादिति।

कार्यकरत्वाढ्यताख्ययोः पूर्वपक्षसिद्धान्तन्याययोर्विवरणम्

टीकाक्षरार्थस्तु- कार्यकरत्वन्यायमाढ्यतान्यायं चैतदधिकरणसम्बन्धित्वेनातिदेशेन विवृण्वत्

'सोऽध्यक्षे इत्यस्याप्येवमेवाऽशङ्का परिहारश्च'

इति वाक्यं तत्रैवमेवाऽशङ्केत्यंशं व्याचष्टे- **तस्य तदधीनत्वानिश्चयादिति** ॥ यथाऽशेषदृष्टादृष्टव्यापाराणां भगवत्पूर्वकत्वनियमः, तथा प्राणपूर्वकत्वनियमस्यापि सद्भावादिति भावः। तर्हि कथं न गतार्थता। 'तस्येशो भगवान् विष्णुः' इति पूर्वोदाहृतवचनेनैव विष्णोराढ्यतावगमाद् इत्यतो विशेषयुक्त्या पुनः पूर्वपक्षसिद्धान्तप्रवृत्तिसम्भवादित्याशयेन पक्षद्वयेऽपि विशेषयुक्तिजातप्रदर्शनेन उक्तमेव विवृण्वत्

'श्रुतिबाहुल्यमेवाऽशङ्कायां परिहारे च विशेषहेतुः'

इति वाक्यं तत्र श्रुतिर्बाहुल्यं चेति द्वयमपि कक्ष्याक्रमेण विवक्षितमिति मन्वानः श्रुतिरेवाऽशङ्कायां विशेषहेतुरित्यंशमवतारयति- **न च वाच्यमिति** ॥ व्याख्याति- **तस्यानन्याधीनत्वेऽपीति** ॥ श्रुतिस्तु 'इयदामननात्' (ब्र.सू. ३.३.३५)

इत्यधिकरणोदाहृतकुण्ठरवदृष्टा द्रष्टव्या। बाहुल्यमेवाऽशङ्कायां विशेषहेतुरित्यंशमवतारयति- **न चेति** ॥ व्याचष्टे- **अनन्याधीनत्वे प्राणस्येति** ॥ श्रुतिबाहुल्यमेव परिहारे च विशेषहेतुरित्यंशं व्याचष्टे- **तदधीनत्वेऽपीति** ॥ 'सर्वे प्राणमुपगच्छन्ति। प्राणं देवा अनुप्राणन्ति' (ब्र.सू.भा.उ.श्रुतिः ४.२.४) इत्यादिपूर्वांशोदाहरणस्य भाष्ये कृत्याप्रतीतेः तद्दर्शनाय साम्यमाक्षिप्य प्रतिक्षिपति- **न च साम्यमिति** ॥ हेत्वंशमध्याहरति- **तदधीनत्वेति** ॥ पुनः साम्यप्राप्तिमाशङ्क्याऽह- **स्वातन्त्र्यश्रुतीनां त्विति** ॥ अनेन प्राणस्वातन्त्र्यश्रुतीनां सावकाशत्वप्रदर्शनाय भाष्ये पूर्वांशोदाहरणं न व्यर्थमिति सूचितम्।

सूत्रार्थः

सूत्रार्थस्तु- तदुपगमादिशब्देन तदुपगमतदनुप्राणनादिवाचकशब्दघटितश्रुतयो गृह्यन्ते। 'प्राणः परमुपगच्छति' इत्यादिश्रुतिभ्यो हिरण्यगर्भः सर्वेन्द्रियस्वामिनि परमात्मनि लीयत इति।

॥ इत्यध्यक्षाधिकरणम् ॥ ३ ॥

॥ अथ भूताधिकरणम् ॥ ४ ॥

सूत्रभाष्यम्

ॐ भूतेषु तच्छ्रुतेः ॐ ॥ ४.२.५ ॥

भूतेष्वन्येषां देवानां लयः। 'भूतेषु देवा विलीयन्ते भूतानि परे न पर उदेति नास्तमेत्येकल एव मध्ये स्थाता' इति बृहच्छ्रुतेः ॥ ५ ॥

॥ इति भूताधिकरणम् ॥ ४ ॥

तत्त्वप्रकाशिका

सङ्गतिः

अत्र देवानां परमात्मप्राप्त्यर्थं समस्तभूतेषु लयसमर्थनादस्ति शास्त्रादि-सङ्गतिः। अग्नावेव सर्वलये प्रागुक्तन्यायबाधः स्यादतः समर्थनीयमेतत्। 'अग्नौ सर्वे देवा विलीयन्ते' इत्युक्तदेवा विषयः। किमेकस्मिन्नग्नावेव लीयन्ते उत भूतान्तरेऽपीति सन्देहः। श्रुतिरन्याधीनत्वं च सन्देहबीजम्।

पूर्वपक्षः

अग्नावेव सर्वदेवानां लय इति पूर्वः पक्षः। 'अग्नौ सर्वे देवा विलीयन्ते' इति श्रुतेर्विपर्यये प्रमाणाभावाच्च। न चान्याधीनत्वादन्यत्र लयः। नियामकानां बाहुल्येन तस्यानिर्णायकत्वात्। अतोऽशेषदेवानामग्नावेव लयाद्युदुक्त-मधमानामुत्तमेषु लय इति तदयुक्तमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **भूतेष्विति ॥** येऽत्र विशिष्योक्तेभ्योऽन्ये देवास्तेषां पञ्चस्वपि भूतेषु लयो न त्वेकस्मिन्नग्नावेव। 'भूतेषु

देवाः' इति श्रुतेरेवेत्यर्थः। 'अत्र भूतानि परे' इति न साक्षात्। आकाशोर्व्योर्बृहस्पतिद्वारा। भूतवायोः प्रवहस्येन्द्रद्वारा। अपां सोमद्वारेति। अतः सर्वेषामग्नौ लयाभावादुक्तं युक्तमिति सिद्धम् ॥ ५ ॥ अ.४ ॥

शेषतात्पर्यचन्द्रिका

॥ 'ॐ भूतेषु तच्छ्रुतेः ॐ' ॥ ४-२-५ ॥

सङ्गत्यादि

ननु तदुपगमश्रुत्यादिभ्यो यदि प्राणस्याध्यक्षे लयस्तर्हि सर्वदेवानामग्र्युपगम-श्रुत्यादिभ्योऽग्नावेव लयः स्यादित्युत्थानात् सङ्गतिः। प्राणमनोवागादिभ्योऽन्ये बृहस्पत्यादयोऽग्नेरुत्तमा अधमाश्च सर्वे देवा विषयः। एकस्मिन्नग्नावेव लीयन्ते उत भूतान्तरेऽपीति सन्देहः।

पूर्वपक्षः

अग्नावेव सर्वेषामुत्तमानां अधमानां च लय इति पूर्वपक्षः।

'अग्नौ सर्वाणि दैवानि विलीयन्त इति श्रुतेः।
न चात्र बाधकं किञ्चिदन्यथा स्यादनिर्णयः ॥'

सिद्धान्तः

सिद्धान्तस्तु-

भूतेषु देवा लीयन्त इति श्रुत्या तु पञ्चसु।
देवानां विलयो वाच्यस्तेन नोक्ताव्यवस्थितिः ॥' इति।

टीकाक्षरार्थस्तु- 'भूतेषु तच्छ्रुतेः' इति सूत्रे तच्छ्रुतिप्रतिद्वन्द्वितया श्रुत्याख्यपूर्वपक्षहेतुमाह- अग्नौ सर्वे देवा विलीयन्त इति श्रुतेरिति ॥

अर्थक्लृप्तिसमानलोपाख्ययोः पूर्वपक्षसिद्धान्तन्याययोर्विवरणम्

अत्रार्थक्लृप्तिः पूर्वपक्षन्यायः, समानलोपः सिद्धान्तन्यायः । ताविमौ न्यायमालायां सङ्गृहीतौ, एतदधिकरणसम्बन्धित्वेन विवरणे न विवृतौ । उत्तराधिकरणसम्बन्धित्वेन तु विवृतौ । ननु प्रथमातिक्रमे कारणाभावादत्रैव विवरणीयौ । उत्तराधिकरणे त्वर्थात् सिद्ध्यतीत्येवमुक्तम् । सत्यम् । अनेकभूतेषु लयनिर्णये भूतेषु लयोऽप्यर्थात् सिद्ध्यति । भूतलयमात्रनिर्णये तु नानेकस्मिन् लयः सिद्ध्यतीत्येतदधिकरणप्रमेयगर्भत्वादुत्तराधिकरणस्य अभ्यर्हितत्वात् तत्सम्बन्धितया विवरणं नायुक्तम् । ननु 'भूतेषु तच्छ्रुतेः' (ब्र.सू. ४.२.५) इत्यत्रापि भूतेष्विति बहुवचनाद् अनेकस्मिन् लयोऽपि सिद्ध्यतीत्यभ्यर्हितत्वमविशिष्टमिति चेन्न । 'भूतेषु देवा विलीयन्ते' (ब्र.सू.भा.उ. बृहच्छ्रुतिः ४.२.५) इति भूतलयवाक्यस्यैकस्मिन् भूते सर्वेषां भूतानां मुख्यलयेऽपि तद्द्वारेणान्येष्वपि लयोक्तौ चोपपत्तेः । ननु तर्हि एतदधिकरणमुत्तरेण कृतार्थमनारम्भणीयमेव । मैवम् । रंहतिनयादिवत् सामान्यविशेषविषयत्वेनान्योन्यवैय्यर्थ्यशङ्कायोगात् । उभयविधप्रमाणप्रकाशनार्थत्वाच्च । तथा चात्रार्थक्लृप्तिन्यायः भाष्यतदधिकरणपूर्वपक्षसङ्गतत्वेन शिष्यैरेवोह्य इति न विवरणकृत् प्रवृत्त इत्यभिसन्धिः । स्वयमर्थक्लृप्तिन्यायं विवृणोति- **विपर्यये प्रमाणाभावाच्चेति** ॥ अग्नौ सर्वदेवानां लयाभावे प्रमाणाभावेनार्थादग्नौ लयक्लृप्तिः सम्भवतीति न्यायविवरणं बोध्यम् । पूर्वैर्गतार्थतां परिहरति- **न चान्याधीनत्वादिति** ॥ 'उमा वै वाक् समुद्दिष्टा मनो रुद्र उदाहृतः' इत्यागमेनैव व्याख्यातवाङ्मनसीत्यादिश्रुतिवद् इह निर्णायकश्रुत्यदर्शनादिति भावः । समानलोपन्यायं सूत्रभाष्यव्याख्यानव्याजेन विवृणोति- **भूतेषु देवा इति श्रुतेरेवेत्यर्थ इति** ॥ आगमप्रमाणेनैव सर्वस्यापि लयविशेषस्य सिद्धेः । तदपाकरणेन युक्त्याभासमात्रसिद्धलयाङ्गीकारे समानस्य प्रमाणसहितस्य लयस्य लोप त्यागादिदोषप्राप्तिरिति न्यायविवरणमत्रानुसन्धेयम् ।

॥ इति भूताधिकरणम् ॥ ४ ॥

॥ अथ अनेकलयाधिकरणम् (नैकस्मिन्नधिकरणम्) ॥ ५ ॥

सूत्रभाष्यम्

॥ ॐ नैकस्मिन् दर्शयतो हि ॐ ॥ ४.२.६ ॥

नैकस्मिन् भूते सर्वेषां देवानां लयः । 'पृथिव्यामृभवो विलीयन्ते वरुणेऽश्विनावग्नावग्नयो वायाविन्द्रः सोम आदित्यो बृहस्पतिरित्याकाश एव साध्या विलीयन्ते । मृत्यवः पृथिव्यां वरुण आपोऽग्नयस्तेजसि मरुतो मारुत आकाशे विनायका विलीयन्ते' इति महोपनिषच्चतुर्वेदशिखा च दर्शयतः । अतोऽग्नौ देवा विलीयन्त इति तत्र निर्दिष्टानामेव ॥ ६ ॥

॥ इत्यनेकलयाधिकरणम् (नैकस्मिन्नधिकरणम्) ॥ ५ ॥

तत्त्वप्रकाशिका

सङ्गतिः

अत्र पुनर्देवानां मुक्त्यर्थं सर्वभूतेषु लयसमर्थनादस्ति शास्त्रादिसङ्गतिः । अन्यथोत्तमानामधमेषु लयप्रसङ्गात् समर्थनीयमेतत् । प्रकृतदेवा एवात्र विषयः । किं सर्वभूतेषु लीयन्त उताग्नावेवेति सन्देहः । उक्तमेव सन्देहबीजम् ।

पूर्वपक्षः

अग्नावेव सर्वेषां लय इति पूर्वः पक्षः । 'अग्नौ सर्वे देवा विलीयन्ते' इति श्रुतेः । न च 'भूतेषु देवा विलीयन्ते' इति श्रुतिविरोधः । एकस्मिन्नग्नावेव सर्वदेवलयाङ्गीकारेऽपि तदुपपत्तेः । अस्ति तावद् भूतानामुत्पत्तिक्रमवैपरीत्येन लयः । उत्पत्तिश्चाकाशादिक्रमेण 'आत्मन आकाशः' इति श्रुतेः । मुक्तिश्च प्रलयविशेषः । तथा चाग्नावेव सर्वदेवानां लयाङ्गीकारेऽपि भूतेष्वित्युपपद्यते ।

अग्नेर्वायौ वायोराकाशे विलयात्। न च वाच्यं मुख्यार्थः किं न स्यादिति। 'अग्नौ सर्वे देवा विलीयन्ते' इत्येतच्छ्रुत्यन्यथानुपपत्तेर्निरवकाशत्वात्। न चात्र विशेषप्रमाणमस्ति। अतोऽग्नावेव सर्वदेवानां विलयादुक्तव्यवस्थानुपपत्तिरिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रं पठित्वा व्याचष्टे- **नैकस्मिन्निति॥** नैकस्मिन्नग्नावेव भूते सर्वदेवानां लयो वाच्यः। 'पृथिव्यामृभवः' इत्यादिश्रुतिभ्यां प्रत्येकं भूतेषु देवतालयस्योक्तत्वात्। येषां देवानां यस्मिन् भूते लय उच्यते तत्तद्देवानां तत्तद्भूतोद्भूतत्वाच्च। न चाश्विप्रभृतीनां वरुणाद्यनुत्पन्नत्वान्न तत्र लयोपपत्तिरिति वाच्यम्। तेषां तदुत्पन्नत्वाभावे विशेषवचनाभावे च स्वसमानाऽबादिदेवतालयस्थाने वरुणादौ लयोपपत्तेः। अतो यदन्यथाव्याख्यानं तदयुक्तमिति भावः। अत्र वायुमारुतपदाभ्यां हिरण्यगर्भ उच्यते। तत्रेन्द्रस्य लय उक्तक्रमेण सोमस्य चानिरुद्धकामवारुणीशेषवाणीद्वारेण सूर्यस्य बृहस्पतिशक्रसौपर्णीसुपर्णवाणीद्वारेण मरुतामपीन्द्रादिद्वारा।

भूताभिमानिनां चान्योन्यलयाभावादन्यथाव्याख्यानमयुक्तम्। न चोत्पत्तिश्रुतिविरोधः। अत्र जडानां मुख्योत्पत्त्यभिधानात्। देवतानां त्वनुसर्गप्रतिपादनात्। ननु तर्हि 'अग्नौ सर्वे देवा विलीयन्ते' इति श्रुतेः का गतिरित्यत आह- **अत इति॥** यत एवं पृथक् प्रत्येकं भूतेषु लयः सिद्धोऽतो 'अग्नौ सर्वे देवा विलीयन्ते' इति श्रुत्योदाहृतश्रुतावग्नौ विलीयमानत्वेन निर्दिष्टानामेव लयोऽभिधीयत इत्यङ्गीकार्यमिति भावः। उपलक्षणमेतत्। प्रायेणाधमानां सर्वेषां भूतान्तराप्रवेशिनां तत्रैव लयः। अतोऽग्नावेव सर्वेषां लयाभावादुक्तव्यवस्था युक्तेति सिद्धम्॥ ६॥ अ.५॥

॥ इत्यनेकलयाधिकरणम् (नैकस्मिन्नधिकरणम्)॥ ५॥

शेषतात्पर्यचन्द्रिका

॥ 'ॐ नैकस्मिन् दर्शयतो हि ॐ' ॥ ४-२-६ ॥

सङ्गतिः पूर्वपक्षश्च

देवानां सामान्यतो भूतेषु लयेऽभिहिते तद्विशेष इह चिन्त्यत इति सङ्गतिः। 'अग्नौ सर्वे देवा विलीयन्ते' (त.प्र.उ.श्रुतिः ४.२.५) इति स्पष्टश्रुतेः अग्नौ देवानां साक्षाल्लयः, अग्निद्वारा वायौ, वायुद्वारा आकाशे लय इत्यङ्गीकारेऽपि 'भूतेषु देवा विलीयन्ते' (ब्र.सू.भा.उ. बृहच्छ्रुतिः ४.२.५)इति श्रुतौ बहुवचनाद्युपपत्तिः। न च 'अग्नौ सर्वे देवाः' इत्यत्र सर्वशब्दोऽग्नौ लययोग्यदेवतामात्रे सङ्कुचद्वृत्तिः किं न स्यादिति वाच्यम्। अग्नाविव पृथिव्यादावपि केषाञ्चिद्देवानां साक्षादेव लयप्रतिपादकश्रुतिसद्भाव एव तस्याङ्गीकार्यत्वात्। न चाद्यापि तथाविधश्रुतिरुपन्यस्ता।

तस्मादग्नौ सर्वदेवा लीयन्त इति वाक्यतः।
साक्षाल्लयोऽस्तु देवानामग्नावित्यव्यवस्थितिः॥

इति वोत्थानादनन्तरसङ्गतिः। कृतः पूर्वपक्षः।

सिद्धान्तः

सिद्धान्तस्तु-
भूम्यामृभव इत्यादिवाक्यात् पञ्चस्वपि ध्रुवम्।
भूतेषु विलयः साक्षाद् यथायोग्यं भविष्यति॥ इति।

अध्यक्षादित्रिसूत्र्यां परमतविमर्शः

अत्रान्ये 'सोऽध्यक्षे तदुपगमादिभ्यः' इत्यादित्रिसूत्रीम् एकमधिकरणं विधायेत्थं व्याचक्षते। स्थितमेतत् यस्य यतो नोत्पत्तिः तस्य तस्मिन् वृत्तिप्रलयो न स्वरूपप्रलय इति। इदमिदानीं 'प्राणस्तेजसि' इत्यत्र चिन्त्यते। किं यथाश्रुति

प्राणस्य तेजस्येव वृत्त्युपसंहारः ? किं वा देहेन्द्रियपञ्जराध्यक्षे जीव इति। तत्र श्रुतेरनतिशङ्क्यत्वात् प्राणस्य तेजस्येव सम्पत्तिः स्यात्। अश्रुतकल्पनाया अन्याय्यत्वादिति प्राप्ते अभिधीयते। 'एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति यत्रैतदूर्ध्वोच्छ्वासी भवति' (बृ.उ. ६.३.३८) इति श्रुत्या 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति' (बृ.उ. ४.४.२) इति श्रुत्या 'प्राणमुत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' (बृ.उ. ४.४.२), 'सविज्ञानो भवति' (बृ.उ. ४.४.२) इति श्रुत्या च जीवोपगमानुगमावस्थानानां प्रतिपादनात् प्राणस्य जीवे लयः। 'प्राणस्तेजसि' इति श्रुतिस्तु जीवसम्पृक्तस्य प्राणस्य तेजसि लयेऽप्युपपद्यत इति।

केचित्त्वाद्यमेकमेव सूत्रमधिकरणं विधाय प्राणस्वरूपस्यैव तेजसि संयोगचिन्तया पूर्वपक्षसिद्धान्तौ पूर्ववदेव प्रतिपादयन्ति।

तदुभयमपि न युक्तम्। किं प्राणस्य वृत्तितः स्वरूपतो वा प्रतीता तेजस्सम्पत्तिः बाधकवशात् त्यज्यते, उत साधकाभावात्। किं वा पक्षान्तरे साधकसद्भावात्। नाऽद्यः। तदनुपलम्भात्। 'आत्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति' (बृ.उ. ४.३.३८) इति श्रुतेः तेजस्सम्पत्त्यनन्तरमपि जीवसम्पत्त्यङ्गीकारेणाप्युपपत्तेः। 'प्राणस्तेजसि' (छा.उ. ६.८.६) इति श्रुतेरुपचरितार्थत्वप्रसङ्गस्य साम्यात्। किञ्च प्राणसम्पत्त्याधारत्वं तेजसः सप्तम्या स्फुटं प्रतीयत इति तेजोवाक्यं नार्थान्तरे सावकाशम्। तदुपगमवाक्यं तु द्वितीयानिर्देशेन तेजोद्वाराऽपि प्राणस्य जीवसम्पत्तिमाहेति सावकाशत्वान्न तेजोवाक्यपीडनं युक्तं स्यात्। नन्वेवं 'तेजः परस्यां देवतायाम्' (छा.उ. ६.८.६) इति वाक्यस्याप्युक्तयुक्त्या निरवकाशत्वेन तेजसोऽनन्तरं वस्त्वन्तरप्राप्त्यसहिष्णुना परदेवतावाक्येनाऽऽक्रान्तत्वाज्जीवप्राप्तेः क्वावकाश इति चेन्न। परदेवताप्राप्त्यनन्तरं जीवप्राप्त्युपपत्तेः। तेजोवाक्यस्य कथञ्चिदपि अवकाशादर्शनात्।

कल्पतरुपरिमलोक्ततदुपगमवाक्यप्राबल्यनिरासः

यच्चोक्तं लौकिकदृष्टान्तानुसारात् तदुपगमवाक्यस्य प्राबल्यम्। तथा हि लोके कश्चित् पान्थः प्रथमं नाविकेन सङ्गत्य ततस्तेन सह तदीयां नावं गत्वा पारं प्राप्नोति तथाऽयमपि प्राणः प्रथमं जीवेन सङ्गत्य ततस्तेन सह तेजश्शब्दोक्तं त्रिवृत्कृतभूतान्तरसंसृष्टं तदीयं सूक्ष्मशरीरं गत्वा तेन सह परदेवतां प्राप्नोति। यथा स्रुघ्नान्मथुरां गत्वा पाटलीपुत्रं व्रजति तथा प्राणो जीवं गत्वा तेजो व्रजति। तथा च तेजोवाक्यस्य लोकाननुसारित्वेन न प्राबल्यमिति।

तन्न। यथा कश्चित् सारथिः प्रथमं राजकीयं रथं स्वयमारूढो राजसमीपं गत्वा पश्चाद् रथारूढेन राज्ञा सहितः तदभिमतं देशं प्राप्नोति, एवमेवायं प्राणः सूक्ष्मशरीरं प्रथमं प्राप्य ततस्तत्प्राप्तेन जीवेन सहितः परदेवतां प्राप्नोतीत्यादिलोकानुसारदर्शनात्। किञ्च यथा वागादिबाह्येन्द्रियोपरमानन्तरमपि मनोव्यापारदर्शनात् 'वाङ् मनसि सम्पद्यते' (छा.उ. ६.८.६), 'इन्द्रियैः मनसि सम्पद्यमानैः' (प्रश्न.उ. ३.९) इति श्रुतेः बाह्याभ्यन्तरज्ञानोपरमानन्तरमपि स्वाश्रयव्यापारदर्शनात् 'मनः प्राणे' (छा.उ. ६.८.६) इति श्रुतिश्च प्रबला तथा श्वासरूपप्राणव्यापारोपरमानन्तरमपि देहे क्वचिदौष्ण्यदर्शनात् तेजःश्रुतिरेव प्रबलेति कथमेतद्बाधकत्वं तदुपगमश्रुतेः। कुण्डे आहितस्याग्नेरपगमेऽपि किञ्चित्कालं तत्कुण्डे औष्ण्यानुगमवद् देहेऽपि प्राणापगमे तदनुगमोपपत्तिः। किञ्चोपगमनश्रुतिरिन्द्रियसाधारणप्राणशब्दघटिता सामान्यविषयिणी न तेजःश्रुतिं बाधितुमीष्टे। न च तेजःश्रुतिरपि सामान्यविषयिणीति युक्तम्। 'वाङ् मनसि सम्पद्यते' (छा.उ. ६.८.६) इति इन्द्रियाणां पृथगुक्तेः।

नापि 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति' (बृ.उ. ४.४.२) इत्यनुगमश्रुतिर्बाधिका। प्राणस्य जीवसम्पत्त्यभावेऽपि तेजस्सम्पन्नस्यैव जीवमनूत्क्रान्ति-

सम्भवात्। प्रत्युत जीवे लीनस्य प्राणस्य तत्सहगमनानुपपत्तेः। न हि मधुकर-राजानमनूत्क्रान्तानां मधुमक्षिकाणां तत्र लयोऽस्ति।

नापि 'सविज्ञानो भवति' (बृ.उ. ४.४.२) इति श्रुतिर्बाधिका। जीवस्य सविज्ञानत्वस्य प्राणस्य तेजसि लयेऽप्युपपत्तेः। प्रत्युत तेजसो विज्ञानानुकूलत्वात् तेन सम्पन्नस्य जीवस्य सविज्ञानत्वोपपत्तेः।

न द्वितीयः। 'प्राणस्तेजसि' इति श्रुतेरुक्तरीत्या प्रबलायाः साधकत्व-सम्भवात्।

नापि तृतीयः। उक्तरीत्याऽनुगमोपगमावस्थानादिश्रुतीनां साधकत्व-निरासात्।

किञ्चात्राऽत्मशब्दो न जीवपरः। एवमेवमात्मानमिति राजदृष्टान्तकथनात्। न ह्ययं तदा दन्दह्यमानशिरा इव बम्भ्रम्यमाणो राज्ञोपमेयः स्यात्। 'तद् यथा राजानं प्रयियासन्तमुग्राः प्रत्येनसः सूतग्रामिण्योऽभिसमायन्ति' (बृ.उ. ४.३.३८) इति पूर्ववाक्यादभित आगमनप्रतीतेश्च। न च म्रियमाणस्य जीवस्य प्राणादयो देवाः समभियन्तीति युक्तम्। तस्मादात्मशब्दो भगवत्स्वरूपांश-प्राज्ञपरः। 'अन्तकाले' इति तु जीवस्यान्तकाल इत्युपपन्नम्। 'यत्रैतदूर्ध्वोच्छ्वासी भवति' (बृ.उ. ४.३.३८) इत्येतदपि यस्यामवस्थायां जीव ऊर्ध्वोच्छ्वासी तस्यामवस्थायामयं प्राज्ञ आत्माऽभिनिष्क्रामतीति व्याख्येयम्। यद्यपि जीवमादाय गच्छतः प्राज्ञस्यान्वेवेन्द्रियदेवा गच्छन्ति। न त्वभित आयान्ति। तथाऽपि मुक्ता इन्द्रियदेवा अभित आयान्तीत्युपपद्यत एव। 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति' (बृ.उ. ४.४.२) इत्यादि च भगवत्युपपन्नतरम्। 'स यथा मधुकरराजानम्' (बृ.उ. ४.४.२) इति दृष्टान्तानुगुण्यं च।

सोऽध्यक्षे इति सूत्रस्याद्वैताभिमतव्याख्याविमर्शः

एतेन स प्राणः देहेन्द्रियपञ्जराध्यक्षेऽविद्याकर्मपूर्वप्रज्ञोपाधिके विज्ञानात्म-न्यवतिष्ठते। तत्प्रधाना प्राणवृत्तिर्भवतीति यावत्। तथा स प्राणोऽध्यक्षे करणाधिपे जीवे सम्पद्यते। 'एवमेवेममात्मानमन्तकाले सर्वे प्राणाः' इत्यादिना जीवोप-गमादिभ्य इत्याद्यसूत्रयोजना निरस्ता।

अध्यक्षशब्दस्य परमेश्वरे मुख्यत्वेन प्रवृत्तिसम्भवे आपेक्षिकाध्यक्षत्वमादाय जीवे प्रवृत्त्ययोगात्। किञ्च प्राणस्य तेजसि सम्पत्त्यङ्गीकारेऽपि जीवसम्पत्ति-रनुक्तिसिद्धैव। न हि तेजश्शब्दितसूक्ष्मशरीरं प्राप्तुमुद्यतस्य प्राणस्य जीवसम्बन्धेन विना तदुपपद्यते।

किञ्चेदं सूत्रं 'प्राणस्तेजसि' (छा.उ. ६.८.६) इति वाक्यं व्याख्यातीति तावद्वक्तव्यम्। कस्तदा श्रुत्यर्थः सम्पद्यते ? प्राणशब्दलक्षितः प्राण-सम्पृक्तोऽध्यक्षः तेजसि लीयत इति ? किं वा प्राणः तेजस्सहचरितदेहबीजभूत-सूक्ष्मपरिवाराध्यक्षे तेजश्शब्दलक्षिते जीवे लीयत इति ? नाऽद्यः। स प्रकृतः प्राणो विज्ञानात्मन्यवतिष्ठत इति त्वद्भाष्यभामतीविरोधात्। न हि 'मनः प्राणे' इति श्रुतौ 'तन्मनः प्राण उत्तरात्' (ब्र.सू. ४.२.३) इति सूत्रे वा प्राणशब्देन जीवो गृहीतः। 'अध्यक्षे' इति सूत्रे सप्तम्यनुपपत्तेः। आत्मानमन्तकाले सर्वे प्राणा अभिसमायन्तीत्यादिश्रुतिग्राहकसूत्रांशविरोधात्। जीवे प्राणसम्बन्ध-स्याप्राप्तत्वात् प्राणसम्पृक्तो जीव इत्यनुवादानुपपत्तेश्च। अनेनैव तत्र तत्सम्बन्धविधाने वाक्यभेदः। प्राणसम्पृक्तं मनोऽध्यक्षे लीयत इति 'तन्मनः प्राण उत्तरात्' (ब्र.सू. ४.२.३) इत्यस्याप्यर्थपर्यवसानापत्तेश्च। किञ्च, किं यथाश्रुति प्राणस्य तेजस्येव वृत्त्युपसंहारः ? किं वा देहेन्द्रियपञ्जराध्यक्षे जीवे? इति विमर्शभाष्ये तेजसि लयस्याप्रतीतेस्तद्विरोधश्च स्यात्। तेजोग्रहणेन

तेजस्सहचरितदेहबीजभूतसूक्ष्मपरिवाराध्यक्षो जीवात्मोपलक्ष्यते । तस्मिन् प्राणवृत्तिरप्येति इति भामतीग्रन्थविरोधाच्च।

न द्वितीयः । स प्राणसम्पृक्तोऽध्यक्षस्तेजस्सहचरितेषु भूतेषु लीयत इति भाष्येण विरोधात् । तत्र हि तेजश्शब्दस्य भूतेषु लक्षणेति प्राणशब्दस्य जीवलक्षणेति च प्रतीतेः। ''ननु चेयं श्रुतिः प्राणस्य तेजसि स्थितिं दर्शयति। न प्राणसंपृक्तस्याध्यक्षस्य । नैष दोषः । 'सोऽध्यक्षे' इत्यध्यक्षस्याप्यन्तराले उपसङ्ख्यातत्वात्। योऽपि हि स्रुघ्नान्मथुरां गत्वा पाटलिपुत्रं व्रजति सोऽपि स्रुघ्नात् पाटलिपुत्रं यातीति शक्यते वदितुम्। तस्मात् 'प्राणस्तेजसि' (छा.उ. ६.८.६) इति प्राणसम्पृक्तस्याध्यक्षस्यैवैतत्तेजःसहचरितेषु भूतेष्ववस्थानमुक्तम्'' इति त्वद्भाष्ये शङ्कासमाधानदृष्टान्तानामनुपपत्तेश्च। तत्र हि प्राणसहितस्याध्यक्षस्य भूतेष्ववस्थितिराक्षिप्यते न तु केवलस्य प्राणस्य। समाधीयते चेति प्रतीतेः। दृष्टान्ते च व्यवधानेनैव प्राप्तिरवगम्यते। न तु साक्षात्।

ननु नायं दोषः। 'दृष्टान्तेऽपि व्यवधानेन प्राप्त्यंशो न विवक्षितः। किन्तु यथा स्रुघ्नान्नगराद् गच्छतो मथुरापाटलिपुत्रयोः प्राप्यत्वेऽपि पाटलिपुत्रं प्राप्यत्वेन निर्दिश्यत एवमिहापि प्राणेन तेजसोऽध्यक्षस्य चोभयोः प्राप्यत्वेऽपि तेजसीति भूतमात्रस्य प्राप्यत्वं निर्दिश्यत इत्ययमर्थो विवक्षितः' इति कल्पतरूक्तेरिति चेन्न। मथुरायाः पाटलिपुत्रं यातीति व्यवधानेन गम्यत्वस्य स्पष्टं प्रतीतेः। अन्यथा स्रुघ्नाद् गृहं यातीत्येवावक्ष्यत्।

भूतेषु तच्छ्रुतेरिति सूत्रस्य परोक्तार्थनिरासः

'प्राणस्तेजसि' इति श्रुतेः गतिरुच्यते द्वितीयेन सूत्रेण। तथा हि। स प्राणसंयुक्तोऽध्यक्षः तेजस्सहचरितेषु भूतेषु सूक्ष्मेषु व्यवतिष्ठते । 'प्राणस्तेजसि' इति तच्छ्रुतेरिति व्याख्यानं न युक्तम्। तथा हि किमत्र तेजश्शब्दस्याध्यक्षे लक्षणेत्यभिप्रायः, उत प्राणोऽध्यक्षे, स तेजसीत्यन्तराले वाक्यमध्याहर्तव्य-

मिति। नाऽद्यः। विधौ लक्षणायोगात्। अनुवादकप्राणशब्दस्यैवाध्यक्षे लक्षणाया औचित्याच्च। न द्वितीयः। अपरिपूर्णे ह्यध्याहारः। न हीदमपरिपूर्णम्। स तेजस्यवतिष्ठते तच्छ्रुतेरिति सूत्रयितव्ये भूतेष्विति सूत्रस्य श्रुत्यानुगुण्याभावाच्च। श्रुतिगततेजश्शब्दस्य भूतेषु लक्षणाभिप्राये प्रकृतानुपयोगः। कथञ्चिदुपयोगे वाऽध्याहारज्ञापकानुक्तिरेव दोषः। न हि प्राणोऽध्यक्षेऽवतिष्ठते इति 'प्राणस्तेजसि' (छा.उ. ६.८.६) इति वाक्येऽध्याहरणीयमित्यत्र किञ्चिद् ज्ञापकमुक्तम्। 'प्राणस्तेजसि इति तच्छ्रुतेः' इत्युक्तस्यानध्याहारेऽप्युपपत्तेर्ज्ञापकत्वायोगात्।

नैकस्मिन्निति सूत्रस्य परोक्तार्थनिरासः

कथं तेजस्सहचरितेषु भूतेष्वित्युच्यते यावतैकमेव तेजः श्रूयते प्राणस्तेजसीति शङ्कायां नैकस्मिन्नेव तेजसि शरीरान्तरप्रेप्सावेलायां जीवोऽवतिष्ठते। कार्यस्य शरीरस्यानेकात्मकत्वदर्शनात्। 'आपः पुरुषवचसो भवन्ति' (छा.उ. ५.३.३) इति प्रश्नप्रतिवचने चामुमेवार्थं दर्शयतः। 'पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमयः' (बृ.उ. ४.४.५) इत्याद्या श्रुतिः। 'अण्व्यो मात्राऽविनाशिन्यो दशार्धानां तु याः स्मृताः। ताभिः सार्धमिदं सर्वं सम्भवत्यनुपूर्वशः' (शां.भा.उ.स्मृतिः ४.२.४) इति स्मृतिश्च एनमर्थं दर्शयतीति च तृतीयस्य व्याख्यानमयुक्तम्।

अस्याः शङ्कायाः परिहारावसराभावात् 'प्राणस्तेजसि' इति श्रुतौ प्रयुक्तस्य तेजश्शब्दस्य तन्मात्रपरत्वे भूतान्तरोपलक्षकत्वे वा इह पूर्वपक्षसिद्धान्तयोरुपयोगादर्शनात्। त्र्यात्मकनयसिद्धत्वेन पुनरवक्तव्यत्वाच्च।

एतेनैषां कैश्चिदुत्प्रेक्षिताऽपि योजना निरस्ता।

किञ्च मतद्वयेऽपि 'वाङ्मनसि' इत्यारभ्योक्तानीमानि सूत्राणि 'इन्द्रियैर्मनसि

सम्पद्यमानैः । यच्चित्तस्तेनैष प्राणमायाति । प्राणस्तेजसा युक्तः सहाऽत्मना' (छा.उ. ६.८.६) इत्यादिश्रुत्यनुसारेण वाङ्मनसीत्यनेन वागुपलक्षितानां बाह्येन्द्रियाणां मनउपहिते जीवे लय उच्यते । दृष्टो हि मनश्शब्दस्य जीवे प्रयोगः । 'प्राणबन्धनं हि सोम्य मनः' (छा.उ. ६.८.२) इति। 'मनः प्राणे' इत्यनेन विलीनसकलबाह्येन्द्रियस्य मनउपहितस्य जीवस्य प्राणप्राप्तिरुच्यते। 'प्राणस्तेजसि' इत्यनेन तथाभूतस्य प्राणस्योदानाख्यतेजःप्राप्तिरुच्यत इति 'वाङ् मनसि' इत्यादिश्रुतिः व्याख्यातीत्येव भाषणं युक्तम्। नतूक्तरीत्या लक्षणाद्याश्रयणेन श्रुतिविरोधेन च भाषणमिति दिक्।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- **किं सर्वभूतेष्विति** ॥ सर्वभूतेषु साक्षाल्लीयन्ते ? उताग्नावेव साक्षाल्लीयन्ते तदितरभूतेषु परम्परया ? इति विमर्शार्थो द्रष्टव्यः ।

टीकायामर्थक्लृप्तिरूपपूर्वपक्षन्यायव्याख्यानम्

अर्थक्लृप्तिन्यायमावृत्त्यैतदधिकरणसङ्गतत्वेन हेतूक्तिपूर्वं विवृण्वत्

'न च भूतानामुत्पत्तिक्रमवैपरीत्येन लयोक्तेर्मुक्तिलययोर्विशेषाभावाच्चैकस्मिन्नेव भूते सर्वेषां लयोऽर्थतः क्लृप्त इति वाच्यम्।'

इति वाक्यं व्याचष्टे- **अग्नावेव सर्वेषां लय इति** ॥ भूत इत्यस्यार्थः- **अग्नाविति** ॥ एकस्मिन्नेवेत्यस्यार्थः- **एवेति** ॥ अर्थतः क्लृप्त इत्यंशमवतारयति- **न च भूतेष्विति** ॥ 'भूतेषु देवा विलीयन्ते' (ब्र.सू.भा.उ.बृहच्छ्रुतिः ४.२.५) इति श्रुत्यर्थः । अर्थात् क्लृप्तः सर्वदेवानामग्नावेव लय इत्यर्थपर्यवसायीति निश्चितः। ननु 'भूतेषु देवा विलीयन्ते' इति श्रुतेरग्नावेव विलीयन्त इत्येषोऽर्थः कथमार्थिकोऽर्थः स्याद् इत्यतस्तदुपपादयति- **अस्ति तावदिति** ॥ अग्नेरबादिदेवतोत्पादकत्वाद् अग्नावबादिदेवानां लयो वक्तव्यः। उत्पत्तिक्रमवैपरीत्येन लयस्य

क्लृप्तत्वात्। न च तथाऽपि मुक्तिरन्यथाऽपि किं न स्यादिति वाच्यम्। मुक्तेः प्रलयविशेष-त्वात्। तथा चाग्निजन्यानामबादीनां स्वकारणत्वादग्नौ लयो युक्त इति भावः। नन्वेवमपि भूतेष्विति बहुवचनानुपपत्तिरित्यतोऽर्थतः क्लृप्त इत्यंशं प्रकारान्तरेण व्याख्यातुमाह- **तथा चाग्नावेवेति** ॥ व्याख्यानान्तरसमुच्चयार्थस्तथाशब्दः । अग्नौ साक्षाद्देवानां लयः, अग्नेर्वायौ, वायोराकाश इत्यग्न्यादिभूतत्रयस्य साक्षात्परम्परया चार्थतः सर्वदेवलयाधिकरणत्वाद् बहुवचनोपपत्तिरिति भावः । तथा च देवानां भूतोद्भवत्वादग्नेश्च भूतत्वाद् उत्पत्तिवैपरीत्येन लयोक्तेर्मुक्तिलययोश्च विशेषाभावान्मुक्तिविधायके 'भूतेषु देवा विलीयन्ते' इति वाक्ये एकस्मिन्नेव भूते सर्वेषां लय इत्येषोऽर्थोऽर्थात् क्लृप्त इति न भूतप्रातिपदिकविरोधः । नापि प्रत्ययविरोधः। यतोऽर्थाद् बहुत्वरूपोऽर्थ उक्तरीत्या क्लृप्तो निश्चित इति विवरणार्थो द्रष्टव्यः।

टीकायां सिद्धान्तीयसमानलोपन्यायव्याख्यानम्

समानलोपस्थाने लोपः समानलोप इति शाकपार्थिवादिवत् समासः, लोपशब्दश्चाभावे निष्पन्न इत्यभिप्रेत्य समानलोपन्यायं 'विशेषसाम्यश्रुतिराढ्यता च' इत्यतो न्यायमालातोऽनुवृत्तचशब्दसूचितविशेषश्रुतिन्यायं च विवृण्वत्

'तत्तद्भूतोद्भवत्वात् तत्तद्देवानां तत्समानानां च विशेषवचनाभावे स्वसमानलयस्थान एव लयोपपत्तेः । विशेषश्रुतेश्च'

इति वाक्यमाकाङ्क्षाक्रमेण सूत्रभाष्ययोजनाप्रदर्शनव्याजेन व्याचष्टे- **पृथिव्यां ऋभव इत्यादिश्रुतिभ्यामिति** ॥ पृथिव्यां ऋभूणाम्। भूताभिमानिनि वरुणेऽश्विनोः। न च 'वरुण आपः' (ब्र.सू.भा.उ.महोपनिषत् ४.२.६) इति श्रुतिविरोधः। तत्रापुच्छब्देन वरुणान्निकृष्टानामश्विभ्यां समानानां शतस्थदेवानामभूताभिमानित्वेन तेषामेव ग्रहणात् । अग्नावग्निपुत्राणाम्। वायाविन्द्रसोमादित्यबृहस्पतीनाम्।

आकाशे साध्यानामित्येवं पञ्चस्वपि भूतेषु तत्र तत्र विलीयमानदेवताविशेषाणां प्रातिस्विकविशेषेण कीर्तितत्वाच्च देवतामात्रस्य नैकस्मिन्नेव भूतेऽग्नौ लयो युक्त इति भावः। अनेन विशेषश्रुतेश्चेत्यन्तिमं विवृतम्।

ननु यस्मिन् भूते यद्देवस्य लय उच्यते स तस्मादुत्पन्न इति नियमस्तावत् साधितः। न चासावत्र युज्यते। ऋभ्वादीनां पृथिव्यादिजातत्वे प्रमाणाभावात्। न च युक्तिविरुद्धेऽर्थे श्रुतेः प्रामाण्यं सम्भवति। यथोक्तम्- 'युक्तोऽयुक्तश्च यत्रार्थ आगमस्य प्रतीयते। स्यात्तत्र युक्त एवार्थः' इत्यादिशङ्कापरिहाराय प्राप्तं 'तत्तद्भूतोद्भवत्वात् तत्तद्देवानाम्' इत्यंशं सङ्गमयति- **येषां देवानामिति**॥ अत्र विशिष्य तत्तद्देवानां तत्तद्भूतेषु लयोक्त्यैव तत्तद्भूतोद्भवत्वं निश्चीयत इति न तत्र प्रमाणान्तरं गवेषणीयमिति भावः। 'तत्समानानां च' इत्यादिमध्यमं वाक्यमवशिष्टमवतारयति- **न चेति**॥ 'वायौ इन्द्रः' (ब्र.सू.भा.उ.महोपनिषत् ४.२.६), 'मरुतः मारुते' (ब्र.सू.भा.उ.महोपनिषत् ४.२.६) इति श्रुतिद्वयेऽपि वायुमारुतपदाभ्यां हिरण्यगर्भ एव विवक्षित इति हिरण्यगर्भादिन्द्रसोमादित्यबृहस्पतीनां उत्पत्तिर्नास्ति। एवमाकाशाभिमानिविनायकात् साध्यानामपि नोत्पत्तिः। तथा च कथमश्वीन्द्रसोमादीनां वरुणहिरण्यगर्भविनायकेषु लय इत्यर्थः। एवमवतारितं वाक्यं व्याख्याति- **तेषां चेति**॥ यो यस्मादुत्पन्नः स तस्मिन् लीयत इति प्रतिबन्धवद्यो यत्समानदेवतालयस्थानम् स तल्लयस्थानमित्यप्यस्ति प्रतिबन्धः। न चेन्द्रसमानकामदेवलयस्थानमपि शेषो नेन्द्रलयस्थानं तस्य गरुड एव लयाङ्गीकारात्। एवं सौपर्ण्याः लयस्थानमपि गरुडो न वारुण्या लयस्थानम्। अतो नैव प्रतिबन्धोऽस्तीति वाच्यम्। विशेषवचनाभावे सतीति विशेषणात्। 'इन्द्र उमायाम्' (ब्र.सू.भा.उ.गौपवनश्रुतिः ४.२.२) इत्यादिविशेषवचनात्तत्र तथात्वेऽपि प्रतिबन्धहान्यभावात्। अन्यथा बाधकाभावे सतीति विशेषणं क्वापि न स्यात्। तथा चाश्व्यादेर्वरुणाद्युत्पन्नत्वाभावेऽप्यश्विसम-

शतस्थदेवतालयस्थानं वरुणः। 'वरुण आपः' (ब्र.सू.भा.उ. महोपनिषत् ४.२.६) इति श्रुतौ अप्शब्दः शतस्थपर इत्युक्तत्वात् तत्राश्विलयाङ्गीकारोपपत्तिरिति भावः। अत्र प्रथमेनाऽदिशब्देनाऽकाशो द्वितीयेन विनायको गृह्यत इति द्रष्टव्यम्। नन्वेकस्मिन्नेव भूते सर्वेषां भूतानां लयोऽर्थतः क्लृप्त इति विवरणोक्तपूर्वपक्षयुक्तेः कः परिहार इत्यतो भावमाह- **अतो यदन्यथेति**॥ यत एवं नियमद्वयाङ्गीकारेण विशेषवचनेन च साक्षादेव प्रातिस्विकं भूतेषु लयोपपत्तिः, ततः परम्पराश्रयणेन व्याख्यानमयुक्तमित्यर्थः। **हिरण्यगर्भ उच्यत इति**॥ अत्र यद्यपि

'प्रधानवायुस्त्विह वायुनामा भूतेष्विति प्रोक्तगतोऽपि युक्त्या।
यस्माच्छ्रुतौ पवते चेति भूरि प्रोक्तो यतो भूतमानी च सोऽपि।
महामानी त्वल्पमानी च यस्मात्तच्छब्देनाप्युच्यते तेन सोऽपि॥'

इत्यनुव्याख्याने 'वायाविन्द्रः सोम आदित्यो बृहस्पतिः' (ब्र.सू.भा.उ. महोपनिषत् ४.२.६) इति श्रुतिगतवायुशब्दः सयुक्तिकं प्रधानपरो व्याख्यातः। तथाऽप्यनुव्याख्यानगतप्रधानवायुशब्दोऽपि हिरण्यगर्भपर एव। मुक्तौ वायोरेवाभावादिति युक्त्यैवेति भावः।

नन्वत्र मनुष्योत्तमानां निर्ऋतेश्च यमे लयः। यमस्य पितॄणां वैवस्वतादिमनूनां प्रियव्रतादिचक्रवर्तिनां च स्वायम्भुवे मनौ लयः। ऋभूणां पृथिव्यां लयः। साध्यानामाकाशे लयः। अग्निपुत्राणामग्नौ लयः। अग्नेः सूर्ये लयः। सूर्यस्याऽकाशस्य पृथिव्याश्च गुरौ लयः। भृग्वादीनां दक्षे लयः। मनुगुरुदक्षशचीनां मरुद्गणानां चेन्द्रे लयः। गन्धर्वाणां कुबेरे लयः। शतस्थानामश्विनोश्च अबभिमानिनि वरुणे लयः। सोमस्य विष्वक्सेनादिपार्षदानां चानिरुद्धे लयः। अनिरुद्धस्य सनकादियतीनां रत्याश्च कामदेवे लयः। कामदेवस्य वारुण्यां, वारुण्याः शेषे, शेषस्य सरस्वत्याम्। एवमिन्द्रस्य सौपर्ण्यां लयः। सौपर्ण्याः गरुडे, गरुडस्य

सरस्वत्याम्। एवं शेषगरुडभेदेन स्वोदरप्रविष्टाखिलप्रपञ्चायाः सरस्वत्या विरिञ्चे लयः। विरिञ्चस्तु लक्ष्मीं प्रविश्य नारायणे लीनो भवति इति हि लयक्रमः। तत्कथमिन्द्रस्य सोमस्याऽदित्यस्य बृहस्पतेश्च हिरण्यगर्भ एव लय उच्यत इत्यत आह- **तत्र इन्द्रस्येत्यादिना**॥ नात्र साक्षाल्लयोक्तिः। किन्तु यथायोगं परम्परयेति भावः। अनेन विवरणोक्तपूर्वपक्षे बाधकान्तरमाकूतमित्याह- **भूताभिमानिनां चेति**॥ स्यादेवं पृथिव्या अप्सु, अपामग्नौ, अग्नेश्च वायावित्यादीनां भूताभिमानिनां लयः प्रामाणिकः स्यात्। न चैवं आकाशपृथिव्योर्गुरौ अपां सोमे, तेजसः सूर्ये, वायोर्नारायणे च लयाङ्गीकारात्। न हि गुरुसोमसूर्यनारायणाः पृथिव्यादि-भूताभिमानिन इति भावः।

ननु यदुक्तं 'पृथिव्यामृभवः' (ब्र.सू.भा.उ.महोपनिषत् ४.२.६) इत्यादि-श्रुतिभ्यां प्रत्येकं भूतेषु देवतालयस्य श्रुतत्वात् तद्बलादेव ऋभ्वादीनां पृथिव्यादिभ्य उत्पत्तिरङ्गीक्रियत इति तदयुक्तम्। वायुभूताभिमानिनो हिरण्यगर्भस्य नारायणादुत्पन्नत्वे 'आकाशाद् वायुः' (तै.उ. २.१) इत्याद्युत्पत्तिक्रमविधायक-श्रुतिविरोधः- इत्याशङ्कां प्रतिक्षिपति- **न चेति**॥ नाऽकाशाद्वायुरित्यत्र भूताभिमानिदेवतानामुत्पत्तिरुच्यते। किन्तु जडानामेव। कुत एतत्? उत्पत्तेः मुख्यार्थस्य लाभादिति भावः। ननु देवतानामप्याकाशादि-शब्दवाच्यता मुख्या देहयोगोऽपि मुख्य उत्पत्तिशब्दार्थः, इति च प्रथमे प्रतिपादितम्। तत् कथं जडपक्षे मुख्यार्थलाभ इतीत्यत आह - **देवतानां त्विति**॥ तारतम्यवैपरीत्येनापि ब्रह्माण्डान्तःसृष्टिरङ्गीक्रियते। तत्परमेतत् 'आकाशाद्वायुः' (तै.उ. २.१) इत्यादिवचनम्। अयं तूत्पत्तिक्रमो लये नापेक्षितः। किन्त्वाद्य एवेति भावः।

॥ इत्यनेकलयाधिकरणम् (नैकस्मिन्नधिकरणम्) ॥ ५ ॥

॥ अथ समनाधिकरणम् ॥ ६ ॥

सूत्रभाष्यम्

ॐ समना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॐ ॥ ४.२.७ ॥

देशतः कालतश्च व्याप्त्या समो ना परमपुरुषो यस्याः सा समना। संसारानुपक्रमात् स्वत एवामृतत्वं तस्याः। बृहच्छ्रुतिश्च- 'द्वौ वाव सृत्यनुपक्रमौ प्रकृतिश्च परमश्च द्वावेतौ नित्यमुक्तौ नित्यौ च सर्वगतौ चैतौ ज्ञात्वा विमुच्यते' इति। नैतावता साम्यम् ॥ ७ ॥

तत्त्वप्रकाशिका

सङ्गतिः

अत्र प्रकृतेर्विष्णौ लयाभावसमर्थनादस्ति शास्त्रादिसङ्गतिः। प्रकृतेर्भगवति लयेऽधिकारित्वप्रसङ्गादुक्तबाध इत्युपपादनीयमेतत्। प्राणादुत्तमा प्रकृतिर्विषयः। परमात्मनि लीयते न वेति सन्देहः। भगवदधीनत्वं नित्यमुक्तत्वं च सन्देहबीजम्।

पूर्वपक्षः

लीयत इति पूर्वः पक्षः। भगवदधीनत्वात्। न च तदनिर्णायकम्। 'तेजः परस्यां देवतायाम्' इति विशेषश्रुतेश्च। अन्यथा वागादीनां मनःप्रभृतिषूक्त-लयोऽपि न स्यात्। न च प्रकृतेरसंसारित्वस्योक्तत्वाल्लयाभावः। असंसारित्व-स्यैवानुपपत्तेः। तथात्वे भगवता सर्वसाम्यापातात्। न च गुणान्तरवैषम्यम्। नित्यसंसारराहित्ये सर्वगुणोपपत्तेः। न च सर्वसाम्यमङ्गीकर्तुं शक्यम्। सिद्धान्तविरोधात्। अतस्तस्याः संसारित्वाद् भगवति लयसद्भावादधि-कारित्वेनाधिकारिणां प्राणावसानत्वोक्तिरयुक्तेति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **समनेति ॥** अत्राऽप्यश्चशब्दः पूर्व-सूत्रान्नञोऽनुकर्षार्थः। न प्रकृतिर्लीयते। यतस्तस्या अनुपोष्यानुपास्य स्वत एवामृतत्वम्। न हि नित्यमुक्ताया लक्ष्म्या लयः सम्भवति। नित्यमुक्तत्वमेव तस्याः कुतः । कदाऽपि संसारोपक्रमणाभावात् । तदपि कुतः ? परम-पुरुषवन्नित्यत्वात् सर्वगतत्वाच्च । न हि संसारित्वे तदुपपत्तिरिति भावः। एतेन 'तदधीनत्वात्' इति प्रत्युक्तम् । न च श्रुतिविरोधः । अति-सामीप्यार्थतयोपपत्तेः। 'हरेरत्यन्तसामीप्यं लयो लक्ष्म्याः प्रकीर्तितः' इति वचनात् । यदुक्तं प्रकृतेरीश्वरवन्नित्यसर्वगतत्वेनानुपक्रान्तसंसारित्वा-न्नित्यमुक्तत्वं तत्कुत इत्यत आह- बृहदिति। नन्वेवं प्रकृतेरपि नित्यमुक्त-त्वाङ्गीकारे भगवता सर्वसाम्यमापतितमित्यत आह- नेति॥ ७॥

सूत्रभाष्यम्

ॐ तदपीतेः संसारव्यपदेशात् ॐ ॥ ४.२.८ ॥

'समावेतौ प्रकृतिश्च परमश्च नित्यौ सर्वगतौ नित्यमुक्तावसमावेतौ प्रकृतिश्च परमश्च विलीनो हि प्रकृतौ संसारमेति विलीनः परमे ह्यमृतत्वमेति' इति सौपर्णश्रुतेः॥ ८॥

तत्त्वप्रकाशिका

नित्यमुक्तत्वाद्यस्तीत्येतावता न प्रकृतिपुरुषयोः सर्वसाम्यमित्येतत् कुत इति । तत्र हेतुतया सूत्रं पठित्वा तदुपात्तश्रुतिमेवोदाहरति- **तदिति ॥** प्रकृतिपुरुषयोर्नित्यत्वादिना साम्यमेव न तु सर्वसाम्यम्। प्रकृतौ विलयस्य संसारहेतुत्वेनेश्वरे लयस्य मुक्तिहेतुत्वेन श्रुतिसिद्धत्वात् । मोचकत्वा-मोचकत्ववतोः सर्वसाम्यायोगादिति भावः॥ ८॥

सूत्रभाष्यम्

ॐ सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॐ ॥ ४.२.९ ॥

सूक्ष्मत्वं चाधिकं ब्रह्मणः प्रकृतेः। ज्ञानानन्दैश्वर्यादिप्रमाणाधिक्यं च।

'सर्वतः प्रकृतिः सूक्ष्मा प्रकृतेः परमेश्वरः।
ज्ञानानन्दौ तथैश्वर्यं गुणाश्चान्येऽधिकाः प्रभोः॥'
इति च तुरश्रुतिः॥ ९॥

तत्त्वप्रकाशिका

हेत्वन्तरेण प्रकृतिपुरुषयोः सर्वसाम्यं प्रतिषेधयत् सूत्रं पठित्वा व्याचष्टे- सूक्ष्ममिति। 'प्रकृतेरपि ब्रह्म सूक्ष्मं ज्ञानानन्दादिगुणपरिमाणेन चाधिकं सर्वतः' इति श्रुतेः। ततोऽपि न सर्वसाम्यमिति भावः॥ ९॥

सूत्रभाष्यम्

ॐ नोपमर्दनातः ॐ ॥ ४.२.१० ॥

अतस्तस्य ये विशेषगुणास्तेषामनुपमर्देनैव साम्यम्।

'देशतः कालतश्चैव समा प्रकृतिरीश्वरे।
उभयोरप्यबद्धत्वं तदबन्धः परात्मनः।
स्वत एव परेशस्य सा चोपास्ते सदा हरिम्॥
प्रकृतेः प्राकृतस्यापि ये गुणास्ते तु विष्णुना।
नियता नैव केनापि नियता हि हरेर्गुणाः॥' इति भविष्यत्पर्वणि॥१०॥

तत्त्वप्रकाशिका

यदि प्रकृतेर्न पुरुषेण सर्वसाम्यं तर्हि नित्यमुक्तत्वादिसाम्यमपि न स्यात्

ब्रह्मादिवत्। तथा च लयसद्भाव इत्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे- **नेति ॥** अतः साम्यतदभावयोरेवं साधितत्वाद् ये परमेश्वरस्यासाधारणगुणाः स्वातन्त्र्यादयस्तेषामसाधारण्यमनुपमृद्यास्त्येव प्रकृतेः पुरुषेण नित्यमुक्तत्वादिसाम्यमिति भावः। यदि नित्यमुक्तत्वादिसाम्यं तर्ह्यस्त्येव विशेषगुणोपमर्दः। नित्यमुक्तत्वे प्रकृतेः स्वातन्त्र्यादेरप्यापातादित्यत आह- **देशत इति ॥** ईश्वरे ईश्वरेण। एवं नित्यमुक्तत्वादिसाम्येऽपि न स्वातन्त्र्यादि प्रकृतेरित्येतदुच्यते- **तदबन्ध इति**॥ १०॥

सूत्रभाष्यम्

ॐ अस्यैव चोपपत्तेरूष्मा ॐ ॥ ४.२.११ ॥

'द्विधा हीदमवदृश्यते ऊष्मावदनूष्मावच्च। तत्रोष्मावत् परं ब्रह्म यन्न जिघ्रन्ति न पश्यन्ति न शृण्वन्ति न विजानन्ति। अथानूष्मावत् प्रकृतिश्च प्राकृतं च यन्न जिघ्रन्ति जिघ्रन्ति च यन्न पश्यन्ति पश्यन्ति च यन्न शृण्वन्ति शृण्वन्ति च यन्न जानन्ति जानन्ति च' इति सौपर्णश्रुतेः किञ्चित्साम्योपपत्तेः ॥ ११ ॥

तत्त्वप्रकाशिका

युक्त्यन्तरेण किञ्चित्साम्यं समर्थयत् सूत्रं पठित्वा व्याचष्टे- अस्यैवेति॥ ईश्वरस्योष्मावत्त्वं प्रकृतेरूष्मावत्त्वमनूष्मवत्त्वं च वदन्ती श्रुतिरस्यैवार्थस्य किञ्चित्साम्यस्योपपत्तेरर्थे भवत्युपपादिका भवति। अतोऽप्यस्ति किञ्चित्साम्यमिति भावः॥ ११॥

सूत्रभाष्यम्

ॐ प्रतिषेधादिति चेन्न शारीरात् ॐ ॥ ४.२.१२ ॥

'असमो वा एष परो न हि कश्चिदेवं दृश्यते सर्वे ह्येतेऽणवो जायन्ते च म्रियन्ते च छिद्रा ह्येते भवन्ति। अथ परो न जायते न म्रियते पूर्णश्चैव(ष)भवति' इति चतुर्वेदशिखायां साम्यप्रतिषेधान्नेति चेन्न। शारीराद्धि साम्यं प्रतिषिध्यते ॥ १२ ॥

तत्त्वप्रकाशिका

किञ्चित्साम्यमाक्षिप्य समादधत् सूत्रमुपन्यस्याऽऽक्षेपांशं तावद् व्याचष्टे- प्रतिषेधादिति। न च प्रकृतिपुरुषयोर्देशकालव्याप्त्यादिनाऽपि साम्यम्। 'असमो वा एष परमः' इति श्रुतौ परमेश्वरस्यैव नित्यसर्वगतत्वादि। अन्येषां तदभावमुक्त्वा प्रतिषिद्धत्वात्। अतोऽस्ति प्रकृतेर्लय इति भावः। छिद्रा दोषिणः। पूर्णः सर्वगतः। चशब्दाददोषश्च। परिहारांशं व्याचष्टे- **नेति ॥** भवेदेतद्यद्येतस्यां श्रुतौ प्रकृतेर्भगवत्साम्यप्रतिषेधो भवेत्। नैतदस्ति किं तर्हि शारीरेणैव साम्यमीश्वरस्य प्रतिषिध्यते। तस्य शारीरत्वेन नित्यसर्वगतत्वायोगादिति भावः॥ १२॥

सूत्रभाष्यम्

कुतः?-

ॐ स्पष्टो ह्येकेषाम् ॐ ॥ ४.२.१३ ॥

'अथातः समाश्चासमाश्चाभिधीयन्ते समासमाश्चाथ समानि ब्रह्मणो रूपाणि यैरुत्पत्तिः स्थितिर्लयो नियतिरायतिश्चैकं ह्येवैतद्भवत्यथासमा ब्रह्मेन्द्रो रुद्रः प्रजापतिर्बृहस्पतिर्ये के च देवा गन्धर्वा मनुष्याः पितरोऽसुरा यत्किञ्चेदं चरमचरं चाथ समाऽसमा प्रकृतिर्वाव समाऽसमा सैषा हि नित्याऽजरा तद्वशा च' इति स्पष्टो हि माध्यन्दिनायनानां समादिवादः॥ १३॥

तत्त्वप्रकाशिका

नन्वस्याः श्रुतेः सामान्यरूपत्वादत्र शारीरेण साम्यं प्रतिषिध्यते परमात्मनो न प्रकृतेरिति कुत इत्याक्षिपति- **कुत इति** ।। तत्परिहाराय सूत्रं पठित्वा व्याचष्टे- स्पष्ट इति । सत्यमियं सामान्यश्रुतिरिति तथाप्युक्तं युज्यते । यतः स्पष्टश्रुतौ जीवानामेवासमत्वमुक्त्वा प्रकृतेः समासमत्वमुच्यते । विशेषश्रुत्या च सामान्यश्रुतेर्बाधोपपत्तेरिति भावः । आयतिः प्रवृत्तिः । प्रजापतिर्दक्षः ।।१३।।

सूत्रभाष्यम्

ॐ स्मर्यते च ॐ ।। ४.२.१४ ।।

'मत्स्यकूर्मवराहाद्याः समा विष्णोरभेदतः ।
ब्रह्माद्यास्त्वसमाः प्रोक्ता प्रकृतिश्च समासमा ।।' इति वाराहे ।। १४ ।।

।। इति समनाधिकरणम् ।। ६ ।।

तत्त्वप्रकाशिका

न केवलं सामान्यश्रुतेर्विशेषश्रुत्या बाधोऽपि तु विशेषस्मृत्या चेत्यर्थप्रतिपादकं सूत्रमुपन्यस्य तां स्मृतिमुदाहरति- **स्मर्यते चेति** ।। अतः प्रकृतेरीश्वरवन्नित्यमुक्तत्वादिना लयाभावाद्युक्तं प्राणावसानत्वमधिकारिणामिति सिद्धम् ।। १४ ।। अ.६ ।।

।। इति समनाधिकरणम् ।। ६ ।।

शेषतात्पर्यचन्द्रिका

।। 'ॐ समना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॐ' ।।४.२.७।।

सङ्गत्यादि

'वाङ् मनसि सम्पद्यते मनः प्राणे' (छा.उ. ६.८.६) इति छान्दोग्य-

वाक्यविचारमुपक्रम्य शाखान्तराधिकरणन्यायेन 'प्राणः परस्यां देवतायाम्' (ब्र.सू.भा.उ.श्रुतिः ४.२.४) इति शाखान्तरस्थवाक्योक्तलयं प्रकरणानुगुण्येन स्वदेहत्यागकालेऽप्यवश्यचिन्तनीयत्वेन च विचार्य तत्प्रसङ्गात् सर्वभूतेषु यथायोगं देवानां लयं च विचार्याऽथ प्रकृतछान्दोग्यवाक्यमनुसरन् 'प्राणस्तेजसि' (छा.उ. ६.८.६) इति वाक्यस्य 'प्राणस्य तेजसि लयो मार्गमात्रम्' इति वचनेन विवक्षितलयप्रतिपादकत्वात् तदुल्लङ्घ्य 'तेजः परस्यां देवतायाम्' (छा.उ. ६.८.६) इत्यनन्तरोक्तलयं व्यनक्तीति वाऽधमानामुत्तमेषु लय इत्युत्सृष्टस्यापवाद इहाऽरभ्यत इति वा सङ्गतिः । 'प्रकृतेर्विष्णौ लयाभावसमर्थनात्' इति 'प्राणादुत्तमा प्रकृतिर्विषयः' इति टीकायाः सङ्गतिद्वयमिदं सूचितम् । 'तेजः परस्यां देवतायाम्' (छा.उ. ६.८.६) इत्यत्रोक्ता प्रकृतिर्विषयः । परमात्मनि लीयते न वेति सन्देहः । सर्वस्य भगवदधीनत्वोक्तिः 'कामादितरत्र तत्र चाऽयतनादिभ्यः' (ब्र.सू. ३.३.४०) इत्यादौ नित्यमुक्तत्वोक्तिश्च सन्देहबीजम् ।

पूर्वपक्षः

तत्र,

'प्रकृतिर्लीयते विष्णौ परस्यामिति वाक्यतः ।
उत्तरादन्यथा नैव वागादीनां लयो भवेत् ।।'

'मनः प्राणे' इत्याद्युत्तरवाक्यान्मनआदीनां 'तन्मनः प्राण उत्तरात्' (ब्र.सू. ४.२.२.) इत्यादिना प्राणादौ लयो यथाऽङ्गीकृतः, एवं 'तेजः परस्यां देवतायाम्' (छा.उ. ६.८.६) इत्युत्तरादेव वाक्यात् तेजोऽभिधायाः प्रकृतेरपि विष्णौ लयोऽङ्गीकार्यः । 'कामादितरत्र' (ब्र.सू. ३.३.४०) इत्यादौ यद्यप्युक्तमसंसारित्वम् । तथाऽपि तदङ्गीकर्तुं न शक्यम् । तथा हि । प्रकृतेः भगवता सर्वसाम्यमङ्गीक्रियते चेत् सिद्धान्तविरोधः । 'न ते विष्णो' (ऋ.सं. ७.९९.२) इत्यादिश्रुतिविरोधः । ईश्वरस्य प्रकृतिं प्रत्यसामर्थ्यापातश्च ।

संसाराभावादिना ईशेनाप्यन्यथाकर्तुं अशक्यत्वेन प्रकृतेरपि प्रबलत्वात् । न चेत्सर्वसाम्यं तर्हि संसारित्वमापन्नम् । ततः पूर्वोक्तमप्यसंसारित्वं न युक्तमिति युक्त एव प्रकृतेर्लयः । अन्यथा तदधीनस्य तत्र लय इति नियमस्य 'तेजः परस्यां देवतायाम्' इति श्रुतेश्च विरोधः । 'द्वौ वाव सृत्यनुपक्रमौ प्रकृतिश्च परमश्च द्वावेतौ नित्यमुक्तौ नित्यौ च सर्वगतौ चैतौ ज्ञात्वा विमुच्यते ॥' इति बृहच्छ्रुतेः 'असमो वा एष परो न हि कश्चिदेवं दृश्यते सर्वे ह्येतेऽणवो जायन्ते च म्रियन्ते च छिद्रा ह्येते भवन्ति अथ परो न जायते न म्रियते पूर्णश्चैष भवति' (सू.भा. ४.२.१२) इति चतुर्वेदशिखायां साम्यप्रतिषेधेनोपचरितार्थत्वोपपत्तेरिति पूर्वःपक्षः ।

सिद्धान्तः

सिद्धान्तस्तु-

श्रुत्येकशरणानां नः साम्यवैषम्ययोरपि ।
यथाश्रुति व्यवस्था स्यान्निषेधस्त्वन्यगो भवेत् ॥

न हि पूर्वोदाहृतबृहच्छ्रुतेरवकाशान्तरमस्ति । न च प्रकृतेर्नित्यमुक्तत्वे सर्वसाम्यापत्त्या सृत्यनुपक्रमो गौणो व्याख्येय इति वाच्यम् । नित्यमुक्तत्वादि-साम्येऽपि संसारप्रापकलयस्थानत्वसूक्ष्मत्वादिना वैधर्म्यसम्भवेन सर्वसाम्या-पत्त्यभावात् । न हि केनचित्सदृशः सर्वेणापि धर्मेण सदृश इत्यस्ति नियमः । यावताऽत्यन्तसदृशयोः यमयोरपि किञ्चिद् वैलक्षण्यं दृश्यत एव ।

नन्वेतदयुक्तम् । धर्मान्तरेण सादृश्यस्येहानुपयोगेनाबद्धत्वादिनैव साम्यं वक्तव्यम् । तस्य चेह भगवद्गतस्वातन्त्र्याद्युपमर्दकत्वेनाङ्गीकर्तुमशक्यत्वादिति चेन्न ।

'उभयोरप्यबद्धत्वं तदबन्धः परात्मनः ।
स्वत एव परेशस्य सा चोपास्ते सदा हरिम् ॥

प्रकृतेः प्राकृतस्यापि ये गुणास्ते तु विष्णुना ।
नियता नैव केनापि नियता हि हरेर्गुणाः ॥'

इत्यागमेनैव स्वातन्त्र्याद्यनुपमर्देनैव प्रकृतेरप्यबद्धत्वश्रवणात् । न हि पराधीनमबद्धत्वमन्यत्राङ्गीक्रियमाणमीश्वरगतं स्वातन्त्र्यं निहन्यात् । नन्वबद्धत्वं नित्यासंसारित्वमेव । नत्वापेक्षिकं, तस्य सर्वसाधारण्येन लयाभावं प्रत्यप्रयोजकत्वात् । ततश्च नित्यमसंसारित्वं भगवदधीनत्वमिति च कथं न व्याहतम्? आकाशस्य जडत्वेन स्वतःप्रवृत्त्यशक्तत्वात् कथञ्चित्तदधीनत्वेऽपि रमायाश्चेतनत्वेन तद्गतस्यासंसारित्वस्य तदयोगात् । संसारित्वदशायामनभि-व्यक्तस्य धर्मविशेषस्य भगवदधीनत्वेऽपि कदाऽपि संसारासंस्पृशितया चेतनगतस्यापि धर्मविशेषस्य भगवदधीनत्वायोगादिति चेन्न ।

'सदाऽनित्यतयाऽनित्यं नित्यं नित्यात्मना यतः ।
नित्ययैव स्वशक्त्येशो नियामयति नित्यदा ॥'

इत्यागमेन नित्यत्वानित्यत्वादिधर्माणां चेतनाचेतनगतानां स्वाभाविकानामपि भगवदधीनत्वोक्तेः । 'असमो वा एष परमः' इत्यादिचतुर्वेदशिखावचनं तु जीवस्यैव भगवत्साम्यं निषेधति । न रमायाः । 'अथासमा ब्रह्मेन्द्रो रुद्रः प्रजापतिः' (ब्र.सू.भा.उ. माध्यन्दिनायनश्रुतिः ४.२.१३) इत्यादिना जीवानामेवा-साम्याभिधानात् 'प्रकृतिर्वाव समाऽसमैषा हि नित्याऽजरा तद्वशा च' (चतुर्वेदशिखाश्रुतिः,सू.भा. ४.२.१२) इति रमायाः साम्याभिधानाच्च । 'तेजः परस्यां देवतायाम्' (छा.उ. ६.८.६) इति वाक्यं तु 'हरेरत्यन्तसामीप्यं लयो लक्ष्म्याः प्रकीर्तितः' इत्यादिनाऽन्यत्रान्यथा व्याख्यातम् । तस्मादुक्तं युक्तमिति सिद्धम् ।

उकयोक्तसमनाधिकरणपरीक्षा

समाना चेतुभाभ्यामपपाठचेत्थं व्याख्यातम् । सेयमुत्क्रान्तिः किं विद्वदविदुषोः

समाना किं वा विशेषवतीति विशयानानां विशेषवतीति तावत् प्राप्तम्। भूतसूक्ष्म-प्राप्तिविशिष्टा ह्येषोत्क्रान्तिः। पुनर्भवाय च भूतान्याश्रीयन्ते। न च विदुषः पुनर्भवः सम्भवति। 'अमृतत्वमेति' इति श्रवणात्। तस्मादविदुष एवैषोत्क्रान्तिरिति प्राप्ते ब्रूमः। विद्वदविदुषोः समानैवोत्क्रान्तिरविशेषश्रवणात्। अविद्वान् देहबीजभूतानि भूतसूक्ष्माण्याश्रित्य कर्मप्रयुक्तो देहग्रहणमनुभवितुं संसरति। विद्वांस्तु ज्ञानप्रकाशितं मोक्षनाडीद्वारमाश्रयत इति।

तत्र। किमत्र विद्वदविद्वच्छब्दाभ्यां परविद्याभावाभाववन्तौ विवक्षितौ उतापरविद्याभावाभाववन्तौ। नाऽद्यः। उत्क्रान्तेर्देशविशेषप्राप्त्यर्थत्वेन परविद्यावतस्तदभावेनोत्क्रान्त्यभावस्य सिद्धान्तेऽप्युररीकर्तव्यत्वेन तत्साधनस्यायोगात्। उक्तं च त्वद्भाष्य एव 'अपरविद्यावतो ग्रहणमाशङ्कासमाधानाभ्याम्। अमृतत्वं हि विदुषा प्राप्तव्यम्। न च तद्देशान्तरायत्तम्। तत्र कुतो भूताश्रयत्वं सृत्युपक्रमो वा' इति। 'अपरविद्यासामर्थ्याद् आपेक्षिकममृतत्वं प्रेप्सते। सम्भवति च तत्र सृत्युपक्रमो भूताश्रयत्वं च' इति च। उक्तं च भामत्याम्- 'एतदुक्तं भवति। नेयं परा विद्या यतो नाडीद्वारमाश्रयते। अपि त्वपरविद्येयम्। न चास्यामात्यन्तिकः क्लेशप्रदाहो यतो न तत्रोत्क्रान्तिर्भवेत्। तस्मादपरविद्यासामर्थ्याद् आपेक्षिकमाभूतसम्प्लवस्थानममृतत्वम्' इत्यादि। न द्वितीयः। अपरविद्याविचारस्येहासङ्गतत्वात्। परविद्या हि स्वफलेन सहेह प्रक्रान्ता। अत्र यदुक्तं भामत्याम्। 'परविद्ययैवामृतत्वप्राप्त्यवस्थामाख्यातुं तत्सधर्माः सुषुप्त्याद्यवस्थाः तद्विधर्माश्च जाग्रदाद्या अप्यवस्थास्तदनुगणतयाऽऽख्यायन्ते। साधर्म्यवैधर्म्याभ्यां हि प्रतिपिपादयिषिते वस्तुनि स्फुटतरः प्रत्ययो भवति' इति। तद्युक्तम्। यत इदं 'सार्थादपि तस्करा बहवः' इत्याभाणकमनुसरतीत्युक्तम्। न चेह शास्त्रे क्वचिदपि परविद्ययाऽमृतत्वप्राप्त्यवस्थाऽऽख्यायते। नाप्येतन्मूलभूतश्रुतौ। दहरादिसगुणविद्याफलस्य ब्रह्मलोकप्राप्तितद्गतविशिष्ट-

भोगपर्यन्तत्वेन पूर्वदेशादुत्क्रमणरूपोत्क्रान्तिमन्तराऽयोगेनोत्क्रान्तेरावश्यकतया दहराद्यपरविद्यावतामुत्क्रान्तिर्नास्तीति पूर्वपक्षानुदयाच्च।

ननु नायमस्ति दोषः। ''अत्राधिकरणे विषयभूतदहरविद्यायाम् 'अमृतत्वमेति' (छां. ८.६.६) इत्यमृतत्वप्राप्तिश्रुतेः, अमृतत्वस्य च परविद्याफलत्वात् परविद्यावन्तं प्रत्येतदमृतत्वं, परविद्यायां चोत्क्रान्तिर्निषिध्यते'' इति यो मन्यते तस्य मतेनायं पूर्वपक्षः इति कल्पतरूक्तेरिति चेन्न। 'तयोर्ध्वमायन्' इत्युत्क्रान्तिमुपन्यस्याव्यवधानेनैव 'अमृतत्वमेति' इत्यमृतत्वस्य साधितत्वेनैवंविधभ्रान्तेरेवालीकत्वात्।

'वस्तुतस्तु नास्ति पूर्वपक्षः' इति कल्पतरुग्रन्थादधिकरणानारम्भप्रसङ्गाच्च। न च पूर्वपक्षहीनमधिकरणं भवति। उपदेशमात्रत्वापातात्। शास्त्रं चेदं मननरूपं कथं पूर्वपक्षं विनाऽपि प्रवर्तेत।

सगुणस्यापि ब्रह्मणो व्यापित्वात् तत्प्राप्तुमुत्क्रान्तिर्नापेक्षणीया। अन्यथाऽऽकाशादि प्राप्तुमपि तदपेक्षा स्यात्। तथा च दहरविद्यावतोऽपि सगुणप्राप्तिलक्षणामृतत्वफलायोत्क्रान्तिर्नापेक्षितेति पूर्वपक्षोऽत्र वास्तवः कल्पतरूक्तेर्भविष्यतीति चेन्न। देहबीजभूतभूतसूक्ष्मशरीरप्राप्त्यादिरूपोत्क्रमणस्य शरीरान्तरप्राप्त्यर्थत्वेन न च विदुषः पुनर्भवः सम्भवति' इत्यादिपूर्वपक्षभाष्येण विरोधात्। अयुक्तश्चायं पूर्वपक्षः दहरादिसगुणविद्यायाः प्रपञ्चनिवृत्त्यभावेन देशविशेषप्राप्तिरूपफलस्योत्क्रान्तिं विनाऽयोगादित्युक्तत्वात्।

एतेन 'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः। अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते' (कठ. २.६.१४) इति विदुषोऽत्रैवामृतत्ववचनादुत्क्रान्त्यभाव इति केषाञ्चित्पूर्वपक्षोऽपि न क्षोदक्षमः। अस्यां श्रुतावुत्क्रान्त्यभावस्यानुक्तेः। 'अथाकामयमानो योऽकामो निष्काम आप्तकाम

आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति' (बृ.उ. ६.४.१-२), तथा 'याज्ञवल्क्येति होवाच। यत्रायं पुरुषो म्रियते उदस्मात्प्राणाः क्रामन्ति आहो न' इति पृष्टे 'नेति होवाच याज्ञवल्क्योऽत्रैव समवलीयन्ते' (बृ.उ. ५.२.१०-११) इत्यादावुत्क्रान्त्यभावप्रतीतावुत्क्रान्तिप्रतिपादकबहुवचन-विरोधेन उत्क्रान्तिप्रयुक्तव्यथाद्यभावपरत्वोपपत्तेः।

एतेन ज्ञानिनामुत्क्रान्तिः समानेति सिद्धान्तोऽप्ययुक्तः। 'नैवैत उत्क्रामन्ति' इत्याद्युत्क्रमणनिषेधात्। न च परविद्यावत उत्क्रान्तिं प्रतिषेधति सा श्रुतिः, न त्वपरविद्यावत इति वाच्यम्। परापरविद्याविभागस्यैवासम्मतेः। ननु परापरब्रह्मविभागस्त्वन्मतेऽप्यस्ति। 'कार्यं बादरिरस्य गत्युपपत्तेः' (ब्र.सू. ४.३.६) इत्यादौ तथा व्यवहृतत्वात्। तथा च परब्रह्मविषयिणी परविद्या। अपरब्रह्मविषयिण्यपरविद्येति त्वयाऽप्यङ्गीकृतमेवेति चेन्न। तथाऽपि त्वन्मत इव परापरविद्ये नान्योन्यविपरीतफले। किन्तु साक्षात् परम्परया चैकविधफलसाधने इत्यङ्गीकारात्। 'प्रतिषेधादिति चेन्न शारीरात्' (ब्र.सू. ४.२.६) इत्येतत्सूत्रार्थ-निराकरणप्रस्तावे उत्क्रान्तिप्रतिषेधश्रुतेर्गतिः कैश्चिदुक्ता निराकरिष्यते। सगुणस्यापि ब्रह्मणो व्याप्तित्वात् तत्प्राप्तुमुत्क्रान्तिर्नापेक्षणीयेति प्राप्त-पूर्वपक्षस्यानिरासाच्च।

भारतीतीर्थोक्ताधिकरणनिरासः

एतेन निर्गुणब्रह्मज्ञानिनस्तावदुत्क्रान्तिरेव नास्तीति वक्ष्यते। या तु सगुणब्रह्मज्ञानिन उत्क्रान्तिर्नासावज्ञान्युत्क्रान्त्या समाना ब्रह्मलोकप्राप्तिरूपस्य मोक्षस्य तद्विपरीतसंसाररूपस्य फलस्य च विषमत्वेन तत्प्राप्तिद्वारभूतोत्क्रान्ति-रूपसाधनवैषम्यस्य उचितत्वाद् इति प्राप्ते ब्रूमः। सगुणब्रह्मज्ञानिनो मूर्धन्यनाडीप्रवेशः, उत्तरमार्गोपक्रमः। ज्ञानरहितस्य तु नाड्यन्तरप्रवेशः मार्गान्तरोपक्रम इत्यादिफलवैषम्यं गत्युपक्रमानन्तरमेव। गत्युपक्रमपर्यन्तं चेदमेव

वर्तमानं जन्म सुखं दुःखं चेत्यादि यथा समं तथोत्क्रान्तिरपि समैव। उपक्रान्ते तु गमने त्वदुक्तफलभेदाद् वैषम्यमस्त्विति भारतीतीर्थोक्तमधिकरणशरीरं निरस्तम्। 'तयोर्ध्वमायन्नमृतत्वमेति' (कठ. २.६.१३) इत्युत्क्रान्तिमुपन्यस्या-मृतत्वस्य श्रुतत्वेन फलभेदस्य साधनान्तरवैषम्येणाप्युपपत्तेः। न हि फलवैषम्यं यावत्साधनवैषम्यमपेक्षते। यष्टॄणां फलवैषम्याभावापातात्।

'समाना चासृत्युपक्रमात्' इति सूत्रांशस्याद्वैतविशिष्टाद्वैतव्याख्याविमर्शः

एतेन 'वाङ्मनसि' इत्यादिनोक्तैषोत्क्रान्तिः विद्वदविदुषोरासृत्युपक्रमात् समाना भवितुमर्हति। सृतिः सरणम् ब्रह्मनाड्योद्गतिः तदुपक्रमपर्यन्तं ब्रह्मनाडीप्रकाशनात् प्राक् समानेति यावत्। अविशेषश्रवणादिति हेत्वध्या-हारः। यद्वा, आसृत्युपक्रमादित्येव हेतुः न प्रतिज्ञान्तर्गतम्। तथा चाऽसृति-श्चासावुपक्रमश्च तस्मादुपक्रमशब्दितस्य ब्रह्मविद्यानुष्ठानप्रारम्भाख्यप्रयत्नस्या-सृतिशब्दोक्तब्रह्मलोकप्राप्तितद्गतविशिष्टभोगफलपर्यन्तत्वादिति यावत्- इति सूत्रांशव्याख्यानं निरस्तम्। आद्ये मतेऽध्याहारस्यैव दोषत्वात्। अविशेषश्रवणं चासिद्धम्। 'न तस्य प्राणा उत्क्रामन्ति' (बृ.उ. ४.४.६) इत्यादिश्रवणात्। द्वितीये मतेऽप्यसङ्गतिरेव। ब्रह्मविद्यानुष्ठानप्रयत्नस्य ब्रह्मलोकप्राप्त्यादिपर्यन्तत्वेऽपि ततः प्रागुत्क्रान्तेरसाधकत्वात्। ब्रह्मलोकस्य च 'न तस्य प्राणा उत्क्रामन्ति। ब्रह्मैव सन् ब्रह्माप्येति' (बृ.उ. ४.४.६) इत्यादिश्रुतिबलाद् अनुत्क्रम्यैव प्राप्त्युपपत्तेः।

'अमृतत्वं चानुपोष्य' इति सूत्रांशव्याख्याविमर्शः

एतेन 'तयोर्ध्वमायन्नमृतत्वमेति' (कठ. २.६.१३) इत्यत्र श्रुतमिदममृतत्वं च न मुख्यम्। किन्त्वनुपोष्य। उपपूर्वादुष दाह इत्यतः क्त्वाप्रत्ययः। नसमासः। अत्यन्तमविद्यादीन् क्लेशान् अदग्ध्वैवाऽपेक्षिकमाभूतसम्प्लवस्थानममृतत्वमुत्तर-पूर्वाघयोरश्लेषविनाशरूपं चेत्यमृतत्वं चानुपोष्येति सूत्रांशव्याख्यानं निरस्तम्।

मुख्यामृतत्वविवक्षायां बाधकाभावात्। ब्रह्मस्वरूपापत्तिरूपमोक्षस्वरूपस्यैव बहुशो निरस्तत्वेन मुख्यमोक्षस्य देशविशेषप्राप्तिसाध्यत्वात्। 'अत्र ब्रह्म समश्नुते' (कठ. २.६.१४) इत्यत्रैवामृतत्ववचनं चैकगुणोपासकविवक्षया मुख्यामृतत्वेऽप्युपपन्नं चेति दिक्।

तदपीतेरित्यादिसूत्रचतुष्टयस्य परकीयं व्याख्यानम्

यच्चान्यैरिदमुच्यते- 'तदाऽपीतेः' इत्यादिसूत्रचतुष्टयमेकमधिकरणम्। तथा हि 'तेजः परस्यां देवतायाम्' (छा.उ. ६.८.६) इत्यत्र प्रकरणसामर्थ्याद् तद्यथाप्रकृतं साध्यक्षं सप्राणं सकरणग्रामं भूतान्तरसहितं तेजः प्रयतः पुंसः परस्यां देवतायां सम्पद्यत इत्येतदुक्तं भवति। कीदृशी पुनरियं सम्पत्तिः स्यादिति चिन्त्यते। तत्राऽत्यन्तिक एव तावत् स्वरूपप्रविलय इति प्राप्तम्, तत्प्रकृतित्वोपपत्तेः। सर्वस्य हि जनिमतो वस्तुजातस्य प्रकृतिः परा देवतेति प्रतिष्ठापितम्। प्रकृतौ च विकारस्य लय इत्यात्यन्तिकीयमविभागापत्तिरिति प्राप्ते ब्रूमः। श्रोत्रादिकरणाश्रयभूतं तत्तेजआदि भूतसूक्ष्मं मोक्षपर्यन्तमनुवर्तते। अन्यथा सर्वेषां प्रायणसमय एवोपाधिप्रत्यस्तमयादत्यन्तं ब्रह्मसम्पत्तिः स्यादेवेति विधिशास्त्रमनर्थकं स्यात्। मिथ्याज्ञाननिमित्तकबन्धस्य सम्यग्ज्ञानैकनिवर्त्यत्वनियमश्च न स्यात्। तस्मात् प्रकृतित्वेऽपि सुषुप्तिप्रलयवद् बीजभावावशेषैवैषा सत्सम्पत्तिरिति।

तन्निरासः

तन्न। 'वाङ् मनसि सम्पद्यते' (छा.उ. ६.८.६) इत्यादौ वागादिवृत्तेरेव मनआदौ लयः, न वागादेः स्वरूपस्येति तेजःपर्यन्तं पूर्वेष्वधिकरणेषु निर्णीतम्। तत्प्रायपाठात् 'तेजः परस्यां देवतायाम्' (छा.उ. ६.८.६) इत्यत्रापि न स्वरूपेण लय इति सिद्धे पुनरधिकरणारम्भायोगात्। प्रकृतिविकृतिभावेन पुनरारम्भ इति चेन्न। साक्षात् प्रकृतिविकारभावस्यैव 'तन्मनः प्राण उत्तरात्'

(ब्र.सू. ४.२.२) इत्यधिकरणे स्वरूपलयप्रयोजकत्वस्योक्तत्वेन परदेवताशब्दितब्रह्मतेजसोस्तदभावात्। न हि ब्रह्म तेजसः साक्षात्प्रकृतिः। किन्त्वाकाशादिद्वारैव। अन्यथा तेजआदेः स्वोपादाने वाय्वादौ स्वरूपतो लयो न स्यात्।

किञ्च तेजश्शब्दोपलक्षितभूतसूक्ष्मशरीरेऽवस्थानलक्षणं ह्युत्क्रान्तिः पूर्वत्र वर्णिता। सा च तेजआदेः सावशेषलयेऽङ्गीकृत एव सम्भवति। नान्यथा। देशविशेषप्राप्त्यादेः प्राप्तृप्राप्यादिसापेक्षत्वात्। निरवशेषे च लये तदयोगात्। तथा च वर्णितोत्क्रान्तिस्वरूपपर्यालोचनयैव 'अञ्जलिना जुहोति' इत्यादाविव सामर्थ्यादिव सावशेषलयसिद्धेः व्यर्थ एवायमारम्भः।

अत्र 'सिद्धां कृत्वा बीजभावावशेषां परमात्मसम्पत्तिं विद्वदविदुषोरुत्क्रान्तिः समर्थिता। सैव सम्प्रति चिन्त्यते। किमात्मनि तेजःप्रभृतीनां भूतसूक्ष्माणां तत्त्वप्रविलय एव सम्पत्तिः, आहोस्विद् बीजभावावशेषेति' इति भामत्युक्तं समाधानमयुक्तम्। 'स एव च कर्मानुस्मृतिशब्दविधिभ्यः' (ब्र.सू. ३.२.९) इत्यधिकरणे सुप्तस्य सत्सम्पत्तिः सावशेषेति विद्याकर्मविध्यन्यथानुपपत्त्या समर्थितमेव। तथा चेहाप्युत्क्रान्त्यन्यथानुपपत्त्या समानन्यायतया सावशेषलयसिद्धेः पुनरिह चिन्तनीयादर्शनात्। अत एव सावशेषलयफलकानां प्राचीनानामप्यधिकरणानां वैय्यर्थ्यमपि दुरुद्धरम्।

'सुप्त एव प्रबुध्यते' इत्यत्र कर्मानुस्मृतिशब्दा अनन्यथासिद्धा हेतवो बहवः। इह तु विधिमात्रम्। तदप्यन्यथासिद्धम्। कर्मविधीनामविद्वद्विषयत्वेन चारितार्थ्यात्। अर्चिरादिप्राप्यब्रह्मलोकप्राप्तिभोगादिफलकविद्याविधीनां निरवशेषलयविरोधित्वेऽपि तदन्यविद्याविधीनां तद्विरोधित्वाभावेन सावशेषलयप्रतिपादनसामर्थ्याभावात् तन्न्यायो न प्रवर्तते' इति नवीनोक्तं समाधान-

मयुक्तम्। 'विधिशास्त्रं ज्योतिष्टोमादिविषयमनर्थकम्। प्रायणमात्रादेवाऽत्यन्तिके प्रलये पुनर्भवाभावात्। मोक्षशास्त्रं चानर्थकम्। अप्रयत्नलभ्यात् प्रायणादेव जन्तुमात्रस्य मोक्षप्राप्तेः' इति भाष्यभामतीविरोधात्। अत एव 'न केवलं शास्त्रानर्थक्यम्। अयुक्तश्च प्रायणमात्रान्मोक्षः। मिथ्याज्ञाननिबन्धनस्य बन्धस्य तदनिवृत्तौ निवृत्त्ययोगात्। नासति निदानप्रशमे प्रशमस्तद्वतो युज्यत इति हि न्यायः' इति भाष्यभामत्योर्हेत्वन्तरमुक्तमिति चेन्न। न हि हेत्वन्तरोपन्यासायाधिकरणारम्भः क्वचिद् दृष्टः। शास्त्रापर्यवसानप्रसङ्गात्।

परेषां प्रतिषेधाधिकरणम्

यच्चेदमुच्यते 'प्रतिषेधादिति चेन्न' इत्यादित्रिसूत्रीमेकमधिकरणम्। 'अमृतत्वं चानुपोष्येत्यतो विशेषणादात्यन्तिकेऽमृतत्वे गत्युत्क्रान्त्योरभावोऽभ्युपगतः। तत्रापि केनचित्कारणेनोत्क्रान्तिमाशङ्क्यात्र प्रतिषिध्यते। तत्रोपरतवागादिवृत्तिप्राणोपलक्षितः तेजश्शब्दोपलक्षितसूक्ष्मशरीरवान् निर्गुणब्रह्मविद्वान् स्थूलशरीरादुत्क्रामति न वेति संशये, सोऽप्युत्क्रामति, इतरजनवदेव। अत एव मार्गश्रुतयः स्मृतयश्च मुमुक्षोः शुकस्य 'शुकः किल वैयासकिर्मुमुक्षुरादित्यमण्डलमभिप्रतस्थे। पित्रा चानुगम्याऽहूतो भो इति प्रतिशुश्राव' इत्यादिना मोक्षधर्मेष्वादित्यमण्डलप्रस्थानं दर्शयन्ति। तस्मादस्त्युत्क्रान्तिः परामपि देवतां विदुष इति प्राप्तेऽभिधीयते।

'यत्रायं पुरुषो म्रियते उदस्मात् प्राणाः क्रामन्ति आहो न' (बृ.उ. ५.२.११) इत्यार्तभागेन पृष्टे 'नेति होवाच याज्ञवल्क्यः। अत्रैव समवनीयन्ते स उच्छ्वयति आध्मायत्याध्मातो मृतः शेते' (बृ.उ. ५.२.११) इति बृहदारण्यके पञ्चमाध्याये स्पष्टं देहापादानकोत्क्रान्तिप्रतिषेधेन परविद्यावतः शरीरादुत्क्रान्तिर्नास्ति। 'स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति। तमुत्क्रामन्तं प्राणोऽनूत्क्रामति। अन्यन्नवतरं कल्याणतरं रूपं कुरुते। प्राप्यान्तं कर्मणस्तस्य

यत्किञ्चेह करोत्ययम्। तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मण इति नु कामयमानः' (बृ.उ. ६.४.६) इत्यविद्वद्विषये सप्रपञ्चमुत्क्रमणं संसारगमनं च दर्शयित्वोपसंहृत्य च 'अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो भवति। न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति' (बृ.उ. ६.४.६) इति शारीरब्राह्मणे पूर्वत्र विदुषः उत्क्रान्तिप्रतिषेधाच्च। अतो विद्वानिहैवामृतत्वं प्राप्नोतीति।

रामानुजमते प्रतिषेधाधिकरणम्

केचित्तु अयमेव पूर्वपक्षः, पूर्वपक्ष एव सिद्धान्त इत्याहुः।

उभयमतपरीक्षा

तत्र न तावद्विदुष उत्क्रान्तिरस्ति इत्ययं पक्षः सिद्धान्ततया परिगृहीतुं योग्यः। बृहदारण्यक एव षष्ठपञ्चमयोः शाखान्तरे च विदुषः स्पष्टमुत्क्रान्त्याद्यभावप्रतीतेः।

ननु 'न तस्य प्राणा उत्क्रामन्ति' (बृ.उ. ६.४.६) इत्यत्र तच्छब्देन 'अथाकामयमानः' (बृ.उ. ६.४.६) इति पूर्ववाक्यप्रकृतशारीर एव परामृश्यते। नाश्रुतं शरीरम्। न च तस्येति षष्ठ्या प्राणानां सम्बन्धित्वेन शारीरो निर्दिष्टः नतूत्क्रान्त्यपादानत्वेनेति वाच्यम्। अपादानापेक्षायां सम्बन्धितया श्रुतस्याऽत्मन एव सन्निहितत्वेनापादानतया ग्राह्यत्वात्। किञ्च प्राणानां जीवसम्बन्धितयैव प्रजातानां तत्सम्बन्धकथने प्रयोजनाभावात् सम्बन्धमात्रवाचिन्याः षष्ठ्या अपादानमेवार्थ इति निश्चीयते। यथा 'नटस्य शृणोति' इत्यत्र। न चात्र विवदितव्यं माध्यन्दिनानामयने 'योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति' (बृ.उ. ६.४.६) इति शारीरो जीव एव पञ्चमीनिर्देशादपादानमित्यवगतेः। न च शारीरात् प्राणानामुत्क्रान्ति-प्रसक्त्यभावात् प्रतिषेधो नोपपद्यत

इति वाच्यम्। देवयानेन पथा ब्रह्मप्राप्त्यनन्तरं विदुषो जीवात् प्राणानां विश्लेषस्तावत् सिद्धः । अन्यथा 'तस्य तावदेव चिरम्' (छा.उ. ६.१४.२) इति विदुषः शरीरवियोगकाले ब्रह्मसम्पत्तिवचनानुपपत्तेः । ततः प्रागपि जीवात् प्राणा न विश्लिष्यन्त इत्युक्तौ बाधकाभावात्। आर्तभागप्रश्नोऽपि यदा विद्वद्विषयस्तदाऽयमेव परिहारः । स त्वविद्वद्विषयः । तत्र प्रश्नप्रतिवचनयोः ब्रह्मविद्याप्रसङ्गादर्शनात् । तत्र हि ग्रहातिग्रहरूपेणेन्द्रियार्थयोः स्वभावः, अपामग्न्यन्नत्वं, म्रियमाणस्य जीवस्य प्राणपरित्यागः, मृतस्य नामशब्दविवक्षितकीर्त्यनुवृत्तिः, तस्य च पुण्यपापानुगुणगतिप्राप्तिरित्येतेऽर्थाः प्रश्नपूर्वकमभिहिताः । तत्र च 'अपपुनर्मृत्युं जयति' (बृ.उ. ५.२.१०) इत्यपामग्न्यन्नत्वज्ञानाद् अग्निजय एव मृत्युजय इत्युच्यते। अतो नात्र विदुषः प्रसङ्गः। अविदुषस्तु प्राणानुत्क्रान्तिवचनं स्थूलदेहवत् प्राणा न मुञ्चन्ति, अपि तु भूतसूक्ष्मवज्जीवं परिष्वज्य गच्छन्तीति प्रतिपादयतीति न किञ्चिदनुपपन्नमिति चेत्, मैवम्।

आर्तभागब्राह्मणे उत्क्रान्तप्राणस्योच्छ्वयनाध्मानादेः श्रवणात्, तस्य च शरीरधर्मत्वाच्छरीरापादानक एवोत्क्रान्तिनिषेधोऽवगम्यत इति तत्समाख्यानात् शारीरब्राह्मणेऽपि तस्यैवावगमात्। अत एव तदभिसम्पद्यत इति कर्मार्जितशरीरसम्बन्धप्रापके किञ्चिद्दूरस्थे वाक्ये प्रकृतस्य 'तद्यथाऽहिर्निर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेते' (बृ.उ. ६.४.७) इत्युत्तरवाक्ये वक्ष्यमाणस्य वा शरीरस्य परामर्शः । अत एव च षष्ठी पञ्चम्यर्थे व्याख्यायते ।

अस्तु वा तस्येतिशब्द आत्मपरामर्शकः । षष्ठी च यथाश्रुतैव। तथाऽपि शरीरादित्यध्याहारः कुतो निवार्यते । उत्क्रमणस्यापादानाकाङ्क्षित्वात् । न चाऽत्मकाम इति सन्निहितस्यैवापादानत्वेनान्वयः । 'इमौ स्निग्धावस्मिन् ग्रामे न विरोधः' इत्यत्र स्नेहधर्मितयाऽन्वितयोरेव विरोधप्रतिषेधाधिकरणत्वेन विरोधप्रतियोगित्वेन वाऽन्वयदर्शनादिति वाच्यम्। 'स यत्रायमात्मा बल्यं न्येत्य

सम्मोहमिव न्येत्यथैनमेते प्राणा अभिसमायन्ति स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति स यत्रैष चाक्षुषः पुरुषः पराक् पर्यावर्ततेऽथारूपज्ञो भवत्येकीभवति न पश्यतीत्याहुरेकीभवति न जिघ्रतीत्याहुः' (बृ.उ. ६.४.१) इत्यादिना तत्पूर्वप्रकृतस्य जीवात्मनः प्रबलत्वादिना बल्यनामकहरिप्राप्तिमुक्त्वा प्राप्यत्वेन प्रकृतहरिं प्रति जीवेन्द्रियाणां गमनम्, ततस्तेजोमात्रादिग्रहणेन हृदयान्ववक्रमणम्, ततः चक्षुरादिषु स्थितहरिरूपाणां रूपादिज्ञानदातृत्वाभावं, जीवस्य च रूपाद्यज्ञत्वं चोक्त्वा स यदि म्रियमाणो जीवः परिपूर्णसाधनो भुक्तप्रारब्धकर्मा चतुर्मुखलोकेऽवस्थितियोग्यः स्यात्, तच्छरीरान्तर्गतहृदयस्याग्रं हृदयनामकस्य हरेस्तेजसा प्रकाशते । तदाऽऽलोकेनोपकृतो हरिर्जीवस्य ब्रह्मनाड्या बहिर्निष्क्रामति। स यदि सूर्यादिलोकेष्ववस्थितियोग्यस्तदा चक्षुरादिद्वारान्तरेण, स यदि साधनसम्पूर्तिरहितस्तदा द्वारान्तरेण ततो जीवमादाय गच्छन्तं मुख्यप्राणोऽनुगच्छति तमनु सर्वेन्द्रियदेवा इति 'तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यः । तमुत्क्रामन्तं प्राणोऽनूत्क्रामति' (बृ.उ. ६.४.२) इत्यादिना ज्ञान्यज्ञानिसाधारण्येन शरीरदेशस्यैवोत्क्रान्त्यवधित्वोक्तेर्जीवावधिकोत्क्रमणस्याप्रसिद्धेः । तत्प्रतिषेधे अप्रसक्तप्रतिषेधतापाताच्च।

यदत्रोक्तम्- 'तस्य तावदेव चिरम्' (छा.उ. ६.१४.२) इति विदुषः शरीरवियोगकाल इत्यादि तन्न। नाडीविशेषेण शरीरान्निर्गमस्यैवोत्क्रान्तित्वेन शास्त्रे प्रसिद्धेः। वियोगमात्रस्य तत्वायोगात्। योगे वा तन्निषेधवैय्यर्थ्याच्च। यदि देवयानेन पथा ब्रह्मसम्पत्तिरिन्द्रियवियोगे नोपपद्यत इति तन्निषेधोऽवश्यं कर्तव्यः, तर्हि किं पितृयाणेन स्वर्गादिसम्पत्तिरिन्द्रियवियोगे युज्यत इति मन्यसे ? स तस्यापि तर्हि निषेद्धव्यः । 'अथाकामयमानः' (बृ.उ. ६.४.६) इत्यर्थान्तरारम्भविरोधाच्च। न हि प्राणवियोगाभावे ज्ञान्यज्ञानिनोस्तुल्येऽपि अथेत्यारभ्यमाण-

प्रकरणस्थस्य 'न तस्य प्राणा उत्क्रामन्ति' (बृ.उ. ६.४.६) इति वाक्यस्योपपत्तिः । न चायमिन्द्रियवियोगो ज्ञानिनो निषेद्धुं शक्यते। ''नाडीप्रवेशनात् प्रागेषोत्क्रान्तिर्विद्वदविदुषोः समानैव । 'शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका । तयोर्ध्वमायन्नमृतत्वमेति' (कठ. २.६.१६) इत्यादिना श्रुता चोत्क्रान्तिर्नाडीप्रवेशात् प्राग् विशेषाश्रवणात् समानैव। मूर्ध्नो निष्क्रमणं विद्वद्विषयम्। इतरदविद्वद्विषयम्'' इति 'समाना च' इति सूत्रे त्वयैव भाषितत्वेनेह पुनस्तन्निषेधे स्ववचनव्याघातात् । नाडीविशेषोत्क्रमणरूपोत्क्रान्त्यङ्गीकारेऽपीन्द्रियवियोगरूपोत्क्रान्तिर्निषिध्यत इति तु स्वगोष्ठीमात्रम्। 'मृतिकाले जहत्येनं प्राणा भूतानि पञ्च च' इति प्राणानां वियोगस्मरणाच्च । न चैतदविद्वद्विषयम्। नाडीप्रवेशात् प्राग् विशेषाश्रवणात् इति स्ववचनविरोधात्। कथं तर्हि विदुषो देवयानेन गमनमिति चेत्, अविदुषोऽपि पितृयाणेन कथम् ? 'भागतोऽनुव्रजन्ति तम्' इति चेत्, ज्ञानिनामपि कुतो नानुव्रजन्तीति समम्। अत एवाऽर्तभागप्रश्नो ब्रह्मविद्याप्रसङ्गादर्शनाद् अविद्वद्विषय इति निरस्तम्। 'अथ हैनं जारत्कारव आर्तभागः पप्रच्छ याज्ञवल्क्येति होवाच कति ग्रहाः कत्यतिग्रहा इत्यष्टौ ग्रहा अष्टावतिग्रहा इति ये तेऽष्टौ ग्रहा अष्टावतिग्रहाः कतमे त इति । प्राणो वै ग्रहः सोऽपानेनातिग्रहेण गृहीतोऽपानेन हि गन्धान् जिघ्रति' (बृ.उ. ५.२.१-२) इति, आर्तभागब्राह्मणं नैकविषयम्। तथा सति 'इत्यष्टौ ग्रहाः' इति सप्तमखण्डिकान्त उपसंहारः, 'याज्ञवल्क्येति होवाच यदिदं सर्वं मृत्योरन्नं कास्वित् सा देवता यस्या मृत्युरन्नमित्यग्निर्वै मृत्युः सोऽपामन्नमप पुनर्मृत्युं जयति' (बृ.उ. ५.२.१०) इत्यष्टमखण्डिकायाम्, 'याज्ञवल्क्येति होवाच । यत्रायं पुरुषो म्रियते उदस्मात् प्राणा क्रामन्त्याहो नेतिनेति होवाच याज्ञवल्क्यः अत्रैव समवनीयन्ते स उच्छ्वयत्याध्मायत्याध्मातो मृतः शेते' (बृ.उ. ५.२.११) इति नवमखण्डिकायाम्, 'याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियते किमेनं न जहातीति नामेत्यनन्तं वै नामानन्ता विश्वे देवा अनन्तमेव स

तेन लोकं जयति' (बृ.उ. ५.२.१२) इति दशमखण्डिकायाम्। 'याज्ञवल्क्येति होवाच यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति' (बृ.उ. ५.२.१३) इत्याद्यन्तिमखण्डिकायां च प्रश्नोपक्रमाश्च न स्युः। न ह्येकविषयायां विद्यायामन्तरा प्रश्नोपक्रमो दृश्यते। एकब्राह्मणत्वं तु प्रष्टैक्यादिनोपपद्यते। तथा चात्र यावत्प्रश्नोपक्रमस्तावति वाक्ये एको विषयः । तदनन्तरमाप्रश्नोपक्रममन्यो विषय इत्युत्सर्गः । यत्र तु एकविषयता बलवता प्रमाणेन गम्यते तत्र प्रश्नोपक्रम आदरार्थो व्याख्येयः। यत्र तु सा न गम्यते तत्र प्रश्नोपक्रमः वाक्यं भिनत्त्येव। तथा च ग्रहातिग्रहरूपेन्द्रियार्थयोः स्वभावकथनादिना सप्तमखण्डिकया ब्रह्मविद्याप्रसङ्गाभावेऽप्यार्तभागप्रश्नस्य विद्वदविद्वद्विषयत्वे बाधकाभावात्। 'अपपुनर्मृत्युं जयति' (बृ.उ. ५.२.१०) इति मुक्तलिङ्गश्रवणाच्च।

अपामग्न्यन्नत्वज्ञानाद् अग्निजय एव मृत्युजय इत्युपचर्यत इति चेन्न। 'यदिदं सर्वं मृत्योरन्नं कास्वित् सा देवता यस्या मृत्युरन्नम्' (बृ.उ. ५.२.१०) इति मृत्युमृत्योः परदेवतायाः पृष्टत्वात्। 'आप इत्यापः' इति श्रुत्या अप्शब्दस्य परदेवतायां प्रसिद्धेश्च भगवज्ज्ञानिन एवापमृत्युजयोक्तेः । अत एव नवमखण्डिकायां विदुष उत्क्रान्तिं निवारयन्त्येकवाक्यता प्रतिपाद्यते।

उच्छ्वयनाध्मानमृतीनामुक्तिः कथमिति चेन्न । ज्ञानिनो हि बहुविधाः देवमनुष्यादिभेदेन। मोक्षोऽपि चतुर्विधः- कर्मक्षयोत्क्रान्तिमार्गभोगभेदेन। तत्र द्वितीयतृतीयौ न देवानाम्। तदीयचरमशरीरस्य स्वोत्तमदेवतादेहे ग्रासरूपेण लयाङ्गीकारात् । मनुष्योत्तमा अपि द्विविधाः । एकगुणोपासकाः, अनेकगुणोपासकाश्चेति । तत्रान्त्यानां चरमशरीरस्य कर्मक्षये प्राप्ते ब्रह्मनाड्यादिनोत्सर्गः । तथा भूतसूक्ष्मेन्द्रियादिसहिताग्निर्ज्योतिरहःशुक्ल इत्यादिनोक्तदेवयानमार्गेण तत्तद्योग्यापुनरावृत्तिलोकं गत्वा तत्राऽब्रह्मप्रलयं स्थित्वा अग्न्यादिद्वारेण चतुर्मुखब्रह्मप्राप्यश्वेतद्वीपस्थभगवद्दर्शनानुज्ञानादिना स्वस्वयोग्यलोके

भोगप्राप्तिरिति चतुर्विधोऽपि मोक्षः। आद्यानां तु चरमदेहकर्मक्षये सजीवो देहस्तत्रैव पतति भूम्यादौ। तत उच्छ्वयनादिदेहधर्मांश्च सजीव एव प्राप्नोति। तत्स्थो जीवस्तु वागादीन्द्रियसूक्ष्मैः तद्देवैश्च भागतोऽनुगत उच्छ्वयनादिकृतक्लेशान् प्रारब्धकर्म-शेषनिबन्धनान् भुञ्जानो मृत इव शेते। ततोऽस्य प्राणा अत्रैव समवनीयन्ते। न त्वितरेषामिव ब्रह्मनाड्यादिना जीवेन सहैवोत्क्रामन्ति। ततोऽर्चिरादिना श्वेतद्वीपं गत्वा तदनुज्ञां प्राप्य यथायोग्यं भूम्यादावेव समवनीयन्त इत्यङ्गीकारात्। सर्वमेतन्नवमखण्डिकायामुच्यते। अन्यथोक्तरीत्या उच्छ्वयनादीनां शरीर-मात्रधर्माणां विशिष्यात्र कीर्तनं व्यर्थं स्यात्।

तस्माद् विदुष उत्क्रान्तिरस्तीत्ययं पक्षो न सिद्धान्तयितुमर्हः। एवं नेति पक्षोऽपि। नाडीविशेषोत्क्रमणस्य 'तयोर्ध्वमायन्नमृतत्वमेति' (कठ. २.६.१३) इत्यादौ स्फुटं श्रवणात्। 'न तस्य प्राणा उत्क्रामन्ति' (बृ.उ. ६.४.६) इत्युत्क्रमणनिषेधात्। 'तयोर्ध्वमायान्नमृतत्वमेति' (कठ. २.६.१३) इत्याद्युत्क्रमणश्रवणमपरविद्यावद्विषयमिति न वाच्यम्। परविद्यावद्विषयत्वे बाधकाभावात्।' न तस्य प्राणा उत्क्रामन्ति' (बृ.उ. ६.४.६)इत्यादेरपरविद्या-वद्विषयत्वोपपत्तेः। परविद्यावद्विषयत्वेऽपि तस्य सकाशात् प्राणा नोत्क्रामन्ति, तं न जहति, किन्तु तमनुसृत्यैव गच्छन्तीत्येवंपरत्वोपपत्तेः। न तर्ह्ययं मृतः, प्राणानामनुत्क्रान्तेरिति चेन्न। कर्मिण इव भागतस्त्यागोपपत्तेः। न च 'अत्रैव समवनीयन्ते' इति प्राणानां प्रविलयोक्तिविरोधः। भागतः प्रविलयसम्भवात्। न चात्र सङ्कोचे कारणाभावः। तप्ताश्मनि क्षिप्तजलवत् प्राणानां देह एव स्वरूपतः प्रविलयस्य सम्भवादेव। न हि प्राणशब्दितानामिन्द्रियाणां तदभिमानिनां वा स्वरूपतः प्रविलयोऽस्ति। सूक्ष्मजडस्य,चेतनस्य च नित्यत्वात्।

एतेन, प्राप्तिपूर्वः प्रतिषेधो भवति। अविदुषो देहादुत्क्रमणं दृष्टमिति विदुषोऽपि तत्सामान्याद् देहादुत्क्रमणे प्राप्ते 'न तस्य प्राणा उत्क्रामन्ति' (बृ.उ. ६.४.६) इति प्रतिषेध उपपद्यते। न तु प्राणानां जीवावधिकं कचिदुत्क्रमणं दृष्टम्। येन तन्निषिध्येत। 'न तस्य प्राणा उत्क्रामन्ति' (बृ.उ. ६.४.६) इत्येतत् तस्य सकाशादिति न व्याख्येयमिति निरस्तम्। 'अङ्गुल्यग्रे हस्तिशतं नास्ति' इत्यादाविव शब्दाभासादिना प्राप्तस्य निषेधोपपत्तेः। अज्ञानादेर्जीवावध्युत्क्रमणदर्शनेन प्राणानामपि तदनुमानाच्च। प्राणानां जीवावध्युत्क्रमणाभावे जीवस्य मोक्षाभाव-प्रसङ्ग इति तु विभीषिकामात्रम्। त्वन्मतेऽपरविद्यावतो मुख्यामृतत्वाभावाङ्गी-कारात् तद्विषयत्वोपपत्तेरित्युक्तत्वात्।

एतेनैवाद्वैतपरिभावनाभुवा प्रसङ्ख्यानेन निर्मृष्टनिखिलप्रपञ्चावभासस्य गन्तव्याभावादेव नास्ति गतिः, नापि वोत्क्रान्तिरिति बाधकादेव 'न तस्य प्राणा उत्क्रामन्ति' (बृ.उ. ६.४.६) इत्येतत् तस्य सकाशादिति न व्याख्येयमिति निरस्तम्। तत्त्वज्ञानेन प्रपञ्चप्रविलयस्यासिद्धेश्च। एकस्य मुक्तौ पुनः सृष्ट्यभावप्रसङ्गाच्च।

भारतीतीर्थाभिमततत्प्रतिषेधाधिकरणरचनानुवादनिरासौ

एतेन 'न तस्य प्राणा उत्क्रामन्ति' इति तत्त्वविदः प्राणानामुत्क्रान्तिर्निषि-ध्यते। तस्य निषेधस्यापादानं जीवो, न देहः। अन्यथा देहादनुत्क्रान्तौ मरणाभावः प्रसज्येतेति प्राप्ते, ब्रूमः। तप्ताश्मनि क्षिप्तं जलं यथाऽन्यत्र न गच्छति, नापि तत्र दृश्यते, किन्तु स्वरूपेण विलीयते तद्वत् तत्वविदः प्राणाः देहादनुत्क्रामन्तोऽपि न देहेऽवतिष्ठन्ते। किन्तु विलीयन्ते अतो जीवनासम्भवात् मृतो देह इति व्यवहार इति भारतीतीर्थोक्तमधिकरणशरीरं निरस्तम्। 'कत्येव देवा विधारयन्ते। कान्यस्मिन् जाग्रति' (बृ.उ. ५.२.१) इत्यादिना इन्द्रियदेवानामेव प्राणशब्द-वाच्यत्वावगमात्। तेषां च तप्ताश्मनि क्षिप्तजलवत् स्वरूपनाशायोगात् शरीरादुत्क्रान्तिः, जीवादनुत्क्रान्तिश्च श्रुतिद्वयेनोच्यत इत्युक्तौ बाधकाभावात्। देहादुत्क्रम्य जीवेन सहावस्थितेषु प्राणेषु देहान्तरग्रहणस्याऽवश्यकत्वात् मुक्तिरेव

न स्यादिति चेन्न। कामाभावादेव देहान्तरग्रहणाभावसिद्धेः। अन्यथाऽऽकाशादेः भूतपञ्चकस्य व्यापकजीवसम्बन्धानिवारणाद् देहान्तरग्रहणापत्तिः। तथा च 'सोऽश्नुते सर्वान् कामान् सह' (तै.उ. २.१) इति पूर्वोक्तप्राप्तिविवरणात्मके मन्त्रे सर्वभोगोक्तेः त्वदभिमतमोक्षस्यासिद्धिरेवेत्यवश्यं देशविशेषादिप्राप्त्यर्थं विदुषोऽप्युत्क्रान्तिर्गतिश्च सिद्ध्यति। तथा च 'बहुनाऽत्र किमुक्तेन यावच्छ्वेतं न गच्छति। योगी तावन्न मुक्तः स्यादेष शास्त्रस्य निर्णयः।' (ब्र.सू.भा.उ. आदित्यपुराणम्, १.३.२) इति देशविशेषप्राप्तिरूपादन्यस्य मोक्षत्वनिषेधात् त्वदीयो मोक्षो न क्वापि शास्त्रे प्रतिपाद्यत इति स्पष्टमपहसितमार्यैः पञ्चमाध्याय-प्रतिपाद्यैषा प्रक्रियेति।

टीकायां पूर्वपक्षीयसुदाढर्च्यन्यायव्याख्यानम्

टीकाक्षरार्थस्तु- सुदाढर्च्यन्यायं तद्धेतूक्तिपूर्वं तत्साध्यप्रदर्शनेन विवृण्वत्

'न च प्रकृतेः संसाराभावादिना ईशेनाप्यन्यथाकर्तुमशक्यत्वेन सुदृढत्वात् सर्वसाम्यमेवेश्वरेण, न चेत्संसारित्वमिति युक्तम्।'

इति वाक्यं कामाधिकरणेन गतार्थतापरिहारपरमित्यवतारयति- **न च प्रकृते-रिति॥** भावोक्त्या व्याचष्टे- **असंसारित्वस्यैवेत्यादिना॥** तेनात्रेश्वरेणेत्यतः परं ततोऽसंसारित्वानुपपत्तिरित्यध्याहार्यमिति सूचयति। तथा च प्रकृतेः संसाराभावदेशकालव्याप्त्यादिना कामाद्यधिकरणेऽङ्गीकृतेनाऽपतितेनेशेना-प्यन्यथाकर्तुमशक्यत्वेनाऽपतितात् सुदृढत्वाद् विशिष्टचेतनत्वादीश्वरेण सर्वसाम्यमेव प्राप्नोति। ततोऽसंसारित्वमेवानुपपन्नम्। अतः पूर्वोक्तोपमर्देन प्रवर्तनान्न गतार्थता। तथा च विष्णोरेव सर्वोत्तमत्वं वा त्याज्यम्। न चेत् प्रकृतेः संसारित्वं वाऽङ्गीकार्यम्। न चेदं शक्यं विष्णोरेव सर्वोत्तमत्वस्याप्यङ्गीकरणं प्रकृतेरसंसारित्वस्याप्यङ्गीकरणमिति प्रकृतेः संसारित्वस्याप्यङ्गीकरणमिति विवरणार्थो द्रष्टव्यः।

टीकायां सिद्धान्तीयमहिमान्यायव्याख्यानम्

'महिमा' इत्युक्तन्यायं तत्साध्यप्रदर्शनेन विवृण्वत्

'ईश्वरस्य महामहिमत्वात्। नित्यमसंसारित्वस्य नित्यतदनुग्रहेणैवोपपत्तेः।

''सदाऽनित्यतयाऽनित्यं नित्यं नित्यात्मना यतः।
नित्ययैव स्वशक्त्येशो नियामयति नित्यदा॥'',

''द्रव्यं कर्म च कालश्च स्वभावश्चेतना धृतिः।
प्रकृतिः पुरुषश्चैव न सन्ति यदुपेक्षया॥'' इत्यादिश्रुतेश्च।'

इति वाक्यं समग्राधिकरणतात्पर्याभिधानपरमित्यभिसन्धिः सूत्राक्षरार्थ-कथनव्याजेन भाष्येण सह तात्पर्यतो व्याचष्टे- **न प्रकृतिर्लीयत इत्यादिना॥** तेन पूर्वसूत्रानुकृष्टेन नञा प्रकृतिर्न लीयत इति प्रतिज्ञासिद्धौ हेतुत्रयमनेन सूत्रेणोच्यत इत्येव युक्तमिति सूचयति। नात्र हेतुत्रयं साक्षात् प्रतिज्ञातार्थसाधकम्। किन्तु पूर्वपूर्वसाधितोऽन्तिमो हेतुरेवेत्यभिप्रेत्याऽऽकाङ्क्षाक्रमेणान्तिमं हेतुं व्याचष्टे- **यतस्तस्या इति॥** अनुपोष्येत्यनूद्यानुपास्येति व्याख्यानम्। उपपूर्वात् वस निवास इत्यतः क्त्वाप्रत्यये सम्प्रसारणे चोपोष्येति रूपसम्भवात्। उप समीपे वासश्च परिचर्यादिरूपत्वाद् उपासनाशब्देनोच्यत इति भावः। लब्धार्थकथनेनान्वय-प्रदर्शनेन च हेतुस्वरूपं व्यनक्ति- **स्वत एवामृतत्वमिति॥** नित्यमुक्तत्वात् प्रकृतिर्न लीयत इति साक्षात् सम्बन्ध इति भावः।

एतेन 'तयोर्ध्वमायन्नमृतत्वमेति' (कठ. २.६.१३) इत्यत्र श्रुतमिदममृतत्वं च न मुख्यम्। किन्त्वनुपोष्योपपूर्वादुष दाह इत्यतः क्त्वाप्रत्ययः। नसमासः। अत्यन्तमविद्यादीन् क्लेशानदग्ध्वैवाऽपेक्षिकमिति व्याख्यानं निरस्तम्। अमृतत्वानुपोष्यपदयोः स्वयमेव मुख्यार्थत्वस्वीकारादिति सूचयति। विवक्षितहेतुसाध्ययोः व्याप्तिमुपपादयति- **न हीति॥** ननु प्रकृतेर्लयमङ्गीकुर्वाणो नित्यमुक्तत्वं नाभ्युपैति। तत्कथं हेतुसिद्धिरिति पृच्छति- **कुत इति॥**

तत्साधनायासृत्युपक्रमादित्यंशं व्याचष्टे- **कदाऽपीति** ॥ मुक्तव्यावृत्त्यर्थमाद्यं विशेषणम्। नन्विदमपि कथमङ्गीकुरुते। रुग्मिण्यादिरूपेण जननाङ्गीकारादिति पृच्छति- **तदपि कुत इति** ॥ तदुत्तरत्वेन समनेत्यंशं व्याचष्टे - **परमपुरुषवदिति** ॥ अनेन देशतः कालतश्च व्याप्त्या समो ना परमपुरुषो यस्याः सा समनेति भाष्यं विवृतं भवति।

'समना'शब्दव्युत्पत्तिः

ननु नायं पाठो युक्तः। 'नद्युतश्च' (पा.सू. ५.४.१५३) नद्युत्तरपदाद् ऋदन्तोत्तरपदाच्च बहुव्रीहेः कप्प्रत्ययो भवतीति कपो विधानात्। न च 'शेषाद्विभाषा' (पा.सू. ८.४.१५४) यस्मिन् बहुव्रीहौ समासान्तो न विहितः तस्मात् शेषाद्विभाषा कप्प्रत्ययो वा भवतीति कपो विकल्पितत्वात्, महायशस्कः महायशाः, बहुमालकः बहुमाल इत्यादाविवेहापि रूपद्वयमस्तीति वाच्यम्। 'नद्युतश्च' इति कपो विधानादविहितसमासान्तकत्वरूपशेषत्वाभावात्। कबभावे 'ऋन्नेभ्यो ङीप्' (पा.सू. ४.१.५) इति ङीपोऽवश्यम्भावाच्च। न चात्र तदन्तविधिप्रतिषेध आश्रयितुं शक्यते 'शूद्रा चामहत्पूर्वा जातिः' इति ज्ञापकात्। यदि ह्यत्र तदन्तविधिप्रतिषेधः तर्ह्यमहत्पूर्वेति नोच्येत। उच्यमाने च तस्मिन् महच्छब्दपूर्वाद् भवतीति ज्ञायते। अत एवातिधीवरी अतिपीवरी अतिमहती अतिभवतीत्यादौ ङीब् दृश्यते। किञ्च ऋन्नेभ्यो ङीबित्युत्सृष्टस्य ङीपो न द्युतश्चेति वैशेषिकशास्त्रादपवादेन प्राप्तस्य कपः 'न संज्ञायां' (पा.सू. ५.४.१५५) संज्ञायां विषये बहुव्रीहेः कप् प्रत्ययो न भवति विश्वे देवा यस्य स विश्वेदेव इति वा 'ऋतश्छन्दसि' (पा.सू. ४.४.१५८) ऋकारान्ताद्बहुव्रीहेः छन्दसि विषये कप्प्रत्ययो न भवति यथा हतमाता हतस्वसा हतपिता इति वा शास्त्रेण निषेधे अपवादस्यापवाद उत्सर्गस्य प्राप्तिरिति न्यायेन ङीबेव भवति। तस्मादयमपपाठ एवेति चेन्मैवम्।

'स्त्रियाम्' इत्यधिकृत्याऽम्नातस्य 'ऋन्नेभ्यो ङीप्' इत्यस्य स्त्रियां वर्तमानं यदृदन्तं नान्तं च प्रातिपदिकं तस्मात् ङीप् भवतीति व्याख्यानात्। अवश्यं चैवं ङीप्शास्त्रं व्याख्येयम्। अन्यथा बहुकुरुचरा प्रियकुरुचरा मधुरा, आपिशला ब्राह्मणी काशकृत्स्ना ब्राह्मणीत्यादौ टिन्निमित्तोऽण्निमित्तश्च ङीप् स्यात्। अत इदं वक्तव्यम्। व्याख्यानतो विशेषप्रतिपत्तिः न हि सन्देहादलक्षणमिति परिभाषया स्त्रियां योऽण् विहितः यश्च टिदादिः तस्मात् ङीप् प्रत्ययो भवतीति व्याख्याने नायं दोषः। प्रियाः कुरुचरा यस्यां मधुरायामिति विग्रहाश्रयणेन कुरुचरप्रातिपादकस्य टिदन्तस्य स्त्रियां वृत्त्यभावात्। अपिशलिना प्रोक्तं व्याकरणं आपिशलम्। आपिशलमधीते ब्राह्मणी सा आपिशला। काशकृत्स्नेन प्रोक्ता मीमांसा काशकृत्स्ना। तामधीते ब्राह्मणी काशकृत्स्नेत्यादिविग्रहाश्रयणेन प्रोक्तार्थे प्रत्ययात् परत अध्येत्र्याम् 'तदधीते' (पा.सू. ४.२.५९) इत्यणि च कृते तस्य 'प्रोक्ताल्लुक्' (पा.सू. ४.४.६४) इति प्रोक्तप्रत्ययात् परस्याध्येतृप्रत्ययस्य लुकि च कृते यस्त्वध्येत्र्यां प्रत्यय उत्पन्नः तस्य लुप्तत्वात् यश्च प्रोक्ते उत्पन्नः तस्याणः स्त्रियां वृत्त्यभावादिति। तथा चैवं 'ऋन्नेभ्यो ङीप्' इति शास्त्रे व्याख्यायमाने नेहापि दोषः। उपपदविशिष्टस्य स्त्रियां वृत्तावपि ङीन्निमित्तत्वेन विवक्षितऋदादीनां स्त्रियामवृत्तेः। अत एव 'शेषाद्विभाषा' इति कपो वैकल्पिकत्वात् पक्षे चेदं रूपमिति समाधानमपि युक्तम्। न च 'नद्युतश्च' इति कपो विधानात् शेषत्वाभावः। 'न संज्ञायाम्' इति निषेधेन कपोऽप्राप्त्याऽविहितसमासान्तकत्वरूपशेषत्वसम्भवात्। अन्यथा अनृक्कं साम बह्वृक्कं सूक्तमित्यादौ 'ऋक्पूरब्धूःपथामानक्षे' (पा.सू. ५.४.७४) इति विहिताकारप्रत्ययत्वेन विहितसमासान्तकत्वेन 'शेषाद्विभाषा' इति कप् न स्यात्। 'अनृचबह्वृचावध्येतर्येव' (वार्तिकम्, सि.कौ. ९४२) इति निषेधादनृक्कं सामेत्यादौ यदि शेषत्वं तदा प्रकृतेऽपि 'न संज्ञायाम्' इति निषेधाच्छेषत्वमिति साम्यम्।

यद्यपि 'न संज्ञायाम्' इति निषेधो 'नद्यृतश्च' इति प्राप्तकब्विषयो न भवति। किन्तु शैषिकविषयः। तथापि छन्दसीत्यनेन निषेधो भविष्यति। अन्यथा हतमानेति न स्यात्। एतेनापवादस्यापवादे उत्सर्गस्य प्राप्तिरित्यादि निरस्तम्। उक्तव्याख्यानेनोत्सर्गशास्त्रस्यात्राप्रवृत्तेः।

'घृतस्य धारा अरुषो न वाजी काष्ठाभिन्दन्नूर्मिभिः पिन्वमानः।
अभिप्रवन्त समनेव योषाः कल्याण्या अस्मयमानासोऽग्निम्॥'

'बिभृतामुपस्थे।'

इत्यादिप्रयोगदर्शनाच्च समनेत्येव पाठस्साधुः।

प्राणस्तेजसीत्यत्र नपुंसकतेजश्शब्देन प्रकृतत्वेऽपि नायं तेजश्शब्दो भूतपरः। किन्तु नित्यमुक्तचेतनपर इति ज्ञापयितुं स्त्रीलिङ्गप्रयोगोऽपि युक्तः इति सर्वमनवद्यमिति भावः।

विवरणार्थः

ततश्चायं विवरणार्थः। यदुक्तं प्रकृतेः संसाराभावाङ्गीकृतौ सर्वसाम्यापत्तिरिति तन्न। ईश्वरस्यैव महामहिमत्वाङ्गीकारात्। तदतिरिक्तस्य तदनङ्गीकारात्। संसाराभावादिना साम्येऽपि सर्वसाम्यापादनायोगात्।

नन्वेवं यत्र संसाराभावस्तत्र महामहिमत्वमिति व्याप्तेरीश्वरे गृहीतत्वेन व्यापकत्वनिश्चयेन महामहिमत्वरूपव्यापकस्य प्रकृतावभावे संसाराभावस्यैवानुपपत्तिरिति चेन्न। मुक्तेषु व्यभिचारेण व्यापकताग्रहायोगात्। नन्वथाप्यनादितः संसाराभावं प्रति महामहिमत्वस्य व्यापकता भविष्यतीति चेन्न। अव्याकृताकाशादौ व्यभिचारात्। अहङ्कारममकाराद्यात्मकस्य संसारस्य जडेऽयोगात्। नन्वथाप्यनाद्यसंसारिचेतनत्वेन महामहिमत्वमनुमीयत इति

चेन्न। तत्किमनाद्यसंसारिचेतनत्वमन्याधीनं हेतुः उतानन्याधीनम्। नाऽद्यः। विरोधात्। न हि धर्मिणो धर्मस्य वाऽन्याधीनत्वे महामहिमत्वं सम्भवति। न द्वितीयः। असिद्धेः। न हि प्रकृतेरनन्याधीनमनाद्यसंसारिचेतनत्वमस्माभिरङ्गीक्रियते। किन्तु भगवदधीनमेव। नन्विदं भगवदधीनमनाद्यसंसारिचेतनत्वं प्रकृतेरन्यत्राङ्गीक्रियते न वा। नाऽद्यः। अन्यत्रापि लयाभावप्रसङ्गेनोक्तव्याघातापातात्। न द्वितीयः। प्रकृतावेव तदङ्गीकारे कारणाभावात्। न च प्रकृतौ भगवदनुग्रहस्तादृशोऽस्तीति वाच्यम्। अनुग्रहापगमे तदपगमावश्यम्भावादिति चेन्न। तत्र तदनुग्रहस्य अनादिनित्यत्वाङ्गीकारात्। तदिदमुक्तम्। नित्यम् असंसारित्वस्य नित्यतदनुग्रहेणैवोपपत्तेरिति। अत्राऽद्यो नित्यशब्दः 'त्यब्नेर्ध्रुवे' (उ.सू.) इति ध्वंसाप्रतियोगित्ववाचकोऽपि अनादित्वपरः। सर्वत्रासंसारित्वस्य ध्वंसाप्रतियोगित्वेन व्यावृत्त्यप्रसिद्धेः। द्वितीयस्तु ध्वंसाप्रतियोगित्वपरः। अनादित्वस्य स्वत एव सिद्धेः। एवकारः न कारणगवेषणप्रयासोऽस्तीति दर्शयति।

स्यादेतदेवम्। यद्यनादेरप्यसंसारित्वस्य भगवदधीनत्वं प्रमितं स्यादित्यतः प्रमाणं पठति- **सदेति**॥ ईश इत्यावर्तते। यत ईशो हरिः अनित्यमनित्यतया सदा नियामयति। न तु कदाचिन्नियामयति। नित्यमनादि ध्वंसाप्रतियोगि च नित्यतया अनादिध्वंसाप्रतियोगितया नित्यया स्वशक्त्या अनादिसामर्थ्येन नित्यदा सर्वकाले नियामयति। अत एवेश इत्युच्यते। अन्यथा तन्न स्यादित्यर्थः। बहुलग्रहणात् नित्यदेति साधु। नन्वाकाशादेः नित्यस्य जडस्य भगवदधीनत्वेनाप्युपपत्तेः चेतनस्य कुतस्तदधीनत्वमित्यतः प्रमाणान्तरमाह- द्रव्यमिति। द्रव्यं महदादिस्वभावः तापकत्वादिः। चेतना जीवचैतन्यम्। धृतिशब्देन सुखदुःखाद्यान्तरः प्रपञ्चो गृह्यते। प्रकृतिपुरुषशब्देन लक्ष्मीचतुर्मुखौ। तेन चेतनेषु महत्त्वान्न तयोः भगवदधीनत्वमिति शङ्का निवार्यते। एते न सन्त्येवेत्येवशब्दसम्बन्धः। तेनात्यन्तमसन्तः स्युरिति ध्वनितमिति।

समनाधिकरणसूत्रक्रमः

अत्राऽद्ये सूत्रे प्रकृतेर्लयाभावे साधकत्रयोक्तिः । द्वितीयतृतीयाभ्यां सर्वसाम्यापत्तिरूपबाधकोद्धारः । तत्रापि प्रकरणानुगुण्याय संसारहेतुलयाधिकरणत्वरूपवैषम्यस्यान्तरङ्गत्वात् आद्ये तदुक्तिः । तस्य चायमर्थः । 'विलीनो हि प्रकृतौ संसारमेति' इति सौपर्णश्रुतौ तदपीतेः प्रकृतावपीतेः संसारहेतुत्वव्यपदेशान्न सर्वसाम्यमिति ।

केचित्तु 'तदापीतेः' इति सूत्रं पठित्वा प्रकृतावासमन्ताद् अपीतेः संसाराव्यपदेशादित्यर्थः ।

'अविज्ञातं प्रविष्टं यदपीतमिति कीर्त्यते ।
अप्ययोऽयं समुद्दिष्टस्तदन्येषामदर्शनम् ॥'

इति वचनादपीतिशब्दस्य सावकाशत्वादर्थान्तरवारणाय विवक्षितार्थग्रहणाय चाऽङः सम्बन्ध इति व्याख्यान्ति ।

चतुर्थेन मध्ये सम्पततः नित्यमुक्तत्वाभावप्रसङ्गस्य बाधकान्तरस्योद्धारः । तस्य सर्वसाम्यनिराकरणानन्तरमेव प्राप्तेः । तर्हि अर्थात् किञ्चित्साम्यमेवाऽपतितम् । न चैतद् विशेषश्रुतिमन्तरेणाङ्गीकर्तुं शक्यत इति तदनन्तरमापतितस्य बाधकान्तरस्य पञ्चमेन परिहारः । तदर्थश्चोष्माशब्दः ऊष्मापदघटितश्रुतिपरः 'वार्त्रघ्नीपौर्णमास्यामनूच्येते वृधन्वत्यमावास्यायाम्' इत्यादिशब्दवत् । तथा च 'द्वेधा हीदमवदृश्यते ऊष्मावदनूष्मावच्च' इत्यादिसौपर्णश्रुतिः किञ्चित्साम्यरूपार्थस्यैवोपपत्त्यर्थमुपपादिकेति यावत् । युक्त्यन्तरेणेत्यवतारटीका तु युज्यतेऽनयेति व्युत्पत्त्या श्रुत्यन्तरेणेत्येवंपरा । यथाश्रुते युक्त्यनुपन्यासेन बाधः स्यात् । ननु श्रौतमपि किञ्चित् साम्यम् 'असमो वा एष परमो न हि कश्चिदेनं पश्यति' (ब्र.सू.भा.उ. चतुर्वेदशिखाश्रुतिः ४.२.१२) इत्यादिश्रुत्या

प्रतिषिद्धत्वादित्यनन्तरप्राप्तस्य बाधकान्तरस्य षष्ठेनोद्धारः । तदनन्तरं सामान्यश्रुतेः विशेषपर्यवसानाय प्रमाणविशेषाकाङ्क्षा यथाक्रमं श्रुतिस्मृत्युपन्यासेन सप्तमाष्टमाभ्यां परिह्रियत इति सूत्रक्रमोऽनुसन्धेयः ।

॥ इति समनाधिकरणम् ॥ ६ ॥

॥ अथ परा(लया)धिकरणम् ॥ ७ ॥

सूत्रभाष्यम्

ॐ तानि परे तथा ह्याह ॐ ॥ ४.२.१५ ॥

प्राणद्वारेण सर्वाणि दैवतानि परमात्मनि विलीयन्ते । 'सर्वे देवाः प्राणमाविश्य देवे मुक्ता लयं परमे यान्त्यचिन्त्ये' इति कौषारवश्रुतिः ॥१५॥

॥ इति परा(लया)धिकरणम् ॥ ७ ॥

तत्त्वप्रकाशिका

सङ्गतिः

अत्र चतुर्मुखेतरदेवानां मोक्षे भगवत्प्राप्तिसमर्थनादस्ति शास्त्रादि-सङ्गतिः । अन्यथा ज्ञानिनां मोक्षाभावप्रसङ्गात् समर्थनीयमेतत् । 'सर्वे देवा भूतेषु विशन्ति' इत्युक्तं, ते देवा अत्र विषयः । भगवति लीयन्ते उत नेति सन्देहः । उभयथापि सम्भवः सन्देहबीजम् ।

पूर्वपक्षः

न देवानां हरौ लय इति पूर्वः पक्षः । 'प्रतिबिम्बो हरेः प्राणः प्राणस्यान्याः कलाः क्रमात्' इति वचनात् सर्वदेवानां क्रमेण प्राणप्रतिबिम्बत्वात् तस्यैकस्यैव परमात्मप्रतिबिम्बत्वात् प्रतिबिम्बस्यैव बिम्बे लयनियमात् । अतो वेदगर्भेतरदेवानां परमात्मनि लयाभावाज्ज्ञानिनामपि मोक्षाभाव इति ।

सिद्धान्तः

सिद्धान्तयत् सूत्रं पठित्वा व्याचष्टे- **तानीति** ॥ येषां देवानां पूर्वं भूतप्रवेशो निगदितस्तानि सर्वाणि दैवतानि परमात्मनि विशन्त्येव । न च प्राण-

प्रतिबिम्बत्वविरोधः । तत्प्रतिबिम्बत्वेन तद्द्वारा परमात्मनि लयाङ्गीकारात् । न च देवानां तदभाव एव । सामान्यतोऽशेषजीवानां भगवत्प्रतिबिम्बत्वात् । विरिञ्चप्रविष्टानां विरिञ्चस्य चेश्वरप्रवेशे परमात्मप्रवेशस्यापरिहार्यत्वात् । न चात्र प्रमाणाभावः । 'सर्वे देवाः' इति विशेषश्रुतिसद्भावादेवेति भावः । अतो देवानां परमात्मनि लयसद्भावाद्युक्तमुक्तमिति सिद्धम् ॥ १५ ॥ अ.७ ॥

शेषतात्पर्यचन्द्रिका

॥ 'ॐ तानि परे तथा ह्याह ॐ' ॥ ४-२-१५ ॥

सङ्गतिः पूर्वपक्षश्च

अत्र चतुर्मुखस्य परब्रह्मणि 'सोऽध्यक्षे तदुपगमादिभ्यः' (ब्र.सू. ४.२.३) इत्यधिकरणे लयस्य साधितत्वात् तद्व्यतिरिक्तानां वाण्यन्तानां सात्त्विकजीवानां भगवति लयोऽत्र पादे सङ्गतत्वाद् विचार्यते । ननु 'एषा हि नित्याऽजरा तद्वशा च' (ब्र.सू.भा.उ. माध्यन्दिनायनश्रुतिः ४.२.१३) इति श्रुतिविरोधाद् यथा लक्ष्म्याः लयाभावः, एवं 'ऋभवः पृथिव्याम्, वरुणेऽश्विनौ, वायाविन्द्रः, आकाशे विनायकः' (ब्र.सू.भा.उ.महोपनिषत् ४.२.६), 'अग्नौ सर्वे देवा विलीयन्ते' (ब्र.सू.भा.उ.श्रुतिः ४.२.६), 'भूतेषु देवा विलीयन्ते' (ब्र.सू.भा.उ.श्रुतिः ४.२.६) इत्यादिश्रुतिविरोधात् न वाण्यन्तानां भगवति लयः । न चात्र भगवति लयो न निषिध्यत इति वाच्यम् । तत्र तत्र लीनानां भगवति लयानुपपत्तेः । न च 'भूतानि परे न पर उदेति नास्तमेत्येकल एव मध्ये स्थाता' (ब्र.सू.भा.उ.बृहच्छ्रुतिः ४.२.५) इत्यादिश्रुतिविरोधाद् ब्रह्मण्येवैषां लयोऽङ्गीकर्तव्य इति वाच्यम् । 'वाङ्मनसि दर्शनात्' (ब्र.सू. ४.२.१) इत्यारभ्य एतदन्तानामधिकरणानां विरोधापातात् । भगवदप्रतिबिम्बत्वाच्च तेषां बिम्ब-प्रतिबिम्बभावस्यैव लये नियामकत्वात् । न च सर्वे देवा हरेरेव प्रतिबिम्बा इति वक्तुं शक्यम् । 'प्रतिबिम्बो हरेः प्राणः प्राणस्यान्याः कलाः क्रमात्' (त.प्र.उ.

प्रमाणवचनम् ४.२.१५) इति विशेषवचनविरोधात्। न च साक्षाल्लये बिम्ब-प्रतिबिम्बभावोऽपेक्षितः। इह स्वोत्तमद्वारा भगवति लयाङ्गीकारे को दोष इति वाच्यम्। 'ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे। प्रविशन्ति परं देवम्' (ब्र.सू.भा.उ. स्मृतिः ४.३.११) इत्यादिना साक्षादेव प्रवेशोक्तेः। अतो

'यः सोऽध्यक्षनयेनोक्तो विरिञ्चस्य लयो हरौ।
प्रतिबिम्बत्वतो युक्तो नान्येषां तल्लयो भवेत्॥'

इत्युत्थानादनन्तरसङ्गतिः। कृतः पूर्वपक्षः।

सिद्धान्तः

सिद्धान्तस्तु-
कौषारवश्रुतौ यस्मात्सर्वेषां परमे लयः।
चतुर्मुखप्रवेशेन प्रोक्तस्तेनोक्तमुज्वलम्॥

सर्वेषां भगवति लयो युज्यते। न चात्र प्रतिबिम्बत्वविरोधः। परम्परया सर्वेषां भगवत्प्रतिबिम्बत्वाङ्गीकारात्। यथोक्तम् 'आभासकोऽस्य पवनः पवनस्य रुद्रः' (म.भा.ता.नि. १.४) इत्यादि। न च साक्षात् प्रतिबिम्बत्वमेव तत्र लयेऽपेक्षितमित्यस्ति नियमः। प्रमाणाभावात्। गरुडशेषमार्गप्रविष्टानां बहूनामपि देवानां साक्षाच्चतुर्मुखाप्रतिबिम्बानामपि तत्र लयाङ्गीकाराच्च।

किञ्चात्र देवानां भगवति लयो नास्तीति कोऽर्थः ? तत्र तच्छरीरस्य जीर्णीभावो नास्तीत्यर्थः ? उत प्रवेशोऽपि नास्तीति ? नाऽद्यः। अस्माकमप्रतिपक्षत्वात्। नहीन्द्रादिशरीरे जीर्णशरीराणां देवानां भगवति शरीरजरणमभ्युपगच्छामः। तत्रैव जीर्णस्य पुनरन्यत्र जरणासम्भवात्। न द्वितीयः। विरिञ्चस्येश्वरप्रवेशे तदुदरप्रविष्टानां परमात्मप्रवेशस्यावर्जनीयत्वात्। अत एव 'प्रविशन्ति परं देवम्' (ब्र.सू.भा.उ. स्मृतिः ४.३.११) इत्यादेः न साक्षात्प्रवेशपरत्वमिति।

परेषां परसम्पत्त्यधिकरणं तन्निरासश्च

अन्ये तु तत्वज्ञानिनो वागादयः प्राणा विलीयमानाः प्रातिस्विकेष्वग्न्यादिषु स्वकारणे लीयन्त उत परमात्मन्येवेति संशये, स्वस्वकारणेष्वेव लयः, 'गताः कलाः पञ्चदश प्रतिष्ठाः' (मु. ३.२.७) इत्यादिस्वस्वकारणे लयप्रतिपादक-श्रुतेरिति प्राप्ते तत्त्वविदः दृष्ट्या परमात्मन्येव लयः। 'एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति' (प्रश्न. ६.५) इति श्रुतेः परस्मिन्नेवाऽत्मनि प्रलीयन्त इति सिद्धान्त इत्याहुः।

तन्न। 'वाङ्मनसि दर्शनाच्छब्दाच्च' (ब्र.सू. ४.२.१) इत्यादौ वागादीनां स्वस्वकारणे लयोक्तेः पुनरिह विमर्शानुपपत्तेः। वागादीनां वृत्तिपरत्वेऽपि कार्यस्य स्वकारणे लयस्यानिषिद्धत्वात्।

एतेन 'प्रतिष्ठाविलयनश्रुत्योः विप्रतिपत्तेर्भवति विमर्शः' इति भामत्युक्तं निरस्तम्। 'तेजः परस्यां देवतायाम्' (छा.उ. ६.८.६) इति विलयनश्रुतेः स्फुटत्वेन गताः कला इत्यस्याः स्वकारणे स्फुटं लयप्रतिपादकत्वात्, 'परेऽव्यये सर्व एकीभवन्ति' (मुं.उ. १.२.१२) इति श्रवणात् प्रत्युत परस्मिन्नेवाऽत्मनि लयप्रतिपादनाच्च विप्रतिपत्तेरयोगात्। किञ्च लयाधिकरणत्वेनोच्यमान आत्मा किं विशिष्ट उत शुद्धः। आद्येऽपि स विशिष्टो मायावच्छिन्न उताविद्यावच्छिन्नः। नाऽद्यः। मुख्यविदुषः सगुणे ब्रह्मणि लयानुपपत्तेः। अमुख्यविद्विषयत्वे तु 'इतरा तु विद्वत्प्रतिपत्त्यपेक्षा कृत्स्नं कलाजातं परब्रह्मविदो ब्रह्मैव सम्पद्यत इति' इति प्रतिष्ठाविलयनश्रुत्योः विरोधपरिहाराय प्रवृत्तत्वद्भाष्यविरोधापातात्। अत एव न द्वितीयः। 'तानि पुनः प्राणशब्दोदितानीन्द्रियाणि भूतानि च परब्रह्म-विदस्तस्मिन्नेव परस्मिन्नात्मनि प्रविलीयन्ते' (शां.भा. पृ. ९८०) इति त्वद्भाष्यविरोधाच्च। यद्यविद्यावच्छिन्न आत्मा स्वस्मादन्यश्चो लयाधिकरणमङ्गी-क्रियते यदि वा स्वयमेव तदा तस्य विद्वत्त्वव्याघातः। न हि निर्मृष्टनिखिल-

प्रपञ्चावभासस्य स्वयमन्य इति वा शक्यते वक्तुम्। 'एवमेवास्य परिद्रष्टुः' (प्रश्न. ६.५) इत्येवमादिका विद्वत्प्रतिपत्त्यपेक्षा तात्त्विकप्रमाणापेक्षेति भामती-विरोधात्। न ह्यविद्यावच्छिन्ने लयप्रतिपादिका श्रुतिः तत्त्वावेदकप्रमाणं भवति। न द्वितीयः। शुद्धात्मनोऽर्थक्रियारहितस्योपादानत्वाभावेन कार्यस्योपादान एव लय इति नियमव्याघातात्। अविद्यावच्छिन्नस्य व्यापकस्यान्तःकरणावच्छिन्न-स्याणोर्वा विदुषोऽविद्याकार्यत्वेन तस्य च ब्रह्मज्ञाननिवर्त्यत्वाङ्गीकारेण शुद्धात्मनि विलयाङ्गीकारे आत्मनाशापादकस्य ब्रह्मज्ञानस्यासम्पाद्यत्वप्रसङ्गात्। 'वाङ्मनसि सम्पद्यते' (छा.उ. ६.८.६) इत्यादिपूर्ववाक्ये लीयमानतयोक्तानां वागादीनां वृत्तिरूपत्वाङ्गीकारेण 'तेजः परस्यां देवतायाम्' (छा.उ. ६.८.६) इति वाक्यार्थनिर्णायके 'तानि परे तथा ह्याह' इति सूत्रे तानीति निर्दिष्टानां प्राणशब्दोदितानामिन्द्रियाणामपि वृत्तिरूपत्वात् तावन्मात्रस्य शुद्धब्रह्मणि लयप्राप्तावपि अविद्याकार्यमात्रस्य लयाप्रतिपादनात् त्वद्विवक्षिततात्त्विक-प्रमाणत्वासिद्धेश्च। लयमात्रप्रतिपादकत्वेन तात्त्विकप्रमाणत्वे च 'गताः कलाः पञ्चदश प्रतिष्ठाः' (मुं.उ. ३.२.७) इत्यादीनामपि तत्त्वापाताच्च।

किञ्च लयो यदि वृत्त्युपरममात्रम्, यदि वा वृत्तिमतामेवेन्द्रियाणां प्रध्वंसः तदा सर्वमिथ्यात्वासिद्धिः। विनाशस्य सशेषत्वदर्शनात्। यदि च शुक्ति-रूप्यादिवद् ज्ञानेन बाधो लयः तदा 'अथ मर्त्योऽमृतो भवति, अत्र ब्रह्म समश्नुते' इति मुख्यविद्वांसं प्रकृत्य, 'तद् यथाऽहिर्निर्लयनी वल्मीके मृता प्रत्यस्ता शयीत एवमेवेदं शरीरं शेते' (बृ.उ. ४.४.७) इति वल्मीके प्राप्तत्वच इव विद्वत्सम्बन्धा-भावमात्रं शरीरस्य नोच्येत। शुक्तिरूप्यवच्छरीरं तत्त्वज्ञाने नैव दृश्येतेत्ये-वोच्येत। नहि शुक्तिरूप्यमध्यस्तं कस्माच्चिद्विश्लिष्य शेते।

रामानुजोक्तपरसम्पत्त्यधिकरणनिरासः

केचित्तु, सकरणग्रामः सप्राणः करणाध्यक्षो जीव उत्क्रान्तिवेलायां

तेजःप्रभृतिभूतसूक्ष्मेषु सम्पद्यत इत्युक्तम्। सैषा सम्पत्तिर्विदुषो न विद्यत इत्याशङ्क्य परिहृतम्। तानि पुनर्जीवपरिष्वक्तानि भूतसूक्ष्माणि किं यथाकर्म यथाविद्यं च स्वकार्याय गच्छन्त्युत परमात्मनि सम्पद्यन्त इति विशये, मध्ये परमात्मसम्पत्तौ सुखदुःखोपभोगरूपकार्यादर्शनात् तदुपभोगानुगुण्येन यथाकर्म यथाविद्यं च गच्छन्तीति प्राप्त उच्यते। तानि परमात्मनि सम्पद्यन्ते। कुतः ? तथा ह्याह श्रुतिः 'तेजः परस्यां देवतायाम्' (छा.उ. ६.८.६) इति। यथाऽऽह श्रुतिस्तदनुगुणं कार्यं कल्प्यमित्यर्थः सुषुप्तिप्रलययोः यथा परमात्मसम्पत्त्या सुखदुःखभोगायासविश्रमस्तथेहापीत्याहुः।

तत्र विद्वत्सम्बन्धीनि भूतसूक्ष्माणि विचार्यन्त उत साधारणानीति प्रष्ट-व्यम्। नाऽद्यः। आसृत्युपक्रमात् साधारण्योक्तेरयोगात्। 'एवं गत्युपक्रमावधि विद्वदविदुषोः समानाकार उत्क्रान्तिप्रकार उक्तः। इदानीं विदुषो विशेष उच्यते' इति उत्तराधिकरणोपक्रमभाष्यविरोधाच्च। चरमनाड्योत्क्रान्तस्य सत्यादिलोके स्थितस्य विदुषः प्रतिसञ्चर एव परमात्मनि लयसद्भावेऽपि ततः पूर्वलया-योगाच्च। सुषुप्तिसमय इव हृदयस्थपरमात्मसंयोगमात्राभिप्राये चाविदुषोऽपि सम्भवाच्च। न द्वितीयः। 'तेजः परस्यां देवतायाम्' (छा.उ. ६.८.६) इति स्पष्टश्रुतेः संशयपूर्वपक्षयोरनुपपत्तेः। नहि प्राणस्तेजसीति वाक्यस्य पूर्वाधिकरणे विचारितत्वेऽपि तदनन्तरमेवोक्तस्य परदेवतावाक्यस्याऽच्छादनं युक्तम्।

किञ्च सूक्ष्मचिदचिच्छरीरकस्य ब्रह्मणः त्वन्मते जगदुपादानत्वाङ्गीकारेण कार्यस्य स्वोपादाने लयस्य नियतत्वेन कथं संशयादिः। चिदचिच्छरीरके आत्मनि न विलयोऽत्र समर्थ्यते। किन्तु केवल आत्मनि संयोगमात्रमिति चेन्न। तथाविधस्याऽत्मनो व्यापकत्वेन वस्तुमात्रस्यापि तत्सम्बन्धस्य सिद्धत्वेन विशिष्य भूतसूक्ष्माणां तत्सम्बन्धोक्त्ययोगात्। मद्रीत्या देवानां देहलयप्रकारस्य मानान्तराप्राप्तस्यावश्यवक्तव्यस्य प्रतिपादकतया नियुक्तानां 'वाङ्मनसि दर्शनात्'

इत्यारभ्य एतदन्तानां बहूनामपि सूत्राणामविप्रतिपन्नस्य प्रमाणेषु स्फुट-प्रतिभासस्येह फलाध्यायेऽवश्यानिरूपणीयस्यानुपयुक्तस्य स्वकारणे कार्यलयस्य तत्प्रसक्तानुप्रसक्तस्य साधारण्यादिप्रमेयस्य च निरूपणपरतया विनियोगश्चायुक्त इति मतद्वयमप्यनुपपन्नमेव ।

टीकाक्षरार्थः

परतन्त्रतेति पूर्वपक्षन्यायविवरणम्

टीकाक्षरार्थस्तु । 'परतन्त्रता च' इत्युक्तन्यायं सम्बन्ध्यादिप्रदर्शनेन विवृण्वत्,

'न चान्यदेवानां प्राणाधीनत्वात् तत्प्राप्तिनियमात् परप्राप्तिर्नास्त्येव'

इति वाक्यं व्युत्क्रमेण व्याचष्टे- **न देवानां हरौ लय इति पूर्वः पक्ष इत्यादिना ॥** तेन परप्राप्तिर्नास्तीत्येतदुक्तार्थम् । यद्यप्यत्र प्रवेशो नास्तीत्येव वक्तव्यम् । विवरणे प्राप्तिशब्दश्रवणात् । मोक्षे भगवत्प्राप्तिसमर्थनादित्युपक्रमे परमात्मप्रवेशस्या-परिहार्यत्वाद् इत्युपसंहारे च स्ववचनानुसाराच्च । तथाऽपि 'सर्वे देवाः प्राणमाविश्य देवे मुक्ता लयं परमे यान्त्यचिन्त्ये' (ब्र.सू.भा.उ. कौषारवश्रुतिः ४.२.७) इति श्रुत्यनुसाराल्लय इत्युक्तम् । सर्वेषां देवानां क्रमेण प्राणप्रतिबिम्बत्वाद् इत्येतदन्यदेवानां प्राणाधीनत्वादित्यस्यार्थः । प्राणप्रतिबिम्बत्वेऽपि भगवत्-प्रतिबिम्बत्वमस्तु । तथा च तत्र लयोऽपि युक्त एवेत्याशङ्कापरिहाराय मध्येऽध्याहार्यभागमाह- **तस्यैकस्यैव परमात्मप्रतिबिम्बत्वादिति ॥** 'प्रतिबिम्बो हरेः प्राणः' इत्यादौ प्राणस्य हरिप्रतिबिम्बत्वोक्त्या चान्यदेवानां भगवत्प्रति-बिम्बत्वाभावस्सिद्ध इति भावः । यदंशयोजनार्थमध्याहृतं तमेव तत्प्राप्ति-नियमादित्यंशं व्याख्याति - **प्रतिबिम्बस्यैवेति ॥** अनेन तदित्येतत्तन्त्रेणोपात्तं तस्य तस्मिन्निति च लभ्यते । तस्येत्यनेनैवकारस्य सम्बन्धः । यद्वा नियमादि-त्युपादानादेव तस्यैवेति सिद्ध्यतीत्युक्तं भवति । अन्यदेवानां परप्राप्तिर्नास्तीत्यस्य प्रकारान्तरेण व्याख्यानमाह- **अतो वेदगर्भेतरेति ॥**

'विशेष' रूपसिद्धान्तन्यायविवरणम्

विशेष इत्युक्तन्यायं विशेषश्रुतिपरत्वेन तत्प्रदर्शनेन विवृण्वत्,

'' 'प्राणं प्राप्य परं देवास्तदन्ये चैव तद्गताः ।
प्राप्नुवन्ति परं देवं वसन्ति च यथासुखम् ॥'

इति विशेषश्रुतेः ।''

इति वाक्यं पारम्पर्यप्रदर्शनलब्धयुक्त्यभिव्यञ्जनपूर्वकं सूत्रार्थकथनेन व्याचष्टे- **तानीति ॥** भूतप्रवेशो निगदित इत्युपलक्षणम् । 'वर्णाश्रमाचाररता मनुष्या धर्मं मनुं सोऽपि समेति काले' इत्युक्तमनुष्योत्तमानामपि ग्रहणम् । अत एवात्र सर्वत्र देवशब्दः सम्यग्दर्शिविदगर्भपरो व्याख्येयः । अत एव 'न चान्यदेवादीनाम्' इति कचिद्विवरणपाठोऽपि । विवरणोक्तस्य प्राणप्रतिबिम्बत्वाख्यपूर्वपक्षन्यायस्य कः परिहार इत्यतोऽनूद्य निराह- **न च प्राणेति ॥** हेतुमाह- **तत्प्रतिबिम्बत्वेनेति ॥** प्राणप्रतिबिम्बत्वेन प्राणलये सिद्धे तद्द्वारा परमात्मनि लयाङ्गीकारेण न विरोधः । प्रतिबिम्बस्यैव बिम्बे लय इति तु साक्षाल्लयविषयमिति भावः । देवानां भगवत्प्रतिबिम्बत्वाभावमभ्युपेत्य भगवति लयं समर्थ्य तदनङ्गीकारेण च समाधानमाह- **न च तदभाव एवेति ॥** पक्षद्वयेऽपि विवरणसूचितां युक्तिमाह- **विरिञ्चप्रविष्टानामिति ॥** प्रयोजनं च लयकाले स्वात्मनः तथा चिन्तनमित्या-द्यूह्यम् ।

॥ इति परा(लया)धिकरणम् ॥ ७ ॥

॥ अथ अविभागाधिकरणम् ॥ ८ ॥

सूत्रभाष्यम्

ॐ अविभागो वचनात् ॐ ॥ ४.२.१६ ॥

'एते देवा एतमात्मानमनुविश्य सत्याः सत्यकामाः सत्यसङ्कल्पा यथानिकाममन्तर्बहिः परिचरन्ति' इति गौपवनश्रुतिः । तत्परमेश्वर-कामाद्यविभागेनैव तेषां सत्यकामत्वम् । 'कामेन मे काम आगाद्धृदयाद्धृदयं मृत्योः' (तै.आ.३.१५.४) इति वचनात् ।

'मुक्तानां सत्यकामत्वं सामर्थ्यं च परस्य तु ।
कामानुकूलकामत्वं नान्यत्तेषां विधीयते ॥' इति ब्राह्मे ॥ १६ ॥

॥ इति अविभागाधिकरणम् ॥ ८ ॥

तत्त्वप्रकाशिका

सङ्गतिः

अत्र देवानां मुक्तौ भगवदधीनत्वसमर्थनादस्ति शास्त्रादिसङ्गतिः । अन्यथा भगवतः सर्वोत्तमत्वहानिप्रसङ्गात् समर्थनीयमेतत् । देवा एव प्रकृता विषयः । किं मुक्तौ स्वतन्त्रा वर्तन्त उताऽस्वतन्त्रा इति सन्देहः । मुक्तत्वं स्वातन्त्र्यस्य भगवद्धर्मत्वं च सन्देहबीजम् ।

पूर्वपक्षः

स्वतन्त्रा एव वर्तन्त इति पूर्वः पक्षः । मुक्तत्वादेव । अस्वातन्त्र्ये संसारिवद्दुःखादिप्राप्तेः । 'एते देवाः' इति सायुज्यं प्राप्तानां देवानां सत्य-कामत्वादिश्रुतेश्च । न हि परतन्त्रेषु सत्यकामत्वादि सम्भवति । अतो मुक्तानामपि स्वातन्त्र्यात् परमात्मनः सर्वोत्तमत्वोक्तिर्विरुद्धेति ।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **अविभाग इति ॥** परमात्माधीना एव मुक्ता न तु स्वतन्त्राः । न चैवं श्रुत्यादिविरोधः । श्रुतिर्यत् सत्यकामत्वं वक्ति तत् तेषां सत्यकामत्वं परमेश्वरेच्छानुसारेणैवेत्यङ्गीकारात् । अत एव न दुःखादिप्राप्तिः । यदा खलु भगवदिच्छाननुसारेणेच्छति तदा तदलाभेन दुःखादि स्यात् । मुक्तास्तु भगवत्कामानुसारेणैव कामयन्तेऽतो भगवत्कामनिमित्तेन मुक्तकामानन्तरमेव कामितप्राप्तेरस्वतन्त्राणामपि सत्यकामत्वाद्दुःखित्वाद्युपपन्नमिति भावः । सत्याः नित्याः । सत्यकामत्वश्रुतेः कुतोऽमुख्यार्थतेत्यत आह- **कामेनेति ॥** मृत्योः कामेनेच्छया मे कामः कामितमागात् । आगतं तदिच्छानन्तरप्राप्तत्वात् । कथमीश्वरेच्छया ममेच्छा भगवदिच्छानुसारिणीत्यर्थः । अत्र स्मृतिं चाऽह- **मुक्तानामिति ॥** सामर्थ्यं चेश्वराधीनमिति शेषः । अतो मुक्तानामस्वातन्त्र्याद् विष्णोरेव सर्वोत्तमत्वमिति सिद्धम् ॥ १६ ॥ अ.८ ॥

शेषतात्पर्यचन्द्रिका

॥ ॐ अविभागो वचनात् ॐ ॥ ४.२.१६ ॥

सङ्गत्यादि

एवं सर्वेषां देवानां यथाश्रुति तत्तद्देवतायां प्रवेशेन शरीरविलयः, हिरण्यगर्भस्य तु भगवति, प्रकृतेस्तु न कुत्रापि । एवं साक्षात्परम्परया वा भगवति प्रवेशोऽवर्ज-नीयः ।

'प्राणं प्राप्य परं देवाः तदन्ये चैव तद्गताः ।
प्राप्नुवन्ति परं देवं वसन्ति च यथासुखम् ॥' (न्या.वि.उ.श्रुतिः ४.२.१५)

इति विशेषश्रुतेरित्युक्तमनन्तरातीताधिकरणे । तदेतन्नोपपद्यते । यथा परम्परया

भगवत्प्रतिबिम्बानामपि विशेषश्रुतेः भगवति लयोऽङ्गीकृतः तत एव तत्र प्रविष्टानां 'यथासुखं वसन्ति' इति विशेषश्रुतेः स्वातन्त्र्यस्याप्यापातात् । न च 'तदनन्यत्वमारम्भणशब्दादिभ्यः' (ब्र.सू. २.१.१५), 'फलमत उपपत्तेः' (ब्र.सू. ३.३.३९) इत्यादौ भगवत एव स्वातन्त्र्यं नान्येषामित्युक्तमिति वाच्यम् । कर्मादिफलभोगदशायां स्वातन्त्र्याभावेऽपि भगवदुदरं प्रविष्टानां निवृत्तबन्धानामस्वातन्त्र्याङ्गीकारे कारणाभावात् । किञ्च 'एते देवा एतमात्मानमनुप्रविश्य सत्याः सत्यकामाः सत्यसङ्कल्पा यथानिकाममन्तर्बहिः परिचरन्ति' इति गौपवनश्रुत्या भगवदुदरप्रविष्टानां सत्यकामत्वं सत्यसङ्कल्पत्वं चोच्यते । न चैतदुभयं पारतन्त्र्ये सम्भवति । यस्य हि कामितं सङ्कल्पितं चाविसंवाद्येव स एव सत्यकामादिरुच्यते । पारतन्त्र्ये कदाचिद्भगवदिच्छाव्यावृत्तौ कामसङ्कल्पयोः विसंवादेन तस्य सत्यकामत्वादिव्याहतिरेव ।

एतेनैव पूर्वाधिकरणोक्तं जीवानां भगवत्प्रतिबिम्बत्वमप्यनुपपन्नम् । प्रतिबिम्बत्वं हि तदधीनत्वे सति तत्सदृशत्वम् । न ह्येतत्सर्वबन्धविधुरेऽस्तीत्युक्तम् । न च 'स एव च कर्मानुस्मृतिशब्दविधिभ्यः' (ब्र.सू. ३.२.९) इत्यत्र विशिष्य सर्वावस्थानां भगवदधीनत्वस्योक्तत्वात् 'स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि' (ब्र.सू. ४.४.१६) इत्यत्र सृष्टिमुक्त्योः समानन्यायत्वस्य कण्ठरवेणैवोक्तत्वात् न प्रतिबिम्बत्वादिहानिरिति वाच्यम् । तदधीनस्य तस्मिन् लय इत्युत्सृष्टन्यायस्य 'द्वावेतौ नित्यमुक्तौ नित्यौ च सर्वगतौ चैतौ ज्ञात्वा विमुच्यते' (ब्र.सू.भा.उ. बृहच्छ्रुतिः ४.२.७) इति विशिष्य वचनात् प्रकृतेः लयापवादवत् 'वसन्ति च यथासुखम्' इति विशेषश्रुत्यादिना क्वचिदपवादसम्भवादित्यादिप्रकारेण 'तथा ह्याह' इति सूत्रगृहीतां विशेषश्रुतिमवलम्ब्योत्थानात् पूर्वाधिकरणोक्तभगवत्प्रबिम्बत्वस्यैव आक्षिप्य समाधानाद्वा अनन्तरसङ्गतिः ।

यद्यपीदमधिकरणं भोगपादे सङ्गतम् । मुक्तानां भोगस्वातन्त्र्यस्य तत्रैव

परिस्फूर्तेः । तथाऽपि राजमन्दिरे प्रवेशोक्त्याऽपि स्वातन्त्र्यप्रतीतेरिहापि भगवदुदरप्रवेशेन स्वातन्त्र्यं प्रतीतमेवेति न दोषः ।

ननु 'सम्पद्याविर्भावः स्वेन शब्दात्' (ब्र.सू. ४.४.१) इत्यस्मिन्नधिकरणे भगवन्तमविहायैव भोगोक्तेः स्वातन्त्र्यं निराकरिष्यत इति चेन्न, तत्र भगवत्प्राप्त्यनन्तरमन्यः प्राप्यो देशविशेषो नास्तीति प्रतिपादनात् ।

पूर्वपक्षः सिद्धान्तश्च

उदरे सन्निविष्टानां स्वातन्त्र्यं स्याच्छ्रुतेर्बलात् ।
न चेत्तत्प्रतिबिम्बानां प्रवेशो विनिहन्यते ॥

इति पूर्वपक्षः ।

तत्कामकामितादिस्तु सत्यकामादिरिष्यते ।
न चास्य पारतन्त्र्येण विरोधो दृश्यते क्वचित् ॥

इति सिद्धान्तः ।

परोक्ताविभागाधिकरणपरीक्षा

अन्ये तु, विदुषः कलाप्रलयः किमितरेषामिव सावशेष उत निरवशेष इति संशये प्रलयसामान्यादितरेषामिव कलानां शक्त्यवशेष एव । नतु निरवशेषतेति प्राप्ते 'भिद्येते तासां नामरूपे पुरुष इत्येवं प्रोच्यते । स एषोऽकलोऽमृतो भवति' (प्र. ६.५) इत्यादिवचनाद् अविभागापत्तिरेव कलानां, न तु शक्त्यात्मनाऽवस्थितिरिति ।

तन्न । भेदशब्दस्य नाशे व्युत्पत्त्यभावः, घटो भिन्न इत्यादौ नाशस्त्वर्थादेव प्रतीयत इत्युक्तत्वात् । 'पुरुष इत्येवं प्रोच्यते' (प्रश्न. ६.५) इति सप्तम्याऽऽधाराधेयभावप्रतीतेश्च । नहि निःशेषनष्टानामाधारता आधेयता वाऽस्ति ।

पुरुषशब्दस्य प्रथमान्तत्वे च 'परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः' (प्रश्न. ६.५) इति पूर्ववाक्यविरोधः। नहि पुरुषाश्रिताः पुरुषा एवेति व्यपदेष्टुं शक्यन्ते। न वा 'द्रष्टुः इमाः' इति द्रष्टृत्वेनोक्तपुरुषात्मता सम्भवति। अन्यथा 'सर्वं खल्विदं ब्रह्म' (छा.उ. ६.१४.१) इत्यादौ लक्षणा न स्यात्। किञ्च ब्रह्मेतरस्याविद्या-कल्पितत्वम्, अत एव विद्यया तन्निवृत्तिश्चेति तदनन्यत्वाधिकरणे स्पष्टं प्रतिपादितम्। अत एव तत्र त्वद्भाष्यम्- 'तस्मादन्त्येन प्रमाणेन प्रतिपादिते आत्मैकत्वे समस्तस्य प्राचीनस्य भेदव्यवहारस्य बाधितत्वान्नानेकात्मक-ब्रह्मकल्पनावकाशोऽस्ति' इति। तदेवमविद्यात्मकोपाधिपरिच्छेदापेक्षमेवेश्वरस्य ईश्वरत्वं सर्वशक्तत्वं च न परमार्थतो विद्ययाऽपास्तसमस्तोपाधिस्वरूपे आत्मनीशित्रीशितव्यसर्वज्ञत्वादिव्यवहार उपपद्यते। तथा चोक्तम्- 'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद् विजानाति स भूमा' (छा.उ. ७.२४.१) इति, 'यत्र त्वस्य सर्वमात्मैवाभूत्' (बृ.उ. ४.५.१५) इत्यादिना च। एवं परमार्थावस्थायां सर्वव्यवहाराभावं वदन्ति वेदान्ताः। तथेश्वरगीतास्वपि

'न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥
नाऽदत्ते कस्यचित् पापं न चैव सुकृतं विभुः।
अज्ञानेनाऽवृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥' (भ.गी. ५.१४,१५) इति।

परमार्थावस्थायाम् ईशित्रीशितव्यादिव्यवहाराभावः प्रदर्श्यते' (शां.भा. पृ. ४६२) इत्यादि। तथा चाविद्यानिमित्तानां च कलानां विद्यानिमित्ते प्रलये निरवशेषनाशस्य तत्रैव सिद्धत्वात् पुनरिहाऽरम्भो व्यर्थ एव। उक्तं चात्र भामत्यामेव- 'निमित्तापाये नैमित्तिकस्यात्यन्तापायः। अविद्यानिमित्तश्च विभागो नाविद्यायां विद्यया समूलघातमपहतायां सावशेषो भवितुमर्हति। तथापि प्रविलयसामान्यात् सावशेषताशङ्कामतिमन्दामपनेतुमिदं सूत्रम्' (भामती, पृ. ९८१) इति।

विभागशब्दः शेषे न व्युत्पन्न इति सूत्रयोजना चायुक्तैव।

रामानुजोक्ताविभागाधिकरणनिरासः

यत्त्वत्र कैश्चित्, सेयं परमात्मनि सम्पत्तिः किं प्राकृतलयवत् कारणापत्तिरूपा उत 'वाङ् मनसि' (छा. ६.८.६) इत्यादिवदविभागरूपेति चिन्तायाम्, परमात्मनः सर्वेषां योनिभूतत्वात् कारणापत्तिरूपेति प्राप्त उच्यते। अविभागः अपृथग्भावः- पृथग्व्यवहारानर्हसंसर्ग इति यावत्। कुतः ? वचनात्। 'तेजः परस्यां देवतायाम्' (छा. ६.८.६) इत्यत्रापि 'वाङ्मनसि सम्पद्यते' (छा.उ. ६.८.६) इत्यतः सम्पद्यत इति वचनस्यानुषङ्गात् तस्य च संसर्गविशेषवाचित्वाद् अनुषक्तस्याभिधानवैरूप्ये प्रमाणाभावादित्याद्युक्तम्।

तदप्ययुक्तम्। फलपर्यवसानाभावेन व्यर्थचिन्तायाः पर्यवसानाभावात्। 'वाङ् मनसि सम्पद्यते' (छा.उ. ६.८.६) इत्यत्र सम्पत्तिशब्दस्य संश्लेषविशेषपरत्वेन पूर्वाधिकरणेष्वेव सिद्धत्वेन 'तेजः परस्यां देवतायाम्' (छा. ६.८.६) इत्यत्रानुषक्तस्य तस्य तदर्थत्वे सन्देहा-योगाच्च। नन्वत्र सम्पत्तिशब्दस्य कारणापत्तिरूपलये मुख्यत्वेन भवति सन्देह इति चेन्न। देवदत्ते गुणसम्पत्ति-रित्यादौ सम्बन्धमात्रे प्रयोगदर्शनात्। नहि तत्रापि देवदत्तरूपकारणापत्तिरेव गुणानां वक्तुं शक्यते। 'गुणी देवदत्तः' इत्यादिव्यवहारानुपपत्तेः। नहि घटे स्वकारणापन्ने घटवद्भूतलमिति व्यवह्रियते।

किञ्च 'वाङ् मनसि सम्पद्यते' (छा.उ. ६.८.६) इत्यादौ मुख्यार्थ-त्यागापत्तिरूपशङ्कापिशाची कुतो न समद्भूतेति वक्तव्यम्। ननु भारवाहकस्य देहिनः सभारस्येव यष्ट्यवष्टम्भेन विश्रमतुल्यः सुषुप्तौ मृतौ च विश्रमः। अपनीतभारस्य विश्रमतुल्यो महाप्रलये। तथा च वागादिकार्याणां मनआदि-रूपकारणापत्त्यात्मकमुख्यसम्पत्तिशब्दार्थेऽङ्गीक्रियमाणे मृतस्य पुनः शरीरान्तरप्राप्तौ प्राकृतप्रलयानन्तरमिव पुनर्भगवता तानि न सृज्येरन्। नहि

कारणस्वरूपमापन्नानां तत्त्वानां शरीरा-रम्भकत्वं युज्यत इति न तत्र शङ्कोदय इति चेद् इहापि तादृशतर्कावतारः कुतो न समजनिष्टेति स्वयमेव विभावय। अविभागः संयोग इति च सूत्रव्याख्यानमकुशलम्। वक्रोक्त्ययोगात्। वचनादित्यस्य सम्पत्तिशब्दानुषङ्गादिति व्याख्यानं च क्लिष्टम्।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- **देवादीनाममिति**॥ अत्र देवशब्दो जातिविशेषपरः। न पूर्ववत् सात्त्विकजीवराशिपरः। आदिशब्देन ऋष्यादयो मनुष्यान्ता गृह्यन्ते। अनेन पूर्वाधिकरणे देवशब्दः चेतनविशेषमात्रपर इति सूचयति- **मुक्ताविति**॥ प्रवेश इत्यर्थः। तस्यापि मुक्तिशब्दार्थत्वात्। तेनात्र पादसङ्गतिर्नास्तीति निरस्तम्। एवमग्रेऽपि भाष्यटीकयोः मुक्तिशब्दः प्रवेशपरो ध्येयः।

समानधर्मरूपपर्वपक्षन्यायविवरणम्

समानधर्म इत्युक्तन्यायमापादकोक्त्या भावप्राधान्येन विवृण्वत्,

'न च सत्यसङ्कल्पत्वादेरीश्वरसङ्कल्पाद्यनुसारित्वनियमे संसारिसमानधर्मत्वं मुक्तेरिति वाच्यम्।'

इति वाक्यं तर्कपरमिति मन्वानः तदनुग्राह्यप्रयोगोपन्यासपूर्वकं व्याचष्टे- **स्वतन्त्रा एवेत्यादिना**॥ यदि स्वातन्त्र्यं न स्यात् तर्हि मुक्तत्वं न स्यादिति तर्कोऽनेनाभिप्रेत इत्याह- **अस्वातन्त्र्य इति**॥ तेन संसारिसमानधर्मत्वं मुक्तेरित्येतद् व्याख्यातम्। भाष्योक्तं युक्त्यन्तरमाह- **एते देवा इति**॥ श्रुतेरर्थान्तरपरतां निषेधति- **नहीति**॥ अन्यथा संसारिष्वपि तदापत्तिरिति भावः। अनेन विमतः स्वतन्त्रः मुक्तत्वात्। न च मुक्तत्वेऽपि पारतन्त्र्यं किं न स्यादिति वाच्यम्। मुक्ते श्रुतानां सत्यसङ्कल्पत्वादीनाम् अनुपपत्तेः। न च श्रुतस्य सत्यसङ्कल्पत्वादेरीश्वरसङ्कल्पाद्यनुसारित्वनियमेनोपपत्तिः। तथा सति संसारिसमानधर्मत्वप्राप्तिः। 'एवमेनं मिथ्यासङ्कल्पवन्तं करिष्यामि' इतीश्वर-

सङ्कल्पादेवास्य मिथ्यासङ्कल्प इति संसारिसङ्कल्पस्यापीश्वरसङ्कल्पानुसारित्व-नियमात्।

यद्वा, सत्यसङ्कल्पत्वादेरिति हेतुवचनम्। स्वातन्त्र्यमङ्गीकार्यमिति शेषः। तत्र विपक्षे किं बाधकमित्यतः तर्कोऽभिधीयते- **तत्रेश्वरसङ्कल्पाद्यनुसारित्वनियम इति**॥ स्वातन्त्र्यरूपसाध्याभावस्याऽऽपादकस्योक्तिः। संसारिसमानधर्मत्वमिति च सत्यसङ्कल्पत्वादेरित्युक्तहेतोरभावस्य संसारसमानधर्मत्वरूपस्याऽऽपाद्यस्योक्तिरिति विवरणं व्याख्यातं भवति। अस्मिन् पक्षे मुक्तत्वादेवेति टीका पर्यवसितार्थपरा ज्ञातव्या।

कृतार्थतेति सिद्धान्तन्यायविवरणम्

कृतार्थतेत्युक्तन्यायं साध्यप्रदर्शनेन सप्रमाणकं विवृण्वत्,

'कृतार्थत्वेनैव विशेषोपपत्तेः।

''अपूर्णतादिभावो वा दुःखं वा नास्ति किञ्चन।
मुक्तस्य पारतन्त्र्येऽपि तारतम्येऽप्यतः सुखी॥'' इति श्रुतिः।'

इति वाक्यं तात्पर्यतो व्याचष्टे- **अदुःखित्वाद्युपपन्नमिति**॥ तेन कृतार्थत्वेन मुक्तत्वेनैवापूर्णताभावदुःखाभावादिविशेषोपपत्तेः संसारिसमानधर्मताभावः। ततश्च यत्र पारतन्त्र्यं तत्र संसारिसमानधर्मत्वमिति व्याप्तेरपूर्णतादिभावो वेत्यादिश्रुत्यैव मुक्तेः संसारसमानधर्मत्वाभावपारतन्त्र्ययोः समावेशप्रतिपादने व्यभिचारस्य स्फुटत्वाद् आपाद्यापादकयोः व्याप्तिविकलोऽयं तर्क आभास एवेति पूर्वपक्ष्युक्तो हेतुरप्रयोजक इति भाव इति विवरणं व्याख्येयमिति सूचयति। मुक्तस्य पारतन्त्र्ये तारतम्येऽपि च यतोऽपूर्णतादिभावो नास्ति, अतः सुखी मुक्त इत्युच्यते। ततो न मुक्तत्वव्याघातः।

॥ इति अविभागाधिकरणम्॥ ८॥

॥ अथ हृदयाग्रज्वलना(तदोकोऽ)धिकरणम् ॥ ९ ॥

सूत्रभाष्यम्

ॐ तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॐ ॥ ४.२.१७ ॥

उत्क्रान्तिकाले हृदयस्याग्रे ज्वलनं भवति। 'तस्य हैतस्य हृदयस्याग्रं प्रद्योतते' (बृ.उ.६.४.२) इति श्रुतेः। तत्प्रकाशितद्वारो निष्क्रामति। विद्यासामर्थ्यात्।

'यं यं वाऽपि स्मरन् भावं त्यजत्यन्ते कलवरम्।
तं तमेवैति कौन्तेय सदा तद्भावभावितः' ॥ (भ.गी.८.६)

इति स्मृतेर्विद्याशेषगत्यनुस्मरणयोगाच्च।

'आचार्यस्तु ते गतिं वक्ता' (छा.उ.४.१४.१) इति हि लिङ्गम्।

'हृदिस्थेनैव हरिणा तस्यैवानुग्रहेण तु।
उत्क्रान्तिर्ब्रह्मरन्ध्रेण तमेवोपासतो भवेत्॥' इति चाध्यात्मे।

'शतं चैका हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका।
तयोर्ध्वमायन्नमृतत्वमेति विष्वगन्या उत्क्रमणे भवन्ति॥'
(कठ.उ.२.६.१६) इति च॥ १७॥

तत्त्वप्रकाशिका

सङ्गतिः

अत्र देवानां मोक्षमुक्त्वा मनुष्याणां मुक्त्यर्थं देहोत्क्रमणस्याज्ञ-

मरणविलक्षणत्वसमर्थनादस्ति शास्त्रादिसङ्गतिः। अन्यथा ज्ञानस्यातिशयासिद्धेः साधनीयमेतत्। देवानामन्योन्यप्रवेशेन देहलयो भवतीत्युक्तं तेनेतरज्ञानिनां देहादुत्क्रमणं सिद्ध्यति। तज्ज्ञानिनां देहादुत्क्रमणं विषयः। किं पृथक्जनमरणवदेव भवत्युत वैलक्षण्येनेति सन्देहः। मरणत्वं ज्ञानिसम्बन्धित्वं च सन्देहबीजम्।

पूर्वपक्षः

पृथक्जनमरणवदेवेति पूर्वः पक्षः। तस्याप्यन्यमरणवत् प्रारब्धनिबन्धनत्वात्। न च तदा प्रारब्धाभावः। तस्य देहत्यागाद्यवसानत्वात्। न च सत्यपि प्रारब्धकर्मणि विलक्षणं ज्ञानिमरणं विशेषकारणाभावात्। अतो ज्ञानिमरणस्यान्यमरणाविशिष्टत्वान्न ज्ञानस्य सामर्थ्यातिशय इति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **तदिति** ॥ न ज्ञानिमरणस्याज्ञमरणाविशिष्टता। अस्त्येव विशेषः। यत उत्क्रान्तिकाले भगवदोकसो हृदयस्याग्रं प्रकाशत इत्यर्थः। तत्कुत इत्यत आह- **तस्येति** ॥ हृदयाग्रप्रकाशनेऽपि ज्ञान्युत्क्रमणस्यान्यमरणस्य को विशेष इत्यत आह- **तदिति** ॥ यतो ज्ञानी तेन प्रकाशेन प्रकाशितनाडीद्वारः सन् देहान्निष्क्रामति न तु तथाऽज्ञानी। अतोऽस्ति विशेष इति भावः। ननु ज्ञानिनः प्रारब्धकर्मवतः कथमयं विशेष इत्यत आह- **विद्येति** ॥ प्रारब्धकर्मसद्भावेऽपि भगवत्साक्षात्कारसामर्थ्याद् विशिष्टोत्क्रान्तिर्ज्ञानिनो युज्यते। ज्ञानस्य स्वोदयमारभ्यैव फलप्रदत्वादिति भावः। तदुक्तम्- 'प्रारब्धकर्मशेषस्तु विरजातरणावधिः। स्वोदयात् फलदं ज्ञानमादेहं कर्म वाऽऽरवेः॥' इति। यदि ज्ञानसामर्थ्यादेवमुत्क्रमणं भवति तर्हि ज्ञानिनः प्रथममरण एवैवं किं न स्यादित्यत आह- **यं यमिति** ॥ न केवलं ज्ञानसामर्थ्येनैवंविधोत्क्रमणं

येनाऽतिप्रसङ्गः। किं नाम स्वहृदयमारभ्य या ब्रह्मपर्यन्ता गतिस्तस्याः शरीरत्यागकालेऽनुस्मरणाच्च। न चैवं सति ज्ञानिनामुत्क्रमणं ज्ञानफलं न भवति। गत्यनुस्मरणस्य ज्ञानशेषत्वात्। न हीतिकर्तव्यतामपेक्षमाणो हेतुरहेतुर्भवति। गत्यनुस्मृतिश्च कर्मावसानसमय एव न मरणान्तरे। 'ज्ञानिनां कर्मयुक्तानां कायत्यागक्षणो यदा। विष्णुमाया तदा तेषां मनो बाह्यं करोति हि' इति स्मृतेः। गत्यनुस्मरणं तत्प्राप्तिकारणमित्येव कुतः। 'यं यं वापि' इति स्मृतेरेवेति भावः।

ननु तथाऽपि गत्यनुस्मरणं तत्प्राप्तिकारणमिति न विशेषप्रमाणमित्यत आह- **आचार्यस्त्विति** ॥ यदि गतिस्मरणमन्तरेणैव तत्प्राप्तिः स्यात् तर्ह्याचार्यस्तु ते गतिं वक्तेति स्मरणार्थं गतिश्रवणं व्यर्थं स्यात्। अतः स्मरणार्थं गतिश्रवणलिङ्गेनास्ति गतिस्मरणस्य तत्प्राप्त्यर्थत्वमिति ज्ञायत इति भावः। ननु किं ज्ञानसामर्थ्येन गत्यनुस्मरणयुक्तेन स्वतन्त्रेणैवमुत्क्रमणं भवति। नेति ब्रूमः। किं तर्हि ज्ञानादिना प्रसन्नस्य भगवतोऽनुग्रहेणैवेत्याह- **हृदीति** ॥ हरिणा सह प्रकाशितनाडीद्वारो निष्क्रामतीत्युक्तम्। तत्र नाड्यामपि विशेषोऽस्तीति भावेनाह- **शतमिति** ॥ विष्वगुत्क्रमणे लोकान्तरगमनार्थम्॥ १७॥

सूत्रभाष्यम्

ॐ रश्म्यनुसारी ॐ ॥ ४.२.१८ ॥

निष्क्रामति। 'सहस्रं वा आदित्यस्य रश्मय आसु नाडीष्वाततास्तत्र श्वेतः सुषुम्नो ब्रह्मयानः सुषुम्नायामाततस्तत्प्रकाशेनैष निर्गच्छति' इति पौत्रायण-श्रुतिः॥ १८॥

तत्त्वप्रकाशिका

ननु यदि प्रकाशितनीडीद्वारो निष्क्रामति तर्ह्यज्ञवन्नाड्यन्तस्तमसैव गमनं स्यात्। यद्यन्तरेऽप्यस्ति प्रकाशस्तर्हि द्वारपदवैयर्थ्यमित्याशङ्कां परिहरत् सूत्रं पठित्वा तच्छेषमेव पूरयति- **रश्मीति** ॥ न ज्ञानिनो नाड्यन्तस्तमसोत्क्रमणं येनाऽज्ञमरणसाम्यं स्यात्। नाड्यन्तराततसौररश्म्यनुसारेणोत्क्रमणात्। अत एव नाड्यन्तर्गतस्य प्रकाशान्तरत्वाद् द्वारपदावैयर्थ्यमिति भावः। तदुक्तम्- 'तदा विष्णोः स्वतेजसा। द्योतते हृदयाग्रं च तेन द्वारेण केशवः। निष्क्रामेज्जीवमादाय प्राण एनमनुव्रजेत्' इति। नाड्यन्तराततसौर-रश्म्यनुसारेणोत्क्रामतीत्येतत् कुत इत्यत आह- सहस्रमिति॥ १८॥

सूत्रभाष्यम्

ॐ निशि नेति चेन्न सम्बन्धात् ॐ ॥ ४.२.१९ ॥

रश्म्यभावान्निशि ज्ञानिन उत्क्रमणं न युक्तमिति चेन्न। सर्वदा सम्बन्धाद् रश्मीनाम्॥ १९॥

तत्त्वप्रकाशिका

उक्तमाक्षिप्य समादधत् सूत्रं पठित्वाऽऽक्षेपांशं तावद् व्याचष्टे- **निशीति** ॥ किं सर्वज्ञानिनां रश्म्यनुसारेणोत्क्रमणं किं वा केषाञ्चित्। आद्ये रात्रौ पर्यवसितकर्मणामपि ज्ञानिनामपेक्षितोत्क्रान्तिर्न स्यात्। रात्रौ रश्म्यभावात्। तथा च प्रतिबन्धककर्माभावेऽपि संसारानिवृत्तौ सदा निवृत्तिप्रसङ्गः। न द्वितीयः। केषाञ्चिज्ज्ञानिनामुत्क्रमणस्याविलक्षणत्वा-पातादिति भावः।

परिहारांशं व्याचष्टे- **नेति** ॥ सर्वज्ञानिनामप्यस्ति रश्म्यनुसारेणोत्क्रम-

णम्। न चोक्तदोषः। निशि बाह्यादित्याभावेऽप्यन्तस्थादित्यरश्मीनां सर्वदा नाडीसम्बन्धादिति भावः॥ ९॥

सूत्रभाष्यम्

कियत्कालम्?-

ॐ यावद्देहभावित्वाद् दर्शयति ॐ॥ ४.२.२०॥

यावद्देहो विद्यते तावद्रश्मिसम्बन्धोऽस्त्येव। 'संसृष्टा वा एते रश्मयश्च नाड्यश्च नैषां वियोगो यावदिदं शरीरमत एतैः पश्यत्येतैरुत्क्रामत्येतैः प्रवर्तते' इति माध्यन्दिनायनश्रुतिः॥ २०॥

तत्त्वप्रकाशिका

सर्वदेति पदस्य सामान्यवचनत्वात् पृच्छति- **कियदिति॥** नाडी-रश्मिसम्बन्धः सर्वदास्तीति कोऽर्थः। किं सदातनः किं वा देहपातपूर्वकालीनः उत यावद्देहभावी। नाऽद्यः। सदा नाडीनामभावात्। न द्वितीयः। कदाचिज्ज्ञानिनोऽपि तमसोत्क्रान्तिप्रसङ्गात्। नापि तृतीयः। तन्नियमे प्रमाणाभावादिति भावः। एतत्परिहाराय सूत्रमुपन्यस्य व्याचष्टे- **याव-दिति॥** नाडीरश्मिसम्बन्धस्य यावद्देहभावित्वाङ्गीकारात्। न पक्षान्तर-दोषः। न चात्राप्युक्तो दोष इति वाच्यम्। संसृष्टा इति श्रुतिसद्भावादिति भावः॥ २०॥

सूत्रभाष्यम्

ॐ अतश्चायनेऽपि हि दक्षिणे ॐ॥ ४.२.२१॥

'दक्षिणे मरणाद् यादि स्वर्गं ब्रह्मोत्तरायणे' इत्युक्तेऽपि ज्ञानिनो दक्षिणायनोत्क्रान्तिर्युज्यते।

'शतं पञ्चैव सूर्यस्य दक्षिणायनरश्मयः।
तावन्त एव निर्दिष्टा उत्तरायणरश्मयः॥
ते सर्वे देहसम्बद्धा सर्वदा सर्वदेहिनाम्।
महर्लोकादिगन्तार उत्तरायणरश्मिभिः।
निर्गच्छन्तीतरैश्चापि यैरेष्टव्येतरा गतिः॥
उत्तरं दक्षिणमिति त एव तु निगद्यते।
न तु कालविशेषोऽस्ति ज्ञानिनां नियमात् फलम्॥
ददाति कालेऽनुगुणे फलं किञ्चिद् विशिष्यते।
अत्युत्तमानां केषाञ्चिन्न विशेषोऽस्ति कालतः॥'

इति (हि) नारायणाध्यात्मे॥ २१॥

॥ इति हृदयाग्रज्वलना(तदोकोऽ)धिकरणम्॥ ९॥

तत्त्वप्रकाशिका

ननु व्यर्थोऽयं ज्ञानिनो रात्रावुत्क्रमणसम्भवप्रतिपादनायासः। 'दक्षिणे मरणात्' इति वचनान्मोक्षार्थं ज्ञानिनो दक्षिणायनोत्क्रान्त्ययोगात् तद्वद्रात्रावपि तदभावोपपत्तेरित्याशङ्कां परिहरत् सूत्रं पठित्वा व्याचष्टे- **अतश्चेति॥** न च स्मृतिबलेन ज्ञानिनो दक्षिणायनोत्क्रान्त्ययोगदृष्टान्तेन रात्रावपि तदभावो वाच्यः। 'दक्षिणे स्मरणात्' इति स्मृतिसद्भावेऽपि ज्ञानिनो दक्षिणायनोत्क्रान्तिसम्भवात्। कुतः? सौररश्मिसहस्रस्य नाडीसम्बन्ध-सद्भावादिति भावः। सूत्रार्थं स्मृत्या विशदयति- **शतमिति॥** शतं पञ्चेति पञ्चशतानीत्यर्थः। साक्षान्मोक्षस्य सुषुम्नैकगम्यत्वान्महर्लोकादीत्युक्तम्। तेषां चापुनरावृत्तिस्थानत्वेन ब्रह्मलोकत्वाद् ब्रह्मोत्तरायण इत्यनेनैकार्थता। महर्लोकादीत्यतद्गुणसंविज्ञानः। 'निगद्यते दक्षिणे मरणात्' इति स्मृतौ न तु

कालविशेषः अस्ति भवति। कुतोऽयमर्थो 'दक्षिणे मरणात्' इति स्मृतेरित्यत आह- **न त्विति ॥** उत्क्रमणायेति शेषः । कुतो नास्तीत्यत आह- **नियमादिति ॥** ज्ञानमिति शेषः। ज्ञानिनामुत्क्रान्तौ कालनियमाभावे कथं भीष्मादीनामुत्तरायणप्रतीक्षणमित्यत आह- **काल इति ॥** भीष्मादप्युत्तमानां सर्वकालस्याप्यतिशयकारणत्वान्न कालविशेषेणातिशयः । अतो ज्ञानिनामुत्क्रमणस्याज्ञमरणविलक्षणत्वादुक्तं ज्ञानमाहात्म्यं युक्तमिति सिद्धम् ॥ २१ ॥ अ.९ ॥

शेषतात्पर्यचन्द्रिका

ॐ तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॐ ॥ ४.२.१७ ॥

सङ्गत्यादि

ननु 'कामेन मे काम आगात्' (तै.आ. ३.१५.४) 'मुक्तानां सत्यकामत्वं सामर्थ्यं च परस्य तु कामानुकूलकामत्वम्' (ब्राह्मपु.) इत्यादिवचनात् मुक्तानामप्यस्वातन्त्र्यलक्षणोऽविभागो यदि स्यात् तर्हि 'प्रारब्धकर्मशेषस्तु विरजातरणावधिः' इत्यादिवचनात् । ज्ञानिनामपि देहत्यागकाले कर्मापि स्यात्। तथा चान्यमरणवद् ज्ञानिमरणमतिशयितं न स्यादिति ज्ञानपादानुपपत्तिरित्युत्थानात् सङ्गतिः।

यद्यपीदं ज्ञानपादे कर्तव्यम्। तथाप्युक्तरीत्याऽत्रापि सङ्गतमित्यदोषः। अत्र देहक्षयाख्यमोक्षं स्वोत्तमदेवताप्रवेशेन चरमनाडितो निर्गत्य चेति द्विधाऽभिप्रेत्य तत्राऽद्यमतीतयाऽष्टाधिकरण्या तत्र प्राप्तबाधकपरिहारेण साधकोक्त्या च समर्थ्य, देवानामन्योन्यप्रवेशोक्त्यैवेतरज्ञानिनां देहादुत्क्रान्तिः सिद्धैव न तु तत्र साधनीयं

किञ्चिदस्तीति मत्वा तदीयोत्क्रान्तावज्ञानिमृतिवैलक्षण्यं साध्यते। उत्क्रान्तिसम्बन्धिप्रमेयसाधनस्यापि सङ्गतत्वात्। यद्यप्यत्र ज्ञानिनां मनुष्याणां प्रथमनाड्योत्क्रान्तिः, ततोऽर्चिरादिमार्गेण महरादिलोकं गत्वा तत्र चतुर्मुखमपेक्षमाणानां द्विपरार्धावसाने प्रत्यासन्ने यमधर्मदेवे प्रवेशः। ततो यमादीनां यथायोगं स्वोत्तमदेवताशरीरे तदीयशरीरलयः । ततो लिङ्गभङ्ग इति हि क्रमः । न तु देवतालयानन्तरं मनुष्याणामुत्क्रान्तिः । मनुष्योत्तमानां ज्ञानिनां सर्वेषां यमे प्रवेशानुपपत्तेः। नहि स्वोत्तमदेवताप्रवेशानन्तरं यमोऽस्ति। ततोऽष्टाधिकरण्याः प्रागेवोत्क्रान्तिनिरूपणं सङ्गतम् । अत एव स्वोत्तमदेवताप्रवेशस्यार्चिरादिगत्यनन्तरभावित्वाद् गतिं भोगं चान्तरा प्रवेशो वक्तव्य इति द्वितीयतृतीयपादयोर्विनिमयः कर्तव्यः । तथापि 'तदोकोग्रज्वलनम्' इत्यत्र तच्छब्देन स्वोत्तमदेवतान्तरलयध्यानपूर्वकपरब्रह्मध्यानकालस्य परामर्शसौकर्याय क्रमोल्लङ्घनम्। देवतानामुत्तरोत्तरविलयध्यानपूर्वकं तद्विलयपर्यवसानस्थानस्य परब्रह्मणो ध्यानमुत्क्रमिष्यतः कर्तव्यमिति श्रुतिस्मृतिपर्यालोचनया गत्यनुस्मृतिवदवगमात्। ततो गतेः पश्चाद्भाविनोऽपि मोक्षस्य स्वबिम्बभूतदेवतापरम्पराप्रवेशाविनाभूतत्वात् तद्ध्यानाभ्यासः कार्यः । तदर्थं स्वरूपपरिज्ञानाय तल्लयपरीक्षा कृतेति तद्भावनाऽपि प्रकृता। सैव तच्छब्देन परामृश्यत इति युक्तम्। अत एवोत्क्रान्तिकाल इति भाष्य एव तच्छब्दव्याख्यानं दृश्यते। तेन तदोक इति व्यस्तं समस्तं च तन्त्रेणोपात्तम्। तदित्यव्ययं व्यस्तं सप्तम्यर्थमिति व्याख्यानं सूचितम् । तेन तदेति पदविभागे वृद्ध्या भवितव्यमिति चोद्यं परास्तम्।

ननु तर्ह्यर्चिरादिमार्गस्मरणस्याप्यावश्यकत्वात् तस्यापि तच्छब्देन परामर्शसौकर्यायैतत्पूर्वाधिकरणप्रमेयत्वसिद्धये पूर्वं निरूपणीयत्वापत्त्या उत्तरपादस्य तृतीयत्वानुपपत्तिरिति चेन्न । उक्तरीत्याऽऽक्षेपस्य प्रबलतया

तन्निरूपणप्रतिबन्धकापगमानन्तरमेव तस्य निरूपणीयत्वाद् युक्ता तस्य तृतीयता।

ततश्चेह निरूपणीयदेहक्षयैकदेशत्वेन प्रकृतं नरादिकुले जातानां केषाञ्चिद्देवानां मनुष्योत्तमानां ज्ञानिनां च देहादुत्क्रमणं विषयः। अतिशयितं भवति न वेति सन्देहः।

पूर्वपक्षः

देहादुत्क्रमणं नैव ज्ञानिनोऽज्ञाद् विशिष्यते।
कर्मबद्धत्वसाम्ये हि विशेषः किंनिबन्धनः॥

न च ज्ञानसामर्थ्येनासौ निर्वहणीयः। प्रारब्धस्य प्रतिबन्धकत्वाभावापातेन ज्ञानोदयानन्तरमेव लिङ्गभङ्गाद्यापत्तेः। कर्मणस्तत्र प्रतिबन्धकत्वे तदन्यत्रापि प्रतिबन्धकता किं न स्यात्। तदुत्पत्तिजन्मन्येव विशिष्टोत्क्रमणस्य प्राप्तेश्च। जडस्य स्वतः सामर्थ्याभावाच्च। नापि हृदयाग्रज्वलनेन विशेषः। तस्य तत्राप्रयोजकत्वात्। ननु ज्वलनं नाम न दाहः, किन्तु प्रकाशः। तथा च ज्ञानिनः प्रकाशेन निर्गमनम्। अन्यस्य त्वन्धकारेणैव। तथा च कथं न विशेषः। नहि प्रदीपिकामण्डलवृत्तिराजवन्निर्गच्छन्नेतरजनाद्विशिष्यत इति शक्यते वक्तुमिति चेत्, तत्किंहृदयनाड्या अग्रे प्रकाशो ज्ञानसामर्थ्येनोच्यते उत तदन्तरपि। नाऽद्यः। तदन्तःप्रकाशाभावेनान्धकारे गमनस्याविशिष्टत्वात्। 'एह्येहीति तमाहुतयः सुवर्चसः सूर्यस्य रश्मिभिर्यजमानं वहन्ति' (मुं.उ. १.२.६) इत्यादिना किञ्चिद्वैभवस्येतरत्रापि श्रवणात्। न द्वितीयः। 'हृदयस्याग्रं प्रद्योतते' (बृ.उ. ६.४.२) इत्यग्रस्यैव प्रद्योतश्रुतेः।

न च ब्रह्मनाडीं व्याप्य आब्रह्मरन्ध्रं सूर्यरश्मयः तदन्तः प्रकाशयन्तीति वाच्यम्। प्रमाणाभावात्। सूर्यरश्मीनां बाह्यावस्थानेनान्तरवस्थानायोगाच्च।

योगे वा निशि मृतानां ज्ञानिनामन्धकारे गमनस्यावर्जनीयत्वाच्च। उत्क्रमणात्पूर्वमेव कदाचित्तेषां नाशसम्भवाच्च।

न च ज्ञानिनो दक्षिणायनमरणवद् रात्रावपि मरणं नास्तीति वाच्यम्। दृष्टान्तस्यैवासिद्धेः। न ह्यनादौ संसारे कस्यापि ज्ञानिनः दक्षिणायने कर्म पर्यवसितिर्नास्तीति शक्यते वक्तुम्। 'दक्षिणे मरणाद्याति स्वर्गं ब्रह्मोत्तरायणे' (स्मृतिः सू.भा. ४.२.२१) इत्यादौ श्रुतस्य दक्षिणायनादिशब्दस्य पञ्चशतसङ्ख्याकसूर्यरश्मिराशिद्वयपरत्वस्य 'शतं पञ्चैव सूर्यस्य' (नारायणाध्यत्मम् सू.भा. ४.२.२१) इत्यादिवचनसिद्धत्वादिति पूर्वपक्षः।

सिद्धान्तः

सिद्धान्तस्तु, सत्यं प्रारब्धकर्मनिबन्धत्वाविशेषो ज्ञान्यज्ञानिमरणयोः। तथापि

'ज्ञानिनो हृदयाग्रस्य ज्वलनं विदुषो भवेत्।
तस्य हैतस्य हृदयस्याग्रमित्यादिवाक्यतः॥'

न चेदमप्रयोजकम्। तेन प्रकाशेन नाडीमुखप्रकाशे सति हृदयान्निर्गमनस्येतरवैषम्यसम्पादकत्वात्। न च प्रारब्धकर्मणि सतीदमेव वैषम्यं न युक्तमिति वाच्यम्। विद्याया जडत्वेऽपि तत्प्रसन्नेश्वरानुग्रहेणोपपत्तेः।

एतेन तत्कालभाविना गत्यनुस्मरणेन चेदं वैषम्यं युक्तम्। 'यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेबरम्' (भ.गी. ८.६) इत्युक्तेः ज्ञानिनोऽपि प्रथमादिशरीरत्यागकाले भगवन्मायया मनोविक्षेपेण विद्यागत्यनुस्मृत्यादेरेवायोगात्। स्मर्यते च-

'ज्ञानिनां कर्मयुक्तानां कायत्यागक्षणो यदा।
विष्णुमाया तदा तेषां मनो बाह्यं करोति हि॥' इति।

यद्यपि प्रारब्धकर्मणो ज्ञानोत्पत्तिक्षणमारभ्य [1]विरजातरणक्षणपर्यन्तं स्वरूपतोऽवस्थानमस्ति । तथापि न सर्वदा सवीर्यत्वं यथा यथा भोगस्तथा तथा निर्वीर्यत्वात् । दृष्टं चैतत् वृश्चिकदंशनक्षणमारभ्यानुवर्तमानस्य वेदनाविशेषस्य मणिमन्त्रौषधादिना निर्वीर्यत्वकरणम् । तथा च चरमशरीरत्यागकाले भोगेन कर्मणो निर्वीर्यत्वसम्पादनेन गत्यनुस्मरणादिप्रतिबन्धाभावः । स्वरूपमात्र-स्यावस्थानाच्च लिङ्गशरीरानुवृत्तिरित्याद्युपपद्यते । सौररश्मीनां बाह्यत्वेऽप्यन्तः सूर्यस्य सद्भावेन तद्रश्मीनामपि सम्भवः । ते च सहस्रसङ्ख्याताः हृदय-सम्बन्ध्येकाधिकशतनाडीष्वप्याततोः । तेषु च श्वेतवर्णः सुषुम्नो नाम ब्रह्मयानो रश्मिः सुषुम्नाख्यायां शताधिकायां नाड्यामाततः । इतरे च रश्मयः पञ्चशतिकाः दक्षिणायनसञ्ज्ञकाः हृदयस्थपञ्चशतनाडीष्वाततोः । इतरे तु पञ्चशतिका रश्मय उत्तरायणसञ्ज्ञिकाः हृदयस्थपञ्चशतनाडीष्वाततोः । एवमुभयेऽपि रश्मयो दक्षिणायनकाले, उत्तरायणकाले, रात्रौ दिवा च सर्वदेहसम्बद्धा एव । तथा च दक्षिणायनकालेऽपि सर्वदा प्रतिशरीरमुत्तरायणरश्मीनां सत्त्वेन दक्षिणायनकाले मृतानामपि सत्त्वेन तद्वदेव रात्रावेव मृतानां रश्मिभिर्गमनं न विरुद्धमिति सर्वमनवद्यम् ।

कृतशेषतेति पूर्वपक्षन्यायविवरणम्

टीकाक्षरार्थस्तु, कृतशेषता चेत्युक्तन्यायं कृतस्य कर्मणः शेषा यस्मिन्निति विग्रहमभिप्रेत्य सम्बन्धिसाध्यप्रदर्शनेन विवृण्वत्,

'न च प्रारब्धकर्मशेषवत्त्वादुत्क्रान्तौ [illegible] ।'

इति वाक्यं व्याचष्टे- **पृथग्जनमरणवदेवेति पूर्वः पक्ष इति ॥** ज्ञानि[illegible] पृथक्-कृतो मूर्खः पृथग्जनशब्देनोच्यते । अनेनोत्क्रान्तावविशेषो ज्ञानिन इत्यंशो व्याख्यातः । तस्याप्यन्यमरणवदित्यनेन प्रारब्धकर्मत्वादित्यंशस्य तात्पर्य-

१. विरजातरणपर्यन्तम्- प.

मुक्तम् । 'प्रारब्धकर्मशेषस्तु विरजातरणावधिः' (त.प्र.उ.प्रमाणम् ४.२.१७) इति सिद्धां विवरणनिरसनीयां शङ्कां चोद्यपूर्वं निरस्यति- **न च तदेत्यादिना ॥** देहत्यागादीत्यादिशब्देन विरजातरणं गृह्यते । 'स्वोदयात् फलदम्' इत्युत्तरार्धोदा-हरणनिरसनीयशङ्कां चोद्यपूर्वं प्रतिक्षिपति- **न च सत्यपीति ॥**

शश्वदनुप्रवृत्तिरूपसिद्धान्तन्यायविवरणम्

शश्वदनुप्रवृत्तिरित्युक्तन्यायं सम्बन्धिप्रदर्शनेन विवृण्वत्,

'ज्ञानोदयानन्तरं सर्वदा ज्ञानफलस्यानुवृत्तेः ।

''प्रारब्धकर्मशेषस्तु विरजातरणावधिः ।
स्वोदयात्फलदं ज्ञानमादेहं कर्म वाऽऽरवेः ॥
तथापि प्रकृतेर्बन्धो ब्रह्मणा सह भिद्यते ॥'' इति हि श्रुतिः ।

''शरीरे पाप्मनो हित्वा सर्वान् कामान् समश्नुते'' (तै.उ. २.५), ''स तेजसि सूर्ये सम्पन्नो यथा पादोदरस्त्वचा विनिर्मुच्यत एवं हैव स पाप्मना विनिर्मुक्तः'' (प्रश्न. ५.५), ''स प्राप्नोति विरजां नदीम् । तत्सुकृतदुष्कृते विधूनुते'', ''ते ब्रह्मलोके तु परान्तकाले परानृतात् परिमुच्यन्ति सर्वे'' इति च । ''अन्यथाभावनियमोऽनृतता कार्यकारणे'' इति च ।'

इति वाक्यं सूत्रोक्तविद्यासामर्थ्योपपादकतया व्याचष्टे- **ज्ञानस्य स्वोदय-मारभ्येत्यादिना ॥**

विवरणार्थः

अयमत्र विवरणयोजनाप्रकारः । ज्ञानोदयक्षणमारभ्य सर्वथा ज्ञानफला-सम्भोक्तृत्वस्य ज्ञानिनि क्लृप्ततया प्रारब्धकर्मशेषवत्त्वेऽपि उत्क्रान्तौ नाविशेषो मन्तव्यः । नन्विदमयुक्तम् । प्रारब्धकर्मणः प्रतिबन्धकत्वाभावापत्तेः । न च ज्ञानस्य स्वोदयात् फलदत्वरूपसामर्थ्यावगमान्न प्रारब्धकर्मणस्तत्र

प्रतिबन्धकतेति वाच्यम्। तथाविधसामर्थ्यसद्भावे प्रमाणाभावात्। प्रथमजन्मन्येव विशिष्टोत्क्रान्त्याद्यापत्तेश्चेत्यतो व्यवस्थापिकां श्रुतिं पठति- **प्रारब्धकर्मशेषस्त्विति ॥** यद्यपि विरजातरणावधिः प्रारब्धकर्मशेषश्चरमशरीरोत्क्रान्तिकाले ज्ञानिनोऽप्यस्ति। तथापि नासौ ज्ञानिनः तत्फलं कर्मक्षयविशिष्टोत्क्रमणादि निरुणद्धि। यतो ज्ञानं स्वोदयमारभ्यैव फलदस्वभावं निरवधिकफलदं च। न हि प्रबलस्य दुर्बलं प्रतिबन्धकं भवति। न च कर्मणोऽप्येवंविधं स्वभावद्वयमस्ति चेत् कथं दौर्बल्यं सिद्ध्यतीत्यतो नेत्याह- **आदेहमिति ॥** कर्म तु नैवम्। स्वोदयानन्तरं तदनन्तरजन्मन्येव फलदम्। 'अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते' इति त्वपवादः। तथा आरवेः रविमण्डलपर्यन्तं सूर्यान्तर्गतभगवत्सम्पत्तिपर्यन्तमिति यावत्। आदेहं वा देहत्यागपर्यन्तं वा फलदम्। न तु सूर्यप्रवेशान्तरं लिङ्गभङ्गानन्तरं वा फलदम्। येन ज्ञानात् कर्मणो दौर्बल्यं न स्यात्।

ननु तर्हि कर्मणः प्रतिबन्धकत्वाभावादेव प्रथमजन्मन्यपि लिङ्गभङ्गः कुतो न स्यात्? तत्राह- **तथापीति ॥** यद्यप्युक्तरीत्या कर्मणः प्रतिबन्धकताशक्तिर्नास्ति। तथापि प्रकृतेर्बन्धश्चतुर्मुखेन सहैव भिद्यते। न तु स्वोदयजन्मन्येव। लिङ्गभङ्गपर्यन्तं कर्मशेषस्यानुवृत्तेः। अत एव न कर्मक्षयादिफलाभावः। कर्मशेषस्य फलसामान्यप्रतिबन्धकत्वाभावात्। सवीर्यत्वनिर्वीर्यत्वाभ्यां मणिमन्त्रादावपि कार्यतारतम्यस्य प्रसिद्धत्वात्। तदिदमुक्तं शेषहिशब्दाभ्याम्। नन्वेवं यदा यत्कार्यप्रतिबन्धकशक्त्यपगमः तत्कार्यमेव भवति नान्यत्। तथा च कर्मक्षयाद्युत्पत्तिप्रतिबन्धकशक्त्यपगमेन तन्मात्रोत्पत्तावपि विशिष्टोत्क्रान्त्याद्युत्पत्तिप्रतिबन्धकशक्त्यनपगमान्न तत्कार्योत्पत्तिरित्यादि बहु कल्पनीयमित्यत आह- **इति श्रुतिरिति ॥** न हि श्रुतेरतिभारोऽस्तीति भावः।

स्यादेवं यदि ज्ञानकर्मणोरुक्तवैषम्यं स्यात्। न चैवम्। 'आदेहं कर्म वाऽऽरवेः' इति वचनस्यार्थान्तरपरत्वोपपत्तेरित्याशङ्क्य कर्मणो देहत्यागादिपर्यन्तमेव फल-

दातृत्वमित्यस्मिन्नर्थे तावत् समाख्याप्रमाणोदाहरणेन तस्य तात्पर्यं द्रढयति- **शरीरे पाप्मन इति ॥** निमित्तसप्तमी। शरीरनिमित्तकर्माणि शरीरनिमित्तपाप्मनः प्रारब्धकर्माणि हित्वैव सर्वभोगान् प्राप्नोतीत्यर्थः। सर्वभोगप्राप्तिपर्यन्तमेव कर्मणोऽवस्थानमित्यर्थात् सिद्ध्यतीति भावः। आरवेर्वा कर्मणः फलदत्वम् अनन्तरं नास्तीत्यत्र समाख्यामाह- **स तेजसीति ॥** सः वक्ष्यमाण एव तेजोरूपे सूर्यमण्डलस्थे भगवति सम्पन्नो भवति। यथा सर्पः पादोदरः त्वचा विनिर्मुच्यते। एवं पाप्मना विनिर्मुक्तोऽयं प्रसिद्धः पुरुषः स इति योजना।

अत्र कर्मविमोकानन्तरं सूर्यप्राप्त्युक्तेः आरवेः कर्म फलदमित्यवगम्यते। आरवेरित्युपलक्षणं विरजानदीतरणस्येति भावेन प्रमाणं पठति- **स प्राप्नोतीति ॥** यदा सुकृतदुष्कृते विधूनुते तदा विरजानदीं प्राप्नोतीत्युक्त्या विरजाप्राप्तिपर्यन्तं प्रारब्धकर्मणोऽवस्थानमवगम्यते। 'तथापि प्रकृतेर्बन्धः' इत्युक्तार्थे समाख्यां पठति- **ते ब्रह्मेति ॥** परानृतात् प्रकृतिबन्धादित्यर्थः। परान्तकाल इत्यनेनैव ब्रह्मणा सहेति लभ्यते। ननु अनृतशब्दो मिथ्यापर्यायः। परशब्दश्च व्यर्थ इत्यतः परानृतशब्दं प्रमाणेन व्याचष्टे- **अन्यथेति ॥** अन्यथाभावनियमः परिणाम एवानृतत्वम्। न तु मिथ्यात्वम्। अनृतत्वाश्रयव्यक्तिद्वयं परशब्दावैयर्थ्याय निर्दिशति- **कार्यकारणे इति ॥** कार्यं महदादि। कारणं प्रकृतिः। यतः कार्यकारणे अनृतशब्देनोच्येते। अतः परशब्दः सार्थकः। यतः कार्यानृतान्मुक्तिः सुषुप्त्यादावप्यस्तीति भावः। केचित्तु कार्यकारण इतीत्ययादेशेन पाठमङ्गीकृत्य समाहारद्वन्द्वेन सप्तम्यन्तं पदमित्याहुः।

ननु स्वर्गादिगतिः यैः प्राप्तव्याऽस्ति ते दक्षिणायनरश्मिभिः निर्गच्छन्तीत्यनेन दक्षिणे मरणाद्याति स्वर्गमित्यंशो व्याख्यातो यद्यपि। तथापि ब्रह्मगन्तार उत्तरायणरश्मिभिरिति व्याख्यातव्ये महर्लोकादीत्यन्यथोक्तिः कुत इत्यत आह- **साक्षान्मोक्षस्येति ॥** ब्रह्मप्रवेशस्येत्यर्थ इत्येके। वैकुण्ठप्राप्तेरित्यपरे।

लिङ्गभङ्गस्येत्यन्ये । तर्हि कथमनयोः व्याख्यानव्याख्येयभावः विसंवाददर्शनादित्यतः व्याख्येयगतं ब्रह्मशब्दार्थमाह- **तेषां चेति** ॥ तथा च ब्रह्मशब्दः ब्रह्मलोकपरः । सर्वस्यापि ब्रह्मलोकत्वेऽप्यपुनरावृत्तिस्थानत्वविशेषेण महरादय एव लक्ष्यन्त इति भावः । आजनात्र जनिरिति श्रवणादाह महर्लोकादीत्युक्तम् ॥

॥ इति हृदयाग्रज्वलना(तदोको)ऽधिकरणम् ॥ ९ ॥

॥ अथ प्रतिस्मरणाधिकरणम् (योग्यधिकरणम्.पा.) ॥ १० ॥

सूत्रभाष्यम्

ॐ योगिनः प्रति स्मर्यते स्मार्ते चैते ॐ ॥ ४.२.२२ ॥

न केवलं कालादिकृते ब्रह्मचन्द्रगती स्मर्येते । किन्तु ज्ञानयोगिनः कर्मयोगिनश्च ।

'अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥
धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥' (भ.गी.८.२४-२५)

इत्यत्र योगीति विशेषणात् स्मरणनिमित्ते चैते गती ।

'गत्यनुस्मरणाद् ब्रह्म चन्द्रं वा गच्छति ध्रुवम् ।
अननुस्मरतः काले स्मरणं प्राप्य वै गतिः ॥' इत्यध्यात्मे ॥ २२ ॥

॥ इति प्रतिस्मरणाधिकरणम् (योग्यधिकरणम्.पा.) ॥ १० ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रभाष्ये चतुर्थाध्यायस्य द्वितीयः पादः ॥ ४ ॥ २ ॥

तत्त्वप्रकाशिका

सङ्गतिः

अत्र ब्रह्मप्राप्तौ गत्यनुस्मरणादेरावश्यकत्वसमर्थनादस्ति शास्त्रादिसङ्गतिः । अन्यथा ज्ञानस्य मोक्षहेतुत्वाभावप्रसङ्गात् समर्थनीयमेतत् । प्रकृता

गतिरेव विषयः। किं विद्यागतिस्मृतिसापेक्षा न वेति सन्देहः। पूर्वोक्तिः स्फुटप्रमाणादर्शनं च सन्देहबीजम्।

पूर्वपक्षः

न गत्यर्थं विद्यानुस्मृती अपेक्षिते इति पूर्वः पक्षः। 'अग्निर्ज्योतिः' इत्यादौ केवलकालाद्यधीनत्वस्मरणात्। न ह्यनयोः श्लोकयोर्ब्रह्मचन्द्रगत्योः प्राप्तौ तत्तत्कालादिमरणं विनाऽन्यत्कारणमुच्यते। लोके फलानुस्मृतिमन्तरेणैव फलप्राप्तिदर्शनाच्च। न हि लोकाननुसार्यङ्गीकर्तुं शक्यते। नच स्मृतिविरोधः। तस्या लोकाननुसारित्वेनार्थन्तरे योज्यत्वात्। लिङ्गस्यापि ज्ञानमात्रार्थत्वोपपत्तेः। अतो गतेः कालादिकृतत्वान्न ज्ञानस्य सम्पूर्णमोक्षार्थतेति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **योगिन इति॥** यदुक्तमग्निर्ज्योतिरित्यादिना ब्रह्मचन्द्रगती केवलकालादिकृते स्मर्येते अतो न गत्यर्थं विद्यानुस्मृती अपेक्षिते इति तन्न युक्तम्। यतोऽत्र विद्यादिकृते एव स्मर्येते न तु कालादिकृते इति भावः। कुत एतदित्यत आह- **अग्निरिति॥** उपलक्षणमेतत् ब्रह्मविद इति च ज्ञातव्यम्। कालमरणमत्र न विवक्षितमिति सविस्तरमन्यत्रोक्तत्वादत्र नोक्तम्।

अस्तु विद्यापेक्षा गतौ तदनुस्मृतिर्मास्त्वित्यत आह- **स्मरणेति॥** कुत इत्यत आह- **गतीति॥** न (एव) च लोकाननुसारिता। यथा खलु छेदनादौ न कर्षणाद्यावृत्तिरपि तु परशोरुद्यम्योद्यम्य दारुणि निपातावृत्तिः। कृष्यादौ तु नासौ किं तु कर्षणाद्यावृत्तिरेव। न तावता लोकाननुसारिता। अवान्तरविशेषाणां वैलक्षण्येऽप्यनुवृत्तिमात्रस्योभयत्र साम्यात्। तथा प्रकृतेऽप्यवधीरितमनोवृत्तित्वविशेषस्यानुवृत्तिमात्रस्य लौकिकवैदिक-

साधनयोः साम्यात्। अतो विशिष्टोत्क्रमणस्य विद्यादिसापेक्षत्वाद्युक्तं ज्ञानस्य सम्पूर्णमोक्षसाधनत्वमिति सिद्धम्॥ २२॥ अ. १०॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादविरचिते श्रीमद्ब्रह्मसूत्रभाष्यस्य टीकायां श्रीमज्जयतीर्थमुनिविरचितायां तत्वप्रकाशिकायां चतुर्थाध्यायस्य द्वितीयः पादः॥

शेषतात्पर्यचन्द्रिका

॥ ॐ योगिनः प्रति स्मर्येते स्मार्ते चैते ॐ॥ ४.२.२२॥

सङ्गत्यादि

अत्र पूर्वाधिकरणे ज्ञानिनां मनुष्याणां विशिष्टोत्क्रान्तिरूपफलसमर्थनेनार्चिरादिब्रह्मपर्यन्तगतिरूपफलमप्यर्थात् साधितम्। तदेवं स्वहृदयमारभ्य ब्रह्मपर्यन्तगतिरूपं फलं विद्यास्वविषयकस्मरणाभ्यां साध्यं न वेति चिन्त्यते। ननु विद्यासामर्थ्यात् गत्यनुस्मरणयोगाच्च इत्यनेन सूत्रकृता 'आचार्यस्तु ते गतिं वक्ता' (छा.उ. ४.१४.१) इति हि लिङ्गमिति भाष्यकृता विद्यागत्यनुस्मृतिसाध्यत्वमुक्तम्। सत्यम्, तथापि न समर्थितम्। अत एव 'यं यं वापि स्मरन्' (भ.गी. ८.६) इति स्मृतेर्लिङ्गस्य च सावकाशत्वमत्रत्यपूर्वपक्षटीकायामुच्यते। नहि सावकाशेन प्रमाणेन किञ्चित् प्रमेयं समर्थितं भवति। अत एव विवरणकृदपि लोकाननुसारित्वमभ्यधिकाशङ्काबीजमाह। किञ्च आवश्यकत्वसमर्थनमत्र क्रियते। पूर्वत्र स्मृतिलिङ्गादिना कारणत्वमात्रं समर्थितम्। न हि कारणत्वसमर्थनमेवाऽवश्यकत्वसमर्थनम्। कारीर्यादिः कारणत्वेऽप्यावश्यकत्वादर्शनात्। ननु तथापि विद्याया आवश्यकत्वं 'विद्यैव तु निर्धारणात्' (ब्र.सू. ३.३.४८) इत्यादौ समर्थितमेव। मैवम्। गत्यनुस्मृतिसहितायाः तदसाधनात्। विशेषयुक्तिभिः दृढीकरणाच्च।

सङ्गतिस्तु, स्यादेतदेवम्। हृदयाग्रप्रज्वलनादिविशिष्टोत्क्रान्तिः ज्ञानिनः न त्वज्ञानिन इत्यादि, यदि विद्यासामर्थ्यगत्यनुस्मरणयोरावश्यकता स्यात्। न चैवम्। तयोरावश्यकत्वे प्रमाणाभावात्। 'यं यं वापि स्मरन् भावम्' (भ.गी. ८.६) इत्यादिस्मृतेः 'आचार्यस्तु ते गतिं वक्ता' (छा.उ. ४.१४.१) इत्यादिलिङ्गदर्शनस्य लोकाननुसारित्वेन स्वार्थे तात्पर्याभावात्। न हि कृष्यादौ फलानुस्मरणमावश्यकं दृश्यते। किञ्च चन्द्रगत्यादिरूपकर्मफलं न स्वहृदयमारभ्य चन्द्र-पर्यन्तगतिस्मरणमपेक्षते। 'तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते' (भ.गी. ८.२५) इति धूमरात्र्यादिमात्रसाध्यत्वावगमात्। 'धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्' (भ.गी. ८.२५) इति पूर्ववाक्ये श्रवणात्। तथा च ब्रह्मचन्द्रमार्गत्वेन प्रसिद्धे मार्गद्वये वैरूप्यायोगेन लोकानुसाराय च नान्यापेक्षेति शङ्कनात् प्रत्येतव्या।

पूर्वपक्षः सिद्धान्तश्च

'कर्मधूमादिमार्गेण चन्द्रप्राप्तेः श्रुतत्वतः।
अवैरूप्याय च गतिस्मरणं नोपयुज्यते॥'

इति पूर्वः पक्षः।

सिद्धान्तस्तु,

ज्ञानयोगः कर्मयोगो ब्रह्मचन्द्रगती प्रति।
हेतुत्वेनोच्यते योगी प्राप्येति हि विशेषणात्॥
गत्यनुस्मरणाद् ब्रह्म चन्द्रं वा गच्छति ध्रुवम्।
अननुस्मरतः काले स्मरणं प्राप्य वै गतिः॥
इत्यादिवाक्यतो हेतुगत्यनुस्मरणं परम्।
लौकिक्यां तु क्रियायां स्याल्लवनाद्यनुवर्तनम्॥

वैदिके साधने तु स्यात् फलस्मृत्यनुवर्तनम्।
इत्येतत्प्रमितं तेन कथं लोकविरूपता॥ इति।

परोक्तस्य तदोकोऽधिकरणस्य परीक्षा

अन्ये तु 'समाप्ता प्रासङ्गिकी परविद्यागता चिन्ता। सम्प्रत्यपरविद्याविषयामेव चिन्तामनुवर्तयति तदोकोग्रज्वलनमित्यनन्तरसूत्रेण। 'तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति। चक्षुषो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यः' (बृ. ४.४.२) इत्युपसंहृतवागादिकलापस्योच्चिक्रमिषोर्जीवस्य चक्षुरादिस्थानापादानोत्क्रान्तिः किमनियमेनैव विद्वदविदुषोर्भवत्यथास्ति कश्चिद्विदुषो विशेषनियम इति विचिकित्सायां श्रुत्यविशेषादनियम इति प्राप्ता-वाचष्टे। मूर्धस्थानादेव विद्वान्निष्क्रामति। इतरे तु चक्षुरादिभ्यः विद्या-सामर्थ्यात्। उत्कृष्टलोकप्रापकत्वं हि विद्यायाः सामर्थ्यम्। तत्र यदि तद्वानपि यतःकुतश्चिद्देहदेशादुत्क्रमेत् नैवोत्कृष्टं लोकं लभेत। तदा अनर्थिकैव सा स्यात्। तच्छेषगत्यनुस्मृतियोगाच्च। विद्याशेषभूता मूर्धन्यनाडीसम्बद्धा गतिरनुशील-यितव्या विहिता तामभ्यस्यंस्तयैव प्रतिष्ठत इति युक्तम्। तस्माद्धार्देन हृदयेषूपासितब्रह्मणाऽनुगृहीतः तद्भावं समापन्नो विद्वान् मूर्धन्ययैव शताधिकयैकशततम्या नाड्या निष्क्रामति। 'शतं चैका च हृदयस्य नाड्यः' (छा.उ. ८.६.६) इत्यादिश्रुतेरिति।

नैतद्युक्तम्। 'प्रतिषेधादिति चेन्न शारीरात्' (ब्र.सू. ४.२.६) इत्यारभ्य 'अविभागो वचनात्' (ब्र.सू. ४.२.८) इत्यन्तैस्त्रिभिरधिकरणैः परविद्यावतः प्रकृतत्वेऽपि तं विहायापरविद्यावतश्चिन्तने कारणाभावात्। फलाध्याय-सङ्गत्यभावाच्च। 'न तस्य प्राणा उत्क्रामन्ति' इत्यादेः विदुष उत्क्रान्तिनिषेध-स्याधिकारिभेदेनोपपत्तेरित्युक्तत्वात्।

यत्तूक्तं प्रतिषेधादित्याद्यधिकरणत्रये प्रसङ्गात्परविद्यावांश्चिन्तितः। 'अमृतत्वं

चानुपोष्य' इत्युक्त्याऽऽत्यन्तिकेऽमृतत्वे गत्युत्क्रान्त्योरभावः प्रतीतः। तत एव तद्वानपि। अत एवात्र भाष्यम्। समाप्ता प्रासङ्गिकी परविद्यागता कथेति। तत्कथं सङ्गत्यभाव इति। तदेतद् वोढारं विना वैवाहिकयात्रान्यायमनुसरति। न हि परविद्यावतः प्रासङ्गिकत्वे पादार्थः कश्चिल्लभ्यते। अपरविद्यावतो मुमुक्षुशास्त्रे प्रसक्त्यभावात्। अन्यथा कर्मिणस्तत्कृतोत्क्रान्तिपितृयाणादेरपि प्रतिपाद्यता स्यात्। न च कर्मिणो देशकालद्रव्यदेवतर्त्विगादिभेदवासनादूषितत्वेन परविद्यावतो विरोधित्वेन बहिरङ्गत्वान्मुमुक्षुशास्त्रे न प्रसक्तिः। अपरविद्यावतस्तु विद्यावत्त्वादेवान्तरङ्गत्वात्प्रसक्तिरिति युक्तम्। तस्याप्युपास्त्युपयुक्तदेश-कालाधिष्ठानाधिष्ठेयतद्गतानेकभेदभिन्नप्रपञ्चनिरूप्यसार्वज्ञ्यादिगुणदोष-प्राप्यप्राप्तृभोग्यभोक्त्रादिभेदवासनादार्ढ्येन सुतरां बहिरङ्गत्वात्।

यच्च तदोकोग्रज्वलनं तत्प्रकाशितद्वारत्वं च विद्वदविदुषोः साधारणम्। शताधिकया मूर्धन्यनाड्या निष्क्रमणं विदुषो विशेष इति सूत्रव्याख्यानम्, तच्च सूत्रे यद्यपीत्यादिवाक्यभेदज्ञापकाभावाद् विशेषमात्रस्याऽऽकाङ्क्षितस्यैव वक्तव्यत्वेन तदितरवैय्यर्थ्यापातात्। हृदयाग्रप्रज्वलनप्रकाशितनाडीद्वारत्वादेः, 'सहस्रं वा आदित्यरश्मयः आसु नाडीष्वातताः तत्र श्वेतः सुषुम्नो ब्रह्मयानः सुषुम्नायामाततः। तत्प्रकाशेनैष निर्गच्छति' (पौत्रायणश्रुतिः सू.भा. ४.३.१८) इत्यादिश्रुतिविरोधाच्चायुक्तः।

यच्च यदि विद्वानपीतरवद् यतः कुतश्चिद्देहदेशान्निष्क्रामेत्, तर्हि विद्यानर्थक्य-मित्युक्तम्। तन्न। हृदयाग्रप्रज्वलनादेः साम्येऽपि तदापातात्। 'महर्लोकादिगन्तार उत्तरायणरश्मिभिः। निर्गच्छन्तीतरैश्चापि यैरेष्टव्येतरा गतिः' (नारायणाध्यात्मम् सू.भा. ४.२.२१) इति चक्षुरादिदेशादुत्क्रमणस्य ज्ञानिष्विवाधिकारि-विशेषाङ्गीकारेण तदपि ज्ञानसामर्थ्यायत्तमेवेति वक्तव्यत्वाच्च।

हार्दानुगृहीतः तद्भावं समापन्न इति च न समीक्षिताभिधानम्। त्वन्मतेऽ-प्यपरविद्यावतो महरादिलोकप्राप्तिरेव। ब्रह्मभावापत्तिस्तु परविद्ययैवेत्यङ्गी-कारात्। 'शतं चैका च हृदयस्य नाड्यः' (छा.उ. ८.६.६) इत्यत्रोक्तस्या-मृतत्वस्य त्वन्मते मुख्यामृतत्वरूपत्वाभावात्। अन्यथा प्रतिषेधादिति चेदित्यधिकरणविरोधः। शतं चैका चेति श्रुतौ हृदयाग्रप्रज्वलनाद्यनुक्तिस्तु 'अनुक्तमन्यतो ग्राह्यम्' इति न्यायानुसारादेव। न तु तस्य ज्ञान्यज्ञानिसाधार-ण्यात्। अन्यथा 'विष्वगन्या उत्क्रमणे भवन्ति' (छा.उ. ८.८.६) इत्यादिवत् तस्यापीह वक्तव्यत्वापातात्। स्फुटं च बृहदारण्यके 'स यत्रायम् आत्मा बल्यं न्येति' (बृ.उ. ४.४.१) इत्यनेन 'तद्यथाऽऽम्रं वौदुम्बरं वा पिप्पलं वा बन्धनात् प्रमुच्यत एवमेवायं पुरुष एभ्योऽङ्गेभ्यः स प्रमुच्यते' (बृ.उ. ४.४.६) इति प्रकृतज्ञानिनो बल्यनामकप्राज्ञमूर्तिसंश्लेषमुक्त्वा ततो भगवतः प्राज्ञस्य चक्षुरादित्यस्थभगवद्रूपेण विदुषश्चक्षुरादिगतप्रकाशादिना संश्लेषलक्षणमेकीभाव-मेकीभवति, न पश्यतीत्याहुः, एकीभवति न जिघ्रतीत्याहुः, इत्यादिनोक्त्वा 'तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेनैष निष्क्रामति चक्षुषो वा मूर्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्यः' (बृ.उ. ६.४.२) इति विदुष एव हृदयाग्रप्रद्योतनादेः श्रवणात्। तस्य हैतस्येत्यत्र विद्वदविद्वत्साधारण्येन चेतनमात्रपरामर्शकत्वे विदुषो मूर्ध्न उत्क्रमणमिति विशेषोऽपि न स्यात्। न च 'तद्यथा तृणजलूका तृणस्यान्तं गत्वाऽन्यमाक्रममाक्रम्याऽत्मानमुसंहरति एवमेवायमात्मेदं शरीरं निहत्याविद्यां गमयित्वाऽन्यमाक्रममाक्रम्याऽत्मानमुपसंहरति। तद्यथा पेशस्कारी पेशसो मात्रामुपादायान्यन्नवतरं कल्याणं रूपं तनुते एवमेवायमात्मेदं शरीरं निहत्याविद्यां गमयित्वाऽन्यन्नवतरं कल्याणतरं रूपं कुरुते पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वाऽन्येषां वा भूतानां स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो वायुमय आकाशमयः तेजोमयोऽतेजोमयः काममयोऽकाममयः क्रोधमयोऽक्रोधमयः सर्वमयः

तद्यदेतदिदम्मयोऽदोमयः' (बृ.उ. ४.४.३) इत्युत्तरवाक्ये तृणजलूकादृष्टान्तेन शरीरान्तरग्रहणोक्तेः तस्य हैतस्य हृदयस्याग्रमिति पूर्ववाक्येऽप्यविद्वानेवोच्यत इति युक्तम् । तत एव मूर्ध्ना निष्क्रमणमपि तस्यैव स्यादित्युक्तत्वात् । विद्यासामर्थ्यस्य च हृदयाग्रप्रज्वलनादावपि साम्यात् । अविद्यां गमयित्वेति अविद्यानिवृत्तिश्रवणाच्च।

एतेनास्याः श्रुतेरपरविद्यावद्विषयत्वं निरस्तम् । नह्यपरविद्यावतोऽविद्यानिवृत्तिरस्ति । बहुतराविद्यानिवृत्तिरप्युक्तरीत्या भेदवासनाकबलिते न युक्ता। शरीरान्तरग्रहणं तु 'तस्यैष आत्मा विवृणुते तनूं स्वाम्' (कठ. २.२३) इत्यादिना स्वरूपदेहाभिव्यक्तेः शास्त्रीयत्वान्न विरुद्धम् । अत एव पेशसो मात्रामुपादायेति स्वर्णांशेनैव स्वर्णाभरणादिनिर्माणं दृष्टान्तीकृत्य तत्तद्योग्यजीवस्वरूपमादाय पित्र्यगान्धर्वादिशरीराभिव्यक्तिहेतुत्वं स्वर्णकृद्दृष्टान्तेन भगवत उच्यते । अत एव प्रकृतः परमात्मा 'स एवायमात्मा ब्रह्म' (बृ.उ. ४.५.१५) इत्युत्तरखण्डिकया विज्ञानमनःप्राणश्चक्षुःश्रोत्रपृथिवीजलाकाशतेजःप्रधानकत्वाद् विज्ञानमयत्वादिना निर्दिश्य स्वातन्त्र्यात् स्वेच्छानुसारेणैव करोतीति काममयो न तु कामादिविकारित्वादिति कामादिमयो निर्दिष्टः । ततोऽस्य काममयत्वं कथमित्याशङ्क्य स यथाकारी यथाचारी तथा भवतीति यं जीवं यथाकर्तुं यथाचारवन्तं चायमात्मेच्छति स जीवसदृशो भवतीत्यतः काममयो भगवानिति सङ्ग्रहेणोक्तस्य 'साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा पापः पापेनाथो खल्वाहुः काममय एवायं पुरुष इति स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते तदभिसम्पद्यते' (बृ.उ. ४.४.५) इति विवरणान्नोत्तरवाक्येऽपि विद्वत्परताहानिः।

एतेन 'तदेष श्लोको भवति। तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषिक्तमस्य। प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम्। तस्माल्लोकात्पुनरेत्यस्मै

लोकाय कर्मण इति नु कामयमानः' (बृ.उ. ४.४.६) इत्युक्तार्थे प्रमाणोदाहरणपरोत्तरखण्डिकायाम् अस्मै लोकाय पुनरेतीति कर्मिणः प्रतीतेः सर्वा अपि खण्डिकास्तत्परा एवेति निरस्तम् । अविद्यां गमयतीति विद्वल्लिङ्गश्रवणात् । अत एव भगवतः काममयत्वोपपादनाय विद्वदविद्वत्सुकृतिदुष्कृतिजीवानामपि प्रसक्ततया व्यवहितकर्मिजीवविषय एवेदं प्रमाणोदाहरणमित्यवगमयितव्यम् । अन्यथाऽकामयमान इत्यारभ्याधीतस्य विदुषोऽपि विषये ''तदेते श्लोका भवन्ति । अणुः पन्थाः विततः पुराणो मां स्पृष्टोऽनुवित्तो मयैव। ते धीरा अपियन्ति ब्रह्मविदः स्वर्गं लोकमित उर्ध्वो विमुक्ताः॥'' (बृ.उ. ४.४.८) ''अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते । तांस्ते प्रेत्याभिगच्छन्ति अविद्वांसोऽबुधो जनाः॥' (बृ.उ. ४.४.१०) ''मनसैवानुद्रष्टव्यं नेह नानाऽस्ति किञ्चन। मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति।'' (बृ.उ. ४.४.१९) ''एकधैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवम् ।'' (बृ.उ. ४.१.२) ''सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयान्'' (बृ.उ. ४.४.२२) ''एष सर्वेश्वर एष भूताधिपतिः एष भूतपालः एष सेतुर्विधरण एषां लोकानामसम्भेदाय । ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति। स एष नेति नेतीत्यात्माऽगृह्यो नहि गृह्यतेऽशीर्यो नहि शीर्यतेऽसङ्गो नहि सज्यतेऽसितो न व्यथते न रिष्यति'' (बृ. ३.६.४) इत्यादिनाऽऽम्नातेषु उत्तरवाक्येषु 'स्वर्गं लोकम्' इत्यनेन कर्मिणः 'अविद्वांसोऽबुधाः' इत्यनेनाविदुषः 'नेह नानाऽस्ति किञ्चन' (बृ.उ. ४.४.१९) इत्यनेन द्वितीयस्य शुद्धस्य ब्रह्मणः 'सर्वस्य वशी सर्वस्येशानः' (बृ.उ. ४.४.२२) इत्यादिना विशिष्टस्य ब्रह्मणः 'भिक्षाचर्यं चरन्ति' इत्यादिना क्रममुक्तिभाजः ततो निर्धर्मिकस्य ब्रह्मणः सङ्कलय्याऽम्नानेन 'न तस्य प्राणा उत्क्रामन्ति' (बृ.उ. ४.४.६), 'ब्रह्मैव सन् ब्रह्माप्येति' (बृ.उ. ४.४.६) इत्यादिपूर्ववाक्यानां सद्योमुक्तिपरत्वं न स्यादिति तवापि 'प्रतिषेधादिति चेत्' इत्यधिकरणविरोधः।

यदि प्रसक्तानुप्रसक्तं किञ्चिदभिधीयते प्रकृतविरोध्यपि, तथापि तत्र तात्पर्याभावान्न दोष इति मन्यसे तदा प्रकृतेऽपि कुतो न मन्यसे। तस्माद्धृदयाग्र-प्रद्योतनचक्षुराद्यपादानकोत्क्रान्त्यादिरज्ञानिसाधारणः। ज्ञानिनस्तु मूर्ध्न एवोत्क्रान्तिरिति व्याख्यानमसाम्प्रदायिकमित्येषा दिक्।

रामानुजोक्ततदोकोधिकरणपरीक्षा

केचित्तु, 'शतं चैका च हृदयस्य' (कठ. ६.१६) इत्यादिश्रुत्युक्तं मूर्धन्यनाड्या गमनं विदुषो नियमेन सम्भवति न वेति संशये नाडीनामतिसूक्ष्मत्वेन बहुत्वेन च दुर्विवेचत्वान्नियमो न सम्भवतीति यादृच्छिकीमुत्क्रान्तिगति-मनुवदतीदं वचनमिति प्रापय्य परमपुरुषाराधनरूपविद्यासामर्थ्याद् विवेकोप-पत्तिरिति सिद्धान्तयन्ति।

तन्न। हृदयाग्रप्रज्वलननाडीद्वारप्रकाशनयोरपि 'तस्य हैतस्य हृदयस्याग्रं प्रद्योतते' (बृ.उ. ६.४.२) इति विद्वत्प्रकरणगतश्रुत्युक्तयोः विद्वन्निष्ठत्व-नियमस्यापि समर्थनीयत्वेऽपि मूर्धन्यनाडीनिर्गमननियममात्रसमर्थनायोगात्।

यच्च तदोक इति भिन्नं पदम्, तस्य जीवस्य स्थानं हृदयम्, अग्रे ज्वलनं प्रकाशनं यस्य तदिदमग्रज्वलनमिति व्याख्यातम्। तदयुक्तम् 'स यत्रायमात्मा बल्यं न्येति' (बृ.उ. ४.४.१) इति ब्राह्मणादौ बल्यशब्देन प्राप्यतया निर्दिष्टस्य ब्रह्मणः प्राधान्यात् तस्य हैतस्य हृदयस्याग्रं प्रद्योतत इति श्रुतौ तच्छब्देन परामर्शस्योक्तत्वात् तन्मूलसूत्रगततच्छब्देन जीवपरामर्शायोगात्। समस्त-पदत्वेनैवोपपत्तौ बहुव्रीह्याश्रयणस्य क्लिष्टत्वाच्च। 'निर्गच्छन्तीतरैश्चापि यैरेष्टव्येतरा गतिः' इत्यादिना सूर्यादिस्थानगमनयोग्यानां च चक्षुरादिदेहदेशेभ्य उत्क्रमणस्य प्रमितत्वात्, ज्ञानिनो मूर्धन्यनाड्यैव निष्क्रमणमिति नियमायोगाच्च। 'तेनैष निष्क्रामति' इत्यादौ भगवत एव निष्क्रमणमुच्यते न जीवस्य 'तंमुत्क्रामन्तं प्राणोऽनूत्क्रामति' (बृ.उ. ४.४.२) इत्यादिनोक्तमुख्यप्राणाद्युत्क्रमणानु-

सार्युत्क्रमणानुपपत्तेः। ततश्च नाडीनामतिसूक्ष्मत्वेऽपि बहुत्वेऽपि च भगवतः तज्ज्ञानसम्भवात्। 'प्राज्ञेनाऽऽत्मनाऽन्वारूढ उत्सर्जद् याति' (बृ.उ. ४.३.३५) इत्यादिश्रुत्यन्तराच्च पूर्वपक्षानुदयश्च।

उभयमतोक्तरश्म्यधिकरणपरीक्षा

यच्च 'रश्म्यनुसारी' इत्यत्रास्ति हार्दविद्या- 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म' (छा.उ. ८.१.१) इत्युपक्रम्य विहिता। तां प्रकृत्य 'अथ या एताः हृदयस्य नाड्यः' (छा.उ. ८.६.१) इत्युपक्रम्य सप्रपञ्चं नाडीरश्मि-सम्बन्धमुक्त्वा 'अथ यत्रैतदस्माच्छरीरादुत्क्रामति अथैतैरेव रश्मिभिरूर्ध्व-माक्रमते' (छा.उ. ८.६.५) 'तयोर्ध्वमायन्नमृतत्वमेति' (छा.उ. ८.६.६) इत्याम्नायते। तत्र गम्यमानमविशेषेणैवाहनि रात्रौ वा म्रियमाणस्य रश्म्यनुसारित्वम् आहोस्विदहन्येवेति संशये निशि मृतस्य विदुषो रश्म्यनुसारासम्भवाद् अनियम एव। वचनं तु पक्षप्राप्तविषयमिति प्राप्ते उच्यते - विद्वान् रश्म्यनुसार्येव निर्गच्छति। अथैतैरेव रश्मिभिरित्यवधारणात्। निश्यपि सूर्यरश्म्यनुसारः सम्भवति। लक्ष्यते हि निश्यपि निदाघसमये ऊष्मोपलब्ध्या रश्मिसद्भावः। हेमन्तादौ तु हिमाभिभवाद् दुर्दिन इवोष्मानुपलम्भ इत्युभाभ्यामधिकरणान्तरं व्याख्यातम्।

तन्न। तद्यथा महापथ आतत उभौ ग्रामौ गच्छतीमं चामुं चैवमेवैता आदित्यस्य रश्मय उभौ लोकौ गच्छन्तीमं चामुं चामुष्मादादित्यात्प्रतायन्ते। त आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्तेऽमुष्मिन्नादित्ये सृप्ताः।' (छा. ८.६.२) 'सहस्रं वा आदित्यस्य रश्मय आसु नाडीष्वातताः तत्र श्वेतः सुषुम्नो ब्रह्मयानः सुषुम्नायामाततस्तत्प्रकाशेनैष निर्गच्छति' (पौत्रायणश्रुतिः सू.भा. ४.२.१८) इत्यादिस्फुटप्रमाणसद्भावेन पूर्वपक्षस्यातिमन्दत्वेनाधिकरणान्तरत्वायोगात्। पूर्व-सूत्रस्थद्वारपदसञ्जातशङ्कामात्रनिवर्तकतया तच्छेषत्वस्य स्फुटप्रतिभासाच्च।

निशीतिसूत्रस्याद्वैताभिमतव्याख्याविमर्शः

यच्चास्य सिद्धान्तोपक्रमत्वमाश्रित्य आद्येन सिद्धान्ते प्रतिज्ञाते तत्र निशि रश्म्यभावाद्रश्म्यनुसारित्वं न सम्भवतीत्याशङ्क्य तत्परिहाराय उत्तरसूत्रद्वयं सम्बन्धशब्दात् षष्ठीं प्रक्षिप्य तदुत्तरसूत्रेणैकसूत्रतां चाङ्गीकृत्य 'निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वात् दर्शयति च' इत्यपपाठेन पठित्वा व्याख्यातम्, तद्रश्म्यनुसारीति सूत्रस्य वैयर्थ्यापादकमित्युपेक्षणीयम्। 'नाडीरश्मिसम्बन्धस्य यावद्देहभावित्वमुपलभ्यते च ग्रीष्मादौ तापादिकार्यदर्शनादिति चशब्देनोच्यते' इति सूत्राक्षरादिकथनं चायुक्तम्। सौरकिरणानां निशि व्याप्तिसद्भावेऽपि देहान्तर्गतनाडीषु तत्सम्बन्धासिद्धेः। नाडीष्वाततरश्म्यनुसारित्वं ह्यत्र समर्थनीयम्। अन्यथा चान्द्रमसकिरणानां निश्यपि दिवा सौरकिरणानामिव व्याप्तिसिद्धेराक्षेप एवानुपपन्नः स्यात्।

रामानुजोक्तनिशाधिकरणपरीक्षा

अत एव सङ्कटात् 'विदुषो निशि मृतस्य ब्रह्मप्राप्तिरस्ति न वा' इति संशये-

'दिवा च शुक्लपक्षश्च उत्तरायणमेव च।
मुमूर्षतां प्रशस्तानि विपरीतं तु गर्हितम्॥' (म.भा. अनु. २२.३१)

इति निशि मृतस्य न ब्रह्मप्राप्तिरिति प्राप्ते विदुषः कर्मसम्बन्धस्य यावद्देहभावित्वान्नैष दोषः। अनारब्धकार्याणामधोगतिहेतूनां कर्मणां विद्यासम्बन्धेनैव नाशादुत्तरेषां चाश्लेषात् प्रारब्धकार्यस्य च चरमदेहावधित्वाद् बन्धहेत्वभावाद् विदुषो निशि मृतस्यापि ब्रह्मप्राप्तिः सिद्धैव। 'तस्य तावदेव चिरम्' (छा. ६.१४.२) इत्यादिश्रुतिश्च दर्शयति। 'दिवा च शुक्लपक्षश्च' इत्यादिवचनमविद्वद्विषयमिति 'निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वात् दर्शयति च' इत्यन्तमधिकरणान्तरं कैश्चिद् व्याख्यातम्। तदेतदनारब्धकार्ये एवेत्यादौ सर्वपापाश्लेषस्योक्तत्वान्निशि मरणस्य मोक्षप्रतिबन्धकत्वमुखेन पूर्वपक्षस्यातिमन्दत्वादयुक्तम्। कर्मसम्बन्धस्य

यावद्देहभावित्वादिति हेतुश्च विरुद्धः। निशामरणसद्भावदशायां देहस्य सद्भावान्निशामरणदोषस्याप्यापत्तेः। 'प्रारब्धकर्मशेषस्तु विरजातरणावधिः' इति वचनाद्धेत्वसिद्धिश्च । तस्मादेतेषां सूत्राणां तदोकोग्रज्वलनमिति सूत्रशेषतैवोचिता।

उभयमतोक्तदक्षिणायनाधिकरणपरीक्षा

यत्तूभाभ्यामतश्चायनेऽपि दक्षिण इति हिशब्दं विहायापपठित्वा सूत्रद्वयमेकमधिकरणम्, दक्षिणायने मृतस्य ब्रह्मप्राप्तिरस्ति न वेति संशये दक्षिणायनमरणस्य निषिद्धत्वादेव तत्र मृतस्य विदुषोऽपि न ब्रह्मप्राप्तिरिति प्राप्ते अत एव पूर्वोक्ताद् विद्यासामर्थ्यादेव ब्रह्मप्राप्तिरिति सिद्धान्त इत्युक्तम्।

तत्रोच्यते। यद्यपि भाष्यद्वयेऽप्युत्तरायणमरणप्राशस्त्यप्रसिद्धेर्भीष्मस्य च प्रतीक्षादर्शनात् 'आपूर्यमाणपक्षाद् यान् षडुदङ्ङेति मासान्' (छा. ४.१५.५) इति च श्रुतेः अपेक्षितव्यमुत्तरायणमिति, 'अथ यो दक्षिणे प्रमीयते पितॄणामेव महिमानं गत्वा चन्द्रमसः सायुज्यं गच्छति' (तै.आ. ५२.३४) इति दक्षिणायने मृतस्य चन्द्रप्राप्तिश्रवणात्, चन्द्रं प्राप्तानां च 'तेषां यथा तत्पर्यवैति अथैतमेवाध्वानं पुनर्निवर्तन्ते' (छा. ५.१०.५) इति पुनरावृत्तिश्रवणादिति चाधिकाशङ्का प्रदर्शिता। तथापि 'दिवा च शुक्लपक्षश्च उत्तरायणमेव च। मुमूर्षतां प्रशस्तानि विपरीतं तु गर्हितम्' इति वचनस्याविद्वद्विषयत्वेन पूर्वाधिकरण एवोक्तत्वात् पुनः शङ्कानुदयः। यदि वाक्यान्तरोदाहरणमात्रेण पुनश्शङ्का समुदेष्यति तदा शास्त्रापर्यवसानप्रसङ्गः।

ननु 'यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः। प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ॥' (गी.ता. ८.२३) इति कालप्राधान्येनोपक्रम्याहरादिकालविशेषः गीतास्मृतावनावृत्तिफलसाधनत्वेनाऽम्नातः। ततो रात्रौ दक्षिणायने वा प्रयातस्य कथमनावृत्तिः फलं स्यादित्यधिकाशङ्का भविष्यतीति चेन्न। अस्याः शङ्कायाः

'निशि नेति चेन्न' इत्यत्रैव परिहरणीयत्वात्। न भविष्यति चातिदेशक्लेशस्सूत्रकृतः। न वा त्वद्भाष्यकाराणामधिकाशङ्कान्वेषणप्रयासः।

योगिन इति सूत्रस्य परोक्तार्थनिरासः

दुष्परिहरा चेयं शङ्का। ननु नायमस्ति दोषः। यतो 'योगिनः प्रति च स्मर्यते स्मार्ते चैते' इति सूत्रमेव तत्परिहाराभिमुखम्। योगिनः प्रति चायमहरादिकालविनियोगोऽनावृत्तिफलाय स्मर्यते। स्मार्ते चैते योगसाङ्ख्ये। न श्रौते। अतो विषयभेदात् प्रमाणविशेषाच्च नास्य स्मार्तस्य कालविनियोगस्य श्रौतेषु विज्ञानेष्ववतार इति तदर्थप्रतीतेरिति चेन्मैवम्। देवयानपितृयाणयोः श्रुतौ स्मृतौ चैकरूप्येण विषयभेदानुपपत्तेः। गीतास्मृत्युक्तदेवयानस्यापि श्रौतदेवयानवद् विदुष एव प्रतीतेः। अन्यथा श्रुतिस्मृत्योः व्याख्येयव्याख्यानभावः साधु समर्थितः स्यात्। स्मृतेर्बाधस्तु 'विरोधे त्वनपेक्षं स्यात्' इत्यधिकरणे वार्तिककृतैव दूषितः। मूलकोशेषु चशब्दद्वयादर्शनाद् वैय्यर्थ्याच्चायमपपाठश्च। स्मृतिनिमित्ते एते ब्रह्मचन्द्रगती गीतायां स्मर्येते। इति गीतास्मृतिगतिकथनाय द्विवचनान्तपाठ एव स्वरसः।

यदा तु पुनर्गीतास्मृतावर्चिरहरादिशब्दैर्न कालादिरूपं जडमुच्यते। येन कालकृतविशेषो विदुषोऽप्यङ्गीकार्यः स्यात्। किन्त्वातिवाहिक्यो देवता एव गृह्यन्त इति मन्यसे तदा नैतदेतत्सूत्रव्याख्यानम्।

'योगिनः' इति सूत्रस्य विशिष्टाद्वैतव्याख्याविमर्शः

नात्र मुमूर्षून् प्रति मरणकालविशेषोपादानं स्मर्यते। अपि तु योगिनो योगनिष्ठान् प्रति स्मार्ते स्मृतिविषयभूते स्मर्तव्ये देवयानपितृयाणाख्ये गती स्मर्येते। योगाङ्गतयाऽनुदिनं स्मर्तव्ये। 'नैते सृती पार्थ जानन् योगी मुह्यति कश्चन' (गी.ता. ८.२७) इत्यादेरिति यथापाठं केषाञ्चित् व्याख्यानम् अस्मद्भाष्याविरुद्धमपि 'अतश्चायन' इति सूत्रापपाठात् तच्छेषतया स्वीकाराच्चानुपादेयमेव।

तदेवं देवानां देहलयप्रकारः मनुष्याणां देहोत्क्रान्तिप्रकारश्च वाङ्मनसीत्यादिना मद्रीत्या निरूप्यत इति व्याख्यानसम्भवे लोकसिद्धविद्वदविद्वत्साधारणोत्क्रान्त्यनुवादमात्रपरत्वं, तत्रापि केषाञ्चिदधिकरणानामपरविद्याविषयत्वं, परविद्याविषयाणां च प्रासङ्गिकत्वमुपेत्य व्याख्यानं तु परविद्याफलनिरूपणाय मुमुक्षुं प्रति प्रवृत्तेऽस्मिन्नध्याये समस्तस्यास्य पादस्य सङ्गत्यलाभान्मतद्वयमयुक्तमेवेति आचार्योक्तः पन्थाः सुपथ एवेति सिद्धम्।

लोकोपमेति पूर्वपक्षन्यायविवरणम्

टीकाक्षरार्थस्तु, लोकोपमेत्युक्तन्यायं तात्पर्यतो विवृण्वत्,

'न च कृष्यादिलौकिकसाधनस्य फलस्मरणानपेक्षत्वात् स्वर्गमोक्षयोरपि तथात्वमिति वाच्यम्।'

इति वाक्यं व्युत्क्रमेण व्याचष्टे- **न गत्यर्थं विद्यानुस्मृती अपेक्षिते इति पूर्वः पक्ष इति ॥** विद्याशब्देन कर्मापि उपलक्ष्यते। तेन स्वर्गमोक्षयोरपि तथात्वमित्यंशो व्याख्यातः। योगिनः प्रति स्मर्येते इति सूत्रांशव्यावर्त्यशङ्काया अभ्यर्हितत्वात् तामादौ दर्शयति- **अग्निर्ज्योतिरित्यादाविति ॥** कृष्यादीति पूर्वार्धं योजयति- **लोके फलानुस्मृतिमिति ॥**

शश्वदनुप्रवृत्तिरिति सिद्धान्तन्यायविवरणम्

शश्वदनुप्रवृत्तिरित्युक्तन्यायमावृत्त्या एतदधिकरणसङ्गतत्वेन विवृण्वत्,

' ''क्रियानुवृत्तिर्लौकिके साधने तु मनोऽनुवृत्तिर्वैदिके साधने स्यात्।
भवेत् फलं मे सर्वथेत्येष तस्मात् स्मरेत् सदा निश्चितत्वेन विद्वान् ॥''

इति श्रुतेः तदनुसार्यनुवृत्तेर्लौकिकवैदिकयोः साम्यात्। अतोऽत्र फलानुस्मरणं लवनादिकृष्यनुवृत्तिवद् द्रष्टव्यम्। वचनप्रामाण्यात्।'

इति वाक्यं व्याचष्टे- **यथा खलु छेदनादावित्यादिना ॥**

विवरणार्थः

क्रियानुवृत्तिः कर्तव्या स्याल्लौकिके साधने। मनोनुवृत्तिस्तु वैदिके साधने कर्तव्या स्यात्। यत एषोऽनुवर्तयिता पुरुषः फलं प्रति भोक्ता भवेत्। तस्मात् विद्वान् स्वस्य भावितया निश्चितत्वेन सदा सर्वदा स्मरेदिति श्रुत्यर्थः। 'सर्वथेत्येव तस्मात्' इति कचित् पाठः। तत्रैवं विद्वानिति सम्बन्धः। एवाह्येवैवाहीतिवत्। नन्वथापि लौकिके क्रियानुवृत्तिः, वैदिके मनोनुवृत्तिरित्यनुवृत्तिप्रतियोगिनोः क्रियामनसोः भेदात् कथं साम्यमित्यतो व्याचष्टे- तदनुसारीति ॥ वचनानुसारीत्यर्थः। फलानुसारीति वाऽर्थः। तथा चानुवृत्तिप्रतियोगिनोः भेदसत्त्वेऽप्यनुवृत्तिमात्रस्य धर्मस्य साम्येन लौकिकवैदिकयोस्साम्योपपत्तिरिति भावः। तथाऽपि वैदिके फलानुस्मरणाभावे किं स्यादित्यतः लौकिकदृष्टान्तेनोपपादयन्नुपसंहरति- अत इति ॥ कृषौ लवनाद्यनुवृत्तिवदिति योज्यम्। यथा कृषौ लवनशब्दितकर्षण-जलसेचनादिक्रियानुवृत्त्यभावे कृषिफलं न प्राप्यते। अनुवृत्तौ च यथा प्राप्यते। तद्वत् फलानुस्मरणं मनोनुवृत्तिरूपं द्रष्टव्यमिति भावः। ननु किमनेन यथाकथञ्चित् लौकिकसाम्यसम्पादनव्यसनेन ? फलानुस्मरणमेव त्यज्यताम् को दोष इत्यत आह- वचनप्रामाण्यादिति ॥ 'स्मरेत्सदा निश्चितत्वेन विद्वान्' इत्युदाहृत-वचनस्यान्यथाऽप्रामाण्यापत्तेरिति भावः।

सङ्क्षेपभाष्यार्थः

एतत्पादार्थं सङ्गृह्णाति सङ्क्षेपभाष्यकृत्।

'उत्तरेषूत्तरेष्वेवं यावद्वायुं विमुक्तिगाः।
प्रविश्य भुञ्जते भोगांस्तदन्तर्बहिरेव वा॥
वायुर्विष्णुं प्रविश्यैव भोगश्चैवोत्तरोत्तरम्।
उत्क्रम्य मानुषा मुक्तिं यान्ति देहक्षयात् सुराः॥' इति।

विमुक्तिगाः प्रागेव कर्मक्षयाख्यमुक्तिं प्राप्ताः सुरा वागाद्या उत्तरेषूत्तरेषु मनआदिस्वस्वबिम्बभूतदेवेषु यावद्वायुं वायुपर्यन्तं प्रविश्य तत्र देहक्षयात् देहक्षयं प्राप्य तदन्तर्बहिरेव वा भोगान् स्वस्वयोग्यान् भुञ्जते । अत्र व्यवस्थितो विकल्पः। केषाञ्चिदन्तःस्थित्वैव भोगः, केषाञ्चिद् बहिर्निर्गत्यैवेति। एव-शब्दान्नियमान्तरम्। प्रलये सर्वेषामप्यन्तरेऽवस्थितेः पुनः सृष्टौ केषाञ्चिद् बहि-रेवेति। पुनरेवशब्दान्नियमान्तरम्। केषाञ्चिदन्तर्वा बहिर्वेतीति योजनया। 'वाङ्मनसि', 'अत एव च सर्वाणि', 'तन्मनः प्राणे', 'भूतेषु तच्छ्रुतेः', 'नैकस्मिन्' इतीमान्यधिकरणानि उक्ततात्पर्याणि भवन्ति।

एवं चेत् सर्वाधिको वायुः कथं भुङ्क्त इत्यत आह- वायुर्विष्णुं प्रविश्यैवेति॥ सोऽयं वायुशब्दोदितो विरिञ्चः न स्वात्मानमेवाऽश्रित्य भुङ्क्ते, किन्तु विष्णुं प्रविश्य। अन्यथा मुख्येश्वरत्वप्रसङ्गात्। न ह्यवान्तरेश्वरस्य मुख्येश्वरत्वं मनसाऽपि प्राप्तुं शक्यम्। 'न ते महित्वम्' इत्यादिश्रुतेः। नैव चास्य तदिच्छा जायते। 'न कर्हिचिन्मे मनसो मृषा गतिः' (भाग. २) इत्याद्युक्तेः। सोऽयं ब्रह्मा विष्णुमेव प्रविश्य सच्चिदानन्दशरीरत्वेन तत्पुत्रो भूत्वा तस्मिन्नेव विष्ण्वाख्याश्रये स्थित्वा तत्सहभोगनामकान् सर्वान् भोगान् भुङ्क्ते। न पुनस्तदन्तर्बहिरेव वेति विकल्पः। किन्तु विष्णुं प्रविश्यैवेत्येवार्थः। ननु 'ऋचां त्वः पोषमास्ते' (ऋ.सं. १०.७१.११) इत्यादिना ब्रह्मणो बहिर्भोगप्रतीतेः सर्गकाले बहिः प्रद्युम्नेन निष्कासनश्रवणाच्च तस्यापि भोगस्थलविकल्प एव न्याय्यः। मैवम्। कदाचित् बहिर्निर्गमनेऽपि रूपान्तरेण तत्रैव स्थित्युपपत्तेः। अनेन 'सोऽध्यक्षे' इत्यधिकरणं 'तानि परे' इत्यधिकरणं च व्याख्यातम्।

ननु लक्ष्म्या अपि विष्णुप्रवेशेनैव भोगः किमित्यस्यापीदमेवोत्तरम्। वायुरेव विष्णुं प्रविश्य भुङ्क्ते, न तु लक्ष्मीः। तस्याः भगवत्साम्येन नित्यमुक्तत्वादिति। तेन 'समना च' इत्यधिकरणं व्याख्यातम्।

किमयं भोगो निर्मर्याद एव सर्वेषाम्, नेत्याह- भोगश्चैवोत्तरोत्तरम् इति। अधिक इत्यध्याहृतेनैवशब्दसम्बन्धः । उत्तरोत्तरमधिक एव भोगः। न तु निरवधिकः। न वा स्वतन्त्रः। ननु मुक्तानां स्वातन्त्र्याभावे सत्यकामत्वादिविरोध इति शङ्कां निवारयति चशब्देन। भगवत्कामानुसारिकामवत्त्वादेव सत्यकाम-त्वाद्यात्मकत्वादिति भावः। अनेन 'अविभागो वचनात्' इत्यधिकरणं व्याख्या-तम्। सूत्रे विभागशब्दः निरवधिकपरः स्वतन्त्रपरश्चेति ध्येयम्।

मनुष्याणामपि किमयमेव मोक्षप्रकारः ? तथा सति सुरा उत्तरेषूत्तरेषु देहक्षयादित्युक्तिविरोध इत्यत आह- उत्क्रम्य मानुषा मुक्तिं यान्तीति ॥ मोचकत्वान्मुक्तिर्विष्णुः। कर्तरि क्तिन्। क्षीणकर्माणो मनुष्यजीवाः कदाचिन्मानुषकुले जाताः देवाश्च मानुषशब्देनोच्यन्ते। 'उत्क्रान्तिमार्गौ देवानां न प्रायेण भविष्यतः' इत्युक्तेः। अनेन 'तदोकोग्रज्वलनम्' इत्यधिकरणं व्याख्यातम्।

ननु 'अग्निर्ज्योतिः' इत्यादौ उत्क्रमणस्य कालादिकृतत्वश्रवणात् किं विद्यादिनेत्यस्यापीदमेवोत्तरम् उत्क्रम्येति॥ मार्गमनुस्मृत्येत्यर्थः। अनेन 'योगिनः' इत्यधिकरणमुक्तार्थमिति सङ्क्षेपभाष्यमपि व्याख्यातं द्रष्टव्यम्।

॥ इति प्रतिस्मरणाधिकरणम् (योग्यधिकरणम्.पा.)॥ १०॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्याणां सर्वतन्त्रस्वतन्त्राणां श्रीलक्ष्मीनारायणतीर्थपूज्यपादानां शिष्येण रघुनाथयतिना विरचितायां शिष्टतात्पर्यचन्द्रिकायां चतुर्थाध्यायस्य द्वितीयः पादः ॥

॥ अथ तृतीयः पादः ॥

॥ अथार्चिराद्यधिकरणम्॥ १॥

सूत्रभाष्यम्

मार्गो गम्यं चास्मिन् पाद उच्यते-

ॐ अर्चिरादिना तत्प्रथितेः ॐ ॥ ४.३.१ ॥

'तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षम्' (छा.उ.५-१०-१) **इत्यर्चिषः प्राथम्यं श्रूयते। 'यदा ह वै पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छति'** (बृ.उ.७-१०-१) **इति वायोः। तत्रार्चिषः प्राप्तिरेव प्रथमा।**

'द्वावेव मार्गौ प्रथितावर्चिरादिर्विपश्चिताम्।
धूमादिः कर्मिणां चैव सर्ववेदविनिर्णयात्॥
अग्निर्ज्योतिरिति द्वेधैवार्चिषः सम्प्रतिष्ठितिः।
अग्निं गत्वा ज्योतिरेति प्रथमं ब्रह्म संव्रजन्॥' इति॥

'एकस्मिंस्तु पुरे संस्थो द्विरूपोऽग्नेः सुतो महान्॥' इति ब्रह्मतर्के॥ १॥

॥ इति अर्चिराद्यधिकरणम्॥ १॥

तत्त्वप्रकाशिका

सङ्गतिः

एतत्पादार्थं दर्शयति- मार्ग इति॥ ब्रह्मनाड्योत्क्रान्तानां यो मार्गो ब्रह्मप्राप्तौ यच्च तेन पथा गतानां गम्यं तदुभयमस्मिन् पादे कथ्यत इत्यर्थः। तत्राऽऽदौ सूत्रमेव पठति- अर्चिरादिनेति॥ अत्र ब्रह्मप्राप्तिमार्गस्यार्चिरादित्व-

प्रतिपादनादस्ति शास्त्रादिसङ्गतिः । मार्गानिर्णये तदनुस्मृत्यसम्भवात् समर्थनीयमेतत्। गत्यनुस्मरणं तत्प्राप्त्यर्थं कार्यमित्युक्तम्। स ब्रह्मप्राप्तिमार्ग एव विषयः। किमर्चिरादिरुत वाय्वादिरिति सन्देहः। सन्देहबीजं श्रुतिविरोधं च दर्शयति- **तेऽर्चिषमिति ॥**

पूर्वपक्षः

उभयोरपि प्राथम्यमिति पूर्वः पक्षः। श्रुतिद्वयस्यापि निरवकाशत्वात्। न चोभयोरपि प्राथम्यं विरुद्धम् । मार्गभेदेन द्वयोरपि प्राथम्योपपत्तेः । न चैकस्याधिकारिणो मार्गद्वयं विरुद्धम् । अधिकारिभेदेनोपपत्तेः । अतो मार्गनियमाभावादनुस्मृत्ययोग इति।

सिद्धान्तः

सिद्धान्तयत् सूत्रं व्याचष्टे- **तत्रेति ॥** न मार्गभेदेनोभयोः प्राथम्यं कल्प्यं किन्त्वेक एव मार्गः। स चार्चिरादिस्तेनार्चिरादिना मार्गेण ज्ञानी गच्छतीति भावः। नन्वेक एव मार्गः स चार्चिरादिरेवेत्येतत् कुतः। स्मृतौ प्रसिद्धत्वादेवेति भावेन तामुदाहरति- **द्वाविति ॥** नन्वग्निर्ज्योतिरिति स्मृतावग्नेः प्राथम्यं श्रूयते तत्कथमर्चिषो ज्योतिःशब्दाभिहितस्य द्वितीयप्राप्तस्य प्राथम्यमुच्यत इत्यत आह- **अग्निरिति ॥** तथाऽपि पृथक् किं नोच्यते 'तेऽर्चिषम्' इत्यादि-श्रुतावित्यत आह- **एकस्मिन्निति ॥** नन्वग्नेः सोमादनन्तरं प्राप्तिरतः कथमेतदित्यत आह- **अग्नेरिति ॥** न च वायुप्राथम्यश्रुतेरप्रामाण्यम् । प्रबलश्रुत्यनुसारेणार्चिरनन्तरार्थत्वोपपत्तेः। अतो मार्गनिर्णयादनुस्मृतिसम्भव इति सिद्धम्॥ १ ॥ अ. १ ॥

॥ इति अर्चिराद्यधिकरणम्॥ १ ॥

॥ अथ शेषतात्पर्यचन्द्रिकायां चतुर्थाध्याये तृतीयः पादः ॥

॥ अथार्चिराद्यधिकरणम्॥ १ ॥

मङ्गलाचरणम्

उत्तरायणरश्मिभ्यो निर्गतो ह्यर्चिरादितः।
यत्प्रसादाज्जनं गच्छेत्तं भजे वल्लभं श्रियः॥

एतत्पादप्रतिपाद्यविषयः

अत्र क्रमप्राप्तो मार्गो निरूप्यते। मार्गणीयत्वान्मार्गशब्देन गम्यमुच्यते। यथा पूर्वत्रोत्क्रान्तिशब्देन देहक्षयः। तद्गम्यं द्विविधम्। अर्चिरादिपथरूपं तत्प्राप्यं ब्रह्मरूपं चेति। तत्र 'कार्यं बादरिरस्य गत्युपपत्तेः' (ब्र.सू. ४.३.७) इत्यतः प्राक्तनैः पञ्चभिरधिकरणैरर्चिरादिपथो निरूप्यते। तदनन्तरं प्राप्यं निरूप्यते। गम्यत्वेनोभयोः क्रोडीकरणात्।

एतेन देवानां सम्पूर्णमोक्षोऽपि साधितः । कर्मक्षयदेहक्षयगम्यभोगभेदेन चतुर्विधमोक्षस्य देवानामप्यङ्गीकाराद् गम्यनिरूपणस्य देवतामात्रविषयत्वा-भावात् । उत्क्रान्तिनिरूपणानन्तरं मार्गनिरूपणस्यैव साक्षात् सङ्गतत्वात् 'वाङ्मनसि' इत्यादिदेवानां प्रकृतत्वेऽपि उत्क्रान्तिकथनेन व्यवहितत्वात् साक्षात् सङ्गतिलाभः । अत एव मार्गो गम्यं चास्मिन् पाद उच्यत इति भाष्यमपि सुस्थम्। मनुष्याणां मार्गः मनुष्याणां देवानां च गम्यं च पेटिकाभेदेन निरूप्यत इत्यर्थः। देवयानपितृयानसञ्ज्ञाभेदेन धर्मिग्राहकमानेन च ज्ञानिनां मनुष्याणां देवयानो मार्गः सिद्ध एवेति किमिह निरूपणीयमस्तीति चेन्न । देवयानो [1]ह्यनेकव्यक्तिघटित एको मार्गः। स चार्चिरुपक्रम उत वायूपक्रम इति सन्देहे, इदमुपक्रमो नेदमुपक्रम इति निर्णयस्य मीमांसासाध्यत्वात्।

---

१. ऽप्यनेक...- प.

॥ ॐ अर्चिरादिना तत्प्रथितेः ॐ ॥ ४.३.१ ॥

अनन्तरसङ्गतिः

ननु विद्याया आवश्यकत्वेऽपि न गत्यनुस्मरणस्याऽवश्यकता सम्भवति। मार्गनिर्णयस्यायोगादिति, योगीति विशेषणात् न केवलं कालादिकृते ब्रह्मचन्द्र-गती किन्तु गत्यनुस्मरणादियोगकृते इति [१]निश्चयेऽपीह 'तेऽर्चिषम् अभिसम्भवन्ति' (छा. ५.१०.१) इत्यादौ प्रथममित्यादिविशेषणाभावात् निश्चयायोगादिति वा शङ्कनादनन्तरसङ्गतिः।

संशयः पूर्वपक्षश्च

ज्ञानिनां ब्रह्मनाड्युत्क्रमणानन्तरभाविदेवयानमार्गो विषयः। स किमर्चिर्देवः प्रथम उत वायुदेवः प्रथम इति सन्देहे नार्चिः प्रथमः किन्तु वायुरेवप्रथमः। 'यदा वै पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छति' (बृ. ७.१०.१) इति स्पष्टं श्रूयमाणस्यान्यथाकर्तुमशक्यत्वात्। 'तेऽर्चिषमभिसम्भवन्ति' (छा. ५.१०.१) इत्यस्य सम्भवमात्रश्रवणेऽपि तत्प्राप्तेरश्रवणात्। नचाभिसम्भव एव प्राप्तिरिति निश्चेतुं शक्यते। न चोत्क्रान्तिः पूर्ववाक्ये प्रकृताऽस्ति। येन तदन्तराऽऽम्नातस्य मार्गपरत्वं निश्चिनुमः। किन्तु 'ये चामी अरण्ये श्रद्धा तप इत्युपासते' (बृ. ६.२.१५) इति उपासनैव। न चोपासनानन्तरभावी मार्गः। तस्माद्वाय्वादिरेव मार्गः। अस्मिन् पक्षे गतेर्वाय्वादित्वेऽपि तदनुस्मरणसम्भवाद् गत्यनु-स्मरणानुपपत्तिरूपफलाभावान्न पूर्वाधिकरणसङ्गतिरस्ति। तथाऽपि पादाद्याधिकरणे न पूर्वसङ्गतिर्गवेषणीयेति मते न दोषः।

न च विवरणविरोधः। तत्राधिकारिभेदाश्रयणेन मार्गस्योभयप्रथमत्वाङ्गी-कारात्। अत एवाधिकारिभेदादेर्दुर्ज्ञेयतया किंप्रथमो मार्ग इति निर्णयाभावाद् गत्यनुस्मरणानुपपत्तिरिति पूर्वसङ्गतिलाभाद्युक्तश्च विवरणोक्तः पूर्वपक्ष इति

१. निश्चयसम्भवे- प.

वाच्यम्। प्रस्थानान्तरत्वेन तदुक्तपूर्वपक्षस्यैव कर्तव्यत्वमिति निर्बन्धाभावात्। सङ्गतिस्तु पादाद्याधिकरणे नैवापेक्षितेत्युक्तम्।

यद्वा 'अर्चिषमेवाभिसम्भवन्ति' (छा. ५.१०.१) इत्यस्यामेव शाखायां स्थानान्तरे श्रूयमाणत्वात् 'स वायुमागच्छति' (बृ. ७.१०.१) इत्यस्येव 'तेऽर्चिषम् अभिसम्भवन्ति' (बृ. ६.२.१५) इत्यस्यापि निरवकाशत्वेन विनिगमनाभावाद् उभयोरपि प्राथम्यम्। अधिकारिभेदेनोभयप्राथम्यस्यापि सम्भवात्।

उभयोः प्रथमप्राप्तिः श्रौतत्वस्याविशेषतः।
अवकाशोज्झितं यस्माच्छ्रुतिद्वयमुदीरितम्॥
तदा च मार्गस्मरणं न शक्यं पूर्वमीरितम्।
न ह्यनिर्णीतिसन्दृष्टे स्मरणं नाम युज्यते॥

नन्वधिकारिभेदेन गरुडशेषमार्गयोर्द्वयोरप्रमितत्वेऽप्युच्चक्रमिषोरुत्क्रान्तिकाले स्वदेहदेवानां लयचिन्तनं यथा तथा प्रकृतेऽपि किन्न स्यादिति चेन्न। तत्र निरवकाशोभयविधप्रमाणदर्शनेन महताऽपि प्रयत्नेन मार्गद्वयं निर्णीय तत्काले चिन्तनाभ्युपगमेऽपीह वक्ष्यमाणरीत्या उभयोर्निरवकाशत्वाभावेन वस्तुतस्तथा चिन्तनीयत्वाभावादिति पूर्वः पक्षः।

अत्राद्यः तत्त्वप्रदीपोक्तः। द्वितीयस्त्विह टीकायां विवरणे चोक्तः।

सिद्धान्तः

सिद्धान्तस्तु,

'द्वावेव मार्गौ प्रथितावर्चिरादिर्विपश्चिताम्।
धूमादिः कर्मिणां चैव सर्ववेदविनिर्णयात्॥'

इति स्मृतेर्देवयाने न द्वैविध्यं समञ्जसम्। न वा वाय्वादिता। स्मार्तप्रथितेरनिवारणात्।

'वृथाऽधिकारिभेदेन सृतिद्वैविध्यकल्पनम्।
विदुषां हृदयं नैति प्रमाणरसिकात्मनाम्॥' इति।

उभयोक्तमर्चिराद्यधिकरणम्

अत्रोक्तमुभाभ्यां, विदुष उत्क्रान्तस्य नाडीविशेषेण हार्दानुग्रहाद्गत्युपक्रम उक्तः। तस्य गच्छतो मार्ग इदानीं निर्णीयते। छान्दोग्ये तावद् 'यथा पुष्करपलाश आपो न श्लिष्यन्ते, एवमेवंविदि पापं कर्म न श्लिष्यते' (छा. ४.१४.३) इत्युपक्रम्य ब्रह्मविद्यामुपदिश्य 'अथ यदु चैवास्मिञ्छव्यं कुर्वन्ति, यदु च नार्चिषमेवाभिसम्भवन्ति। अर्चिषोऽहरह्न आपूर्यमाणपक्षम् आपूर्यमाणपक्षाद्यान् षडुदङ्ङेति मासांस्तान् मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः। स एनान् ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नाऽवर्तन्ते' (छा. ४.१५.५-६) इत्यर्चिरादिघटितो मार्गः श्रूयते। तथाऽत्रैवाष्टमे 'अथैतैरेव रश्मिभिरूर्ध्व आक्रमते' (छा. ८.६.५) इति। तथा कौषीतकिनां श्रुतौ 'स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति। स वायुलोकं स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं स प्रजापतिलोकम्' (कौ. ३.१) इत्यग्न्यादिघटितः। तथा बृहदारण्यके 'य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धां सत्यम् उपासते तेऽर्चिषमभिसम्भवन्ति अर्चिषोहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षण्मासानुदङ्ङादित्य एति मासेभ्यो देवलोकं देवलोकाद् आदित्यम् आदित्याद्वैद्युतं वैद्युतात् तत्पुरुषोऽमानवः स एत्य ब्रह्मलोकान् गमयति' (बृ. ८.२.१५) इत्यर्चिरादिघटितोऽपि देवलोकादिघटितः। तत्रैव पुनरन्यथा च श्रूयते। 'यदा वै

पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छति तस्मै स तत्र विजिहीते। यथाऽऽडम्बरस्य खम्। तेन स ऊर्ध्व आक्रमते। स चन्द्रमसमागच्छति। तस्मै स तत्र विजिहीते। यथा दुन्दुभेः खम्' (बृ. ७.१०.१) इत्यादि। तथा श्रुत्यन्तरे चान्यथा 'सूर्यद्वारेण ते विरजाः प्रयान्ति' (मुण्ड. १.२.११) इत्यादि।

तत्र संशयः। किं परस्परभिन्ना एताः सृतयः, किं वैकैवानेकविशेषणेति।

भिन्नप्रकरणस्थत्वाद् भिन्नोपासनयोगतः।
अनपेक्षा मिथो मार्गास्त्वरातोऽवधृतेरपि॥

गन्तव्यमेकं नगरं प्रति वक्रेणाध्वना गतिमपेक्ष्य ऋजुनाध्वना गतिस्त्वरावती कल्प्यते। एकमार्गत्वे तु कमपरम् अपेक्ष्य त्वरा स्यात्। श्रूयते हि त्वरा 'स यावत् क्षिप्येन्मनस्तावदादित्यं गच्छति' (छा. ८.६.५) इति। अथैतैरेव रश्मिभिरूर्ध्व आक्रमत इत्यवधारणं नोपपद्यते। पथ्यन्तरस्य निवर्तनीयस्याभावात्। तस्मादन्योन्यभिन्नाः परस्परानपेक्षा एवैते पन्थान एकब्रह्मलोकप्राप्त्युपाया व्रीहियववद्विकल्प्येरन्निति प्राप्ते प्रत्युच्यते।

एकत्वेऽपि पथोऽनेकपर्वसङ्गमसम्भवात्।
गौरवान्नैव नानात्वं प्रत्यभिज्ञानलिङ्गतः॥

सपर्वा हि पन्थाः नगरादिकमेकं गन्तव्यं प्रापयति नाभागः। तत्र किमेते रश्म्यहर्वायुसूर्यादयोऽध्वानः पर्वाणः सन्तोऽध्वनैकेन युज्यन्ते। आहो यथायथम् अध्वानमपि भिन्दन्तीति सन्देहे, अभेदेऽप्यध्वनो भागभेदोपपत्तेः न भागिभेदकल्पनोचिता। गौरवप्रसङ्गात्। एकदेशप्रत्यभिज्ञानाच्च। विशेषणविशेष्यभावोपपत्तेः नानेकाध्वकल्पना। अथैतैरेव रश्मिभिरित्यवधारणं न तावदध्वान्तरनिवृत्त्यर्थम्। तत्प्रापकैरेव वाक्यान्तरैर्विरोधात्। तस्माद्विधिसामर्थ्य-

प्राप्तमयोगव्यवच्छेदमेवकारोऽनुवदति इति युक्तम् । त्वरावचनं चान्यतः कुतश्चिद्गन्तव्यादनेनोपायेन ब्रह्मलोकं क्षिप्रं प्रयातीत्यभिप्रायमिति।

तद्विमर्शः

तत्र न तावद् आद्ये मतेऽस्य पादस्याध्यायसङ्गतिरस्ति । 'तृतीयेऽध्याये परापरासु विद्यासु साधनाश्रयो विचारः प्रायेणात्यगात्। अथेह चतुर्थे फलाश्रय आगमिष्यति' इति चतुर्थाद्यभाष्यरीत्या फलस्यैवेह विचार्यत्वात् । न चेयं गतिर्निर्मृष्टनिखिलद्वैतप्रपञ्चावभासस्य ब्रह्मैक्यमीप्सोः फलम्। देशविशेषप्राप्तये श्रूयमाणगतेस्तदनपेक्षफलत्वासम्भवात् ।

ननु यद्यपि परविद्यावतो ब्रह्मैक्यमेव फलम् । ब्रह्मणो व्यापकत्वाद् देशविशेषप्राप्तिनिरपेक्षितैव। तत एव मार्गोऽपीति न परविद्याफलम्। तथाऽऽप्यपरविद्यावतः उपासनाराधितसगुणब्रह्मानुग्रहात् कर्मक्षयोत्क्रान्तिमार्गागम्यप्रदेशविशेषस्तत्र भोगश्चेत्येतत्सर्वं त्वन्मत इव मन्मतेऽपि फलमङ्गीक्रियत इत्यपरविद्याफलविचारात्मकत्वान्न फलाध्यायासङ्गतिरिति चेन्न । सर्वस्याप्येवमपरविद्याफलप्रपञ्चकत्वे चतुर्थे फलाश्रय आगमिष्यतीत्यस्य शिष्यवञ्चनमात्रत्वापातात् । अपरविद्याफलस्य बहुकालावस्थायित्वमात्रेण कर्मफलाद् विशिष्टत्वेऽपि परविद्यासाध्यपुनरावृत्तिवर्जितब्रह्मभावापेक्षया विशिष्टत्वाभावेन तत्र मुमुक्ष्वभिलाषाभावात् प्रपञ्चनस्य बधिरेषु गानस्येव वैय्यर्थ्यापाताच्च।

द्वितीयेऽपि सिद्धान्तानुत्थितिरेव । तत्तद्विद्यागतत्वेन मार्गाणां भिन्नभिन्नत्वस्यैव न्याय्यत्वात्। अन्यथा कर्मविद्यागतस्य पितृयाणस्य देवयानाद्भेदो न स्यात्। ''पञ्चाग्निविद्याप्रकरणे 'ये चामी अरण्ये श्रद्धां सत्यम् उपासते' (बृ. ८.२.१५) इति विद्यान्तरशीलिनामप्यर्चिरादिका सृतिश्श्राव्यते। वाय्वादिका

तु सन्निहितविद्यासङ्गतैव श्राव्यते। अतोऽर्चिरादिकैव सृतिरिति निर्णीयते'' इति भाष्योक्तम् असाधु। 'ये चामी अरण्ये श्रद्धां सत्यम् उपासते' (बृ. ८.२.१५० इति विद्यान्तरसम्बन्धश्रुतेः सावकाशत्वेन 'यदा वै पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छति' (बृ. ७.१०.१) इति निरवकाशश्रुतिविरोधेनानुक्तगतिमद्विद्यासम्बन्धविषयत्वेन सङ्कोचोपपत्तेः। 'स वायुमागच्छति' (बृ. ७.१०.१) इति श्रुतिर्वायोरर्चिरनन्तरप्राप्यत्वेऽपि सावकाशेति चेन्न । 'तेऽर्चिषमभिसम्भवन्ति' (बृ. ७.२.१५) इति श्रुतेरप्यर्चिषो वाय्वनन्तरप्राप्यत्वेऽप्यवकाशसम्भवात् प्रथममेवार्चिषम् अभिसम्भवन्तीति स्पष्टश्रुतेरनुपन्यासात्।

'भवेदेतदेवम् यद्यत्यन्तभिन्ना एवैता सृतयः स्युरेकैव त्वेषा सृतिरनेकविशेषणा क्वचित्केनचिद्विशेषणेनोपलक्षिता । सर्वत्रैकदेशप्रत्यभिज्ञानादितरेतरविशेषणविशेष्यभावोपपत्तेः' इतीदमपि नियामकान्तरं भाष्योक्तमयुक्तमन्योन्याश्रयात् । सिद्धे हि विद्यानानात्वाभावे विशेषणविशेष्यभावोपपत्तिः तदुपपत्तौ तु नानात्वाभावसिद्धिरिति। अर्चिरादिमार्गोक्तैकदेशप्रत्यभिज्ञानं च 'सूर्यद्वारेण ते विरजाः प्रयान्ति' (मुण्ड. १.२.११) 'स वायुमागच्छति' (बृ. ७.१०.१) इत्यादावर्चिरहरापूर्यमाणपक्षोत्तरायणमाससंवत्सरादित्यविद्युत्स्वन्यतमेन सम्बन्धादर्शनाद् असिद्धमेव। अर्चिषो वायुविशेषणत्वस्याप्यापत्त्या मार्गस्य वाय्वादित्वप्राप्त्याऽर्चिरादित्वासिद्धेश्च। अर्चिरादित्ववाय्वादित्वसन्देहे विपश्चितामर्चिरादिरेव मार्गो नान्योऽस्तीत्यर्थप्रतिपादकस्पष्टवचनस्य त्वयाऽत्रानुदाहरणाच्च। 'अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्। तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः' (भ.गी. ८.२४) इत्यत्र अर्चिषो द्वितीयप्राप्यत्वोक्तेरर्चिरादित्वासिद्धेश्च।

परोदीरितसूत्रार्थविमर्शः

एतेन ब्रह्मविदर्चिरादिनैव मार्गेण गच्छति तत्प्रथितेरर्चिरादिमार्गस्य

विद्यान्तरसम्बन्धित्वेनापि विस्तृतत्वात् तस्यैव सर्वत्र प्रत्यभिज्ञानाद्वेति सूत्रव्याख्यानं निरस्तम्। द्वावेव मार्गौ प्रथितावर्चिरादिर्विपश्चिताम्। धूमादिः कर्मिणां चैव सर्ववेदविनिर्णयात्' (ब्रह्मतर्कवचनम्, सू.भा. ४.३.१) इत्याद्यागमप्रसिद्धिपरतया प्रथितिशब्दस्वारस्यसम्भवे तद्भङ्गायोगाच्चेत्येषा दिक्।

टीकायां न्यायमालोक्तपूर्वपक्षीयसुक्रमन्यायव्याख्यानम्

टीकाक्षरार्थस्तु,

उत्क्रान्तमार्गश्च विमुक्तगम्यं पादोदितं सुक्रमविक्रमौ च।
सान्तानिकं प्राप्तिरभीष्टता च सौकर्यमित्यन्यमतस्य तर्काः॥

इति न्यायमालोक्तसुक्रमन्यायम् एतदधिकरणसङ्गतत्वेन विवृण्वत्,

'न च तत्रतत्र मार्गस्यान्यथोक्तेरधिकारिभेदेन पृथक्पृथङ्मार्गसुक्रमोपपत्तेरिति वाच्यम्।'

इति वाक्यमुभयोरपि प्राथम्यमिति साध्यमध्याहृत्य व्याचष्टे- **उभयोरपि प्राथम्यमिति पूर्वः पक्ष इति**॥ अन्यथोक्तेरित्यन्तस्य तात्पर्यमाह- **श्रुतिद्वयस्यापीति**॥ उत्तरार्धमाकाङ्क्षाक्रमेणावतार्य व्याचष्टे- **न चोभयोः प्राथम्यमित्यादिना**॥

विवरणार्थः

तेनार्चिर्वाय्वोरुभयोरपि प्राथम्यं युक्तम्। 'तेऽर्चिषम् अभिसम्भवन्ति' (बृ. ६.२.१५) 'स वायुमागच्छति' (बृ. ७.१०.१) इति च तत्र तत्र शाखायां मार्गस्य देवयानस्यान्यथोक्तेः, अर्चिरादित्ववाय्वादित्वयोरुक्तेः। न चेदं द्वयोः प्राथम्यं विरुद्धमिति वाच्यम्। यतोऽधिकारिभेदेन पृथक्पृथङ्मार्गसुक्रमोपपत्तिः मार्गद्वयप्राप्त्युपपत्तिरिति विवरणयोजना द्रष्टव्या।

टीकायां सिद्धान्तन्यायमालोक्तविशेषसम्प्राप्तिन्यायव्याख्यानम्

'विशेषसम्प्राप्तिरुरुत्वमाप्तिः क्रमानुरागः कथितानुवृत्तिः।
सिद्धान्तनिर्णीतिकराः'

इत्येतत्पादीयसिद्धान्तन्यायमालास्थविशेषसम्प्राप्तिन्यायं विशेषः श्रुतिविशेषः। तस्माज्ज्ञानिनाम् एकमार्गस्यैव सम्प्राप्तिरित्यभिमतविग्रहप्रदर्शनेन विवृण्वत्,

'' 'सर्वे वा एत उत्क्रामन्ति। तेऽर्चिषम् एवाभियन्ति। ततो वायुं ततोऽहः पूर्वपक्षम् इत्येष उ एव ब्रह्मपथः। द्वे सृती अशृणवं पितॄणाम् अहं देवानामुत मर्त्यानाम्। ताभ्यामिदं विश्वमेजत् समेति यदन्तरा पितरं मातरं च' इति विशेषश्रुतितो ज्ञानिनाम् एकमार्गस्यैव प्राप्तेः। 'एष एव ब्रह्मपथः' इत्यवधारणविरोधाद् अन्यथा। एजदिति वैदिकानुष्ठानवत उक्तेर्नाधोगतिविरोधः।

'पुनरावर्तिनो ये तु तेषां धूमपथो ध्रुवः।
अन्येषाम् अर्चिरादिश्च तद्भेदो मध्यसंस्थितिः।
धूमार्चिरादिदेवेभ्यः प्राप्यानुज्ञां तु मध्यगाः।
विहृत्य स्वेष्टदेशेषु तदूर्ध्वं यान्ति चाधरम्।
अत्यल्पानाम् अविज्ञाताऽप्यनुज्ञा वर्तिनां भवेत्।
पुंद्वारेण स्वदृष्ट्या वा यथायोग्यं विमुच्यताम्।
अतो न मार्गभेदोऽस्ति नहि मार्गोऽत्र सम्भवः।
प्रेतत्वं चाधरो मार्गः पापजत्वात् तयोः पृथक्' इति स्मृतेश्च।''

इति वाक्यं भाष्येण सहावतारयति- **नन्वेक एव मार्ग इत्यादिना**॥ **स्मृतौ प्रसिद्धत्वादिति**॥ स्मर्यते गुरूपदिष्टोऽर्थोऽनेनेति स्मृतिरागम इत्यर्थः।

न्यायविवरणार्थः

अनेन ननु यद्यपि 'द्वावेव मार्गौ प्रथितावर्चिरादिर्विपश्चिताम्। धूमादिः कर्मिणां

चैव’ (ब्र.त.व., सू.भा. ४.३.१) इति मार्गद्वयमेव प्रामाणिकम्। न तृतीयो मार्ग इति वाय्वादिमार्गो नास्त्येव । तथाऽपि देवयान एवाधिकारिभेदेन प्रभिन्नः। तत्र प्रायो ज्ञानिनाम् अर्चिरादिः, केषाञ्चिज्ज्ञानिनां वाय्वादिरपि किं न स्याद् ? यथा ज्ञानिनामेव केषाञ्चिद् गरुडमार्गः केषाञ्चिच्छेषमार्गः। न च तावता द्वावेव मार्गावित्यस्य विरोधोऽस्ति। अन्यथाऽधोगतिप्रतिपादकागम-विरोधापातात्। किञ्च ज्ञानिनां कर्मिणां चान्तरिक्षादावेव चन्द्रसूर्ययोर्मध्ये केषाञ्चिद् भोगाम्नानात् मध्यसंस्थितिरपि प्रमितैव। तत्र यदि पितृयाणोऽप्येक एव तर्हि धूमचन्द्रमसोर्मध्ये संस्थितिः केषाञ्चिन्मध्यगानां कथं स्यात्। एवं देवयान-स्यैकत्वेऽर्चिःसूर्यमध्यसंस्थितिः केषाञ्चिन्मध्यगानां कथं स्यात्। तस्माद् द्वावेव मार्गावित्येतत्प्रधानमार्गविषयम्। तथा च पितृयाणे देवयाने चावान्तरमार्ग-भेदोऽङ्गीकर्तव्य एव। तथा च देवयानान्तर्गतमार्गे वाय्वादित्वमपि सम्भवति। अधिकारिभेदेन पितृयाणान्तर्गतमार्गे केषाञ्चित्कर्मिणां धूमादिः केषाञ्चित्प्रेतत्वादिरूपोऽधरो मार्ग इत्येव न्याय्यमित्याशङ्क्य निरवकाश-वचनोदाहरणेन तत्राऽशङ्कितबाधकानि पराचष्टे- **सर्वे वा एत इत्यादिना**॥ एते प्रसिद्धाः देवेतरे सर्वे ज्ञानिनः ब्रह्मनाड्यादिना उत्क्रामन्ति। त एवार्चिष-मेवाभियन्तीत्यवधारणं ततो वायुमित्युत्तरवाक्यान्न प्राप्यान्तरं व्यावर्तयति। किन्तु प्रथमप्राप्यम्। ‘नरं च नारायणमेव चाऽदौ ततः सुतौ द्वौ जनयाम्बभूव’ इति यथा। ततो वायुमिति च वायोर्द्वितीयप्राप्यत्वं स्पष्टमुच्यते। तेन नेदमपि सावकाशयितुं शक्यम्। नहि देवयाने मार्गे प्रभेदसद्भावेऽर्चिषमेव प्रथमम् अभियन्ति सर्वे तदनन्तरं वायुमित्युक्तिः सम्भवति।

किञ्च मर्त्यानां ज्ञानकर्मान्यतरयुक्तानां प्राप्या पितॄणां सृतिरेका। उतान्या देवानां सृतिः। एवं द्वे सृती अस्मद्गुरुभ्यो अशृणवमिति वेदद्रष्टुर्वचनम्। मातरं पितरं च यदन्तरा वर्तते, मातापितृसंयोगजन्यमिति यावत्। तदिदं समस्तजीवजातं

समेति ज्ञानकर्मभ्यां क्लृप्तस्थानं भोगार्थमेति। इति विशेषश्रुतेः ज्ञानिनाम् एकविधमार्गस्यैव प्राप्तेरवगमाद् अधिकारिभेदेनावान्तरभेदभिन्नपृथक्पृथङ्-मार्गप्राप्त्युपपत्तिरिति न वाच्यमिति पूर्वेण सम्बन्धः।

नन्वस्यां श्रुतावेकविध एव मार्ग इति न प्रतीयत इत्यत आह- **एष एवेति**॥ देवयानेऽर्चिषः प्रथमप्राप्यत्वं वायोर्द्वितीयप्राप्यत्वमुक्त्वैष एव ब्रह्मपथ इत्यवधारणेन विधान्तरस्यैव निषेधादिति भावः। उपलक्षणमेतत्। द्वे सृती इति उपक्रम्योक्तमार्गद्वये देवयानस्य विधान्तरशून्यत्वे सिद्धे तदवैरूप्याय पितृयाणेऽपि विधान्तरं नास्तीति गम्यत इति ध्येयम्।

ननूक्तम्- अत्र विधान्तराभावे प्रेतत्वादिरूपाधोगतिवाक्यविरोध इत्यत आह- **एजदितीति**॥ वैदिकानुष्ठानवतः पुण्यजनस्यैव मार्गद्वैविध्यम्, तत्र विधान्तराभावश्चोच्यते। एजृ कम्पन इति धातोः पुण्यवतामेव वैदिकानुष्ठान-रूपकम्पनं सार्थकमिति तस्यैवेह विवक्षितत्वात्। अन्यथेदं विश्वमित्यनेनैव सर्वग्रहणसिद्धेः ‘समेति यदन्तरा पितरं मातरं च’ इति चेतनत्वस्यापि सिद्धेश्चैजदिति विशेषणं व्यर्थं स्यादिति भावः।

ननु कथं तर्हि मध्यगाः श्रूयन्त इत्यतः स्मृतिमाह- पुनरावर्तिन इति॥ यद्यपि ये पुनरावर्तिनः ये च तदन्येऽपुनरावर्तिनः तेषामध्रुवो धूमपथः ध्रुवोऽर्चिरादिश्च तयोर्मार्गयोरवान्तरभेदो मध्यसंस्थितिश्च क्वचिच्छ्रूयते। तथाऽपि न धूमार्चि-रादिकयोर्मार्गयोरवान्तरभेदो मन्तव्यः। यतः कर्मिणो धूममारभ्य यावच्चन्द्रमण्डलं प्राप्यापि पुनः धूमादिदेवेभ्योऽनुज्ञां प्राप्य स्वेष्टस्वयोग्यदेशेषु ततोऽवरुह्य भोगान् भुङ्क्त्वा कर्मावसाने प्रत्यासन्ने भूम्यादिरूपाधरं यान्ति। एवं ज्ञानिनोऽ-प्यर्चिरारभ्य यावद्वायुं गत्वाऽन्तरिक्षादिस्वयोग्यमध्यदेशस्थिताः स्वयोग्येष्ट-भोगभोक्तारः पुनरधिकसाधनापेक्षया महराद्यूर्ध्वदेशं गच्छन्ति। न तु मध्ये मार्गं भित्वा मध्यगा भवन्ति। येन मार्गद्वयेऽपि विधान्तरम् अङ्गीकार्यं स्यादित्यर्थः।

एतेन,

'पितृयाणं देवयानं ब्रह्मयानमिति त्रिधा।
गच्छन् वैश्वानरं याति तस्मान्मार्गः स ईरितः ॥'

इत्यादिवचनमपि समाहितम्। ज्ञानिनामेव प्रतीकालम्बनानां सुषुम्नयोत्क्रान्तिमात्रविषयत्वेऽपि तत उत्क्रम्य गतानां मार्गान्तरपरत्वाभावात्।

ननु मध्यगानामत्यल्पत्वात् कथमर्चिरादिदेवेभ्योऽनुज्ञाप्राप्तिरित्यत आह- **अत्यल्पानामिति॥** वर्तिनाम् अनुवर्तिनाम् अत्यल्पानामप्यनुज्ञा सम्भवत्येव। अनुवर्तिषु प्रीत्यतिशयसम्भवादित्यर्थः।

ननु प्रीतानामपि स्वदृष्टिपथेष्वनुज्ञादानं दृष्टम्। मध्यगानां च केषाञ्चित् तद्दर्शनायोग्यत्वात्, केषाञ्चिद् भाषणायोग्यत्वात्, केषाञ्चित् समीपगमनायोग्यत्वात्। अतोऽविज्ञातविषये कथमनुज्ञाऽपि भवेदित्यत आह यथायोग्यं केषाञ्चिद् दृष्ट्या केषाञ्चिद् दूतमुखेनाविज्ञातविषयाऽप्यनुज्ञा भवेदिति। एवमुपपादितमर्थमुपसंहरति- **विमुच्यतामिति॥** कर्मक्षयं प्राप्तानां ज्ञानिनामतो मार्गभेदो नास्तीति प्रकृताभिप्रायमेतत्। कर्मिणोऽपीति द्रष्टव्यम्।

ननु धूमादिमार्गेण गतानां भोगानन्तरं भूम्यादौ सम्भवरूपाधोगतिरस्त्येव। अतः कथं मार्गद्वैविध्यमित्यत आह- **नहीति॥** अत्र भूमौ सम्भवो मार्गत्वेन शास्त्रे प्रसिद्धो नास्ति। अतो न विरोध इत्यर्थः।

ननु प्रेतत्वमधरो मार्गोऽस्तीत्यत आह- **प्रेतत्वं चेति॥** नहीत्यावर्तते। प्रेतत्वाख्योऽधरो मार्गोऽपि न शास्त्रे प्रसिद्ध इत्यर्थः। हेत्वन्तरं चाह- **पापजत्वादिति॥** एतयोर्देवयानपितृयाणमार्गयोः सकाशात् प्रेतत्वाख्याधरो मार्गः पृथगेवातो नात्र विवक्षितः। कुतः ? प्रेतत्वाख्याधरमार्गस्य पापजत्वात् पापफलत्वात् सुकृतिनां मार्गगणने तस्याविवक्षा युक्तैवेति भावः। स्मृतेश्चेत्यस्य

न च वाच्यमिति पूर्वेणान्वय इत्युक्तं भवति। अत्र यद्यप्येष एव ब्रह्मपथ इत्यवधारणविरोधादन्यथेत्युत्तरवाक्यात् 'सर्वे वा एत उत्क्रामन्ति। तेऽर्चिषमेवाभियन्त्येष एव ब्रह्मपथः' (छा. ५.१०.१) इत्यंशस्यैवोदाहरणं युक्तम्। न तु 'ततो वायुमतोऽहः पूर्वपक्षम्' इत्यंशस्य। विवक्षितप्रमेयस्य तेनैव सिद्धेः। तथाऽपि पूर्वपक्षसिद्धान्तन्यायाविमावेव उत्तराधिकरणेऽप्यनुवर्तनीयौ तद्विवरणे चेत्येतत् सूचयितुं ततो वायुमित्यधिकांशोदाहरणम्। तत्प्रकारं तूत्तरत्र प्रदर्शयिष्यामः।

ब्रह्मतर्कवचनार्थः

एवमग्निर्ज्योतिरित्यादिभाष्योदाहृतब्रह्मतर्कवचनस्यायमर्थः। अग्निर्ज्योतिरिति द्वेधा रूपद्वयेनार्चिषो देवस्यैकस्यैव सम्प्रतिष्ठितिः। न तु चेतनान्तरस्य। तेन 'अग्निर्ज्योतिरहः शुक्लः' (भ.गी. ८.२४) इति गीतावाक्येऽर्चिर्देवस्य रूपद्वयप्राप्त्युक्त्याऽर्चिषः प्राप्तिरुक्तैवेति तेऽर्चिषमभिसम्भवन्तीति श्रुत्या संवादः सिद्ध्यति। तर्ह्येकस्यैवार्चिषः द्विःप्राप्त्युक्तिर्व्यर्थेति चेन्न। यतो ब्रह्म संव्रजन्नधिकार्यग्निनामकमर्चिषो रूपं प्रथमं गत्वा द्वितीयं ज्योतिर्नामकं रूपमेतीति प्रमितम्। वचनेन विधाने प्रयोजनगवेषणानुपपत्तेः। तर्हि तेऽर्चिषमभिसम्भवन्तीति श्रुतौ रूपद्वयप्राप्त्यनुक्तिः कुतः ? कुतश्च रूपिण एव प्राप्त्युक्तिरिति चेन्न। यतो द्विरूप एवायमर्चिर्देव एकस्मिन् पुरे सम्प्रतिष्ठितो भवति। श्रुतौ च तत्तल्लोकानुक्रमणमेव वक्तुमुपक्रान्तम्। अतस्तयोरेकलोकस्थितत्वाच्छ्रुतावनुक्तिः। अत एव चार्चिःशब्दो लोकपरः। गीतायां तु तत्तद्देवताप्राप्तिरेवाभिप्रेतेति नानयोर्विसंवादः शङ्कनीयः। तेनाग्निर्ज्योतिरित्यत्राग्नेः प्राथम्यम्। तेऽर्चिषमित्यत्रार्चिषः प्राथम्यं श्रूयत इत्युभयोरप्यधिकारिभेदेन प्राथम्यप्राप्तौ कुतो नाधिकरणान्तरमारब्धमिति निरस्तम्। अग्न्यर्चिषोः स्वरूपभेदाभावेन पूर्वपक्षस्य मन्दत्वात्।

नन्वेतदयुक्तम्। 'सोमं वैश्वानरं चेन्द्रं ध्रुवं देवीं दिवं तथा' (ब्र.त.व., ब्र.सू.

४.३.५) इति ब्रह्मतर्कवचनेऽग्नेः सोमानन्तरप्राप्त्युक्तेः तत् कथं प्रथममग्निं गत्वा ज्योतिरित्युक्तमिति चेन्न। यतोऽग्नेर्मूलस्य ज्येष्ठः सुतोऽग्निनामकोऽत्र प्रथमगम्यत्वेनोक्तः। यतश्च सोमाद् अनन्तरप्राप्योऽग्निर्मूलाग्निरेव। नहि सुतस्य प्रथमप्राप्यत्वेऽपि पितुरनन्तरप्राप्यत्वोक्तिर्विरुध्यत इति।

सूत्रार्थः

सूत्रार्थस्तु, ब्रह्मनाड्योक्रान्तो जीवोऽर्चिरादिनाऽर्चिःप्रथमकेनैव देवयानेन गच्छति। न तु वायुप्रथमकेन। कुतः ? देवयानस्य वायुप्रथमकत्वाप्रथितेः। प्रत्युत शास्त्रेऽर्चिःप्रथमकत्वप्रथितेरिति।

॥ इति अर्चिराद्यधिकरणम्॥ १॥

॥ अथ वायुगत्यधिकरणम्॥ २॥

सूत्रभाष्यम्

ॐ वायुशब्दाद् अविशेषविशेषाभ्याम् ॐ ॥ ४.३.२ ॥

अर्चिषो वायुं गच्छति। 'स वायुमागच्छति' (बृ.उ.७-१०-१) इति सामान्यवचनात्। 'स इतो गतो द्वितीयां गतिं वायुमागच्छति वायोरहरह्न आपूर्यमाणपक्षम्' इति विशेषवचनाच्च॥ २॥

॥ इति वायुगत्यधिकरणम्॥ २॥

तत्त्वप्रकाशिका

सङ्गतिः

अत्र ब्रह्ममार्गे वायोर्द्वितीयप्राप्यत्वसमर्थनादस्ति शास्त्रादिसङ्गतिः। अन्यथा मार्गानिर्णयादनुस्मृत्यसिद्धेः समर्थनीयमेतत्। प्रकृतो मार्गो विषयः। किं तत्र वायुर्द्वितीयप्राप्य उताहरिति सन्देहः। 'वायुमागच्छति', 'अर्चिषोऽहः' इति श्रुतिविप्रतिपत्तिः सन्देहबीजम्।

पूर्वपक्षः

उभयोरपि पूर्ववदधिकारिभेदेन मार्गभेदाद् द्वितीयप्राप्यत्वमिति पूर्वः पक्षः। श्रुतिद्वयस्यापि प्रामाण्यात्। न च पूर्ववद् व्यवस्थाऽत्र काचित् सम्भवति। तादृशप्रमाणाभावात्। अतो मार्गनिर्णयाभावात् तदनुस्मृत्ययोग इति।

सिद्धान्तः

सिद्धान्तयत् सूत्रं पठित्वा व्याचष्टे- वायुशब्दादिति॥ न मार्गभेदेन द्वयोरपि

द्वितीयप्राप्यत्वं मन्तव्यं किन्त्वेक एव मार्गः। तत्रापि मार्गेऽर्चिषोऽनन्तरमेव वायुं गच्छति। न च श्रुत्यन्तरविरोधः। वायोरनन्तरमह्नः प्राप्तिसम्भवादिति भावः। कुत एतदित्यत आह- स इति॥ युक्तं वायोरेव द्वितीयत्वं सामान्यतः प्राथम्येन वायोः प्राप्यत्वे श्रुतिसद्भावात्। सामान्यश्रुतेश्च यावदर्थे विशेषश्रुतिविरोधस्तावन्मात्रस्यैव त्याज्यत्वेनात्र प्रसिद्धिविरोधेन प्राथम्यायोगेऽपि द्वितीयत्वस्याऽवश्यकत्वात्। न हि भवति यागीयपशुहिंसाविधिविरोधेन 'न हिंस्यात् सर्वा भूतानि' इति वाक्यस्य तदन्यहिंसानिषेधकत्वाभाव इति भावः। न केवलमेतन्न्यायेन वायोर्द्वितीयप्राप्यत्वसिद्धिरपि तु विशेषश्रुतेश्चेति तामुदाहरति- स इति॥ अतो मार्गनिर्णयाद् युक्ता तदनुस्मृतिरिति सिद्धम्। वायुश्रुतेर्गतिप्रदर्शनार्थं चैतत् सूत्रम्। प्राथम्यश्रुतेः सामान्यत्वात् सामान्यस्य च विशेषश्रुत्या द्वितीयप्राप्यत्वं वदन्त्या बाधोपपत्तेर्द्वितीयप्राप्यत्वं वायोस्तदर्थ इति॥ २॥ अ. २॥

शेषतात्पर्यचन्द्रिका

॥ ॐ वायुशब्दाद् अविशेषविशेषाभ्याम् ॐ ॥ ४.३.२ ॥

एतदधिकरणप्रतिपाद्यविषयः

अत्र वायोर्द्वितीयप्राप्यत्वं समर्थ्यते।

अत्र यद्यप्यह्नस्तृतीयप्राप्यत्वसमर्थनं युक्तम्। न तु वायोर्द्वितीयप्राप्यत्वसमर्थनम्। प्रबलश्रुत्यनुसारेणार्चिरनन्तरप्राप्यत्वोपपत्तेरिति पूर्वाधिकरणटीकयैव तत्सिद्धेः। तथाऽपि वायोः द्वितीयप्राप्यत्वं न साक्षात् सिद्ध्यति। किन्त्वर्थात्। न च प्रथमप्राप्यविचारानन्तरं द्वितीयप्राप्यमुल्लङ्घ्य तृतीयप्राप्यं विचारयितुं युक्तम्।

सङ्गत्यादि

सङ्गतिस्तु नार्चिषः प्रथमे प्राप्तिर्युक्ता। 'स वायुमागच्छति' इत्यस्यावकाशाभावात्। अर्चिषोऽहरित्यह्नो द्वितीयप्राप्यत्वश्रवणेन तद्विषयत्वस्याप्ययोगात्। न चाहःश्रुतिरप्रमाणम्। श्रुतिमात्रस्य प्रामाण्यसाधनात्। न च वायोर्द्वितीयप्राप्यत्वमह्नस्तृतीयप्राप्यत्वमिति व्यवस्था सम्भवति। अर्चिरादित्वप्रथावद् वायुद्वितीयत्वाहस्तृतीयत्वादिप्रथाभावात्। तथा च विनिगमनाभावादगत्याऽधिकारिभेदमाश्रित्य देवयान एव वायुर्द्वितीयोऽहर्द्वितीयश्चास्तीति मार्गभेदोऽङ्गीकर्तव्य इति पूर्वत्राप्युभयप्रथमत्वमेव न्याय्यम्। 'स वायुमागच्छति' (बृ. ७.१०.१) इति श्रुतिश्चापीडिता भवतीत्युत्थानात् सुलभैव।

पूर्वपक्षः

अवश्याश्रयणीयं तन्मार्गद्वैविध्यमागमाद्।
द्वितीयप्राप्यता वायोरह्नश्चेति विनिश्चितम्॥ इति पूर्वः पक्षः।

सिद्धान्तः

स वायुमिति सामान्यवचनस्यातिपीडनात्।
उभयद्वितीयता युक्ता नैव प्रेक्षावतां मते॥
अर्चिषोऽहरिति श्रौतं द्वितीयत्वं तु बाध्यते।
द्वितीयत्वस्य बाधे हि श्रुतेरत्यन्तपीडनम्॥

दृष्टं हि 'मा हिंस्यात् सर्वा भूतानि' इति श्रुतेरतिपीडाभावसिद्ध्यर्थं लौकिकहिंसाया अकर्तव्यत्वम्, तथा पाश्वदश्यश्रुतेरतिपीडाभावसिद्ध्यर्थं प्रयोगान्तरे कर्तव्यत्वम्। अन्यथा तत्रापि क्वचिद् बाधितत्वाल्लौकिकहिंसायाः कर्तव्यत्वं, तथा पाश्वदश्यस्याकर्तव्यत्वं च स्यात्। सकृत्प्रवृत्तायाः किमकुण्ठनेनेति न्यायसाम्यात्। तस्मात् 'स वायुमागच्छति' इति सामान्यश्रुतेः पूर्वोक्त-

निरवकाशप्रमाणबलाद् द्वितीयप्राप्यत्वपरत्वमङ्गीकृतमित्येतावता सकृत्प्रवृत्ता-न्यायेन द्वितीयप्राप्यत्वपरत्वमपि न बाधनीयम्। किन्तु 'अर्चिषोऽहः' इति श्रुतेरेव विश्रमगोवृषन्यायेन द्वितीयप्राप्यत्वपरत्वमेव बाधनीयम्।

किञ्च 'स वायुमागच्छति' इत्यविशेषप्रवृत्तश्रुतेः क्रमाकाङ्क्षायां 'स इतो गतो द्वितीयां गतिं वायुमागच्छति वायोरहः', 'तेऽर्चिषमेवाभिसम्भवन्ति ततो वायुमतोऽहः' इत्यादिभाष्यविवरणोदाहृताभ्यां विशेषवचनाभ्यां 'पशुना यजेत' इति सामान्यप्रवृत्तश्रुतेः 'छागस्य वपाया मेदसः' इति विशेषवचनादिव तद्विशेषे व्यवस्थापनोपपत्तिः। अतो देवयाने विधान्तरस्याकल्पनीयत्वात् पूर्वोक्तमपि युक्तमिति सिद्धान्तः।

परोक्तवाय्वधिकरणशरीरम्

अत्रान्ये 'वायुशब्दादविशेषविशेषाभ्याम्' इति सम्प्रदायागतपाठे पञ्चम्यन्तस्यान्वयाभावोऽध्याहारश्चेति दोषद्वयं मत्वा वायुमब्दादविशेषेत्यपपाठं कल्पयित्वाऽधिकरणमेवं व्याचक्षिरे- वायुरर्चिरादौ वर्त्मनि कतमस्मिन् स्थाने निवेशयितव्य इति संशये 'स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकम्' (कौ. १.३) इति कौषीतकिश्रुतेर्वायोर्द्वितीयस्थाने निवेशः। न च 'यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छति' (बृ. ५.१०.१) इति श्रुत्यन्तरे, आदित्याद्वायोः पूर्वप्राप्यत्वदर्शनादर्चिरादौ वर्त्मनि संवत्सरादि-त्ययोरन्तराले वायुर्निवेशयितव्य इति वाच्यम्। ऊर्ध्वाक्रमणक्रियां प्रत्येव वायोर्निमित्तत्वश्रवणेनाऽऽदित्यगमनक्रियां प्रत्यपि हेतुत्वे मानाभावात्। न च तेनेत्यनन्तरश्रुतोर्ध्वाक्रमणक्रियासम्बन्धेन निराकाङ्क्षमादित्यगमनक्रिययाऽपि सम्बद्धुमर्हति। न चाऽऽदित्यगमनस्य तेनेति तृतीयान्तपदेन विना काचिदनुप-पत्तिरस्ति। येनान्यसम्बद्धमप्यनुषज्येत। 'स वरुणलोकमागच्छति' इत्यादौ

पाठक्रमस्यार्थक्रमनियामकत्वेन क्लृप्तत्वादग्निलोकमागच्छतीत्यादिसन्दर्भगतस्य पाठस्याग्निवायुवरुणलोकक्रमनियामकत्वम्

ऊर्ध्वाक्रमणमात्रे च श्रुता वायोर्निमित्तता।

इति प्राप्त उच्यते-

ऊर्ध्वशब्दो न लोकस्य कस्यचित् प्रतिपादकः।
तद्भेदापेक्षया युक्तमादित्येन विशेषणम्॥
श्रुत्याद्यभावे पाठस्य क्रमं प्रति नियन्तृता।

भवेदेतदेवं यद्यूर्ध्वशब्दात् कश्चिल्लोकभेदः प्रतीयेत। स तूपरि देशमात्रवाची लोकभेदाद्भिनाऽपर्यवस्यंल्लोकभेदवाचिनाऽऽदित्यपदेनाऽऽदित्ये व्यवस्थाप्यते। तथा चोर्ध्वक्रमणक्रियैवाऽऽदित्यलोकागमनक्रियेति तदेव वायुनिमित्तकमिति श्रौते क्रमनियमे पाठः पदार्थमात्रप्रदर्शनार्थ एतमेतं चाऽऽगच्छतीति न तु क्रमाय प्रभवति श्रुतिविरोधादिति संवत्सरादनन्तरमेव वायुर्निवेशयितव्य इति।

तद्विमर्शः

तत्र। 'तेऽर्चिषमभिसम्भवन्ति' (छा. ५.१०.१) इत्यर्चिषः प्राथम्यं, 'स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति' (कौ. १.३) इति अग्नेः प्राथम्यं च श्रूयते। तत्र कस्य प्राथम्यमिति चिन्तायाः प्रथमं कर्तव्यत्वेनार्चिरादौ वर्त्मनि दूरोद्दिष्टसंवत्सरादित्यान्तराळप्रवेशचिन्ताया अयोगात्। तत्रार्चिरग्निलोकशब्दौ तावदेकार्थौ ज्वलनवचनत्वात्। ततो न तत्र विवाद इति चेन्न। 'अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्' (भ.गी. ८.२४) इति गीतास्मृतावर्चिःशब्द-पर्यायस्य ज्योतिःशब्दस्य पृथगाम्नानात्।

'यदा वै पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छति' (बृ. ७.१०.१) इति वायोः प्रथमप्राप्यत्वश्रवणात् 'अग्निलोकमागच्छति स वायुलोकम्' (कौ. १.३)

इति च वायोः द्वितीयप्राप्यत्वस्यैव श्रवणाद् वायुः कतमस्मिन् स्थाने निवेशयितव्य इति संशयायोगाच्च। न हि प्रबलेन बाधकेन वायुः प्रथमो न भवतीति द्वितीयोऽपि न भवेत्। प्रथमप्राप्यत्वश्रुतेरात्यन्तिकबाधायोगात्। अन्यथा न हिंस्यादिति श्रुतेर्बाह्यहिंसायामपि बाधप्रसङ्गात्। अत एव स वायुमागच्छति, तेऽर्चिष-मभिसम्भवन्त्यर्चिषोऽहरिति श्रुत्योर्वाय्वह्नोः द्वितीयस्थाने निवेशदर्शनादधि-कारिभेदेनोभयोरपि द्वितीयत्वम्। न च 'स वायुमागच्छति' इत्यत्र वायोः प्राथम्यं श्रूयते न तु द्वितीयत्वमिति वाच्यम्। पूर्वाधिकरणे मार्गस्यार्चिरादित्वनिर्णयेन प्राथम्यस्य बाधितत्वेन द्वितीयत्वावगमात्। कौषीतकिश्रुतौ पाठक्रमेण द्वितीयत्वस्यावगतेश्च। पूर्वोदाहृतश्रुतेः प्राबल्याविवेकेनानिर्धारणेन प्रबल-पूर्वपक्षसम्भवे द्वितीयस्थानं विहाय षष्ठस्थानमङ्गीकृत्य, अहर्द्वितीयत्व-श्रुतिगत्यकथनाद् दुर्बलेन वायुद्वितीयत्वनिर्धारणेन पूर्वपक्षकरणायोगाच्च।

अत एव अहर्द्वितीयत्वश्रुतेरह्नस्तृतीयप्राप्त्युपपत्तेः वायोर्द्वितीयस्थानत्वस्यैव न्याय्यतया संवत्सरानन्तर्यस्याप्रामाणिकत्वात् सिद्धान्तोऽप्ययुक्तः।

न च वायुकृतछिद्रेणाऽदित्यलोकाक्रमणवचनान्यथानुपपत्त्या तत्सिद्धिः। वायोर्द्वितीयप्राप्यत्वेऽप्यादित्यमण्डलपर्यन्तं सहैवाऽगत्य छिद्रकरणसम्भवात्। मुच्यमानस्थभगवति गौरवेणाऽदरेण च तत्तल्लोकस्थितानां देवानां सहगमनस्य च वैकुण्ठादिस्थितानां देवानां चाभिगमनस्य राज्ञो गौरवेण प्रजानामिव श्रुत्यन्तरे स्पष्टं प्रतिपादनात्। अव्यवहितपूर्ववर्तिन एव छिद्रकरणं न तु व्यवहितस्येत्यत्र प्रमाणाभावात्।

किञ्चार्चिरादौ वर्त्मनि वाजसनेयिनां संवत्सरलोको न पठ्यते किन्तु मासादेवलोकमिति देवलोकः। छान्दोग्यानां तु देवलोको न पठ्यते। मासात्संवत्सरमित्येव दर्शनात्। तत्र मासानन्तर्यं कस्येत्यप्यवश्यं विचार्येऽपि

तदुल्लङ्घ्य तदनन्तरोद्दिष्टवायोः संवत्सरानन्तर्यविचारो न युक्तः। आनन्तर्य-प्रतियोगिनो निर्णयस्यैतद्विचारं प्रत्युपजीव्यत्वात्।

अत्रोक्तं भाष्यभामत्योः 'तत्रोभयानुरोधादुभयपाठे उभयत्रापि कर्तव्ये माससम्बन्धात् संवत्सरः पूर्वः पश्चिमो देवलोकः। न हि मासो देवलोकेन सम्बद्ध्यते। किन्तु संवत्सरेण। तस्मात् तयोः परस्परसम्बन्धान्मासारभ्यत्वाच्च संवत्सरस्य मासानन्तर्ये स्थिते देवलोकः संवत्सरस्य परस्ताद् भवति। तत्राऽदित्यस्य वाय्वव्यवहितानन्तर्यसिद्ध्यर्थं संवत्सरादादित्यमित्यस्य स्थाने देवलोकं देवलोकाद्वायुं वायोरिति पठितव्यम्' इति। तत्र प्रष्टव्यम्। किमिदं समाधानं स्वयमुत्प्रेक्ष्योच्यते। उतैतदधिकरणार्थत्वेन। नाऽद्यः। सूत्र-कृदचातुर्यापरिहारात्। अयुक्तं चेदं समाधानम्। देवलोकवायुलोकश्रुत्योः सामान्यविशेषभावेनाञ्जनधृतश्रुत्योरिवाभिन्नार्थत्वात्। नान्त्यः। देवलोकमब्दादिति सूत्रयितव्यत्वेन वायुमब्दादिति सूत्रस्य तदनभिमुखत्वात्।

अत्रोक्तं भाष्ये 'वायुमब्दादिति तु च्छन्दोगश्रुत्यपेक्षयोक्तम्' इति। विवृतं चैतद् भामत्याम्- 'देवलोकाद्वायुमिति पठितव्यम्। वायुमब्दादिति तु सूत्रमत्रावाचकमेवेति।' 'अबोधकमेवेत्यर्थः' इति विवृतं च कल्पतरुणा। तदेतद्ग्रन्थत्रयमपि भाष्यस्य दुर्भाष्यतामाचष्टे। न हि निर्णयार्थे सूत्रे विरुद्धवचनं सम्भवति। देवलोकानन्तरप्राप्यस्य वायोरब्दानन्तरप्राप्तेरशास्त्रार्थत्वेन त्वयैवोक्तत्वात्।

रामानुजोक्तवाय्वधिकरणशरीरम्

केचित्तु माससंवत्सरयोर्न्यूनाधिककालत्वेन संवत्सरस्यैव मासादनन्तरं बुद्धौ विपरिवृत्तेर्यत्रापि शाखायां मासादूर्ध्वं संवत्सरो न पठ्यते किन्तु देवलोक एव, तत्रापि मासादूर्ध्वं संवत्सर एव पठितव्यः। तत ऊर्ध्वं देवलोकस्तथा पाठक्रमादर्थक्रमस्य बलीयस्त्वेन कौषीतकिशाखायां द्वितीयप्राप्यत्वेन

निर्दिष्टस्यापि वायोः 'तेन स ऊर्ध्वम् आक्रमते। स आदित्यमागच्छति' (बृ. ७.१०.१) इति वाजसनेयश्रुत्यनुसारेणाऽदित्यात् पूर्वप्राप्यत्वमित्यादि बहिरेव सिद्धं कृत्वा आदित्यात् पूर्वप्राप्यत्वेन वायुदेवलोकयोर्विशेषाश्रवणाद्विकल्पः समुच्चयो वेति प्रापय्य देवलोकशब्दो ह्यविशेषेण सामान्येन देवानां लोक इत्यनेन रूपेण वायुमभिधत्ते। 'स वायुमागच्छति तस्मै स तत्र' (बृ. ७.१०.१) इति वायुशब्दो विशेषेण वायुमभिधत्ते । अतो देवलोकवायुशब्दाभ्याम् अविशेषविशेषाभ्यां वायुरेक एवाभिधीयत इत्यर्थभेदाभावान्न विकल्प इति सिद्धान्तयन्ति।

तद्विमर्शः

तेषां यद्यपि कल्पितसूत्रपाठाभिमुख्यमस्ति। तथाऽप्युक्तरीत्या पूर्वपक्षो दुर्बलः। वायोर्द्वितीयप्राप्यत्वाभिधायककौषीतकिश्रुतेरत्यन्तबाधश्च। 'संवत्सरः खलु वै देवानां पूः' इति श्रुत्यनुसारेण वाजसनेये श्रुतस्य मासेभ्यो देवलोकमित्यत्र देवलोकशब्दस्य संवत्सरपरत्वाद् विषयाभावेन सिद्धान्तानुपपत्तिश्च। न च संवत्सरस्य देवपुरत्वेन स्तुतिमात्रत्वाद् देवगृहात्मकदेवलोकत्वासम्भवात् संवत्सरो न गृह्यत इति वाच्यम्। वायोरपि मुख्यतो देवलोकत्वानुपपत्तेः। 'योऽयं पवते एष देवानां गृहाः' इति श्रुतेरपि वायोर्देवगृहत्वेन स्तुतित्वोपपत्तेः।

मतद्वयेऽपि वायोर्द्वितीयप्राप्यत्वत्यागात् कौषीतकिश्रुतिविरोधो वक्ष्यमाण-वचनविरोधश्च। सम्प्रदायपाठत्यागापत्तिश्च। अविशेषविशेषाभ्यामिति सूत्रांश-स्वारस्याभावश्च। 'स वायुलोकम्' इत्यविशेषोपदिष्टस्य वायोः श्रुत्यन्तरे विशेषोपदेशादिति व्याख्यातत्वेन विशेषादित्यनेनैव पूर्तेः 'अविशेष'शब्दवैयर्थ्यं द्विवचनानुपपत्तिश्च स्यात्। विशेषशब्दस्याल्पाच्तरत्वान्निरपेक्षत्वेनाभ्यर्हितत्वाच्च द्वन्द्वे पूर्वनिपातापाताच्च। सामान्यविशेषशब्दाभ्यां वायुरेव निर्दिष्ट इत्यभिप्रायत्वे लाघवात् सामान्यविशेषाभ्याम् इत्येव सूत्रपाठः स्यात्। 'स इतो गतो द्वितीयां

गतिं वायुमागच्छति वायोरहरह्न आपूर्यमाणपक्षम्' (सू.भा.उदा.श्रुतिः ४.३.२) इति स्पष्टश्रुतिविरोधेन द्वितीयप्राप्यत्वेन निश्चितस्य सप्तमप्राप्यत्वाभिधानायोगेन वायुमब्दादिति कल्पितपाठेनाधिकरणरचने सूत्रकृद्द्रोहापातश्च।

अप्रसिद्धश्रुत्युदाहरणाक्षेपपरिहारः

ननु 'स इतो गतो द्वितीयां गतिं वायुमागच्छति' इत्यादिवाक्यं पौरुषेयेष्वपौरुषेयेषु वा विमृश्यापि न शृण्महे। यदीदं वाक्यमश्रोष्यत कथमेवं सूत्रकृद् ब्रूयात्। न चोत्सन्नशाखागतमिदं वाक्यमिति वक्तव्यम्। तदुदाहरणायोगात्। मैवम्। किमुत्सन्नशाखैव नास्तीत्युच्यते, उत त्वयोदाहर्तुं न शक्यत इति। आद्येऽपि किं पठ्यमानाश्चत्वार एव वेदा नातोऽन्याः शाखाः सन्त्युतान्याः सन्ति देशान्तरे कालान्तरे वेति। नाऽद्यः। 'अष्टकाः कर्तव्याः पुष्टिकामेन' इति पठ्यमानमनुवाक्यस्याप्रामाण्यापातात्। न हीदं स्वतः प्रमाणं स्मृत्यधिकरण-विरोधात्। न चास्य पाठश्चतुर्ष्वपि वेदेषूपलभ्यते। मूलं चानुपलभ्य सम्भावना-मात्रेण महर्षेः स्मार्तं वचनं युक्तम्। 'अनन्ता वै वेदाः' इति प्रत्यक्षश्रुति-विरोधाच्च। 'यन्मनुरवदत् तद्भेषजम्' इति मनुविषये श्रवणेनाऽश्वाससम्भवेऽ-पीतरविषये तदसम्भवाच्च।

किञ्च भागवते श्रुत्यर्थग्रथनात्मकवृत्तिविशेषघटितोऽस्ति ग्रन्थः श्रुतिगीति-समाख्यातः। न च प्रत्यक्षमूलत्वे सा युज्यते। नास्य श्रुतयो मूलं पठ्यमानेषूप-लभ्यन्ते च। न द्वितीयः। तास्वनन्तर्गतस्य त्वददर्शनमात्रेणापह्नवायोगात्। तथा सति 'ऊर्जोऽवरुध्यै' 'यज्ञोपवीतम्' इत्यादिश्रुतीनामभावापत्त्या कर्मादि-विलोपप्रसङ्गः। न द्वितीयः। मन्वादावपि पर्यनुयोगसम्भवात्। मन्वादीनां सार्वज्ञ्येन तन्निराकरणे सुतरां मद्भाष्यकर्तुः सार्वज्ञ्यसम्भवात्। 'यद्वै किञ्चिन्मनुरवदत् तद्भेषजम्' इति मनुविषय इव 'मध्वो वो नाम मारुतं यजत्राः' 'दशप्रमतिं जनयन्त योषणः' इत्याद्याचार्यविषयेऽपि श्रवणात्। तस्यान्यार्थत्वे मनुविषयस्याप्यन्यार्थता

स्यात्। मनौ नः सर्वेषां सम्प्रतिपत्तिरस्तीति चेत् सत्यम्। बौद्धानामसम्प्रतिपत्तिः कथं निवार्यते। महत्तरकार्यकर्तृत्वादिनेति चेदिहापि किं न स्यात्। श्रूयते ह्याचार्येऽप्यप्लवगङ्गातरणानधीतशाखोच्चारणादृश्यत्वादिकम्। तद्यदि मृषेति ब्रूयात् मन्वादावपि तथैव ब्रूयादित्यलम्।

मन्मते तु 'यदा वै पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छति' (बृ.७.१०) इत्यादेः, 'अथ यदु चैवास्मिञ्छव्यं कुर्वन्ति यदु च नार्चिषमेवाभिसम्भवन्ति' (छा. ४.१५.५) इत्यादिनाऽविशेषेण श्रवणात् प्रथमप्राप्यत्वमेव वायोरवगम्यते। अन्यथाऽर्चिषोऽपि प्राथम्यं न स्याद् अविशेषात्। अविशेषेण श्रुतस्य वायोर्यावदर्थे विशेषश्रुतिविरोधस्तावन्मात्रस्यैव त्याज्यत्वेनात्र प्रसिद्धिविरोधेन प्राथम्यायोगेऽपि द्वितीयत्वस्यावश्यकत्वात्। सोपानारोहणन्यायेनाविशेषशब्देन वायोर्द्वितीयप्राप्यत्वे युक्तिं सूचयित्वा 'स इतो गतो द्वितीयां गतिं वायुमागच्छति' इति विशेषवाक्यरूपयुक्तिविशेषं विशेषशब्देन सूचयति। अत एव निर्देशव्यत्ययः द्वितीयस्थानमशोध्य सप्तमस्थानं शोधयतस्तवैव। न दूषणावकाशश्च। अविशेषविशेषाभ्यां वायुश्रुतेरित्यन्वयोपपत्तिश्च। तस्मात् 'स्वसूत्रजातस्य विरुद्धभाषी तद्भाष्यकारोऽहमिति ब्रुवन् यः। तं तत्क्षणाद्यो निदिधक्षति स्म स व्यासरूपो भगवान् क्षमाब्धिः' (श्रीमध्वविजयः,१.५३) इति साधूक्तमार्यैः। तदेवं विषयवाक्यज्ञानदरिद्राणां व्याख्यानमनादेयमेव।

सुक्रम-विशेषसम्प्राप्तिरूपपूर्वपक्षसिद्धान्तन्याययोर्विवरणम्

टीकाक्षरार्थस्तु, सुक्रमन्यायस्तद्विवरणं चात्राप्यनुवर्तनीयमिति भावेन,

'न च तत्रतत्र मार्गस्यान्यथोक्तेरधिकारिभेदेन पृथक्पृथङ् मार्गसुक्रमोपपत्तेरिति वाच्यम्'

इति विवरणं व्याचष्टे- **उभयोरपीति**॥ उपपत्तेरित्यंशं व्याचष्टे- **श्रुतिद्वयस्यापीति**॥ ननु स एव चेत् पूर्वः पक्षः कथं न गतार्थतेत्यत आह- **न चेति**॥ 'सर्वे

वा एत उत्क्रामन्ति' इत्यादिसिद्धान्तन्यायविवरणं भाष्येण सहावतारयति- **कुत एतदित्यत आहेति**॥ 'ततो वायुमतोऽहः' इति विवरणगताधिकांशोदाहरणेनास्मिन् सूत्रेऽपीदमेवाभिप्रेतमिति ज्ञायते। शिष्टं निगदव्याख्यानम्।

ननु विवरणकृताऽस्याधिकरणस्य साक्षादेव पूर्वपक्षसिद्धान्तन्यायौ कुतो न विवृतौ। शिष्यैरेवोहितुं शक्यत्वेऽप्यधिकरणान्तरेऽपि कुतो नोहितुं शक्यत इत्यधिकरणान्तरेऽपि स्वयमेव विवरणं न स्यादिति चेन्न। अत्र मात्रयाऽपि पूर्वपक्षसिद्धान्तविवरणे विशेषाभावात्। प्रयोजनान्तरं चाऽह- **वायुश्रुतेर्गतिप्रदर्शनार्थं चैतत्सूत्रमिति**॥ सूत्रप्रदर्शितगतिमेव स्वयं दर्शयति- **प्राथम्यश्रुतेः सामान्यत्वादिति। तदर्थ इति**॥ स वायुमागच्छतीति सामान्यश्रुतेरर्थः। इति वायुश्रुतेर्गतिप्रदर्शनार्थं चैतत्सूत्रमिति सम्बन्धः। इति सूचनार्थं न पृथग्विवरणं कृतमिति शेषः। यद्यप्ययमर्थो न सूत्राक्षरारूढस्तथाऽपि सूचनं शक्यमेवेति भावः।

सूत्रार्थः

सूत्रार्थस्तु, अर्चिषोऽनन्तरं वायुं गच्छति न त्वहरिति शेषः। द्वितीयप्राप्ये 'स वायुमागच्छति', 'स इतो गतो द्वितीयां गतिं वायुमागच्छति' इत्यविशेषविशेषाभ्यां सामान्यविशेषवचनाभ्यां वायुशब्दात् वायुशब्दप्रयोगात्। न हि द्वितीयप्राप्येऽन्यस्मिन्नह्नि वायुशब्दप्रयोगो युज्यत इति।

॥ इति वायुगत्यधिकरणम्॥ २॥

॥ अथ तटिदधिकरणम् ॥ ३ ॥

सूत्रभाष्यम्

ॐ तटितोऽधि वरुणस्सम्बन्धात् ॐ ॥ ४.३.३ ॥

'मासेभ्यस्संवत्सरं संवत्सराद् वरुणलोकं वरुणलोकात् प्रजापतिलोकम्' इति कौण्डिन्यश्रुतिः। 'संवत्सरात् तटितमागच्छति तटितः प्रजापतिलोकम्' इति च गौपवनश्रुतिः। 'तत्र तटितो वरुणं गच्छति। तटिता ह्यूह्यते वरुणलोकस्तटिदुपरि मुक्तामयो राजते तत्रासौ वरुणो राजा सत्यानृते विविश्वति' इत्युपरिसम्ब(न्ध)द्धत्वश्रुतेः॥ ३॥

॥ अथ तटिदधिकरणम् ॥ ३ ॥

तत्त्वप्रकाशिका

सङ्गतिः

अत्र सूत्रमेवाऽदौ पठति- **तटि(डि)त इति** ॥ अत्र ब्रह्मप्राप्तिमार्गे तटितः संवत्सरानन्तर्यसमर्थनादस्ति शास्त्रादिसङ्गतिः। अन्यथानुस्मरणायोगस्यैव प्राप्तेः समर्थनीयमेतत्। प्रकृतो मार्ग एवात्र विषयः। स चार्चिरादिः संवत्सरपर्यन्तं निर्णीतः। तत्र किं संवत्सरलोकानन्तरं वरुणलोकस्य प्राप्यत्वमुत तटित इति सन्देहः। सन्देहबीजं श्रुतिविगानं दर्शयति- **मासेभ्य इति** ॥

पूर्वपक्षः

वरुणतटितोरुभयोरपि संवत्सरानन्तर्यमिति पूर्वः पक्षः। श्रुतिद्वयस्यापि प्रामाण्यात्। न च विरोधः। संवत्सरलोकात् प्रजापतिलोकं गन्तुमधिकारिभेदेन मार्गभेदोपपत्तेः। न चात्र पूर्ववत् किञ्चिदन्यथयितुं प्रमाणमस्ति। अतो मार्गानिर्णयात् तदनुस्मरणानुपपत्तिरिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रं व्याचष्टे- **तत्रेति** ॥ न प्रजापतिं गन्तुं मार्गभेदेन वरुणतटितोरुभयोरपि संवत्सरानन्तरत्वं ग्राह्यं किन्त्वेक एव मार्गः। तत्र संवत्सरानन्तरं तटितमेव गच्छति। न च श्रुत्यन्तरविरोधः। तडितोऽनन्तरं वरुणस्य प्राप्यत्वेन तदर्थत्वोपपत्तेरिति भावः। कुत एतदित्यत आह- **तटितेति** ॥ मुक्तामयो वीतरोगः। विविश्वति विवेचयति। अतो मार्गैक्येनानुस्मरणमुपपद्यत इति सिद्धम्॥ ३॥ अ.३॥

शेषतात्पर्यचन्द्रिका

॥ ॐ तटितोऽधि वरुणः सम्बन्धात् ॐ ॥ ४.३.३ ॥

अनन्तरसङ्गतिः

ननु यदुक्तं वायोर्द्वितीयप्राप्यत्वं 'स इतो गतो द्वितीयां गतिं वायुमागच्छति' इति निरवकाशश्रुत्याऽह्नो द्वितीयप्राप्यत्वबाधनाद् उभयद्वितीयत्वानुपपत्तेश्चेति। तटिद्वरुणयोस्तूभयोरपि सप्तमप्राप्यत्वं न बाधनीयम्। 'मासेभ्यः संवत्सरं संवत्सराद्वरुणलोकं वरुणलोकात् प्रजापतिलोकम्' (कौण्डिन्य.सू.भा. ४.३.३) इति 'संवत्सरात्तटितमागच्छति तटितः प्रजापतिलोकम्' (गौपवनश्रुतिः,सू.भा. ४.३.३) इति कौण्डिण्यगौपवनश्रुत्योः समबलत्वेनान्यतरबाधायोगात्। न चात्र विशेषश्रुतिरस्ति। येन पूर्वन्यायेनान्यतरसप्तमत्वनिश्चयः स्यात्। तस्मादुभयसप्तमत्वमेव न्याय्यम्। न च विरोधः। संवत्सरात् केचिदधिकारिणो वरुणं प्राप्नुवन्ति। केचिच्च संवत्सरात्तटितमित्यधिकारिभेदेनोपपत्तेः। न च मार्गस्यैकविध्यविरोधः। संवत्सरपर्यन्तमैकविध्येऽपि ततो विधान्तरस्यापि सम्भवाद् गरुडशेषमार्गयोरिवेति। तस्मादत्रावश्यं विधान्तरे वक्तव्ये पूर्वत्रापि विधान्तरमाश्रित्याहर्द्वितीयत्ववायुद्वितीयत्वयोर्वायुप्राथम्यार्चिःप्राथम्ययोश्च सम्भवात् पूर्वोक्तमप्ययुक्तमित्युत्थानादनन्तरसङ्गतिः।

पूर्वपक्षः

वरुणं तटितं वाऽपि वत्सरप्राप्त्यनन्तरम् ।
प्राप्नोति तेन मार्गस्य नानुस्मरणसम्भवः ॥

इति पूर्वः पक्षः ।

सिद्धान्तः

सिद्धान्तस्तु, यद्यप्यत्र विशेषश्रुतिर्नास्ति । तथापि युक्त्या तटित एव सप्तमप्राप्यत्वसिद्धिः । न च वरुणस्यापि तथा तस्य तटिल्लोकेनोह्यत्वात् । वरुणलोको हि तटित उपरिस्थितः । न ह्यधस्तनं लोकमप्राप्योपरितनो वरुणलोकः प्राप्तुं शक्यते । तस्मात्सर्वेषां ज्ञानिनां संवत्सरानन्तरं तटिल्लोकप्राप्तिरवर्जनीयेति तस्यैव सप्तमप्राप्यत्वं न वरुणलोकस्य । न चानयोर्वाह्यवाहकभावासिद्धिः । 'तटिता ह्यूह्यते वरुणलोकः । तटित उपरि मुक्तामयो राजते । तत्रासौ वरुणो राजा सत्यानृते विविञ्चति' (सू.भा.उदा.श्रुतिः ४.३.३) इत्युपरि सम्बन्धश्रुतेः ।

'युक्तोऽयुक्तश्च यत्रार्थ आगमस्य प्रतीयते ।
स्यात्तत्र युक्त एवार्थ इति न्यायानुसारतः ॥
तटितः सप्तमप्राप्तिवादिनी युक्तिसंश्रयात् ।
प्रबला श्रुतिस्ततोऽन्या तु बाध्यते तेन निर्णयः ॥' इति ।

उभयोक्ततटिदधिकरणशरीरम्

अत्रोभयेऽप्याहुः । कौषीतकिनः पठन्ति । 'स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं स प्रजापतिलोकम्' (कौ. १.३) इति । तत्र वरुणेन्द्रादयो यथापाठं वायोरूर्ध्वं निवेशयितव्याः, आहोस्विद् विद्युतोऽधीति विशयेऽर्चिःप्रभृतिषु सर्वेषु 'अर्चिषोऽहः' (छा. ४.१५.५) इत्यादिश्रुतक्रमोपरोधात् । विद्युतः परस्ताच्च 'तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयति' (छा. ४.१५.६) इति विद्युत्पुरुषस्य

ब्रह्मगमयितृत्वश्रवणाच्च । सर्वत्रावकाशाभावेनाप्राप्तौ चोपदेशावैय्यर्थ्यायावश्यं कस्यचिद्बाध्यत्वे पाठक्रमानुरोधेन वायोरनन्तरं वरुणो निवेशयितव्यः । वाय्वादित्ययोः क्रमस्य बाधितत्वेनेन्द्रप्रजापती अप्यत्रैव निवेशयितव्याविति प्राप्त उच्यते- **तटितोऽधि वरुण इति ॥** वरुणस्तावद्विद्युत उपरिष्टान्निवेशयितव्यः । कुतः ? सम्बन्धात् । मेघोदरवृत्तित्वाद्विद्युतो वरुणेन सम्बन्धो लोकवेदयोः प्रसिद्धः । विद्युज्ज्वलं च मेघोदरस्थम् । तत्र विद्युतः स्फुटतरदृश्यत्वात् सलिलस्य तथा दृश्यत्वाभावाच्च सलिलस्य विद्युत उपरिस्थितिर्गम्यते । सलिलस्य चाभिमानी वरुणः । अभिमन्यमानयोः सम्बन्धानुरूपमभिमानिदेवतयोरपि सम्बन्धो न्याय्य इति तटिदभिमानिन ऊर्ध्वं जलाभिमानी वरुण इति कल्प्यते । ततश्च वरुणादीनामुपदेशावैय्यर्थ्याय क्वचिन्निवेशयितव्यत्वे सति पाठक्रमादर्थक्रमस्य बलीयस्त्वाद् विद्युतोऽधि वरुणो निवेशयितव्यः । ततश्चामानवस्य गमयितृत्वं व्यवधानसहमित्यवगम्यते । तस्य च व्यवधानसहत्वादिन्द्रादेश्चोपदिष्टस्यावश्यं निवेशयितव्यस्य वरुणादुपर्युपदिष्टत्वादागन्तुकानामन्ते निवेशयितव्यत्वाच्च वरुणादुपरीन्द्रादीनां निवेशः ।

तडिदन्तेऽर्चिराद्यध्वन्यप्पतिस्तडितः परः ।
तत्सम्बन्धात्तथेन्द्रादिरप्पतेः पर इष्यते ।
आगन्तूनां निवेशोऽन्ते स्थानाभावात्प्रसाधितः ।
तथा चेन्द्रादिरागन्तुः पठ्यते चाप्पतेः परः ॥ इति ।

तद्विमर्शः

तन्न । विद्युत उपरि वरुणादेर्निवेशे 'तत्पुरुषोऽमानवः' इत्यत्र तत्पुरुषशब्देन विद्युत्पुरुषस्य परामर्शासम्भवेन वाक्यस्यात्यन्तबाधापत्त्या कौषीतकिश्रुति-पाठानुरोधेन वाय्वनन्तरमेव वरुणादीनां निवेशोपपत्तेः । वायोरुक्तरीत्या तावत्पर्यन्तं सहगमनेन 'तेन स ऊर्ध्वम् आक्रमते' (बृ. ७.१०.१) इत्युक्तोर्ध्वाक्रमण-

निमित्तत्वोपपत्तेः । पाठक्रमबाधकस्यान्यस्यादर्शनाच्च । मेघोदरवृत्तित्वादिरर्थक्रमोऽस्तीति चेन्न । विद्युज्जलयोर्मेघसंस्थत्वस्य विद्युतोऽनन्तरं जलाभिमानिवरुणस्य प्राप्यत्वे नियामकत्वायोगाच्च । वरुणानन्तरमेव विद्युतः प्राप्यत्वापाताच्च ।

ननु मेघसंस्थत्वमात्रं न नियामकं ब्रूमः । किन्तु मेघोदरे विद्युत उपरि जलस्य सत्त्वम् । तच्च मेघोदरे विद्युतः स्फुटतरस्फुरणादितरस्य तदभावात् सिद्ध्यतीति चेन्न । स्फुटतरं परिस्फुरतो दीपादेरन्त्येऽवस्थितिदर्शनात् । उपरिस्थिताया अपि विद्युतो भास्वररूपादिना दीपादेरिव स्फुटतरस्फुरणसम्भवाच्च । त्वदुक्तेनैव विद्युज्जलयोः मेघोदरस्थितत्वादिन्यायेन विद्युज्जलाधारमेघमण्डलाभिमानिदेवस्यापि तदधःस्थितचन्द्रमसोऽप्युपरिस्थत्वावश्यम्भावेनार्चिरादिमार्गे मेघनिवेशस्य विचार्यत्वेऽपि तत्परित्यागायोगाच्च । मेघमण्डलस्य पितृयाणमार्गे निविष्टतया तदुदरस्थस्य वरुणस्य पूषानुमन्त्रणमन्त्रवद्देवयानप्रकरणादुत्कर्षस्यैव न्याय्यत्वाच्च ।

शाङ्करभाष्योक्तविद्युद्वरुणसम्बन्धविमर्शः

एतेन, 'यदा हि विशाला विद्युतस्तीव्रस्तनितनिर्घोषा जीमूतोदरेषु प्रनृत्यन्त्यथाऽपः प्रपतन्ति । विद्योतते स्तनयति वर्षिष्यति वा' (छा. ७.११.१) इति च ब्राह्मणम्, 'अपां चाधिपतिर्वरुणः' इति श्रुतिस्मृतिप्रसिद्धो विद्युद्वरुणयोः सम्बन्ध इति निरस्तम् । अत्र विद्युत उपरि वरुणस्यावस्थानाप्रतीतेश्च । 'संवत्सराद् वरुणलोकम्' (कौण्डिन्यश्रुतिः), 'संवत्सरात् तटितमागच्छति' (गौपवनश्रुतिः) इति कौण्डिण्यगौपवनश्रुत्योः संवत्सरानन्तरं विगानदर्शनात्तदविचार्यैव तदनन्तराम्नातविद्युदनन्तरस्थानविचारानुपपत्तेश्च । श्रुतिस्थविद्युत्पदानुसारेण विद्युतोऽधि वरुण इति सूत्रयितव्येऽप्यन्यथा सूत्रणे नियामकादर्शनाच्च । 'यदा हि विशाला विद्युत्' इति त्वदुदाहृतश्रुतावपि विद्युत्पदस्यैव दर्शनाच्च ।

'उदक्संवत्सरं तथा । तटितं वरुणं चैव प्रजापं सूर्यमेव च' (सू.भा.उदा. ब्रह्मतर्कवचनम्, ४.३.५) इत्यादौ संवत्सरादनन्तरं प्राप्यतटित 'उत्क्रान्तो विद्वान् परमभिगच्छन् विद्युतमेवान्तत उपरि गच्छति । द्यौर्वाव विद्युत् तत्पतिं वायुमुपगम्य तेनैव ब्रह्म गच्छति' इत्यन्ते प्राप्यविद्युदभेदायोगाच्च ।

यच्चोक्तम्, 'अग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निर्वपेत्' इति नक्षत्रेष्टिर्दर्शपूर्णमासविकृतिराम्नाता । तत्रोपहोमाः श्रूयन्ते 'अग्नये स्वाहा कृत्तिकाभ्यः स्वाहा' इत्येवमादयः । सन्ति च प्रकृतेरतिदेशतः प्राप्ता नारिष्टहोमाः । तत्र किमुपहोमाः पूर्वमनुष्ठेया उत नारिष्टहोमा इति संशये प्रधानभूतनक्षत्रेष्टचनन्तरं प्रत्यक्षतः श्रुतत्वाद् उपहोमा अव्यवधानेन पूर्वमनुष्ठेयाः । आतिदेशिकास्त्वप्रत्यक्षत्वाद् तद्व्यवधानेन पश्चात्कार्या इति प्राप्य प्रकृतौ हि क्लृप्तोपकारमङ्गमुपकाराकाङ्क्षिणी विकृतिः प्रथमं गृह्णाति । ततः प्राकृतनारिष्टहोमानां प्रधानशब्दगृहीतत्वात् प्राथम्यम्, इतरेषां तु सन्निधिवशाद् आकाङ्क्षां परिकल्प्य पश्चात् प्रधानसम्बन्धभाजामन्ते प्रयोग इति । तथा चेन्द्रादिरप्यागन्तुकत्वादन्ते वरुणस्योपरि निवेशित इति ।

तदेतदप्ययुक्तम् । येषां हि प्रकृतकर्मसन्निधौ न प्रत्यक्षपाठोऽन्यत्रोपकारश्च क्लृप्त आगन्तूनां च तद्विपरीतं तत्रैवोक्तन्यायावतारः । प्रकृते 'स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति' (कौ. १.३) इत्युपक्रम्य तत्सन्निधावेवेन्द्रप्रजापत्योः पाठदर्शनात् । इह पाठादर्शनात् । अस्यामनुपूर्व्यां कस्यचिदुपकारस्याक्लृप्तत्वाच्च । अन्यथा वरुणस्याप्यर्चिरादौ वर्त्मनि विद्युत उपरि निवेशो न स्यात् । तत्रोक्तसम्बन्धविशेषाद्वरुणनिवेशो नोक्तन्यायेनेति चेत् । 'आदित्याज्जायते वृष्टिः' (मैत्रायण्युपनिषत् ६.३७) इत्यादिनाऽऽदित्यवाय्वादीनामपि वरुणस्येव जलसम्बन्धसद्भावात् तटिदुपरि निवेशः स्यात् । वरुणस्य वाऽऽदित्यादीनामुपरि स्यात् । 'चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः । स एनान् ब्रह्म गमयति' (छा.

५.१०.२) इत्यनन्तरश्रुतब्रह्मसम्बन्धस्य विद्युतः क्लृप्तत्वात् वरुणादीनां च ब्रह्मसम्बन्धस्याक्लृप्तत्वात् परित्यागस्यैवोचितत्वाच्च। अन्यथाऽक्लृप्तोपकारमुपहोमं परित्यज्य क्लृप्तोपकारं नारिष्टहोमं नक्षत्रेष्टिर्न गृह्णीयादिति 'प्रकृतेः पूर्वोक्तत्वादपूर्वमन्ते स्यान्न ह्यचोदितस्य शेषाम्नानम्' इति पाश्चमिकन्यायो (जै.सू. ५.२.१७) विरुध्येत।

किञ्च राजसूयेऽभिषेचनीयसोमयागेऽपि विदेवनाद्यभिषेकान्तपदार्थेषु 'माहेन्द्रस्तोत्रं प्रत्यभिषिच्यते' इति वचनेनैवापकृष्यमाणोऽभिषेकः स्वपूर्वभाविपदार्थान्वितदेवनादीनमपि प्रत्यक्षपाठेन क्लृप्तक्रमानपकर्षतीति 'कृतदेशात्तु पूर्वेषां स देशः स्यात्' इति पञ्चमे (जै.सू. ५.२.२१) स्थितम्। यथोक्तम्-

'अभिषेकेण पूर्वेषां क्रमः प्रत्यक्षपाठतः।
परत्वं [1]प्राकृताङ्गेभ्यस्त्वनुमानेन गम्यते॥ इति।

तथा चेहापि 'उत्क्रान्तस्तु शरीरात् स्वात् गच्छत्यर्चिषमेव तु' (ब्र.त.वचनम्, सू.भा. ४.३.५) इत्यादिना वरुणपर्यन्तप्राप्तिमभिधाय 'प्रजापं सूर्यमेव च' इत्यादिना प्रजापतिसूर्यसोमवैश्वानरेन्दुध्रुवदेव्यन्ताः पदार्था आम्नाताः। तत्र त्वदुक्तेन सम्बन्धविशेषेण प्रबलेन हेतुना विद्युतोऽपकर्षेऽभिषेकापकर्षे तत्पूर्वभाविदेवनादीनामिव विद्युतः पूर्वभाविप्रजापत्यादिध्रुवान्तानामप्यपकर्षे तदन्तर्गतानामिन्द्रप्रजापत्यादीनां वरुणादधस्तादेव निवेशप्राप्त्या वरुणादुपरि निवेशः पाञ्चमिकन्यायविरुद्धः।

ननु नेदं वचनं मार्गनिर्णायकं देवयानं प्रकृत्याऽऽम्नातासु नानाशाखास्वन्यथोक्तेः। तथाहि बृहदारण्यके मासानन्तरं देवलोक आम्नातः। स नास्मिन् वचने सङ्गृहीतः। तटिद्वैश्वानरध्रुवा नोदाहृतासु शाखास्वाम्नाताः।

[1] प्राप्य चाङ्गेभ्यः- प.

अर्चिःशब्देनाग्निश्च वैश्वानरशब्देन पुनरुक्तः। उत्तरोत्तरं प्राप्यस्योत्तमत्वनियमानाश्रयणे उत्तमत्वसिद्ध्यर्थं वायोरन्त्यप्राप्यत्वनियमसमर्थनायोगश्च। तदाश्रयणे तु सोमाद् वैश्वानरस्येन्द्राद् ध्रुवस्य सूर्यात् सोमस्य चोत्तमत्वापत्तिश्च। मैवम्। 'संवत्सरो वै देवानां पूः' इत्यादिश्रुत्या देवलोकशब्देन संवत्सरस्यैवाभिधानात्। 'संवत्सरात्तटितमागच्छति। तटितः प्रजापतिलोकम्' इति गौपवनश्रुतौ तटित आम्नानात्। कौषीतकिशाखायामग्निलोकशब्देन वैश्वानरस्याऽम्नानात्। अर्चिश्शब्देनाग्निपुत्रस्योक्तावपि मूलाग्नेर्वैश्वानरशब्देनोक्तिसम्भवात्। ध्रुवस्य शाखान्तरोक्तिसम्भवात्। उत्तरोत्तरं प्राप्यस्योत्तमत्वमित्युत्सर्ग इति सम्भवाच्च। ततः सर्वशाखाविदग्रेसरेण प्रतिपादित एव मार्गक्रमः। न त्वर्वाचीनोत्प्रेक्षित इति सिद्धम्।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- **अत्र सूत्रमेवेति**॥ अन्यत्राप्येवमिति ज्ञापनायेति शेषः। **तटित इति**॥ तटित एवेत्यर्थः। वरुणलोकस्यापि प्राप्यत्वमुत तटित एवेति विमर्शार्थो ज्ञातव्यः।

सुक्रम-विशेषसम्प्राप्तिरूपपूर्वपक्षसिद्धान्तन्याययोर्विवरणम्

अत्रापि सुक्रमन्यायं तद्विवरणं चाऽवर्त्य व्याख्याति- **वरुणतटितोरुभयोरपीति**॥ तेन तत्र तत्र कौण्डिन्यश्रुतौ गौपवनश्रुतौ च मार्गस्यान्यथोक्तेर्वरुणसप्तमत्वतटित्सप्तमत्वोक्तेरिति विवरणयोजना सूचिता भवति। अत्र विशेषसम्प्राप्तिरूपसैद्धान्तिकन्यायविवरणमेतदधिकरणसङ्गतत्वेन शिष्यैरेव क्रियतामिति स्वयमेव न विवृत इति मन्वानः स्वयं विवृणोति- **तटितोऽनन्तरं वरुणस्येति**॥ तेन तटितोऽनन्तरं वरुणस्य प्राप्यत्वरूपविशेषसम्प्राप्तिः। तत्परत्वं श्रुतेरिति न्यायस्य विवरणम्। 'संवत्सराद्वरुणलोकम्' इति वरुणलोकश्रुतेर्गतिप्रदर्शनार्थं चैतत्सूत्रमिति ज्ञापनाय न स्वयमेव विवरणमकार्षीदाचार्य इति च सूचयति।

सूत्रार्थः

तटितोऽनन्तरं वरुण एव प्राप्यः । 'तटिता ह्यूह्यते वरुणलोकः' (सू.भा. उदा.श्रुतिः ४.३.३) इत्यादिश्रुत्याऽधि सम्बन्धात् तटित उपरि वरुणलोक-सम्बन्धसत्त्वादिति सूत्रार्थः । 'तटितोऽधि वरुणः सम्बन्धात्' इति केचित् सूत्रं पठन्ति । तत्रापीयमेव योजना ॥

॥ इति तटिदधिकरणम् ॥ ३ ॥

॥ अथ आतिवाहिकाधिकरणम् ॥ ४ ॥

सूत्रभाष्यम्

ॐ आतिवाहिकस्तल्लिङ्गात् ॐ ॥ ४.३.४ ॥

पूर्वोक्तस्त्वातिवाहिको वायुः । पूर्वगमनलिङ्गात् ॥ ४ ॥

तत्त्वप्रकाशिका

सङ्गतिः

अत्र ब्रह्मप्राप्तिमार्गेऽर्चिरनन्तरप्राप्यस्य वायोरातिवाहिकत्वसाधनादस्ति शास्त्रादिसङ्गतिः । अन्यथा वायोरुत्तमत्वासिद्धेः समर्थनीयमेतत् । प्रकृतो वायुरत्र विषयः । किं मुख्यवायुरुतामुख्य इति सन्देहः । वायुशब्दः सन्देह-बीजम् ।

पूर्वपक्षः

मुख्यवायुरिति पूर्वः पक्षः । वायुशब्दस्य तत्रैव मुख्यत्वात् । तस्यापि प्राप्यत्वात् । न चात्र बाधकं किञ्चिदस्ति येन वायुशब्दस्यामुख्यार्थत्वं स्यात् । अतो वायोरर्चिषोऽनन्तरमेव प्राप्यत्वान्न तस्याऽधिक्यमिति ।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **आतिवाहिक इति** ॥ योऽयं पूर्वं प्राप्यतयोक्तो वायुरसावातिवाहिक एव न तु मुख्यः । पूर्वप्राप्यत्वलिङ्गात् । तद्ध्यमुख्यस्यैव भवेन्न मुख्यस्येति भावः ॥ ४ ॥

सूत्रभाष्यम्

कुत्रः?-

ॐ उभयव्यामोहात् तत्सिद्धेः ॐ ॥ ४.३.५ ॥

'स वायुमागच्छति' (बृ.उ.७-१०-१) इति प्रथममुच्यते। 'उत्क्रान्तो विद्वान् परमभिगच्छन्विद्युतमेवान्तत उपगच्छति द्यौर्वाव विद्युत्पतिं वायुमुपगम्य तेनैव ब्रह्म गच्छति' इत्यन्तेऽपि वायुगमनश्रुतेः। पूर्वोक्त आतिवाहिकः परो वेति व्यामोहे उत्तरे दिवस्पतिरिति विशेषणात् पूर्वत्राऽतिवाहिकस्यैव सिद्धेः। ब्रह्मतर्के च-

'उत्क्रान्तस्तु शरीरात् स्वाद्गच्छत्यर्चिषमेव तु।
ततो हि वायोः पुत्रं च योऽसौ नाम्नाऽऽतिवाहिकः॥
ततोऽहः पूर्वपक्षं चाप्युदक्संवत्सरं तथा।
तटितं वरुणं चैव प्रजापं सूर्यमेव च॥
सोमं वैश्वानरं चेन्द्रं ध्रुवं देवीं दिवं तथा।
ततो वायुं परं प्राप्य तेनैति पुरुषोत्तमम्' इति॥ ५॥

॥ इति आतिवाहिकाधिकरणम्॥ ४॥

तत्त्वप्रकाशिका

ननु तथाऽपि कथं पूर्वप्राप्यस्य वायोरातिवाहिकत्वसिद्धिः। मुख्यस्य प्राप्त्यभावापातात्। अथोत्तरत्रापि कश्चिद् वायुः प्राप्योऽस्तीत्युच्यते तथाऽप्यनिवृत्तः संशयः। किं पूर्वोक्त आतिवाहिको मुख्यो वेत्यादि। मुख्यस्यापि प्रथमप्राप्तिसम्भवात्। न च विशेषहेतुरस्ति येन पूर्वोक्तस्याऽतिवाहिकत्वसिद्धिरिति भावेनाऽऽक्षिपति- **कुत इति**॥ तत्परिहाराय सूत्रं पठित्वा व्याचष्टे- **उभयेति**॥ युक्तं पूर्वोक्तस्याऽतिवाहिकत्वम्। यथा पूर्वं वायोः प्राप्तिः श्रूयते तथोत्तरत्रापि वायोः प्राप्तिश्रवणान्मुख्यप्राप्तेरप्युपपत्तेः। ननूक्तमत्र। सत्यम्। किमयं पूर्वोक्त आतिवाहिको मुख्यो वा परत्रोक्तश्चाऽतिवाहिको मुख्यो वेति सन्देहेऽपि पूर्वोक्तस्याऽतिवाहिकत्वं परत्रोक्तस्य मुख्यत्वं सिद्ध्यति। उत्तरस्य दिवस्पतित्वश्रवणात् तस्य च मुख्यवायुलिङ्गत्वात् इति भावः। कथं वरुणावराया विद्युतोऽन्ततो गम्यत्वमित्यत उक्तम्- **द्यौरिति**॥ नन्वस्तूत्तरस्य मुख्यत्वं तथाऽपि पूर्वोक्तस्याऽतिवाहिकत्वानिश्चयो मुख्यस्योभयत्रावस्थानसम्भवादित्याशङ्कां परिहर्तुं सर्वमपि मार्गं स्मृत्या दर्शयति- **ब्रह्मतर्के चेति**॥ अतः प्रथमप्राप्यस्याऽतिवाहिकत्वाद् युक्तं मुख्यस्य मुख्यत्वमिति सिद्धम्॥ ५॥ अ. ४॥

शेषतात्पर्यचन्द्रिका

ॐ आतिवाहिकस्तल्लिङ्गात् ॐ ॥ ४-३-४ ॥

एतदधिकरणप्रतिपाद्यविषयः, सङ्गतिश्च

अत्र द्वितीयप्राप्यस्य वायोरातिवाहिकत्वं समर्थ्यते। ननु द्वितीयप्राप्यस्य वायुत्वं समर्थ्य तस्य तदन्वेवाऽतिवाहिकत्वं च समर्थ्य सप्तमप्राप्यविचार एवोचितः। तत्कथमत्राऽतिवाहिकत्वसमर्थनं सङ्गतम्। उच्यते। नात्र द्वितीयप्राप्यस्याऽतिवाहिकत्वसमर्थनं मुख्यप्रमेयम्। किन्तु तद्द्वारोपान्त्यप्राप्यस्य वायोर्मुख्यत्वसमर्थनम्। अत एव द्वितीयसूत्रं तदभिमुखम्। अत एव च तत्र भाष्यम्। उत्तरे 'दिवस्पतिरिति विशेषणात्' इति। 'तस्य मुख्यवायुलिङ्गत्वात्' इति टीका च। 'अर्चिषोऽनन्तरप्राप्यस्य वायोरातिवाहिकत्वसमर्थनात्' इति टीका त्वाद्यसूत्रानुसारेणावान्तरप्रमेयस्य प्रतिपादनपरा। न तु मुख्यस्य। अत एव वायोरातिवाहिकत्वसमर्थनद्वारा प्रधानवायोरुपान्त्यप्राप्यत्वसमर्थनादस्ति शास्त्रादिसङ्गतिः। अन्यथोत्तमस्यान्ते प्राप्तिरित्युत्सृष्टस्य बाधकं विना त्यागायोगेन प्रधानवायोर्द्वितीयप्राप्यत्वे तदुत्तरप्राप्यानामेवोत्तमत्वप्राप्त्या तस्य तदसिद्धेः समर्थनीयमेतत्।

विषयसन्देहौ

प्रकृत उपान्त्यप्राप्योऽत्र विषयः। मुख्यवायुरुत, अमुख्यवायुरिति सन्देहः। तदर्थं द्वितीयप्राप्यत्वेन प्रकृतो वायुः किं मुख्य उत, अमुख्य इति सन्देह इत्यादि टीकाऽपि योज्या।

अनन्तरसङ्गतिः

ननु युक्तं पूर्वत्र वरुणलोकस्य तटितोह्यमानत्वरूपलिङ्गेन निरवकाशेन श्रुतेरर्थान्तरकल्पनम्। वायुमुपगच्छति तेनैव ब्रह्म गच्छतीत्युपान्त्ये प्राप्यतया श्रूयमाणो न प्रधानो वायुरिति निर्णयो युक्तः। आतिवाहिकस्याप्यत्र वायुशब्देन ग्रहणसम्भवात्। सामान्यश्रुतेर्निर्निमित्तं बाधायोगात्। किञ्च द्वितीय-प्राप्यस्तावन्मुख्यवायुः। वायुशब्दस्य तत्रैव मुख्यत्वात्। तस्याप्यस्मिन् मार्गे प्राप्यत्वस्यावश्यमङ्गीकार्यत्वाच्च। अन्यथा वृथा मुख्यार्थत्यागापत्तिः। न चास्याऽतिवाहिकत्वज्ञापकं श्रुतिलिङ्गादिकमस्ति। येन पूर्वन्यायेन सावकाशश्रुतिबाधः स्यात्। तथा च द्वितीयप्राप्यस्य मुख्यवायुत्वादुपान्त्यप्राप्यस्य मुख्यवायुत्वं त्याज्यमिति न तस्याऽधिक्यं सिद्ध्यति। न च मुख्यवायोरेवार्चिष इव रूपभेदेन स्थानद्वयेऽप्यवस्थानं कल्प्यम्। व्यर्थत्वात् प्रमाणाभावाच्चेति शङ्कनाद्वा, यथोर्ध्वाधरीभावलिङ्गेन वरुणतटितोः प्राप्तिक्रमनिर्णयः तथेहापि पूर्वप्राप्यत्वान्त्यप्राप्यत्वरूपलिङ्गादातिवाहिकप्रधानवाय्वोः प्राप्तिक्रमोऽपि निर्णेतव्य इत्यतिदेशनाद्वाऽनन्तरसङ्गतिः।

पूर्वपक्षः

पूर्वप्राप्यो वायुरत्र प्रधानो नैव चापरः।
वायुश्रुतेरमुख्यत्वकल्पनं ह्यन्यथा भवेत्॥
इति पूर्वः पक्षः।

सिद्धान्तः

सिद्धान्तस्तु-
पूर्वप्राप्यत्वलिङ्गं हि न प्रधानस्य युज्यते।
उत्तमस्य यतः प्राप्तिरन्त एवेति निर्णयः॥
तस्मादुपान्त्यप्राप्यस्य प्रधानत्वं विनिश्चितम्।
न ह्यन्यस्यान्तिमप्राप्तिर्युज्यते शास्त्रबाधतः॥
न चोभयत्र तस्यैव प्राप्तिरेकस्य युज्यते।
उत्क्रान्तस्तु शरीरात् स्वाद्गच्छत्यर्चिषमेव तु।
ततो हि वायोः पुत्रं च योऽसौ नाम्नाऽऽतिवाहिकः॥
ततोऽहः पूर्वपक्षं चाप्युदक् संवत्सरं तथा।
तटितं वरुणं चैव प्रजापं सूर्यमेव च॥
सोमं वैश्वानरं चेन्द्रं ध्रुवं देवीं दिवं तथा।
ततो वायुं परं प्राप्य तेनैति पुरुषोत्तमम्॥'
इत्यादिवाक्यतो मार्गनिर्णयाद् विफलत्वतः।
प्रमाणाभावतश्चापि नान्यत् कल्प्यमिति स्थितम्॥ इति।

सुक्रम-विशेषसम्प्राप्तिरूपपूर्वपक्षसिद्धान्तन्याययोर्विवरणम्

टीकाक्षरार्थस्तु, सुक्रमन्यायं तद्विवरणं चैतदधिकरणसङ्गतत्वेनापि व्याचष्टे- **वायुशब्दस्य तत्रैव मुख्यत्वादित्यादिना**॥ तेन तत्रतत्र 'स वायुमागच्छति' 'उत्क्रान्तो विद्वान्' इति श्रुतिद्वये मार्गभूतस्य वायोरन्यथोक्तेरर्चिरनन्तरं विद्युदनन्तरं च प्राप्यत्वोक्तेः प्रथमत एव मुख्यवायुग्रहणे तस्य प्रथमप्राप्यत्वलक्षण-सुक्रमोपपत्तिरित्येतावदेव वाक्यमत्र सङ्गतमिति सूचयति। एवं विशेषसम्प्राप्तिन्यायो 'विशेषश्रुतितो ज्ञानिनामेकमार्गस्यैव प्राप्तेः' इति तद्विवरणैकदेश एवात्र सङ्गत इति भावेन व्याचष्टे- **उत्तरस्य दिवस्पतित्वश्रवणात् तस्य च मुख्यवायुलिङ्गत्वा-**

दिति ॥ तेन दिवस्पतित्वश्रवणात् तस्य च मुख्यवायुलिङ्गत्वात् तद्बलादुत्क्रान्तो विद्वानिति श्रुतेः विशेषश्रुतित्वनिश्चयेन मुख्यवायुरूपमार्गस्यैवान्तिमत्व-प्राप्तेर्नाऽऽतिवाहिकस्यान्तिमप्राप्यत्वमिति विवरणयोजनां सूचयति।

ननु 'ब्रह्मतर्के च' इत्युत्तरभाष्यमधिकमित्यतोऽवतारयति- **नन्वस्तूत्तर-स्येति ॥** अर्चिष एवोभयत्रावस्थानदर्शनादिति भावः। ननु 'ते य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धां सत्यमुपासते तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाण-पक्षमापूर्यमाणपक्षाद्यान् षण्मासानुदङ्ङेति मासेभ्यो देवलोकं देवलोकादादित्य-मादित्याद्वैद्युतं तान् वैद्युतान् पुरुषो मानवः एत्य ब्रह्मलोकान् गमयति। तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति। तेषां न पुनरावृत्तिः' (बृ. ८.२.१५) इति बृहदारण्यके श्रूयते। तत्रैव 'यदा वै पुरुषो अस्माल्लोकात् प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खम्। तेन स ऊर्ध्वम् आक्रमते स आदित्यमागच्छति तस्मै स तत्र विजिहीते यथाडम्बरस्य खम्। तेन स ऊर्ध्वम् आक्रमते स चन्द्रमसमागच्छति। तस्मै स तत्र विजिहीते यथा दुन्दुभेः खम्। तेन स ऊर्ध्वम् आक्रमते स लोकमागच्छत्यशोकमहिमं तस्मिन् वसति शाश्वतीः समाः' (बृ. ७.१०.१) इति। छान्दोग्ये पञ्चमेऽध्याये सप्तमप्रपाठके- 'तद्य इत्थं विदुर्ये चेमे अरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षडुदङ्ङेति मासांस्तान् मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतम्। तत्पुरुषो मानवः स एनान् ब्रह्म गमयति। एषः देवयानः पन्थाः' (छा. ४.१५.५) इति। एवमेव चतुर्थाध्याये पञ्चदशे प्रपाठकेऽपि। तथा च 'उत्क्रान्तस्तु शरीरात् स्वात्' इत्यादिब्रह्मतर्कवचनं तद्विरुद्धं कथं प्रमाणं स्यात्। अत्र हि वचने संवत्सरानन्तरं तटितः प्राप्तिरुच्यते। श्रुतौ तु संवत्सरादादित्यस्य। एवं श्रुतौ स वायुमागच्छतीत्युक्त्वा स आदित्यमागच्छतीति। अत्र च ततोऽहरिति। श्रुतौ मासेभ्यो देवलोकमिति।

अत्र तूदक्संवत्सरं तथेति। श्रुतावादित्याद्वैद्युतानिति। अत्र तु प्रजापं सूर्यमेव च सोममिति। चन्द्रमसो विद्युतमिति श्रुतौ। अत्र तु ध्रुवं देवीं दिवं तथेति। ततः कथं न विरोध इति चेत्,

सत्यम्। शाखान्तराधिकरणन्यायेन शाखान्तरोक्तमार्गाणां न भेदः। अत एव तत्र तत्रोक्तानामन्योन्यस्मिन् उपसंहाराङ्गीकारेण वाक्यैकत्वान्मार्गैक्यम्। तेन शाखान्तरेषु न्यूनाधिक्यश्रवणात् श्रुतीनां परस्परविरोधेनाप्रामाण्यमिति चोद्यं निरस्तम्। यत्र न्यूनगुणाः श्रूयन्ते तत्राधिकगुणानामपि ग्रहणम्। यत्राधिकगुणाः श्रूयन्ते तेषां तत्र विधानम्। यत्र सर्वसाम्यं तत्र समाख्यारूपत्वमित्यङ्गीकारात्। विरुद्धगुणश्रवणं तु नास्त्येव।

परन्तु क्वचिन्मार्गत्वेन प्रापितानामर्चिरादीनां मध्ये क्रमोऽन्योऽन्यस्यां शाखायां श्रूयते। तथापि न तत्र तासां तात्पर्यम्। 'उत्क्रान्तस्तु शरीरात् स्वात्' इत्यादिब्रह्मतर्कवचनविरोधात्। पदार्थानां धर्मिणां प्राप्तानामेव सतां तद्धर्मः क्रमः आकाङ्क्षित इति प्राप्तिसमये क्रमाकाङ्क्षाभावेन तासां तासां श्रुतीनां धर्मिस्वरूपमात्र एव तात्पर्याङ्गीकारात्। क्रमेऽपि तात्पर्ये वाक्यभेदप्रसङ्गः। स्मृतेस्तु धर्मिणामर्चिरादीनां वैद्युतान्तानां शाखान्तराधिकरणन्यायेन तत्तच्छाखाभिः प्राप्ततया न तत्र तात्पर्यम्। किन्त्वप्राप्ते क्रममात्रे तेनावधृत-तात्पर्यकत्वेन स्मृतेः प्राबल्यात् तद्विरोधेन श्रौतस्यापि क्रमस्य बाधोऽपि युक्तः।

यद्यप्युदाहृतश्रुतिषु तटित्र श्रूयते। तथापि शाखान्तराधिकरणन्यायेन संवत्सरादित्ययोर्मध्ये तटितो निवेशः कर्तव्यः। संवत्सरादादित्यमिति क्रमस्य श्रौतत्वेऽपि तटितो धर्मित्वान्मध्ये निवेशो युक्तः। प्रमाणबलाबलापेक्षया प्रमेयबलाबलस्य ज्यायस्त्वात्। एवमन्यत्रापि श्रुत्यन्तरानुक्तो मार्गः श्रुत्यन्तराद् ग्राह्यः। यस्तु बहुवाक्यानुक्तो मासेभ्यो देवलोकमित्यत्र देवलोकशब्दः स

बहुप्रमाणानुग्रहाय संवत्सरपरो व्याख्येयः। 'संवत्सरो वै देवानां पूः' इत्यन्यत्र श्रुत्यैव व्याख्यानात्। क्रमपरोदाहृतब्रह्मतर्कवचने देवलोकशब्दाभावात्। एतेन शाखान्तरोक्तानां सोमवैश्वानरेन्द्रादिदेवतान्तराणां मार्गेऽनुसन्धेयत्वे स्थलविशेषानिर्णय इति निरस्तम्। क्रमपरयैतत्स्मृत्या स्थलविशेषनिर्णयोपपत्तेरिति सर्वं समञ्जसम्।

सूत्रार्थः

सूत्रार्थस्तु। पूर्वप्राप्यो वायुरातिवाहिकः। भगवदितरानपेक्षेण स्वतन्त्रतया जगत्प्रवृत्तिं वहतीत्यतिवाहो मुख्यवायुः। तस्यापत्यमातिवाहिकोऽमुख्यवायुः। नतु मुख्यवायुः। कुतः ? तल्लिङ्गात्। पूर्वगम्यत्वरूपामुख्यवायुलिङ्गात्। 'पूर्वोक्तस्त्वातिवाहिको वायुः' इति भाष्ये तुशब्दोऽध्याहृतः। अस्यैव मुख्यप्रमेयत्वभ्रमं निवारयितुमिति ध्येयम्। ननु न पूर्वगम्यत्वमप्रधानत्वे लिङ्गम्। वैश्वानरपूर्वगम्ये सोमे ध्रुवपूर्वगम्ये इन्द्रे च व्यभिचारादित्याशङ्क्य नेयं प्रधानयुक्तिः। किन्त्वभ्युच्चयमात्रम्। तदपि कथाशिक्षणार्थमुक्तमित्यभिप्रेत्य द्वितीयेन प्रधानयुक्तिरुच्यते। तत्र व्यामोहादिति पञ्चमी सप्तम्यर्थे। आतिवाहिकपरयोरुभयोर्ग्रहणसंशये प्राप्ते तत्सिद्धेरिति व्यस्तं समस्तं च। आद्येऽविभक्तिकं बुद्धिस्थदिवस्पतित्वविशेषणपरम्। तेन विशेषणेनाऽतिवाहिकस्य पूर्वत्र वाक्ये सिद्धेः प्रतीतेरुत्तरवाक्ये प्रधानवायुरेवोच्यत इति निश्चयोपपत्तेरिति। पूर्वं प्रधानहेतोरनुक्तत्वाच्चशब्दाभावः। अत एव तयोः क्रमोऽपि स्फुटः॥ ४॥

॥ इति आतिवाहिकाधिकरणम्॥ ४॥

॥ अथ वैद्युताधिकरणम्॥ ५॥

सूत्रभाष्यम्

ॐ वैद्युतेनैव ततस्तच्छ्रुतेः ॐ ॥ ४.३.६ ॥

प्रकारान्तरेण तत्र तत्रोच्यमानत्वाद् वायोरपि परतो ब्रह्मणोऽर्वाग्गन्तव्योऽस्तीति नाऽऽशङ्कनीयम्। विद्युत्पतिना वायुनैव 'स एनान् ब्रह्म गमयति' (छा.उ.४-१५-६) इति ब्रह्मगमनश्रुतेः।

'विद्युत्पतिर्वायुरेव नयेद् ब्रह्म न चापरः।
कुतोऽन्यस्य भवेच्छक्तिस्तमृते प्राणनायकम्॥' इति बृहत्तन्त्रे॥ ६॥

॥ इति वैद्युताधिकरणम्॥ ५॥

तत्त्वप्रकाशिका

सङ्गतिः

अत्र ब्रह्मप्राप्तिमार्गे मुख्यवायोरन्तिमत्वसमर्थनादस्ति शास्त्रादिसङ्गतिः। अन्यथा तस्यातिप्राधान्यासिद्धेः समर्थनीयमेतत्। प्रकृतो मार्ग एव विषयः। किं तत्र मुख्यवायोरनन्तरं ब्रह्मणोऽर्वाग्गन्तव्योऽस्ति न वेति सन्देहः। उभयथा सम्भवः सन्देहबीजम्।

पूर्वपक्षः

ब्रह्मणोऽर्वाग्वायोः परतोऽन्यः प्राप्योऽस्तीति पूर्वः पक्षः। तथाऽभ्युपगमेऽपि बाधकाभावात्। न च वाच्यं वायोः सर्वाधिकार्युत्तमत्वात् स एवान्तिमप्राप्य इति। उत्तमत्वक्रमानुसारेण प्राप्तिक्रमाभावात्। 'सोमं वैश्वानरं चेन्द्रं ध्रुवम्' इत्यादौ सोमावरस्याग्नेरिन्द्रावरस्य च ध्रुवस्य पश्चात् प्राप्त्युक्तेः। अतो वायोरपि परतो गन्तव्यसद्भावान्न तस्यातिशयेन प्राधान्यमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- वैद्युतेनेति ॥ 'तत्र तत्र' श्रुत्यादौ मार्गे प्रकारान्तरेण तारतम्यक्रमं विहाय प्राप्तेरुच्यमात्वाद् वायोः परतो ब्रह्मणोऽर्वाग्गन्तव्योऽस्तीति न शङ्कनीयं किन्तु वायुरेवान्तिमप्राप्यः। कुतः? यो ह्यन्तिमो भवति तस्य ब्रह्मप्रापयितृत्वेन भाव्यम्। राजादौ तथा दर्शनात्। ब्रह्मप्राप्तिश्च वायुनैव भवति। अतः स एवान्तिमः। ब्रह्मप्रापकत्वं च वायोः कुत? 'तत्पुरुषो मानवः स एनान् ब्रह्म गमयति' इति श्रुतेरिति भावः। वायोरिवान्यस्यापि ब्रह्मप्रापकत्वेऽन्तिमत्वं सम्भवतीत्यत आह- विद्युदिति ॥ अतो वायोरेवान्तिमत्वाद् युक्तं तस्यातिप्राधान्यमिति सिद्धम्॥ ६ ॥ अ. ५ ॥

शेषतात्पर्यचन्द्रिका

ॐ वैद्युतेनैव ततस्तच्छ्रुतेः ॐ ॥ ४-३-६ ॥

एतदधिकरणप्रतिपाद्यविषयः

अत्र वायोरुपान्त्यप्राप्यत्वदाढर्चाय वायुब्रह्मान्तराळेऽन्यस्य प्राप्यत्वं निषिध्यते। अन्यथाऽन्यस्यापि तस्यैवोपान्त्यप्राप्यत्वप्राप्त्या पूर्वोक्तमयुक्तं स्यादिति निषेध्यमेतत्।

विषयः संशयः पूर्वपक्षश्च

प्रकृतो देवयान एव विषयः। किं वाय्वन्तिम एवोतान्यान्तिमोऽपीति। तत्र न वाय्वन्तिम एवेति नियमः। अन्यस्यापि वाय्वनन्तरप्राप्यत्वे बाधकाभावात्। अन्त्यप्राप्यस्योत्तमत्वमिति नियमस्य वैश्वानरादौ व्यभिचीर्णत्वात्। न च, 'उत्क्रान्तो विद्वान् परमभिगच्छन् विद्युतमेवान्तत उपगच्छति द्यौर्वाव विद्युत्तत्पतिं वायुमुपगम्य तेनैव ब्रह्म गच्छति' (सू.भा.उदा.श्रुतिः ४.३.५) इति वायोरेवान्तिमप्राप्यत्वश्रवणात् कथमन्यस्याप्यन्तिमप्राप्यत्वसम्भव इति वाच्यम्। एवकारस्यानेकार्थत्वेनायोगव्यवच्छेदार्थत्वोपपत्तेः। अन्यथा विद्युतमेवान्तत उपगच्छतीति विरोधो दुरुद्धरः स्यात्। न चास्याः श्रुतेः सावकाशत्वादन्यस्याप्यन्ते गमनं सम्भावितमेव। न चामुक इति निश्चयाभावात् सम्भावनस्य चाप्रतिबन्धकत्वमिति वाच्यम्। 'स चन्द्रमसमागच्छति तस्मै स तत्र विजहीते। यथा दुन्दुभेः खम्। तेन स ऊर्ध्वम् आक्रमते स लोकमागच्छत्यशोकमहिमम्' (बृ. ७.१०.१) इति सोमस्याप्यन्तिमप्राप्यत्वप्रतीतेः शोकहिमाद्युपलक्षिताशेषदुःखनिवृत्तिविशिष्टस्य लोकशब्दितस्य परब्रह्मणः स लोकमागच्छतीत्यनेन प्राप्यत्वोक्तेः। न च ततोऽर्वाग्वायोः प्राप्यत्वमत्रापि ग्राह्यमिति वाच्यम्। यथाश्रुते बाधकाभावात्। केचिच्चन्द्रमसमन्ते प्राप्य ब्रह्म गच्छन्ति, केचित्तु वायुमित्यधिकारिभेदेनैकस्यैव मार्गस्योभयान्तिमत्वोपपत्तेश्च। तस्माद्वाय्वन्तिमो मार्ग इति निर्णीत्यसम्भवः। तेन चन्द्रादिसाम्येन नातिप्राधान्यसम्भव इति पूर्वः पक्षः।

सिद्धान्तः

सिद्धान्तस्तु। वायुरेवान्तिमप्राप्यो नान्यः। स एनान् ब्रह्म गमयतीति तावदन्तिमप्राप्यस्य ब्रह्मगमयितृत्वमुच्यते। यद्यन्योऽप्यन्तिमप्राप्यः स्यात् सोऽपि ब्रह्मगमयिता स्यात्। यो यत्सेवकवर्गेऽन्तिमप्राप्यः स तत्प्रापकः। यथाऽन्तिमप्राप्योऽमात्यो राजप्रापक इति व्याप्तेः। न चैद्युक्तम्। 'विद्युत्पतिर्वायुरेव नयेद् ब्रह्म' (बृहत्तन्त्रम्, सू.भा. ४.३.६) इत्येकस्यैव ब्रह्मप्रापकत्वोक्तेः। न चात्रावधारणं पूर्ववत् सावकाशयितव्यम्। 'न चापरः। कुतोऽन्यस्य भवेच्छक्तिस्तमृते प्राणनायकम्' इति वाक्यशेषे सयुक्तिकमन्यस्य तन्निषेधात्। विमतश्चन्दादिर्न ब्रह्मप्रापकः, अशक्तत्वादप्रियत्वाच्चेत्यनुमानविरोधाच्च। अशक्तत्वमप्रियत्वं च वाय्वपेक्षया न तु सर्वथा येन हेत्वसिद्धिः स्यात्। न चात्र

प्रमाणान्तरबाधः शङ्कनीयः। 'वायुरेव ब्रह्म गमयति तस्य ह्येषा शक्तिर्न ह्यन्यो ब्रह्म गमयति। प्रियो ह्येनं गमयति। न ह्यन्यः प्रियो ब्रह्मणः' इत्यनुग्राहक-श्रुतिसद्भावात्। तस्माद्वायोरुत्तमत्वं पूर्वोक्तं न विहन्यते। तेन वाय्वन्तिमो मार्ग एवेति दृढनिश्चय इति।

उभयोक्तमातिवाहिकाधिकरणम्

अत्रोभयेऽप्यातिवाहिकस्तल्लिङ्गादिति सूत्रत्रयमेकमधिकरणम्। तेष्वर्चिरादिषु संशयः किमेतानि मार्गचिह्नानि, उत भोगभूमयः, अथवा विदुषां ब्रह्म प्रेप्सतां वोढार इति।

मार्गे चिह्नसरूपत्वाच्चिह्नान्येवार्चिरादयः।
भर्तुर्भोगभुवो वा स्युर्लोकत्वान्नातिवाहिकाः॥

यथा कश्चिल्लोके ग्रामं नगरं वा प्रतिष्ठासमानोऽनुशिष्यते गच्छेतस्त्वममुं गिरिं ततो न्यग्रोधं ततो नदीं ततो ग्रामं ततो नगरं वा प्राप्स्यसीत्येवमिहाप्यर्चिषोऽहरह्न आपूर्यमाणपक्षमित्याद्याहुः। ततो मार्गलक्षणभूता अर्चिरादयः। अथवा भोग-भूमयः। लोकशब्दश्च प्राणिनां भोगायतनेषु भाष्यते- 'मनुष्यलोकः पितृलोको देवलोकः' (बृ. १.५.१६) इति। तस्मात् सर्वथा नाऽतिवाहिका एते अर्चि-रादयः। अर्चिरादिशब्दा हि ज्वलनादिष्वचेतनेषु निरूढवृत्तयः। न चैषामचेतनाना-मावधिकानामिव नियमवत्यतिवाहनरूपा स्वतन्त्रक्रिया बुद्धिपूर्वा सम्भवति। तस्माल्लोकशब्दवाच्यत्वाद् गन्तुर्जीवात्मनो भोगभूमय एवेति मन्यामहे।

अपि चार्चिष इत्यस्मादपादानं प्रतीयते।
न हेतुर्नागुणे हेतौ पञ्चमी दृश्यते क्वचित्॥

इति प्राप्ते उच्यते-

'सम्पिण्डकरणानां हि सूक्ष्मदेहवतां गतौ।
न स्वातन्त्र्यं न चाग्न्याद्या नेतारोऽचेतनास्तु ते॥'

ईदृशी हि नियमवती गतिः। स्वयं प्रेक्षावतोऽप्रेक्षावतो वा प्रेक्षावत्प्रयुक्तस्यैव स्यात्, नान्यथा। न तावद् विगलितस्थूलकलेवराः सूक्ष्मदेहवन्तः सङ्कुचित-वृत्तिकरणग्रामा उत्क्रामन्तो जीवात्मानो मत्तमूर्छितवत्स्वयं प्रेक्षावन्तः। यदेवं स्वातन्त्र्येण गच्छेयुः। तद्यद्यर्चिरादयोऽपि मार्गचिह्नानि वा शमीकारस्करादि-वृक्षवत् सरित्पुष्करिण्यादिवद्भोगभूमयो वा मेरुपर्वतावरणभूतेळावृतादि-खण्डवदुभयथाऽप्यचेतनतया न नयनं प्रत्येषामस्ति स्वातन्त्र्यम्। न च श्रुतानामर्चिरादीनामेव चेतनत्वसम्भवे तदन्यस्य चेतनत्वकल्पनं युक्तम्। अर्चिष इति च हेतौ पञ्चमी, नापादाने। हेतावित्यधिकृत्य 'विभाषा गुणेऽस्त्रियाम्' (वार्तिकम्) इति हेतौ पञ्चम्या विहितत्वात्। गुणत्वं चाऽश्रिततयाऽर्चि-रादीनामप्यस्ति। नतु वैशेषिकपरिभाषया नियम आस्थेयः। लोकविरोधात्। अपि च 'तेऽर्चिरभिसम्भवन्ति' इति सम्बन्धमात्रमुक्तमिति 'स एनान् ब्रह्म गमयति' (छा. ४.१५.५) इत्यातिवाहिकत्वश्रवणादर्चिरादेरपि तन्नियम्यते।

'सामान्यवचने शब्दे विशेषापेक्षिणि स्फुटम्।
यद्विशेषपदं तेन तत् सामान्यं नियम्यते॥'

इत्याद्याहुः।

तद्विमर्शः

तत्र। 'स एनान् ब्रह्म गमयति' (छा. ४.१५.५) इत्यत्राऽतिवाहिकत्वा-श्रवणात्। न हि प्रतिहारो ग्रामस्थान् राजानं गमयतीत्युक्ते ग्रामस्थानां प्रतिहार आतिवाहिक इति गम्यते। किन्तु तान् हस्ते गृहीत्वा दौवारिकपीडां परिहृत्य राजसमीपं प्रापयतीत्येव। एवमिहाप्यर्चिरादयः सर्वे स्वयमग्रे गन्तारो भूत्वा तत्र तत्र प्रतिबन्धकानि परिहृत्य भगवत्समीपं नयन्तीत्यर्थोपपत्तेः। यत्रापि 'सूर्यस्य

रश्मिभिर्यजमानं वहन्ति' इति वहनमेव श्रूयते तत्राप्येष एव तस्यार्थः। अन्यथा पितृयाणमधिकृत्य 'ते धूममभिसम्भवन्ति। धूमो भूत्वाऽभ्रं भवति' इति श्रुतानां धूमादीनामप्यातिवाहिकत्वापत्त्या तत्साद्दश्यापत्तिरर्थ इति सिद्धान्तो न स्यात्।

यच्चोक्तमुपरतकरणानां सूक्ष्मशरीराणां स्वतो गन्तृत्वायोगादर्चिरादीनामातिवाहिकत्वमिति तदयुक्तम्। कर्ममहिम्ना स्वर्गिणां तेजोमयशरीरमधिष्ठाय दिव्यदेशे विहारादिक्रियास्वातन्त्र्यवद् ज्ञानमहिम्ना ज्ञानिनामपि तदुपपत्तेः। नहि मत्तमूर्छितवद् ज्ञानिनो गमनं युक्तम्। कर्मणोऽपि ज्ञानस्य निकृष्टतापातात्।

आतिवाहिकसूत्रव्याख्यानिरासः

एतेनाऽतिवाहिका अर्चिरादयो भवितुमर्हन्ति। 'तत्पुरुषोऽमानवः। स एनान् ब्रह्म गमयति (छा. ४.१५.५) इति वैद्युतपुरुषस्य सिद्धवद्गमयितृत्वरूपादर्चिरादीनामातिवाहिकत्वलिङ्गात्। अत्रामानव इति विशेषणं मानवातिवाहिकव्यावृत्त्यर्थम्। यदि मनुसीमामनतिक्रान्तानां मानवानां संसारिणामर्चिरादीनामातिवाहिकत्वं न स्यात् केवलं तद्विपरीतस्य वैद्युतपुरुषस्यामानवस्यैवाऽतिवाहिकत्वं स्यात् तदाऽमानव इति विशेषणं व्यर्थं स्यात्। तथा चेतरेषामप्यातिवाहिकत्वं सिद्ध्यतीत्यपपाठेन व्याख्यानं निरस्तम्। ज्ञान्यग्रेसरत्वाद्वायुर्ज्ञानिनो ब्रह्म गमयतीति युक्तिसूचनार्थत्वेन मानव इत्येव पदच्छेदस्य युक्तत्वाच्च।

'उभयव्यामोहात्' इति सूत्रव्याख्याविमर्शः

ये तावदर्चिरादिमार्गास्ते देहवियोगात् सम्पिण्डितकरणग्रामा इत्यस्वतन्त्रा एव। अर्चिरादयोऽप्यचेतनत्वादस्वतन्त्राः। एवं गन्तुरर्चिरादेश्चेत्युभयस्य व्यामोहादस्वातन्त्र्यात्तेषामर्चिरादीनां चेतनत्वातिवाहिकत्वसिद्धिरिति द्वितीयव्याख्यानं च ज्ञानिनामज्ञमरणविलक्षणमरणवत्त्वसाधनान्निरस्तम्। संशयादौ व्युत्पन्नस्य व्यामोहशब्दस्यान्यपरत्वायोगाच्च। स्वतो गन्तुमसमर्थाना-

मन्धादीनां पुरोगमनादिनाऽऽतिवाहिकतामन्तरेण नेतॄणां चक्षुष्मतामिव नेतृत्वोपपत्तावातिवाहिकत्वासिद्धेश्च।

विशिष्टाद्वैतिकृतस्योभयव्यामोहसूत्रापलापस्य निराकरणम्

केचित्तु इदमेव सूत्रं क्वचित्कोशेष्वदृष्ट्वाऽपलपन्ति। तेषां भाष्यकृत्त्वमाकस्मिकं मन्यामहे। पूर्वोक्त आतिवाहिक उत्तरोक्तो वेति व्यामोहे तन्निर्णयार्थमवश्यापेक्षितस्यापलापायोगश्च।

वैद्युतेनैवेति सूत्रव्याख्याविमर्शः

'तान् वैद्युतात् पुरुषोऽमानवः स एत्य ब्रह्मलोकं गमयति' इतिवैद्युतपुरुषस्यैव गमयितृत्वश्रुतेर्वैद्युतेनैव पुरुषेण ततो विद्युदभिसम्भवादूर्ध्वं ब्रह्मलोकं गच्छन्तीति तृतीयव्याख्यानमप्ययुक्तम्। अर्चिरादीनामातिवाहिकत्वचिन्तायां वैद्युतस्यैव ब्रह्मगमयितृत्वकथनस्यासङ्गतत्वात्।

विद्युतो ह्यधि वरुणादय उपक्षिप्ताः। विद्युतस्त्वनन्तरमाब्रह्मप्राप्तेरमानवस्यैव पुरुषस्य गमयितृत्वं श्रुतम्। तत्कथं वरुणादीनामातिवाहिकत्वं निर्वाह्यमित्येतच्छङ्कानिराकरणायैतदुच्यत इति चेन्न। शङ्कानिराकरणयुक्तेः सूत्रेऽदर्शनात्। प्रत्युतानयोक्त्या शङ्काया एव दृढीकरणाच्च। तल्लिङ्गादित्यनेनैव ब्रह्मगमयितृत्वश्रुतेरपि गृहीतत्वात् तच्छ्रुतेरिति पुनरुक्तिवैयर्थ्याच्च। वरुणादयस्तु तस्यैवाप्रतिबन्धकरणेन साहाय्यानुष्ठानेन वा केनचिदनुग्राहका इति समाधानमत्रोक्तमिति चेन्न। अस्यार्थस्य सूत्राक्षरानारोहात्। उत्प्रेक्षायां तु सूत्रवैयर्थ्यापातात्।

किञ्च कथमनेन वरुणादीनामातिवाहिकत्वं समर्थितमिति पृच्छामः। अनुग्राहकमात्रस्याऽतिवाहिकत्वाभावात्। अन्यथा वैद्युतस्यापि स्वयमेव गन्तॄणां हस्तदानादिनाऽनुग्राहकत्वापत्त्या, वैद्युतेनैव ब्रह्म गच्छन्तीति तस्यैवाऽतिवाहिकत्वं मुख्यं, वरुणादीनां त्वनुग्राहकत्वमात्रेणाऽतिवाहिकत्वमिति वैषम्यानुपपत्तिः।

टीकायां पूर्वपक्षीयविक्रमन्यायव्याख्यानम्

टीकाक्षरार्थस्तु। विक्रमन्यायमेतदधिकरणसङ्गतत्वेन साध्यप्रदर्शनेन विवृण्वत्,

'न च ''सोमादग्निमग्नेरिन्द्रम्'' इति सोमादग्नेरवरस्यापि प्राप्तेः प्रधान-वायोरप्यवरोऽन्यः प्राप्योऽस्त्विति वाच्यम्।'

इति वाक्यं व्युत्क्रमेण व्याचष्टे- **ब्रह्मणोऽर्वाग्वायोः परतोऽन्यः प्राप्योऽस्त्विति पूर्वः पक्ष इति॥** अनेनावर इति ब्रह्मव्यावृत्त्यर्थमित्युक्तं भवति। 'सोमादग्निम्' इत्यादिपूर्वभागमवतार्य व्याचष्टे- **न च वाच्यमित्यादिना॥** तेन सोमादग्नि-मित्यादिश्रुतौ सोमादवरस्याप्यग्नेः सोमादनन्तरं प्राप्तेरुक्तत्वाद् यो यदनन्तरं प्राप्यतयोच्यते स तस्मादुत्तम इति व्याप्त्यभावादुत्तमत्वक्रमविरुद्धप्राप्तिक्रमस्यापि सम्भवादपरोऽन्यः प्राप्योऽस्त्विति सम्बन्धः। तेन न्यायमालागतं विक्रम-पदमुत्तमत्वक्रमविरुद्धप्राप्तिक्रमश्रवणपरमिति युक्तो विक्रमन्यायस्य सङ्ग्रह इति विवरणयोजनां सूचयति।

टीकायां सिद्धान्तीयोरुत्वन्यायव्याख्यानम्

उरुत्वन्यायः साक्षाद् गमयितृत्वे हेतुर्न भवति। किन्तु ब्रह्मप्रापयितृत्व-शक्तिरेवेत्यभिप्रेत्यैतदधिकरणसङ्गततयोरुत्वन्यायं विवृण्वत्,

'उत्तमत्वात् तस्यैव ब्रह्मप्रापयितृत्वशक्तेः। ''वायुरेव ब्रह्म गमयति। तस्य ह्येषा शक्तिः। न ह्यन्यो ब्रह्म गमयति प्रियो ह्येनद् गमयति। न ह्यन्यः प्रियो ब्रह्मणः'' इति श्रुतेः। मार्गे त्ववरस्यापि यथामार्गं पश्चात्प्राप्तिर्भवति लोक-वत्। न हि राजानं यःकश्चित् प्रापयति क्लृप्तमतिप्रियं चापहाय।'

इति वाक्यं तात्पर्यतो व्याचष्टे- **यो ह्यन्तिमो भवतीत्यादिना॥** तेन तस्य ब्रह्म प्रापयितृत्वप्राप्तेरिति विवरणे हेत्वंशोऽध्याहार्यः। तत्रेष्टापत्तौ चोदितायां ब्रह्मप्रापयितृत्वशक्त्यापादनं कार्यम्। तत्रापीष्टापत्तौ चोदितायां सर्व-

जीवोत्तमत्वातिप्रियत्वयोरापादनं कार्यम्। तथा च विमतः सोमः नान्तिमप्राप्यः ब्रह्मप्रापयितृत्वशून्यत्वात्। नायं ब्रह्मप्रापयिता तादृशशक्तिशून्यत्वात्। नायं तादृशशक्तिमान्। सर्वजीवोत्तमत्वाभावादतिप्रियत्वाभावाच्च। एवं विमतो वायुः अन्तिमप्राप्यः। ब्रह्मप्रापयितृत्वात्। वायुः ब्रह्मप्रापयिता ब्रह्मप्रापयितृत्व-शक्तिमत्वात्। वायुः ब्रह्मप्रापयितृत्वशक्तिमान्। सर्वजीवोत्तमत्वात् अतिप्रियत्वाच्चेति प्रयोगा अभिमताः। तत्राऽद्ये त्रिके तृतीयप्रयोगेऽ-प्रयोजकत्वशङ्कापरिहाराय यत्र तादृशी शक्तिस्तत्रोत्तमत्वं तदतिप्रियत्वं चेति व्यतिरेकव्याप्तिसद्भावादिति भावेन तामेवोपपादयति- **उत्तमत्वात्तस्यैव ब्रह्मप्रापयितृत्वशक्तेरिति॥** उपलक्षणमेतत्। प्रियत्वाच्चेत्यपि द्रष्टव्यम्। वह्निमानेव धूमवानित्यादिवद्व्यापकेऽवधारणसम्बन्धेनेदं वाक्यं व्यतिरेकव्याप्तिप्रदर्शकं भवति। हेतुद्वयस्यासिद्धिवारणाय श्रुतिं पठति- **वायुरेवेति॥** तस्य ह्येषा शक्तिर्न ह्यन्यस्य शक्तिरिति च ग्राह्यम्। अनेन द्वितीयहेतोरसिद्धिरुक्ता भवति।

प्रियो ह्येनद् गमयतीत्यतः परं वायुरेव प्रिय इति ग्राह्यम्। तेन प्रथमहेतोर-सिद्धिः। न ह्यन्यो ब्रह्म गमयति। प्रियो ह्येनं ब्रह्म गमयतीति च प्रयोगद्वयेऽपि निगमनद्वयम्।

ननु यदि चन्द्रमसमागच्छतीत्यादिना चन्द्रस्यान्तिमप्राप्यत्वं वायोरवरस्य श्रुतमपि नाङ्गीक्रियते तर्हि सोमादग्निमग्नेरिन्द्रमिति सोमादग्नेरवरस्यापि सोमात् पश्चात्प्राप्तिर्नाङ्गीक्रियेत। श्रुतत्वाविशेषादित्यत आह- **मार्गे त्विति॥** साक्षाद्राज-प्रापकामात्यादेः पूर्वं सामाजिकवर्गानुसरणवेलायां शक्ताशक्ततारतम्यौदा-सीन्यैनैवावरस्यापि पश्चादनुसरणं लोके दृष्टम्। स्वयं यावद्दूरे स्थितो राजमन्दिरात् तावदन्तराले मार्गेऽवरस्यैव प्रथममवस्थानम्, वरस्य पश्चादवस्थानमिति नियमाभावात्। यथामार्गं वरावरयोः सङ्कल्प्यावस्थानात्। तथा प्रकृतेऽप्युत्क्रान्तो जीवः स्वयं भगवल्लोकाद्यावद्दूरे स्थितस्तावदान्तरालिके मार्गे वरावरयोः

सङ्कल्प्यावस्थानमपि प्रमितम् । ध्रुवस्य सर्वोच्चस्थानदानप्रतिज्ञानेन तल्लोकस्यान्ते स्थितत्वात् तस्य पश्चात्प्राप्यत्वेऽपि वायोरवरस्य पश्चात्प्राप्यत्वं न युज्यत इत्यर्थः ।

लोकेऽमात्यादपि पश्चात्प्राप्यो राजप्रापकः किन्न स्यादित्यतो व्यतिरेकमुखेन दृष्टान्तं साधयति- **नहीति** ॥ राजा हि स्वस्य प्रियमतिसमर्थं चेतरेषां स्वप्रापकं कल्पयति । तदतिक्रमेण यः कश्चिदनतिप्रियोऽसमर्थोऽक्लृप्तश्च राजानं नहि प्रापयति । ततो दृष्टान्तो नासिद्ध इत्यर्थः । इति विवरणयोजना सूचिता द्रष्टव्या ।

सूत्रार्थः

सूत्रार्थस्तु । मण्डूकप्लुतिन्यायेन 'निशि नेति चेन्न सम्बन्धात्' इति पूर्वसूत्रेण नञ् अनुवर्तते । तत इत्यनेन वैद्युत एव परामृश्यते । वायोः परं प्राप्येन केनचिन्न ब्रह्म गच्छति । किन्तु 'स एनान् ब्रह्म गमयति' (छा. ४.१५.५) इति श्रुतेः वैद्युतेनैव । विद्युतोऽयं भर्ता वैद्युतः । विद्युत्पतिना वायुनैवेति ।

॥ इति वैद्युताधिकरण् ॥ ५ ॥

॥ अथ कार्याधिकरणम् ॥ ६ ॥

सूत्रभाष्यम्

ॐ कार्यं बादिररस्य गत्युपपत्तेः ॐ ॥ ४.३.७ ॥

'स एनान् ब्रह्म गमयति' (छा.उ.५-१०-२) इति कार्यं ब्रह्म गमयतीति बादरिर्मन्यते ।

'ऋते देवान् परं ब्रह्म कः पुमान् प्राप्नुयात् क्वचित् ।
यद्यपि ब्रह्मदृष्टिः स्याद् ब्रह्मलोकमवाप्नुयात् ॥'

इत्यध्यात्मवचनात् तस्यैव गत्युपपत्तेः ॥ ७ ॥

तत्त्वप्रकाशिका

एवं मार्गं विचार्यात्र तेन मार्गेण गतानां गम्यनिरूपणादस्ति शास्त्रादिसङ्गतिः । अन्यथानुस्मृत्यनुपपत्तेर्निरूपणीयमेतत् । 'वायुरेव ब्रह्म नयति' इत्युक्तं तद् ब्रह्मात्र विषयः । किं चतुर्मुखाख्यं किं वा परमुतोभयमिति सन्देहः । ब्रह्मशब्द एव सन्देहबीजम् । तृतीयपक्षेऽप्येकस्योभयप्राप्त्यसम्भवात् कांश्चित् कार्यं कांश्चित् परमित्यर्थः स्यात् । तत्र किं केनचित् क्रमेणोभयप्राप्तिरुत क्रमं विनैव । क्रमोऽपि कश्चन योग्यतारूपस्तदन्यो वासाविति सन्देहः । उभयथा सम्भवः सन्देहबीजम् । किं तावत् प्राप्तमिति । तत्र सूत्रं पठित्वा व्याचष्टे- कार्यमिति ॥ 'स एनान् ब्रह्म गमयति' इत्यत्र कार्यमुत्पत्तिमद्ब्रह्म वायुर्गमयतीति बादरिराचार्यो मन्यत इत्यर्थः । ब्रह्मशब्दस्य परब्रह्मणि मुख्यत्वात् कथमयमर्थ इत्यत आह- ऋत इति ॥ ब्रह्मशब्दस्य परब्रह्मणि मुख्यत्वेऽपि नात्र तत्स्वीकारो युक्तः । 'तथाऽपि प्रकृतेर्बन्धो ब्रह्मणा सह भिद्यते' इत्यादिना चतुर्मुखमुक्तिपर्यन्तं बन्धस्य सन्ततत्वात् ततोऽर्वाक् चतुर्मुखस्यैव गत्युपपत्तेस्तथा स्मृत्युक्तत्वाच्चेति भावः ॥ ७ ॥

सूत्रभाष्यम्

ॐ विशेषितत्वाच्च ॐ ॥ ४.३.८ ॥

'यदि ह वाव परमभिपश्यति प्राप्नोति ब्रह्माणं चतुर्मुखं प्राप्नोति ब्रह्माणं चतुर्मुखम्' इति कौषारवश्रुतौ ॥ ८ ॥

तत्त्वप्रकाशिका

न केवलं युक्तिमात्रेण श्रुतेरन्यार्थकल्पनमपि तु विशेषश्रुतेश्चेत्यर्थप्रतिपादकं सूत्रमुपन्यस्य तां श्रुतिमुदाहरति- **विशेषितत्वाच्चेति ॥** भाष्यस्य सूत्रेणान्वयः ॥ ८ ॥

सूत्रभाष्यम्

ॐ सामीप्यात्तु तद्व्यपदेशः ॐ ॥ ४.३.९ ॥

'ब्रह्मविदाप्नोति परम्' (तै.उ.२-१) इति तद्व्यपदेशस्तु समीपत एव परमपि प्राप्नोतीत्येतदर्थमेव ॥ ९ ॥

तत्त्वप्रकाशिका

ननु कथं ज्ञानिनः कार्यप्राप्तिरुच्यते 'ब्रह्मविदाप्नोति परम्' इति परब्रह्मप्राप्तेरेव श्रुतत्वादित्याशङ्कां परिहरत् सूत्रं पठित्वा व्याचष्टे- **सामीप्यादिति ॥** सत्यं ज्ञानिनः परप्राप्तिरेव श्रुत्योच्यत इति तथाऽपि नोक्तविरोधः । यतो 'ब्रह्मविदाप्नोति परम्' इति श्रुतिरपि ज्ञानी चतुर्मुखं प्राप्याचिरेण परमपि प्राप्नोतीत्यर्थमेव वक्ति न तु चतुर्मुखप्राप्तिं प्रतिषेधति नापि प्रथमत एव परप्राप्तिं ब्रूते । कुत एतत् ? सामान्यश्रुतेरुदाहृतविशेषश्रुत्या बाधोपपत्तेरिति भावः ॥ ९ ॥

सूत्रभाष्यम्

कदा?-

ॐ कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॐ ॥४.३.१०॥

'ते ह ब्रह्माणमभिसम्पद्य यदैतद् विलीयतेऽथ सह ब्रह्मणा परमभिगच्छन्ति?' इति सौपर्णश्रुतेर्महाप्रलये तदध्यक्षेण ब्रह्मणा सह गच्छन्ति ॥ १० ॥

तत्त्वप्रकाशिका

ननु समीपत एव परब्रह्म प्राप्नोतीति कोऽर्थः । प्रलयादर्वाक्प्रलय एव वा । नाऽद्यः । बद्धत्वसाम्यात् प्रथममेव प्राप्त्युपपत्तेः । न द्वितीयः । विशेषप्रमाणाभावादिति भावेन पृच्छति- **कदेति ॥** तत्परिहाराय सूत्रमुपन्यस्य व्याचष्टे- **कार्येति ॥** नोक्तविकल्पावकाशः । समस्तकार्याणां विनाशरूपे प्रलये तेषां कार्याणां स्वामिना चतुर्मुखेन सह । अतश्चतुर्मुखात् परं ब्रह्म ज्ञानी गच्छतीत्यभ्युपगमात् । न च तत्र प्रमाणाभावः । श्रुतेरेव सद्भावादिति भावः ॥ १० ॥

सूत्रभाष्यम्

ॐ स्मृतेश्च ॐ ॥ ४.३.११ ॥

'ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे ।
परस्यान्ते परात्मानः प्रविशन्ति परं पदम् ॥' इति ॥ ११ ॥

तत्त्वप्रकाशिका

स्मृत्याऽप्येतमर्थं साधयत् सूत्रं पठित्वा तां स्मृतिमुदाहरति- **स्मृते-**

श्चेति ॥ प्रतिसञ्चरः प्रलयः। परं ब्रह्मायुः। परात्मानः परमात्मनि मनो येषां ते॥ ११॥

सूत्रभाष्यम्

ॐ परं जैमिनिर्मुख्यत्वात् ॐ ॥ ४.३.१२ ॥

ब्रह्मशब्दस्य तत्रैव मुख्यत्वात् परमेव ब्रह्म गमयतीति जैमिनिर्मन्यते ॥ १२॥

तत्त्वप्रकाशिका

पक्षान्तरं च दर्शयत् सूत्रमुपन्यस्य व्याचष्टे- **परमिति ॥** 'स एनान् ब्रह्म गमयति' इत्यत्र परं ब्रह्म वायुर्गमयतीत्यर्थो न कार्यमिति। कुतः ? ब्रह्मशब्दस्य परब्रह्मण्येव मुख्यत्वात्। मुख्यार्थे च सम्भवत्यमुख्यार्थकल्पनाऽयोगादिति जैमिनिराचार्यो मन्यत इति भावः॥ १२॥

सूत्रभाष्यम्

ॐ दर्शनाच्च ॐ ॥ ४.३.१३ ॥

दृष्टत्वाच्च परब्रह्मणः॥ १३॥

तत्त्वप्रकाशिका

ननु ब्रह्मशब्दस्य परब्रह्मणि मुख्यत्वेऽपि तद्ग्रहणानुपपत्तेरमुख्यार्थकल्पनेत्याशङ्कां परिहरत् सूत्रमुपन्यस्य व्याचष्टे- **दर्शनाच्चेति ॥** न ज्ञानिनः परप्राप्तिरनुपपन्ना ययाऽमुख्यार्थाङ्गीकारः किन्तूपपन्नैव। श्रवणादिसाधनैरपरोक्षतया परब्रह्मणः एव दृष्टत्वात्। अन्यस्य तदभावादिति भावः॥ १३॥

सूत्रभाष्यम्

ॐ न च कार्ये प्रतिपत्त्यभिसन्धिः ॐ ॥ ४.३.१४ ॥

न हि कार्ये प्रतिपत्तिः प्राप्नवानीत्यभिसन्धिश्च।

'यदुपास्ते पुमाञ्जीवन्यत्प्राप्तुमभिवाञ्छति।
यच्च पश्यति तृप्तः संस्तत्प्राप्नोति मृतेरनु॥' इति पाद्मे॥ १४॥

तत्त्वप्रकाशिका

हेत्वन्तरेणैतमर्थं प्रतिपादयत् सूत्रमुपन्यस्य व्याचष्टे- **न चेति ॥** ज्ञानिनः कार्यप्राप्तिरेवानुपपन्ना न परप्राप्तिः। तस्य कार्यविषये प्रतिपत्त्यभावात् परविषये च प्रतिपत्तिसद्भावात्। प्राप्नवानीत्यभिसन्धिश्च न कार्यविषये किन्तु परविषय एवाऽतश्च परप्राप्तिरेव युक्ता न कार्यप्राप्तिरिति भावः। परविषय एव दर्शनप्रतिपत्त्यभिसन्धिसद्भावेऽपि कुतस्तत्प्राप्तिरेव न कार्यप्राप्तिरित्यत आह- **यदिति ॥** १४॥

सूत्रभाष्यम्

ॐ अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात् तत्क्रतुश्च ॐ ॥ ४.३.१५ ॥

'प्रतीकं देहं उद्दिष्टो येषां तत्रैव दर्शनम्।
न तु व्याप्ततया क्वापि प्रतीकालम्बनास्तु ते॥
अप्रतीका देवतास्तु ऋषीणां शतमेव च।
राज्ञां च शतमुद्दिष्टं गन्धर्वाणां शतं तथा॥
एतेऽधिकारिणो व्याप्तदर्शिनोऽन्यो न तु क्वचित्।
अयोग्यदर्शने यत्नाद् भ्रंशः पूर्वस्य चापि तु॥

अप्रतीकाश्रया ये हि ते यान्ति परमेव तु।
स्वदेहे ब्रह्मदृष्ट्यैव गच्छेद् ब्रह्मसलोकताम्।
ब्रह्मणा सह सम्प्राप्ते संहारे परमं पदम्॥' इति गारुडवचनात्।

उभयत्रोक्तदोषाच्चाप्रतीकालम्बनान् परं नयति। 'स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसम्पद्यते' (बृ.उ.६-४-५) इति श्रुतेश्च। अत्र कर्मोपासनमेव। अन्यान् कार्यं नयतीति भगवन्मतम्॥ १५॥

तत्त्वप्रकाशिका

तृतीयपक्षेऽपि न कश्चित्क्रमोऽस्ति किन्तु यस्य कार्यप्राप्तीच्छा तस्य तत्प्राप्तिर्यस्य परप्राप्तीच्छा तस्य तत्प्राप्तिरिति प्राप्तम्। कुतः। पक्षद्वयेऽपि साधकसद्भावात् क्रमस्य चादर्शनात्। 'यत्प्राप्तुमभिवाञ्छति' इत्यादेश्चेति। क्रमपक्षेऽपि न योग्यतारूपक्रमः किन्तु यस्य यत्प्राप्तौ सौकर्यं तस्य तत्प्राप्तिरिति प्राप्तम्। कस्मात्। पक्षद्वयस्याप्यपरिहार्यत्वात् महाफले क्रमस्य चायोगात् क्रमान्तरस्य चादर्शनादिति।

सिद्धान्तः

अथ सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **अप्रतीकेति**॥ न सर्वान् कार्यं नयतीति श्रुत्यर्थो नापि परमेवेति किन्तु कांश्चित्कार्यं कांश्चित्परमिति। कुतः। उभयपक्षोक्तदोषात्। परप्राप्तिपक्षे गत्यनुपपत्त्यादिदोषस्योक्तत्वात् कार्यप्राप्तिपक्षे च ब्रह्मशब्दामुख्यत्वादिदोषाणामुक्तत्वात्। न चोभयप्राप्ति-ग्रहणे दोषद्वयापातः। कार्यमेव नयतीत्यन्यव्यावृत्त्या कार्यप्राप्तौ विशेषहेत्व-भावात्। येषां परप्राप्तिस्तेषां बद्धत्वेऽपि प्रमाणबलेन गत्युपपत्तेः। श्रुत्यादीनां चान्यनिषेधकत्वाभावात्। नापि परमेवेत्यवधारणे हेतुरस्ति। केषाञ्चित्कार्य-

प्राप्तेरेव प्रमाणबलेनोपपत्तेः। ब्रह्मशब्दस्यामुख्यवृत्त्यभ्युपगमस्य न्याय्य-त्वात्। कार्यप्राप्तिमतां च तद्दर्शनादिसद्भावात्। मुनिमतयोश्चान्यानिषेध-कत्वेनाविरोधात्। 'यान्ति देवं परं केचित् पूर्वं केचिल्लये विभुम्' इत्यादेश्च। न च क्रमं विहायैतद्यथेष्टम्। 'क्रमानुरागी भगवान् क्रमात् पुंभिरवाप्यते' इति श्रुतेः। न च 'यत्प्राप्तुमभिवाञ्छति तत्प्राप्नोति' इति वचनादिच्छानुसारेण प्राप्तिर्न क्रमेणेति वाच्यम्। 'स यथाकामो भवति' इति श्रुतौ तत्प्राप्तीच्छूना-मिच्छामात्रेण तत्प्राप्तिनिषेधात्। यत्प्राप्तीच्छा तज्ज्ञानोपासनापरोक्षैरेव तत्प्राप्तेरुक्तत्वात्। न चात्रोपासनानुक्तिः। कर्मपदस्यैव तद्वाचकत्वात्। क्रमेऽपि न सौकर्यक्रमेणोभयप्राप्तिः। 'सप्रतीकाश्चतुर्मुखमप्रतीकाः परमु हैते गच्छन्ति', 'प्रतीकं देह उद्दिष्टः' इत्यादिश्रुतिस्मृतिप्राप्तस्यैव ग्राह्यत्वेना-प्रतीकालम्बनान् परं नयत्यन्यान् कार्यं नयतीति क्रमस्यैव युक्तत्वादिति भगवान् बादरायणो मन्यत इति भावः॥ १५॥

सूत्रभाष्यम्

ॐ विशेषं च दर्शयति ॐ॥ ४.३.१६॥

'अन्तःप्रकाशाः बहिःप्रकाशाः सर्वप्रकाशाः। देवा वाव सर्वप्रकाशाः ऋषयोऽन्तःप्रकाशाः मानुषा(मनुष्याः) एव बहिःप्रकाशाः' इति चतुर्वेदशिखायाम्॥ १६॥

॥ इति कार्याधिकरणम्॥ ६॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रभाष्ये चतुर्थाध्यायस्य तृतीयः पादः॥ ४॥ ३॥

तत्त्वप्रकाशिका

यदुक्तं नेच्छानुसारेण प्राप्तिरपि त्वप्रतीकालम्बनत्वादिक्रमेणैवेति । तन्न । प्रतीकालम्बनाः केचिदप्रतीकालम्बनाः केचिदिति नियमाभावेन यथेष्टतदापादनस्याऽपि सम्भवादित्याशङ्कां श्रुत्या परिहरत् सूत्रं पठित्वा तां श्रुतिमुदाहरति- विशेषं चेति ॥ अतो ज्ञानिनां प्रलये पूर्वं च परब्रह्मप्राप्तिसद्भावात् तथाऽनुस्मृतिरुपपन्नेति सिद्धम्॥ १६ ॥ अ. ६ ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्ब्रह्मसूत्रभाष्यस्य टीकायां श्रीमज्जयतीर्थमुनिविरचितायां तत्वप्रकाशिकायां चतुर्थाध्यायस्य तृतीयः पादः ॥

शेषतात्पर्यचन्द्रिका

ॐ कार्यं बादरिरस्य गत्युपपत्तेः ॐ ॥ ४.३.७ ॥

अन्तश्चतुर्भेदाधिकरणस्यास्य प्रतिपाद्यविषयाः

यथोक्तमार्गेण गतानां ब्रह्मविदां कार्यात्मकं ब्रह्म तत्तद्योग्यतानुसारेण प्राप्यमित्यस्मिन्नधिकरणे दशभिः सूत्रैः प्रतिपाद्यते। यद्यप्यत्र पूर्वपक्षसिद्धान्त-न्यायानां चतुर्णां विवरणादधिकरणचतुष्टयेन भवितव्यम् । कार्यप्राप्तिनियमः परप्राप्तिनियम उभयप्राप्तौ च व्यवस्थाभाव इत्यादिविरुद्धप्रमेयनिराकरणेना-नियमव्यवस्थादीनां बहूनामर्थानां प्रतिपादनाच्च । तथापि गम्यस्वरूपमात्रस्य प्रमेयस्यैकत्वादेकमेवेदमधिकरणं युक्तम् । अन्यथोत्क्रान्त्याद्यधिकरणेषु सूर्यनाडीसम्बन्धादेरनेकस्य प्रमेयस्य प्रतिपादनादेकाधिकरणत्वं न स्यात्। अत एव विवरणेऽन्तर्भेदाधिकरणत्वात् समुदायोक्तिरिति प्रत्येकं न्यायचतुष्टयाभि-धानस्याभिप्रायो वर्णितः। तस्मादेकमेवेदमधिकरणम्।

तदुक्तम्-

मार्गेणानेन किं गम्यमित्यस्यैव विनिर्णये।
कार्यं बादरिरित्यादिसूत्राणां व्यापृतिर्यतः॥ इति।

ननु 'उत्क्रान्तमार्गश्च विमुक्तगम्यम्' इत्यादौ देवतादिसाधारणगम्यस्यैवात्र प्रतिपाद्यत्वप्रतीतेः कथं तेन मार्गेण गतानां गम्यं निरूप्यत इत्युक्तम् ? देवानां मार्गाभावात्। नैष दोषः । मुखतो गन्तॄणां गम्यप्रतिपादनेऽप्यर्थाद्देवानामपि गम्यप्रतिपत्तिसम्भवात्। न च देवानां मुखतो गम्यप्रतिपादनेन गन्तॄणामप्यर्थाद् गम्यप्रतिपादनं भवतीति वैपरीत्यं शङ्क्यम्। सङ्गत्यभावात्। एतदप्रतिपादने प्राप्यानुस्मृत्यनुपपत्तेरभावात्। नहि विशिष्टोत्क्रान्तिसिद्ध्यर्थं मनुष्यैरपेक्ष्यमाणा प्राप्यानुस्मृतिर्देवानामप्यपेक्षितेति युक्तम्। 'स एनान् ब्रह्म गमयति' (छा. ४.१५.५) इति विषयवाक्यस्थैतच्छब्देन गन्तॄणामेव परामर्शाच्च। तत्र गम्यस्य महाप्रमेयस्यैक्येऽपि कार्यप्राप्तिनियमाभावः परप्राप्तिनियमाभावः नापीच्छया नियमप्राप्तिः । नापि योग्यतामतिक्रम्यानियम इत्यादिरूपेण बहूनां दर्शनादन्तश्चतुर्भेदाधिकरणम्। तदुक्तम्-

'कार्यप्राप्तौ न नियमः परप्राप्तौ च नास्ति सः।
न चेच्छयाऽस्य नियमो न चानियम इष्यते।
इत्यादिरूपेण तथा बहवो निर्णयाश्च यत्।
अन्तर्भेदाधिकरणमित्येतत्तत उच्यते॥' इति।

प्रथमः पूर्वपक्षः

अत एवात्र प्रथमं तावत् 'स एनान् ब्रह्म गमयति' (छा. ४.१५.५) इति वाक्यमुदाहृत्येदं चिन्त्यते। किमत्र प्राप्यत्वेनोक्तं ब्रह्म कार्यमेवेति नियम उतानियम इति । तत्र तावत्प्राप्तं चतुर्मुखमुक्तिपर्यन्तं सन्ततत्वाद् बन्धस्य तावद्भगवत्-प्राप्तिर्नास्तीति नियम इति। तथाहि। 'तथाऽपि प्रकृतेर्बन्धो ब्रह्मणा सह भिद्यते'

इत्यादिना चतुर्मुखमुक्तिपर्यन्तं बद्धस्य सत्त्वात् । बद्धस्य च भगवत्प्राप्त्यनुपपत्तेस्तावत्पर्यन्तं भगवत्प्राप्तिर्नास्त्येव । चतुर्मुखस्य तु बद्धप्राप्यत्वस्यापि सम्भवात् स एवात्र विवक्षितः । न च ब्रह्मशब्दमुख्यार्थत्यागः । उक्तबाधकबलेन तत्त्यागस्य न्याय्यत्वात् ।

न च बद्धत्वेऽपि ब्रह्मदृष्टिमत्त्वात् तत्सामर्थ्यात् परप्राप्तिर्युज्यते । अन्यथा 'स्वोदयात् फलदं ज्ञानम्' इत्यादिविरोध इति वाच्यम् ।

'ऋते देवान् परं ब्रह्म कः पुमान् प्राप्नुयात् क्वचित् ।
यद्यपि ब्रह्मदृष्टिः स्याद् ब्रह्मलोकमवाप्नुयात् ॥'
(सू.भा.उदा.अध्यात्मवचनम् ४.३.७)

'यदि ह वाव परमभिपश्यति प्राप्नोति ब्रह्माणं चतुर्मुखम्'
(कौषारवश्रुतिः, सू.भा. ४.३.८)

इत्यागमेन तस्याः ब्रह्मलोकप्रापणसामर्थ्येऽपि साक्षाद् भगवत्प्रापणसामर्थ्याभावावगमात् । 'स्वोदयात्फलदं ज्ञानम्' इत्यादेः ब्रह्मलोकप्राप्तिरूपफलदत्वेनैव चरितार्थत्वात् । ततो बद्धस्य भगवत्प्राप्त्यसम्भवात् कार्यब्रह्मप्राप्तिरेवेति नियमः ।

न च 'ब्रह्मविदाप्नोति परम्' (तै.उ. २.१) इत्युक्तपरब्रह्मप्राप्तिविरोधः । पश्चादपि तत्प्राप्तिसम्भवात् । न च तावता विदुषः कार्यमेव ब्रह्म प्राप्यमिति नियमभङ्गः । 'स एनान् ब्रह्म गमयति' (छा. ४.१५.५) इति वाक्येऽर्चिरारभ्य वायुपर्यन्तं गतानां साक्षाद् गम्यस्यैव विचार्यत्वात् । 'ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे । परस्यान्ते परात्मानः प्रविशन्ति परं पदम्' (कूर्म.पु. १२.२६९) इति स्मृत्या चतुर्मुखप्राप्त्यनन्तरं परब्रह्मप्राप्त्यवगमेऽपि प्रथमत एव तत्प्राप्त्यवगमाभावादिति प्राप्तेऽभिधीयते ।

प्रथमः सिद्धान्तः

'यान्ति देवं परं केचित् पूर्वं केचिल्लये विभुम् ।
योग्यतातारतम्येन विशेषोऽयमपीष्यते ॥' (त.प्र.उदा.श्रुतिः ४.३.१५)

इति श्रुतेः कार्यमेव ब्रह्म प्राप्नोतीति नियमपक्षो न युक्तः । न च बद्धत्वात् तदन्यप्राप्त्यनुपपत्तिः । 'यान्ति देवं परं केचित्' इति वचनेन निरवकाशेन केषाञ्चिद् बद्धत्वमप्रतिबन्धकमित्यङ्गीकारात् । तस्माच्चतुर्मुखविषयो नियमपक्षो न युक्त इति ।

द्वितीयः पूर्वपक्षः

एवं स्थिते पुनश्चिन्त्यते । परब्रह्मविषयो नियमः सम्भवति न वेति । तत्र परब्रह्मण एव ब्रह्मशब्दमुख्यार्थत्वात् 'स एनान् ब्रह्म गमयति' (छा. ४.१५.५) इत्यत्र ब्रह्मशब्देन विष्णोरेव प्रथमोपस्थितत्वेन तदपोहायुक्तेः परब्रह्मण एव प्राप्तिनियमः । बद्धस्य तत्प्राप्त्यनुपपत्तिस्तु पूर्ववदेव परिहरणीया । दर्शनोपासनजिगमिषाणां परब्रह्मविषयत्वेन कार्यविषयत्वाभावाच्च । नहि साधनफलयोर्भिन्नविषयत्वं युक्तम् । राजदर्शनोपासनादिमतोऽप्यन्यप्राप्तिप्रसङ्गात् ।

'यदुपास्ते पुमान् जीवन् यत् प्राप्तुमभिवाञ्छति ।
यच्च पश्यति तृप्तः सन् तत्प्राप्नोति मृतेरनु ॥'
(सू.भा.उदा.पाद्मवचनम् ४.३.१४)

इति वचनविरोधाच्चेति प्राप्ते उच्यते ।

द्वितीयः सिद्धान्तः

नायमपि नियमपक्षो युक्तः । 'केचिल्लये विभुम्' इति केषाञ्चित्प्रलये भगवत्प्राप्त्युक्तेर्लयात् पूर्वं चतुर्मुखप्राप्तेरवर्जनीयत्वात् । न च चतुर्मुखघटितनियमस्य प्रागेव दूषितत्वाद् विष्णुघटितनियमस्येह दूषणं तर्हि 'स एनान् ब्रह्म

गमयति' (छा. ४.१५.५) इति वाक्यस्यार्थः कः स्यात्। उच्यते। परमपरमपि ब्रह्म गमयतीत्यनियम एव।

नन्वयुक्तोऽयं पक्षः। न ह्येकमेव युगपदुभयं गमयतीति युज्यते विरोधात्। न च प्रथमतश्चतुर्मुखं गमयति ततो विष्णुमिति कालभेदेन विरोधाभाव इति वाच्यम्। 'स एनान् ब्रह्म गमयति' (छा. ४.१५.५)इति वाक्येन प्रथमप्राप्यस्यैव विचार्यत्वादिति चेन्न। कांश्चित्परं कांश्चिदपरमपि गमयतीत्यङ्गीकारे विरोधाभावात्। न चानियमाश्रयणान्नियमाश्रयणं वरमिति वाच्यम्। नियमपक्षस्य तत्र तत्रोक्तदोषगणग्रस्तत्वात्। न चाधिकारिद्वैविध्यकल्पनमनियमपक्षेऽपि दोष इति वाच्यम्। केचित्पूर्वं, केचिल्लये इति द्वैराश्यस्य प्रमितत्वात्। न चोभयप्राप्तिग्रहणे तवापि दोषद्वयापात इति वाच्यम्। कार्यमेव नयतीति व्याख्यानस्य विशेषहेत्वभावेनाऽनादरणीयतया केषाश्चिद् ब्रह्मगमनस्यापि प्राप्ततया बद्धत्वस्य प्राप्तिप्रतिबन्धकत्वानभ्युपगमान्न तावद् गत्यनुपपत्तिरापतति। न हि श्रुत्यादीनामपि निषेधे तात्पर्यम्। येन 'यान्ति देवं लये केचित्' इति वचनमप्रमाणं स्यात्। नापि ब्रह्मशब्दमुख्यार्थत्वत्यागदोषः। केषाश्चित्कार्यप्राप्तेरेव प्रमाणबलेनाङ्गीकृतत्वेनामुख्यवृत्त्याश्रयणस्य न्याय्यत्वात्। न च ज्ञानोपासनाभिसन्धीनां वैय्यधिकरण्यं दोषः। 'अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम्' (ब्र.सू. ३.३.५७), 'अङ्गेषु यथाऽऽश्रयभावः' (ब्र.सू. ३.३.६३) इत्यादिना तदुपासनाया अपि विहितत्वेनाभिसन्ध्युपास्तिदर्शनानां कार्येऽपि सम्भवादिति। तस्मादनियमपक्ष एव युक्त इति।

तृतीयः पूर्वपक्षः

एवं स्थिते पुनश्चिन्त्यते। यदुक्तं पूर्वत्र कार्यं परं वा प्राप्नोतीत्यनियमात्मा विकल्प इति स चायं विकल्पोऽव्यवस्थित उत व्यवस्थित इति। तत्राव्यवस्थितविकल्प एवेति पूर्वः पक्षः। व्यवस्थायां प्रमाणाभावात्। 'केचित्पूर्वं

केचिल्लये' इति श्रुतेः पक्षद्वयसाधारणत्वात्। अव्यवस्थायां बाधकाभावाच्च। यत्प्राप्तुमभिवाञ्छति तत्प्राप्नोतीति वचनाच्च। तस्माद् ज्ञानिषु बहुजीवेषु मध्ये यस्य कार्यप्राप्तीच्छा तस्य तत्प्राप्तिर्भवति। यस्य परप्राप्तीच्छा तस्य तत्प्राप्तिरित्यव्यवस्थितिरेवेति पूर्वः पक्षः।

तृतीयः सिद्धान्तः

सिद्धान्तस्तु। न व्यवस्थां विहाय यथेष्टमुभयमपि प्राप्यमिति युक्तम्।

'क्रमानुरागी भगवान् क्रमात् पुंभिरवाप्यते।
अतः क्रमात् समृद्धे तु ज्ञाने ब्रह्मलये नरैः।
प्राप्यते नियमेनैव कैश्चिदेवाऽप्यते मृतौ॥'

अर्चिरादिना मार्गेण क्रमाच्चतुर्मुखलोकप्राप्तौ तत्रापि पुनरुपासनापरिपाकातिशयाद् ज्ञाने समृद्धे सति महाप्रलयपर्यन्तं तत्र स्थित्वा महाप्रलये प्रत्यासन्ने पूर्वोक्तक्रमेण चतुर्मुखोदरप्रविष्टैर्नरैर्ब्रह्म प्राप्यते, एवमेव नियमः। ननु स्वशरीरत्यागानन्तरमेव। ततस्तेषां ब्रह्मलोकप्राप्तिरेव प्रथमा। कैश्चिद्देवादिभिस्तु स्वचरमशरीरक्षयानन्तरं प्रथमत एव ब्रह्म प्राप्यते।

ननु मनुष्याणामिव देवानामपि स्वशरीरत्यागानन्तरं कञ्चित्कालं कुत्रचिदवस्थानेन कालान्तरे परप्राप्तिः किं न स्यात्। भगवद्दर्शनादेस्तेष्वप्यविशेषादिति चेन्न। नराणां प्रारब्धकर्मणः प्रतिबन्धकस्य सत्त्वेन साक्षात्परप्राप्त्यनुपपत्तेः। अत एव केषाञ्चित्कार्यप्राप्त्यङ्गीकारो व्यर्थ इति निरस्तम्। प्रारब्धकर्मक्षयार्थमेव चतुर्मुखप्राप्त्यङ्गीकारात्। न च तावता भगवद्दर्शनादेर्ब्रह्मप्राप्तिफलकत्वव्याघातः। चतुर्मुखप्राप्त्यादेः स्वाङ्गस्य तत्पदव्यवधायकत्वात्। देवादीनां तु 'ब्रह्मणा शतकालात्तु पूर्वमारब्धसङ्क्षयः' इत्यादेस्तत्तत्पदावसानात्

प्रागेव प्रारब्धकर्मणां प्रक्षीणत्वान्न स्थलान्तरेऽवस्थानमपेक्षितम् । किन्तु स्वोत्तमानुप्रवेशेन परप्राप्तिरेवेति श्रुत्यैव व्यवस्थाप्रतिपादनादिति ।

चतुर्थः पूर्वपक्षः

पुनरिदमपरं चिन्त्यते । सा व्यवस्थाऽऽगन्तुकयत्किञ्चिद्धर्मप्रयोज्योताना-गन्तुकयोग्यताप्रयोज्येति । तत्र न योग्यताप्रयोज्या व्यवस्था । किन्तु यस्य तत्प्राप्तौ समीपदेशस्थित्यादिरूपं सौकर्यं तस्य तत्प्राप्तिरित्यागन्तुकयत्किञ्चिद्धर्म-प्रयोज्यैव । कार्यपरप्राप्तिपक्षद्वयस्याप्यपरिहार्यत्वात् । न च महाफलप्राप्तौ व्यवस्थाभावो युज्यते । पूर्वोक्तवचनविरोधात् । न चानागन्तुकं सौकर्याद्यतिरिक्तं व्यवस्थापकं पश्यामः । तस्य च न व्यवस्थाऽस्ति । नहि नरा एव समीपस्था न देवादय इत्यस्ति नियमः । तस्माद् व्यवस्थापकधर्मस्याप्यव्यवस्थितत्वाद् तत् किमिदं वचो व्यवस्थया प्राप्तिरिति ।

चतुर्थः सिद्धान्तः

एवं प्राप्ते उच्यते-

'यान्ति देवं परं केचित् पूर्वं केचिल्लये विभुम् ।
योग्यतातारतम्येन विशेषोऽयमपीष्यते ॥' (त.प्र.उदा.श्रुतिः ४.३.१५)

इति श्रुत्या योग्यतायाः व्यवस्थापकत्वावगमात् । भेद्यं हि व्यवस्थापकेन केन-चित् । अन्यथा व्यवस्थाया आकस्मिकत्वापत्तेः । तत्र न तावत् सौकर्यमागन्तुकमेव व्यवस्थापकम् । व्यवस्थाप्यस्यापि तदापत्तेः । न च क्वापि सौकर्यं व्यवस्थापकत्वेन श्रुतम् । येन तस्याप्यनागन्तुकत्वकल्पनं स्यात् । तेन व्यवस्थापकानुवृत्तेरावश्यकत्वे सिद्धे श्रुत्युक्तयोग्यतारूपव्यवस्थापकानुवृत्तेरेव न्याय्यत्वान्नाव्यवस्थित-विकल्पापत्तिः । न चेयं योग्यता व्यवस्था वा दुर्ज्ञाना । प्रतीकालम्बनत्वा-प्रतीकालम्बनत्वादिना सुज्ञेयत्वात् ।

'प्रतीकं देह उद्दिष्टो येषां तत्रैव दर्शनम् ।
न तु व्याप्ततया क्वापि प्रतीकालम्बनास्तु ते ।
अप्रतीका देवतास्तु ऋषीणां शतमेव च ।
राज्ञां च शतमुद्दिष्टं गन्धर्वादिशतं तथा ।
एतेऽधिकारिणो व्याप्तदर्शनेऽन्ये न तु क्वचित् ।
अयोग्यदर्शने यत्नाद् भ्रंशः पूर्वस्य चापि तु ।
अप्रतीकाश्रया ये हि ते यान्ति परमेव तु ।
स्वदेहे ब्रह्मदृष्ट्यैव गच्छेद् ब्रह्मसलोकताम् ।
ब्रह्मणा सह सम्प्राप्ते संहारे परमं पदम् ॥'
(गारुडवचनम्,सू.भा. ४.३.१५)

इत्यागमेनैव व्यवस्थाया दर्शितत्वाच्च ।

एतेन, सर्वेषां परप्राप्तिरेवेति नियमपक्ष एव युक्तः, कल्पनागौरवाद्यभावात् । अन्यथा योग्यता, तत्प्रयोज्यत्वम्, व्यवस्थायाः तदनागन्तुकत्वं चेत्यादि बहु कल्पनीयं स्यादिति निरस्तम् । इच्छामात्रस्य सहोपस्थित्यादिरूपसौकर्यस्य च 'स यथाकामो भवति तत्क्रतुर्भवति । यत्क्रतुर्भवति तत्कर्म कुरुते । यत्कर्म कुरुते तदभिसम्पद्यते ।' (बृ. ६.४.५)- यथेच्छति तदनुगुणनिश्चयवान् भवति । ततस्तदनुसारेण तदुपास्ते जानाति च । ततस्तदनुसारेण तत्प्राप्नोतीत्यर्थः । इति श्रुताविच्छाज्ञानोपासनाऽपरोक्षैरेव परप्राप्त्यभिधानेनाप्रयोजकत्वोक्तेश्च ।

नन्वथापि सप्रतीकाश्चतुर्मुखमप्रतीकाः परमिति व्यवस्था न युज्यते । 'सप्रती-काश्चतुर्मुखमप्रतीकाः परममु हैते गच्छन्त्यागच्छन्ति च चतुर्मुखात् परमं परमाच्चतुर्मुखं यावद्विलयमथ सह चतुर्मुखेन विमुच्यन्ते आनन्दिनो भवन्ति' (न्या.वि.उ.श्रुतिः) इति श्रुतावप्रतीकानामपि चतुर्मुखप्राप्त्युक्तेरिति चेन्न । नाडी-विशेषेणोत्क्रान्ता अर्चिरुपक्रम्य वायुपर्यन्तं प्राप्ताः प्रथमं परमेव वैकुण्ठे लोके

प्राप्नुवन्ति। ततः कालान्तरे स्वेच्छया वैकुण्ठादमुक्तस्थानादवरुह्य चतुर्मुखादि-लोकेषु विहृत्य पुनस्तत्र गच्छन्त्यागच्छन्ति च। सप्रतीकास्तु मुहूर्तमात्रं भगवद्द्रष्टारश्चेत् प्रथमं सत्यलोकस्थं चतुर्मुखमेव प्राप्नुवन्ति। तत्र पुनः पक्वसाधनाः कालान्तरे तदूर्ध्वं वैकुण्ठं वा तदधस्तपोलोकादिकं वा प्राप्य स्वेच्छया विहृत्य ततः सत्यलोकं गच्छन्त्यागच्छन्ति च। षण्मात्राकालपरिमितभगवद्दर्शनाख्य-तपोयुक्ताश्चेत् प्रथमं तपोलोकमेव प्राप्नुवन्ति। शेषं पूर्ववत्। एकमात्राकाल-परिमितभगवद्दर्शनाख्ययोगयुक्ताश्चेत् प्रथमं जनोलोकमेव प्राप्नुवन्ति। शेषं पूर्व-वत्। तच्चतुर्भागपरिमितभगवद्दर्शनाख्यपादयोगयुक्ताश्चेत् प्रथमं महर्लोकमेव प्राप्नुवन्ति। शेषं पूर्ववदित्यङ्गीकारात्। तदुक्तम्-

'विष्णोर्लोकं तदैवैके यान्ति कालान्तरे परे।
आज्ञयैव हरेः केचिदपूर्तैः केचिदञ्जसा॥
विहृत्यैवान्यलोकेषु मुच्यन्ते ब्रह्मणा सह।
ज्ञानेन ब्रह्मलोकः स्यान्महाज्ञानाद्धरेर्गतिः॥
पादयोगान्महर्लोको जनोलोकस्तु योगतः।
तपसस्तु तपोलोकः प्राप्यते नान्यथा क्वचित्॥' इत्यादि।

एतेन,

'ईयुस्त्रीन् कर्मणा लोकान् ज्ञानेनैव तदुत्तरान्।
तत्र मुख्या हरिं यान्ति तदन्ये वायुमेव तु॥
अपक्वा येन ते यान्ति वायुं वा हरिमेव वा।
स्थानमात्राश्रितास्ते तु पुनर्जनिविवर्जिताः॥'

इत्यादौ ज्ञानिनामेव स्थानमात्रप्राप्तिलक्षणगम्यान्तरस्य तृतीयप्रकारस्यापि प्रतीतेरुभयप्राप्तिनिषेधाच्च [1]कथमत्राधिकरणे 'कार्यं बादरिः', (ब्र.सू. ४.३.७)

१. कथमिहाधिकरणे- प.

'परं जैमिनिः' (ब्र.सू. ४.३.१२) इत्यादिना गम्यद्वयमेवोच्यत इति चोद्यं निरस्तम्। स्थानमात्राश्रितानामपि कालान्तरे स्वसाधनपरिपाके सति तपआदि-लोकस्थितचतुर्मुखप्राप्तेरङ्गीकृतत्वात्। 'अपक्वाः ये न ते यान्ति वायुं वा हरिमेव वा' इति तु प्राथम्याभिप्रायम्।

एतेन नारदादीनां सत्यलोकादिप्राप्तिश्रवणाद्वायोरेव ब्रह्मप्रापकत्वमयुक्तमिति निरस्तम्। अर्चिरादिमार्गेण प्राप्तानेव वायुर्ब्रह्म गमयतीत्यङ्गीकारात्। न हि नारदादयः नाडीविशेषेणोत्क्रम्यार्चिरादिप्राप्ताः। अत एव नाडीविशेषेणोत्क्रान्तस्य परीक्षितः 'भेजे खगेन्द्रध्वजपादमूलम्' (भाग. स्क. २) इत्यादिना वैकुण्ठलोक-प्राप्तिश्रवणं युज्यते। तस्याप्रतीकत्वेन महाज्ञानित्वात्। महाज्ञानाच्च साक्षादेव हरिलोकप्राप्तेः 'महाज्ञानाद्धरेर्गतिः' इत्यादिनोक्तत्वादिति सर्वमनवद्यम्।

परोक्तं कार्याधिकरणम्

अत्रान्ये 'कार्यं बादरिरस्य गत्युपपत्तेः' इत्यारभ्य 'अप्रतीकालम्बनान्नयतीति बादरायणः' इत्यतः प्राक् सूत्राष्टकमेकमधिकरणम्। तत्र पूर्वैः पञ्चभिः सूत्रैः सिद्धान्तः, त्रिभिरुत्तरैः पूर्वः पक्षः। तथाहि 'स एनान् ब्रह्म गमयति' (छा. ४.१५.५) इत्यत्र विचिकित्स्यते। किं निर्गुणं परं ब्रह्म गमयत्याहोस्वित् सगुणं कार्यमपरं ब्रह्मेति।

तत्र,

मुख्यत्वादमृतप्राप्तेः परप्रकरणादपि।
गन्तव्यं जैमिनिर्मेने परमेवार्चिरादिना॥

'ब्रह्म गमयति' इत्यत्र हि नपुंसकं ब्रह्मपदं परस्मिन्नेव ब्रह्मणि रूढत्वा-दनपेक्षतया मुख्यमिति सति सम्भवे न कार्ये ब्रह्मणि गुणकल्पनया व्याख्यातुमुचि-तम्। अपि चामृतत्वफलावाप्तिर्न कार्यब्रह्मप्राप्तौ युज्यते। तस्य कार्यत्वेन

मरणधर्मकत्वात्। किञ्च तत्र तत्र परमेव ब्रह्म प्रकृत्य 'प्रजापतेः सभां वेश्म प्रपद्ये। यशोऽहं भवानि ब्राह्मणानाम्' (छा. ८.१४.१) 'यस्य नाम महद्यशः' (श्वेताश्व. ४.१९) इत्यादिनोच्यमानाः प्रजापतिसभाप्रतिपत्त्यादयो नापर-ब्रह्मविषयाः भवितुमर्हन्ति। 'ब्रह्मलोकान् गमयति ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति' (बृ. ६.२.१५) इत्यादिश्रुतिषु ब्रह्मलोकेष्विति बहुवचनमेकस्मिन्नपि प्रयोगसाधुतामात्रेण गमयितव्यम्। लोकशब्दश्चालोकने प्रकाशने वर्तयितव्यः। नतु सन्निवेशवति देशविशेषे। तस्मान्निर्गुणमेव ब्रह्म गमयति तत्पुरुषोऽमानव इति प्राप्तेऽभिधीयते-

'कार्यमप्राप्तपूर्वत्वादप्राप्तप्रापणी गतिः।
प्रापयेद् ब्रह्म न परं प्राप्तत्वाज्जगदात्मकम्॥'

तत्वमसिवाक्यार्थसाक्षात्कारात् प्राक्किलायं जीवात्माऽविद्याकर्म-वासनाद्युपाध्यवच्छेदाद् वस्तुतोऽनवच्छिन्नोऽप्यवच्छिन्नमिवाभिन्नोऽपि लोकेभ्यो भिन्नमिवाऽत्मानमभिमन्यमानः स्वरूपादन्यानप्राप्तानर्चिरादीन् लोकान् गत्याऽऽप्नोतीति युज्यते। अद्वैतब्रह्मतत्त्वसाक्षात्कारवतस्तु विगलितनिखिल-प्रपञ्चावभासविभ्रमस्य न गन्तव्यं न गतिर्न गमयितार इति किं केन सङ्गतम्? तस्मादुपन्यस्तबहुश्रुत्यनुसारादुपपत्तेश्च ब्रह्मशब्दोऽसम्भवन्मुख्यवृत्तिर्ब्रह्म-सामीप्यादपरब्रह्मणि लक्षणया नेतव्यः। तथा च लोकेष्विति बहुवचनोपपत्तिः कार्यब्रह्मलोकस्य। परस्य त्वनवयवतया तद्द्वारेणाप्यनुपपत्तेः। लोकपदं चेलावृतादिवत् सन्निवेशविशेषवति भोगभूमिभागे निरूढं न कथञ्चिद्योगेन प्रकाशे व्याख्यातं भवतीति व्याचक्षिरे।

तद्विमर्शः

तत्र। 'प्रतिषेधादिति चेन्न शारीरात्' इत्यस्मिन्नधिकरणे परब्रह्मविदः सपरिकरमुत्क्रान्तिगत्योरभावः साधित एवेति गतार्थत्वात्। अत एव तत्र

भामतीवाक्यम्- 'अपि चाद्वैतपरिभावनाभुवाप्रसङ्ख्यानेन निर्मृष्टनिखिल-प्रपञ्चावभासजातस्य गन्तव्याभावादेव नास्ति गतिरित्याह' इत्यादि। कार्यब्रह्मप्राप्तेः पूर्वं सूत्रितायाः सिद्धान्ततानुपपत्तेश्च। पूर्वाणि पूर्वपक्षसूत्राणि भवन्ति। उत्तराणि सिद्धान्तसूत्राणीति व्यवस्थायाः सर्वसम्मतत्वात्। बादरिग्रहणात् पूर्वाण्यपि सिद्धान्तसूत्राणीति ज्ञायत इति चेन्न। परं जैमिनिर्मुख्यत्वादित्युत्तरेष्वपि जैमिनिग्रहणात्। तथाऽपि तत्त्वदर्शी बादरिः, जैमिनिस्तु न तथेति चेत्। कथमिदं लोकोत्तरप्रज्ञेनावगतमिति पृच्छामः।

अनुपपन्नभाषित्वाज्जैमिनिर्न तत्त्वदर्शी। तथाहि 'यत्सर्वगतं सर्वान्तरं सर्वात्मकं च परं ब्रह्म', 'आकाशवत् सर्वगतश्च नित्यः', 'यत्साक्षादपरोक्षाद् ब्रह्म' (बृ. ३.४.१), 'य आत्मा सर्वान्तरः' (बृ. ३.४.१), 'आत्मैवेदं सर्वम्' (छा. ७.२५.२), 'ब्रह्मैवेदं विश्वम्' (मु. २.२.११) इत्यादिश्रुतिनिर्धारितविशेषम्, तस्य गन्तव्यता न कदाचिदुपपद्यते। न हि गतमेव गम्यते। अन्यो ह्यन्यद् गच्छतीति प्रसिद्धं लोके। किञ्च, गन्तव्यस्य ब्रह्मणः स्वरूपमेव चेद् गन्ता जीवस्तर्हि तस्य गमनानुपपत्तेरवयवावयविभावो वा विकारविकारिभावो वा, अत्यन्तभेदो वा वक्तव्यः। तत्र नाद्यः पक्षो युक्तः। अवयवस्यैकदेशतयाऽवयव्यात्मकैकदेशिनो नित्यप्राप्तत्वेन पुनर्ब्रह्मदेशगमनोपदेशानुपपत्तेः। ब्रह्मणो निरवयवत्वप्रसिद्ध्यनुप-पत्तेश्च। अत एव न द्वितीयः। नहि घटो मृदात्मतां परित्यज्यावतिष्ठते। न तृतीयः। स भिन्नो जीवोऽणुर्व्यापी मध्यमपरिमाणो वा। आद्ये कृत्स्नशरीरवेदनानु-पपत्तिः। द्वितीये गमनानुपपत्तिः। तृतीयेऽनित्यत्वप्रसङ्गः। किञ्च तत्त्वमस्यादि-शास्त्रस्य बाधोऽनिर्मोक्षप्रसङ्गश्च। संसार्यात्मत्वानिवृत्तेः। निवृत्तौ वा स्वरूपनाशप्रसङ्ग इत्याद्युपपत्तिसाहित्यात् तत्त्वदर्शी बादरिरिति निश्चीयत इति चेत्।

तर्हि कुतो जैमिनेरपि तन्न निश्चीयते। तन्मतेऽपि ब्रह्मशब्दस्य परस्मिन्नेव

ब्रह्मणि मुख्यत्वात् । प्रमाणान्तरेण कार्यत्वनिश्चये सत्येव हि लाक्षणिकत्वं युक्तम् । न च गमनानुपपत्तिः प्रमाणम् । परस्य ब्रह्मणः सर्वगतत्वेऽपि विदुषो विशिष्टदेशगतस्यैवाविद्यानिवृत्तिः शास्त्रात् । यथा हि विद्योत्पत्तेः पूर्वं वर्णाश्रमधर्मशौचाचारदेशकालाद्यपेक्षा 'तमेवं वेदानुवचनेन' (बृ. ४.४.२२) इत्यादिशास्त्रादवगम्यते तथा निःशेषाविद्यानिवर्तनरूपफलनिष्पत्तिरपि विशिष्टदेशगतिसापेक्षेति गतिशास्त्रादवगम्यते । निषादस्थपतिन्यायेन ब्रह्मैव लोको ब्रह्मलोक इति कर्मधारय एव । बहुवचनं चादितिः पाशानित्यादिवदुपपन्नम् ।

किञ्च 'प्रजापतेः सभां वेश्म प्रपद्ये' (छा. ८.१४.१) इति प्रतिपत्त्यभिसन्धिः परब्रह्मस्वीकारे युज्यते नान्यथा । वाक्यशेषे 'यशोऽहं भवानि ब्राह्मणानाम्' (छा. ८.१४.१) इत्यस्याभिसन्धातुः सर्वाविद्याविमोकपूर्वकसर्वाभावाभिसन्धानात् । 'अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात् प्रमुच्य । धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवामि' (छा. ८.१३.१) इत्यभिसम्भाव्यब्रह्मलोकस्याकृतत्वश्रवणात् । सर्वबन्धविनिर्मोकस्य साक्षाच्छ्रवणाच्चेत्यादियुक्तीनां सद्भावात् संशयितव्यं तु भवति किमयं सिद्धान्त उत पूर्व इति ।

तत्र च विनिगमनकारणाभाव एव । ननु पूर्व एव सिद्धान्त इति निर्णयः । प्रत्युतोत्तरसूत्रेषूत्तरपक्ष इति नियमानुरोधाद् उत्तर एव सिद्धान्तः । उक्तरीत्या दोषपरिहारसम्भवात् । असम्भवे वा तत्रापि दोषाणामुपन्यस्तत्वात् सिद्धान्तत्वानुपपत्तिरेव । बादरिग्रहणानुपपत्तिश्च । न हि मुनिमतयोरेव पूर्वपक्षसिद्धान्तभावो वा दोषसद्भावो वा युक्तः । कथञ्चित्प्रतीयमानानामपि दोषाणां परिहरणीयत्वात् । अशक्यपरिहारत्वेन सदोषस्यापि ग्राह्यत्वात् । यथोक्तं यथासङ्क्षचनयभाष्ये 'यत्राल्पीयांसो दोषाः स एव ग्राह्यः' इति । समानदोषत्वे तूभययोरपि ग्राह्यत्वाच्च । नच वस्तुनि विकल्पासम्भवः । ग्रहणाग्रहणादिवदधिकारिभेदादुप-

पत्तेः । अत एव 'अप्रतीकालम्बनान्नयति' इति सूत्रकृदेव विरोधं पराचष्टे । अन्यथा मतद्वयोपन्यासमात्रेणाधिकरणपर्यवसानानुपपत्तिः ।

प्रतीकाप्रतीकविभागे रामानुजमतनिरासः

अत्र केचिदेवमधिकारिभेदमाहुः 'विद्वांसो द्विविधाः प्रतीकालम्बना अप्रतीकालम्बनाश्च । तत्राचिन्मिश्रम्, केवलं वाऽचिद्वस्तु ब्रह्मदृष्ट्या तद्वियोगेन च ये उपासते ते प्रतीकालम्बनाः । ये पुनः परं ब्रह्मोपासते आत्मानं च प्रकृतिवियुक्तं ब्रह्मात्मकमुपासते तेऽप्रतीकालम्बनाः । तत्र प्रतीकालम्बनानां न परब्रह्मप्राप्तिः । किन्तु 'यावन्नाम्नो गतं तत्रास्य यथा कामचारो भवति' (छा. ७.१.५) इत्यादिका श्रुतिर्नामादिप्रतीकोपासनानां गत्यनपेक्षं परिमितं फलविशेषमेव दर्शयति । अप्रतीकालम्बनानां तु परब्रह्मप्राप्तिरेवेति । तन्न । तत्किं प्रतीकालम्बना ब्रह्मोपासका उत न । नाद्यः । ब्रह्मोपासकानां परिमितफलायोगात् । अन्यथाऽप्रतीकालम्बनानामपि तत् स्यात् । ब्रह्मोपासकानां सर्वेषां गतेः साधितत्वेन गत्यनपेक्षफलासम्भवाच्च । न द्वितीयः । 'स एनान् ब्रह्म गमयति' इति वाक्ये एतच्छब्देन[१] प्रकृतानां ब्रह्मोपासकानामेव परामर्शात् । पञ्चाग्निविद्योपासकानामपि प्रतीकालम्बनत्वेनाब्रह्मोपासकत्वापत्त्या तेषां गत्युक्तिविरोधाच्च । नामादिप्रतीकोपासकानामपि 'स यो नाम ब्रह्मेत्युपास्ते' (छा. ७.१.५) इत्यादिवाक्येषु ब्रह्मशब्दयोगेन ब्रह्मोपासकत्वावगमाच्च । अन्यथा तेषां प्रतिवेदान्तमुक्तिर्न स्यात् । न हि परिमितफलस्य कर्मिणः प्रतिवेदान्तमुक्तिरस्ति । 'प्लवा ह्येते अदृढा यज्ञरूपाः' (मु. १.२.७) इत्यादिना कर्मिणां निन्दाया इव प्रतीकोपासकानामपि क्वापि निन्दायाः प्रसङ्गाच्च ।

तस्मात्,

१. 'एतत्पदेन' - प.

'प्रतीकं देह उद्दिष्ट येषां तत्रैव दर्शनम्।
नतु व्याप्ततया क्वापि प्रतीकालम्बनास्तु ते।
अप्रतीका देवतास्तु ऋषीणां शतमेव च।
राज्ञां च शतमुद्दिष्टं गन्धर्वादिशतं तथा॥'

इति वचनानुसोरण प्रतीकाप्रतीकविभाग एव न्याय्यः।

मुनिमतयोः पूर्वपक्षसिद्धान्तभावानौचित्यम्

एतेन 'तावेतौ द्वौ पक्षावाचार्येण सूत्रितौ गत्युपपत्त्यादिभिरेको मुख्यत्वादिभिरपरः। तत्र गत्युपपत्त्यादयः प्रभवन्ति मुख्यत्वादीनाभासयितुं, न मुख्यत्वादयो गत्युपपत्त्यादीनित्याद्य एव सिद्धान्तो व्याख्यातः। द्वितीयः पूर्वपक्षः' इति भाष्योक्तं निर्धारणं निरस्तम्। हेतुत्वाविशेषेणान्योन्येनान्योन्यस्याभासीकरणायोगात्। गत्युपपत्तेर्लिङ्गरूपत्वेन ब्रह्मशब्दस्य च श्रुतिरूपत्वेन प्राबल्यदौर्बल्यव्यत्ययाच्च। ब्रह्मशब्दलक्षणायां च मुख्यार्थत्याग एव दोषः। एतेन 'न ह्यसत्यपि सम्भवे मुख्यस्यैवार्थस्य ग्रहणमिति कश्चिदाज्ञापयिता विद्यते' इति निरस्तम्।

किञ्च यद्यपि प्रकरणं लिङ्गाद् दुर्बलम्। तथाऽपि निरवकाशत्वान्न बाधितुं शक्यते। नहि परविद्याप्रकरणगतं गत्यनुकीर्तनं तत्स्तुत्यर्थं, न तु तद्वतो विधानार्थमिति निर्निमित्तमन्यार्थत्वकल्पनं युक्तम्। 'विष्वगन्या उत्क्रमणे भवन्ति' (छा. ८.६.६, कठ. २.६.१६) इत्यादि तु गत्यन्तराभावाद् ब्रह्मनाडीस्तुत्यर्थतां प्रतिपद्यते।

गतस्यापि गन्तव्यता देशान्तरविशिष्टा दृष्टा। यथा पृथिवीस्थ एव पृथिवीं तदेकदेशान्तरद्वारेण गच्छति। यथा चैकस्मिन् न्यग्रोधपादपे मूलादग्रमग्रान्मूलं गच्छतः शाखामृगस्यैकेनैव न्यग्रोधपादपेन निरन्तरं संयोगविभागा भवन्ति। न

चैते तदवयवविषया न तु न्यग्रोधविषया इति साम्प्रतम्। तथा सति न शाखामृगोऽवयवी न्यग्रोधेनावयविना युज्येत। न्यग्रोधावयवस्य तदवयवयोगात्। एवं दृश्यमानानामपि न्यग्रोधावयवानां न दृश्यमानैः शाखामृगावयवैः संयोगः। किन्तु न्यग्रोधावयवावयवानां शाखामृगावयवावयवैरेव। एवं तदवयवानां तदवयवैरेव। तदनेन क्रमेण परमाणुपर्यन्तं व्यवतिष्ठेत। ते च परमाणवोऽतीन्द्रिया इति संयोगसद्भावे प्रत्यक्षस्य प्रमाणीकर्तुमशक्यतया केष्ववयवेषु अयमनुभवपद्धतिमध्यास्तां संयोगतपस्वी। तस्मादकामेनाप्यनुभवानुरोधेन प्राप्ते एवार्थे प्राप्तिफला गतिरेषितव्या। तद्वद् ब्रह्म प्राप्तमपि प्राप्तिफलाया गतेर्गोचरो भविष्यति। अन्यथा सगुणब्रह्मणोऽपि 'आकाशवत्सर्वगतश्च नित्यः' (छा. ३.१४.३), 'यावान् वा अयमाकाशः तावानेषोऽन्तर्हृदय आकाशः' (छा. ८.१.३), 'मया ततमिदं सर्वं जगदव्यक्तमूर्तिना' (भ.गी. ९.४) इत्यादिना च सर्वगतत्वात् सूत्रिताऽपि कार्ये गत्युपपत्तिरनुपपन्ना स्यात्।

'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' (श्वेताश्व. ६.१९) 'अस्थूलमनण्वह्रस्वमदीर्घम्' (बृ. ३.८.८) 'स बाह्याभ्यन्तरो ह्यजः' (मु. २.१.२) 'स वा एष महानज आत्माऽजरोऽमृतोऽभयो ब्रह्म स एष नेति नेति' (बृ. २.३.६) इत्यात्मत्वादिश्रुतिस्मृतिन्यायेभ्यो न देशकालादिविशेषयोगः परब्रह्मणः कल्पयितुं शक्यते। न्यग्रोधवानरयोस्तु नैवं निषेधोऽस्तीति चेन्न। जगदुत्पत्तिस्थितिप्रलयादिहेतुत्वादिरूपविशेषस्य तदाक्षिप्तविचित्रानेकशक्तिमत्त्वस्य च ब्रह्मणि प्रमितत्वेन विशेषनिराकरणायोगात्। कलादीनां निषेधेऽपि सर्वविशेषाणामनिराकरणाच्च। अन्यथा निर्विशेषत्वस्यापि निषेधापत्तिः।

ननु विशेषनिराकरणं समस्तशोकदुःखादिशमनतया पुरुषार्थं फलवत्। अफलं तूत्पत्त्यादिविधानम्। तस्मात् फलवत्सन्निधावाम्नातं तदर्थमेवेति नोत्पत्त्यादिश्रुतीनां स्वार्थे तात्पर्यमिति विशेषनिराकरणश्रुत्येतरबाधो युक्त इति चेन्न।

सुखादिशमनरूपतया विशेषनिराकरणमपुरुषार्थमफलवत्। उत्पत्त्यादिविधानं तु पुत्रशत्रुप्रभृतिषु सुखरूपमेवेति पुरुषार्थमेवेति तत्सन्निधावाम्नातं विशेषनिराकरणं तदर्थमेवेति तच्छ्रुतेर्दौर्बल्यात्।

यत्त्वत्रोक्तम्- 'मृण्मयादिदृष्टान्तैः सतो ब्रह्मण एकस्य सत्यत्वं विकारस्यानृतत्वं प्रतिपादयच्छास्त्रं नोत्पत्त्यादिपरं भवितुमर्हति' इति तदयुक्तम्। मृत्पिण्डादीनां बहुत्वेन ब्रह्मण एकत्वेन दृष्टान्तत्वानुपपत्तेः। यस्त्वत्र 'विशेषनिराकरणश्रुतीनां निराकाङ्क्षार्थत्वम् उत्पत्त्यादिश्रुतीनां तु तदभावः' इत्यादिदुष्प्रलापः तद्दूषणायानुभाषमाणोऽपि मन्दानां प्रामाणिकतामतिमावहेदितुपेक्ष्यते।

अप्रतीकेत्यादिद्विसूत्र्यां परकृतं व्याख्यानम्

यच्च, अप्रतीकालम्बनसूत्रम् उभयथाऽदोषात्तत्क्रतुश्चेत्यपपाठेन पठित्वा सूत्रद्वयमधिकरणान्तरं विहितम्। तथा हि- स्थितमेतत् कार्यविषया गतिर्न परविषयेति। इदमिदानीं सन्दिह्यते। किं सर्वान् विकारालम्बनानविशेषेणैवामानवः पुरुषः प्रापयति ब्रह्मलोकमुत कांश्चिदेवेति। तत्र

'अब्रह्मक्रतवो यान्ति यथा पञ्चाग्निविद्यया।
ब्रह्मलोकं प्रयास्यन्ति प्रतीकोपासकास्तथा॥'

सन्ति हि मनो ब्रह्मेत्युपासीतेत्याद्याः प्रतीकविषया विद्याः। तद्वन्तोऽप्यर्चिरादिना मार्गेण कार्यब्रह्मोपासका इव गन्तुमर्हन्ति। मनआद्युपासनाप्रकरणेष्वश्रुताया अपि गतेः 'अनियमः सर्वासाम्' (ब्र.सू. ३.३.३५) इत्यत्राविशेषेण विद्यान्तरेष्वपि गतेरवधारणात्। नचैषां परब्रह्मविदामिव गत्यङ्गीकारे बाधकमस्ति। न च ब्रह्मक्रतव एव ब्रह्मलोकभाजो नातत्क्रतव इत्यस्ति नियमः। अतत्क्रतूनामपि पञ्चाग्निविदां तत्प्राप्तिदर्शनात्। नचैते प्रतीकालम्बना

अब्रह्मक्रतव इति निर्धारयितुं शक्यम्। 'मनो ब्रह्मेत्युपासीत' (छा. ३.१८.१) इत्यादौ सर्वत्र ब्रह्मशब्दानुगमदर्शनेन ब्रह्मक्रतुत्वस्यापि सम्भवात्। अन्यथा कार्यब्रह्मोपासकानामपि तन्न स्यात्। प्रतीकालम्बनानां तु श्रुतं फलतारतम्यं च ब्रह्मलोकप्राप्तावप्युपपन्नमेव। ब्रह्मलोकस्य सावयवतया तत्तत्प्रदेशेषु फलानां निकर्षोत्कर्षसम्भवादिति प्राप्ते प्रत्युच्यते।

उत्तरोत्तरभूयस्त्वादब्रह्मक्रतुभावतः।
प्रतीकोपासकान् ब्रह्मलोकं नामानवो नयेत्॥

भवतु पञ्चाग्निविद्यायामब्रह्मक्रतूनामपि ब्रह्मलोकनयनं वचनात्। किमिव हि वचनं न कुर्यान्नास्ति वचनस्यातिभारः। इह तु तदभावात्। 'तं यथा यथोपासते तदेव भवति' इत्यौत्सर्गिक्याः श्रुतेर्विशेषवचनाभावे नापवादो युज्यते। 'मनो ब्रह्मेत्युपासीत' (छा. ३.१८.१) इत्यादौ सर्वत्र ब्रह्मानुगमेऽप्ययमुपासको न ब्रह्मक्रतुः। ब्रह्मरूपतया नामाद्युपासकत्वात्। अत एवायं नामादितन्त्रो न ब्रह्मतन्त्रः। आश्रयान्तरप्रत्ययस्याश्रयान्तरे प्रक्षेपः प्रतीक इति हि वृद्धाः। ब्रह्मविषयिणी बुद्धिर्नामादिषु प्रक्षिप्यत इति नामतन्त्रत्वात् तदुपासको न ब्रह्मक्रतुः किन्तु नामादिक्रतुः। किञ्च नामाद्युपासकानां ब्रह्मक्रतुत्वेऽविशेषादुत्तरोत्तरोत्कर्षायोगः। न च ब्रह्मक्रतुस्तदवयवक्रतुः येन तदवयवापेक्षयोत्कर्षो वर्ण्येत। तस्मात् प्रतीकालम्बनान् विदुषो वर्जयित्वा सर्वानन्यान् विकारालम्बनान् ब्रह्मलोकममानवो नयति' इति।

तन्निरासः

तदेतदुपेक्षणीयमेव। 'सप्रतीकाश्चतुर्मुखमप्रतीकाः परममु हैते गच्छन्ति', 'प्रतीकं देह उद्दिष्टः' इत्यादिश्रुतिस्मृतिप्राप्तस्यैव प्रमेयस्य ग्राह्यतया स्वोत्प्रेक्षानिबन्धनस्य व्याख्यानस्य दुष्प्रलापत्वात्। किञ्च 'नाम ब्रह्मेत्युपास्ते' इत्यादौ कीर्तितः कुतो न ब्रह्मोपासक इति न प्रतिपद्येमहि। नाम्नो द्वितीयया निर्देशेन

प्राधान्यावगमात् तत्तन्त्र एवायं नामाद्युपासक इति चेन्न। 'षट्सु द्वितीया' इति सूत्रेण द्वितीयायाः सप्तम्यर्थत्वेन प्राधान्यानवगमात्। शब्दतः प्राधान्या-नवगमेऽपि वस्तुतो ब्रह्मणः प्राधान्यानपायात् तत्तन्त्रत्वस्याप्युपपत्तेश्च। 'अहं ब्रह्मास्मि' इत्याद्युपासनेष्विव विधेयानुवाद्ययोर्व्यत्ययेन निर्देशसम्भवाद् ब्रह्मण एव द्वितीयान्तनिर्देशेन प्राधान्योपपत्तेश्च। इतिशब्दशिरस्कत्वेन ब्रह्मशब्दस्य प्राधान्यावगमे शक्तिः कुण्ठितेति चेन्न। इतिशब्दस्य प्रभृतिवचनत्वोपपत्तेः। क्षत्तरि राजोपासनस्योभयोपासनात्मकत्वं तावदविप्रतिपन्नम्। राज्युत्कर्ष-बुद्धिरूपत्वात्। अन्यथा क्षत्तुरपि उसासनं न स्यात्। निकृष्टे उत्कृष्टबुद्धिर्ह्युपा-सनम्। तद्येन राज्ञ उत्कर्षो न ज्ञातस्तेनायं क्षत्ता राजाभिन्नत्वेनाप्युपासितो न तोष्टुमीष्टे। पिपीलिकाद्यभेदेनोपासितस्य तददर्शनात्। तद्वत् प्रकृतेऽपि ब्रह्माभिन्नत्वेन नामादेरुपासनेऽपि ब्रह्मोपासक एवेत्यापाताच्च। किञ्चायं यदि न ब्रह्मोपासकस्तर्ह्यसौ ब्रह्मकाण्डे नोच्येत, कर्मीव। किञ्चासावर्चिरादिना गच्छति न वा। नेति पक्षे 'द्वावेव मार्गौ प्रथितावर्चिरादिर्विपश्चिताम्। धूमादिः कर्मिणां चैव सर्ववेदविनिर्णयात्' इति प्रथितमार्गद्वैविध्यबाधः। नाद्यः। 'स एनान् ब्रह्म गमयति' (छा. ४.१५.५) इत्यत्रैतच्छब्देन पञ्चाग्निविद्योपासकपरामर्शेन ब्रह्मप्राप्त्युक्तिरयुक्ता स्यात्। यदि वचने बहुमानः, कुतस्तदा 'ब्रह्मविदाप्नोति परम्' (तै. २.१) इति परविद्यावतोऽपि प्राप्त्यात्मकगतिप्रतिपादकवचने न? आप्नोतिशब्देन तत्स्वरूपापत्तिरेवोच्यते न गतिरिति तु मूर्खप्रलापः। मन्त्रवर्णे ब्रह्मवेदनप्राप्तीनां क्रमेण विवरणपरे 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' (तै. २.१) इति सर्वकामभोगस्यैवाऽप्नोतीति शब्दार्थत्वावगमात्। भोगस्य च देशविशेषसाध्यत्वाच्च।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- **तेन मार्गेण गतानां गम्यनिरूपणादिति॥** निरूपणादि-

त्यर्थः। तेनार्थाद् देवानां गम्यं निरूप्यत इति सिद्ध्यति। अन्यथा स्मृत्यनुपपत्ते-रिति। गतिस्मृतिवद् गन्तव्यस्मृतेरावश्यकत्वादिति भावः। 'गत्यनुस्मृत्यनुपपत्तेः' इति पाठे तु गतिशब्देन प्राप्यमात्रमुच्यत इति ध्येयम्।

टीकायामष्टानां पूर्वपक्षसिद्धान्तन्यायानां विवरणम्

अत्र न्यायमालायां 'सान्तानिकं प्राप्तिरभीष्टता सौकर्यं च' इति पूर्वपक्षे चत्वारो न्यायाः। सिद्धान्ते त्वाप्तिशब्दावृत्त्याऽऽप्तिराप्तिः क्रमानुरागः कथितानुवृत्तिश्चेति चत्वारो न्यायाः सङ्गृहीताः। तानष्टौ न्यायानेतदधिकरणसम्बन्धित्वेन साध्यादिप्रदर्शनेन विवृण्वत्,

'न च चतुर्मुखमुक्तिपर्यन्तं सन्ततत्वनियमाद् बन्धस्य तावद्भग-वत्प्राप्तिर्नास्तीति नियमः।

''यान्ति देवं परं केचित् पूर्वं केचिल्लये विभुम्।
योग्यतातारतम्येन विशेषोऽयमपीष्यते॥''

इति श्रुतेस्तथा प्राप्तत्वात्।

नच परब्रह्मण एव ब्रह्मशब्दमुख्यार्थत्वेन प्रथमप्राप्तत्वादपोह्ययुक्तेस्तस्यैव प्राप्तिनियमः।

''यान्ति देवं परं केचित्'' इति प्रमाणप्राप्तत्वादेव।

न च परप्राप्तिर्यस्याभीष्टा तस्य तत्प्राप्तिरिति नियमः।

''क्रमानुरागी भगवान् क्रमात् पुंभिरवाप्यते।
अतः क्रमात् समृद्धेषु ज्ञाने ब्रह्मलये नरैः।
प्राप्यते नियमेनैव कैश्चिदेवाऽप्यते मृतौ॥''

इति भगवतः क्रमानुरागित्वश्रुतेः।

न च बहुधाश्रुतेः यथासौकर्यं चतुर्मुखस्य परस्य वा प्राप्तिरिति वाच्यम् । श्रुत्युक्तानुवृत्तेरेव न्याय्यत्वात् । ''सप्रतीकाश्चतुर्मुखमप्रतीकाः परममु हैते गच्छन्त्यागच्छन्ति च चतुर्मुखात् परमं परमाच्चतुर्मुखं यावद्विलयमथ सह चतुर्मुखेन विमुच्यन्त आनन्दीभवन्ति'' इति हि श्रुतिः। अन्तर्भेदाधिकरणत्वात् समुदायोक्तिः।'

इति वाक्यमनुसृत्य तत्र तावदधिकरणद्वयस्य सन्देहमाह- **चतुर्मुखाख्यं किं वा परमथोभयमिति सन्देह इति ॥** चतुर्मुखमेव वापरमेव वेत्यर्थः। तेनोभयमिति सिद्धान्तकोटेर्विवरणानुक्तिरिति निरस्तम् । नियमपक्षद्वयदूषणेऽनियमपक्षस्य बाधादेव प्राप्तेः । **ब्रह्मशब्द एवेति ॥** ननु चतुर्मुखे ब्रह्मशब्दोऽमुख्यः परमे तु मुख्य इत्यसकृदुक्तम्। तथा च मुख्यामुख्ययोः समबलत्वाभावेन कथं ब्रह्मशब्दः सन्देहबीजं स्यादिति चेन्न। बद्धस्य परप्राप्त्यनुपपत्तिरूपनिरवकाशयुक्त्युपोद्बलनेन समबलत्वसम्भवात्। यथोक्तम्- 'दुर्बलस्य प्रमाणस्य बलवानाश्रयो यदा' इतीति भावः। नन्वत्र विवरणे कांश्चित्कार्यं नयति कांश्चित् परमिति पक्षान्तरमभिधाय तत्र व्यवस्थाव्यवस्थादिचिन्तैव युक्ता। तदर्थमधिकरणान्तरं कुतो नोक्तमित्यतः तस्याभिप्रायं व्यञ्जयन्नेव 'परप्राप्तिर्यस्याभीष्टा' इत्यादितृतीयाधिकरणविवरणानुसारात् संशयान्तरं दर्शयति- **तृतीयपक्षेऽपीत्यादिना ॥** अर्थादेव सिद्धत्वान्नाधिकरणान्तरं तत्र कर्तव्यमिति भावः । केनचित्क्रमेण कयाचिद्व्यवस्थयेति सिद्धान्तकोटिः प्रथमः संशयः। 'न च यथासौकर्यम्' इत्यादि चतुर्थाधिकरणविवरणानुसारात् संशयान्तरमाह- **क्रमोऽपीति ॥** व्यवस्थाऽपीत्यर्थः। योग्यता प्रयोजकतया रूपिका यस्य स योग्यतारूप इत्यर्थः। **तदन्योऽसाविति ॥** योग्यतान्यसमीपस्थित्यादिप्रयोजकवानित्यर्थः। सूत्रोक्तगत्युपपत्तिविवरणपरतया प्रथमाधिकरणपूर्वपक्षन्यायं विवृणोति- **ब्रह्मशब्दस्येति ॥** ननु महाप्रलये सर्वेषां परब्रह्मप्राप्तेरवर्जनीयत्वात् कथमेतदित्यत आह- **ततोऽर्वागिति ॥** महाप्रलयमुक्त्योः प्राक्तनप्राप्तेरवेह विचार्यमाणत्वादिति भावः। नन्वेवमपि

केषाञ्चिद्बद्धत्वेऽपि सामर्थ्यविशेषाङ्गीकारे न दोष इत्यतो 'ऋते देवान् परं ब्रह्म' (ब्र.सू.भा.उ.अध्यात्मवचनम्) इत्यादिभाष्यं तदुपोद्बलकत्वेन व्याचष्टे- **तथा स्मृत्युक्तत्वाच्चेति ॥** केषाञ्चित्सामर्थ्यकल्पनं स्मृतिविरोधादेवायुक्तमिति भावः। देवानृते परं ब्रह्म न कोऽपि प्राप्नुयात् किन्तु चतुर्मुखादिदेवमेव प्राप्नुयादित्यर्थः । तेन सान्तानिकमिति भावप्रधानस्तन्नियमोपलक्षणश्च सन्ततत्वनियम इति सिद्ध्यति। यद्वा, सन्तानस्येदं सान्तानिकमिति भावभवितृभाव एव सम्बन्ध इति सान्तानिकन्यायस्य विवरणं द्रष्टव्यम्।

'परस्यान्ते परात्मानः' (ब्र.सू.भा.उ. स्मृतिः) इति वाक्यस्य परप्रातिपदिकं व्याचष्टे- **परं ब्रह्मायुरिति ॥** चतुर्मुखस्याऽयुषोऽन्त इत्यर्थः। 'आत्मेति मध्यदेहश्च सर्वदेहोऽपि वा भवेत्। मनो बुद्धिरहङ्कारश्चित्तं जीवश्च कथ्यते। अथवा स्वयमेवेति वायुर्ब्रह्मापि वा भवेत्' इत्यभिधानानुसारात् परात्मान इति पदमनूद्यात्रात्मशब्दविवक्षितार्थकथनेनाभिमतविग्रहं प्रदर्शयति- **परात्मान इति ॥**

'न च परब्रह्मण एव ब्रह्मशब्दमुख्यार्थत्वेन' इत्यादिद्वितीयाधिकरणपूर्वपक्षविवरणांशं सूत्राक्षरारूढतया व्युत्क्रमेण व्याचष्टे- **स एनान् ब्रह्म गमयतीत्यादिना ॥** अनेन तस्यैव प्राप्तिनियम इत्यंशो व्याख्यातः। ब्रह्मशब्दस्येत्यादिना च परब्रह्मण एव ब्रह्मशब्दमुख्यार्थत्वेनेत्यंशः । मुख्यार्थे च सम्भवतीत्यादिना प्रथमप्राप्तत्वादपोहायुक्तेरित्यंशः । तेन प्राप्तिरिति न्याय उपस्थित्युपलक्षकः । प्रथमेति योग्यतया सम्बद्ध्यते। प्रथमोपस्थितत्वं विशिष्टस्यार्थ इति विवृत इति च ध्येयम्।

परप्राप्तिर्यस्याभीष्टेत्यादितृतीयपूर्वपक्षविवरणं व्याचष्टे- **तृतीयपक्षेऽपीत्यादिना ॥** विवरणे हेत्वनुक्तेः 'यदुपास्ते पुमान् जीवन् यत्प्राप्तुमभिवाञ्छति। यच्च पश्यति तृप्तः सन् तत्प्राप्नोति मृतेरनु ।' (ब्र.सू.भा.उ. पाद्मवचनम्) इति

भाष्यमेतच्छेषतया योजयन्नुभयत्रोक्तदोषाच्चेति सिद्धान्तभाष्याद्विशेषं च दर्शयतीति सूत्राच्चोन्नीतं हेतुद्वयं वक्तुं पृच्छति- **कुत इति** ॥ एवमग्रेऽपि। अनेन परप्राप्तेरेवाभीष्टत्वात् तत्प्राप्तिरेव युक्तेत्यभीष्टतान्यायो विवृतो विवरणेनेति ध्येयम् । न च यथा-सौकर्यमित्यादिचतुर्थपूर्वपक्षविवरणं विवृणोति- **क्रमपक्षेऽपीत्यादिना** ॥ तेन सौकर्याच्चतुर्मुखस्य वा परस्य वा प्राप्तिरिति सौकर्यन्यायो विवरणे विवृत इति ध्येयम् । ननु ब्रह्मशब्दस्यामुख्यार्थत्वमप्यङ्गीकृत्य दर्शनप्रतिपत्त्यादेश्च कथञ्चित्तद्विषयत्वमङ्गीकृत्य मुनिमतयोश्चाविरोधमप्यापाद्य किमनियमपक्षाश्रयणक्लेशेनेत्याशङ्क्य तन्निवर्तकत्वेन 'यान्ति देवं परं केचित्' इत्यादिश्रुतेस्तथाप्राप्तत्वादिति प्रमाणप्राप्तत्वादेवेति च प्रथमद्वितीयसिद्धान्तन्यायविवरणगतवाक्यद्वयं युगपद् व्याचष्टे- **यान्ति देवं परमित्यादिना** ॥ तेनाप्तिः प्राप्तिरिति न्यायो विवृत इति ध्येयम् । 'क्रमानुरागाद् भगवान्' इत्यादितृतीयसिद्धान्तविवरणं विवृणोति- **क्रमानुरागीत्यादिना** ॥ श्रुत्युक्तानुवृत्तेरेवेत्यादिचतुर्थसिद्धान्तविवरणं विवृणोति- **सप्रतीकाश्चतुर्मुखमित्यादिना** ॥ तेन श्रुतिकल्पितस्यानुवृत्तिः कथितानुवृत्तिः । तस्या एव न्याय्यत्वादिति कल्पितानुवृत्तिन्यायो विवृत इति ध्येयम्।

सूत्रार्थः

सूत्रार्थस्तु- **अस्य** विदुषः चतुर्मुखब्रह्मणो **गत्युपपत्तेः**। उपलक्षणमेतत् । परब्रह्मगत्यनुपपत्तेश्च **कार्यमेव** ब्रह्म प्राप्यमिति **बादरिः** मन्यते।

'चतुर्मुखं ब्रह्माणम्' (ब्र.सू.भा.उ. कौषारवश्रुतिः) इति कौषारवश्रुतौ **विशेषितत्वाच्च** कार्यप्राप्तिरेव युक्ता।

'ब्रह्मविदाप्नोति परम्' (तै.उ. २.१) इति व्यपदेशः कथमिति चेत् तत्रोच्यते। परब्रह्मप्राप्ति**व्यपदेशस्तु सामीप्यात्** समीपकालमपेक्ष्यैव। न तु प्रथमत एव परप्राप्तिमपेक्ष्य।

सामीप्यमेव विव्रियते। कार्याणामत्यये महाप्रलये ज्ञानिस्वामिना चतुर्मुखेन सह चतुर्मुखात्परं ब्रह्म प्राप्नोति । 'तेह ब्रह्माणमभिसम्पद्य' (ब्र.सू.भा.उ. सौपर्णश्रुतिः) इति सौपर्णश्रुतावभिधानात्।

प्रलयकाले परं प्राप्नोतीत्येतत् प्रमेयं 'ब्रह्मणा सह ते सर्वे' (ब्र.सू.भा.उ. स्मृतिः) इति स्मृत्या च समर्थ्यते।

एवं बादरिमतेन कार्यप्राप्तिनियमं समर्थ्य मतान्तरेण परप्राप्तिनियमः समर्थ्यते। **परमेव** प्राप्नोति ज्ञानी। तस्मिन्नेव ब्रह्मशब्दस्य **मुख्यत्वात्** इति **जैमिनिः** ब्रवीति।

तत्र युक्त्यन्तरमुच्यते। परब्रह्मण एव **दर्शनविषयत्वात्** कार्यस्य तदभावादिति।

तत्रैव युक्त्यन्तरमुच्यते । **प्रतिपत्तिः** उपासनम् । **अभिसन्धिः** इच्छा । प्रतिपत्तिसहिताऽभिसन्धिरिति शाकपार्थिवादित्वात् समासः। तदुभयं कार्ये ब्रह्मणि **नास्ति** इति।

स्वमतमुच्यते। देहादिप्रतीकमुपासनार्थं ये अवलम्बन्ते ते प्रतीकालम्बनाः। अतथाभूतास्तु **अप्रतीकालम्बनाः** देवाद्याः। **तान्** परमेव ब्रह्म वायुः **नयति**। प्रतीकालम्बनांस्तु चतुर्मुखमेवेति शेषः । ननु कुत इयं व्यवस्थाऽऽश्रयणीयेति चेन्न । **उभयथा च दोषात्** । नियमपक्षद्वयेऽपि दोषस्योक्तत्वात् । अप्रतीकालम्बनानिति शब्दगौरवाश्रयणात्। 'अप्रतीकाश्रया ये तु ते यान्ति परमेव तु। स्वदेहे ब्रह्मदृष्ट्यैव गच्छेद् ब्रह्मसलोकताम्' (ब्र.सू.भा.उ. गारुडवचनम्) इति प्रमाणस्योक्तत्वादत्र चशब्दः। हेत्वन्तरमुच्यते- तत्क्रतुश्च। तद्विषयो निश्चयो यस्यासौ तत्क्रतुः। उपलक्षणमेतत्। यतश्चासौ विद्वान् परब्रह्मविषयोपासनाकर्तव्यतानिश्चयावान् तदुपासनं च करोति अतश्च तत्प्राप्तिर्युक्तेति।

प्रतीकाप्रतीकालम्बनादियोग्यजनबाहुविध्यं नाप्रामाणिकमित्युच्यते विशेषं च दर्शयतीति। योग्यताविशेषं दर्शयति- श्रुतिरिति॥

सूत्रक्रमौचित्यम्

अत्र 'स एनान् ब्रह्म गमयति' इति श्रुतितात्पर्यनिर्णयाय प्रथमं प्रबलयुक्त्युपन्यासः 'उपक्रमादिलिङ्गानां बलीयो ह्युत्तरोत्तरम्' इत्युक्तेः। श्रुत्यादिषट्के 'श्रुत्यादौ पूर्वं पूर्वं बलीयः स्यात्' इत्युक्तेः प्रबलाया विशेषश्रुतेर्द्वितीयेनोपन्यासः। उपक्रमादेस्तात्पर्यनिर्णयैकफलत्वात्। श्रुत्यादेस्तु विनियोजकत्वादावपि व्यापरणात् तात्पर्यनिर्णये तथाऽन्तरङ्गत्वाभावाद् द्वितीयेनोक्तिः। ततस्तृतीयेन बाधकोद्धारः। 'सङ्क्षेपविस्तराभ्यां च कथयन्ति मनीषिणः' इत्युक्तेः सङ्क्षेपेणोक्तस्य बाधकोद्धारप्रकारस्य चतुर्थे श्रुत्यभिधानेन विस्तृतिः, पञ्चमे स्मृत्यभिधानेनेति ज्ञातव्यम्। एवं सूत्रपञ्चकेन सिद्धान्तस्यातिविरोधिपक्षोपन्यासानन्तरं सिद्धान्तसन्निहितपक्ष उपन्यस्यते उत्तरेण त्रिकेण। सोपानारोहणन्यायेनाऽद्ये ब्रह्मश्रुत्युक्तिः। द्वितीयतृतीयाभ्यामुपपत्त्युक्तिः। तत्रापि भगवद्दर्शिनामिन्द्रादीनां स्वावरदर्शनमप्रयत्नसाध्यं, प्रतिपत्त्यभिन्धी तु न तथेति वैषम्यप्रदर्शनाय योगविभागः। नवमे युगपत्साधकबाधकोक्तिः। दशमे तु साधकस्यासिद्धिपरिहार इत्यादिः क्रमोऽप्यूह्यः।

सङ्क्षेपभाष्येऽधिकरणषट्कस्य तात्पर्योक्तिः

अत्र षण्णामधिकरणानां 'अर्चिरादिपथा वायुं प्राप्य तेन जनार्दनम्। यान्त्युत्तमा नरोच्चाद्या ब्रह्मलोकात्सहामुना॥' इति तात्पर्यसङ्ग्राहकं सङ्क्षेपभाष्यमप्येवं योज्यम्। अतीतपादे सर्वेषामप्यधिकारिणां स्थूलदेहक्षयोऽस्तीत्युक्तम्। ते व्याप्तदृष्टयोऽव्याप्तदृष्टयश्चेति द्विविधाः। तत्र व्याप्तदृष्टयः ऋषिगन्धर्वशतपूर्वकाः देवपर्यन्ता उच्यन्ते। अव्याप्तदृष्टयो मनुष्योत्तमाद्या ऋषिगन्धर्वान्ताः। ते तावदुभयेऽप्यर्चिरादिना पथोर्ध्वं गत्वा ततो विद्युत्पतिमेव

परं वायुं प्राप्नुवन्ति। देवानामपि स्वोत्तमप्रवेशार्थं तदभिसर्पणमेव मार्ग इत्युक्तत्वात्। तत्रार्चिरादित्वमविवक्षितम्। उत्तमानां देवानामर्चिराद्यभिसर्पणाभावात्। किन्त्वर्चिराद्यधमदेवताविवक्षयैवेतत्। ततस्तेनैव गमयित्वा ब्रह्माख्यं गम्यं यान्तीत्येतावत् समानम्।

तत्र विशेषः। व्याप्तदृष्टार उत्तमाः साक्षात्परमेव ब्रह्म जनार्दनं प्रथमत एव यान्ति। अन्ये चोत्तमपूर्वकाः कार्यमेव चतुर्मुखं तत्काले यान्ति। तत्र पुनर्यावद् ब्रह्मलयं स्थित्वा तल्लोकादमुना ब्रह्मणा सह गच्छन्तस्तं जनार्दनमपि यान्तीत्यनुषङ्ग इति।

पुनश्चात्रेदं विवेक्तव्यम् 'अर्चिरादिपथा' इत्यन्तेन प्रथमाधिकरणार्थस्य सङ्ग्रहः। समासान्तविधेरनित्यत्वादकारान्तत्वाभावः। अर्चिरादीति क्रियाविशेषणं भिन्नं पदमिति केचित्। अत्र वायुमिति पुनः श्रवणान्मार्गस्य वाय्वन्तत्वेऽपि ध्रुवान्त एव मार्गोऽर्चिरादि इत्यनेन यथासम्भवं गृह्यते। 'वायुम्' इति द्वितीयाधिकरणार्थस्यार्चिरादिर्यस्येति विग्रहः। द्वितीयां गतिमिति शेषः। वायुशब्दस्तटित्परोऽपि व्याख्येयः। तटिदवरवाचकस्य तटिद्वाचकत्वे विवादाभावात्। यदधीना यस्य सत्तेत्यादेः। तेन तटितोऽधीति तृतीयाधिकरणमुक्ततात्पर्यं भवति। आतिवाहिकाधिकरणस्यापि वायुं प्राप्येत्यनेनैव सङ्ग्रहः। एवं वैद्युताधिकरणस्य पञ्चमस्य 'तेन ब्रह्म यान्ति' इत्यनेन सङ्ग्रहः। तेन 'ब्रह्मलोकात्सहामुना' इत्यत्र ब्रह्मेति पदं व्यस्तं समस्तं चेति ध्येयम्। तेन वायुब्रह्मणोर्मध्येऽन्यतरत् प्राप्नोतीति सिद्ध्यति। उत्तमा जनार्दनम्, नरोत्तमाद्यास्तु ब्रह्मलोकात्सहामुना जनार्दनं यान्ति इत्यन्तिमस्येति सर्वमवदातम्।

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्याणां सर्वतन्त्रस्वतन्त्राणां लक्ष्मीनारायणतीर्थपूज्यपादानां शिष्येण रघुनाथयतिना कृतायां शिष्टतात्पर्यचन्द्रिकायां चतुर्थाध्यायस्य तृतीयः पादः ॥

अथ चतुर्थः पादः

सूत्रभाष्यम्

॥ अथ सम्पद्याधिकरणम् ॥ १ ॥

भोगमाहास्मिन् पादे-

ॐ सम्पद्याविहाय स्वेन शब्दात् ॐ ॥ ४.४.१ ॥

'स य एवंविदेवं मन्वान एवं पश्यन्नात्मानमभिसम्पद्यैतेनाऽत्मना यथाकामं सर्वान् कामाननुभवति' इति सौपर्णश्रुतेः१। (१. सौपर्णश्रुतिः)

'परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते।' (छा.उ.८-३-४) इति च।

'एतं सेतुं तीर्त्वाऽन्धः सन्ननन्धो भवति' (छा.उ.८-४-२) इति च।

तत्र तरणं नाम तत्प्राप्तयेऽन्यतरणमेव।

'इमां घोरामशिवां नदीं तीर्त्वैतं सेतुमाप्यैतेनैव सेतुना मोदते प्रमोदत आनन्दी भवति' इति मौद्गल्यश्रुतेः ॥ १ ॥

॥ इति सम्पद्याधिकरणम् ॥ १ ॥

तत्त्वप्रकाशिका

एतत्पादार्थकथनम्

एतत्पादार्थं दर्शयति- **भोगमिति** ॥ चतुर्विधफले त्रयमुक्त्वा चतुर्मुखेन सह परं ब्रह्म प्राप्तानां यस्तत्र भोगः क्रमप्राप्तस्तमत्राऽह सूत्रकार इत्यर्थः।

सङ्गत्यादि

अत्राऽदौ मुक्तस्य ब्रह्मानतिक्रमेणैव भोगानुभवसाधनादस्ति शास्त्रादि-सङ्गतिः। अन्यथा ब्रह्मणो गम्यत्वाभावप्रसङ्गात् समर्थनीयमेतत्। मुक्तौ ब्रह्म प्राप्नोतीत्युक्तम्। तस्य च भोग आवश्यकः। स मुक्तोऽत्र विषयः। किं ब्रह्मातिक्रम्य भोगान् भुङ्क्ते उत तत्समीप एवेति सन्देहः। अर्चिरादयति-क्रमोक्तिर्गम्यत्वोक्तिश्च सन्देहबीजम्।

पूर्वपक्षः

अतिक्रामतीति पूर्वः पक्षः। तथाहि। परमात्मानमविहायैवावस्थाने तस्य स्वरूपाविर्भावोऽस्ति नवा। नाऽद्यः। 'एतं सेतुं तीर्त्वाऽन्धः सन्ननन्धो भवति' इति परमात्मातिक्रमानन्तरमेव स्वरूपाविर्भावस्योक्तत्वात्। द्वितीये न विरोधः। अनाविर्भूतस्वरूपस्यामुक्तत्वेन मुक्तातिक्रमाऽव्याघातात्। अतो मुक्तस्य ब्रह्मातिक्रमनियमान्न तद् गम्यमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रं पठति- **सम्पद्येति** ॥ ज्ञानी ब्रह्म प्राप्य तदविहायैव भोगान् भुङ्क्ते। न चैवममुक्तत्वम्। अन्यथा रूपं परित्यज्य स्वरूपेणावस्थानादिति सूत्रार्थः। तत्र ब्रह्म प्राप्याविहायैव भोगान् भुङ्क्त इत्येतत् कुत इत्यतः सूत्रसूचितां श्रुतिमुदाहरति- **स इति** ॥ ब्रह्मानतीत्याप्याविर्भूतस्वरूपत्वेन भोगो मुक्तानामित्येतत् कुत इति तत्रापि सूत्रसूचितां श्रुतिमुदाहरति- **परमिति** ॥ नन्वेवं यदि ब्रह्मानतिक्रमेऽपि स्वरूपेणाऽऽविर्भावश्चेच्छ्रुतिविरोध इत्यत आह- **एतमिति** ॥ सत्यमेवं श्रुतिरस्तीति तथाऽपि नोक्तस्य तद्विरोधः। यतस्तत्रैतं सेतुं गन्तुमन्यत्तीर्त्वेति तत्प्राप्तयेऽन्यतरणमेवोच्यते न तु ब्रह्म तीर्त्वा स्वरूपाविर्भाव इति भावः। कुत एतदित्यत आह- **इमामिति** ॥ एतं सेतुं

तीर्त्वेदं गच्छतीति वचनाभावेनैतच्छ्रुतेः सामान्यरूपत्वाद् विशेषश्रुत्यनुसारेणार्थकल्पनोपपत्तेरिति भावः। अतो मुक्तस्य ब्रह्मातिक्रमाभावात् तदेव गम्यमिति सिद्धम्॥ १॥ अ. १॥

॥ अथ शेषतात्पर्यचन्द्रिकायां चतुर्थाध्याये चतुर्थः पादः ॥

॥ अथ सम्पद्याधिकरणम्॥ १॥

मङ्गलाचरणम्

ज्ञानात्मकशरीरेण सात्त्विकेन च चेतनाः।
मुक्ता यस्य प्रसादेन रमन्ते तं हरिं भजे॥

एतत्पादप्रतिपाद्यविषयः

अत्र 'भोगमाहास्मिन् पादे' इति भाष्यम्। तस्यायमर्थः। मुक्तानां भोगसद्भावे प्रमाणमस्ति न वा। भोगस्य प्रामाणिकत्वे, युक्तो न वा। तदर्थं करणानि सन्ति न वा। भोगाङ्गीकारे बाधकमस्ति न वेत्यादिविचिकित्सायां प्रामाणिक एव भोगो युक्तश्च। तदुपयुक्तदेहेन्द्रियादिकं च प्रामाणिकम्। न च तत्र बाधकमस्तीत्यादिप्रकारेण च भोगस्यैव प्रपञ्चोऽस्मिन् पादे क्रियत इति। तेन भोगसद्भावप्रतिपादनमेकस्यैवाधिकरणस्य कृत्यमित्यधिकरणान्तरमनारम्भणीयमिति चोद्यं निरस्तम्।

॥ ॐ सम्पद्याविहाय स्वेन शब्दात् ॐ ॥ ४.४.१ ॥

सङ्गतिः

अत्र मुक्तस्य भोगानुभवः साध्यते।

नन्वविहायेति पदस्वारस्येन ब्रह्मानतिक्रम एव साध्यतया प्रतीयते। युक्तं न तत्। ब्रह्मवाय्वोरन्तराले कस्यचिद्गम्यस्याभावेऽपि परब्रह्मानन्तरं कस्यचिद्

गम्यस्य सम्भवः। 'एतं सेतुं तीर्त्वाऽन्धः सन्नन्नन्धो भवति' (छा. ८.४.२) इत्यादौ त्त्वाप्रत्यययोगेन गम्यान्तरमस्तीति वा। परमेव ब्रह्म नयतीत्ययुक्तम्। श्रुत्यन्तरे गम्यान्तरप्रतीतेरिति वा शङ्कनात्पूर्वपक्षसम्भवेऽपि न पूर्वसङ्गतिरस्तीति चेन्न। पादाद्याधिकरणेन पूर्वाधिकरणसङ्गत्यनपेक्षरात्। 'अथ सह चतुर्मुखेन विमुच्यन्त आनन्दिनो भवन्ति' इति पूर्वाधिकरणोक्तश्रुत्यभिप्रेतत्वात् स आक्षिप्य समाधीयत इति सङ्गतिसम्भवाच्च।

संशयः

यद्यपि ब्रह्मानतिक्रमोऽपि इह साध्यतया प्रतीयते। तथाऽपि नासौ मुख्यः। अत एव 'ब्रह्मानतिक्रमेणैव भोगानुभवसाधनात्' इति टीकायां तृतीयाप्रयोगः। अत एव 'अन्यथा ब्रह्मणो गम्यत्वाभावप्रसङ्गादिति टीकाऽपि पुरुषार्थत्वप्रदर्शनपरा व्याख्येया। अन्यथा भोगान् भुञ्जानस्य मुक्तस्य ब्रह्मानतिक्रमसमर्थनादित्यवक्ष्यत्। 'अतिक्रामतीति पूर्वपक्षः' इति वाक्यं तु न भोगस्य विषयत्वाभावाभिप्रायम्। किन्तु तत्र पूर्वपक्षस्य मन्दत्वान्नातिमुख्यमित्यभिप्रायम्।

यद्वा ब्रह्मानतिक्रम एवेह समर्थ्यते। भोगानुभवसाधनादित्यादि तु सङ्गत्यर्थमनुवाद एव। नहि मुक्तौ भोगो नास्तीति प्रेक्षावतां सम्मतम् अपुरुषार्थत्वप्रसङ्गात्। मुक्तौ भोगो नास्तीति वदन् किं शून्यत्वापत्तिमेव मुक्तिं मन्यते? किं वा अशेषधर्मोच्छेदम्? नाद्यः। अर्थित्वानुपपत्तेरेव। नहि कश्चित् स्वरूपनाशमिच्छति। इच्छति दुःखातिरेकादिति चेन्न। देहपरिहारमात्रस्येष्टत्वेऽपि तदतिरिक्तस्वरूपनाशे इच्छायोगाच्च। न द्वितीयः। धर्माणां स्वरूपत्वे उच्छेदानुपपत्तेः। अतिरेकपक्षस्त्वाद्य एवान्तर्गतः। मिथ्यात्वे तदुच्छेदस्य नेष्टत्वात्। न ह्यारोपितरजतोच्छेदं कश्चिदिच्छति। भ्रान्तिनिवृत्तिरिष्यत इति चेन्न।

भ्रान्तेरपि सत्यत्वानङ्गीकारात् । तस्माद्भोगानुभवांशो न साधनीयः । तथा चोक्तप्रकारद्वयेन परब्रह्मप्राप्तानां प्रलये प्रागुक्तप्रकारेण प्रविष्टानां स्वरूपानन्दानुभविनां ब्रह्मानतिक्रमो युक्तो न वा । तदर्थं ब्रह्मानतिक्रमे बाधकमस्ति न वेत्यादि चिन्तनीयम् ।

पूर्वपक्षः

अतिक्रमानन्तरं स्यात् स्वरूपाविष्क्रिया यतः ।
सेतुं तीर्त्वेति वाक्येन स्फुटमेवावगम्यते ।
अतो मुक्तस्य भोगादिर्वैकुण्ठादौ न युज्यते ।
ततो गम्यान्तरप्राप्तिर्भोग इत्यागतिर्बलात् ॥ इति पूर्वः पक्षः ।

सिद्धान्तः

सिद्धान्तस्तु, ब्रह्मसम्पन्नस्य तावद्भोगोऽङ्गीकर्तव्यः । तस्य मुक्तत्वं तूत्तराधिकरणप्रमेयम् । न च तत्र प्रमाणाभावः । 'स य एवंविदेवं मन्वान एवं पश्यन्नात्मानमभिसम्पद्यैतेनाऽत्मना यथाकामं सर्वान् कामाननुभवति' (ब्र.सू.भा.उ.सौपर्णश्रुतिः), 'परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' (छा.उ. ८.३.४), 'स तत्र पर्येति जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वाऽज्ञातिभिर्वा' (छा.उ. ८.१२.३) इत्यादिश्रुत्या ब्रह्मसम्पन्नस्य भोगाभिधानात् । स चायं भोगः ब्रह्मानतिक्रमेणेति वक्तव्यम् । 'तेनात्मना यथाकामम्' (ब्र.सू.भा.उ. सौपर्णश्रुतिः) इत्यादिश्रुतौ भोगार्थं प्राप्यान्तरस्याश्रवणात् । आत्मनेति तृतीयया तद्धानाभावस्यैव श्रवणाच्च । ननु 'एतं सेतुं तीर्त्वान्धः सन्ननन्धो भवति' (छा.उ. ८.४.२) इति श्रुतौ ब्रह्मतरणानन्तरं स्वरूपाभिव्यक्तिः प्रतीयते । 'स्वरूपाभिव्यक्तिशून्योऽन्धस्तद्वान् अनन्धः । स्वरूपाभिव्यक्त्यनन्तरमेव हि दिव्यभोगः श्रूयते । 'स्वेन रूपेणाभिनिष्पद्यते स तत्र पर्येति जक्षन्' (छा. ८.१२.३) इत्यादेस्तत्कथं भगवन्तमविहायैव भोगानु-

भव उच्यत इति चेन्न । 'नदीं तीर्त्वैतं सेतुं प्राप्यान्धः सन्ननन्धो भवति' इति व्याख्यानात् । यथाश्रुते प्राप्यान्तरसत्त्वापत्त्या तस्यैवोत्तमत्वापातः । परब्रह्मविषयश्रवणमननादिवैयर्थ्यापातश्च । 'सेतुं तीर्त्वाऽन्धः सन्' (छा.उ. ८.४.२) इत्यस्यानुपपत्तिश्च । नहि सेतुतरणानन्तरमन्धत्वं भवति । प्रागन्धः सेतुं तीर्त्वाऽनन्धो भवतीति यथायोगं व्याख्याने किमपराद्धं मदीयेन व्याख्यानेन । श्रौतं चेदं व्याख्यानम् । 'इमां घोरामशिवां नदीं तीर्त्वैतं सेतुमाप्य एतेनैव सेतुना मोदते प्रमोदत आनन्दीभवति' (ब्र.सू.भा.उ. मौद्गल्युश्रुतिः) इति श्रुतेः ।

'तस्मात् प्राप्यान्तरं नास्ति ब्रह्मणोऽतस्तदेव तु ।
ज्ञानिप्राप्यं ततो युक्तं पूर्वोक्तं न विहन्यते ॥' इति ।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु । ननु भोगमाहेत्ययुक्तम् । एतत्पादीयाधिकरणेषु भोगशब्दादर्शनादित्यत आह- **एतत्पादार्थमिति** ॥ यद्यपि भोगो न मुखतः प्रतिपाद्यः । तथाऽपि तदुपयुक्तप्रमेयसाधनेन भोगः पादार्थो भवतीति भावः ।

टीकायां पूर्वपक्षीयातिक्रमोक्त्याख्यन्यायविवरणव्याख्यानम्

अत्र

'अतिक्रमोक्तिः कृतिरर्थलाभः परा गतिः पारगतिस्तदोकः ।
समस्तकार्यं वशिता च विश्वसम्भावना युक्तयस्त्वन्यपक्षे ॥'

इति न्यायमालोक्तमतिक्रमोक्तिन्यायं साध्यप्रदर्शनेन विवृण्वत्,

'न च ''एतं सेतुं तीर्त्वा'' (छा.उ. ८.४.२) इत्यत्रातिक्रमोक्तेर्मुक्तो ब्रह्म तीर्त्वा गच्छति ।'

इति वाक्यं व्युत्क्रमेण व्याचष्टे- **अतिक्रामतीति पूर्वः पक्ष इति** ॥ मुक्तो

ब्रह्मेत्यनुषङ्गः। तेन मुक्तो ब्रह्मातीत्य गच्छतीत्यंश उक्तार्थो भवति। ननु 'सेतुं तीर्त्वा' (छा.उ. ८.४.२) इत्यतिक्रमोक्तिर्नाऽविष्कृतस्वरूपस्य। तथा च स्वरूपाविर्भावयुक्तस्य ब्रह्मातिक्रमानुक्तेः कथं पूर्वपक्ष इत्यतः तत्सङ्गमयितुं सिद्धान्तिनं प्रति द्वेधा विकल्प्याऽद्यपक्षदूषणत्वेन पूर्वार्धं योजयितुमाह- **तथा हीत्यादिना ॥** यदि मुक्तस्य सेत्वात्मकभगवत्तरणं न स्यात् तर्हि तस्य स्वरूपाविर्भावो न स्यात्। तस्य 'सेतुं तीर्त्वाऽन्धः सन्ननन्धो भवति' (छा.उ. ८.४.२) इति श्रुतौ सेतुतरणानन्तरभावित्वश्रवणादिति भावः। तेन ''सेतुं तीर्त्वेत्यत्रातिक्रमोक्तेरिति विवरणोक्तो हेतुरयुक्तः। मुक्तस्य सेत्वतिक्रमानुक्तेः। प्रत्युत तदतिक्रमानन्तरमेव 'अन्धः सन्ननन्धो भवति' (छा.उ. ८.४.२) इति मुक्त्युक्तेः'' इति निरस्तम्। अतिक्रमानन्तरमेव मुक्त्युक्तेरिति व्याख्यानात्। अत एव 'तत्र तरणं नाम तत्प्राप्तयेऽन्यतरणमेव' इत्यादिभाष्यमेव विवरणोक्त-पूर्वपक्षनिरासायोपयुक्तम्।

ततः प्राचीनम् 'एतं सेतुं तीर्त्वान्धः सन्ननन्धो भवति' (छा.उ. ८.४.२) इति चेत्यन्तमनुपयुक्तं पुनरुक्तं च। भाष्यविवरणयोरैककण्ठ्याश्रयणेनानु-वादानपेक्षणादिति निरस्तम्। 'अन्धः सन्ननन्धो भवति' (छा.उ. ८.४.२) इत्यंशस्य विवरणेऽनुदाहरणात् तदुदाहरणस्य चोक्तरीत्याऽऽवश्यकत्वेन विवरणोक्तहेतुविवरणार्थत्वात्। ग्रन्थानामेषां परस्परोपकारसद्भावाच्च। अत एव च बहुष्वधिकरणेषु पूर्वपक्षं न भाषत आचार्य इति।

ननु स्वरूपाविर्भावो नास्तीति द्वितीयपक्षे दूषणं कुतो नोक्तं विवरणकृते-त्याशङ्क्य 'सम्पद्याविहाय स्वेन' इत्यंशेन सूत्रे सूचितमित्युपेक्षितमितीष्टापत्तिरूपं दूषणं स्वयमाह- **द्वितीये न विरोध इत्यादिना ॥** मुक्तोऽतिक्रामतीति पूर्वपक्षविरोधित्वाभावादिति भावः।

टीकायां सामान्यरूपाख्यसिद्धान्तन्यायविवरणव्याख्यानम्

अत्र

'सामान्यरूपप्रतिभानमुक्तिराश्चर्यताऽकृत्रिमताऽस्तदोषः।
विशेषक्लृप्तिः कृतनिःश्रमश्च माहात्म्यमित्येव सुनिर्णयार्थाः ॥'

इति न्यायमालोक्तसामान्यरूपन्यायं साक्षाद्धेतुत्वानुपपत्त्या तत्साध्यहेतुप्रदर्शनेन विवृण्वत्,

'तरतीति सामान्यप्रतीतेः, ब्रह्म तीर्त्वेदं गच्छतीति विशेषानुक्तेः ''इमां घोरामशिवां नदीं तीर्त्वा ब्रह्म सम्पद्यते'' इति विशेषोक्तेश्चैतं सेतुं प्रत्यन्यत् तीर्त्वेत्यर्थोपपत्तेः।'

इति वाक्यं भाष्येण सह व्याख्यातुमवतारयति- **नन्वेवमिति ॥** विवरणं व्याख्याति- **यतस्तत्रेति ॥** अनेन यदुक्तं ब्रह्मतरणाभावे मुक्तस्य स्वरूपा-विर्भावानुपपत्तिः। 'एतं सेतुं तीर्त्वा' (छा.उ. ८.४.२) इति श्रुतौ ब्रह्मतरणा-नन्तरमेव स्वरूपाविर्भावोक्तेरिति। तन्न। नद्यादेरेव तरणकर्मत्वसम्भवात्। न चाध्याहारो दोषः। तरतीति सामान्यप्रतीतेरध्याहारं विना निरालम्बनत्व-प्रसङ्गात्। यद्यपि तीर्त्वेत्येव श्रूयते। तथाऽपि तरतीत्येव विपरिणामः कर्तव्यः। कुत इति चेन्न। पूर्वकालार्थक्त्वाप्रत्ययस्यानन्तरगम्यसापेक्षत्वेन ब्रह्म तीर्त्वेदं गच्छतीति विशेषानुक्तेः विपरिणामस्य युक्तत्वात्। किञ्च 'इमां घोरामशिवाम्' (ब्र.सू.भा.उ. मौद्गल्यश्रुतिः) इति श्रुतिसमाख्यानात् कर्माध्याहारादिर्युक्तः। किञ्चैतद्वाक्येन विरोधः यथाश्रुतेनोताध्याहृतेन ? नाऽद्यः। तरतीति सामान्यतो यस्यकस्यचित्तरणप्रतीतावपि ब्रह्मणस्तदप्रतीतेः। न च सेतुमिति द्वितीयान्त-सम्बन्धेन विशेषप्रतिपत्तिरिति वाच्यम्। 'ब्रह्म तीर्त्वेदं गच्छति' इति दोषा-नुक्तेः सेतुशब्दसम्बन्धायोगात्। न द्वितीयः। ब्रह्म तीर्त्वेदं गच्छतीति विशेषस्य

क्वापि श्रुत्यन्तरेऽनुक्तेः। 'इमां घोरामशिवां नदीं तीर्त्वा ब्रह्म सम्पद्यते' इति श्रुतौ नदीकर्मकतरणस्य ब्रह्मकर्मकसम्पत्त्याख्यविशेषस्योक्तेश्च । न हि श्रुतिविरुद्धोऽध्याहारो युज्यते। तस्मात् सेतुं प्रति गन्तुमन्यत् तरतीत्यस्याः श्रुतेरर्थो वक्तव्यः । तथा चास्याः श्रुतेरेवमर्थोपपत्तेः ब्रह्मातिक्रमानन्तरमेव स्वरूपाविर्भावोक्तेर्मुक्तो ब्रह्मातिक्रमतीति न वाच्यमिति पूर्वेण सम्बन्धः। एतेन सिद्धान्तेऽपि क्त्वाप्रत्ययोऽनुपपन्नः। ब्रह्म गन्तुं नदीं तीर्त्वेत्यस्य साकाङ्क्षत्वात्। न च 'अन्धः सन्ननन्धो भवति' (छा.उ. ८.४.२) इति क्रियानिर्देशोऽस्तीति वाच्यम् । ब्रह्मणोऽप्यतिक्रमोक्तौ गम्यान्तरावश्यम्भावनियमेन गच्छतीति क्रियाध्याहारं विनाऽऽकाङ्क्षाविच्छेदाभावादिति निरस्तम् । सिद्धान्ते नदीतरणानन्तरं ब्रह्मणः गम्यत्वाङ्गीकारादध्याहारेण निराकाङ्क्षत्वोपपत्तेः। नदीं तीर्त्वा ब्रह्म गच्छतीत्येतावतैव पूर्तेः सेतुं प्रति गन्तुमिति व्यर्थमिति चेन्न। सेतुं प्रति गन्तुं प्रस्थितस्य किञ्चिद् व्यवधायकं प्रारब्धकर्मास्तीत्यर्थद्योतनार्थत्वोप-पत्तेः । पूर्वोक्तरीत्या तीर्त्वेत्यस्य तिङन्ततया परिणामे एतं सेतुं प्रति गन्तुं नदीं तरतीत्यर्थोपपत्तेश्चेति विवरणयोजनां सूचयति। अनेन सामान्यं रूप्यते अनेनेति सामान्यरूपशब्दः प्रतीतिपरः, विशेषानुक्त्यादेरुपलक्षकश्चेति सामान्यरूपन्यायो विवृतो वेदितव्यः।

सूत्रार्थः

सूत्रार्थस्तु- ज्ञानी भोगान् भुङ्क्ते यतोऽतो मुक्त इति चाध्याहारः । स्वेनेत्यावर्तनीयम्। 'परं जैमिनिः' इत्यतः परमित्यनुकर्षः। ज्ञानी ब्रह्म सम्पद्य प्राप्याविहाय तदनतिक्रम्यैव भोगान् भुङ्क्ते। न चैवं 'सेतुं तीर्त्वा' (छा.उ. ८.४.२) इति श्रुतौ ब्रह्मातिक्रमानन्तरमेव मुक्तत्वाभिधानात् अनतिक्रमेण वर्तमानस्यामुक्तत्वमिति न मन्तव्यम्। यतः 'स्वेन रूपेणाभिनिष्पद्यते' (छा.उ. ८.३.४) इति श्रुतौ स्वरूपेणावस्थानमुच्यते। अतो नामुक्तत्वम्। श्रुतिस्तु

अन्यथा व्याख्येयेति भावः। 'स एवंवित्' (ब्र.सू.भा.उ. सौपर्णश्रुतिः) इति, 'परञ्ज्योतिरुपसम्पद्य' (छा.उ. ८.३.४) इति, 'इमां घोरामशिवां नदीं तीर्त्वा' (ब्र.सू.भा.उ. मौद्गल्यश्रुतिः) इति श्रुतित्रयात् भगवत्सम्पत्त्या भोगानुभवस्तस्य मुक्तत्वं भगवत्तरणाभावश्चेति प्रमेयत्रयं तथैव प्रतिपत्तव्यमिति। तत्र श्रुतित्रये 'सम्पद्य' इत्यनेन सौपर्णश्रुतिः 'स्वेन' इत्यनेन छान्दोग्यश्रुतिः 'अविहाय' इत्यनेन मौद्गल्यश्रुतिश्चोपलक्षितेति ध्येयम् । स्वेन शब्दादित्यस्य स्वेनेति शब्दघटिताच्छब्दाच्छन्दोगश्रुतेरर्थ इति केचित्॥ १॥

॥ इति सम्पद्याधिकरणम्॥ १॥

॥ अथ मुक्ताधिकरणम् ॥ २ ॥

सूत्रभाष्यम्

ॐ मुक्तः प्रतिज्ञानात् ॐ ॥ ४.४.२ ॥

मुक्त एव चात्रोच्यते।

'अहरहरेनमनुप्रविशत्युपसङ्क्रमे च न तत्र मोदते न प्रमोदते न कामाननुभवति बद्धो ह्येष तदा भवत्यथ यदैनं मुक्तोऽनुप्रविशति मोदते च प्रमोदते च कामांश्चैवानुभवति' इति बृहच्छ्रुतौ प्रतिज्ञानात् ॥ २ ॥

॥ इति मुक्ताधिकरणम् ॥ २ ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र ब्रह्म प्राप्य तदविहायैव भोगभोक्तुर्मुक्तत्वसाधनादस्ति शास्त्रादि-सङ्गतिः। अन्यथा भोगासिद्धेः साधनीयमेतत्। 'स तत्र पर्येति' इति श्रुत्युक्तो विषयः। किं मुक्तोऽमुक्तो वेति सन्देहः। उभयथासम्भवः सन्देहबीजम्।

पूर्वपक्षः

नायं मुक्त इति पूर्वः पक्षः। 'स तत्र पर्येति' इत्यादिनाऽस्य क्रियाप्रतीतेः। न हि क्रियावत्त्वं कृतकृत्यस्य मुक्तस्योपपद्यते। न च वाच्यममुक्तस्याप्येवं-विधभोगासम्भव इति। अन्यदा सम्भवेऽपि परमात्मप्राप्तावमुक्तस्यापि तदुप-पत्तेः। न चामुक्तत्वे श्रुत्युक्तस्य स्वेन रूपेणेति वाक्यविरोधः। तत्र निर्गुणोपा-सकस्य स्वरूपाविर्भावविधानात्। 'स तत्र' इति दहरविद्योपासकस्यामुक्त-स्यैव भोगाभिधानात्। अतः श्रुत्युक्तस्यामुक्तत्वान्न मुक्तस्य भोग इति।

सिद्धान्तः

सिद्धान्तयत् सूत्रं पठित्वा व्याचष्टे- **मुक्त इति** ॥ 'स तत्र पर्येति' इत्यत्र मुक्त एवोच्यते। मुक्तत्वं विनैतद्भोगानुपपत्तेः। न च ब्रह्मप्राप्त्या तदुपपत्तिः। 'अहरहरेनम्' इति श्रुतौ ब्रह्मप्राप्तानामपि सुप्तानाममुक्ततया दिव्यभोगाभाव-मुक्त्वा मुक्तस्यैव तत्प्राप्त्या तद्भावप्रतिज्ञानात्। अत एव तस्याक्रियावत्त्वं च परास्तं श्रुतिविरोधादिति भावः। स्वरूपाविर्भावोक्त्या च मुक्तत्वं ज्ञायते। न च प्रकरणभेदः कल्प्यः। एकप्रकरणत्वेन प्रतीतस्य कारणं विना भिन्नप्रकरणत्वकल्पनेऽतिप्रसङ्गात्। अतो युक्त एव मुक्तस्य भोग इति सिद्धम् ॥ २ ॥ अ. २ ॥

शेषतात्पर्यचन्द्रिका

॥ ॐ मुक्तः प्रतिज्ञानात् ॐ ॥ ४.४.२ ॥

सङ्गतिः

ननु यदुक्तं पूर्वं ज्ञानी ब्रह्मानतिक्रमेण भोगान् भुङ्क्ते। स च स्वेन रूपेणाभि-निष्पद्यत इत्युक्तेर्मुक्तश्चेत्यङ्गीकर्तव्यमिति तदयुक्तम्। तदा हि 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म' (छा.उ. ८.१.१) इत्युपक्रम्य 'अथ य एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्म' (छा.उ. ८.३.४) इति छान्दोग्येऽ-ष्टमप्रपाठके स्वरूपाविर्भावपरं वाक्यम्। तत्रैव व्यवधानेनोत्तरं वाक्यम् 'अशरीरो वायुरभ्रं विद्युत् स्तनयित्नुरशरीराण्येतानि तद्यथैतान्यमुष्मादाकाशात् समुत्थाय परञ्ज्योतिरूपसम्पद्य स्वेन रूपेणाभिनिष्पद्यन्ते एवमेवैष सम्प्रसादोऽ-स्माच्छरीरात् समुत्थाय परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते। स उत्तमः पुरुषः स तत्र पर्येति जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वाऽ-

ज्ञातिभिर्वा नोपजनं स्मरन् इदं शरीरम्' (छा.उ. ८.१२.३) इति च। तत्र न तावदाद्ये वाक्ये भोगवार्ताऽस्ति 'स तत्र पर्येति' (छा.उ. ८.१२.३) इत्यादिवाक्यसन्निधानाभावात्। द्वितीये तु यद्यप्यस्ति भोगवाक्यसन्निधानं तथाऽपि न तत्र मुक्तत्वज्ञापकमस्ति। 'परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' (छा.उ. ८.१२.३) इति पूर्ववाक्ये स्वरूपाविर्भावरूपं मुक्तलिङ्गं श्रूयत इति च न साम्प्रतम्। नहि मुक्तस्य 'स तत्र पर्येति' (छा.उ. ८.१२.३) इत्युक्तक्रिया सम्भवति। 'निष्क्रियं निष्कलं शान्तम्' इत्यादिश्रुतिविरोधात्। तथा च यथा निविद्भिर्व्यवधानात् सामिधेनीनां प्रकरणं भिद्यते, एवं क्रियाभिर्व्यवधानात् मुक्तस्यापि प्रकरणं भिद्यत इति सम्पद्यत इत्यन्तं निर्गुणोपासकस्य स्वरूपाविर्भावाभिधानपरमेकवाक्यम्। तत्पूर्वप्रकृतदहरविद्योपासकस्य 'स तत्र पर्येति' (छा.उ. ८.१२.३) इति श्रुत्युक्तस्य मुक्तत्वाङ्गीकारे 'स्वेन रूपेणाभिनिष्पद्यते' (छा.उ. ८.१२.३) इति पूर्ववाक्यविरोध इति निरस्तम्। 'स तत्र पर्येति' (छा.उ. ८.१२.३) इत्यन्यप्रारम्भात्। अन्यथा 'स वा एष पुरुषोऽन्नरसमयः' (तै.उ. २.१.३) इत्यस्यान्नात् पुरुष इति पूर्ववाक्येन विरोधाद् ब्रह्मपरत्वं न स्यादिति कोशपरत्वमेव स्यात्। तथा च 'आनन्दमयोऽभ्यासात्' (ब्र.सू. १.१.१२) इति सूत्रविरोधः। अन्नरसत्वलिङ्गात् सन्निधिं बाधित्वा प्रकरणभेदाङ्गीकारे इहापि क्रियालिङ्गात् सन्निधिबाधेन प्रकरणान्तरत्वं कुतो नाङ्गीक्रियते। 'परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते। एष आत्मेति होवाच' (छा.उ. ८.३.४) इति स्थानान्तरे आम्नातस्य स्वरूपाविर्भावस्य भोगासन्निधानात् तावता आख्यानादिहापि वाक्यभेदस्यैवाऽश्रयणीयत्वात्। न च दहरविद्योपासकस्य 'स तत्र पर्येति' (छा.उ. ८.१२.३) इति उक्तमहाभोगासम्भवः। येन मुक्तस्यैवायं भोग उच्यत इति पश्यामः। अमुक्तस्यापि दहरविद्योपासकस्य ब्रह्मप्राप्तिश्रवणेन तद्वशाद् भोगोपपत्तेरित्युत्थानादनन्तरसङ्गतिः।

पूर्वपक्षः

'स तत्र पर्येतीत्यत्र कृत्रिमत्त्वान्न मुक्तिगः।
तेन ब्रह्म व्यतिक्रम्य मुक्तः स्यादिति न क्षतिः॥' इति पूर्वः पक्षः।

सिद्धान्तः

'अमुक्तस्य महाभोगो नैव दृष्टः कदाचन।
तेनानयोर्वाक्यभेद इति पक्षो न युज्यते॥'

'अहरहरेनमनुविशत्युपसङ्क्रमे च न तत्र मोदते न प्रमोदते न कामाननुभवति बद्धो ह्येष तदा भवत्यथ यदैनं मुक्तोऽनुप्रविशति मोदते च प्रमोदते च कामांश्चैवानुभवति' (ब्र.सू.भा.उ. बृहच्छ्रुतिः) इति बृहच्छ्रुतौ भगवत्प्रवेशमात्रस्य भोगाप्रयोजकत्वमुक्त्वा मुक्तेरेवान्वयव्यतिरेकाभ्यां भोगप्रयोजकत्वप्रतिज्ञानाद् भोगभोक्तुर्मुक्तत्वाभावे 'स तत्र पर्येति' (छा.उ. ८.१२.३) इत्यादिभोगाभिधायकं वचनं निरालम्बनं सदप्रमाणमेव स्यात्। नह्यमुक्तस्येदृशो दिव्यो भोगः सम्भावितः। एतेन काल्पनिकभोगविषयत्वं निरस्तम्। त इमे सत्याः कामा अनृतापिधानास्तेषां सत्यानां सतामनृतमपिधानमित्यादिना पूर्वेण वाक्येन भोगस्य स्वरूपत्वावगमाच्च।

यच्चोक्तम् 'अथ य एष सम्प्रसादोऽस्माच्छरीरात्' (छा.उ. ८.३.४) इत्याद्ये वाक्ये 'एष आत्मेति होवाच' (छा.उ. ८.३.४) इत्येतस्यैव श्रवणाद् भोगवाक्यसन्निधानमसिद्धमिति। तन्न। शाखान्तराधिकरणन्यायेनाद्वैतिमते सर्ववेदान्तप्रत्ययन्यायेन च विद्यैकत्वस्य सिद्धत्वेन तस्यापीहोपसंहार्यत्वात्। अन्यथा 'आनन्दादयः प्रधानस्य' (ब्र.सू. ३.३.१२) इत्यत्र त्वद्भाषितमानन्दादीनामुपसंहार्यत्वं न स्यात्। किञ्च 'परञ्ज्योतिरुपसम्पद्य' (छा.उ. ८.३.४) इति वाक्ये समीपवाचिनोपशब्देन समीपगमनोपलक्षिताशेषभोगस्योक्तेस्तत्सन्निधानमवर्जनीयं, भोगो हि प्रियसमीपोपगमनतद्दर्शनादिरूपः।

एतेन परब्रह्मसम्पन्नस्य निष्क्रियत्वात् समीपगमनादिक्रियावेशायोगेनोप-शब्दार्थो न विवक्षित इति निरस्तम्। मुक्तस्य निष्क्रियत्वे मानाभावात्। सर्वत्र मुक्तप्रकरणे 'एतमानन्दमयमात्मानमुपसङ्क्रम्य' (तै.उ. ३.१०.५), 'एतत्सामगायन्नास्ते' (तै.उ. ३.१०.५) 'कृष्णो मुक्तैरिज्यते वीतमोहैः' (म.भा.) इत्यादौ सामगानादिक्रियाश्रवणात्।

पराभिमतमुक्तिद्वैविध्यनिरासः

नन्वस्ति मुक्तिद्वैविध्यम्। तत्रतत्र वेदान्तेषु सगुणनिर्गुणोपास्तिद्वैविध्यदर्शनेन फलद्वैविध्यस्याप्यवश्यम्भावित्वात्। तथा च सगुणोपासनयाऽर्चिरादिमार्गेण ब्रह्मलोकादिप्राप्तानां तत्र दिव्यभोगाः सामगानादिरूपा उच्यन्ते। ये तु निर्गुणोपासनया केवलमात्मीभूतास्ते निर्मृष्टनिखिलप्रपञ्चत्वात् केन कस्य दर्शनादिरूपान् भोगान् भुञ्जीरन्। अन्यथा 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' (बृ.उ. ४.५.१५) इत्याद्यागमविरोधात्। तथा च भोगभोक्ताऽपि 'सामीप्यात् तद्व्यपदेशः' इति न्यायेनाचिरादेव ब्रह्मत्वमाप्नोतीत्यनया विवक्षया मुक्त इत्युपचर्यते। उदाहृतवचनानि च तद्विषयाणि। मुख्यमुक्तस्तु न क्रियामनुभवतीति चेन्न। उपासनाद्वैविध्यादौ मानाभावात्। कथं चेदमनुगन्तव्यम् इयं निर्गुणोपासना नेयमिति ?

यत्र गुणाः श्रूयन्ते सा सगुणेत्युक्तौ किं नैयायिकादीनामिव गुणत्वं पारिभाषिकमुत धर्मत्वाद्यात्मकम्। नाऽद्यः। 'सत्यकामः सत्यसङ्कल्पः' (छा.उ. ८.५.१) इत्यादीनामपि रूपरसाद्यन्यतमत्वाभावेन सगुणत्वाभावप्रसङ्गात्। नान्त्यः। अशब्दमस्पर्शमित्यादेरपि शब्दाभावादिरूपधर्मप्रतिपादनेन निर्गुणत्वा-भावप्रसङ्गात्। अभावो न धर्म इति चेन्न। भावस्यापि तदभावप्रसङ्गात्। अधिकरणातिरिक्ताभावो गौरवान्नाङ्गीक्रियत इति चेन्न। घटवद्भूतलादि-स्वरूपत्वे घटवत्यपि भूतले घटाभावप्रतीत्यापत्तेः। घटाभाववद्भूतलस्वरूपत्वे

विशेषणविशेष्ययोर्भेदावश्यम्भावेन स्ववचनव्याघातापातात्। भूतलादिमात्र-स्वरूपत्वे च सर्वत्र तद्बुद्ध्यापातात्। एवं रूपादेरपि गौरवेण प्रत्याख्याना-पाताच्च। एकं पारमार्थिकं तत्त्वमित्यस्यापि शून्यवादापेक्षयाऽनन्यत्वेन त्यागापाताच्च।

किञ्च निर्गुणब्रह्मविषयिणी चित्परम्परा हि निर्गुणोपासना। न च निर्गुणस्य ब्रह्मणश्चिद्रूपस्य चिद्विषयत्वं युज्यते कर्तृकर्मणोरुत्सर्गतो भेदनियतत्वात्। अन्यथा दृश्यत्वादीनां व्यभिचारापाताच्च। न चोपासनं ज्ञानभिन्नम्। सर्ववेदान्त-प्रत्ययाधिकरणविरोधात्। न च स्वतश्चिद्रूपस्यापि वृत्तिरूपज्ञानविषयत्वं सम्भवतीति वाच्यम्। निर्गुणत्वव्याघातात्।

किञ्च निर्गुणमेव स्वरूपत एव न सत्। तथाहि। पदार्थानां सत्त्वं प्रमाणा-धीनम्। तथा च तत्र न तावत्प्रत्यक्षं प्रमाणमतीन्द्रियत्वाङ्गीकारात्। तत्तदिन्द्रियविषयसन्निकर्षालोकसंयोगादेश्चेन्द्रियापेक्षितस्य निर्गुणे ब्रह्मण्यसम्भवाच्च। चाक्षुषत्वादिप्रयोजकरूपादेरभावाच्च। अतीन्द्रियस्यापि राहोः चन्द्रावच्छेदेन चाक्षुषत्ववदतीन्द्रियस्यापि ब्रह्मणो वृत्त्यवच्छेदेन चाक्षुषत्वं युज्यत इति चेन्न। स्वतोऽतीन्द्रियस्यावच्छेदसहस्रेणापि प्रत्यक्षत्वायोगात्। राहोस्तु स्वरूपतश्चाक्षुषत्वात्। दूरस्थत्वादिना त्वग्रहणमात्रम्। शास्त्रवैयर्थ्यप्रसङ्गाच्च। अत एव नानुमानागमौ। तयोरपि स्वफले व्याप्तिपक्षधर्मतादिवाच्यवाचक-भावादिसम्बन्धसापेक्षत्वात्। नहि निर्गुणं व्याप्यव्यापकभावादिसम्बन्धवत्। स्वप्रकाशत्वात् प्रमाणान्तरनिरपेक्षसिद्धिमद् ब्रह्मेति चेन्न। शून्यस्यापि तथा सिद्धिप्रसङ्गात्। दर्शनस्पर्शनादिभोगाभावे 'मग्नस्य हि परेऽज्ञाने किन्नु दुःखतरं भवेत्' (गी.भा.उ.वचनम्) इति न्यायेनापुरुषार्थत्वप्रसङ्गस्योक्तत्वाच्च।

'स य एवंविदस्माच्छरीरादूर्ध्व उत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानाप्त्वा अमृतः समभवत्' इति श्रुतेरस्ति भोगहीनाऽपि मुक्तिः। क्त्वाप्रयोगेन

भोगानन्तरममृतत्वप्रतीत्या मुक्तेर्भोगशून्यताप्रतीतेः। न हि 'स्नात्वा भुङ्क्ते' इत्युक्ते भोजनकाले स्नानस्य प्रसक्तिरस्ति । उत्क्रान्तिमार्गोपदेशः शास्त्रैकार्थकः। सगुणोपासनाफलत्वेन तदुपदेशोपपत्तेः। नच सगुणनिर्गुणविभाग एवायुक्त इति वाच्यम्। 'कार्यं बादरिरस्य गत्युपपत्तेः' (ब्र.सू. ४.३.७), 'परं जैमिनिर्मुख्यत्वात्' (ब्र.सू. ४.३.१२) इत्यादौ कार्यपरशब्दाभ्यां तद्विभागस्य सूत्रकृत्सम्मतत्वात्। समं चैतत्परेषामपि प्रतीकालम्बनानां चतुर्मुखप्राप्तिः अप्रतीकालम्बनानां परप्राप्तिरित्युपगमात्। वयं तु सगुणोपासकानां कार्यप्राप्तिर्निर्गुणोपासकानां तु परप्राप्तिरित्यभ्युपगच्छामः । नचैतावता कश्चिदपराधोऽस्ति । एवं ज्ञानिष्वेव केषाञ्चिदेकगुणोपासकानामुत्क्रान्तिमार्गयोरभावस्याङ्गीकारात्। एवं च 'न तस्य प्राणा उत्क्रामन्ति' इत्यादिश्रुतयोऽनुकूलिता भवन्ति। तस्मान्मुक्तौ भोगाभावः सिद्ध इति चेन्न पुरुषार्थत्वाभावस्योक्तत्वात् । क्त्वाप्रयोगस्य 'पिताऽभिषिच्य पुत्रं स्वं राजानं कृतवान् स्वयम्' इत्यादाविव मुक्तावितिकर्तव्यताप्रदर्शनार्थत्वोपपत्तेः । न हि राज्याभिषेको न राजत्वान्तर्गतः । यत्र स्वरूपाविर्भावमात्रोक्तिस्तत्र निर्गुणमुक्तेरस्त्यवकाश इति तु दुराशामात्रम्। यावताऽस्मिन् वाक्ये परञ्ज्योतिरिति कर्मणः, स्वेनेति करणस्याभिनिष्पद्यत इति कर्तुश्चास्त्याम्नानम्।

शाखाग्रं चन्द्रमा इति विद्यया कयाचिद्भङ्ग्या विवक्षितार्थप्रतिपादनमात्रम्। नच तावता तदभेदे तात्पर्यम्। अन्यथा चन्द्रे शाखाग्रत्वं तत्त्वं स्यादिति चेन्न । अन्योन्याश्रयप्रसङ्गात्। चन्द्रे शाखाग्रत्वाभावस्तु प्रत्यक्षसिद्धः।

किञ्चात्र परञ्ज्योतिवाक्ये निर्गुणमुक्तेः का प्रसक्तिः ? 'अथ यदिदमस्मिन् दहरं पुण्डरीकं वेश्म' (छा.उ. ८.१.१) इत्यादिना सगुणायाः दहरविद्याया उपक्रान्तत्वेन तत्फलसगुणमुक्तेरेवाऽकाङ्क्षितत्वात्। यथाकथञ्चिन्निर्गुणविद्याया अपि प्रकृतत्वं सम्पाद्य तत्फलनिर्गुणमुक्तेः काङ्क्षितत्वसम्पादने तु 'स तत्र पर्येति'

(छा.उ. ८.१२.३) इत्याद्युत्तरवाक्ये भोगोक्त्यनुपपत्तिः। न च स तत्रेत्यारभ्य पुनः सगुणमुक्तिः प्रस्ताव्यत इति युक्तम् । सन्निधिप्रकरणयोर्बाधापत्तेः । नह्येकस्मिन्नेव वाक्ये पूर्वत्र सगुणमुक्तिर्मध्ये निर्गुणमुक्तिः, अन्ते सगुणमुक्तिरुच्यत इति युक्तम्। निविदां प्रकृतपदार्थविरोधित्वेन प्रकरणविच्छेदकत्वेऽपीह क्रियाकारकफलादेः सर्वस्य सत्यत्वाङ्गीकारेण विरोधिव्यवधानाभावात्।

अन्नरसत्वादेः पुरुषशरीरे कथञ्चिदपि नासम्भवात् प्रकरणविच्छेदः सन्निहितत्यागश्च । न चात्यन्तं तत्र सन्निहितत्यागोऽपि । 'भूतं भूताभिमानी च तद्देहोऽन्तर्नियामकः। हरिश्चाऽकाशशब्दोक्तः' (अनुव्या. १.१, श्लो. २०१) इति न्यायेन पुरुषशब्देन हरेरपि सन्निहितत्वाङ्गीकारात्।

मन्मते एकगुणोपासकानां देवानां चोत्क्रान्तिमार्गयोरभावेऽपि तदितरेषां तयोः सद्भावेन मुक्त्यर्थमाम्नानं नानर्थकम्। त्वन्मते तु मुख्यमुक्तिभाजां सामस्त्येन तदभावेन तदाम्नानमनर्थकमेव। न हि गौणमुक्तिभाजां तत्सम्बन्धोऽस्तीत्येतावता मुक्तिप्रकरणे तदाम्नानं युज्यते । तथा सति स्वर्गादिप्राप्त्यर्थं धूमादिमार्गस्यापि तदाम्नानं स्यात् । सूत्रकृता व्यवह्रियमाणकार्यपरशब्दौ न त्वदभिमतसगुणनिर्गुणपरौ निर्गुणस्योक्तरीत्या क्वाप्यसिद्धेः।

एतेन यथा पूष्णोऽहं देवयज्ययाऽऽन्नादो भूयासम्। पूषा प्रपिष्टभागोऽदन्तको हीति दर्शपूर्णमासप्रकरणे आम्नातस्य मन्त्रस्य दर्शपूर्णमासयोः पूष्णोऽभावेन सामर्थ्याभावात् प्रकरणादुत्कृष्य यत्र पूषा वर्तते तत्रैव निवेशः, तथा प्रकृतेऽपि 'परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' (छा.उ. ८.१२.३) इत्यारभ्य अधीतनिर्गुणमुक्तिप्रकरण आम्नातस्य 'स तत्र पर्येति' (छा.उ. ८.१२.३) इत्यस्य सामर्थ्यासम्भवेन यत्र सगुणमुक्तिराम्नायते तत्रास्य प्रवेशः । तथाहि। मुक्तौ तावत् क्रियाकारकफलादिप्रपञ्चस्याऽत्यन्तिकी निवृत्तिः श्रूयते। 'भूयश्चान्ते विश्वमायानिवृत्तिः' (श्वे.उ. १.१०) इत्यादिश्रुतेः। अत एव सार्वज्ञाल्पज्ञत्वादि-

विरुद्धधर्माणामात्यन्तिकनाशाज्जीवब्रह्मणोरभेदश्च श्रूयते। 'अहं मनुरभवं सूर्यश्च' (ऋ. ४.२६.१) 'अहं ब्रह्मास्मि' (बृ.उ. १.४.१०) 'तद्योऽहं योऽसौ सोऽहम्' 'यत्र त्वस्य सर्वम् आत्मैवाभूत्' 'तत्त्वमसि' (छा.उ. ६.८.७) 'प्राणो वाऽहमस्म्यृषे' 'प्राणस्त्वं प्राणः सर्वाणि भूतानि प्राणो ह्येष य एष तपति' (ऐ.आ. २.२.३) इत्यादेः। तथा च भेदमात्रस्य मुक्तौ विलयश्रवणेन 'स तत्र पर्येति' (छा.उ. ८.१२.३) इत्यस्य भेदसापेक्षभोगप्रतिपादकस्य कथं सामर्थ्यं स्यादिति निरस्तम्। 'मायां तु प्रकृतिं विद्यात्' (श्वेता.उ. ४.१०) इति वचनेन विश्वोपादानभूतप्रकृतिनिवृत्तेरेवाऽद्यश्रुतौ विवक्षितत्वात्। न त्वज्ञाननिवृत्तिरत्रो-च्यते। येनाज्ञानकार्यदेहगेहादेरप्यज्ञानोपादेयस्वोपादाननिवृत्तौ निवृत्त्यवश्यम्भावेन देहगेहादिसाध्यभोगो न स्यात्। ननु प्रकृतेर्विश्वोपादानत्वात् तन्निवृत्त्या देहगेहादिनिवृत्त्यवश्यम्भावेन तथाऽपि भोगानुपपत्तिरेवेति चेन्न। न ह्यत्र प्रकृतेः स्वरूपतो विनाश उच्यते। किन्तु तत्सम्बन्ध एव जीवस्य निवर्तते। अन्यथा कस्यचिन्मुक्त्यनन्तरं सृष्टिरेव न स्यात्। तस्मात् प्रकृतेः स्वरूपतो विनाशाभावात् प्राकृतदेहगेहादौ स्थित्वा भोगान्न भुङ्क्त इत्यादौ बाधकाभावः। चिन्मात्रेण ब्राह्मेण वा देहेन भोगाङ्गीकारे बाधकाभावाच्च। वक्ष्यति चैतत् सर्वं सूत्रकृदेव। न च भेदसापेक्षत्वाद् भोगस्य भेदनिवृत्तौ कथं भोग इति वाच्यम्। धर्मिस्वरूपत्वाद् भेदस्य तन्निवृत्तौ स्वरूपनिवृत्त्यापत्त्या शून्यवादापातेन भेदनिवृत्तेरेवा-प्रामाणिकत्वात्।

'अहं मनुरभवम्' (ऋ. ४.२६.१) इत्याद्यभेदश्रुतयस्तु 'अन्तर्यामिण-मीशेशमपेक्ष्याहं त्वमित्यपि' (ब्र.सू.भा.उ. कौर्मवचनम्) इत्यागमेनैवान्यत्र सम्यग् व्याख्याताः।

किञ्च तत्तज्जीवेषु भगवदावेशस्तावत् सिद्धः।

'अनन्तो नरनामा च तस्मिंस्तु नरनामवान्।
विशेषेण स्वयं विष्णुर्निवसत्यम्बुजेक्षणः।
राम एको ह्यनन्तांशस्तत्र रामाभिधो हरिः।
शुक्लकेशात्मना तिष्ठन् रमयामास वै जगत्।
पृथुर्नाम महाराजस्तत्र विष्णुः स्वयं प्रभुः।
पृथुनामा चतुर्बाहुः प्रविष्टस्तेन चार्थितः।
मन्वन्तरेषु भगवांश्चक्रवर्तिषु संस्थितः।
चतुर्भुजो जुगोपैतद् दुष्टराजन्यनाशकः।
राजराजेश्वरेत्याहुर्मुनयश्चक्रवर्तिनाम्।
हरिर्हि तत्र तत्रस्थो रमणादीन् करोत्यजः।
अतस्तस्यैव नामानि व्याजादन्यगतानि तु।
प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम्।
तृतीयं प्राणिनां देहे',

'स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत' (ऐ.आ. २.४.३) इत्यादेः।

तथा च 'प्राणो वा अहमस्म्यृषे' (ऐ.आ. २.२.३) 'प्राणस्त्वं प्राणः' (ऐ.आ. २.२.३) इत्यादावहमादिशब्दाः न तत्तज्जीवपराः। अत एव न तज्जीववाक्यम्। किन्तु पिशाचाद्याविष्टशरीरिवाक्यमिव तदन्तःप्रविष्ट-भगवद्वाक्यमेव। नहि पिशाचाविष्टशरीरादुत्पद्यमानं वचनादिकं तच्छरीरिणो जीवस्येति युक्तम्। तज्जीवापरिचितभाषाविशेषेणापि व्यवहारदर्शनात्। अत एव शरीरिण इन्द्रस्य ज्ञातत्वेऽपि तत्र वचनादिक्रियाकर्तृत्वं नेन्द्रस्य किन्तु भगवत एवेति ज्ञात्वा विश्वामित्रेण 'त्वामेव जानीयाम्' इति प्रार्थ्यते। दृष्टं चैतदन्याविष्ट-शरीरमधिकृत्यापि तदाविष्टपुरुषं प्रत्येवोत्तरप्रत्युत्तररूपं वचनम्। स्पष्टं

बृहदारण्यकेऽपि । 'अथ हैनं भुज्युर्लाह्यायनिः पप्रच्छ याज्ञवल्क्येति होवाच । मद्रेषु चरकाः पर्यव्रजाम ते पतञ्चलस्य काप्यस्य गृहानैम । तस्याऽसीद् दुहिता गन्धर्वगृहीता तमपृच्छाम कोऽसीति । सोऽब्रवीत् सुधन्वाऽऽङ्गिरस इति । तं यदा लोकानामन्तानपृच्छाम अथैनमब्रूम क्व पारीक्षिता अभवन्निति स होवाच' (बृ.उ. ५.३.१) इत्यादि । तथा सप्तमे ब्राह्मणेऽपि- 'अथ हैनमुद्दालक आरुणिः पप्रच्छ याज्ञवल्क्येति होवाच । मद्रेष्ववसाम पतञ्चलस्य काप्यस्य यज्ञमधीयानास्तस्याऽसीद् भार्या गन्धर्वगृहीता । तमपृच्छाम कोऽसीति । सोऽब्रवीत् कबन्ध आथर्वण इति सोऽब्रवीत् पतञ्चलं काप्यं याज्ञिकांश्च । वेत्थ नु त्वं काप्य तमन्तर्यामिणं य इमं च लोकं परं च लोकं सर्वाणि च भूतानि योऽन्तरो यमयतीति सोऽब्रवीत् पतञ्जलः काप्यो नाहं तं भगवन् वेदेति । सोऽब्रवीत् पतञ्जलं काप्यं याज्ञिकांश्च' (बृ.उ. ५.७.१) इत्यादि ।

तस्मान्मुक्तौ भोगाङ्गीकारे बाधकाभावात्, न पूषानुमन्त्रणमन्त्रवत् मुक्तिप्रकरणादुत्कर्षो युक्तः । 'स तत्र पर्येति' (छा.उ. ८.१२.३) इत्यस्यैवमेवोत्कर्षे 'परञ्ज्योतिः' इत्यस्याप्यन्यत्रोत्कर्षेणाऽविर्भूतस्वरूपस्य परब्रह्मत्वापत्तिप्रतिपादकश्रुत्यपलापोऽपि स्यात् । एवं 'ब्रह्मवेद ब्रह्मैव भवति' इत्यादावपि ब्रह्मादिपदस्य प्रकरणादुत्कर्षेण जीवब्रह्मैक्यपरत्वाभावप्रसक्तिः । व्युत्क्रमेण योजनायां तु 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.उ. ३.३.१) इत्यादावपि सत्यमित्यस्य 'अन्नं प्राणं चक्षुः श्रोत्रम्' इत्यत्रस्थानशब्देनान्वये अन्नादेरपि सत्यत्वप्रसङ्गः ।

'अम्नामा भगवान् विष्णुः व्याप्तत्वात् परमेश्वरः ।
तेनैव भ्रियमाणत्वाद् ब्रह्माभ्रमिति कीर्तितः ॥
वायोः पत्नी विद्युदुक्ता विशेषद्युतिहेतुतः ।
ब्रह्माणी स्तनयित्नुः स्यात् सर्वशब्दात्मिका यतः ॥

एतेषां ज्ञानवैशेष्यान्नातिदेहेन सङ्गतिः ।
अतः प्रियाप्रिये तेषामपि न ब्रह्मणः किमु ॥
विष्ण्वीयं हि सुखं तेषां स्वभर्त्रीयमथापि वा ।
न ह्यन्येयं सुखं तेषामतस्ते प्रियवर्जिताः ॥
यथा ते परमाकाशाद् विष्णोरेव समुत्थिताः ।
तमेव प्राप्य संयान्ति नैजमानन्दमूर्जितम् ॥
एवं सम्यक् प्रसादेन विष्णोर्मुक्तोऽपि योऽपरः ।
यं प्राप्य ते निजानन्दमाप्नुवन्ति स केशवः ।
तं प्राप्य रमते मुक्तः स्त्रीभिर्यानैश्च बन्धुभिः ॥' (छा.भा. अ.८, खं.१२)

इत्यादिनाऽऽगमेनैवैकवाक्यतया सम्यग् व्याख्याततत्वाच्च । 'स तत्र पर्येति' (छा.उ. ८.१२.३) इत्यादेर्वोत्कर्षादिर्युक्तः ।

एतेन 'एष आत्मेति होवाच स उत्तमः पुरुषः' (छा.उ. ८.३.४) इत्यत्राभेदोक्तेर्भोगवाक्यं प्रकरणादुत्कृष्यत इति निरस्तम् । यत्परञ्ज्योतिरूपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते, अयं जीव एष आत्मा गुणपूर्ण उत्तमपुरुषश्चेति व्याख्यानात् । उत्तमपुरुष इति चाभेदप्रतिकूलम् । पुरुषबाहुल्यप्रतीतेः ।

एतेन यदुक्तं परेण 'यथोक्तात्मध्यानसाधनानुष्ठानं प्रति साधकानामुत्साहजननार्थम् अनुक्रोशन्त्याह- कष्टमिदं खलु वर्तते अन्याय्यं यत्स्वात्मस्थाः शक्यप्राप्या अपि त इमे सत्याः कामाः' इत्यादिनैतत्पद्यावतारछान्दोग्यभाष्यपर्यालोचनया भोगवाक्यानामुत्साहजननार्थत्वप्रतीतेर्न स्वार्थे तात्पर्यमिति 'तदपि निरस्तम् । तथाहि । तत्र किमुत्साहजननं यथावस्थितार्थप्रतिपादनेनोत तद्वैपरीत्येन ? नाऽद्यः । मुक्तौ भोगस्य प्राप्तेः । न द्वितीयः । अप्रामाण्यप्राप्तेः । उक्तरीत्या भोगाङ्गीकारे बाधकाभावाच्च । उक्तव्याख्यानरूपप्रमाणविरोधाच्च ।

टीकायां पूर्वपक्षीयकृतिन्यायविवरणव्याख्यानम्

टीकाक्षरार्थस्तु, कृतिरित्युक्तन्यायं साध्यप्रदर्शनेन विवृण्वत्,

'न च कृतिमत्वादमुक्त एवोच्यते ''स तत्र पर्येति'' (छा.उ. ८.१२.३) इत्यादौ।'

इति वाक्यं व्याचष्टे- **नायं मुक्त इति पूर्वः पक्ष इत्यादिना॥**

टीकायां प्रतिभानरूपसिद्धान्तन्यायविवरणव्याख्यानम्

'सामान्यरूपं च प्रतिभानं च तयोः समाहारः' इति विग्रहमभिप्रेत्य प्रतिभानन्यायं सम्बन्धिप्रदर्शनादिना विवृण्वत्,

' ''स्वेन रूपेणाभिनिष्पद्यते'' (छा.उ. ८.१२.३) इति मुक्तस्य स्पष्टं प्रतिभातत्वाच्छ्रुतौ। ''स तत्र पर्येति'' (छा.उ. ८.१२.३) इति श्रुत्यैक्य-प्रतीतेश्च। एवम्भूतस्यापि प्रकरणत्वं परिकल्प्य श्रुतिबाधाङ्गीकारे सा श्रुतिरप्येवं विभज्य किं न योजयितुं शक्येति श्रुतेरेवाभावप्रसङ्गः। ''सत्यं ज्ञानम्'' (तै.उ. २.१.१.) इत्यादावपि सत्यमित्यस्यान्नमित्यनेनान्वय इत्यादिप्रसङ्गात्।'

इति वाक्यं व्याचष्टे- **स्वरूपाविर्भावोक्त्या चेत्यादिना॥**

विवरणार्थः

अनेन 'स्वरूपेणाभिनिष्पद्यते' (छा.उ. ८.१२.३) इति वचने भोगभोक्तृ-स्वरूपाविर्भावोक्त्यां मुक्तत्वस्य स्पष्टं प्रतिभातत्वाद् अमुक्त एव 'स तत्र पर्येति' (छा.उ. ८.१२.३) इत्यादौ उच्यत इति नेति सम्बन्धः। ननु 'स्वरूपेणाभि-निष्पद्यते' (छा.उ. ८.१२.३) इति वाक्योक्तस्य मुक्तत्वप्रतिभानेऽपि 'स तत्र पर्येति' इति वाक्योक्तस्य मुक्तत्वं कुतः। तयोर्भिन्नवाक्यत्वादित्यत आह- **स तत्र पर्येतीति॥** 'स्वरूपेणाभिनिष्पद्यते' (छा.उ. ८.१२.३) इति श्रुतेरिति शेषः। निर्निमित्तं प्रतीतैकवाक्यताभङ्गायोगादिति भावः। एतमेवार्थं विपक्षे

बाधकोक्त्या समर्थयते- **एवम्भूतस्यापीति॥** एकवाक्यतया प्रतीतस्यापि प्रकरणान्तरत्वं परिकल्प्य 'स तत्र पर्येति' (छा.उ. ८.१२.३) इति श्रुतेर्मुक्त-परत्वापहाररूपबाधाङ्गीकारे 'परं ज्योतिः' इति सा श्रुतिरपि निष्कारणमेव विभज्य वाक्यभेदमङ्गीकृत्य सम्प्रसादः एष परं ज्योतिः परमात्माऽस्माच्छरीरात् समुत्थाय वैकुण्ठादिकं गच्छति। जीवस्तु भुवं सम्पद्य स्वेन रूपेणाभिनिष्पद्यते जीवभावं न त्यजतीत्यादिरूपेण योजयितुं न शक्या किम्? शक्यैवेति स्वरूपाविर्भावा-त्मकमुक्तिप्रतिपादकश्रुतेरेवाभावप्रसङ्गः।

ननु न ब्रूमो वयं वाक्यभेद इति, येनातिप्रसङ्गः स्यात्। किन्तु योजनाभेद एव। तथा हि। 'स तत्र पर्येति' (छा.उ. ८.१२.३) इति भोगवाक्यं समग्रं प्रथमं संयोज्यानन्तरं परं ज्योतिरिति प्राथमिकं वाक्यं संयोज्यते। तथा च स्वरूपाविर्भावानन्तरं भोगानुक्तेर्मुक्तस्य भोगो नास्तीति युक्तमेवेति। तत्राऽह- **'सत्यं ज्ञानम्' इत्यादावपीति॥** सत्यादिपदानां प्रत्येकं ब्रह्मविशेषणत्वेन प्रतीत्यर्थमुक्तानामपि 'अन्नं प्राणं चक्षुः' (तै.उ. ३.१) इति दूरस्थेनान्न-मित्यनेनान्वय इत्यनिष्टप्रसङ्गादयमपि पक्षो न युक्त इत्यर्थः। 'ऐतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा' (छा.उ. ६.८.७) इत्यादावपि तत्सर्वं सत्यं स आत्मा चेतनस्तत्सत्यजगत्यारोपित इत्याद्यन्वयेनानिष्टापादनमादिशब्दार्थः। न हि त्वन्मते जडमन्नं जगद्वा सत्यमित्यङ्गीक्रियत इति भाव इति ध्येयम्॥ ४-४-२॥

॥ इति मुक्ताधिकरणम्॥ २॥

॥ अथाऽत्माधिकरणम् ॥ ३ ॥

सूत्रभाष्यम्

ॐ आत्मा प्रकरणात् ॐ ॥ ४.४.३ ॥

परञ्योतिःशब्देन परमात्मैवोच्यते। तत्प्रकरणत्वात्।

'परञ्योतिः परं ब्रह्म परमात्मादिका गिरः।
सर्वत्र हरिमेवैकं ब्रूयुर्नान्यं कथञ्चन ॥' इति ब्रह्माण्डे ॥ ३ ॥

॥ इति आत्माधिकरणम् ॥ ३ ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र मुक्तप्राप्यस्य ज्योतिषो ब्रह्मत्वप्रतिपादनादस्ति शास्त्रादिसङ्गतिः। अन्यथा ब्रह्मप्राप्त्यनुपपत्तेः समर्थनीयमेतत्। 'परं ज्योतिः' इति श्रुत्युक्तं ज्योतिर्विषयः। विष्णुरन्यद्वेति सन्देहः। उभयत्र शब्दप्रवृत्तिः सन्देहबीजम्।

पूर्वपक्षः

न विष्णुरिति पूर्वः पक्षः। ज्योतिःशब्दस्याऽदित्येऽपि प्रयोगदर्शनात् 'सूर्यमगन्म ज्योतिः' इत्यादौ। न च विष्णावपि तच्छब्दसद्भावादत्राऽदित्यग्रहणायोगः। अत्राऽदित्याङ्गीकारे 'स तेजसि सूर्ये सम्पन्नो यथा पादोदरस्त्वचा विनिर्मुच्यत एवं हैव स पाप्मना विनिर्मुक्तः' इति श्रुत्यैकवाक्यत्वलाभात्। तथा चात्र समाख्यानादादित्यमुपसम्पद्य प्रारब्धकर्मणा मुच्यत इत्यर्थः स्यात्। एवं च न मुक्तस्य ब्रह्मसमीपे भोग इति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **आत्मेति** ॥ अत्र परञ्योतिःशब्देन परमात्मैवोच्यते। 'य आत्माऽपहतपाप्मा' इति परमात्मन एवात्राऽरभ्याधीतत्वेनास्य तत्प्रकरणत्वात्। न हि प्रकरणात् समाख्या बलवती। तस्याः सावकाशत्वाच्चेति भावः। नन्वस्य परमात्मप्रकरणत्वेऽपि प्रसङ्गादन्योक्तिः किं न स्यादित्यत आह- **परमिति** ॥ भवेदेतत् यदि परञ्योतिःशब्दोऽन्यत्र वर्तेत। नैतदस्ति। स्मृतिविरोधादिति भावः। अतः परञ्योतिर्ब्रह्मैवेति तत्प्राप्याविहायैव मुक्तो भोगान् भुङ्क्त इति सिद्धम् ॥ ३ ॥ अ. ३ ॥

शेषतात्पर्यचन्द्रिका

ॐ आत्मा प्रकरणात् ॐ ॥ ४-४-३ ॥

एतदधिकरणप्रतिपाद्यविषयः

अत्र विष्णोः परंज्योतिःशब्दवाच्यत्वं समर्थ्यते।

सङ्गतिः

नन्विदं प्रथमे सङ्गतं गतं 'ज्योतिश्चरणाभिधानात्' (ब्र.सू. १.१.२४) इत्यादिना। 'एतेन सर्वे व्याख्याताः' (ब्र.सू. १.४.२९) इत्यनेन च। मैवम्। यदुक्तं पूर्वं 'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' (छा.उ. ८.१२.३) इति वाक्यस्य मुक्तपरत्वमङ्गीकृत्य 'स तत्र पर्येति' (छा.उ. ८.१२.३) इति वाक्यस्य तदेकवाक्यत्वप्रसाधानेन मुक्तानां भोगोऽस्तीति तदयुक्तम्। पूर्ववाक्यस्य मुक्तपरत्वे साधकाभावात्। नचात्र परब्रह्मप्राप्तिप्रतिपादनान्मुक्तपरत्वसिद्धिः। ब्रह्मवाचकपदाभावात्। ज्योतिःशब्दस्य तेजोरूपे सूर्यादौ रूढत्वात्। कर्णादिविदूरत्वादिबाधकवशात् 'ज्योतिर्हृदय आहितं यत्' इति बह्वृचोक्तज्योतिःशब्दस्य प्रसिद्धाग्न्यादिपरत्वत्यागेऽपीह छन्दोगे ज्योतिःशब्दस्यान्यपरत्वत्यागे कारणा-

भावात्। 'समाकर्षात्' (ब्र.सू. १.४.१६) 'सत्त्वाचावरस्य' (ब्र.सू. २.१.१७) इत्यादावन्यपरत्वस्याप्युक्तेश्च। न चात्रान्यपरत्वे बाधकमस्ति। नहि मुक्तपरत्वमद्यापि सिद्धमेतद्वाक्यस्य। तदर्थमेव प्रयतनात्। 'स्वेन रूपेणाभिनिष्पद्यते' (छा.उ. ८.१२.३) इत्युच्यमानं स्वरूपाभिनिष्पादनं मुक्तपरत्वं गमयतीति चेन्न। 'प्रारब्धकर्मणा मुच्यते' इत्यत्र तात्पर्योपपत्तेः। प्रारब्धकर्ममुक्तेरपि स्वरूपाभिनिष्पत्त्यन्तर्गतत्वात्। न च ज्योतिःशब्दस्य तैजसद्रव्यमात्रपरत्वादनिर्णय इति वाच्यम्। 'आदित्य एव ज्योतिःशब्दवाच्यः' इति निर्णयोपपत्तेः। 'सूर्यमगन्म ज्योतिरुत्तमम्' इत्यादौ ज्योतिःशब्दस्याऽदित्येऽपि प्रयोगदर्शनात्। न च 'सूर्यमगन्म' इति वाक्य एव सूर्यशब्दस्य तदधीनत्वादिन्यायेन विष्णावपि सद्भावादादित्यपरत्वमेव न सिद्धमिति वाच्यम्। 'स तेजसि सूर्ये सम्पन्नो यथा पादोदरस्त्वचा' (प्र. ५.५) इति श्रुत्या 'सूर्यमगन्म' इत्यस्यैकवाक्यतालाभाय तत्र सूर्यशब्दस्याऽदित्यपरत्वसिद्धेः। न च 'स तेजसि सूर्ये' (प्र. ५.५) इति वाक्यस्यापि भगवत्परत्वमिति शङ्क्यम्। तथाऽप्यन्यनिषेधाभावेनाऽदित्यस्यापि ग्रहणसम्भवात्। अन्यथा 'अर्चिरादिना तत्प्रथितेः' (ब्र.सू. ४.३.१) इत्यादौ भगवदन्यार्चिरादीनां प्राप्यत्वोक्तिर्न स्यात्। युक्तं च तत्। 'स तेजसि सूर्ये सम्पन्नः' इति सूर्यं प्राप्तस्य प्रारब्धकर्ममोचनाख्यफलस्यान्यत्र श्रुतत्वात्। समाख्यायाश्च तात्पर्यलिङ्गत्वावधारणात्। अत एव ज्योतिःशब्दस्य सूर्यपरत्वात् तं प्राप्तस्य मुक्तत्वाभावेन मुक्तस्य च भोगभोक्तृत्वाभावेन यो भोगभोक्ता स मुक्तः इत्युक्तमयुक्तमित्युत्थानात् सङ्गतेरिवान्यत्र तदभावात्।

पूर्वपक्षः

अत्र यद्यपि ज्योतिःप्राप्य भोगभोक्तुर्मुक्तत्वसमर्थनादित्येव वक्तुं युक्तम्। अध्यायसङ्गत्यादेः साक्षादेव लाभात्। तथाऽपि सूत्रानुसाराद् अन्यथोक्तम्। अत एव मुक्तप्राप्यस्येत्यस्य भोगभोक्तृप्राप्यस्येति व्याख्यायते। तथा च

'पूर्वार्धोक्तं तु यज्ज्योतिर्न ब्रह्माऽदित्य एव तत्।
तत्प्राप्तस्य तु भोगोक्तौ मुक्तभोगो न सिद्ध्यति ॥'

इति पूर्वः पक्षः।

सिद्धान्तः

'य आत्मेत्यादिवाक्येषु ह्यारभ्याऽत्मानमेव तु।
अधीतितो न चान्यस्य ज्योतिःशब्दोऽत्र वाचकः ॥'

तथा हि। 'य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विज्ञासितव्यः', 'स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच।' (छा. ८.७.१), 'य एषोऽन्तरक्षिणि पुरुषो दृश्यते एष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्म' (छा.उ. ८.७.४) इत्यादिना, 'आत्मानमुपसङ्क्रम्य' 'परं ज्योतिरुपसम्पद्य' (छा. ८.१२.३) इति श्रूयमाणत्वात्।

तथा च 'दध्ना जुहोति' इत्यादौ जुहोतेः सामान्यशब्दत्वेऽपि 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इत्यग्निहोत्रस्य प्रकृतत्वादग्निहोत्रहोमपरतैवावसीयते यथा, तथा ज्योतिःशब्दस्याप्यात्मपरतैवावसीयते। न चोपक्रमस्थात्मशब्दोऽप्यन्यपरः। 'आत्मशब्दः परे विष्णौ नान्यत्र क्वचिदिष्यते' (ब्र.सू.भा.उ.वचनम्) इति प्रमाणविरोधात्। अन्यथा 'द्युभ्वाद्यायतनं स्वशब्दात्' (ब्र.सू. १.३.१), 'आत्मशब्दाच्च' (ब्र.सू. ३.३.१६), 'आत्मगृहीतिरितरवदुत्तरात्' (ब्र.सू. ३.३.१७) इत्यादिना द्युभ्वाद्यायतनत्वादिसाधनं न स्यात्। न चोक्तसमाख्याबलादिहोपक्रमस्थात्मशब्दोऽन्यपरोऽस्त्विति युक्तम्। आत्मशब्दमुख्यार्थत्यागेनोपक्रमबाधापत्तेः। न ह्युपक्रमात् समाख्या बलवती। ननु क्वचित्समाख्यया प्रकरणं बाध्यं दृष्टमिति चेन्न। तद्वदत्र समाख्याया निरवकाशत्वाभावात्। 'स

तेजसि सूर्ये सम्पन्नः' (प्र. ५.५) इत्यादिसमाख्यायाः विष्णुपरत्वे बाधकाभावेन सावकाशत्वादिति सिद्धान्तः।

पराभिमतात्माधिकरणपरीक्षा

अन्ये त्वाद्ये पादे निर्गुणविद्याफलैकदेशबन्धनिवृत्तिर्निरूपिता। द्वितीये तु सगुणनिर्गुणफलप्राप्तिशेषत्वेन तद्विदोरुत्क्रान्त्यनुत्क्रान्ती चिन्तिते। तृतीये च सगुणफलसिद्ध्युपयोगिनो गतिगन्तव्यगन्तृविशेषा निरूपिताः। इह चतुर्थे पादे निर्गुणविद्याफलैकदेशान्तरब्रह्मभावाविर्भावः, सगुणविद्याफलं सर्वेश्वरतुल्यभोगभाक्त्वं चावधारयिष्यते।

'एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' (छा.उ. ८.१२.३) इति श्रूयते। तत्र संशयः। किं देवलोकाद्युपभोगस्थानेष्विवाऽगन्तुकेन केनचिद्विशेषेणाभिनिष्पद्यते, आहोस्विदात्ममात्रेणेति। तत्र,

'प्रागभूतस्य निष्पत्तौ कर्तृत्वं न सतो यतः।
फलत्वेन प्रसिद्धेश्च मुक्तौ रूपान्तरोद्भवः॥'

प्रागभूतस्य घटादेर्भवनं निष्पत्तिर्न पुनरत्यन्तसतोऽसतो वा। नहि गगनतत्कुसुमे निष्पद्येते। स्वरूपावस्थानं चेदात्मनो मुक्तिर्न सा निष्पद्यते। तस्य गगनवत् प्रागपि सत्त्वात्। फलत्वप्रसिद्धेश्च मोक्षस्याकार्यस्य फलत्वानवकल्पनाद् आगन्तुकेन रूपेण केनचिदुत्पत्तौ स्वेनेति प्राप्तमनूद्यत इति प्राप्तेऽभिधीयते।

'सम्भवत्यर्थवत्त्वे हि नाऽनर्थक्यमुपेयते।
बन्धस्य सदसत्ताभ्यां रूपमेकं विशिष्यते॥'

अनधिगतावबोधनं हि प्रमाणं शाब्दम् अगत्या कथञ्चिदनुवादतया वर्ण्यते।

सकलसांसारिकधर्मार्पितं तु प्रसन्नमात्मरूपमप्रसन्नात् तस्मादेव रूपाद्व्यावृत्तमनधिगतमवबोधयन्नानुवादो युज्यते। न चास्य निष्पत्त्यसम्भवः। सत इव घटादेः सांव्यावहारिकेन प्रमाणेन बन्धविगमस्यापि निष्पत्तेर्लोकसिद्धत्वात्। तस्मादात्ममात्रेणाभिनिष्पद्यते मुक्त इति।

तन्न। त्वन्मते आद्यपादाभिहितस्य कर्मक्षयस्य निर्गुणविद्याफलैकदेशत्वायोगात्। नहि बन्धनिवृत्तिरेकदेशवती। कथं च प्रारब्धक्षयमपेक्षमाणा स्वफलनिवर्तये विद्या निर्गुणविद्या स्यात्? कथं चाऽगन्तुकस्य निर्गुणविद्याफलत्वम्? निःश्रेयसत्वव्याघातात्। उक्तं च पृच्छापूर्वकं सङ्क्षेपशारीरके-

'उक्तसाधनसमुद्भवा सती किं प्रयच्छति फलं मुमुक्षवे।
प्रत्यगात्ममतिरत्र मे मनस्यर्थिता समुपजायतेऽधुना॥
किं निरस्तसहकारिकारणा केवलैव फलमर्पयेन्मतिः।
बाह्यसाधनसहायसम्पदा वाऽन्विता फलविधायिनी भवेत्।
एतदप्यहमवैतुमुत्सहे निर्णयं कुरु कृपाविधेयधीः।
उच्यते न तमसो निवृत्तितः किञ्चिदस्ति परमात्मधीफलम्॥
अन्यदल्पमपि साधनान्तरं न व्यपेक्ष्य फलदायिनी च धीः।
शुक्तिकाविषयबुद्धिजन्मनः शुक्तिकागततमोनिवृत्तितः॥
नापरं किमपि दृश्यते फलं नापरं च सहकारिकारणम्।
एवमात्मनि तमोनिवृत्तितो नान्यदस्ति परमात्मधीफलम्॥
नाप्यपेक्ष्य सहकारिकारणं किञ्चिदात्ममतिरर्पयेत् फलम्॥' इत्यादि। तथा,

'जन्या न मुक्तिर्घटते कुतश्चिद्विद्याफलत्वादिति पूर्वहेतोः।
यदप्यजन्यं जगति प्रसिद्धं तत्तन्न विद्याफलमम्बरादि॥' इत्यादि।

निर्गुणविद्याफलैकदेशप्रतिपादकाद्यपादानन्तरमेव तदेकदेशब्रह्मभावाविर्भावात्मकफलप्रतिपादकस्य न्यायप्राप्तद्वितीयत्वत्यागेन चतुर्थत्वायोगात्।

निर्गुणफलस्य तदनुबद्धस्य वा प्रमेयस्येह परमुमुक्षुशास्त्रे विचार्यत्वेन सगुणफलस्य तच्छेषत्वेनोत्क्रान्तेश्च द्वितीये विचारायोगादित्युक्तत्वात्। अन्यथा कर्मफलस्य तच्छेषत्वेन धूमादिमार्गस्य च विचारापातात्। कर्मफलं धूमादि निर्गुणविद्याफलादेर्विरोधीति यदि तदा भेदवासनाजन्मभूमित्वेनानयोरपि सुतरां विरोध एव। पादभेदापत्तिश्च दुर्वारा। विजातीयप्रमेयप्रतिपादनात्। तृतीयपादश्च निर्गुणवार्तामपि न जिघ्रतीति व्यर्थ एव । अत एव चतुर्थपादप्रतिपाद्योक्तिरयुक्ता। सर्वेश्वरतुल्यभोगभात्त्वप्रतिपादनस्य सङ्गत्यदर्शनाच्च। कथञ्चित्सङ्गतिदर्शनेऽपि निर्गुणविद्याफलस्यैव निरुपचरितफलस्यभिधानेन शास्त्रस्य समापनीयत्वेऽप्यतथाभूतगौणमौक्तिकभोगेन शास्त्रसमापनायोगाच्च। ब्रह्मभावाविर्भावोऽत्र प्रतिपाद्यत इत्येतद्दुराशामात्रमिति चाग्रे विभावयिष्यते।

किञ्च बन्धनिवृत्तिर्वा स्वरूपाविर्भावो वा मुक्तिर्ज्ञानसाध्येत्युररीक्रियते न वा। आद्ये स्ववचनव्याघातः। मुक्तेरसाध्यत्वस्य भाष्यभामतीकल्पतरुग्रन्थैः पूर्वेष्वधिकरणेषु प्रतिपादनात्। असाध्यत्वे च कथं फलत्वम्? ब्रह्मरूपत्वे व्याघातश्च। अब्रह्मरूपत्वे च मिथ्यात्वापातः। सांव्यावहारिकप्रमाणजन्यत्वान्मिथ्यात्वं नानिष्टमिति चेन्न। मुमुक्षुप्रवृत्तेर्वैफल्यापातात्।

एतेन बन्धध्वंसस्य जन्यत्वाविरोधात् फलत्वं नानुपपन्नमिति निरस्तम्। किञ्च बन्धध्वंसादेर्ब्रह्मस्वरूपत्वेऽत्यन्तसत्त्वापत्त्या गगनवदजन्यत्वमेव। अब्रह्मस्वरूपत्वेऽत्यन्तासत्त्वाद्यापत्त्या गगनकुसुमादिवदजन्यत्वमेवेति कथं फलत्वम्। किञ्च त्वन्मते बन्धध्वंसादेरमिथ्यात्वाय ब्रह्मस्वरूपत्वे वक्तव्ये तस्य नित्यसिद्धतया तत्प्रतिपादकागमस्यानुवादकत्वापातः। अप्रसन्नसांसारिकधर्मव्यावृत्तेरपि प्रसन्नात्मस्वरूपत्वेन तस्य च स्वप्रकाशत्वेनानधिगतांशादर्शनात्। किञ्च मन्मत इव स्थानविशेषगतभगवद्रूपविशेषप्राप्त्यनन्तरं यथाधिकारं स्वकीयचिदानन्दाद्यात्मकशरीरभोक्तृत्वादिस्वरूपाभिनिष्पत्तिरूपमोक्षोऽभिव्यज्यत इत्यादिप्रक्रियानङ्गीकारात् 'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते'

(छा.उ. ८.१२.३) इत्यादिवाक्ये पूर्वकालविहितत्त्वाप्रत्ययविरोधः। नहि ब्रह्मभावाविर्भावरूपज्योतिःसम्पत्त्यनन्तरमपि स्वरूपाभिनिष्पत्तिर्नामास्ति। अन्यथा पुनर्भेदापातः। नच ज्योतिरुपसम्पद्येत्यस्य न ब्रह्मभावं प्राप्येत्यर्थः। 'स्वेन रूपेणाभिनिष्पद्यते' (छा.उ. ८.१२.३) इत्यनेन पौनरुक्त्यात्। किन्तु गत्वेत्यर्थ इति वाच्यम्। 'प्रतिषेधादिति चेन्न शारीरात्' (ब्र.सू. ४.२.१२) इत्याद्यधिकरणे परविद्यावतो गतिप्रतिषेधात्। 'अमृतत्वं चानुपोष्य' (ब्र.सू. ४.२.७) इत्युक्तिविरोधाच्च। सगुणब्रह्म ज्योतिःशब्दोक्तमिति चेन्न। परञ्ज्योतिरिति परशब्दविरोधात्। उक्तं च भामत्याम्- 'परत्वस्य चानपेक्षस्य ब्रह्मण्येव प्रवृत्तेः, ज्योतिषि चापरे किञ्चिदपेक्ष्य परत्वात् परञ्ज्योतिरिति वाक्यादात्मैवावगम्यते' इति।

ननु परब्रह्मत्वापत्तिरेव स्वरूपनिष्पत्तिः। त्त्वाप्रत्ययस्तु 'मुखं व्यादाय स्वपिति' इत्यादाविवोपपद्यते। मैवम्। त्त्वाप्रत्ययस्य पूर्वकालविहितस्यास्वारस्यप्रसङ्गात्। न च मुखव्यादानमेव स्वापः। व्यात्तमुखेऽपि जाग्रति स्वपितीति प्रयोगप्रसङ्गात्। 'स एनान् ब्रह्म गमयति' (छा.उ. ४.१५.६) इति गम्यत्वेनोक्तस्य वाय्वादिसाधारण्यनिरासाय 'एतं सेतुं तीर्त्वाऽन्धः सन्ननन्धो भवति' (छा. ८.४.२), 'सम्पद्य स्वेन रूपेण' (छा.उ. ८.१२.३) इत्यादिना प्रतीतस्य तदन्यस्यापि कस्यचिद्गम्यत्वस्यावश्यं निषेद्धव्यत्वेऽपि तद्विहाय स्वरूपाविर्भाव एव मुक्तिरित्यस्य सर्वाङ्गीकृतस्य प्रतिपादनाय बहूनां सूत्राणामुपयोगायोगाच्च। मद्रीत्याऽधिकरणभेदसम्भवे तदैक्यायोगाच्च।

अत्र केषाञ्चिदधिकरणशरीरं न पूर्वमताद्भिद्यत इति न पृथक् निराकृतम्।

टीकायां पूर्वपक्षीयार्थलाभरूपन्यायविवरणम्

टीकाक्षरार्थस्तु- अर्थशब्द एकार्थत्वपरः प्रयोजनपरश्च। स चाऽवृत्तः हेतुपरः साध्यपरश्चेति चेतसि कृत्वा अर्थलाभ इत्युक्तन्यायं तत्साध्यप्रदर्शनेन विवण्वत्,

'न च परञ्ज्योतिःशब्देनाऽदित्यज्योतिरित्यङ्गीकारे "स तेजसि सूर्ये सम्पन्नो यथा पादोदरस्त्वचा विनिर्मुच्यत एवं हैवं स पाप्मना विनिर्मुक्तः" (प्र. ५.५) इत्यादिनैकार्थतेति प्रयोजनम्।'

इति वाक्यं मध्ये किञ्चिदध्याहृत्य व्याचष्टे- **ज्योतिःशब्दस्याऽदित्येऽपि प्रयोगदर्शनादित्यादिना॥** तेनात्र ज्योतिःशब्दः श्रूयते। 'स तेजसि सूर्ये सम्पन्नः' (प्र. ५.५.) इति श्रुत्यन्तरे तु सूर्यशब्दः । अतः कथं समाख्ययेति चोद्यं निरस्तम्।

तेन 'सूर्यमगन्मज्योतिरुत्तमम्' इति श्रुत्यन्तरे प्रयोगादत्रापि ज्योतिःशब्द आदित्यपरः। तथा च परञ्ज्योतिःशब्देनाऽदित्याख्यज्योतिर्गृह्यत इत्यङ्गीकारे 'स तेजसि सूर्ये सम्पन्नः' (प्र. ५.५.) इत्यादिवाक्येनैकार्थतेत्युपलक्षणम्। एकवाक्यतालाभो भवतीति हेतोरत्र वाक्ये सूर्ये प्राप्त्यैव भोगाख्यं प्रयोजन-मुच्यते। 'न ब्रह्म प्राप्तस्य' इति शेष इति विवरणयोजना द्रष्टव्या।

टीकायां सिद्धान्तीयोक्तिन्यायविवरणव्याख्यानम्

उक्तिरित्युक्तन्यायं सम्बन्धिप्रदर्शनेन विवृण्वत्,

'अथ किमुच्यते परञ्ज्योतिरित्यात्मैव परञ्ज्योतिः स हि परमो द्योतते जीवाच्चाजीवाच्च तस्मादाहुः परञ्ज्योतिरिति । तमेष जीवोऽभिसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' इति तस्यैव परञ्ज्योतिष्ट्वोक्तेः । सावकाशलिङ्गान्निरव-काशश्रुतेरेवातिबलवत्त्वात्।'

इति वाक्यं व्युत्क्रमेण व्याचष्टे- **अत्र परञ्ज्योतिःशब्देनेति॥** अनेनाध्याहार्यो भागो दर्शितः। न हि प्रकरणादित्यादिः सावकाशलिङ्गादित्युत्तरार्धस्यार्थः। अनेन लिङ्गश्रुतिशब्दौ समाख्याप्रकरणपराविति सूचितम्। भाष्यव्याख्यानेनैव विवरणमपि व्याख्याति- **भवेदेतद्यदीत्यादिना॥** तत्र स्मृतिशब्दः भाष्यापेक्षया प्रयुक्त आगमपरो ध्येयः।

एवं सर्वमुक्तसाधारणभोगपरत्वादधिकरणत्रयमेका पेटिकेति सूचयन् अधिकरणत्रयार्थमुपसंहरति- **अत इति॥**

क्रमभङ्गे कारणोक्तिः

यद्यपि परञ्ज्योतिर्ब्रह्मैवेति तत्प्राप्तो मुक्त एव भोगान् भुङ्क्ते। तदविहायैव वर्तत इत्येतदधिकरणानुसाराद्वक्तव्यम्। तथाऽपि पादसङ्गतिलाभार्थम्, आद्येऽप्यधि-करणे सामान्यतो भोगोऽपि समर्थित इति वाऽस्याधिकरणस्य प्रथमेनापि सङ्गतिरस्तीति वा सूचनाय क्रमभङ्ग इति ध्येयम्॥

॥ इति आत्माधिकरणम्॥ ३॥

॥ अथाविभागाधिकरणम् ॥ ४ ॥

सूत्रभाष्यम्

ॐ अविभागेन दृष्टत्वात् ॐ ॥ ४.४.४ ॥

ये भोगाः परमात्मना भुज्यन्ते त एव मुक्तैर्भुज्यन्ते।

'यानेवाहं शृणोमि यान् पश्यामि यान् जिघ्रामि तानेवैत इदं शरीरं विमुच्यानुभवन्ति' इति दृष्टत्वाच्चतुर्वेदशिखायाम्।

भविष्यत्पुराणे च-

'मुक्ताः प्राप्य परं विष्णुं तद्भोगाँल्लेशतः क्वचित्।
बहिष्ठान् भुञ्जते नित्यं नाऽनन्दादीन् कथञ्चन॥' इति॥ ४॥

॥ इति अविभागाधिकरणम् ॥ ४ ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र सायुज्यभाजां भगवद्भुक्तभोगभोक्तृत्वसाधनादस्ति शास्त्रादि-सङ्गतिः। अन्यथेश्वरस्य सर्वभोक्तृत्वासिद्धेः समर्थनीयमेतत्। परमात्मानं प्राप्य मुक्तो भोगान् भुङ्क्त इत्युक्तम्। प्राप्तिश्च सायुज्यादिरूपा। तत्र ते भोगा एव विषयः। किं परमात्मभुक्ता एव सायुज्यभाग्भिर्भुज्यन्ते उतान्य इति सन्देहः। उभयथाऽपि सम्भवः सन्देहबीजम्।

पूर्वपक्षः

परमात्माभुक्ता इति पूर्वः पक्षः। मोक्षस्य परमपुरुषार्थत्वेन परमात्माभुक्त-भोगानामपि सौलभ्यात्। परमात्मभुक्ता एवेति नियमे कदाचित् सञ्जात-

भोगेच्छानामपि मुक्तानां भोगाभावप्रसङ्गात्। ईश्वरस्य नित्यपूर्णानन्दत्वेन कदाचिदभोगस्यापि सम्भवात्। ततश्च मोक्षस्यापुरुषार्थत्वापत्तिः स्यात्। अतो भगवदभुक्तभोगभोक्तृत्वान्मुक्तानां न तस्य सर्वभोक्तृत्वमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **अविभागेनेति**॥ ये भोगाः परमात्मना भुज्यन्ते त एव मुक्तैर्भुज्यन्ते न तु तदभुक्ताः। तथा श्रुतेरित्यर्थः। न च परमगतित्वादेतत् कल्प्यम्। मुक्तानां परमात्मभुक्तभोगाङ्गीकारेऽपि तदुप-पत्तेः। न च कदाचिदुक्तरीत्या भोगाभावः। 'पूर्णानन्दः पूर्णभुक् पूर्णकर्ता' इतीश्वरस्य पूर्णानन्दत्वेऽपि पूर्णभोगश्रवणात्। ननु भगवद्भुक्ताशेषभोगा मुक्तैर्भुज्यन्ते केचिद्वा। आद्ये तत्साम्यापातः। न द्वितीयः। 'यानेव' इति सामान्यतः सर्वभोगश्रवणादित्यत आह- **भविष्यदिति**॥ विशेषस्मृत्या सामान्यश्रुतेः सङ्कोच इति भावः। अतो मुक्तानां भगवद्भुक्तभोगभोक्तृत्वाद् युक्तं तस्य सर्वभोक्तृत्वमिति सिद्धम्॥ ४॥ अ. ४॥

शेषतात्पर्यचन्द्रिका

ॐ अविभागेन दृष्टत्वात् ॐ ॥ ४.४.४ ॥

पेटिकासङ्गतिः

भोगसामान्यविचारात्मकत्रिसूत्र्या साधारणपेटिकया भोगो मुक्तानामस्तीति सामान्यतः सिद्धावनयाऽसाधारणपेटिकया भोगप्रकारविशेषश्चिन्त्यते। यद्वा साधकपेटिकया त्रिसूत्र्या मुक्तभोगे साधकान्युक्त्वा तत्र बाधकानि परिहर्तुमियं बाधकोद्धारपेटिकाऽऽरभ्यते। अत एवात्र सावकाशोपपत्तिमात्रान्निरवकाश-श्रुतियुक्त्योपपत्तेरेव प्रबलत्वादिति न्यायविवरणे पूर्णानन्दत्वरूपबाधकस्योद्धारः

क्रियते। तत्राप्यधिकरणचतुष्टयस्य सायुज्यभोगविषयत्वात् सायुज्यपेटिका। यद्यपीदमधिकरणं सर्वमुक्तसाधारणं प्रतीयते। तथाऽपि परमगतित्व-रूपपूर्वपक्षन्यायस्य सायुज्यभाक्षु मुख्यत्वात्तदभिमुखमेवेदमधिकरणम्। अर्थादन्यपरमपि भवतीत्यन्यदेतत्।

अनन्तरसङ्गतिः

ननु यदुक्तं मुक्तानां भोगोऽस्तीति तदयुक्तम्। तथाहि। किं भगवद्भुक्तानेव भोगान् भुञ्जत उत तदभुक्तान्। नाऽद्यः। भगवत्सामान्यापातात्। असामर्थ्य-पराहतत्वाच्च। नहि भगवद्भुक्तान् भोगानिमेऽर्वाचीना भोक्तुं शक्नुवते। कदाचिदिच्छाभावेन भगवतः पूर्णानन्दत्वादभोगस्यापि सम्भवेन मुक्तस्य भोगाभावापाताच्च। तथा च संसारसमानधर्मत्वापत्तेश्च। द्वितीये भगवतः सर्वभोक्तृत्वम् 'अविभागो वचनात्' (ब्र.सू. ४.२.१६) इति पूर्वपादोक्तं मुक्तानामस्वातन्त्र्यं च न स्यात्। नहि भगवद्भुक्तस्यापि भोगस्य भोक्तुरस्वातन्त्र्यं सम्भवति। 'यानेवाहं श्रृणोमि यान् पश्यामि यान् जिघ्रामि तानेवैत इदं शरीरमुत्सृज्यानुभवन्ति' (ब्र.सू. भा.उ. चतुर्वेदशिखाश्रुतिः) इति श्रुति-विरोधश्च। तथा च मुक्तस्य भोग एवानुपपन्नः। नहि तत्र सम्भावितप्रकारद्वयदूषणे भोगसामान्यं नाम सम्भवति। निर्विशेषस्यालीकत्वात्। यावद्विशेषाभावे सामान्याभावस्य नियतत्वाच्चेति वा। युक्तः पूर्वत्र दुर्बलसमाख्याबाधे सूर्यस्य परञ्ज्योतिःशब्दत्वत्यागः। तथाऽपीह मुक्तस्य भगवदभुक्तभोगभोक्तृत्वपक्षत्यागो न युक्तः। मुक्तेः परमगतित्वेनेश्वराभुक्तविचित्रभोगानामपि संसारेऽ-सम्भावितानामपि मुक्तावङ्गीकारे बाधकाभावात्। प्रत्युतेश्वरस्य स्वत एव पूर्णानन्दत्वेनाभोगस्यापि सम्भवान्मुक्तेरपुरुषार्थत्वप्रसङ्गः। नहि युक्तिस्तात्पर्य-लिङ्गेषु समाख्यावद् दुर्बलेति वोत्थानादनन्तरसङ्गतिः।

पूर्वपक्षः

न चैतदुभयं युक्तं दोषाणामनिवारणात्।
न चान्यस्तत्प्रकारोऽस्ति येन भोगस्य सम्भवः।
यावद्विशेषबाधे तु भोगसामान्यमेव नो॥

इति पूर्वः पक्षः।

सिद्धान्तः

यानेवेति श्रुतेर्भुक्तभोग एवेष्यते न च।
कदाचिद्भोगहानिः स्यादीशेच्छा कल्प्यते यतः।
पूर्णानन्दः पूर्णभोक्ता तेनेशो भुङ्क्त एव सः।
न चेश्वरसमत्वं स्यादीशेच्छा स्मर्यते यतः।
मुक्ताः प्राप्य परं विष्णुं तद्भोगान् लेशतः क्वचित्।
बहिष्ठान् भुञ्जते नित्यं नाऽनन्दादीन् कथञ्चन॥' (भविष्यत्पुराणवचनम्)

इति।

एतेनासामर्थ्यदोषोऽपि परिहृतः। लेशत इत्युक्तत्वात्। न च लेशतोऽपि तत्स्वरूपभोगानुपपत्तिः। स्वरूपतो बहिष्ठान् भगवद्दत्तानानन्दादीन् भुञ्जत इत्युक्तेः। 'पूर्णानन्दः पूर्णभुक् पूर्णकर्ता' (त.प्र.उ.श्रुतिः) इत्यादेः 'यानेवाहं श्रृणोमि' (ब्र.सू.भा.उ. चतुर्वेदशिखाश्रुतिः) इत्यादेश्च श्रुतेरुपपत्तेरपि बली-यस्त्वेनाभुक्तभोगपक्षत्यागोऽपि युक्तः। न च पूर्णत्वादियुक्तिर्निरवकाशा 'पूर्णानन्दः पूर्णभुक्' (त.प्र.उ.श्रुतिः) इत्यादिनैव सावकाशत्वोक्तेरिति सिद्धान्तः।

पराभिमताविभागाधिकरणपरीक्षा

यच्चान्यैरत्रोक्तम्। यः स्वेन रूपेणाभिनिष्पद्यते स किं परस्मादात्मनः पृथगेव भवति, उताविभागेनैवावतिष्ठत इति सन्दिह्य 'स तत्र पर्येति' इत्यधिकरणाधि-

कर्तव्यनिर्देशाज्ज्योतिरुपसम्पद्येति च कर्तृकर्मनिर्देशाद्भेदेनैवावस्थानमिति प्रापय्याविभक्त एव परेणात्मना मुक्तोऽवतिष्ठते। 'तत्त्वमसि' (छा.उ. ६.८.७) 'अहं ब्रह्मास्मि' (बृ.उ. १.४.१०) 'यत्र नान्यत् पश्यति' (छा.उ. ७.२४.१) 'न तु तद् द्वितीयमस्ति। ततोऽन्यद्विभक्तं यत्पश्येत्' (बृ.उ. ४.३.२३) 'यथोदकं शुद्धे शुद्धं तादृगेव भवति' (कठ. ४.१५) इत्यादिषु मुक्तस्वरूपनिरूपणवाक्येषु तथा दर्शनादित्यविभागेन दृष्टत्वादित्यनेन सूत्रेण सिद्धान्तयिष्यत इति।

तन्न। उदाहृतानां वचनानामन्यत्रान्यथा व्याख्यातत्वेनाभेदपरत्वायोगात्। अन्यथा तादृगेव भवतीत्येवकारविरोधः। आरम्भणाद्यधिकरणेषु ब्रह्माभेदस्य समर्थितत्वेनेह संशयायोगाच्च। अधिकरणाधिकर्तव्यकर्तृकर्मनिर्देशश्च न समाहित एव। 'स भगवः कस्मिन् प्रतिष्ठित इति स्वे महिम्नि' (छा. ७.२४.१) इति। 'आत्मरतिरात्मक्रीडः' (छा. ७.२५.२) इत्यादिभेदव्यपदेशवदुपपत्तिरिति चेन्न। प्रतिबन्द्या अनुत्तरत्वात्। भेदप्रतिनिधिना विशेषेण निर्वाहेऽपि निर्विशेष-ब्रह्मवादिनस्तव मतेऽनिर्वाहाच्च। मुख्यत्वसम्भवेनौपचारिकत्वायोगाच्च। एतेन 'मनसैतान् कामान् पश्यन् रमते' (छा. ८.१२.५) 'य एते ब्रह्मलोके' (छा. ८.१३.१) इति ब्रह्मसम्बन्धादिलिङ्गान्निर्गुणप्रकरणगतस्यापि 'स तत्र पर्येति' (छा. ८.१२.३) इत्यादिफलवाक्यस्य सगुणविद्यासूत्कर्ष इति (वेदान्त-कल्पतरुः) व्यासाश्रमोक्तं निरस्तम्। एवं वाक्यान्तरस्याप्युत्कर्षे निर्गुणप्रकरण-स्यैवाभावापत्तेः। अपहतपाप्मत्वादीनामप्युत्कर्षेऽन्तराधिकरणविरोधाच्च। अद्वैतागमानां प्रबलप्रत्यक्षादिविरोधेन स्वार्थे तात्पर्याभावस्योक्तत्वाच्च।

रामानुजीयाविभागाधिकरणपरीक्षा

एतेन किमयं मुक्तः प्रत्यगात्मा परं ब्रह्म स्वात्मनो विभक्तमनुभवति उताविभागेनाहं ब्रह्मास्मीति सन्दिह्य 'निरञ्जनः परमं साम्यमुपैति' (मु.उ. ३.१.३) 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' (तै.उ. २.१),

'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः' (भ.गी. १४.२) इत्यादिश्रुति-स्मृतिभ्यो विभक्तमनुभवतीति प्राप्ते- 'सर्वं खल्विदं ब्रह्म' (छा.उ. ३.१४.१) 'ऐतदात्म्यमिदं सर्वम्' (छा.उ. ६.८.७) इत्यादिसामानाधिकरण्यैर्यथाव-स्थितपरमात्मात्मकस्वात्मनो दृष्टत्वान्मुक्तोऽहं ब्रह्मास्मीत्यविभागेनैवानुभवतीति सिद्धान्तयतां केषाञ्चिदधिकरणशरीरं निरस्तम्। प्रच्छन्नाद्वैतित्वप्रसक्तेः। तथा हि। मुक्तौ जीवात्मना ब्रह्म भिद्यते न वा। नाऽद्यः। अभेदेनानुभवायोगात्। न हि मुक्तौ भ्रान्तिरस्ति। न द्वितीयः। साधर्म्यश्रुतिस्तु परमात्मशरीरभूतस्य प्रत्यगात्मनोऽपहतपाप्मत्वादिगुणैस्तत्साधर्म्यं प्रतिपादयतीति दीपग्रन्थ-विरोधात्। शरीरशरीरितयाऽनुभव एवाभेदानुभव इत्यादिचमत्कारस्त्वप्रौढता-मावहतीत्यलं ज्ञानदरिद्रकलहेन।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु-असाधारणपेटिकात्वं सूचयन्ननधिकरणार्थमाह- **अत्रेति**॥ भगवत्प्राप्तिः सायुज्यसारूप्यसालोक्यसामीप्यरूपेण चतुर्विधा। तत्राऽऽद्यायां देवा एवाधिकारिण इति सैवाधिका। तत एव तस्यां विचारितायां सर्वा अपि समानन्यायतया विचारिता एवेत्यादि सूचयितुं सायुज्यभाजामित्युक्तम्। न तु तदीयभोग एवात्र विचार्यत इति ज्ञापयितुम्। तथा सत्यन्यथेश्वरस्य सर्व-भोक्तृत्वासिद्धेरित्युक्तन्यायस्यासायुज्यभाजामपि विषये प्रवृत्तेस्तद्वाक्यमनुपपन्नं स्यात्। न ह्यसायुज्यभाजामभुक्तभोगाङ्गीकारे भगवतः सर्वभोक्तृत्वं निर्वोढुं शक्यमिति ध्येयम्। एवमग्रेऽपि।

टीकायां पूर्वपक्षीयपरागतिरूपन्यायविवरणम्

परागतिरित्युक्तन्यायं साध्यादिप्रदर्शनेन विवृण्वत्,

'न च परमगतित्वादीश्वराभुक्ता अपि भोगा मुक्तौ भवन्ति ईश्वरस्य स्वत एव पूर्णानन्दत्वादभोगस्यापि सम्भवादिति वाच्यम्।'

इति वाक्यमाकाङ्क्षाक्रमेण व्याचष्टे- **परमात्माभुक्ता इति पूर्वः पक्ष इति ॥** अनेनेश्वराभुक्ता अपि भोगा मुक्तौ भवन्तीत्येतदुक्तार्थम् । मोक्षस्य परम-पुरुषार्थत्वेनेत्यनेन परमगतित्वादित्येतस्य साक्षाद्धेतुत्वासम्भवात् 'परमात्माभुक्त-भोगानामपि सौलभ्यात्' इत्येतदध्याहृतम् । एवं पूर्वार्धं स्वपक्षसाधकपरतया व्याख्याय परपक्षबाधकोद्भावनपरतयोत्तरार्धं विवक्षिताध्याहारेण व्याचष्टे- **परमात्मभुक्ता एवेति नियमपक्ष इति ॥** तेनेश्वरस्येत्यतः पूर्वं परमात्मभुक्ता एवेति नियमपक्षे कदाचित्सञ्जातभोगेच्छानामपि मुक्तानां भोगाभावप्रसङ्गादि-त्यध्याहार्यं विवरणं योज्यमिति सूचितम् ।

टीकायाम् आश्चर्यतेति सिद्धान्तन्यायविवरणव्याख्यानम्

आश्चर्यतेत्युक्तन्यायं साक्षाद्धेतुत्वासम्भवेन तदुपलक्षितन्यायान्तरं च विवृण्वत्,

'पूर्णानन्दः पूर्णभुक् पूर्णकर्ता पूर्णज्ञानः पूर्णभाः पूर्णशक्तिः ।
आश्चर्यत्वाद्भगवान् वासुदेवो विरुद्धशक्तिर्न च दोषस्पृगीशः ॥

इत्याश्चर्यतयैव ब्रह्मण उभयोक्तेः सावकाशोपपत्तिमात्रान्निरवकाश-श्रुतियुक्तोपपत्तेरेव प्रबलत्त्वात् ।'

इति वाक्यं परागतिरित्युक्तोपपत्तेः सावकाशत्वप्रदर्शनपरतयाऽवतार्य व्याचष्टे- **न च परमगतित्वादित्यादिना ॥** पूर्णानन्दत्वेऽपि पूर्णभुक्त्वश्रवणादित्यनेन ब्रह्मण उभयोक्तेरित्यस्यार्थ उक्तः । निरवकाशयुक्तिमात्रस्य प्राबल्ये किमु श्रुतियुक्तोपपत्तेरित्येवार्थः ।

सूत्रार्थः

सूत्रार्थस्तु- विभागः भगवद्भुक्ताद्विभागः । न विभागः **अविभागः** । **तेन** भगवद्भुक्ताविभागेनैव भोगो मुक्तस्येति शेषः । 'यानेव' (चतुर्वेदशिखाश्रुतिः) इत्यादिश्रुतौ तथा **दृष्टत्वात्** इति ॥ ४ ॥

॥ इति अविभागाधिकरणम् ॥ ४ ॥

॥ अथ ब्राह्माधिकरणम् (चितिमात्राधिकरणम्) ॥ ५ ॥

सूत्रभाष्यम्

ॐ ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॐ ॥ ४.४.५ ॥

सर्वदेहपरित्यागेन मुक्ताः सन्तो ब्राह्मेणैव देहेन भोगान् भुञ्जत इति जैमिनिर्मन्यते ।

'स वा एष ब्रह्मनिष्ठ इदं शरीरं मर्त्यमतिसृज्य ब्रह्माभिसम्पद्य ब्रह्मणा पश्यति ब्रह्मणा शृणोति ब्रह्मणैवेदं सर्वमनुभवति' इति माध्यन्दिनायनश्रुतावुप-न्यासात् ।

'आदत्ते हरिहस्तेन हरिदृष्ट्यैव पश्यति ।
गच्छेच्च हरिपा(दाभ्यां)देन मुक्तस्यैषा स्थितिर्भवेत् ॥' इति स्मृतेः ॥

'गच्छामि विष्णुपादाभ्यां विष्णुदृष्ट्या च दर्शनम् ।
इत्यादि पूर्वस्मरणान्मुक्तस्यैतद् भविष्यति ॥'

इति बृहत्तन्त्रोक्तयुक्तेश्च ॥ ५ ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र ब्रह्मप्राप्तस्य मुक्तस्य भोगसमर्थनादस्ति शास्त्रादिसङ्गतिः । अन्यथा मुक्तेरपुरुषार्थत्वप्रसङ्गात् समर्थनीयं तत् । भोगो विषयः । मुक्तानां युक्तो न वेति सन्देहः । विप्रतिपत्तिः सन्देहबीजम् ।

पूर्वपक्षः

न युक्त इति पूर्वः पक्षः । तथाहि । किं मुक्तानां देहोऽस्ति न वा । नाऽद्यः ।

तेषां संसारपारङ्गतत्वेन शरीरानुपपत्तेः। अन्यथा मुक्तत्वस्यैवायोगात्। न द्वितीयः। शरीराभावे भोगासम्भवात्। अतो मुक्तौ भोगासम्भवादपुरुषार्थत्वमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **ब्राह्मेणेति** ॥ युज्यते मुक्तस्य भोगः। न चोक्तविकल्पः। देहाभावाभ्युपगमात्। सर्वदेहपरित्यागेनैव मुक्तत्वात्। न चोक्तदोषः। मुक्तस्य स्वदेहाभावेऽपि परमात्मानं प्रविष्टस्य तद्देहेनैव ग्रहवद् भोगसम्भवादिति जैमिनिराचार्यो मन्यत इति भावः। कुत एतत्? श्रुतेरेवेत्याह- **स इति** ॥ नन्वत्र मुक्तस्य भोगो ब्रह्मणा श्रूयते न पुनस्तद्देहेनेत्यत आह- **आदत्त इति** ॥ ननु स्वयं देहविधुरस्य कथमन्यदेहेन भोगो युज्यते। प्रलयादावभावादित्यत आह- **गच्छामीति** ॥ ५ ॥

सूत्रभाष्यम्

ॐ चितिमात्रेण तदात्मकत्वादित्यौडुलोमिः ॐ ॥ ४.४.६ ॥

चितिमात्रो देहो मुक्तानां पृथग्विद्यते तेन भुञ्जते। सर्वं वा एतदचित् परित्यज्य चिन्मात्र एवैष भवति चिन्मात्र एवावतिष्ठते तामेतां मुक्तिरित्याचक्षते' इत्युद्दालकश्रुतेश्चिदात्मकत्वादित्यौडुलोमिर्मन्यते॥ ६ ॥

तत्त्वप्रकाशिका

एवं देहाभावमभ्युपगम्य भोगं समर्थ्य तद्भावमभ्युपगम्यापि तं समर्थयत् सूत्रं पठित्वा व्याचष्टे- **चितीति** ॥ न मुक्तानां भोगासम्भवः। तेषां ब्रह्मदेहातिरिक्तस्वदेहसद्भावात्। न च देहसद्भावे मुक्तत्वाभाव इति वाच्यम्। तद्देहस्य चितिमात्रत्वात्। देहस्य चितिमात्रत्वेऽपि कुतः संसारित्वाभावः। चितिमात्रस्य मुक्तस्वरूपत्वात्। कृत्रिमशरीरस्यैव संसारापादकत्वात्। स्वरूपस्याकृत्रिमत्वात्। जीवस्य चिन्मात्रत्वमेव कुतः। श्रुतेरेवेत्यौडुलोमिराचार्यो मन्यत इति भावः॥ ६ ॥

सूत्रभाष्यम्

ॐ एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः ॐ
॥ ४.४.७ ॥

'स वा एष एतस्मान्मर्त्याद् विमुक्तश्चिन्मात्रीभवत्यथ तेनैव रूपेणाभिपश्यत्यभिशृणोत्यभिमनुतेऽभिविजानाति तामाहुर्मुक्तिः' इति सौपर्णश्रुतौ चिन्मात्रेणाप्युपन्यासाज्जैमिन्युक्तस्य च भावादुभयत्राप्यविरोधं बादरायणो मन्यते। नारायणाध्यात्मे च-

'मर्त्यं देहं परित्यज्य चितिमात्रात्मदेहिनः।
चितिमात्रेन्द्रियाश्चैव प्रविष्टा विष्णुमव्ययम्॥
तदङ्गानुगृहीतैश्च स्वाङ्गैरेव प्रवर्तनम्।
कुर्वन्ति भुञ्जते भोगांस्तदन्तर्बहिरेव वा।
यथेष्टं परिवर्तन्ते तस्यैवानुग्रहेरिताः॥' इति॥ ७ ॥

॥ इति चितिमात्राधिकरणम् (ब्राह्माधिकरणम्) ॥ ५ ॥

तत्त्वप्रकाशिका

नैतौ परिहारावुपपन्नौ देहभावाभावयोर्विरुद्धत्वाद् वस्तुविकल्पासम्भवादित्याशङ्कां परिहरत् सूत्रमुपन्यस्य व्याचष्टे- **एवमपीति** ॥ नैतयोः पक्षयोर्विरोधोऽस्ति। औडुलोमिनोक्तस्य चिन्मात्रेण भोगस्य जैमिन्युक्तस्य च ब्राह्मेण देहेन भोगस्य प्रामाणिकत्वात्। प्रामाणिके च विरोधाभावात्।

न चौडुलोमिमते प्रमाणाभावोऽनुक्तत्वादिति वाच्यम्। 'स वा एषः' इति श्रुतौ तदुपन्यासादिति भगवान् बादरायणो मन्यत इति भावः। अविरोधप्रकारं स्मृत्या दर्शयति- नारायणेति ॥ अतो मुक्तौ भोगसम्भवाद् युक्तं पुरुषार्थत्वमिति सिद्धम्॥ ७॥ अ. ९॥

शेषतात्पर्यचन्द्रिका

ॐ ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॐ ॥ ४.४.९ ॥

सङ्गतिः

अत्र सायुज्यभाजां भोगे बाधकान्तरं परिह्रियत इति पेटिकासङ्गतिः। अनन्तरसङ्गतिस्तु- ननु पूर्णानन्दत्वयुक्तेः सावकाशत्वादस्तु बाधकाभावः। पारङ्गतत्वयुक्तिस्तु निरवकाशा कथं बाधितव्येत्युत्थानाद्वा। यथा पूर्णानन्दत्वयुक्तिः सावकाशेति भोगानुपपत्तिः एवं पारङ्गतत्वयुक्तिरपीत्यतिदेशनाद्वा ज्ञातव्या। एतेन प्रकारविशेषचिन्तापरायामस्यां पेटिकायां बाधकोद्धारपरस्यास्याधिकरणस्य निवेशो न युक्तः। किन्तु सङ्कल्पादेवेत्यादेरेवात्र निवेशो युक्त इति चोद्यं निरस्तम्। प्रकारविशेषचिन्तापेटिकात्वपक्षेऽपि ब्राह्मेणेति सौत्रतृतीयानिर्देशेन पूर्वत्रेवेहापि प्रकारविशेषचिन्तापर्यवसानाङ्गीकारात्।

संशयपूर्वपक्षौ

अत एवात्र सायुज्यभाजां भोगो विषयः। युक्तो न वेति सन्देहः।

शरीरतदभावाभ्यां मुक्तभोगो न युज्यते।
संसारिसाम्याद्यापत्तेः पारगत्वान्न चेष्टता।

न चेदं पारङ्गतत्वं कथञ्चित् पूर्ववदन्यथयितुं शक्यम्। येन पूर्णानन्दत्वयुक्तिवद् बाध्येत। न च पूर्णानन्दत्वपूर्णभोगयोः सामानाधिकरण्यघटक-

श्रुतिवदिह पारङ्गतत्वसशरीरत्वयोः सामानाधिकरण्यघटकं किञ्चिदस्ति। तथा च 'यदि मुक्तः शरीरवान् स्यात् संसारपारङ्गतो न स्यात् संसारिजीववत्' इति युक्तेर्निरवकाशत्वेन प्राबल्यम्। न च संसारपारङ्गतत्वाभावे कृत्रिमशरीरवत्त्वमेव प्रयोजकमिति वाच्यम्। विनिगमनाभावादिति पूर्वः पक्षः।

सिद्धान्तः

सिद्धान्तस्तु-

पक्षद्वयेऽपि नैवास्ति दोषः श्रुत्यादिमानतः।
न हि श्रुतिप्रतीतस्य विरोधः पूर्ववद्भवेत्॥

यथा पूर्वत्र 'पूर्णानन्दः पूर्णभुक् पूर्णकर्ता' इति श्रुत्यैकत्र प्रतीतयोः पूर्णानन्द-पूर्णभोगयोर्न विरोधस्तथेहापि सशरीरत्वपारङ्गतत्वयोश्च 'स वा एष ब्रह्मनिष्ठ इदं शरीरं मर्त्यमतिसृज्य ब्रह्माभिसम्पद्य ब्रह्मणा पश्यति ब्रह्मणा शृणोति ब्रह्मणैवेदं सर्वमनुभवति।' (माध्यन्दिनायनश्रुतिः), 'आदत्ते हरिहस्तेन हरिदृष्ट्यैव पश्यति। गच्छेच्च हरिपादेन मुक्तस्यैषा स्थितिर्भवेत्।' (ब्र.सू.भा.उ. स्मृतिः), 'गच्छामि विष्णुपादाभ्यां विष्णुदृष्ट्या च दर्शनम्' (ब्र.सू.भा.उ. बृहत्तन्त्र-वचनम्) 'सर्वं वा एतदचित्परित्यज्य चिन्मात्र एवैष भवति। चिन्मात्र एवावतिष्ठते तामेतां मुक्तिरित्याचक्षते' (ब्र.सू.भा.उ. उद्दालकश्रुतिः) 'स वा एष एतस्मान्मर्त्याद्विमुक्तश्चिन्मात्रीभवत्यथ तेनैव रूपेणाभिपश्यत्यभिशृणोत्यभिमनुतेऽभिजानाति तामाहुर्मुक्तिः' (ब्र.सू.भा.उ. सौपर्णश्रुतिः) इति। 'अथ विमुक्तस्य चिन्मात्र एव देहो भवति चिन्मात्राणि करणानि तैरीशानुगृहीतैर्भोगान् भुङ्क्ते।' (न्या.वि.उ. श्रुतिः)

'मर्त्यं देहं परित्यज्य चितिमात्रात्मदेहिनः।
चितिमात्रेन्द्रियाश्चैव प्रविष्टा विष्णुमव्ययम्॥

तदङ्गानुगृहीतैश्च स्वाङ्गैरेव प्रवर्तनम्।
कुर्वन्ति भुञ्जते भोगान् तदन्तर्बहिरेव वा।
यथेष्टं परिवर्तन्ते तस्यैवानुग्रहेरिताः ॥'

(ब्र.सू.भा.उ. नारायणाध्यात्मवचनम्)

इत्यादिप्रमाणेनैवैकत्र प्रतीतयोर्न विरोधः। नहि प्रामाणिके विरोधोऽस्ति। ननु स्वयं देहविधुरस्य कथमन्यदेहेन भोगो युज्यते। अन्यथा प्रलये भगवद्देहेनैव प्रलीनानां भोगापत्तिरिति चेन्न। मुक्तः परदेहेनापि भुङ्क्ते हरिपादाभ्यां गच्छामीत्याद्यनुसन्धानवत्त्वात्। नहि मिथ्यानुसन्धानवान् मुक्तो भवति। न चेदमसिद्धम्। 'गच्छामि विष्णुपादाभ्याम्' (ब्र.सू.भा.उ. बृहत्तन्त्रवचनम्) इत्यादिपूर्वोक्तबृहत्तन्त्रवचनसिद्धत्वात्। न च पूर्वोक्तयुक्तिविरोधः। तस्या आभासत्वात्। प्रकृते युक्तेश्च प्रमाणानुगृहीतत्वात्। प्रलीनस्य भोगाभावस्त्वनुसन्धानाभावात् सिद्धः। न च तस्यापि तत्कल्प्यं प्रमाणाभावादिति सिद्धान्तः।

परोक्तब्राह्माधिकरणशरीरम्

अन्येषां तु स्थितमेतत् 'स्वेन रूपेण' (छा. ८.३.४) इत्यत्राऽऽत्ममात्ररूपेणाभिनिष्पद्यते नाऽऽगन्तुकरूपेणेति। अधुना (तु) विशेषश्चिन्त्यते। किं मुक्तश्चितिमात्रेण ब्रह्मरूपेणाभिनिष्पद्यते उतापहतपाप्मत्वसर्वज्ञत्वादिब्रह्मरूपेणोत उभयविधेनेति संशये,

भावाभावात्मकै रूपैर्भाविकैः परमेश्वरः।
मुक्तः सम्पद्यते स्वैरित्याह स्म किल जैमिनिः॥

न च चित्स्वभावस्याऽऽत्मन अभावात्मानोऽपहहतपाप्मत्वादयो भावात्मानश्च सर्वज्ञत्वादयो धर्मा अद्वैतं निघ्नन्ति। नो खलु धर्मिणो धर्मा भिद्यन्ते। मा भूद्गवाश्ववद्धर्मधर्मिभावाभाव इत्येकः।

अनेकाकारतैकस्य नैकत्वान्नैकता भवेत्।
परस्परविरोधेन न भेदाभेदसम्भवः॥

नह्येकस्याऽऽत्मनोऽनेकधर्मसम्भवः। ते चेदात्मनो भिद्यन्ते द्वैतापत्तेरद्वैतश्रुतयो व्यावर्तेरन्। अथ न भिद्यन्ते तत एकस्मादात्मनोऽभेदान्मिथोऽपि न भिद्येरन् आत्मरूपवत्। आत्मरूपं वा भिद्येत। भिन्नेभ्योऽनन्यत्वान्नीलपीतादिरूपवत्। न च धर्मिण आत्मनो न भिद्यन्ते मिथस्तु भिद्यन्त इति साम्प्रतम्। धर्म्यभेदेन तदनन्यत्वेन तेषामप्यभेदप्रसङ्गात्। भेदे वा धर्मिणोऽपि भेदप्रसङ्गात्। भेदाभेदौ च परस्परविरोधादेकत्र न सम्भवत इत्युक्तम्। अभावरूपाणां चाद्वैताविहन्तृत्वेऽपि पाप्मादेः काल्पनिकतया तदधीननिरूपणानां तेषामपि काल्पनिकत्वमिति न तात्त्विकी तद्धर्मता श्लिष्यते। एतेन सत्यकामसर्वज्ञसर्वेश्वरत्वादयोऽप्यौपाधिका व्याख्याताः। तस्मान्निरस्तप्रपञ्चेनाव्यपदेश्येन चैतन्यमात्रात्मनाऽभिनिष्पद्यमानस्य मुक्तावात्मनोऽर्थशून्यैरेवापहतपाप्मसत्यकामादिशब्दैर्व्यपदेश इत्यन्यः पूर्वपक्ष औडुलोमेः।

सिद्धान्तस्तु-

'तदेतदतिशौण्डीर्यमौडुलोमेर्न मृष्यते।
बादरायण आचार्यो मृष्यन्नपि हि तन्मतम्॥'

'पराभिमतब्राह्माधिकरणस्य निरासः

'सत्यं तात्त्विकानन्दचैतन्यमात्र एवात्मा। अपहतपाप्मसत्यकामत्वादयश्चौपाधिकतया अतात्त्विका अपि व्यावहारिकप्रमाणोपनीततया लोकसिद्धाः, नात्यन्तासन्तः। येन तच्छब्दा राहोः शिर इतिवदवास्तवाः स्युः' इति व्याख्यातं भाष्यमेवाकुशलबुद्धीनामपि हेयतामादधदपि मूर्खतमबहुलोकैश्चिरकालं प्रवर्तितत्वात् सन्देहमपि करोतीति किञ्चिदुच्यते। मुक्तो

ब्रह्मस्वरूपेणाभिनिष्पद्यत इत्युक्तौ चिन्मात्रेणोत सर्वज्ञत्वादिनेत्यादिसंशयः कुतोऽयमापततीति प्रष्टव्यम्। न हि त्वन्मते सर्वज्ञं ब्रह्म। सर्वस्य मिथ्यात्वात्। अखण्डत्वहानेश्च।

कथं चाऽद्यं मतमद्वैताविघातकत्वेन युक्तमपि तव पूर्वः पक्षः। न चैकरसस्य ब्रह्मणोऽपहतपाप्मत्वसर्वज्ञत्वाद्यनेकधर्मात्मकता न सम्भवति। एकरसत्वव्याहतेः। अनेकेषां वा धर्माणामेकात्मता न सम्भवति। अनेकत्वव्याहतेरिति वाच्यम्। त्वत्सिद्धान्तेऽपि गुणगुणिनोरभेदाङ्गीकारणैकस्य घटस्य तद्गतरूपरसगन्धादिभिरनेकेषां च रूपादीनामेकेन घटेनाभेदेऽपि एकत्वानेकत्वयोर्व्याहत्यभावात्। भेदाभेदाश्रयणेऽपि न दोषः। विरोधस्त्वनुष्णाशीतस्पर्शादाविव निराकार्यः। अपहतपाप्मत्वादीनां प्रतियोगिनिरूपणाधीननिरूपणानां प्रतियोगिकाल्पनिकत्वनिबन्धनं काल्पनिकत्वं दुर्वारमिति कथं ब्रह्मस्वरूपत्वमिति त्वतितुच्छम्। तुच्छस्य निःस्वरूपत्वेऽपि तन्निरूपणाधीननिरूपणस्य तुच्छवैलक्षण्यस्य तात्त्विकत्वेन ब्रह्मणस्तदात्मकत्वस्वीकारात्। प्रतियोगिगतधर्माणामसत्त्वरूपादिमत्वासम्बधिकत्वद्रव्यत्वमूर्तत्वादीनामनुयोगिनि घटाद्यभावेऽदर्शनेन प्रत्युत तद्विरुद्धानां सत्त्वरूपादिशून्यत्वसम्बन्धिकत्वाद्रव्यत्वामूर्तत्वादीनां दर्शनेन च व्याप्त्यसिद्धेश्च। अपहतपाप्मत्वादीनां काल्पनिकत्वे च तच्छब्दानामर्थाभावेन 'य आत्मापहतपाप्मा' इत्यादीनां निरभिधेयत्वप्रयुक्ताप्रामाण्यं स्यात्। अपहतपाप्मत्वादयो नासन्तः, किन्तु व्यावहारिकप्रमाणोपनीताः लोकसिद्धा इति त्वत्यन्तमपेशलम्। तथाहि। लोकसिद्धा इति कोऽर्थः। यदि तात्त्विका इति तदा तात्त्विकानन्दचैतन्यमात्र एवायमात्मा तात्त्विकापहत प्मत्वादिचैतन्यमात्रोऽपीत्युभयात्मकब्रह्मस्वरूपेणाभिनिष्पद्यत इति सिद्धान्तोपपत्तावपहतपाप्मत्वादीनामौपाधिकत्वातात्त्विकत्वयोरङ्गीकारेण सिद्धान्तायोगात्। व्यावहारिकप्रमाणोपनीतत्वा-

योगाच्च। यदि व्यावहारिक इति तदा कथं नात्यन्तासत्त्वम्? व्यावहारिकसत्त्वस्याऽन्तरालिकस्यानङ्गीकारात्। अङ्गीकारे वा व्यावहारिकसद्भिरपहतपाप्मत्वादिभिर्विशिष्टब्रह्मणः 'स्वेन रूपेणाभिनिष्पद्यते' (छा.उ. ८.३.४) इति वाक्यविषयत्वायोगेन चिन्मात्रेणैव निष्पत्तेर्वक्तव्यतया 'चितिमात्रेण तदात्मकत्वात्' इत्यौडुलोमिमतस्य पूर्वपक्षत्वायोगः।

किञ्चैवमानन्दचित्यादयोऽपि ब्रह्मणो भिन्ना उताभिन्नाः। नाऽद्यः। अद्वैतहानेः। श्रुतयश्च व्याहन्येरन्। न द्वितीयः। एकरसस्य ब्रह्मणोऽनेकेषां चाऽऽनन्दचित्यादीनामभेदायोगात्। एकत्वानेकत्वव्याहतेः। न चाऽनन्दस्य चित्यादिना भेदः। धर्म्यभेदे तदनन्यत्वेन तेषामप्यभेदप्रसङ्गात्। भेदे वा धर्मिणोऽपि भेदप्रसङ्गात्। विरोधान्नापि तृतीयः। इत्यादिकण्ठकोलाहलसाम्येऽप्यपहतपाप्मत्वसत्यकामत्वसर्वज्ञत्वादीनामेव विशिष्य व्यावहारिकप्रमाणोपनीतत्वौपाधिकत्वातात्त्विकत्वादीन् स्वसिद्धान्तप्रतियोगिनः किमित्युन्मत्तवदङ्गीकरोतीति न विद्मः।

विशिष्टाद्वैतमतरीत्या ब्राह्माधिकरणशरीरम्

एतेन किं जीवस्य स्वाभाविकं रूपमपहतपाप्मत्वादिगुणकमुत चैतन्यमात्रमुतोभयमिति संशयेऽपहतपाप्मत्वादिगुणकं तत्स्वरूपमपहतपाप्मत्वादयश्च गुणा दहरविद्यायां ब्रह्मनिष्ठतया श्रुता इति ब्राह्मा उच्यन्ते। तेन ब्राह्मेणापहतपाप्मत्वादिगुणजातेनास्य प्रत्यगात्मनः स्वरूपाविर्भावो भवति। कुतः? उपन्यासादिभ्यः तेषां ब्रह्मगुणानां प्रत्यगात्मनि च 'य आत्मा अपहतपाप्मा' (छा.उ. ८.७.१) इत्यादिना प्रजापतिवाक्येनोपन्यासात्। आदिशब्दात् 'जक्षन् क्रीडन् रममाणः' (छा.उ. ८.१२.३) इत्यादि जक्षणादिवचनात्सत्यसङ्कल्पत्वाद्यवगतेरिति प्रथमः पक्षः।

चितितन्मात्रेण जीवस्य स्वरूपाविर्भावः तदात्मकत्वाद् 'विज्ञानघन एव' (बृ.उ. ४.४.१२) इति तावन्मात्रात्मकत्वावधारणात्। अपहतपाप्मेत्याद्यस्तु विकारसुखदुःखाद्यविद्यात्मकधर्मव्यावृत्तिपरा इत्यौडुलौमिमतेन द्वितीयः।

सिद्धान्तस्तु। एवमपि विज्ञानस्वरूपस्यैवापहतपाप्मत्वादिसत्यसङ्कल्पपर्यन्तं गुणत्वेनाप्युपन्यासात् पूर्वभावात् पूर्वेषामपहतपाप्मत्वादीनां सद्भावावगमात् जीवे तदुभयोरप्यविरोधं बादरायणो मन्यते। उभयश्रुत्यवगमस्येतरेतरस्य विरोधाभावादन्यतरबाधेन प्रमाणमस्तीत्यभिप्राय इति केषाञ्चिदधिकरणशरीरं निरस्तम्।

तन्निरासः

अपहतपाप्मत्वादीनां ब्राह्माणां जीवस्वरूपत्वानुपपत्तेराद्यपूर्वपक्षायोगाच्च। न च त्वन्मते श्रुत्युक्तानामपहतपाप्मत्वादीनां व्यावहारिकसत्ताऽङ्गीक्रियते। येनाविद्यकानामन्यत्र सत्त्वं न विरुद्धमिति स्यात्। न चाधिकरणभेदेनाभावभेदः। भेदे वा जैवस्य ब्राह्मत्वानुपपत्तेः ब्राह्मेणेत्यनुपपत्तिः। ब्राह्मसदृशेनेत्यर्थविवक्षायां गौण्यापत्तिः। द्वितीयपक्षेऽपि (औडुलोमिमतेऽपि)। किं चिदात्मकत्वाङ्गीकारेण प्रवर्तत उत तन्मात्रकत्वाङ्गीकारेण। नाऽद्यः। पूर्वमताविरोधाद् द्रव्यस्यैव गन्धवत्त्ववच्चित एव जीवस्यापहतपाप्मत्वाद्युपपत्तेः। चिदिति तन्मात्रेणेति सूत्रविरोधाच्च। न द्वितीयः। 'एवं वा अरे अयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव' (बृ. ४.५.१३) इत्यादावात्मत्वानन्तरत्वाबाह्यत्वादिगुणानां श्रवणात्। न चान्तरबाह्यादिव्यावृत्तिमात्रं बोध्यते। नत्वनन्तरत्वादयो धर्माः। एवमपहतपाप्मादिवाक्येऽपीति न विरोध इति वाच्यम्। इतरव्यावृत्तेरपि धर्मत्वात्। तदात्मकत्वादिति सूत्रविरोधाच्च। तावन्मात्रात्मकत्वादिति व्याख्यानं त्वक्षरानारूढमित्युपेक्षणीयमेव। चिन्मात्रात्मकत्वपक्षस्वीकारे पूर्वोक्तयोरुभयोः पक्षयोरविरोधव्युत्पादना-

योगाच्च। न हि चिन्मात्रात्मकस्य जीवस्यापहतपाप्मत्वादिकमपि विरुद्धं भवति। अत एव त्वद्भाष्ये- 'कृत्स्नोऽप्यात्मा जडव्यावृत्तस्वप्रकाशो नान्यायत्तप्रकाशः स्वल्पोऽपि प्रदेशोऽस्ति। न चैवं प्रत्यगात्मनो धर्मिस्वरूपस्य कृत्स्नस्य विज्ञानघनत्वेऽप्यपहतपाप्मत्वसत्यसङ्कल्पत्वादिधर्मसम्बन्धो वाक्यान्तरावगतो विरुध्यते। यथा सैन्धवघनस्य कृत्स्नस्य रसघनत्वे रसनेन्द्रियावगते चक्षुराद्यवगताः रूपकाठिण्यादयो न विरुद्ध्यन्त इत्यादिना एवमप्युपन्यासात् पूर्वभावादविरोधमिति सूत्रांशो व्याख्यातः। चैतन्यमात्रात्मकत्वस्यौडुलोमिमतत्वे एवमपीत्यंशस्य तन्मताङ्गीकारज्ञापकस्यैवं व्याख्यानुपपत्तेरिति सङ्क्षेपः।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- **ब्रह्मप्राप्तस्येति**॥ ब्रह्मसायुज्यं गतस्येत्यर्थः। एवमग्रेऽपि। तेन ब्राह्मदेहेन सारूप्यभाजां भोगोऽनुपपन्न इति निरस्तम्।

पारगत्याख्यपूर्वपक्षीयन्यायविवरणव्याख्यानम्

पारगतिरित्युक्तन्यायं साध्यप्रदर्शनेन विवृण्वत्,

'न च पारगतत्वान्मुक्तस्य चिन्मात्रदेहोऽपि नास्तीति वाच्यम्।'

इति वाक्यं व्याचष्टे- **न युक्त इति पूर्वः पक्ष इत्यादिना**॥ तेन यतश्चिन्मात्रोऽपि देहो नास्त्यतो भोगो न युक्त इति वाक्यशेषः। तथा च पारगतत्वान्मुक्तस्य देहाभावात् भोगो न युज्यते। न च जडशरीराभावेऽपि चिन्मात्रदेहोऽस्तीति वाच्यम्। मुक्तस्य चिन्मात्रदेहस्याप्यङ्गीकर्तुमशक्यत्वात्। 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति' इति श्रुत्या शरीरमात्रस्य दुःखानुषङ्गोक्तेः मुक्तत्वव्याघातादिति विवरणयोजना सूचिता।

सिद्धान्तीयाकृत्रिमताख्यन्यायविवरणव्याख्यानम्

अकृत्रिमतेत्युक्तन्यायं सम्बन्ध्यादिप्रदर्शनेन विवृण्वत्,

'अकृत्रिमत्वात् तस्य देहस्यानपगमात्। "अथ विमुक्तस्य चिन्मात्र एव देहो भवति चिन्मात्राणि करणानि तैरीशानुगृहीतैर्भोगान् भुङ्क्ते" इति श्रुतेः।'

इति वाक्यं व्याख्यातुमवतारयति- **देहस्य चितिमात्रत्वेऽपि कुतः संसारित्वाभाव इत्यादिना ॥** चितिमात्रस्य मुक्तस्वरूपत्वादित्यनेनानपगमादित्येद् व्याख्यातम्। कृत्रिमशरीरस्यैवेत्यनेनाकृत्रिमत्वात् तस्य देहस्येत्यस्यार्थ उक्तो भवति।

विवरणार्थः

तथा च देहोऽस्तीति पक्ष एव स्वीक्रियते। न च संसारित्वापत्त्या मुक्तत्वाघातः। चिन्मात्रदेहाङ्गीकारादिति बहिरेवोक्ते देहत्वाविशेषाच्चिन्मात्रदेहस्यापि कुतः संसारानापादकत्वमित्यत आह- **अकृत्रिमत्वाद् तस्य देहस्येति ॥** मुक्तभोगार्थ-मङ्गीकृतस्य प्रकृत्युपादानकत्वाभावेनाकृत्रिमत्वात्। प्रकृत्युपादानक एव हि देहः संसारमापादयति। तथा चायं मुक्तः संसारी भवति सशरीरत्वादिति प्रयोगे कृत्रिमशरीरत्वमुपाधिरिति। न चायं साधनव्यापक इत्याह- **अनपगमादिति ॥** स्वरूपानपायित्वादित्यर्थः। विमतो देहः अकृत्रिमो भवति चित्स्वरूपत्वात् स्वस्वरूपवदिति प्रयोगेण साधनाव्यापकत्वसाधनसम्भवादिति भावः। हेत्वसिद्धिपरिहाराय श्रुतिं पठति- **अथ विमुक्तस्येति ॥** चिन्मात्रशरीरसद्भावेऽपीदानीं भोगादर्शनादिति तत्राऽह- **तैरीशानुगृहीतैरिति ॥** इदानीं तादृशानुग्रहो नास्तीति भावः। इति विवरणयोजना ॥ ९ ॥

॥ इति चितिमात्राधिकरणम् (ब्राह्माधिकरणम्) ॥ ५ ॥

॥ अथ सङ्कल्पाधिकरणम् ॥ ६ ॥

सूत्रभाष्यम्

ॐ सङ्कल्पादेव च तच्छ्रुतेः ॐ ॥ ४.४.८ ॥

न तेषां भोगादिषु प्रयत्नापेक्षा।

'य यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति' (छा.उ.८-२-१) इत्यादिश्रुतेः ॥ ८ ॥

॥ इति सङ्कल्पाधिकरणम् ॥ ६ ॥

तत्त्वप्रकाशिका

सङ्कल्पादि

अत्र ब्रह्मप्राप्तस्य मुक्तस्य सङ्कल्पमात्रसाध्यभोगवत्त्वसाधनादस्ति शास्त्रादिसङ्गतिः। अन्यथा संसारसमानधर्मत्वापत्तेः साधनीयमेतत्। प्रकृतो मुक्तभोग एवात्र विषयः। किं तत्तदुपायसाध्यसाधनसाध्य उत सङ्कल्पमात्रसाध्य इति सन्देहः। लोकदृष्टिरलौकिकत्वं च सन्देहबीजम्।

पूर्वपक्षः

तत्तदुपायसाध्यसाधनसाध्य इति पूर्वः पक्षः। मुक्तस्य भगवदोकसि स्थितत्वात्। भगवदोकसि च भूम्यादिवत्तत्तदुपायसाध्यसाधनसाध्य एव भोगो भवेत्। तस्याप्योकस्त्वसाम्यात्। अन्यथा लोकविरोधापातात्। तथा च संसारसमानधर्मत्वान्मुक्तेरपुरुषार्थत्वमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रं पठित्वा व्याचष्टे- सङ्कल्पादेवेति ॥ न मुक्तानां भोगादिषु तत्तदुपायसाध्यसाधनापेक्षा किन्तु सङ्कल्पमात्रादेव तद्भोगसिद्धिः। कुतः? 'स यदि' इति श्रुतेः। श्रुतिविरोधादेवोक्तयुक्तेराभासत्वमिति भावः। चशब्दो

विपक्षनिवृत्त्यर्थतया व्याख्यातः । न चैवं सति लोकविरोधः । निर्दोषे भगवदोकसि तथात्वस्यैव युक्तत्वात् । अतो मुक्तभोगस्य सङ्कल्पमात्र-साध्यत्वाद् युक्तं मुक्तेः पुरुषार्थत्वमिति सिद्धम् ॥ ८ ॥ अ. ६ ॥

शेषतात्पर्यचन्द्रिका

॥ ॐ सङ्कल्पादेव च तच्छ्रुतेः ॐ ॥ ४.४.८ ॥

सङ्गतिः

अत्र सायुज्यभाजामनायासेनैव भोगः समर्थ्यत इति प्रकारपेटिकासङ्गतिः सायुज्यपेटिकासङ्गतिश्च । बाधकोद्धारपेटिकात्वपक्षे मुक्तानां भोगाङ्गीकारे तत्तदुपायचिकीर्षया प्रयत्नविशेषापत्त्या मुक्तत्वे व्याघात इति प्राप्तबाधकोद्धारात् प्रत्येतव्या।

ननु देहसद्भावतदभावरूपपक्षद्वयाङ्गीकारेण पूर्वाधिकरणोक्तः सिद्धान्तो न युक्तः। भोगस्य प्रसिद्धतत्तदुपायानुष्ठानसाध्यत्वात्तदनुष्ठितेश्च शरीरसाध्यत्वेन तदभावे साधनानुष्ठानाभावप्रसङ्गेन भोगाभावापातात्। न च ब्राह्मेण शरीरेण तदनुष्ठितिः। दर्शनादिरूपभोगस्य परशरीरप्रविष्टग्रहादेरिव मुक्तस्य ब्राह्मेण शरीरेणोपपत्तावपि पाकादिरूपसाधनानुष्ठितेस्तेनासम्भवात्। न हि ब्राह्म-शरीरमेकमेव स्वान्तःप्रविष्टानेकजीवानां विचित्रतत्तद्भोगसाधनान्यनेकदेशकाल-परिपाकपठितानि साधनान्यनुतिष्ठति। तस्माच्छरीरसामान्याभावपक्षो न युक्त इति पक्षद्वयावलम्बी सिद्धान्तो न युक्त इति पूर्वाधिकरणाक्षेपेणोत्थाना-दनन्तरसङ्गतिः।

पूर्वपक्षः

सायुज्यभाजो ह्युदरे हरेस्तिष्ठन्त्यतो न ते।
पाकादिसाध्यभागेन युता ओकस्थितत्वतः।

भूम्यादिलोकस्थितवत्तेन मुक्तेरनर्थता।
ओकस्त्वसाम्येऽप्येकत्र वैपरीत्यं न युज्यते॥

इति पूर्वः पक्षः।

सिद्धान्तः

सिद्धान्तस्तु-

निर्दोषौकःस्थितत्वेन भूम्यादिस्थितवन्न ते।
साधनापेक्षभोगेताः सङ्कल्पादिति च श्रुतेः ॥ इति।

टीकाक्षरार्थः

टीकायां तदोक इत्युक्तपूर्वपक्षीयन्यायविवरणव्याख्यानम्

टीकाक्षरार्थस्तु- तदोक इत्युक्तन्यायं साध्यप्रदर्शनेन विवृण्वत्,

'न च भगवदोकःस्थितत्वान्मुक्तस्य तस्याप्योकस्त्वसाम्येन तत्तदुपाय-साध्यभोगसाधनत्वं वाच्यम्।'

इति वाक्यं व्युत्क्रमेण व्याचष्टे- **तत्तदुपायसाध्यसाधनसाध्य इति पूर्वः पक्ष इत्यादिना ॥** अनेनान्तिमवाक्यमावर्तनीयम्। तत्तदुपायसाध्यभोगसाधनत्वं भोगभोक्तृत्वं मुक्तस्येत्यर्थ उक्तो भवति मुक्तस्येत्यादिना। आदिवाक्येनान्तिमं वाक्यं तस्याप्योकस्त्वसाम्येत्येनेन योजयन् पुनर्व्याचष्टे- **भगवदोकसि चेति॥** अनेन तस्य भगवदोकसः भूम्यादिनौकस्त्वसाम्येन तत्तदुपायसाध्यभोगहेतुत्वं वक्तव्यमित्यर्थप्रदर्शनेन विवृण्वन्,

अस्तदोष इत्युक्तसिद्धान्तन्यायविवरणम्

'निर्दोषत्वात्तदोकसो मुक्तस्य च सङ्कल्पादेवेति श्रुत्युक्तानुसारेणोपपत्तेः।'

इति वाक्यमवतारयति- **न चैवं सतीति ॥** तेन भगवदोकसः निर्दोषत्वाद् भूम्यादिसाम्यं न युक्तम्। न हि निर्दोषसदोषयोः साम्यं सम्भवति। तथा च

'सङ्कल्पादेव' (छा.उ. ८.२.१) इति श्रुत्युक्तानायासेनैव मुक्तस्य भोगोपपत्तेर्न पूर्वोक्तं युक्तमिति योजनीयम् ॥ ६ ॥

॥ इति सङ्कल्पाधिकरणम् ॥ ६ ॥

॥ अथानन्याधिपतित्वाधिकरणम् ॥ ७ ॥

सूत्रभाष्यम्

ॐ अत एव चानन्याधिपतिः ॐ ॥ ४.४.९ ॥

सत्यसङ्कल्पत्वादेव।

'परमोऽधिपतिस्तेषां विष्णुरेव न संशयः।
ब्रह्मादिमानुषान्तानां सर्वेषामविशेषतः ॥
ततः प्राणादिनामान्ताः सर्वेऽपि पतयः क्रमात्।
आचार्याश्चैव सर्वेऽपि यैर्ज्ञानं सुप्रतिष्ठितम्।
एतेभ्योऽन्यः पतिर्नैव मुक्तानां नात्र संशयः ॥' इति वाराहे ॥ ९ ॥

॥ इत्यनन्याधिपतित्वाधिकरणम् ॥ ७ ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र ब्रह्मप्राप्तिमतां मुक्तानां स्वाधमनियामकराहित्येन भोगसाधनादस्ति शास्त्रादिसङ्गतिः । अन्यथा मुक्तेः संसारसमानधर्मत्वप्रसङ्गात् समर्थनीयमेतत्। प्रकृतो मुक्त एवात्र विषयः । क्लृप्तपतिभ्योऽन्यपतियुक्तो न वेति सन्देहः। उभयथा सम्भवः सन्देहबीजम्।

पूर्वपक्षः

मुक्तस्याधमा अप्यधिपतयः सन्तीति पूर्वः पक्षः। तस्यापि परगृहगतत्वात् । यथा खलु राजगृहगतानामधमा अपि प्रतिहारादयो नियामका दृश्यन्ते। अन्यथा लोकविरोधात्। अतो मुक्तस्याधमनियम्यत्वान्मुक्तेः संसारसमानधर्मत्वमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य किञ्चिद् व्याचष्टे- अत एवेति ॥ चशब्दो विपक्षव्यावृत्त्यर्थः। न मुक्तः क्लृप्तपतिभ्योऽन्याधिपतियुक्तः। सत्यसङ्कल्पत्वात्। लोके स्वावरनियम्यत्वं ह्यनेपक्षितमेव भवति। तच्च मुक्तस्य सत्यसङ्कल्पत्वादेव न युज्यत इति भावः। अत्र स्मृतिं चाऽह- परम इति ॥ आचार्याश्च पतय इन्यन्वयः। अतो मुक्तस्याधमाधिपतिशून्यत्वाद् युक्तं मुक्तेः संसारवैलक्षण्यमिति सिद्धम्॥ ९ ॥ अ.७॥

शेषतात्पर्यचन्द्रिका

॥ ॐ अत एव चानन्याधिपतिः ॐ ॥ ४.४.९ ॥

सङ्गतिः पूर्वपक्षश्च

अत्रापि सायुज्यभाजामन्यनियम्यत्वानन्यनियम्यत्वादिप्रकारविशेष एवोक्तः।

परमोऽधिपतिस्तेषां विष्णुरेव न संशयः।
ब्रह्मादिमानुषान्तानां सर्वेषामविशेषतः॥
ततः प्राणादिनामान्ताः सर्वेऽपि पतयः क्रमात्।
आचार्याश्चैव सर्वेऽपि यैर्ज्ञानं सुप्रतिष्ठितम्॥

इत्यादीह चिन्त्यत इति पेटिकासङ्गतिः।

यथा लोकविरोधेऽपि श्रुतिबलात् सङ्कल्पादेव मुक्तानां भोग एवं लोकविरोधेऽपि स्वावरनियम्यत्वाभावो युक्त इत्यतिदेशनाद्वा, ननु भगवति प्रविष्टानां भोगो न युक्तः परगृहगतत्वात्। न हि परगृहगतानां भोगः सम्भवति। किञ्च मुक्तानां स्वाधमा अप्यधिपतय अङ्गीक्रियन्ते न वा। द्वितीये लोकविरोधः। राजगृहादौ प्रविष्टस्य स्वाधमाः प्रतीहारादयो नियामका दृश्यन्त इति

परगृहगतत्वाविशेषादाद्यपक्ष एव युक्तः। तथा च स्वाधमनियम्यानां तेषां सङ्कल्पमात्रेण भोगो दूरापास्त इति शङ्कनाद्वाऽनन्तरसङ्गतिः। तेन बाधकोद्धारपेटिकात्वपक्षेऽपि सङ्गतिः सुलभैव। कृतः पूर्वः पक्षः।

सिद्धान्तः

सिद्धान्तस्तु-

परमोऽधिपतिस्तेषां विष्णुरेव न संशयः।
मुक्तानां पतयो देवा देवानां च प्रजापतिः॥
तस्य विष्णुर्न चैवेदं पारावर्यं विनश्यति॥
इत्यादिवाक्यसन्दर्भान्मुक्तस्यान्याधिपो न हि।
निर्दोषत्वाच्च लोकेन विरोधो नैव दूषणम्॥ इति।

सूत्रार्थः

सूत्रार्थस्तु- अत एव इत्यावर्तनीयम्। मुक्तः निर्दोषत्वात् सत्यसङ्कल्पः। अत एव सत्यसङ्कल्पत्वादेव, अत एव 'परमोऽधिपतिस्तेषाम्' (ब्र.सू.भा.उ. वाराहवचनम्) इत्यादिवचनादेव क्लृप्तपतिभ्यः अन्याधिपतियुक्तो न भवति। तेन पूर्वोक्तसत्यसङ्कल्पत्वस्यैवाऽक्षेपेणास्य प्रवृत्तेः पुनस्तेनैवानन्याधिपतित्वसाधनमयुक्तमिति चोद्यं निरस्तम्।

परेषामनन्याधिपतित्वाधिकरणशरीरम्

यत्तूभाभ्यां हार्दविद्यायां श्रूयते 'स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति' (छा. ८.२.१) इत्यादि। तत्र संशयः। किं सङ्कल्प एव केवलः पित्रादिसमुत्थाने हेतुः, उत निमित्तान्तरसहित इति।

यत्नानपेक्षः सङ्कल्पो लोके वस्तुप्रसाधनः।
न दृष्टः सोऽत्र यत्नस्य लाघवादवधारितः॥

लोके हि कश्चिदर्थं चिकीर्षुः प्रयतते, ततः समीहते ततस्तदर्थमाप्नोतीति क्रमो दृष्टः। न त्विच्छानन्तरमेवास्येष्यमाणमुपतिष्ठते। तेन लोकवृत्तमनुरुध्यमानया श्रुत्याऽपि विदुषः तादृश एव क्रमोऽनुमन्तव्यः। सङ्कल्पादेवेत्यवधारणं तु लौकिकं यत्नगौरवमपेक्ष्य विद्याप्रभावतो विदुषः प्रयत्नलाघवात्। यल्लघु तदसत्कल्पमेव। 'विज्ञानघन एव' (बृ.उ. ४.४.१२) इतिवद् व्यवस्था भविष्यति। तथा प्रयोगः। विमताः पित्रादयः प्रयत्नादिसापेक्षसङ्कल्पजन्याः भोगसाधनत्वात् सम्मत-वदित्यादिः। एवं प्राप्तेऽभिधीयते-

पित्रादीनां समुत्थानं सङ्कल्पादेव तच्छ्रुतेः।
न चानुमानबाधोऽत्र श्रुत्या तस्यैव बाधनात्॥

प्रमाणान्तरानपेक्षा हि श्रुतिः स्वार्थं गोचरयन्ती न मानान्तरेण शक्या बाधितुम्। अनुमानमेव तु स्वोत्पादनाय मानान्तराबाधितविषयत्वं स्वसामग्रीमध्यपातेन पक्षधर्मत्वादिवदपेक्षमाणं श्रुत्या स्वसामग्रीखण्डनेन बाध्यते। अत एव नरशिरःकपालादिशौचानुमानम् आगमबाधितं नोपपद्यते। तस्मान्मुक्तानां सङ्कल्पादेव पित्राद्युपस्थानमिति साम्प्रतमित्यादि।

तन्निरासः

तन्न। त्वन्मते निष्प्रपञ्चब्रह्मभावानन्तरं पित्रादिकामनायास्तद्विषयस्य तत्साधनस्य च प्रपञ्चस्यैवाभावात् तच्चिन्तानुपपत्तेः। नैष दोषः 'इत उपरि सगुणविद्याफलप्रपञ्चः क्रियते' इति कल्पतरूक्तेरिति चेन्न। पूर्वपाद एवास्य कर्तव्यत्वात्। कुतश्चैवं प्रकरणं विच्छिद्य प्रकरणान्तरमारभ्यते। त्वदुक्तानुपपत्तेरेवेति चेन्न 'जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा' इत्यादिना प्रपञ्चश्रवणेऽपि प्रकरणाविच्छेदायापहतपाप्मत्वादीनां क्रीडादीनां च व्यावहारिकत्वकल्पनवत् पित्रादिसमुत्थानस्यापि व्यावहारिकत्वकल्पनोपपत्तेः। अन्यथा तत्रापि प्रकरणं भित्वा सगुणविद्याफलप्रपञ्चं कल्पयतु भवान्। निर्गुणविद्याफलप्रपञ्चन-

समये सगुणविद्याफलप्रपञ्चनस्य सङ्गत्यभावाच्च। 'पूर्वत्र सप्रपञ्चनिष्प्रपञ्चत्वयोर्व्यावहारिकतात्त्विकत्वाभ्यां व्यवस्थोक्ता। इह तु सङ्कल्पातिरिक्तसाधनभावाभावयोरेकत्राऽपाततो विरोधाल्लोकसिद्धपदपदार्थापेक्षया श्रुतेर्लौकिकादनुमानाद्बाध इत्याशङ्क्य पित्राद्युपस्थाने सङ्कल्पातिरिक्तसाधनभावाभावयोः व्यवस्थायाः क्रियमाणत्वात्' इति कल्पतरूक्तानन्तरसङ्गतिरस्तीति चेन्न। प्रकरणविच्छेदकत्वेनास्यानादरणीयत्वात्। अन्यथा चतुर्थपादे निर्गुणविद्याफलं विविच्यत इत्यस्य शिष्यदम्भमात्रपरत्वापातात्। अधिकरणत्रयेण विवेचनान्नैवमिति चेन्न। इत आरभ्याशास्त्रसमाप्ति सगुणविद्याफलविवेचनेनास्य पादस्य तदर्थत्वापत्तेः। अध्यायानां पादानां च प्रायिकत्वात्।

भारतीतीर्थोक्तसङ्गतिनिरासः

एतेन पूर्वाधिकरणत्रयेण विदेहमुक्तौ विचारितायां ब्रह्मलोकलक्षणायाः मुक्तेरवशिष्टत्वात्तद्विचार आपादसमाप्ति प्रवर्तत इति भारतीतीर्थोक्तं निरस्तम्। ब्रह्मलोकलक्षणाया मुक्तेरमुख्यमुक्तित्वेन तस्या उपोद्घाततया प्रागेव वक्तव्यत्वेनेहावशेषायोगेन मुख्यमुक्तेरेवावशिष्टत्वाच्च। अन्यथा पूर्वस्मिन्नधिकरणत्रयेऽपि निष्पत्तिब्रह्मापृथगवस्थानसर्वज्ञत्वादिप्रपञ्चकीर्तनात्तत्रोक्तापि मुक्तिः सगुणैवेति निर्गुणमुक्तिः पञ्चमवेदाध्यायादिप्रतिपाद्यैव स्यात्।

किञ्चायं गौणमुक्तः शरीरी न वा। आद्ये कर्मिसाम्यापत्तिः। द्वितीये भोगानुपपत्तिरित्यादिदूषणेन भोगस्यैवासिद्धौ कथं भोगसाधनसृष्टपित्रादौ साधनविशेषविचारः प्रवर्तेत। नहि मन्मत इव युवयोर्मते पूर्वाधिकरणे भोगसाधनमधिकरणार्थः। पूर्वपक्षवारणस्य सूत्रे सूचनीयत्वेन तदर्थतया सम्प्रदायपाठागतचशब्दस्थाने तुशब्दकल्पनायोगाच्च। शब्दद्वयपरित्यागेन केषाञ्चित्पाठस्त्वपपाठ एव। श्रुतेर्व्यावहारिकविषयत्वेनाप्युपपत्तेःसौत्रहेतुश्चायुक्तः।

अत एव चेति सूत्रस्य परोक्तार्थनिरासः

अत एव चावन्ध्यसङ्कल्पत्वादनन्याधिपतिर्विद्वान् भवति। नास्यान्योऽधिपतिर्भवतीत्यर्थ इति द्वितीयव्याख्यानमयुक्तम्। पूर्वमते निर्गुणमुक्तावन्यस्याधिपतेरभावेऽपि सगुणमुक्तौ तदङ्गीकारात्। तथा चेश्वरस्य वा जीवानामेव वा कस्यचिदतिसमर्थस्याधिपतेः सम्भवेन तन्निषेधायोगः। निर्गुणमुक्तपरत्वे च पूर्वसूत्रविरोध इत्युभयतःपाशा रज्जुः। द्वितीयमतेऽपीश्वराङ्गीकारादनुपपत्तिरेव। एतेनान्याधीनत्वमन्याधिपतित्वम्। तच्च कर्माधीनत्वमेव। तच्च मुक्तस्य निषेद्धुं शक्यत इति निरस्तम्। अधिपतिशब्दस्य चेतन एव प्रयोगात्। कर्मणां च गत्युपक्रमकाल एव नष्टत्वेन भोगदशायां तदप्रसक्तेश्च । भोगदशा चेदानीं विचार्यते सङ्कल्पादेव चेति पूर्वसूत्रादिति सङ्क्षेपः।

टीकाक्षरार्थः

टीकायां पूर्वपक्षीय-तदोक इत्युक्तन्यायविवरणव्याख्यानम्

टीकाक्षरार्थस्तु- तदोक इत्युक्तन्यायमेवैतदधिकरणसङ्गतत्वेन विवृण्वत्,

'न च परगृहगतत्वादस्य राजगृहगतस्येव स्वाधमा अपि कदाचिदीशते।'

इति वाक्यं व्याचष्टे- **मुक्तस्याधमा अपीत्यादिना**॥

टीकायां सिद्धान्तीयास्तदोषाख्यन्यायविवरणव्यख्यानम्

अस्तदोष इत्युक्तन्यायमेवैतत्सङ्गतत्वेन विवृण्वत्,

'निर्दोषत्वादेव मुक्तस्येश्वरस्य तत्रस्थानां च मुक्तान्तराणां राजदोषवद्दोषासम्भवाद् यथायोग्यमेव स्वीकारोपपत्तेः।

''मुक्तानां पतयो देवा देवानां च प्रजापतिः।

तस्य विष्णुर्न चैवेदं पारावर्यं विनश्यति॥'' इति च श्रुतिः।'

इति वाक्यं व्याचष्टे- **न मुक्तः क्लृप्तपतिभ्य इति**॥

अनेन परगृहगतस्य हि स्वाधमनियतत्वं त्रेधा भवति। गृहपतेरमात्यादीनां प्रजानां वा दोषेण। न तावत्प्रजानां दोषोऽस्ति मुक्तस्य निर्दोषत्वात्। न हि निर्दोषिणमपि स्वाधमो नियम्यं कुर्यात् यदि राजाऽपि निर्दोषः। कथञ्चित् सदोषश्चेत्पैशुन्यादिना भ्रान्तः तथा कुर्यात्। न चेश्वरस्य भ्रान्त्यादिदोषोऽस्ति। न च तदधममुक्ताः स्वोत्तमाधिपत्यं कामयन्ते। तेषां मुक्तान्तराणामपि निर्दोषत्वात्। अतो राजादिदोषासम्भवाद् यथायोग्यमेव नियम्यनियामकभावस्वीकारोपपत्तेः परगृहगतत्वमप्रयोजकमिति समुदायार्थः। यथायोग्यमित्युक्तमेव पारावर्यं श्रुत्या विवृणोति- **मुक्तानामिति**॥ यद्यपि भाष्योदाहृतवचनेनैव पारावर्यं शक्यम्। तथाऽपि क्वचित्कालविशेषे पारावर्यस्य विनाशेऽन्यथाभावोऽस्त्विति शङ्कानिरासायेह वचनान्तरमुदाहृतमिति ध्येयम्॥ ६॥

॥ इत्यनन्याधिपतित्वाधिकरणम्॥ ७॥

॥ अथोभयविधभोगाधिकरणम् ॥ ८ ॥

सूत्रभाष्यम्

ॐ अभावं बादरिराह ह्येवम् ॐ ॥ ४.४.१० ॥

चिन्मात्रं विनाऽन्यो देहस्तेषां न विद्यत इति बादरिः।

'अशरीरो वाव तदा भवत्यशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतो याभ्यां ह्येष उन्मथ्यते' इत्येवं कौण्ठरव्यश्रुतावाह हि॥ १०॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्रेश्वरप्राप्तानां मुक्तानां भोगानुपपत्तिनिवारणादस्ति शास्त्रादि-सङ्गतिः। भोगानुपपत्तौ मुक्तेरपुरुषार्थत्वप्रसङ्गान्निवारणीयमेतत्। प्रकृतो मुक्तभोग एवात्र विषयः। युज्यते न वेति सन्देहः। वादिविवादः सन्देह-बीजम्।

पूर्वपक्षः

न मुक्तानां भोगो युज्यत इति पूर्वः पक्षः। तथाहि। किं मुक्तानां बाह्यदेहो विद्यते न वा। आद्येऽपि तत्राभिमानोऽस्ति नवा। नेति पक्षे सुप्तस्येव भोगासम्भवः। अस्ति चेद् दुःखादिप्रसङ्गः। देहिनो दुःखादिनियमदर्शनात्। 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति' इति श्रुतेश्च। द्वितीये भोगासम्भवः। न हि शरीररहितस्य भोगो दृष्टचरः। न चिच्छरीरेण भोगोप-पत्तिः। तस्य सुप्त्यादौ विद्यमानस्यापि भोगायतनत्वादर्शनात्। न च ब्राह्मेण देहेन तदुपपत्तिः। सायुज्यभाजां कथञ्चिदुपपत्तावपि तदन्येषामनुपपत्तेः। अतः कथमपि मुक्तानां निर्दुःखभोगायोगादपुरुषार्थत्वं मुक्तेरिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रं व्याचष्टे- **अभावमिति** ॥ युक्त एव मुक्तानां भोगः। न चोक्तविकल्पावकाशः। चिन्मात्रदेहं विनाऽन्यदेहाभावस्याङ्गीकारात्। तदभावेऽपि भोगसम्भवादिति बादरिराचार्यो मन्यत इति भावः। मुक्तस्य देहाभावः कुत इत्यत आह-अशरीर इति॥ १०॥

सूत्रभाष्यम्

ॐ भावं जैमिनिर्विकल्पाम्नानात् ॐ ॥ ४.४.११ ॥

'स वा एष एवंवित् परमभिपश्यत्यभिशृणोति ज्योतिषैव रूपेण चिता वाऽचिता वा नित्येन वाऽनित्येन वाऽथाऽनन्दी ह्येवैष भवति नानानन्दं कश्चिदुपस्पृशति' इत्यौद्दालकश्रुतौ विकल्पाम्नानादन्यदेहस्यापि भावं जैमिनिर्मन्यते॥ ११॥

तत्त्वप्रकाशिका

देहसद्भावमभ्युपगच्छत् सूत्रमुपन्यस्य व्याचष्टे- **भावमिति** ॥ चिन्मात्र-देहातिरिक्तदेहोऽपि मुक्तानां विद्यते श्रुत्युक्तत्वादेवेति जैमिनिराचार्यो मन्यत इति भावः॥ ११॥

सूत्रभाष्यम्

ॐ द्वादशाहवदुभयविधं बादरायणोऽतः ॐ ॥ ४.४.१२ ॥

यथा द्वादशाहः क्रत्वात्मकः सत्रात्मकश्च भवति। एवं मुक्तभोगो बाह्यशरीरकृतश्चिन्मात्रकृतश्च भवति' इति बादरायणो मन्यते॥ १२॥

तत्त्वप्रकाशिका

नन्वेवं मतद्वयस्य परस्परविरुद्धत्वात् किं तत्स्वमतमित्याशङ्कां परिहरत् सूत्रं पठित्वा व्याचष्टे- **द्वादशेति ॥** मुक्तानां देहभावाभावाख्यमुभयमपि स्वमतमेव। कुतः? प्रमाणवत्त्वात्। कथमुभयं विरुद्धं स्वमतमिति। मैवम्। यथा खलु द्वादशाहयागस्य क्रतुत्वं सत्रत्वं चाविरुद्धम्। यजमानेच्छयैक-यजमानत्वे क्रतुत्वस्यानेकयजमानत्वे सत्रत्वस्य सम्भवात्। एवं मुक्तेच्छया भोगार्थं देहभावाभावयोरविरोधेनोपपत्तेरिति भगवान् बादरायणो मन्यत इति भावः॥ १२॥

सूत्रभाष्यम्

उपपत्तिश्च-

ॐ तन्वभावे सन्ध्यवदुपपत्तेः ॐ ॥ ४.४.१३ ॥

सन्ध्यं स्वप्नः। 'सन्ध्यं तृतीयं स्वप्नस्थानम्' (बृ.उ.६-३-९) इति श्रुतेः ॥ १३॥

तत्त्वप्रकाशिका

भवतु देहभावाभावयोरविरोधस्तथाऽपि कथं तथात्वे भोगोपपत्तिः? अनुपपत्तेरुक्तत्वादित्यत आह- **उपपत्तिश्चेति ॥** पक्षद्वयेऽपि भोग-स्योपपत्तिरेवेत्यर्थः। कथमुपपत्तिरित्याशङ्कां परिहर्तुं देहाभावे भोगोपपत्तिं प्रतिपादयत् सूत्रं पठित्वा दुर्गमांशं सप्रमाणकं व्याचष्टे- **तन्विति ॥** न तावद् देहाभावे भोगानुपपत्तिः। यथा खलु स्वप्नावस्थायां बाह्यदेहाभिमानाभावेऽपि भोगस्तथा मुक्तौ देहाभावेऽपि भोगोपपत्तेः। अनभिमानस्याभावसाम्यात्। स्वाप्नार्थानामकल्पितत्वस्योक्तत्वादिति भावः॥ १३॥

सूत्रभाष्यम्

ॐ भावे जाग्रद्वत् ॐ ॥ ४.४.१४ ॥

ब्रह्मवैवर्ते च-

'स्वप्नस्थानां यथा भोगो विना देहेन युज्यते।
एवं मुक्तावपि भवेद् विना देहेन भोजनम्॥
स्वेच्छया वा शरीराणि तेजोरूपाणि कानिचित्।
स्वीकृत्य जागरितवद् भुक्त्वा त्यागः कदाचन॥' इति॥ १४॥

तत्त्वप्रकाशिका

देहसद्भावेऽपि सुतरां भोगोपपत्तिरिति भावेन सूत्रमुपन्यस्यति- **भाव इति ॥** यथा जाग्रदवस्थायां देहसद्भावे भोगसम्भवस्तथा मुक्तावपि देहसद्भावे भोगोपपत्तिरिति सूत्रार्थः। वक्ष्यमाणदूषणनिरासप्रस्तावायेदं सूत्रम्। प्रतिदृष्टान्तस्यापि वक्तुं शक्यत्वात् कुत एतदित्यतोऽत्र स्मृतिं चाऽह- **ब्रह्मवैवर्ते चेति** ॥ १४॥

सूत्रभाष्यम्

ॐ प्रदीपवदावेशस्तथा हि दर्शयति ॐ ॥ ४.४.१५ ॥

शरीरमनुविश्यापि तत्प्रकाशयन्तः पुण्यानेव भोगाननुभवन्ति न तु दुःखादीन्। यथा प्रदीपो दीपिकादिषु प्रविष्टस्तत्स्थं तैलाद्येव भुङ्क्ते न तु कार्ष्ण्यादि। 'तीर्णो हि तदा सर्वाञ्छोकान् हृदयस्य भवति' (बृ.उ.६-३-२२) इति हि दर्शयति॥ १५॥

तत्त्वप्रकाशिका

ननु देहसद्भावे भोगोपपत्तावपि दुःखमप्याप्यत इत्युक्तमेवेत्याशङ्कां परिहरत्

सूत्रं पठित्वा व्याचष्टे- **प्रदीपवदिति ॥** न जडशरीरप्रवेशेऽपि दुःखानुभवप्राप्तिः किन्तु साधूनेव भोगाननुभवन्ति प्रदीपवदेवेति। श्रुतिस्तु कर्मारब्धदेहविषयेति भावः। तत्प्रकाशयन्तस्तद्विवेकज्ञानवन्त इत्यर्थ इति प्रदीपदृष्टान्तग्रहणे विवक्षोच्यते। ननु देहसद्भावेऽपि कुतो मुक्तस्य दुःखाभावो दृष्टान्तमात्रस्यासाधकत्वादित्यत आह- **तीर्णो हीति ॥** देहसद्भावस्तूक्तश्रुतिसिद्धः। दुःखाभावेऽप्यस्ति श्रुतिरतो न देहमात्रं दुःखहेतुरिति सिद्ध्यतीति भावः ॥ १५ ॥

सूत्रभाष्यम्

ॐ स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि ॐ ॥४.४.१६॥

न च 'स्वर्गे लोके न भयं किञ्चनास्ति'(कठ.उ.१-१२) इत्यादिना स्वर्गादिस्थस्यैतदिति वाच्यम्। यतः सुप्तौ मोक्षे वा तदुच्यते। अत्र पिताऽपिता भवत्यनन्वागतं(भवति....वनन्वागतं) पुण्येनानन्वागतं पापेन' (बृ.उ.६-३-२२) इत्याद्याविष्कृतत्वात्। ब्रह्मवैवर्ते च-

'ज्योतिर्मयेषु देहेषु स्वेच्छया विश्वमोक्षिणः।
भुञ्जते सुसुखान्येव न दुःखादीन् कदाचन ॥
तीर्णा हि सर्वशोकांस्ते पुण्यपापादिवर्जिताः।
सर्वदोषनिवृत्तास्ते गुणमात्रस्वरूपिणः ॥' इति ॥ १६ ॥

॥ इत्युभयविधभोगाधिकरणम् ॥ ८ ॥

तत्त्वप्रकाशिका

ननु 'तीर्णो हि' इत्येतत् स्वर्गादिविषयं किं न स्याद् बाधकाभावात्। तथा च न मुक्तानामदुःखित्वे प्रमाणम्। न च वाच्यम् स्वर्गे कथं दुःखाभाव

इति। 'स्वर्गे लोके' इत्यादिना स्वर्गेऽपि दुःखाभावसिद्धेरित्याशङ्कां परिहरति- **न चेति ॥** कुतो न वाच्यमिति पृच्छति- **यत इति ॥** 'यतश्चोदेति सूर्यः' इतिवत् यतः शब्दः प्रश्ने। तत्परिहाराय सूत्रं पठित्वा व्याचष्टे- **स्वाप्ययेति ॥** यत एतद्वाक्यं सुप्तिमुक्तिविषय एव पठ्यतेऽतो न वाच्यमित्यर्थः। कुतोऽस्य सुप्त्यादिविषयतेत्यत आह- **अत्रेति ॥** अपितृत्वादिपुण्यपापाद्यसङ्गत्वादिलिङ्गश्रवणादस्य सुप्त्यादिविषयत्वं स्फुटं प्रतीयते। स्वर्गस्थस्य श्राद्धादिभोक्तुस्तदसम्भवादिति भावः। अधिकरणार्थे स्मृतिमुदाहरति- **ब्रह्मवैवर्ते चेति ॥** विश्वमोक्षिणः सर्वमुक्ताः। पुण्यपापादिवर्जिताः। सर्वदोषनिवृत्ता इत्यनुवादः। अतो मुक्तानां निर्दुःखभोगानुभवो युक्त एवेत्युपपन्नं मोक्षस्य पुरुषार्थत्वमिति सिद्धम् ॥ १६ ॥ अ. ८ ॥

शेषतात्पर्यचन्द्रिका

॥ ॐ अभावं बादरिराह ह्येवं ॐ ॥ ४.४.१० ॥

सङ्गतिः

एवमधिकरणचतुष्टयात्मकसायुज्यपेटिकया सायुज्यभाजां भोगे बाधकान्युद्धृत्य प्रकारविशेषश्चिन्तितः। इदानीमसायुज्यभाजां भोगे साधकान्युदाहृत्य प्रकारविशेषश्चिन्तनीय इत्यसायुज्यपेटिकाऽऽरभ्यते। तेन मुक्तानां देहसदसद्भावविचारस्य ब्राह्माधिकरणेन कृतत्वात्पुनरारम्भो व्यर्थ इति निरस्तम्। न च विषयभेदमात्रेण कथं पुनरारम्भ इति वाच्यम्। न्यायभेदस्यापि वक्ष्यमाणत्वात्।

अधिकरणसङ्गतिस्तु- निर्दोषत्वादेव मुक्तस्येश्वरस्य तत्रस्थानां च मुक्तान्तराणां राजवद्दोषासम्भवादनन्याधिपतित्वं मुक्तस्येत्ययुक्तम्। तथाहि। मुक्तस्य तावद्देहोऽङ्गीकार्यः। अन्यथा भोगानुपपत्तेः। न च ब्राह्मेण देहेन तदुपपत्तिः।

असायुज्यभाजां तदनुपपत्तेः । न च चिन्मात्रेण तदुपपत्तिः । सुप्तिप्रलयादौ विद्यमानस्यापि भोगायतनत्वादर्शनात्। न चाप्रविमुक्तस्य निर्दोषत्वसिद्ध्युत्तर-कालमेवम्। तस्यैवेहाऽऽक्षेपात्। किञ्चाभिमानस्यैव भोगनिदानतया चिन्मात्र-देहेऽभिमानाभावे पुनर्भोगानुपपत्तिः । अभिमानाङ्गीकारे मुक्तस्य दोषित्वा-पत्तिरवर्जनीयैव। न ह्याध्यात्मिकादिसकलदुःखधुरन्धरोऽभिमानस्तदा भवति। किञ्च मुक्तस्य बाह्यो देहोऽङ्गीकरणीयः । 'स वा एष विद्वान् परमभि-पश्यत्यभिशृणोति। ज्योतिषैव रूपेण चिता वाऽचिता वा नित्येन वाऽनित्येन वाऽथाऽनन्दी ह्येष भवति' (ब्र.सू.भा.उ. औद्दालकश्रुतिः) इति श्रुत्या जडशरीरस्याप्यवगमात्। तथा च कथं निर्दोषित्वम्। न च जडशरीरसद्भावो न दोषः । अशेषदुःखानां तदनुबन्धित्वदर्शनात् । 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति' (छा.उ. ८.२.१) इत्यादिश्रुतेश्च । न च तत्राभिमानाभावान्न दुःखप्राप्तिः। अभिमानस्यैव दुःखनिदानत्वात्। शरीरमात्रस्य सुप्त्यादावपि सद्भावात् । तथा च कथं देहमात्रसद्भावो दोष इति वाच्यम् । जडदेहसद्भावे तत्राभिमानस्याप्यवर्जनीयत्वात्। अन्यथा तदङ्गीकारो व्यर्थः स्यात् केवलशरीरेण भोगसाधनानुपपत्तेः। तस्मात्सर्वथा मुक्तस्य दोषित्वमेवेति राजगृह-प्रविष्टवदन्याधिपतित्वमेवेत्यत एव चानन्याधिपतिरित्युक्तमयुक्तमिति पूर्वाक्षेपेणोत्थानात् ।

एतेन ब्राह्माधिकरणानन्तर्यं तच्छेषता वाऽस्य युक्तेति निरस्तम् । उक्त-रीत्याऽनन्याधिपतित्वाक्षेपेणेह प्रवर्तनात्।

पूर्वपक्षः

देहस्य चाभिमानस्य भावाभावविकल्पने।
दोषोपलम्भान्मुक्तस्य न भोगो नाम युज्यते ॥

सिद्धान्तः

सिद्धान्तस्तु-

पक्षद्वयेऽपि दोषो न दृश्यते श्रुतिमानतः।
आत्मवाक्याच्च तेनायं मुक्तभोगस्तु युज्यते ॥

तथाहि। मुक्तस्य शरीरमेव नास्तीति पक्षस्तावन्न क्षोधक्षमः। 'अशरीरो वाव तदा भवत्यशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतो याभ्यां ह्येष उन्मथ्यते' (ब्र.सू.भा.उ. कौण्ठरव्यश्रुतिः) इति श्रुतेः। न च भोगानुपपत्तिः। चिन्मात्रदेहेन तदुपपत्तेः। न च जडदेहाभावे भोगः क्वापि न दृष्ट इति वाच्यम्। स्वप्नावस्थायां दर्शनात्। न च बाह्यो देहः तत्राप्यस्तीति वाच्यम्। अभिमानसहितस्यैव देह-स्यान्वयव्यतिरेकाभ्यां भोगहेतुत्वावधारणेन विशिष्टाभावस्य तत्रापि सत्त्वात्। विशेष्यसत्त्वमात्रस्याप्रयोजकत्वात्। अनभिमानस्यैव देहाभावतुल्यत्वात्। तथा मुक्तिदशायामुभयाभावप्रयुक्तविशिष्टाभावेऽपि भोगसद्भावे बाधकाभावात्।

तथा सशरीरत्वपक्षोऽप्यक्षत एव। देहसद्भावे सुतरां भोगस्य युक्तत्वात्। न चाभिमानसहितदेहस्यैव भोगप्रयोजकत्वान्मुक्तस्याभिमानाभावात् पुनर्भोगानुपपत्तिः। यथोक्तम्- 'मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः' (भ.गी. २.१४) इतीति वाच्यम्। जडदेहे मुक्तस्याभिमानाङ्गीकारात् देहसद्भावे तदभिमानस्याप्यवर्जनीयत्वात् । न च सुप्तवदभिमानाभावः किं न स्यादिति वाच्यम्। तत्प्रयोजकनिद्रादेरभावात्। अन्यथा सुखानुभवोऽपि न स्यादिति जड-देहाङ्गीकारो विफलः स्यात्। अन्तःकरणपरिणामस्यैवाभिमानस्य दोषत्वात्। अभिमानो हि देहात्मनोः स्फुटतरभेदज्ञानं निरुन्धन् क्लेशपरम्पराप्रापको भवेत्। नान्यथा। न चासौ मुक्ते संसारमापादयितुं शक्नोति। स्फुटतरभेदज्ञानराहित्या-भावात् । न हि स्वयोग्यतत्त्वज्ञानपूर्णे मुक्तेऽज्ञानं सम्भवति । देहात्म-विवेकज्ञानवत्त्वाच्च तस्य। ननु न युक्तोऽयमङ्गीकारः। दुःखानुभवस्यापि प्राप्तेः।

सुखानुभवसामग्र्या इव दुःखानुभवसामग्र्या अपि पुष्कलत्वादन्यथा संसारिणोऽपि दुःखानुभवो न स्यात्। मैवम्। वस्तुस्वभाववैलक्षण्याङ्गीकारात्। न हि घटः जलाहरणक्रियासमर्थ इत्येतावता कुण्डादिरपि तथा भवति। न वा दह्यमानगृहान्तर्गतोऽग्निस्तम्भविद्यो न दह्यत इत्येतावताऽन्योऽपि तथा न दह्यते। प्रकृतेऽपि विवेकज्ञानाज्ञानसुखदुःखसद्भावाभ्यामेव सुखदुःखभोगवैलक्षण्योपपत्तेः। दृष्टं चैतत्प्रदीपादौ। प्रदीपो हि दीपिकादिषु प्रविष्टस्तत्स्थं तैलाद्येव भुङ्क्ते न तत्कार्ष्ण्यादि। 'तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवति' (बृ.उ. ६.३.२२) इति श्रुतेश्च मुक्तस्य न दुःखानुभवः शङ्कनीयः। न चेयं श्रुतिः स्वार्गिकपुरुषपरा 'स्वर्गे लोके न भयं किञ्च नास्ति' (कठ.उ. १.२) इति तत्रापि तच्छ्रवणादिति वाच्यम्। 'अत्र पिताऽपिता भवत्यनन्वागतं पुण्येनानन्वागतं पापेन' इत्यादिवाक्यशेषानुपपत्तेः। न हि स्वार्गिकः पिता भूस्थपुत्रस्यापिता भवति। तत्कृतश्राद्धादिभोक्तृत्वात्। न वा पुण्याद्यननुसृतः। 'क्षीणे पुण्ये मर्त्यलोकं विशन्ति' (भ.गी. ९.२१) इति पुण्यानुसरणस्मरणात्। तस्मान्मुक्तपरैवेयं श्रुतिः।

एतेन देहसद्भावो दुःखाभावश्चोक्तश्रुतिसिद्धः। एतदुभयान्यथानुपपत्तिरेव 'न देहमात्रं दुःखहेतुः। किन्तु विवेकरहितदेह एव' इति व्यवस्थां कल्पयिष्यतीति तत्र प्रमाणान्तरगवेषणप्रयासोऽपि निरस्तः। तस्मात् पक्षद्वयमपि युक्तमेव। अन्यथा बादरिजैमिनिपरिग्रहानुपपत्तेः। न च ब्राह्मेण शरीरेण मुक्तभोगं वदन् जैमिनिरिह कथं बाह्यशरीरमङ्गीकुर्यादिति वाच्यम्। ब्राह्मेणैवेत्यवचनात्। ब्राह्मेण बाह्येनापि शरीरेण भोगमङ्गीकुरुते जैमिनिः। बादरिस्तु चिच्छरीरेणापीत्यङ्गीकारे बाधकाभावात्। तदेवं मुक्तानां दोषाभावात्पूर्वोक्तमनन्याधिपतित्वं युक्तमिति।

परेषामुभयविधभोगाधिकरणशरीरम्

यत्तूक्तमुभाभ्यां भोगे मुक्तस्य शरीरेन्द्रियाणि सन्ति न वेति मीमांस्यते।

'अन्ययोगव्यवच्छित्या मनसेति विशेषणात्।
देहेन्द्रियवियोगः स्याद्विदुषो बादरेर्मते॥

'मनसैतान् कामान् पश्यन् रमते' (छा. ८.१२.५) 'य एते ब्रह्मलोके' (छा. ८.१३.१) इति श्रुतेः यदि मनसा शरीरेन्द्रियैश्च विहरेत् तदा मनसेति विशेषणं व्यर्थं स्यात्। न च 'स एकधा भवति त्रिधा भवति पञ्चधा सप्तधा' (छा. ७.२६.२) इत्यादिश्रुतेरेकस्याच्छेद्यस्याऽत्मनोऽनेकधाभावादयः शरीरनिबन्धना इत्यवगम्यत इति वाच्यम्। योगर्धिप्रभावजातेन मनोभेदेनैवानेकधाभावोपपत्तेः। निर्गुणायां भूमविद्यायां श्रुतस्यानेकधाभावस्य वस्तुतो घटनासम्भवात् निर्गुणविद्यास्तुतिमात्रत्वोपपत्तेश्च। असतापि गुणेनाऽत्मवपोत्खननादिना स्तुत्युपपत्तेरिति बादरिमतेनाऽद्यः पक्षः।

'शरीरेन्द्रियभेदे हि नानाभावः समञ्जसः।
न चार्थसम्भवे युक्तं स्तुतिमात्रमनर्थकम्॥'

न हि मनोमात्रभेदे तथा स्फुटतरोऽनेकधाभावः यथा शरीरेन्द्रियभेदे। अत एव सौभरेरभिविनिर्मितविविधदेहस्यापर्यायेण मान्धातृकन्याभिः पञ्चशता विहारः पौराणिकैः स्मर्यते। न चार्थसम्भवे स्तुतिमात्रमनर्थकमवकल्पते। सम्भवति चास्यार्थवत्त्वम्। यद्यपि निर्गुणायां भूमविद्यायामिदं पठ्यते। तथाऽपि तस्याः पुरस्तादनेन सगुणावस्थागतेनैश्वर्येण निर्गुणैव विद्या स्तूयते। न चान्ययोगव्यवच्छेदेनैव विशेषणमिति नियमः। अयोगव्यवच्छेदेनापि। चैत्रो धनुर्धर इति दर्शनात्। तस्मान्न देहेन्द्रियाद्यभाव इति जैमिनिमतेन द्वितीयः।

सिद्धान्तस्तु- 'मनसैतान् कामान् पश्यन्' (छा. ८.१२.५) 'स एकधा भवति' (छा. ७.२६.२) इत्यादिद्विविधश्रुत्यनुसारादनियमः।

'न चायोगव्यवच्छेदेनैवंविधेषु विशेषणमवकल्प्यते। अभिरमणमात्रस्य

पुरुषाणां मनःसंयोगेनैव सिद्धिदर्शनात् नास्ति शङ्का मनोयोगस्येति तद्व्यवच्छेदो व्यर्थः। तस्मादवर्जनीयस्य मनोयोगस्य तदन्यपरिसङ्ख्यानेनार्थवत्त्वमवकल्पते। तस्माद्वामेनाक्ष्णा पश्यतीतिवदत्रान्ययोगव्यवच्छेद एवेति।'

तन्निरासः

तन्न। सङ्कल्पादेवेति वाक्ये सङ्कल्पस्य मनोनियतत्वेन मनसः सशरीराद्यविनाभूतत्वेन पुनः संशयानुपपत्तेः। उक्तं च त्वद्भाष्येऽपि 'सङ्कल्पादेवेति श्रुतेर्मनस्तावत् सङ्कल्पसाधनं सिद्धम्' इति। न चात्र शरीरविषयेऽभ्यधिकाशङ्काऽस्ति। ननु कथं नास्ति 'मनसैतान् कामान् पश्यति' (छा. ८.१२.५) इति श्रुतौ मनो भोगसाधनत्वेवगतं न शरीरम्। मैवम्। शरीरस्यानिषेधात्। मनसः शरीरं विनाऽवस्थानान्यथानुपपत्त्या च तत्सिद्धिसम्भवात्। विशेषणानामन्ययोगव्यवच्छेदकत्वेऽपि स्वविरुद्धधर्मानेव व्यवच्छिनत्ति। न तु धर्मान्तरम्। द्रव्यत्वात्मत्वादीनामपि निषेधापातात्। यथा चैतत् तथोक्तमधस्तात्। श्रुत्यन्तरोक्तानेकधाभावान्यथानुपपत्त्या शरीरादिसिद्धेश्च। न च 'स एकधा भवति' (छा.उ. ७.२६.२) इत्यादि वाक्यं न सगुणायां सूत्रविद्यायां श्रूयते। किन्तु निर्गुणायां भूमविद्यायामेव। सगुणविद्यया मुक्तस्य भोग इदानीं विचार्यते। निर्गुणमुक्तौ भोगाभावात्। तथा चायमन्यत्रश्रुतोऽनेकधाभावः कथं सगुणमुक्तभोगे शरीरमाक्षेप्स्यतीति वाच्यम्। पूषानुमन्त्रणमन्त्रवत् 'प्राणो वा आशाया भूयान्' इत्युक्तायां सूत्रविद्यायां पूर्वस्यामुत्तरविद्याम्नातानेकधाभावस्योत्कर्षोपपत्तेः। अन्यथा निर्गुणविद्यायां तदसम्भवाद् वाक्याप्रामाण्यापातः। असताऽपि गुणेन स्तुतिर्भवत्येवेति च दुर्वचम्। अभिधेयासत्त्वस्यैव 'अग्निना सिञ्च' इत्यादौ तन्निदानत्वेन क्लृप्तत्वात्। प्रजापतेरात्मवपोत्खननादिकं नासत्। पुरुषधौरेयत्वेन तस्य तादृशसामर्थ्योपपत्तेः। तस्मादाद्यः पूर्वपक्षो मन्दः।

एवं द्वितीयोऽपि। 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छा.उ. ८.२.१) इत्यादिश्रुत्या शरीराङ्गीकारे मुक्तत्वव्याघातात्। प्रमाणाभावाच्च। 'स एकधा भवति' (छा.उ. ७.२६.२) इत्यादिश्रुतिस्तु निर्गुणविद्यागतैव। सगुणविद्यायामुत्कर्षे च न साधकमस्ति। न च निर्गुणायां मुक्तौ देहाङ्गीकारे बाधकमस्ति। न च निष्प्रपञ्चतापत्तेरेव पुरुषार्थत्वाद् देहाद्यङ्गीकारे सप्रपञ्चत्वापत्त्या पुरुषार्थत्वं न स्यादिति वाच्यम्। मूर्च्छायां पुरुषार्थत्वाभावात् तस्याः सप्रपञ्चत्वे सुषुप्तेरपि तथात्वापातेन निष्प्रपञ्चतायाः पुरुषार्थत्वस्याग्रहणात्। 'सगुणावस्थागतेनैश्वर्येण निर्गुणैव विद्या स्तूयते' इति स्ववचनविरोधाच्च। न ह्यपुरुषार्थरूपसप्रपञ्चत्वेन पुरुषार्थरूपा निर्गुणविद्या स्तोतुं शक्यते। स्तुतिर्ह्यधिकगुणेन गुणहीनस्योपमया भवति। यथा देवदत्ते राजवत्त्वमिति। उक्तं च ब्रह्मदृष्टिरुत्कर्षादित्यत्र त्वयैव। न च त्वन्मते शरीरादिसद्भावो गुणः सप्रपञ्चत्वप्राप्त्याऽपुरुषार्थत्वप्राप्तेः। प्रत्युत निर्गुणविद्याया निन्दैवानेन कृता स्याद् इति कथं स्तूयेत।

अत एव सिद्धान्तोऽप्यनुपपन्नः। दुःखस्पर्शभोगापत्त्योरपरिहारात्। न चैवं मनसैव भोग इति साम्प्रतम्। मनसोऽङ्गीकारे शरीरादेरप्यवर्जनीयत्वात्।

प्रदीपस्वाप्ययसूत्रयोः परोक्तार्थः

प्रदीपवदित्यादिसूत्रद्वयमन्येऽधिकरणान्तरं व्याचक्षते। तथाहि। 'भावं जैमिनिः' (ब्र.सू. ४.४.११) इति मुक्तस्यानेकशरीराण्युक्तानि। किं तानि निरात्मकानि निरिन्द्रियाणि च दारुयन्त्रवत् सृज्यन्ते। किं वा सात्मकान्यस्मदादिशरीरवदिति संशये, न सात्मकानि तानि। प्रादेशिकेनान्तःकरणावच्छेदेनानादिना जीवभावापन्नस्य प्रादेशिकत्वेन युगपच्छरीरान्तरान्तःप्रवेशायोगात्। न च जीवान्तरविशिष्टमेव शरीरान्तरं सृज्यत इति वाच्यम्। वैयर्थ्यात्। न हि मुक्तो व्यसनितया शरीरान्तरं सृजति किन्तु स्वभोगार्थम्। सृष्टं च शरीरं

स्वात्मनोऽन्येनाऽक्रान्तमिति कथं तेनास्य भोगः । तस्माद् यथा दारुयन्त्रं तत्प्रयोक्त्रा चेतनेनाधिष्ठितं तदिच्छामनुरुद्ध्यत एवं निर्माणशरीराण्यपि निरात्मकान्येवेति प्राप्तेऽभिधीयते-

'शरीरत्वं न जातु स्याद् भोगाधिष्ठानतां विना।
स त्रिधेति शरीरत्वमुक्तं युक्तं च तद्विभौ ॥'

मुक्तस्यानेकशरीरप्रतिपादकवचनानि शरीरत्वविशिष्टोपाधिभेद एवावकल्पन्ते। त्रिधा भवतीत्याद्युक्तनानाभावश्च नान्यथा। नहि यन्त्राणि भिन्नानि निर्माय वाहयन् यन्त्रवाहो नानात्वेन व्यपदिश्यते। भोगाधिष्ठानत्वं च शरीरत्वं नाभोगाधिष्ठानेषु यन्त्रेष्विव युज्यते । न चानधिष्ठितानि भोगायतनानि । तस्माद्विद्वान् सर्वस्य वशी सर्वस्येश्वरः सत्यसङ्कल्पः सेन्द्रियमनांसि शरीराणि निर्माय तानि च युगपदेव प्रविश्य तत्तदिन्द्रियमन्तःकरणैस्तेषु लोकेषु मुक्तो विहरतीति साम्प्रतम्।

तन्निरासः

तन्न । मुक्तसङ्कल्पसृष्टशरीरस्य सात्मकत्वनिरात्मकत्वचिन्ताया इदानीमनुपयोगात्। तवापि मते मुक्तस्य भोगसमर्थनार्थो ह्ययं पादः। ननु

'सर्गः सङ्कल्पमात्रेण तनूनां निष्प्रयोजनः।
पुंसां निरात्मिकास्वासु भोगस्यानवकल्पनात्॥'

इत्याक्षेपिकी सङ्गतिरस्तीति चेन्न । त्वन्मतेऽविद्योपहितचेतनस्यैव प्रत्यगात्मत्वेनाविद्याया व्यापकत्वेन व्यापकब्रह्माभिन्नस्य जीवस्य सर्वशरीरेषु सन्निधानाच्च तनूनां निरात्मकत्वरूपाक्षेपायोगात्।

यदत्रोक्तं वाचस्पतिना- 'वस्तुतः परमात्मनोऽभिन्नोऽप्ययं विज्ञानात्मा अनाद्यविद्याकल्पितप्रादेशिकान्तःकरणावच्छेदेनानादिजीवभावमापन्नः प्रादेशिकः

सन्न देहान्तराणि स्वभावनिर्मितान्यपि नानादेशवर्तीनि सान्तःकरणो युगपदावेष्टुमर्हतीति।' तन्न। अन्तःकरणावच्छिन्नस्य जीवत्वे तस्य व्यापकत्वसिद्धान्तहानेः। वृत्तेः चिदुपरागमात्रार्थत्वमिति सिद्धान्ते उद्घोषश्च न स्यात्। परिच्छिन्नप्रत्यगात्मावरणाज्ञाननिवृत्त्यैव वृत्तेरुपयोगोपपत्तेः। अणोरपि जीवस्य 'गुणाद्वाऽऽलोकवत्' (ब्र.सू. २.३.२६) इत्यादिसूत्रैः प्रकाशतो व्याप्त्युपपादनेन पुनराक्षेपायोगाच्च। अन्यथा संसारिणोऽपि देहे प्रादेशिकहृदयवृत्तित्वेन सर्वशरीरव्यापिसुखदुःखानुभवो न स्यात्।

किञ्चात्र सिद्धान्तः व्यापकत्वपक्षाश्रयणेन प्रवर्तत उताणुत्वेन। नाऽद्यः। अन्तःकरणावच्छिन्नस्य क्वचिज्जीवभावोक्तिविरोधात्। व्यापकत्वादेव मुक्तसृष्टशरीरेष्विव तदसृष्टास्मदादिशरीरेष्वपि सन्निधानसम्भवेन तद्गतभोगस्यापि प्राप्तेश्च । न चास्मदादिशरीरेषु व्याप्तिमतोऽप्यात्मनोऽनुसन्धानप्रयोजकात्माभिव्यक्तिजनकान्तःकरणसम्बन्धाभावात् न दोष इति वाच्यम्। अस्मदादिदेहान्तःकरणस्यापि तत्र सत्त्वेनाऽत्मस्वरूपाभिव्यक्तेरप्यापादनात्। ननु स्वात्मरूपाभिन्नतयाऽभिव्यक्तं हि चैतन्यं भोक्तृ। तथाविधाभिव्यक्तिश्च स्वकीयेनानादिनाऽन्तःकरणेनावच्छिन्नैव। अस्मदादिशरीरगतं तु चैतन्यं न मुक्तगतेनान्तःकरणेनावच्छिद्यते। अत एव संसारिष्वपि देहेष्वात्मन एकस्यैव व्याप्तिसद्भावेऽपि देवदत्तान्तःकरणावच्छेदेनैव देवदत्तात्मनोऽभिव्यक्तिर्न अन्तःकरणान्तरावच्छेदेनान्तःकरणान्तरस्य तथाविधाभिव्यक्तिप्रतिबन्धकत्वादिति चेन्न। संसारिणोऽविद्याकवलितस्य नैजान्तःकरणवश्यतयाऽन्तःकरणान्तरसम्बन्धस्य तथाविधाभिव्यक्तिप्रतिबन्धकत्वेऽपि विगलिताविद्यस्य तद्वशत्वाभावेनान्तःकरणान्तरसम्बन्धस्य प्रतिबन्धकत्वायोगात्। उक्तं चेदं भामत्यामपि,

'न च सर्वगतस्य वस्तुतो विगलितप्रायाविद्यस्य विदुषः पृथग्जन-

स्येवौत्पत्तिकान्तःकरणवश्यता। येन तदन्तःकरणमन्तःकरणान्तरसम्बन्धमस्य वारयेत्' इति।

अन्यथा मुक्तस्य सृष्टदेहान्तरेषु स्वव्याप्तिसद्भावेऽप्यन्तःकरणान्तर-सम्बन्धस्यौत्पत्तिकान्तःकरणेन निवारणात् स्वरूपाभिव्यक्त्यभावापातेन भोगो न सिद्ध्येत्। नान्त्यः। व्यापकत्वसिद्धान्तविरोधात्। 'युक्तं च तद्विभौ' इति ग्रन्थविरोधाच्च।

टीकाक्षरार्थः

टीकायां पूर्वपक्षीयसमस्तकार्यन्यायविवरणव्याख्यानम्

टीकाक्षरार्थस्तु। समस्तकार्यमित्युक्तन्यायं साध्यप्रदर्शनेन विवृण्वत्,

'न च देहभावे तत्कार्यदुःखादिः तदभावे भोगासम्भव इति दोषः।'

इति वाक्यं विकल्पमुखेन विवृणोति- **तथा हीत्यादिना**॥ देहभावे तत्कार्यस्य समस्तस्य दुःखादेः प्राप्तिरिति नियमः स्वप्नस्थेन दृश्यत इत्यतः। आद्येऽपि तत्राभिमानोऽस्ति न चेति विकल्पान्तरमपि संयोजितम्। देहभावे तदभिमान-सद्भावे चेत्यध्याहार्यमित्युक्तं भवति। तर्ह्यभिमानाभावपक्षे किं दूषणमि-त्यतस्तदभावे भोगासम्भव इति वाक्यान्तरतया व्याचष्टे- **नेति पक्ष इत्यनेन**॥ तच्छब्दः न श्रुतदेहपरः किन्त्वध्याहृताभिमानपरः सुप्तस्येवेत्यध्याहारश्चेत्युक्तं भवति। देहस्तदभिमानश्चास्तीत्याद्यस्य प्रथमे पक्षदूक्षणं वदन् पूर्वं भागं व्याख्याति- **अस्ति चेदिति**॥ अनेन देहदेहाभिमानयोर्भावे दुःखादिसमस्ततत्कार्यं स्यात्। देहाभिमानवतो दुःखादेर्नियमतो दर्शनादिति व्याख्यातम्। देहो नास्तीति पक्षदूषणायोत्तरार्धं प्रकारान्तरेण व्याचष्टे- **द्वितीये भोगासम्भव इति**॥ अत्र तच्छब्दो देहमात्रपरः। प्रलीनस्य वेति दोषश्च द्रष्टव्यः।

टीकायां विशेषक्लृप्त्याख्यसिद्धान्तन्यायविवरणव्याख्यानम्

विशेषक्लृप्तिरित्युक्तन्यायं विवृण्वत्,

' "देहाभावाच्च भावाच्च निर्भोगित्वं च दुःखिताम्।
यान्त्यमुक्ता नोभयं च मुक्तानां वशिता यतः॥"

इति श्रुत्यैव विशेषक्लृप्तेः।'

इति वाक्यं भावोक्त्या व्याचष्टे- **देहसद्भावस्तूक्तश्रुतिसिद्ध इति**॥ यतो मुक्तानां वशिता वशीकृता वशीकृतभगवत्ता, भगवदनुग्रहस्तेषु सम्पूर्ण इति यावत्। अतो देहाभावप्रयुक्तनिर्भोगत्वं वा देहसद्भावप्रयुक्तदुःखित्वं नैतदुभयमपि मुक्ता न यान्तीति श्रुत्यैव संसाराद्विशेषस्य निर्णीतत्वात् पक्षद्वयमपि युक्तमेवेत्यर्थः।

सूत्रक्रमौचित्यम्

यद्यप्यत्र 'भावं जैमिनिः' इति प्रथमं वक्तुं युक्तम्। तथाऽपि जडशरीराभाव एव मुक्तानां प्रायिकः। तत्सद्भावस्तु काचित्क इति सूचयितुं बादरिमतं प्रथम-मुक्तम्। ततो मतद्वयानुग्राहकं स्वमतमुक्तम्। तत्र प्रथमोपदिष्टबादरिमते चतुर्थेन बाधकोद्धारः। जैमिनिमते बाधकोद्धाराय पञ्चमेन प्रस्तावः। यद्यपि पञ्चमं शक्यमवक्तुम्। तथाऽपि न केवलं जैमिनिमते जडशरीरसद्भावः किन्त्वभि-मानोऽप्यस्ति। जाग्रद्वदिति 'भावं जैमिनिः' इत्युक्तप्रपञ्चायायमनुवादः। षष्ठेन बाधकोद्धारः। तथाहि दर्शयतीति षष्ठोक्तश्रुतेरर्थान्तरपरत्वनिरासः सप्तमेनेति सूत्रक्रमो बोध्यः॥ ८॥

॥ इत्युभयविधभोगाधिकरणम्॥ ८॥

॥ अथ सर्वकामाधिकरणम् ॥ ९ ॥

सूत्रभाष्यम्

ॐ जगद्व्यापारवर्जम् ॐ ॥ ४.४.१७ ॥

'सर्वान् कामानाप्त्वाऽमृतः समभवत्' (ऐ.आ.२-५-४) इत्युच्यते। तत्र सृष्ट्यादिभ्योऽन्यान् व्यापारानाप्नोति ॥ १७॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र ब्रह्मप्राप्तस्य मुक्तस्य भोगेयत्तासमर्थनादस्ति शास्त्रादिसङ्गतिः। अन्यथा भगवतः सर्वोत्तमत्वाभावप्रसङ्गात् समर्थनीयमेतत् । प्रकृता मुक्ता एवात्र विषयः। जगत्सृष्ट्यादिव्यापारानाप्नुवन्ति न वेति सन्देहः। तस्य ब्रह्मलक्षणत्वेनोक्तिर्मुक्तस्य सत्यकामत्वं च सन्देहबीजम्।

पूर्वपक्षः

आप्नुवन्तीति पूर्वः पक्षः। 'सर्वान् कामानाप्त्वा' इति श्रुतेः। सृष्ट्यादिव्यापारस्यापि काम्यत्वात्। न च सर्वशब्दस्य सङ्कोचः। मुक्तस्य सत्यकामत्वेन कामितसमस्तप्राप्त्युपपत्तेः सङ्कोचे कारणाभावात्। अन्यथोक्तसत्यकामत्वव्याघातात्। अतो मुक्तानां जगज्जन्मादिकर्तृत्वादयुक्तं लक्षणसूत्रमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **जगदिति** ॥ न मुक्तानां जगद्व्यापारः किन्तु तद्व्यतिरिक्तकामावाप्तिरेव। 'सर्वान् कामान्' इति सर्वकामावाप्तिरुच्यत इति चेत्। सत्यम्। तत्रापि जगद्व्यापारवर्जमेव सर्वान् कामानाप्नोतीत्यर्थोपपत्तेरिति भावः ॥ १७॥

सूत्रभाष्यम्

कुतः-

ॐ प्रकरणादसन्निहितत्वाच्च ॐ ॥ ४.४.१८ ॥

जीवप्रकरणत्वाज्जीवानां तादृक्सामर्थ्यविदूरत्वाच्च। वाराहे च-

'स्वाधिकानन्दसम्प्राप्तौ सृष्ट्यादिव्यापृतिष्वपि।
मुक्तानां नैव कामः स्यादन्यान् कामांस्तु भुञ्जते ॥
तद्योग्यता नैव तेषां कदाचित् क्वापि विद्यते।
न चायोग्यं विमुक्तोऽपि प्राप्नुयान्न च कामयेत् ॥' इति ॥ १८ ॥

तत्त्वप्रकाशिका

कुतः श्रुतेः सङ्कोच इत्याक्षिपति- **कुत इति** ॥ तत्परिहाराय सूत्रं पठित्वा व्याचष्टे- **प्रकरणादिति** ॥ युक्त एव सर्वश्रुतेः सङ्कोचः। अत्र जीवस्योच्यमानत्वादस्य जीवप्रकरणत्वेन तदवगमाच्छरीरभेदादूर्ध्वमुत्क्रम्येति श्रवणाज्जीवानां च जगद्व्यापारशक्तिरहितत्वाद् बाधकवशात् सामान्यश्रुतेः सङ्कोचस्य न्यायप्राप्तत्वादिति भावः। तदयं प्रयोगः। न मुक्तो जगद्व्यापारशक्तिमान्। जीवत्वात्। सम्प्रतिपन्नवदिति। संसारिणां जगद्व्यापारशक्त्यभावेऽपि सत्यकामानां मुक्तानां तत्सम्भव इत्यत आह- **वाराहे चेति** ॥ १८ ॥

सूत्रभाष्यम्

ॐ प्रत्यक्षोपदेशादिति चेन्नाऽधिकारिकमण्डलस्थोक्तेः ॐ ॥ ४.४.१९ ॥

'ता यो वेद, स वेद ब्रह्म, सर्वेऽस्मै देवा बलिमावहन्ति' (तै.उ.१-५)

इति प्रत्यक्षोपदेशाज्जगदैश्वर्यमप्यस्तीति चेन्न । आधिकारिकमण्डलाधिपतिर्ब्रह्मा हि तत्रोच्यते ।

गारुडे च-

'आत्मेत्येव परं देवमुपास्य हरिमव्ययम् ।
केचिदत्रैव मुच्यन्ते नोत्क्रामन्ति कदाचन ॥
अत्रैव च स्थितिस्तेषामन्तरिक्षे तु केचन ।
केचित् स्वर्गे महर्लोके जने तपसि चापरे ॥
केचित् सत्ये महाज्ञाना गच्छन्ति क्षीरसागरम् ।
तत्रापि क्रमयोगेन ज्ञानाधिक्यात् समीपगाः ॥
साळोक्यं च सरूपत्वं सामीप्यं योगमेव[१] च ।
इमामारभ्य सर्वत्र यावत्तु क्षीरसागरे ॥
पुरुषोऽनन्तशयनः श्रीमन्नारायणाभिधः ।
मानुषा वर्णभेदेन तथैवाऽश्रमभेदतः ।
क्षितिपा मनुष्यगन्धर्वा देवाश्च पितरश्चिराः ।
आजानजाः कर्मजाश्च तात्त्विकाश्च शचीपतिः ॥
रुद्रो ब्रह्मेति क्रमशस्तेषु चैवोत्तमोत्तमाः ।
नित्यानन्दे च भोगे च ज्ञानैश्वर्यगुणेषु च ।
सर्वे शतगुणोद्रिक्ताः पूर्वस्मादुत्तरोत्तरम् ॥
पूज्यन्ते चावरैस्ते तु सर्वपूज्यश्चतुर्मुखः ।
स्वजगद्व्यापृतिस्तेषां पूर्ववत् समुदीरिता ॥
सयुजः परमात्मानं प्रविश्य च बहिर्गताः ।

१. 'योग एव'

चिद्रूपान् प्राकृतांश्चापि विना भोगांस्तु कांश्चन ।
भुञ्जते मुक्तिरेवं ते विस्पष्टं समुदाहृता ॥' इति ॥ १९ ॥

तत्त्वप्रकाशिका

मुक्तस्य जगदैश्वर्याभावमाक्षिप्य समादधत् सूत्रमुपन्यस्य तावद् व्याचष्टे- **प्रत्यक्षेति** ॥ अस्त्येव मुक्तानां जगदैश्वर्यम् । 'ता वा एताश्चतस्रश्चतुर्धा । चतस्रश्चतस्रो व्याहृतयः । ता यो वेद । स वेद ब्रह्म । सर्वेऽस्मै देवा बलिमावहन्ति' इति स्फुटं मुक्तस्याखिलदेवतापूज्यत्वादिश्रवणात् । न च तदमुक्तविषयम् । अमुक्तज्ञानिनां तददर्शनादिति भावः । परिहारांशं व्याचष्टे- **नेति** ॥ नैतच्छ्रुतिबलेनाशेषमुक्तानां जगद्विषयैश्वर्यसिद्धिः । मुक्तहिरण्यगर्भस्यैव मुक्ताधिकारिकदेवतापूज्यत्वाभिधायकत्वात् । 'माहाचमस्यः प्रवेदयते' इत्युपक्रमादिति भावः । अन्यदेवानामपि मुक्तस्वावरप्रेरणाधिकारित्वमस्तीति सूचनायाऽधिकारिकपदम् । ननु मुक्तानां देवानां स्वावरमुक्तनियामकत्वं हिरण्यगर्भस्याशेषमुक्तनियामकत्वमित्येतत् कुत इति तत्राऽह- **गारुडे चेति** ॥ न चानेन 'आनन्दादयः प्रधानस्य' इत्युक्तिविरोधः । तदुपासनस्य सम्पूर्णमोक्षार्थत्वात् । अत्र 'नोत्क्रामन्ति' इति सम्पूर्णमोक्षाभावोक्तेः । न च 'बहुनाऽत्र किमुक्तेन' इत्युक्तिविरोधः । सकृच्छ्वेतद्वीपगमनाभ्युपगमात् ।

'श्वेतं द्वीपं तथा गत्वा दृष्ट्वा विष्णुं च ते ततः ।
अनुज्ञाताः प्रमोदन्ते निर्दुःखास्तु धरादिषु ॥' इति वचनात् ।

योग्यत्वं चात्र विवक्षितमित्येतदपि तत्रावस्थानायेति गमयितव्यम् । भूम्यादिषु मुक्तस्थितौ न मोक्षोऽयं स्यात् । सालोक्यादिचातुर्विध्यानन्तर्भावादित्यत आह- **सालोक्यं चेति** ॥ पृथ्वीमारभ्योक्तक्रमेण

यावन्नारायणस्तावत्सर्वस्थानेष्वपि सालोक्याद्यस्त्येव। ईश्वरस्य सर्वत्रावस्थितेरिति भावः। मानुषा इत्यादि तेषां तारतम्यकथनम्॥ १९॥

सूत्रभाष्यम्

ॐ विकारावर्ति च तथाहि दर्शयति ॐ ॥ ४.४.२० ॥

व्यापारो मुक्तानां न विद्यते। 'इमं मानवमावर्तं नाऽवर्तन्ते' (छा.उ.४-१५-६) इति श्रुतिः। वाराहे च-

'स्वाधिकारेण वर्तन्ते देवा मुक्तावपि स्फुटम्।
बलिं हरन्ति मुक्ताय विरिञ्चाय तु पूर्ववत्॥
सब्रह्मकास्तु ते देवा विष्णवे च विशेषतः।
न विकाराधिकारस्तु मुक्तानामन्य एव तु।
विकाराधिकृता ज्ञेया ये नियुक्तास्तु विष्णुना॥' इति॥ २०॥

॥ इति सर्वकामाधिकरणम्॥ ९॥

तत्त्वप्रकाशिका

ननु ब्रह्मादिमुक्तानां मुक्तजगद्व्यापार एव कुतः? अमुक्तविषयेऽपि किं न स्यादित्याशङ्कां परिहरत् सूत्रं पठित्वा व्याचष्टे- **विकारेति ॥** चशब्देन नेत्यनुषज्यते। विकारावर्ति संसारमावर्तयतीति तद्विषयव्यापरणम्। मानवा यत्राऽवर्तन्ते स मानवावर्तः संसारस्तत्राऽवर्तन्ते नाऽवर्तयन्ति न प्रवर्तयन्तीत्यर्थः। मुक्तदेवानाममुक्तविषयव्यापाराभावे संसारावस्थानमेव न स्यात् प्रवर्तकाभावादित्याशङ्कां परिहर्तुमुक्तार्थे स्मृतिं चाऽह- **वाराहे चेति ॥** अतो मुक्तानां जगद्व्यापाराभावाद् युक्तं लक्षणसूत्रमिति सिद्धम्॥ अ. ९॥

शेषतात्पर्यचन्द्रिका

॥ ॐ जगद्व्यापारवर्जम् ॐ ॥ ४.४.१७ ॥

सङ्गतिः

अत्र न मुक्तस्य भोगो युक्त इत्यादिबाधकोद्धाराज्जगत्सृष्ट्यादिविषयेऽभोगसमर्थनेन भोगे प्रकारश्चिन्त्यत इति पेटिकासङ्गतिः।

पूर्वपक्षः

नन्वेवं मुक्तेष्वीश्वरानुग्रहबाहुल्याज्जडदेहतद्देहाभिमानयोः सत्त्वेऽपि न तत्कृतदुःखभोगप्राप्तिरित्यङ्गीकारेऽयोग्येच्छायामपि तत्कृतदोषाभावसम्भवेन जगत्सृष्ट्यादिविषयकामनायां तत्कर्तृत्वमपि स्यात्। अन्यथा तस्य सत्यसङ्कल्पत्वव्याघातात्। न चेदमङ्गीकर्तुं शक्यम्। मुक्तस्य तावत्सर्वकाम्यप्राप्तिरुच्यते। जगत्सृष्ट्यादयश्च काम्याः। तद्व्यतिरिक्तकाम्यप्राप्त्यङ्गीकारे सर्वशब्दविरोधः। न च 'न हिंस्यात् सर्वा भूतानि' 'सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ' 'स इदं सर्वमसृजत' इत्यादाविव सर्वशब्दः सङ्कुचद्वृत्तिः। नियामकाभावात्। न च 'कामेन मे काम आगात्' इत्यादिश्रुत्या भगवत्कामानुसारेणैव मुक्तानां कामोक्तेर्जगत्सर्जनादिविषयकामना मुक्तानां नास्त्येव। नहीश्वरो जगत्सर्जनादौ मुक्तान् नियोक्तुं कामयते। तथा सत्येकस्य जगतोऽनेकैः क्रियमाणत्वापात ईश्वरानपेक्षत्वापातश्च। न चैकदेशे विनियोगः। तस्य जगच्छब्दवाच्यत्वाभावादिति वाच्यम्। मुक्तानां तदानीमिच्छाया अभावेऽपि भोगहेतुत्वेन काम्यत्वानपायात्। न हि विरक्तः स्वर्गं न गच्छतीत्येतावता स्वर्गः काम्यो न भवति। तस्माज्जगत्सर्जनादिव्यापारो मुक्तानामस्तीति प्राप्तेऽभिधीयते।

सिद्धान्तः

किमत्र मुक्तानां शक्तिरस्तीति तदापाद्यते अथ कामितत्वात् मुक्तानां

कामितप्राप्तिश्रवणात् । नाऽद्यः । मुक्तो न जगद्व्यापारशक्तिमान् जीवत्वात् सम्प्रतिपन्नवदित्यनुमानविरोधात् । द्वितीये किमिदं कामितत्वं जगत्सर्जनादेर्यदि कामनाविषयत्वं तदा 'कामेन मे' इत्यादिश्रुत्या भगवत्कामनाभावेन मुक्तानामपि कामनाऽसम्भवः । मुक्तेच्छाया अविषये कामशब्दाप्रवृत्तेः । अत एव न सङ्कोचः । कामितत्वरहितजगद्व्यापाराप्राप्तावपि कामितसर्वप्राप्त्युपपत्तेः । यदि कामितत्वं विषयसौन्दर्यमात्रं तदा यद्यपि जगद्व्यापारः कामित एव । तथाऽपि 'न हिंस्यात् सर्वा भूतानि' इत्यत्रेव 'सर्वान् कामानाप्त्वा' (ऐ.आ. २.५.४) इत्यत्रापि सर्वशब्दः सङ्कुचद्वृत्तिरेव । नियामकत्वशक्तेरभावात् । नहीश्वरैकयोग्ये तदितरस्य शक्तिः सम्भवति । न च 'ता यो वेद' (तै.उ. १.५) 'सर्वेऽस्मै देवा बलिमावहन्ति' (तै.उ. १.५) इत्यादौ मुक्तस्य जगद्व्यापारः श्रूयते । तत्कथं शक्त्यभाव इति वाच्यम् । जगच्छब्देन संसारिण एव विवक्षणात् । न चात्र संसारिगोचरो व्यापारः कश्चिच्छ्रूयते । किन्तु मुक्तस्यैव चतुर्मुखस्य स्वावर-मुक्तपूज्यतैव । 'महाचमस्यः प्रवेदयते' (तै.उ.) इत्युपक्रमात् । न च मुक्तनियमनमिव संसारिनियमनमपि कुतो नोति वाच्यम् । 'इमं मानवमावर्तं नावर्तन्ते' इति श्रुत्या संसारिनियमने तन्निषेधात् । मानवा यत्राऽवर्तन्ते तं मानवावर्तं संसारम् । मकारागमः छान्दसः । नाऽवर्तन्ते न प्रवर्तयन्तीत्यर्थ इति ।

टीकाक्षरार्थः

टीकायां पूर्वपक्षीयसमस्तकार्यविवरणव्याख्यानम्

टीकाक्षरार्थस्तु- **ब्रह्म प्राप्तस्येति** ॥ मुक्तमात्रस्येत्यर्थः ।

समस्तकार्यमित्युक्तमेव न्यायमेतत्सङ्गतत्वेनापि साध्यसाधनोभयपरतया विवृण्वत्,

'न च सङ्कल्पादेव समस्तसम्भवात् सृष्ट्यादिसमस्तकार्यसम्भवः ।'

इति वाक्यं व्याचष्टे- **आप्नुवन्तीति पूर्वः पक्ष इति** ॥ तेन समस्ताकार्य-शब्दस्तत्सम्भवोपलक्षकः, आवर्तनीयश्च । तत्राऽद्यः कार्यशब्दो भोगपरः । तेन हेतुरुच्यते । द्वितीयेन साध्यम् । तेन सङ्कल्पादेव समस्तभोगसम्भवात् सृष्ट्यादेरपि तदन्तर्गतत्वात् सृष्ट्याद्यष्टकस्यापि तदन्तर्गतत्वात् समस्तस्येश्वरगतस्य कार्यविशेषस्य मुक्ते सम्भवाङ्गीकार इति समस्तकार्यन्यायविवरणप्रकारो द्रष्टव्यः ।

टीकायां सिद्धान्तीयविशेषक्लृप्तिन्यायविवरणव्याख्यानम्

विशेषक्लृप्तिरित्युक्तन्यायं विवृण्वत्,

'व्यापारो जगतो विष्णोर्मुक्तानां तु स्वभोगगः ।
न हि स्वर्णं शुद्धमपि वह्निकार्यकरं भवेत् ।
अयोग्याशक्तितस्त्वेव नाधिकानन्दसम्भवः ।
न हि कश्चित्सुशक्तोऽपि चकाराचेतनं चितिम् ।
न च कामस्तथा भूयात् ततः स्यात् सत्यकामता ॥'

इति श्रुत्या विशेषक्लृप्तेरेव,

'मुक्तानां न जगद्यत्नस्तथाऽपि विबुधाः सदा ।
मुक्तानां तु नियन्तारस्तेषां ब्रह्माऽस्य वै हरिः ॥'

इति च विशेषक्लृप्तिः ।'

इति वाक्यं भाष्यभावकथनेन व्याचष्टे- **जीवानां चेत्यादिना** ॥

विवरणार्थः

तेन मुक्तस्य 'सङ्कल्पादेवास्य' (छा.उ. ८.२.७) इत्यादिश्रुत्या समस्तकार्येषु सामर्थ्योपलम्भात् सृष्ट्यादावपि सामर्थ्यमस्तीति तस्यं तदापाद्यते ? उत कदाचित् सृष्ट्यादावपि मुक्तस्येच्छासम्भवात मन्यकामत्वाव्याघाताय तदप्यङ्गीक्रियत इति

विकल्प्याऽद्यं दूषयति- **व्यापार इति ॥** जगत्सृष्ट्यादिरूपो जगद्धटितो व्यापारो विष्णोरेव मुक्तानां तु सुखभोगघटितो व्यापार एवेति यतो नियमोऽतो न मुक्तानां जगद्व्यापारः । अतो विष्ण्वितरस्य सर्वस्यापि जगद्व्यापारेऽशक्तिरेव । ननु कामक्रोधादिमालिन्ययुक्तस्य भवत्वशक्तिः । मुक्तस्य तु परिशुद्धत्वाद्भवतु शक्तिः । न ह्यावरणदशायां यद्यथाऽनुभूयते तन्निवृत्तेऽप्यावरणे तथैवेति नियमः । अशुद्धिदशायां स्वर्णस्यानुपादेयतयाऽनुभूयमानस्य शुद्धिदशायामुपादेयत्वोपलम्भात् । अन्यथा स्वरूपानन्दभोगादावपि शक्तिर्न स्यादित्यत आह- **न हि स्वर्णमिति ॥** स्यादेतदेवं यदि वस्तूनां स्वभावो न क्लृप्तः स्यात् । न चैवम् । सहजशक्त्यङ्गीकारात् । स्वर्णस्य या सहजा शक्तिरुपादेयताप्रयोजकस्वर्णत्वादिः सा वह्नौ नास्ति । या च दाहकत्वादिर्वह्नौ सा न कदाचिदपि स्वर्णेऽस्ति । न हि स्वर्णं शुद्धमित्येतावता स्वकीयसहजां शक्तिं परिभूय वह्निगतां सहजां दहनशक्तिमवष्टभ्य दाहकं दृष्टम् । येन मुक्तोऽपि स्वस्वरूपानन्दभोगमात्रशक्तिं सहजां परिभूय विष्णुगतां जगत्सर्जनादिशक्तिं तत्सहजामवष्टभ्य जगत्स्रष्टा स्यादिति भावः ।

ननु स्वायोग्यजगत्सृष्ट्यादिविषयेऽशक्तत्वान्मुक्तो न तत्करोतीत्ययुक्तम् । अयोग्याशक्तेरप्रयोजकत्वात् । अन्यथा वह्नेर्मन्त्रादिदशायां शान्तिकरत्वं न स्यात् । तथा च मुक्तिदशायाः प्रबलत्वाद् अशक्तोऽपि तत्कुर्यादेवेत्यत आह- **अयोग्येति ॥** अयोग्याशक्तिरेव प्रबला न मुक्तिदशा । अन्यथा स्वस्वयोग्यक्लृप्तानन्दादधिकानन्दस्यापि भोक्ता स्यात् । नहि तत्रायोग्याशक्तितोऽन्यस्मिन्निमित्तमस्तीति भावः । ननु मुक्तः स्वतः तत्राशक्तोऽस्तु, ईश्वरस्तु मुक्तिदशायां त्वस्मै प्रीयमाणस्तत्स्रष्टारं करोतु । नहीश्वरस्य काचिदशक्तिरस्तीत्यत आह- **नहि कश्चिदिति ॥** न हि कश्चित् सुशक्तोऽपि जडं चेतनं कुर्वन्नुपलभ्यते । स्वरूपस्यानपायात् । येनेश्वरेऽपि तथा सम्भावना । ततो मुक्तस्य जीवत्वेनेश्वरकार्ये

सामर्थ्याभावात् 'सर्वान् कामानाप्नोति' इत्यत्र सर्वशब्दसङ्कोचो युक्त इति भावः । द्वितीयं दूषयति- **न चेति ॥** तथा कामः अयोग्यविषयेच्छा । अन्यथा सत्यकामत्वं न स्यादिति भावः । **विशेषक्लृप्तेरेवेति ॥** मुक्तानां योग्य एव शक्तिः तत्रैव कामश्चेत्यादिविशेषस्य श्रुत्यैव निश्चितत्वादेवेत्यर्थः ।

नन्वेतदयुक्तम् । मुक्तानां जीवत्वेऽपि जगद्व्यापारोऽङ्गीकर्तव्यः । 'सर्वेऽस्मै देवा बलिमावहन्ति' (तै.उ. १.५) इति मुक्तानां बलिदानकर्तृत्वसम्प्रदानत्वादेः श्रवणादित्याशङ्क्यैतत्परिहाराय विशेषक्लृप्तिन्यायं प्रकारान्तरेण व्याचष्टे- **मुक्तानामिति ॥** यद्यपि देवव्यतिरिक्तानां मुक्तानां जगत्सृष्ट्यादिविषयप्रयत्नो नास्ति । तथाऽपि मुक्ता विबुधा देवाः मुक्तानां मानुषादीनां नियन्तार एव । मुक्तदेवानां चतुर्मुखो नियन्ता, चतुर्मुखस्य च हरिरेवेति श्रुत्यैव यतोऽयं विशेषः क्लृप्तः, अतस्तदन्यत्रामुक्तजगन्नियन्तृत्वादावपि शक्तिर्न विकल्पनीयेति भाव इति विवरणयोजना द्रष्टव्या ।

सङ्कोचस्य न्यायप्राप्तत्वादिति ॥ यद्यपि 'सर्वान् कामान्' इत्यत्र सर्वकामितावाप्तिरेव श्रूयते । न तु सर्वावाप्तिः । तथा च जगत्सृष्ट्यादौ मुक्तस्य कामनाभावादेव कामितशब्देनैव तद्व्यावृत्तेरपि सिद्धेस्तत्र न सर्वशब्दसङ्कोचः । तथाऽप्युक्तरीत्या कामशब्दो भोग्यमात्रपर इति मतमाश्रित्येदमुक्तमिति ध्येयम् ।

ननु मुक्तानां देवानामित्युपलक्षणमेतत् । देवेतरमुक्तेष्वप्यवान्तरशक्तितारतम्यम् । कार्यविशेष एव शक्तिः । तदन्यत्र न । तत्रापि स्थलविशेषावस्थान एव शक्तिर्नान्यत्र । तत्रापि चतुर्विधमुक्तिभाजः केचन । केचन द्वित्रमुक्तिभाज इत्याद्यवान्तरवैलक्षण्यमपि ग्राह्यम् । नन्वात्मेत्येकगुणविशिष्टं हरिमुपास्य दृष्ट्वा प्रारब्धकर्म क्षपयित्वा स्थिताः केचिदेकगुणोपासकाः, अत्रैव भूम्यादावेव स्वरूपानन्दमनुभवन्तीत्ययुक्तम् । 'आनन्दादयः प्रधानस्य' (ब्र.सू. ३.३.१२)

इत्यत्र चतुर्गुणोपासनां विना मुक्त्यभावस्योक्तेरित्याशङ्क्य निराकरोति- **न चेति** ॥ **तदुपासनस्येति** ॥ 'आनन्दादयः प्रधानस्य' इत्यत्र चतुर्गुणोपासनां विना कर्मक्षयोत्क्रान्तिमार्गभोगाख्यचतुर्विधस्य सम्पूर्णमोक्षस्याभाव उक्तः। न तु सामान्याभावः। इह त्वेकगुणोपासनामात्रेण द्वित्रमोक्षसद्भाव उच्यते। न तु सम्पूर्णमोक्ष इति भावः। कथमेतद् ज्ञातव्यमित्यत आह- **अत्रेति** ॥ 'नोत्क्रामन्ति कदाचन' (ब्र.सू.भा.उ. गारुडवचनम्) इत्येक-गुणोपासकानां 'तदोकोग्र-ज्वलनम्' (ब्र.सू. ४.२.१७) इत्युक्तविशिष्टोत्क्रान्तिनिषेधात्। त्रिविध-मोक्षोक्तेरित्यर्थः। न च 'नोत्क्रामन्ति' इत्यस्यास्मान्नापक्रामन्ति यत्र पूर्व-स्थितास्तत्रैव तिष्ठेयुरित्यर्थ इति वाच्यम्। कारागृहप्रवेशवदपुरुषार्थत्वप्रसङ्गात्। 'तदोकोग्रज्वलनम्' (ब्र.सू. ४.२.१७) इत्यादेरेकगुणोपासकव्यतिरिक्त-विषयत्वोपपत्तेः। अन्यथा देवदत्तादिविषयत्वमपि स्यात्।

'केचित्तु मानुषा मुक्तिमनुत्क्रम्यैव देहतः।
देहपाते तु देहस्य दोषान् भुक्त्वैव सर्वशः।
मरणोच्छूनतादींस्तु स्वकीयारब्धकर्मजान्।
देहे जीर्णे तु गच्छन्ति दृष्ट्वा विष्णुमनुज्ञया।
पुनरत्रैव तिष्ठन्ति नित्यानन्दैकभोगिनः॥' (बृ.भाष्यम्)

श्वेतद्वीपं गच्छन्तीत्यर्थः। आगमेनैव स्पष्टमेवैकगुणोपासकानां देहादुत्क्रमणाभावप्रतीतेश्च। पुनरत्रैव तिष्ठन्तीति तु प्रायिकाभिप्रायम्। 'अनुज्ञाताः प्रमोदन्ते निर्दुःखास्तु धरादिषु' (छा.भा.) इति वचनादिति भावः। ननु 'अत्रैव च स्थितिस्तेषाम्' (ब्र.सू.भा.उ. गारुडवचनम्) इत्यनेन श्वेतद्वीपगमननिषेध-प्रतीतेः कथमेतदित्याशङ्क्य नात्र श्वेतद्वीपगमनं निषिध्यते। किन्तु तन्निवासा-योग्यप्रदेशविशेष एवोच्यते। तस्य तावत्येव शक्तिर्नान्तरिक्षादौ वासे शक्तिरित्युच्यते। सप्रमाणकमाशङ्क्य निषेधति- **न चेति** ॥

ननु 'योग्यत्वं चात्र विवक्षितम्' इति गीताभाष्ये तत्रापि योग्यानामेव श्वेतद्वीपगमनं नान्येषां मुक्तानामित्यर्थप्रतीतेः कथं श्वेतद्वीपगमनमेकगुणो-पासकानामङ्गीकर्तुं शक्यमित्याशङ्क्याऽऽह- **योग्यत्वं चेति** ॥ केषाञ्चित्ततोऽपि शक्त्यतिशयमाह भाष्ये- **अन्तरिक्षे च केचनेति** ॥ तत्रैव निवासे शक्ता इत्यर्थः। इतोऽप्यधिकशक्तयः सन्तीत्याह- **केचित्स्वर्ग इत्यादि** ॥ अपरे केचिन्महाज्ञानाः बहुगुणोपासका जने तपसि सत्ये वा निवसन्तीत्यर्थः। महाज्ञानास्ततोऽपि बहुगुणोपासकाः क्षीरसागरं गच्छन्ति। तत्रैव निवासायेति शेषः। तेषामपि शक्तिर्नैकविधेत्याह- **तत्रापीति** ॥ क्रमयोगेन शक्तियोगेन। तत्र निमित्तमाह- **ज्ञानाधिक्यादिति** ॥ ज्ञानाधिक्येन शक्त्याधिक्यमित्यर्थः। सालोक्यं सरूपत्वं सामीप्यं योगश्चेति चतुर्विधैव मुक्तिर्यद्यपि। तथाऽपि पृथिवीमारभ्य क्षीरसागरे पुरुषोऽनन्तशयनः श्रीमन्नारायणाभिधो यावत् तावत्पर्यन्तं सर्वत्र सालोक्यमेव। तथा चान्तरिक्षादेरपि भूश्वेतद्वीपमध्यवृत्तित्वात् तत्र स्थितानां सालोक्यं युक्तमित्यर्थः। ननु मानुषाः सर्वेऽप्येकजातीयाः कथं तत्रावान्तरभेद इत्यतः वर्णाश्रमभेदेन तेषां बाहुविध्यं दर्शयन् मुक्तानां तारतम्यक्रमं दर्शयति- **मानुषा इत्यादिना** ॥ रुद्रः शेषः। उत्तमोत्तमाः उत्तरोत्तराः सर्वे शतगुणोद्रिक्ता इति सम्बन्धः। एवं मुक्तानां शक्तितारतम्यं प्रसाध्य यदुक्तं मुक्तस्वकीयावरयन्तृत्वं तत्साधयति- **पूर्वस्मादिति** ॥ ते उत्तमाः। न केवलं पूज्यत्वमात्रं किन्तु स्वकल्पमुक्तजगद्व्यापारश्चास्तीत्याह- **स्वेति** ॥ 'सर्वपूज्यश्चतुर्मुखः' (ब्र.सू.भा.उ. गारुडवचनम्) इत्युक्तम्। तत्कुत इत्याशङ्कायां सायुज्य-भाक्त्वादित्याशयेन सयुजां महिमानमाह- **सयुज इत्यादिना** ॥ स्वायोग्यान् कांश्चन भोगान्विनेत्यर्थः।

सूत्रार्थः

सूत्रार्थस्तु- **जगत्सर्जनादिरूपव्यापारात्मकभोगवर्जं** तदितरभोगान् मुक्ता

भुञ्जते। यद्यपि 'सर्वान् कामानाप्त्वाऽमृतः समभवत्' (ऐ.आ. २.५.४) इत्युच्यते। तथाऽपि सृष्ट्यादिभोगान्यानाप्नोतीति सङ्कोचः कार्यः।

इत्युक्तेऽर्थे हेतुरुच्यते। भावप्रधानो निर्देशः। जीवेति पूर्वं ग्राह्यम्। एवं विद्वानस्माच्छरीरभेदादूर्ध्वमुत्क्रम्येत्युपक्रमेण 'सर्वान् कामानाप्त्वा' (ऐ.आ. २.५.४) इत्यस्य जीव**प्रकरणत्वात्** प्रकृतस्य च जीवस्य निर्मर्यादकामभोगेऽसन्निहितत्वादसमर्थत्वाद्युक्तः सङ्कोचः।

असामर्थ्यमाक्षिप्य परिह्रियते। जगदैश्वर्यस्य **प्रत्यक्षतः** कण्ठत **उपदेशात्** न मुक्तजीवस्यासामर्थ्यमिति चेन्न। अधिकारिणामिदम् **आधिकारिकं** पदम्। तत्सम्बन्धिन आधिकारिकाः पदस्था देवाः। तेषां मण्डले समूहे पतित्वेन मध्ये वर्तत इति **आधिकारिकमण्डलस्थः** चतुर्मुखः। तस्यैवेह 'तायो वेद' (तै.उ. १.५) इति श्रुतावुक्तेः। तस्य कथञ्चिच्छक्तिसद्भावेऽपि देवेतरमुक्तानां तादृशशक्तिवैधुर्ये बाधकाभावेन सङ्कोचो युक्त एव। चतुर्मुखोक्तेरित्यनुक्त्वा अनेन वक्तृवचनेन पदस्थानां सर्वेषामपि स्वावरसेव्यताऽस्ति, चतुर्मुखस्य सर्वमुक्तसेव्यताऽस्तीति सूचयति।

तायो वेदेति श्रुतौ मुक्तामुक्तसर्वसेव्यतार्थः किन्न स्यादिति शङ्का प्रसङ्गान्निराक्रियते। विकारः संसारः विकारस्याऽवृत्तिर्यस्मात्तद्विकारावर्ति। अमुक्तविषयव्यापारो मुक्तदेवानां नास्ति। 'इमं मानवमावर्तम्' (छा.उ. ४।१५.६) इति श्रुतिर्यतस्तथा दर्शयति, अमुक्तजगद्व्यापारशून्यतया दर्शयतीति॥ ९॥

॥ इति सर्वकामाधिकरणम्॥ ९॥

॥ अथ स्थित्यधिकरणम्॥ १०॥

सूत्रभाष्यम्

ॐ स्थितिमाह दर्शयतश्चैवं प्रत्यक्षानुमाने ॐ ॥ ४.४.२१ ॥

'एतत्साम गायन्नास्ते' (तै.उ.३-१०) इत्युच्यते। तत्राऽनन्दादीनां वृद्धिह्रासश्च न विद्यते। किन्त्वेकप्रकारेणैव सर्वदा स्थितिः। 'स एष एतस्मिन् ब्रह्मणि सम्पन्नो न जायते न म्रियते न हीयते न वर्धते स्थित एव सर्वदा भवति दर्शनेव ब्रह्म दर्शन्नेवाऽत्मानं तस्यैवं दर्शयतो नाऽपत्तिर्न विपत्तिः' इत्याह जाबालश्रुतौ।

'यत्र गत्वा न म्रियते यत्र गत्वा न जायते।
न हीयते यत्र गत्वा यत्र गत्वा न वर्धते॥' इति मोक्षधर्मे॥

विद्वत्प्रत्यक्षात् कारणाभावलिङ्गाच्च। ब्रह्मवैवर्ते च-

'न ह्रासो न च वृद्धिर्वा मुक्तानां विद्यते क्वचित्।
विद्वत्प्रत्यक्षसिद्धत्वात् कारणाभावतोऽनुमा॥
हरेरुपासना चात्र सदैव सुखरूपिणी।
न तु साधनभूता सा सिद्धिरेवात्र सा यतः॥' इति॥ २१॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र ब्रह्मप्राप्तानां मुक्तानां भोगादिना वृद्धिह्रासनिरासादस्ति शास्त्रादिसङ्गतिः। वृद्धिह्रासवत्त्वे संसारसमानधर्मत्वापत्तेः कर्तव्य एव तन्निरासः। प्रकृतमुक्त एव विषयः। वृद्धिह्रासवान्न वेति सन्देहः। लोकदर्शनमलौकिकत्वं च सन्देहबीजम्।

पूर्वपक्षः

अस्त्येव मुक्तस्याऽनन्दादिवृद्ध्यादीति पूर्वः पक्षः। 'एतत् साम गायन्नास्ते' इत्यादिना तस्याप्युपासनादिश्रवणात्। अन्यथा तद्वैयर्थ्यात्। भोगानां वृद्धिह्रासवत्त्वाच्च। कारणानुगुणत्वात् कार्यस्य। किं च मुक्तस्य वशित्वेन कामिताशेषप्राप्तेर्युक्ता सुखादिवृद्धिः। न च न कामयत इति वाच्यम्। आनन्दादिवृद्धेरिष्टत्वेनाकामनानुपपत्तेः। अतो मुक्तानामपि वृद्ध्यादि-सद्भावात् संसारसमानधर्मत्वेन मुक्तेरपुरुषार्थत्वमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **स्थितिमिति**॥ यद्यपि 'एतत् साम गायन्नास्ते' इत्यादिना मुक्तस्य भगवदुपासनमुच्यते तथाऽपि न तस्याऽ-नन्दादिवृद्धिह्रासौ विद्येते। किन्त्वेकप्रकारेणैवावस्थानम्। कुतः? 'स एषः' इत्यादिश्रुतौ वृद्ध्याद्यभावमुक्त्वोपासनसद्भावमाशङ्क्य 'दर्शन्नेवाऽत्मानम्' इत्युपासनवतोऽप्यापत्तिविपत्तिशब्दोदितवृद्धिह्रासनिषेधान्महतां प्रत्यक्षेण च वृद्ध्याद्यभावस्य सिद्धत्वात्। 'मुक्तो न वृद्ध्यादिमान् तत्कारणशून्यत्वात्' इत्यनुमानसिद्धत्वाच्चेत्यर्थः। दर्शन् पश्यन्नुपासीन इत्यर्थः। परप्रत्यक्षस्या-प्रत्यक्षत्वात् कथं तेनास्माकमर्थसिद्धिरित्यत उक्तार्थे स्मृतिं चाऽह- **ब्रह्मवैवर्ते चेति**॥ भगवदुपासनस्य कारणस्य सद्भावात् कथं कारणाभाव इत्यत आह- हरेरिति॥ मुक्तिगतोपासनस्य फलत्वान्न सुखसाधनत्वमित्यर्थः॥ २१॥

सूत्रभाष्यम्

ॐ भोगमात्रसाम्यलिङ्गाच्च ॐ ॥ ४.४.२२ ॥

न च भोगविशेषादेविरोधः। 'एतमानन्दमयमात्मानमनुविश्य न जायते

न म्रियते न हसते न वर्धते यथाकामं चरति यथाकामं पिबति यथाकामं रमते यथाकाममुपरमते' (तै.उ.२-८) इति भोगमात्रसाम्यलिङ्गात्।

'अवृद्धिह्रासरूपत्वं मुक्तानां प्रायिकं भवेत्।
कादाचित्कविशेषस्तु नैव तेषां निषिध्यते॥' इति कौर्मे॥

'प्रवाहतस्तु वृद्धिर्वा ह्रासो वा नैव कुत्रचित्।
नाप्रियं किञ्चिदपि तु मुक्तानां विद्यते क्वचित्॥
कुत एव तु दुःखं स्यात् सुखमेव सदोदितम्।
भोगानां तु विशेषे(षु)तु वैचित्र्यं लभ्यते क्वचित्॥'

इति नारायणतन्त्रे॥ २२॥

॥ इति स्थित्यधिकरणम्॥ १०॥

तत्त्वप्रकाशिका

न मुक्तानां वृद्ध्यादौ कारणाभावो भोगविशेषसद्भावात्। कारणा-भावाभ्युपगमे च प्रामाणिकभोगविशेषविरोधादित्याशङ्कां परिहरत् सूत्रं पठित्वा व्याचष्टे- **भोगेति**॥ न मुक्तस्य वृद्ध्यादिकारणाभावाभ्युपगमे भोगविशेषश्रुत्यादिविरोधः। मुक्तभोगविशेषस्याऽनन्दादिवृद्ध्याद्यकारण-त्वात्। कुतः? 'एतमानन्दमयम्' इति श्रुतौ मुक्तस्य वृद्ध्याद्यभावमुक्त्वा भोगभावाभावावुच्येते। इदं च भोगमात्रस्य विशेषे सत्यपि मुक्तस्य साम्य-मेव। न भोगविशेषः तद्वृद्ध्यादौ कारणमित्यत्र लिङ्गमन्यथानुपपत्तिरिति भावः। ननु यदि भोगो न वृद्धिहेतुस्तर्हि व्यर्थोऽसौ किमिति तैः क्रियत इत्यत्र क्रीडयेति परिहारे स्थिते विशेषं चाऽह- **अवृद्धीति**॥ एतदेव स्मृत्यन्तरेण विवृणोति- **प्रवाहत इति**॥ न च वशित्वाद् वृद्धिरिति वाच्यम्। सा किं योग्यस्यायोग्यस्य वा। नाऽद्यः। तस्य प्राप्तत्वात्। न द्वितीयः। 'न चायोग्यं

विमुक्तोऽपि प्राप्नुयान्न च कामयेत्' इत्ययोग्यकामनिषेधात्। अतो मुक्तानां वृद्ध्याद्यभावेन न संसारसमानधर्मता मुक्तेरिति सिद्धम्॥ अ.१०॥

शेषतात्पर्यचन्द्रिका

॥ ॐ स्थितिमाह दर्शयतश्चैवं प्रत्यक्षानुमाने ॐ ॥ ४.४.२१॥

पेटिकासङ्गतिः

ननु मुक्तस्य भोगाङ्गीकारे तत्कृतवृद्ध्यादिकमङ्गीकार्यं स्यादिति संसारसमानधर्मत्वापत्तिरित्यादिबाधकोद्धारेण वृद्धिह्रासराहित्येनैव भोग इति तत्प्रकारविशेष एव चिन्त्यत इति पेटिकासङ्गतिः।

ननु मुक्तानां यदि जगत्सर्जनादौ शक्तिर्न स्यात् तर्हि भोगादावपि शक्तिर्न स्यात्। न च व्यापारो जगतो विष्णोर्मुक्तानां तु स्वभोगग इति भोगमात्रे श्रुत्यैव सामर्थ्यं क्लृप्तमिति वाच्यम्। तस्यैव विकल्पासहत्वात्। तथाहि। किं नीचोच्चभोगे मुक्तस्य सामर्थ्यमुत भोगमात्रे। नाऽद्यः। भोगस्याऽनन्दाभिव्यक्त्यर्थत्वेन तदभिव्यक्तानन्दादौ वृद्धिह्रासापातात्। कारणानुगुणत्वात् कार्यस्य। अत एव न द्वितीयः। निर्विशेषसामान्यस्यालीकत्वादिति पूर्वाक्षेपेणोत्थानादनन्तरसङ्गतिः।

पूर्वपक्षः

मुक्तोऽप्यानन्दवृद्ध्यादियुक्तः स्यात् साधनान्वयात्।
तत्कारणस्य भोगस्य तादृक्त्वं श्रूयते यतः॥

'एतत्साम गायन्नास्ते' (तै.उ. ३.१०) इत्यादिना सामगानाद्युपासा मुक्तस्यापि श्रूयते। सा चाऽनन्दाभिव्यक्तिहेतुरिति प्रसिद्धम्। तथा च मुक्तानन्दादिवृद्ध्याद्यभावे तत्साधनोपसनानुष्ठानं व्यर्थं स्यादिति तदङ्गीकार्यमेव।

यद्यपि 'हानौ तूपायनशब्दशेषत्वात्' (ब्र.सू. ३.३.२७) इत्यादौ स्वेच्छयैवोपासनमित्युक्तम्। तथाऽप्यागन्तुकफलाभावात् स्वेच्छयेत्यङ्गीकर्तव्यमित्युक्तम्। तथाहि तत्र 'साम्पराये तर्तव्याभावात्' (ब्र.सू. ३.३.२८) इति सूत्रान्तरम्। न तु 'स्वरूपानुबन्धिफलाभावात्' इति। यद्वा, वक्ष्यमाणयुक्तिभिः पूर्वोक्तस्य हानिनयस्याऽक्षेप इह क्रियते। तस्मादुपासनारूपकारणदशायां वृद्धिस्तदभावे ह्रासश्च न्याय्यः।

किञ्च भोगस्तावन्मुक्तानां नैकविधः। 'जक्षन् क्रीडन् रममाणः' (छा.उ. ८.१२.३) इत्यादौ बहुधा श्रवणात्। भोगश्चाऽनन्दानुभवार्थः। अन्यथा तद्वैयर्थ्यप्रसङ्गात्। तथा च भोगवृद्धावानन्दवृद्धिस्तद्ह्रासे च तद्ह्रासः कारणानुगुणत्वात् कार्यस्य। किञ्च मुक्तस्तावत्सत्यकामः। स यदाऽऽनन्दवृद्धिं कामयते तदा वृद्धिर्भवत्येवेत्यङ्गीकर्तव्यम्। 'न च कामस्तथा भूयात् ततः स्यात् सत्यकामता' इत्यादावेतत्परिहृतमिति चेन्न। बाह्यविषयकामनाया निरस्तत्वेऽपि स्वरूपविषयकामनाया अनिरस्तत्वादिति पूर्वः पक्षः।

सिद्धान्तः

श्रुतिप्रत्यक्षलिङ्गेभ्यो मुक्तो वृद्ध्यादिमान् नहि।
उपासनाफलात्मत्वात् कारणं नोपलभ्यते॥

मुक्तो यथा स्थित एव वर्तते न वृद्धिह्रासवान्। यद्यपि 'एतत्साम गायन्नास्ते' (तै.उ. ३.१०) इति श्रुतौ मुक्तस्योपासनोच्यते। तथाऽपि संसारावन्न साधनानुष्ठानादिनाऽऽनन्दादेर्वृद्ध्यादि शङ्कनीयम्। 'स वा एष एतस्मिन् ब्रह्मणि सम्पन्नो न जायते न वर्धते स्थित एव सर्वदा भवति' (ब्र.सू.भा.उ. जाबालश्रुतिः) इत्युक्त्वा कथमेकप्रकारेणैव सर्वदा स्थितिः ? ब्रह्मोपासनात्मदर्शनादेः साधनजातस्य सद्भावात् साधनस्य च साध्याविनाभूतत्वादानन्दवृद्ध्यादे-

रावश्यकत्वादिति स्वयमेव श्रुतिराशङ्क्य 'दर्शन्नेव ब्रह्म दर्शन्नेवाऽत्मानं तस्यैवं दर्शयतो नापत्तिर्न विपत्तिः' (ब्र.सू.भा.उ. जाबालश्रुतिः) इति स्वयमेव वृद्धिह्रासौ यतो निषेधति। 'न हीयते यत्र गत्वा यत्र गत्वा न वर्धते' इति मोक्षधर्मे स्पष्टं तयोर्निषेधाच्च। तथा चोपासादिसाधनसद्भावोऽप्रयोजकः।

किञ्च विद्वांसो हि मुक्तान् वृद्धिह्रासवर्जितान् प्रत्यक्षेणाध्यवस्यन्ति। न च तत्र विविदितव्यम्। 'विद्वत्प्रत्यक्षसिद्धत्वात्' (ब्र.सू.भा.उ. ब्रह्मवैवर्तवचनम्) इति वचनात्। मुक्तो न वृद्ध्यादिमान् तत्कारणशून्यत्वादित्यनुमानेन च वृद्ध्याद्यभावसिद्धिः। न चात्र हेतुरुपासनाख्यसाधनसद्भावादसिद्ध इति वाच्यम्। 'हरेरुपासना चात्र सदैव सुखरूपिणी। न तु साधनभूता सा सिद्धिरेवात्र सा यतः॥' (ब्र.सू.भा.उ. ब्रह्मवैवर्तवचनम्) इति सयुक्तिकं मौक्तिकोपासनस्य साधनत्वनिषेधात्। न च विचित्रभोगरूपसाधनसद्भावात् पुनरप्यसिद्धो हेतुः। मुक्तो वृद्ध्यादिमान् तत्कारणभोगवृद्ध्यादिमत्वात्। अन्यथा भोगविशेषविरोधः। मुक्तानां भोगसद्भावश्च 'स तत्र पर्येति' (छा.उ. ८.१२.३) इत्यादिप्रमाणसिद्ध इति वाच्यम्। भोगसद्भावस्य प्रामाणिकत्वेऽप्यानन्दवृद्ध्यादिकारणत्वस्याप्रामाणिकत्वात् प्रत्युत 'एतमानन्दमयमात्मानमनुविश्य न जायते न म्रियते न ह्रसते न वर्धते' (तै.उ. २.८) इत्यानन्दवृद्ध्यादिशून्यतामभिधाय 'यथाकामं पिबति यथाकामं रमते यथाकाममुपरमते' (तै.उ. २.८) इत्युपरमशब्दादिना भोगसदसद्भावावभिधीयेते। न चैतद्भोगस्य वृद्ध्यादिकारणत्वे सम्भवतीति।

भोगस्य वृद्ध्यादिकारणत्वाभावे मुक्तैस्तदनुष्ठानं न स्यात्। किञ्च 'भोगानां तु विशेषेषु वैचित्र्यं लभ्यते क्वचित्' (ब्र.सू.भा.उ. नारायणतन्त्रवचनम्) इत्यादावानन्दवैचित्र्यं प्रति भोगवैचित्र्यस्य हेतुत्वं प्रतीयते। अत एव च ज्ञानोत्तरकृतकर्मणां विचित्रभोगद्वाराऽऽनन्दवैचित्र्यं प्रति हेतुत्वम् 'अस्माद्ध्येवाऽत्मनो यद्यत् कामयते तत्तत्सृजते न ह्यस्य कर्म क्षीयते' इत्यादेः। तस्मात् कारणशून्यत्वहेतुरसिद्ध इति चेन्न। बहुतरवृद्धिह्रासकारणशून्यत्वादिति हेतुविवक्षणात्। न चायमप्यसिद्धः। भोगानां तु वैचित्र्यं लभ्यते क्वचिदित्यत्राल्पवृद्ध्यादिकारणत्वोक्तेः। न चाल्पवृद्ध्यादिमति व्यभिचारः शङ्कनीयः। बहुतरानन्दवृद्ध्यादिशून्यत्वस्यैव साध्यत्वेन विवक्षणात्। न चाल्पवृद्ध्यादिसत्त्वे मुक्तत्वव्याघातः।

'अवृद्धिह्रासरूपत्वं मुक्तानां प्रायिकं भवेत्।
कादाचित्कविशेषस्तु नैव तेषां निषिध्यते॥' (ब्र.सू.भा.उ. कौर्मवचनम्)
'प्रवाहतस्तु वृद्धिर्वा ह्रासो वा नैव कुत्रचित्।
नाप्रियं किञ्चिदपि तु मुक्तानां विद्यते क्वचित्।
कुत एव तु दुःखं स्यात् सुखमेव सदोदितम्॥'
(ब्र.सू.भा.उ. नारायणतन्त्रवचनम्)

इति वचनेनैव व्यवस्थापनादिति सिद्धान्तः।

टीकाक्षरार्थः

टीकायां वशिताख्यपूर्वपक्षन्यायविवरणव्याख्यानम्

टीकाक्षरार्थस्तु- वशिता चेत्युक्तन्यायं साध्यप्रदर्शनेन विवृण्वत्,

'न च वशित्वान्मुक्तस्यापि वृद्धिः।'

इति वाक्यं व्याचष्टे- **किञ्चेति**॥ अनेन कामिताशेषप्राप्तेरानन्दादिवृद्धिरपि कामित्वात् मुक्तस्य वशित्वात्। वश कान्तौ। कान्तिरिच्छा। आनन्दवृद्धीच्छुत्वात् कामिताशेषस्यापि स्ववशीकृतत्वाच्च मुक्तस्याऽनन्दवृद्धिरस्ति। अन्यथा तत्साधनोपासनाद्यनुष्ठानं न स्यादित्यंशाध्याहारेण विवरणं योज्यमिति सूचितम्।

टीकायां कृतनिःश्रमत्वरूपसिद्धान्तन्यायविवरणव्याख्यानम्

कृतनिःश्रमश्चेत्युक्तन्यायं विवृण्वत्,

'कृतकृत्यत्वेन निःश्रमत्वादुपासनादावभ्यासपाटवान्निर्दोषत्वात् स्नेहाधिक्याच्च तस्यैव परमसुखरूपत्वेन फलरूपत्वात्।

''अभ्यासपाटवात् स्नेहादश्रमत्वादुपासना।
भक्तिश्च सुखरूपैव मुक्तानां न तु साधनम्॥'' इति च श्रुतिः।'

इति वाक्यमानन्दादिवृद्धिसाधनोपासनाद्यनुष्ठानं न स्यादित्यध्याहृतबाधकोद्धारपरतया योजयितुं भाष्येण सहावतारयति- **भगवदुपासनमिति॥**

तथा च यदुक्तमानन्दादिवृद्ध्यभावे तत्साधनानुष्ठानं न स्यादिति। तदयुक्तम्। अनिष्टत्वाभावादिति। न हि मुक्तः साधनमनुतिष्ठतीति युज्यते। तस्य कृतकृत्यत्वेन मुक्तत्वव्याघातात्। ननु मुक्तः साधनं नानुतिष्ठतीति कोऽर्थः। उपासनादि स्वरूपत एव नानुतिष्ठत्युत साधनत्वेन। नाऽद्यः। 'एतत्साम गायन्नास्ते' (तै.उ. ३.१०), 'जक्षन् क्रीडन् रममाणः' (छा.उ. ८.१२.३) इत्यादिश्रुतिविरोधात्। न द्वितीयः। अनुष्ठानाभावप्रसङ्गात्। सुखदुःखावाप्तिहान्यन्यतरत्वाभावेन स्वतः पुरुषार्थत्वाभावादिति चेन्न। यद्यप्युपासनाऽनुष्ठीयते। तथाऽपि न साधनत्वेनेत्यङ्गीकारात्।

नन्वेवमुपासनादौ प्रवृत्तिरेव न स्यादित्युक्तमिति चेत्। तत्किं निष्फलोपासनादौ वृथा श्रमः कृत इत्येवमापाद्यत उत निमित्ताभावाद् अथ निषिद्धस्याप्येवमनुष्ठानप्रसङ्गादिति अथवा सुखावाप्त्याद्यन्यतमत्वाभावादिति विकल्प्याऽद्यं निराकरोति- **निश्रमत्वादिति॥** हेत्वाकाङ्क्षायां कृतकृत्यत्वेनेत्येतदत्राप्यनुषज्यते। तेन कृतनिश्रमश्चेति न्यायमालायां भावप्रधानो निर्देशः। कृतशब्देन कृतकृत्यत्वं लक्ष्यत इत्युक्तं भवति। द्वितीयं निराचष्टे- **अभ्यासपाटवादिति॥** उपासनादावित्यत्रापि सम्बद्ध्यते। अभ्यासपाटवं निष्फलजलताडनादिप्रवृत्तौ निमित्तं

दृष्टमिति भावः। निश्रमत्वाभ्यासपाटवाभ्यां यदि प्रवृत्तिस्तर्हि निषिद्धागम्यगमनादावपि प्रवृत्तिः स्यात् तयोस्तत्राप्यविशेषात्। अतः तृतीयं पक्षं निषेधति- **निर्दोषत्वादिति॥** चतुर्थं निषेधति- **तस्यैवेति॥** तथा च सुखावाप्त्याद्यन्यतमत्वाभावोऽसिद्ध इति भावः। नन्विदमयुक्तम्। उपासनादेः सुखरूपत्वाननुभवात्। अन्यथा संसारदशायामपि सुखरूपत्वं स्यादित्यत आह- **स्नेहाधिक्याच्चेति॥** युक्तमुपासनाभक्त्यादेर्मुक्तावेव परमसुखरूपत्वमुपासनीये भजनीये च हरौ मुक्तानां स्नेहाधिक्यसद्भावात्। यद्यपि सात्त्विकानामिदानीमप्यस्ति स्नेहः। तथाऽपि ततो नाधिक्यम्। स्वस्वयोग्यतापर्याप्तस्नेहपूर्तेराधिक्यशब्दार्थत्वात्। न चेयं सदोषे संसारिणि सम्भवति। दृश्यन्ते च स्वाचार्यादौ स्नेहाधिक्यात् तच्छुश्रूषणमेव परमसुखं मन्यमाना लोकेऽपीति भावः। चशब्दोऽत्रातो न साधनरूपत्वमित्यध्याहारं सूचयति। अत्र पञ्चम्यन्तानां विकल्पिततत्तत्पक्षनिराकरणेन सम्बन्धः। विशिष्टस्याप्युपासनादेः साधनत्वं नास्तीत्यध्याहृतेन सम्बन्धः। अत्र हेतूनामसिद्धिपरिहाराय प्रमाणं पठति- **अभ्यासेति॥** योजना तु पूर्ववदेवेति विवरणार्थः।

ननु 'वशित्वान्मुक्तस्यापि वृद्धिः' इति श्रुतस्य दूषणं नोपलभ्यते। कृतकृत्यत्वेनेत्यादेरध्याहृततर्कदूषणत्वेन व्याख्यातत्वादित्यतस्तत्स्वयमनूद्य निराचष्टे- **न च वशित्वादिति॥ सा किमिति** वशधात्वर्थकान्तिरूपेच्छायोग्यस्याऽनन्दादेर्विषये उतायोग्यस्य। नाऽद्यः। तस्य प्राप्तत्वात् तत्रेच्छाऽयोगात्। न द्वितीयः। न चेत्यादिवचनेनैवायोग्यकामनाया निषेधात्। तथा चाऽनन्दवृद्धीच्छात्वमेवासिद्धमित्यर्थः। यद्वा, सेति प्रकृता वृद्धिरेव परामृश्यते। योग्यानन्दादेः प्राप्तत्वाद् वृद्ध्यसम्बन्धः। स्वयोग्यतापर्याप्तानन्दानवाप्तौ मुक्तित्वव्याघातः। अयोग्यविषये इच्छाया एवानुदयेनायोग्यानन्दवृद्धेरनपेक्षितत्वात् तद्वृद्धौ सत्यकामत्वव्याघात इत्यर्थः।

सूत्रार्थः

सूत्रार्थस्तु- 'स एष एतस्मिन् ब्रह्मणि सम्पन्ने' (ब्र.सू.भा.उ. जाबालश्रुतिः) इति जाबालश्रुतिरेकप्रकारेणैव मुक्तानां सर्वदा **स्थितिमाह**। महतां प्रत्यक्षं कारणाभावानुमानं च। एते **प्रत्यक्षानुमाने** च विवक्षितां **स्थितिं दर्शयतः**। अत्र प्रत्यक्षमनुमानं चाऽगमान्तरेण साधनीयम्, न तु श्रुतिवदसन्दिग्धमिति विशेषद्योतनाय प्रमाणानां विभागेनोक्तिः। नन्वनुमानमयुक्तम्। प्रमाणसिद्ध-भोगविरोधादित्यत्रोच्यते। साम्यं मुक्तस्यैकप्रकारेणावस्थितिः। भोगमात्रेण सहितं साम्यं **भोगमात्रसाम्यम्**। भोगमात्रसाम्याख्यलिङ्गदर्शनान्न कारणसद्भावो मन्तव्यः। तथाहि लिङ्गदर्शनम्- 'न ह्रसते न वर्धते रमते उपरमते' (तै.उ. २.८) इति। न हि भोगस्य वृद्ध्यादिकारणत्वमते 'न वर्धते उपरमते न ह्रसते' (तै.उ. २.८) इति चोक्तिः सम्भवति। एतच्छङ्कानिरासससहितस्यानुमानस्य विवक्षितार्थसाधकत्वाच्चशब्द इति॥ १०॥

॥ इति स्थित्यधिकरणम्॥ १०॥

॥ अथानावृत्त्यधिकरणम्॥ ११॥

सूत्रभाष्यम्

ॐ अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् ॐ ॥ ४.४.२३ ॥

'न च पुनरावर्तते न च पुनरावर्तते' (छा.उ.८-१५-१) 'सर्वान् कामा-नाप्त्वाऽमृतः समभवत् समभवत्' (ऐ.आ.२-५-८-१५) इत्यादिश्रुतिभ्यः ॥ २३॥

॥ इत्यनावृत्त्यधिकरणम्॥ ११॥

ज्ञानानन्दादिभिः सर्वैर्गुणैः पूर्णाय विष्णवे।
नमोऽस्तु गुरवे नित्यं सर्वथाऽतिप्रियाय मे॥

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
बट् तद्दर्शतमित्थमेव निहितं देवस्य भर्गो महत्।
वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपुः
मध्वो यत्तु तृतीयकं कृतमिदं भाष्यं हरौ तेन हि॥

नित्यानन्दो हरिः पूर्णो नित्यदा प्रीयतां मम।
नमस्तस्मै नमस्तस्मै नमस्तस्मै च विष्णवे॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रभाष्ये चतुर्थाध्यायस्य चतुर्थः पादः ॥ ४ ॥ ४ ॥

॥ ग्रन्थश्चायं सम्पूर्ण ः ॥

॥ श्रीकृष्णार्पणमस्तु ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र ब्रह्म प्राप्य भोगान् भुञ्जानस्य मुक्तस्यापुनरावृत्तिसमर्थनादस्ति शास्त्रादिसङ्गतिः। प्रकृतो मुक्त एवात्र विषयः। किं तस्य पुनरावृत्तिरस्ति न वेति सन्देहः। उभयथा सम्भवः सन्देहबीजम्।

पूर्वपक्षः

अस्ति मुक्तस्य पुनरावृत्तिरिति पूर्वः पक्षः। स्वर्गादिगतानां पुनरावृत्तिदर्शनात्। न च स्वर्गादिगतानां युगमन्वन्तरादिमात्रवासित्वाद्युक्ता पुनरावृत्तिर्न मुक्तस्य तस्य, समस्तकालवासित्वादिति वाच्यम्। समस्तस्यापि कदाचित् समाप्तिसम्भवात्। न च कालस्यानन्तत्वात् तत्समाप्त्ययोगः। भारतयुद्धे त्रयोदश्या एव पञ्चदशीत्वदर्शनात्। तत्र तिथित्रयस्य युगपत्समाप्तिवदनन्तत्वेऽपि कालस्य समस्तस्यापि युगपत्समाप्तिसम्भवात्। अतो मुक्तौ पुनरावृत्तिसद्भावादपुरुषार्थता मुक्तेरिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य तदुपात्तश्रुतीरेवोदाहरति- **अनावृत्तिरिति**॥ न मुक्तस्य पुनरावृत्तिः। 'न च पुनरावर्तते' इति श्रुतेः। किं च मुक्तस्य सर्वकामावाप्तिः श्रूयते- **सर्वान् कामानिति**॥ ततश्च न तस्य पुनरावृत्तिः। न हि कश्चित् पुमान् पुनरावृत्तिकामोऽस्तीति भावः। समस्तकालसमाप्तिस्तु व्याहतत्वादुपेक्षणीयैव। समस्तशास्त्रावधारणार्था सूत्रस्यैव द्विरुक्तिः। अतो मुक्तानां पुनरावृत्त्यभावाद् युक्तं मुक्तेः पुरुषार्थत्वमिति सिद्धम्॥ २३॥ अ. ११॥

तदेवं विरक्तिभक्त्युपास्तिजनितभगवत्साक्षात्कारोदिततत्प्रसादादशेषपुरुषार्थप्रवरकैवल्यसिद्धेरशेष-गुणपूर्णतया निर्दोषतया च भगवान्नारायणो जिज्ञास्य इत्यशेषमतिमङ्गलम्। अथायं भाष्यकारो यं गुणगणार्णवतया प्रतिपादितवान् यच्छिष्यतया चैतादृशीमतिविशदां संविदं लब्धवान् यस्मिंश्चाऽत्मनो निरुपाधिकप्रीतिस्तमेव देवतात्वेन गुरुत्वेन चान्तेऽपि नमति- **ज्ञानेति**॥ १॥

अथ स्वभाषितभाष्यस्याऽप्तिमूलत्वसमर्थनाय श्रुतिप्रसिद्धं स्वस्य परमाप्तत्वं दर्शयन्नाह- **यस्येति**॥ यस्य वायोर्देवस्य बळित्थेत्यादिवेदवचने क्रीडादिगुणयुक्तानि त्रीणि रूपाण्युदितानि तस्य यत् तृतीयं रूपं तेनेदं भाष्यं हरिविषयतया कृतमित्यन्वयः। कीदृशं चास्य मूलरूपं कानि च त्रीणि रूपाणि कीदृशानीति तत्राऽह- **अलमिति**॥ यदस्य वायोर्मूलरूपं बट् बलात्मकं दर्शतं ज्ञानरूपं भर्गो जगद्धरणगमनगुणं महन्महनीयं तदित्थम्भूतमेव रूपत्रयावताराय भगवता निहितं प्रेरितमवतीर्णं च। तत्र प्रथमं हनुमदाख्यं वपुः रामस्य वचांसि सीतां प्रति नीतवत्। रामविषयवचांसि मूलरामायणरूपाणि शिष्येषु नीतवत्। रामवचसि यो नयो न्यायः आज्ञारूपस्तद्युक्तं वा। द्वितीयं वपुर्भीमनामकं कुरुपृतनाक्षयकरम्। तृतीयं तु वपुरानन्दरूपस्य हरेः प्रतिपादकशास्त्रनिर्मातृमध्वाभिधमिति। अतः परमाप्ततमप्रणीतत्वादिदं भाष्यं सकलसुजनैरादरेणाङ्गीकार्यमिति भावः॥ २॥ ३॥

उत्पत्तिस्थितिसंहृतिप्रभृतयो भावा भवन्त्याज्ञया
पद्मापद्मभवादिसर्वजगतो व्यस्ताः समस्ताः सदा।
यस्यागण्यगुणाकरस्य करुणापीयूषवारां निधेः
सोऽयं दूरनिरस्तदोषनिकरः प्रीतोऽस्तु नारायणः॥ १॥

अगाधबोधैर्विवृतातिभावभाष्यानुवादेन न मेऽपराधः।
न हीन्दिराराध्यपदो मुकुन्दो दूर्वाङ्कुरैर्मन्दधनैरपूज्यः॥ २॥

मध्वदुग्धाब्धिसम्भूतभाष्येन्दूदितकौमुदी।
भूयात् सत्कुमुदानन्ददात्री तत्वप्रकाशिका॥ ३॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्ब्रह्मसूत्रभाष्यस्य टीकायां श्रीमज्जयतीर्थमुनिविरचितायां तत्वप्रकाशिकायां चतुर्थाध्यायस्य चतुर्थः पादः ॥

॥ चतुर्थाध्यायः सम्पूर्णः ॥

शेषतात्पर्यचन्द्रिका

॥ ॐ अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॐ ॥ ४.४.२३ ॥

सङ्गतिः

अत्र मुक्तस्यापुनरावृत्तिप्रतिपादनेन पूर्वोक्तस्थितौ बाधकोद्धारेण भोगे प्रकारविशेष एव चिन्त्यत इति पेटिकासङ्गतिः।

ननु यदुक्तं सर्वदा मुक्त एकप्रकारेणैव तिष्ठतीति। तदयुक्तम्। तथाहि। किं सर्वदेति क्लृप्तकालपर्यन्तमित्यर्थ उत निर्मर्यादमिति। नाऽऽद्यः। स्वर्गादि-साधारण्यप्रसङ्गात्। न द्वितीयः। स्वर्गादौ पुनरावृत्तिदर्शनेन तत्काल-समाप्तिवदिहापि मुक्तिकालसमाप्तिसम्भवात्। न च तत्कालस्य कदाऽपि न समाप्तिर्दृष्टेति वाच्यम्। कस्मिंश्चित्काले तथा दर्शनेऽपि कालस्यानन्तत्वादेव बहुतिथे काले समस्तकालस्यापि समाप्तिसम्भवात्। दृष्टं च कदाऽपि त्रयोदशदिने पञ्चदशत्वमदृष्टमपि कदाचिद्भारतयुद्धादौ तिथिद्वयक्षयेण त्रयोदशदिनस्यापि पञ्चदशत्वम्। यथा च भारतयुद्धात् पूर्वं कदाप्यदृष्टस्यापि तिथिद्वयक्षय-

कालस्यानन्तत्वात् कदाचित्तिथिद्वयक्षयोऽपि सम्भावितः, तथा मुक्तावपि बहु-कालविलम्बेन सर्वतिथिक्षयोऽपि स्यादिति समस्तकालप्रवृत्तिर्दुर्घटस्याशेषस्यापि सम्भवान्न युक्तैव। तस्मान्मुक्तकालस्याशेषस्य समाप्तौ स्वर्गादिवत् पुनरावृत्ति-शङ्काया अनिवारणात् सर्वदा मुक्तानामेकप्रकारेणैव स्थितिमाहेत्ययुक्तम्। श्रुतेरुपचरितार्थत्वस्यैव न्याय्यत्वादिति पूर्वाक्षेपेणोत्थानादनन्तरसङ्गतिः।

पूर्वपक्षः

पुनरावर्तते मुक्तलोकं गत्वा विशेषतः।
निर्बीजत्वादिवैषम्यं सम्भावननिराकृतम्।
अनन्तकाले सम्भाव्यं दुर्घटं किञ्च नेष्यते।
यतो भारतयुद्धादौ तिथिद्वयविलोपनम्॥ इति पूर्वः पक्षः।

सिद्धान्तः

सिद्धान्तस्तु-

सर्वान् कामानिति श्रुत्या सर्वकामाप्तिरुच्यते।
न चासौ पुनरावृत्तौ युज्यते मुक्तिभाजने।
न चायं कामयेत् क्वापि पुनरावृत्तिमात्मनः।
भगवत्कामकामित्वान्मुक्तत्वव्याहतेरपि॥ इति।

उभयमताभ्युपगतानावृत्त्यधिकरणशरीरम्

यत्तूभाभ्यां जगद्व्यापारवर्जमित्यादिसप्तसूत्रीं द्वितीयस्य प्रथमशेषतया पाठं परिकल्प्य षट्सूत्रीं विधायोक्तम्। पूर्वाधिकरणोक्तं मुक्तस्य सङ्कल्पमात्रेणैव स्व-स्यापेक्षितानेकदेहादिस्रष्टृत्वादिरूपमैश्वर्यं निरवग्रहमुत सावग्रहमिति संशये।

स्वाराज्यकामचारादिश्रुतिभ्यः स्यान्निरङ्कुशः।
स्वकार्य ईश्वराधीनसिद्धिरप्यत्र साधकः॥

'आप्नोति स्वाराज्यम्' (तै. १.६.२) 'सर्वेऽस्मै देवा बलिमावहन्ति' (तै. १.५.३) 'सर्वेषु लोकेषु कामचारो भवति' (छा.उ. ७.२५.२) इत्यादिश्रुतिभ्यो विदुषः परब्रह्मण इव निर्मर्यादमनन्याधीनजगत्सृष्ट्यादिव्यापाररूपमैश्वर्यमेव गम्यते। नन्वस्य ब्रह्मोपासनालब्धमैश्वर्यं कथमतदधीनम्? सत्यमुत्पत्तौ तदधीनं न तु स्वकार्ये। न हि कारणाधीनजन्मानो भावाः स्वकार्ये स्वकारणमपेक्षन्ते। अतः स्वकार्ये स्वतन्त्रा एव मुक्ताः। यथाऽऽहुर्भाट्टाः-

'मृत्पिण्डदण्डचक्रादि घटो जन्मन्यपेक्षते।
उदकाहरणे त्वस्य तदपेक्षा न विद्यते॥' इति।

'न च यदधीनोत्पादं यस्य रूपं तत् तद्रूपादूनं भवति' इति व्याप्ते-रीश्वराधीनोत्पादं मुक्तैश्वर्यमीश्वरादूनमेवेति कथं तदैश्वर्यस्य सर्वविषयत्वरूपं निरङ्कुशत्वमिति वाच्यम्। गुर्वधीनविद्यस्याप्यन्तेवासिनः महाराजाधीनराज्यस्यापि दुष्टसामन्तराजादेश्च गुर्वादिसाम्याधिक्ययोर्दर्शनात्। अत एव स्पर्धमाना विजयमाना वा दृश्यन्ते। तदिह निरतिशयैश्वर्यत्वात् परमेश्वरस्य मा नाम भूवंस्तदधिका मुक्ताः। समास्तु भविष्यन्ति। 'निरञ्जनः परमं साम्यमुपैति' (मुण्डक.उ. ३.१.३) इति स्पष्टश्रुतेश्च। तथा च न तदधीनाः। नहि समप्रधानभावानामस्ति मिथोऽपेक्षा। तदेते स्वतन्त्राः सन्तस्तद्व्यापारे जगत्सर्जनेऽपि प्रवर्तेरन्निति प्राप्तेऽभिधीयते।

'नित्यत्वादनपेक्षत्वाच्छ्रुतेस्तत्प्रक्रमादपि।
ऐकमत्याच्च विदुषां परमेश्वरतन्त्रता॥'

जगत्सर्जनं हि कार्यं कारणैकस्वभावस्यैव हि भवतु, आहो कार्यकारण-स्वभावस्य। तत्रोभयस्वभावस्य स्वोत्पत्तौ मूलकारणापेक्षस्य पूर्वसिद्धः पर-मेश्वर एव कारणमभ्युपेतव्य इति स एवैकोऽस्तु जगत्कारणम्। तस्यैव नित्यत्वेन

स्वकारणानपेक्षस्य क्लृप्तसामर्थ्यात्। कल्प्यसामर्थ्यास्तु जगत्सर्जनं प्रति विद्वांसः। न च जगत्स्रष्टृत्वमेतेषां श्रूयते। श्रूयते तत्र भवतः परमेश्वरस्यैव, तमेव प्रकृत्य सर्वासां जन्मश्रुतीनां प्रवृत्तेः।

अपि च समप्रधानानां न नियमवदैकमत्यं दृष्टमिति यदैकः सिसृक्षति तदैवेतरः सञ्जिहीर्षतीत्यपर्यायेण सृष्टिसंहारौ स्याताम् न वोभावपि। साम्यश्रुतिस्त्वनव-धिकातिशयानन्दब्रह्मानुभवे मुक्तसाम्यं प्रतिपादयति। ब्रह्म हि स्वस्य परस्य वाऽनुभूयमानमविशेषेण। न वाऽधिकातिशयानन्दाय भवति। आनन्द-स्वरूपत्वाविशेषादिति।

तन्निरासः

तन्न। सङ्कल्पादेवेत्यक्षरस्वारस्येन देहादिसृष्टौ स्वातन्त्र्याभिधानादिह पुनस्तन्निषेधायोगात्।

'मनःशरीरसर्गादावैश्वर्यं यदुपासितुः।
जगत्सर्गे तदुत्सृष्टमिह मानादपोद्यते॥'

इति कल्पतरूक्तेर्नायं दोष इति चेत्।

न। किमत्र मनःशरीरादावुत्सृष्टं कर्तृत्वमपोद्यत उत स्वातन्त्र्यम्। नाऽद्यः। 'सङ्कल्पातिरिक्तसाधनभावाभावयोरेकोपाधावापाततो विरोधात् लोकसिद्ध-पदपदार्थोपजीवित्वाच्छ्रुतेर्दौर्बल्याल्लोकसिद्धानुमानाद् बाध इति पूर्वपक्षयति' इति सङ्कल्पाधिकरणावतारकल्पतरुणा।

यत्नानपेक्षः सङ्कल्पो लोके वस्तुप्रसाधनः।
न दृष्टः सोऽत्र यत्नस्य लाघवात् अवधारितः॥'

इति भामत्या, 'तत्र किं सङ्कल्प एव केवलः पित्रादिसमुत्थाने हेतुरुत

निमित्तान्तरसहितः' इति भाष्येण च विरोधात्। तत्र ह्यनन्यापेक्षत्वमेवोत्सृष्टं प्रतीयते । न तु कर्तृत्वम् । येन जगत्सृष्ट्यादौ तदपोद्येत । न द्वितीयः । स्वातन्त्र्यमात्रापवादेऽपि जगद्व्यापारे कर्तृत्वस्यानपवादात् 'कल्प्यमान-सामर्थ्यास्तु जगत्सर्जनं प्रति विद्वांसः' इत्यादिना कर्तृत्वनिषेधायोगाद् इहस्थभाष्यभामतीकल्पतरुविरोधाच्च। 'आप्नोति स्वाराज्यम्' (तै.उ. १.६.२) इत्यादिपूर्वपक्ष्युदाहृतश्रुतिषु जगत्स्रष्टृत्वाद्यप्रतीतेर्मन्दश्चायं पूर्वपक्षः । नहि स्वाराज्यपदप्राप्तिमात्रेण जगत्स्रष्टृत्वमाक्षिप्यते। राजादौ तददर्शनात्। 'परमं साम्यमुपैति' (मु.उ. ३.१.३) इत्येतदपि न स्पष्टं पूर्वपक्षस्य प्रापकम् । चेतृत्वानन्दित्वादिसाम्येऽप्युपपत्तेः। नहि परमशब्दोपपादितं सर्वसाम्यं भिन्नयोः कथञ्चिदपि मुख्यमुपपादयितुं शक्यम् । भेदस्यैवानुपपत्तेः । अन्तर्याम्यधि-करणादावीश्वरस्य सर्वनियामकत्वोक्तेश्च।

सिद्धान्तश्चायुक्तः। ईश्वरस्य मायावच्छिन्नतया नित्यत्वानुपपत्तेरनादिभावस्य नित्यत्वमिति प्रतिबन्धोऽनाद्यविद्यायां त्वयैवोत्सृष्टः। अन्यथाऽनादिनित्यस्येश्वरस्य सत्त्वापत्त्याऽद्वैतहानेः । न चायमीश्वरः त्वन्मते कारणैकस्वभावः । अविद्या-तत्कार्ययोरन्यतरत्वाभावे तस्य मिथ्यात्वासिद्धेः। न च मिथ्याप्रपञ्चोपाधिक ईश्वरः सत्योऽभ्युपगम्यते । न च मुक्तस्य स्वशरीरादिस्रष्टृत्ववज्जगत्स्रष्टृत्वे किञ्चिद्बाधकमस्ति। प्रत्युतागस्त्यप्रभृतीनामप्यनन्यसाध्यसमुद्रपानादिव्यापारः श्रूयते। तर्हि जीवस्य स्वातन्त्र्यापत्तिर्बाधिकेति चेन्न। स्वशरीरादिसृष्टावपि तस्या एव बाधकत्वात् । न चेश्वराधीनमेव तत्रैश्वर्यम् । जगद्व्यापारेऽपि तथाऽङ्गी-कार्यत्वात्। समप्राधान्याङ्गीकारेऽपि न दोषः। लोके समप्रधानानामैकमत्या-दर्शनेऽप्यलौकिकानां मुक्तानां तत्सम्भवात्। अन्यथेश्वरावतारत्वेन समप्रधानानां हरिहरहिरण्यगर्भाणां जगद्व्यापारे कर्तृत्वं न स्यात्। तेष्वपि यदा हिरण्यगर्भः सिसृक्षति तदा हरः सञ्जिहीर्षति हरिर्वा प्रतिष्ठापयिष्यतीत्यादिवाचोभङ्ग्याः

साम्यात्। स्वरूपैक्येन तेषां यदि न मतिभेदस्तदा प्रकृतेऽपि कुतो मतिभेदः । त्वन्मते चेतनमात्रस्य स्वरूपैक्यसिद्धेः।

यच्चोक्तम्- मुक्तानामीश्वरेण समप्राधान्यमयुक्तम्। यतः परमेश्वराधीनमैश्वर्यं श्रूयते। तस्मात्ततो न्यूनमेवैश्वर्यमणिमादिमात्रं न तु जगत्स्रष्टृत्वमिति। तन्न। यदधीनोत्पादं यस्य रूपं तत्तद्रूपादूनमिति प्रतिबन्धस्यान्तेवासिसामन्तादौ व्यभिचारदर्शनात्।

रामानुजमतेऽनावृत्त्यधिकरणानुपपत्तिः

यद्यपि नैते दोषा अनन्तरमते सन्ति । जीवेश्वरादिभेदस्य सत्यत्वाङ्गी-कारात्। तथाऽपि 'परमं साम्यमुपैति' (मु.उ. ३.१.३) इति श्रुतेर्जगत्स्रष्टृ-त्वादिकमपि स्यादेव । तन्मते मुख्यसाम्यस्यैवोपपादनीयत्वात् । अन्यथा चेतनत्वसाम्येऽप्युपपत्त्याऽऽनन्दसाम्ये प्रमाणाभावेनाऽनन्दश्रुत्युक्त-तारतम्यनिराकरणायोगात् । 'अनवधिकातिशयानन्दे मुक्तस्यानुभवितृत्वेन स्थितिमाह' इति कोऽर्थः। यदि तादृशानन्ददातृ ब्रह्म भवतीत्यर्थस्तदा स्वस्य परस्य वेत्यनुपपन्नम्। नहि स्वयं स्वस्याऽनन्ददम्। न वा परस्यापर्याप्तानवधि-कानन्ददम् । 'एतस्यैवाऽनन्दस्य मात्रामुपजीवन्ति' इति श्रुतेः । यदि तादृशानन्दतयाऽनुभवगोचरं ब्रह्म भवतीति तथाऽपि साम्यमुपचरितमेव । एकवस्तुविषयकज्ञानसद्भावमात्रेण मुख्यसाम्याभावात् । किञ्च मुक्तस्या-नवधिकानन्देन साम्ये समप्रधानभावस्य दुर्वारतया पूर्वपक्षनिराकरणायोगः । आनन्देन साम्ये स्वातन्त्र्येण साम्यस्यानिवारणादधिकरणार्थासिद्धिश्च।

अद्वैतमोक्षेऽनावृत्तेरयोगः

किञ्च त्वन्मतेऽर्चिरादिमार्गेण ब्रह्मलोकं प्राप्तस्य भोगादेर्मिथ्यात्वेन तत्वमस्यादिवाक्यार्थोपासनापराणां सम्यग्दर्शनविध्वस्ततमसां नित्य-

निर्वाणस्वरूपावस्थानाङ्गीकारेण निर्वाणस्वरूपस्य चैतन्यमात्रस्य संसारिष्वनपायात्पुनः संसारापत्तिर्दुर्वारित्यावृत्तिराहित्येन सिद्धान्तो दुःशकः। नहि त्वन्मते नित्यनिर्मुक्तचेतनो विविक्तोऽस्ति। येन तद्भावापन्नस्य न संसारे परिवृत्तिः। न वा मुक्तस्यौपाधिकभेदोऽस्ति। तस्मान्नैवमधिकरणार्थः।

'शेषाः प्रलापा अनुभाष्यमाणा यन्मादृशैरप्यथ दूषणाय।
प्रामाणिकत्वं मतिहीनपुंसां समावहेयुस्तदुपेक्षितास्ते।
अनूदितेष्वप्यथ नास्ति सत्त्वं तथाऽपि नास्मत्कृतिनिह्नवः स्यात्।
ईशाद्भुताचिन्त्यविशिष्टशक्तेः प्रवर्तितत्वात् तदनिन्दनस्य ।
महातमःप्राप्तिनिदानताया मदीयपूर्वाचरितत्वतश्च।
सेव्या कृतिर्मद्गुहरिप्रणीता स्वार्थेषु मात्सर्यमिदं कुतो वः॥'

टीकाक्षरार्थः

टीकायां पूर्वपक्षीयविश्वसम्भावनान्यायविवरणव्याख्यानम्

टीकाक्षरार्थस्तु- विश्वसम्भावनेत्युक्तन्यायं विवृण्वत्,

'न चानन्तत्वात् कालस्य त्रयोदशींपञ्चदशीवत् कदाचित्समस्तस्यापि सम्भवान्मुक्तस्यापि पुनरावृत्त्याशङ्केति वाच्यम्।'

इति वाक्यं व्याचष्टे- **अस्ति मुक्तस्येति**॥ अनेन शङ्काशब्द आक्षेपपरः। पुनरावृत्तिविषयकाक्षेपः। न तु संशयमात्रेण पूर्वपक्षः किं न स्यादित्यतोऽनन्तत्वात् कालस्येति पूर्वार्धवैयर्थ्यान्नैवं पूर्वपक्ष इत्यभिप्रेत्य सम्भावनां दूषयन् पूर्वार्धमवतारय[illegible]- **न च स्वर्गादीति**॥ समस्तस्यापि विश्वस्य समस्तस्याप्यघटितस्य निर्बीजत्वेऽपि पुनरावृत्तिरित्यादेरर्थस्यानन्तस्यापि कालस्य विश्वस्य सङ्क्षय इत्यादिरूपस्यापि सम्भावना यत इति विश्वसम्भावनान्यायो विवृतो द्रष्टव्यः।

टीकायां माहात्म्यरूपसिद्धान्तन्यायविवरणव्याख्यानम्

माहात्म्यमित्युक्तन्यायं सप्रमाणकं विवृण्वत्,

'सत्यकामत्वादिमाहात्म्यात्।
''अशेषकामसत्यत्वान्मुक्तानामपुनर्भवः।
यस्मात् स कामयैदेव नित्यमात्मा पुनर्भवम्॥'' इति च श्रुतिः।'

इति वाक्यं भावोक्त्या व्याचष्टे- **सर्वकामावाप्तिः श्रूयत इति**॥ नन्वघटितस्यापि निर्बीजपुनरावृत्त्यादेर्घटना किन्न स्यादित्याक्षेपस्य विवरणे परिहारदर्शनेऽपि तिथिद्वयवदनन्ते काले समस्तक्षयोऽपि किं न स्यादित्याक्षेपस्य कः परिहार इत्यतो विवरणगतं चशब्दसूचितपरिहारं स्वयमाह- **समस्तकालसमाप्तिस्त्विति**॥ तथा च माहात्म्यपुनरावृत्त्योः व्याप्यव्यापकभावे प्रमाणाभावादप्रयोजको हेतुरिति शङ्कां निवारयति- **अशेषकामसत्यत्वादिति**॥ श्रुत्युदाहरणेन यत इति श्रुतिः व्याप्यव्यापकभावं गृह्णाति, अतो नाप्रयोजको हेतुरिति शेषः। अत्र 'माहात्म्यमित्येव सुनिर्णयार्थाः' इति न्यायमालायामेवकारो न युक्तिसामान्यान्तरस्य भावनिषेधकः। सुनिर्णयार्था इति विशेषणेन मिथ्याप्रतीतिजनकयुक्त्यन्तरस्यैव निषेधः। तत्प्रकारश्च प्रत्यधिकरणं परोक्त्यनुवाददूषणाभ्यां द्रष्टव्य इति भावः। एतदधिकरणार्थमुपसंहरति- **अत इति**॥

सङ्क्षेपभाष्ये एतत्पादीयाधिकरणानामर्थः

एतेनैतत्पादीयाधिकरणार्थसङ्ग्राहकम्-

'सहामुना।
यथासङ्कल्पभोगाश्च चिदानन्दशरीरिणः।
जगत्सृष्ट्यादिविषये महासामर्थ्यमप्यृते।
यथेष्टशक्तिमन्तश्च विना स्वाभाविकोत्तमान्।

अनन्यवशगाश्चैव वृद्धिह्रासविवर्जिताः।

दुःखादिरहिताः नित्यं मोदन्तेऽविरतं सुखम्।'

इति सङ्क्षेपभाष्यमप्येवं व्याख्येयम्। तथाहि। तेन जनार्दनं प्राप्येत्यनुषङ्गः। तथा चार्चिरादिना मार्गेण जनार्दनं प्राप्यामुना सह तमनतिक्रम्यैव यथासङ्कल्पभोगा इत्यनेन 'सम्पद्याविहाय' (ब्र.सू. ४.४.१) इत्याद्यधिकरणस्य तात्पर्यमुक्तम्। 'यथासङ्कल्पाभोगाः' इत्यंशेन 'मुक्तः प्रतिज्ञानात्' (ब्र.सू. ४.४.२)इत्यस्य। नहि मुक्तव्यतिरिक्ताः सङ्कल्पानुसारेण महाभोगभोक्तारो भवन्तीति भावः। अमुनेत्यनेन 'आत्मा प्रकरणात्' (ब्र.सू. ४.४.३) इति तृतीयस्य 'परञ्ज्योतिरुपसम्पद्य' इति श्रुतिस्थज्योतिःशब्देनोक्तेत्यर्थः। अमुना सह यथासङ्कल्पभोगा इत्यनेन 'अविभागेन दृष्टत्वात्' (ब्र.सू. ४.४.४) इति चतुर्थस्यामुना भुक्तभोगा एव केचन मुक्तौ भुञ्जते। ननु विभागस्येत्यर्थः। 'चिदानन्दशरीरिणः' इत्यनेन 'ब्राह्मेण जैमिनिः' (ब्र.सू. ४.४.५) इति पञ्चमस्य चिदानन्दस्य परब्रह्मणः शरीरमेषां ते चिदानन्दशरीरिण इति विग्रहाश्रयणेन तस्यप्रथमसूत्रस्यार्थः। चिदानन्दावेव शरीरामेषामिति विग्रहेण 'चितिमात्रेण तदात्मकत्वात्' (ब्र.सू. ४.४.६) इति द्वितीयसूत्रस्य। अत्र मात्रशब्देनाऽनन्दादिव्यावृत्तिरिति सूचयत्यानन्दग्रहणेन। यथासङ्कल्पभोगा इत्यनेन 'सङ्कल्पादेव च तच्छ्रुतेः' (ब्र.सू. ४.४.८) इति षष्ठस्य, न चैतेषां भोगस्तदा तदोत्साहसाध्यः। किन्तु यथासङ्कल्प एव। यो यो भोगस्तैरिष्यते स सङ्कल्पादेव समुत्तिष्ठति, प्रयत्नमकृत्वाऽपीत्यर्थः। चशब्दोऽवधारणे। अनेनैव 'अत एव चानन्याधिपतिः' (ब्र.सू. ४.४.९) इति सप्तममप्युक्ततात्पर्यम्। नहि स्वान्याधमाधीनानां सङ्कल्पानुसारेण भोगः सम्भवतीति भावः। पुनरावृत्तेन चिदानन्दशरीरेणेत्यनेन 'अभावं बादरिः' (ब्र.सू. ४.४.१०) इत्यष्टमस्य चिदानन्दव्यतिरिक्तकर्मार्जितशरीरं मुक्तानां नास्तीति भावः। चिदानन्दाति-

शरीरिणश्चिदानन्दशरीरिण इति विग्रहाश्रयणेन 'भावं जैमिनिः' (ब्र.सू. ४.४.११) इति द्वितीयसूत्रस्य चिदानन्दाश्च शरीरिणश्चेति विग्रहेण 'द्वादशाहवदुभयविधम्' (ब्र.सू. ४.४.१२) इति तृतीयस्य

'जगत्सृष्ट्यादिविषये महासामर्थ्यमप्यृते।

यथेष्टशक्तिमन्तश्च विना स्वाभाविकोत्तमान्।

अनन्यवशगाश्च'

इत्यनेन 'जगद्व्यापारवर्जम्' (ब्र.सू. ४.४.१७) इति नवमस्याधिकरणस्य जगत्सृष्ट्यादिविषयं महासामर्थ्यमीश्वरैकाश्रयं प्रसिद्धम्। तत एव यथेष्टशक्तिः प्रतिज्ञायते न तु जगद्व्यापारेऽपीत्यर्थः। तर्हि मुक्तत्वव्याघात इत्यत आह- स्वाभाविकोत्तमन् विनाऽनन्यवशगा इति॥ स्वोत्तमजगन्नियामकत्वाभावेऽपि स्वाधमजगन्नियामकत्वसम्भवान्न मुक्तत्वव्याघात इति भावः। विना स्वाभाविकेत्यादिना 'अत एव चानन्याधिपतिः' इत्यस्य क्रमातिलङ्घनेन तात्पर्यं चोदितं ज्ञातव्यम्। 'वृद्धिह्रासविवर्जिताः' इत्यनेन 'स्थितिमाह दर्शयतश्चैवं प्रत्यक्षानुमाने' (ब्र.सू. ४.४.२१) इति दशमस्याधिकरणस्य। तत्र हेतुमाह- दुःखादिरहिता इति॥ तत्रैव हेतुः- अविरतं सुखम्। सुखमेव निरन्तरं यस्माद्भवति तस्माद्दुःखावकाश एव नास्तीत्यर्थः। 'नित्यं मोदन्ते' इत्यनेनान्तिमस्याधि-करणस्य।

यद्वा नित्यमिति शास्त्रार्थोपसंहारः। यदध्यायचतुष्टयेऽप्यादित आन्तादुदितं तत्सर्वं नित्यं निर्णीतम्। न तु सन्दिग्धमित्यर्थ इति।

ननु प्रथमसूत्रस्यैवायं शास्त्रविस्तर इत्ययुक्तम्। तत्स्थपदव्याख्यान-रूपत्वाभावात्। जिज्ञासा कर्तव्येत्युपक्रम्य मुक्तानामपुनरावृत्त्युप-संहारायुक्तेश्चेत्यतोऽशेषशास्त्रार्थमर्थक्रमेणोपसंहरति- **तदेवमिति**॥

तत्प्रसादादित्यन्तं तृतीयस्य। कैवल्यसिद्धेरित्यन्तं चतुर्थस्य। अशेषगुणपूर्णेति प्रथमस्य । निर्दोषतयेति द्वितीयस्य। नारायणो जिज्ञास्य इति प्रथमसूत्रार्थ उक्तः। अधिकारिप्रयोजनविषयाणां स्मरणेनैव ग्रन्थं समापयन्ति मङ्गलमिति सूचनाय वा व्यत्यासेनोपसंहारः। तत्स्मरणस्य 'अधिकारं फलं चैव' इत्यादिना महाफलहेतुत्वस्मरणात्।

ब्रह्मसूत्रग्रन्थस्य मतान्तरप्रतिकूलत्वम्

ननु मतान्तररीत्या व्याख्यानेऽपीदं मीमांसाशास्त्रमतिमङ्गलमेव। ततः किं विशिष्योच्यत इत्यत आह- **इतीति** ॥ इति मद्रीत्या व्याख्यान एव शास्त्रमिदमतिमङ्गलं प्रमाणं भवत्यन्यथाऽप्रमाणं स्यात् । तन्मतप्रतिकूलं वा स्यात्। आद्याध्याये पदप्रवृत्तिनिमित्तपूर्वमानन्दादिसर्वशब्दवाच्यताकथनात्। द्वितीये तत्राविरोधसमर्थनमुखेन वाच्यतायाः स्थिरीकरणात् । तृतीये स्थिरफलसाधनत्वं कर्मणां प्रसाध्य तन्मुखेन वैराग्यादिज्ञानान्तरसाधन-प्रतिपादनात् । नहि निर्गुणब्रह्मभावाविर्भावः केनचित्साध्यते । तस्य नित्यत्वाङ्गीकारात्। चतुर्थे च कर्मक्षयादिप्रतिपादनद्वारा स्त्रीयानादिसहितस्य भोगः प्रतिपाद्यते। नहि निर्गुणब्रह्मभावापन्नस्य भोगो नामास्ति। सगुणब्रह्म प्राप्तवतोऽपि न भोगः सम्भवति। भोगो नाम सुखोत्कर्षकृतोचितानुसन्धानम्। तच्च साक्षिरूपं सुखं च ज्ञातैकसत्साक्षिवेद्यं शुक्तिरूप्यादिवदाविद्यकं च। ततश्च सुखस्य प्रातिभासिकत्वेन कथं भोगजनकत्वम्।

नन्वस्ति प्रातिभासिकस्यापि स्वाप्नकामिन्यादेश्चरमधातुविसर्गहेतुत्वम्। अस्ति च रज्ज्वारोपितभुजगादेर्भयकम्पादिजनकत्वम् । मैवम् । ज्ञानमात्रकार्याणां कथञ्चित्सम्भवेऽपि तद्वस्तुसाध्यानां कार्याणां नृत्यगानादीनां सुखोद्रेक-साध्यानामनुपपत्तेः। उक्तं चैतद्भामत्यामपि- 'सन्ति हि कानिचिद्वस्तुसाध्यानि कार्याणि । यथा स्त्रीवस्तुसाध्यानि दन्तक्षतमणिमालादीनि । कानिचित्तु

ज्ञानसाध्यानि यथोक्तानि चरमधातुविसर्गरोमहर्षादीनि । तत्र मनोरथ-मात्रोपनीतेऽपि पित्रादौ भवन्तु तज्ज्ञानमात्रसाध्यानि कार्याणि। न तु तत्साध्यानि भवितुमर्हन्ति। नहि स्त्रैणस्य रोमहर्षादिवद्भवन्ति स्त्रीवस्तुसाध्या मणिमाला-दयः।' इति । किञ्च त्वन्मते सुखस्य ब्रह्मात्मकतयाऽनतिशयत्वेन तत्र तारतम्याभावेन भोगेयत्ताप्रतिपादनमयुक्तमेव। एवं च निर्गुणब्रह्मतत्प्राप्तिसाधन-तद्भावापत्तिरूपफलादिप्रमेयप्रतिपादनाय पञ्चमो वेदः, तन्निर्णयाय चतुर्थं मीमांसाशास्त्रं च गवेषणीयमिति नास्त्यत्राद्वैतिनामवकाश इति भावः।

अत्र विवरणम्-

'इत्यनन्तमहान्यायमीमांसापारवारिधेः।
[१]उत्तारणेऽत्यशक्त्यैव व्याकुलीकृतचेतसाम्।
मन्दानामुपकाराय महतां चोच्छ्रितात्मनाम्।
तद्विशेषपरिज्ञानप्रदीप्तार्काभचेतसाम्।
विशेषगाढे मनसि नितरामुपकारकः।
न्यायप्लवो मयाऽकारि सङ्क्षेपात् प्रमिताक्षरैः।
विस्तरोऽयमेव स्यात् तद्विशेषातिवेदिनाम्।
व्याख्यानुव्याख्ययोरेव विस्तरोऽयमुदीरितः।
अनल्पचेतसां पुंसामलं विज्ञानसिद्धये।
तन्न्यायोद्धरणे शक्ता अपि ह्येतेन सुस्थिरम्।
न्यायानुगं मनः कुर्युरपि[२] सङ्ग्रहलालसाः।
को नामाशेषविद्योरुसागरोन्मथनोद्धृतम्।
साक्षाद्विद्याधिराजेन न्यायामृतमनुत्तमम्।

१. 'उत्तारणात्यशक्त्यैव' इति क्वचित् पाठः।
२. 'न्यायानुगमनं कुर्युः' इति क्वचित्पाठः।

अशेषतोऽधिगच्छेत वन्द्यो वृन्दारकोऽपि सन्।
एवं सुदुर्लभेऽप्यद्धा महान्यायपरामृते।
केचनाधिक्रियन्तेऽत्र तत्प्रसादानुरञ्जिताः।
ब्रह्माद्या अमृते यद्वत् सागरोन्मथनोद्धृते।
अहं तु तत्प्रसादैकमहास्पदबलोन्नतः।
न्यायमृतार्णवमिमवगाह्य विभज्य च।
सङ्क्षेपविस्तराभ्यां च चकार व्याकृतिं कृतिम्।
तत्प्रसादमृते कस्य शक्तिः संसारसागरे।
मग्नस्य चेतनस्य स्यात् तत्कृतानुकृतौ क्वचित्।
नित्यानन्दामृतस्यन्दितत्कटाक्षैधितस्य तु।
का नु शक्तिर्भवेन्नैव ततः कोऽत्रास्ति विस्मयः।'

तदिदं तात्पर्यतो व्याचष्टे- **अशेषमतिमङ्गलमिति ॥** न केवलं शास्त्रमेवातिमङ्गलम्। किन्तु सद्भाष्यमनुव्याख्यागतस्तदपेक्षितन्यायोद्धारस्तद्विवरणं चेत्यशेषमपि सूत्रव्याख्यानमतिमङ्गलमित्यर्थः। तथा चायमर्थः। ननु न्यायविवरणग्रन्थ एव व्यर्थः। न चानुव्याख्यानगतन्यायमालाव्याख्यानार्थं स इति वाच्यम्। अनुव्याख्याने न्यायसङ्ग्रहस्यैव व्यर्थत्वात्। तथाहि। किं सूत्रव्याख्यानरूपभाष्यानुव्याख्यानयोर्न्यायगर्भताऽस्ति न वा। द्वितीये तयोरनुपादेयत्वप्रसङ्गः। आद्ये पुनर्वैयर्थ्यानिस्तारात् अनुव्याख्यागतन्यायमालायाः। न च स्वयमेव किञ्चित्सङ्क्षिप्योक्त्वा पश्चात्स्वयमेव विवृणोतीति क्वचिद्दृष्टम्। तस्मान्न्यायसङ्ग्रहो व्यर्थः सुतरां तद्विवरणमित्याशङ्क्य न्यायसङ्ग्रहो न व्यर्थस्तावत्। तत्किं मन्दान् प्रति शङ्क्येत उत कुशलान् प्रति। नाऽद्य इत्याह- **इत्यनन्तेति ॥** अनन्ताश्च ते महान्तश्च ते न्यायाश्च तद्युतमीमांसाशास्त्राख्यापारसमुद्रादुत्तारणे। निमित्ते सप्तमी। समुद्रपारगमनाय न्यायसङ्ग्रहाख्यः प्लव इति

पूर्वोक्तप्रकारेण मन्दानामुपकारायाकारीति सम्बन्धः। उत्तारणात्यशक्त्यैवेति पाठे नित्यसापेक्षत्वात् समासः। तत्र हेतुः- **व्याकुलीकृतचेतसामिति ॥** अनेन चित्तव्याकुलतापरिहार एवोपकार इत्युक्तं भवति। ननु विक्षिप्तचेतसां कथमनेनोपकार इत्यत आह- **अशक्त्यैवेति ॥** न तु स्वरूपायोग्यतयेत्यर्थः। ननु कदाचित्प्रयत्नबाहुल्येनाशक्तिपरिहारोऽपि भविष्यतीत्यत आह- **अतीति ॥** एतत्सम्भावनायैव पूर्वं मीमांसाशास्त्रमपारवारिधित्वेनोक्तम्। न द्वितीय इत्याह- **महतां चेति ॥** महतां नितरामुपकारक इति सम्बन्धः। तेषां मनोव्याकुलताया आधिक्यान्नितरामित्युक्तम्। कथं तदाधिक्यमित्यत आह- **विशेषं प्रति गाढे मनसीति ॥** तत्सम्भावकम्- **उच्छ्रितात्मनामिति ॥** उच्छ्रितः बह्वर्थतया विस्तृत आत्मा मनो येषां ते तथोक्ताः। तदीयमनसां बह्वर्थविषयकस्वभावत्वाद् बहुप्रमेयमवगाढं मनः। अतस्तेषां व्याकुलता सम्भवति। मनस्त्वाविशेषेऽपि तदीयमनसो विस्तृतत्वे निमित्तमाह- **तद्विशेषेति ॥** सर्वेभ्यो विशिष्यत इति विशेषो भगवान्। स चासौ मीमांसा प्रतिपाद्यश्चासौ विशेषश्च। तत्साक्षात्कारवशेन प्रदीप्तार्काभं चेतो येषां ते तथोक्ताः। भगवत्साक्षात्कारमहिम्ना तेषां मनः बहुप्रमेयगोचरम्। तथा च बहुप्रमेयचित्तानामल्पज्ञचित्तापेक्षया व्याकुलीभावाधिक्यस्यानुभवसिद्धत्वादिति भावः। न तर्ह्येवं व्याकुलचित्तानामयं न्यायसङ्ग्रह उपकरोतीत्यत आह- **सङ्क्षेपादिति ॥** उपसङ्गृह्येत्यर्थः। न ह्येवमप्यनुपकारी भवति। उपसंहारमात्रस्य वैयर्थ्यप्रसङ्गादिति भावः। न चैतावता ग्रन्थान्तरेण चारितार्थ्यमित्याह- **प्रमिताक्षरैरिति ॥** मितशब्दैरित्यर्थः। एवमनुव्याख्यानगतन्यायसङ्ग्राहकश्लोकानां वैयर्थ्यं परिहृत्य तद्विवरणरूपस्यास्य ग्रन्थस्यापि तत्परिहरति- **विस्तरोऽप्येवमेव स्यादिति ॥** विस्तार्यते श्लोकार्थोऽनेनेति विस्तरो न्यायविवरणाख्यो ग्रन्थोऽप्येवमेव श्लोकवद् व्यर्थ एव स्यात्। उक्तरीत्या मन्दबुद्धेरप्युपकारकत्वसम्भवादित्यर्थः। 'विस्तरोऽप्ययमेव स्यात्' इति पाठे 'कविरित्येव शब्दितः' इत्यादाविवैवशब्द इति व्याख्येयः।

ननु तथाऽपि स्वकृतग्रन्थस्य स्वयमेव व्याख्यानमसाम्प्रतम्। प्रथमतः सङ्क्षेपेण कथनं ततो विस्तरेण कथनं च प्रयोजनशून्यम्। एवमेव व्याख्याने विवरणस्यापि व्याख्यानं स्वयमेव च कर्तव्यं स्यादित्यत आह- **तद्विशेषातिवेदिनामिति** ॥ व्याख्यानुव्याख्ययोर्भाष्यानुव्याख्ययोरयं ग्रन्थो विस्तरो व्याख्यारूपो यस्मादुदीरितः तत् तस्माद् विशेषतो ब्रह्मवादिनामत एवानल्पचेतसां पुंसां विज्ञानसिद्धये न्यायमालोक्तन्यायसिद्ध्यर्थं विवरणग्रन्थ एवालमिति सम्बन्धः। यद्यव्याख्यातेन विवरणेन न्यायमालोक्तन्यायनिश्चयो न स्यात् तदैव तदपि व्याख्येयम्। न चैवमस्ति। अव्याख्यातेन विवरणेन कुशलबुद्धीनां न्यायसङ्ग्रहणसम्भवादिति भावः।

ननु तर्हि सङ्ग्रहश्लोको व्यर्थः। अत आह- **तन्न्यायेति** ॥ सङ्ग्रहश्लोकाभावेऽप्येतच्छास्त्रस्थन्यायोद्धरणे स्वयं शक्ता अप्येतेन सङ्ग्रहश्लोकेन न्यायानुगं मनः सुस्थिरं कुर्युः। यद्वा एते सङ्ग्रहश्लोकाभावे न्यायानुगं मनः सुस्थिरं न कुर्युः। अतः सङ्ग्रहलालसाः सङ्ग्रहरुचयोऽपि भवन्ति। तेन सङ्ग्रहश्लोको न व्यर्थ इति भावः। 'न्यायानुगमनं कुर्युः' इति पाठेऽप्ययमेवार्थः। नन्वधिकारिणः सङ्ग्रहरुचयश्चेत् स्वयमेवं मीमांसाशास्त्रात् सङ्गृह्याऽलोचयेयुः। ततश्च भगवत्प्रयासः पुनर्व्यर्थः। अत आह- **को नामेति** ॥ अनन्तशाखात्मकवेदाख्यसागरोन्मथनेनोद्धृतम् अनुत्तमं न्यायामृतं को नामाधिगच्छेत्? न कोऽपीति सम्बन्धः। विद्याधिराजेनेत्यसम्भवपरिहारः। साक्षादित्यनुत्तमत्वोपपादनम्। निरधिकारिकत्वशङ्कां निवर्तयति- **अशेषत इति** ॥ वृन्दारक इति सामर्थ्योपपादनम्। वन्द्य इति सात्त्विकत्वोपपादनम्, निरधिकारिकत्वशङ्कानिवारणायाशेषत इत्युक्तं विवृणोति- **एवमिति** ॥ एवमितरदुर्लभेऽपि न्यायपरामृते शास्त्रे ब्रह्माद्याः केचन सात्त्विकजीवा अत्र शास्त्रे क्वचिदधिक्रियन्ते। अधिगच्छन्ति चेत्यर्थः। अधि-

कारेणाधिगमस्यायथार्थत्वं निवारयति। तत्रापि भगवत्प्रसादोऽपेक्षित इत्याह- **तत्प्रसादानुरञ्जिता इति** ॥ अनेन पूर्वोक्तं प्रसादाभावविषयमिति भावः।

नन्विदमयुक्तम्। न्यायगर्भितं चेन्मीमांसाशास्त्रं विदितपदपदार्थसङ्गतिकः सर्वोऽपि मीमांसान्तरादिवार्थं प्रत्येत्येव। ततः प्रसादापेक्षा कुत इत्यत आह- **यद्वदिति** ॥ सागरोन्मथनोद्धृते ब्रह्माद्या एवामृतमधिगच्छन्ति नासुरा इति यद्वदित्यर्थः। नहि तत्रामृतं कैश्चिद्दृष्टं कैश्चिन्नेति वैषम्यमस्ति। किन्तु सर्वप्रत्यक्षगोचरमेव। तथाऽपि कैश्चिदेव भगवत्प्रसादानुरञ्जितैः प्राप्तम्। इतरैर्नेति विशेषदर्शनमस्तीति भावः। ननु केचनाधिक्रियन्त इत्युक्ताधिकारमात्रसद्भावेऽपि ब्रह्मादीनां तत्कृतिनिर्मातृत्वाभावेन भवतामप्यसम्भावितमेव तन्निर्मातृत्वम्। तन्निर्माणस्य तद्वाक्यार्थावधारणविभजनसाध्यत्वात्। तत्रापि सङ्क्षेपविस्तराभ्यां कृतिरतिनिष्कर्षसाध्येत्यतस्तत्र हेतुं वदन्नाह- **अहं त्विति** ॥ तत्प्रसादाख्यमहास्पदबलेनोन्नत इत्यनेन मयि यथा महाप्रसादस्तथा नान्यत्रेति सूचितम्। यद्यपि चतुर्मुखस्य पदाधिक्यान्महाप्रसादोऽस्ति। तथाऽपि भुव्यवताराभावेन विवक्षितप्रसादस्तत्रापि नास्ति। अत एव मीमांसाख्यन्यायामृतार्णवावगाहनतद्व्याख्याने सङ्क्षेपविस्तराभ्यां च न्यायमालातद्विवरणे चेत्येतत्सर्वमत्युपपन्नमिति भावः। स्यादेतत्। यदि भगवत्प्रसादो व्याख्यानादावुपयुक्तस्तदा तादृशमहाप्रसादो मय्येवेति सम्भवति। तदेव कुत इत्यत आह- **तत्प्रसादमिति** ॥ चेतनमात्रस्यापि विद्याधिराजकृतब्रह्ममीमांसानुकृतिमात्रे भगवत्प्रसादमन्तरेण कस्य शक्तिः स्यादित्यनेन सुतरामवगाहनविभजनादौ तदपेक्षाऽस्तीति सूचितम्। स्वस्मिन् महाप्रसादसद्भावं व्यञ्जयन्नाह- **नित्यानन्देति** ॥ नित्यानन्दस्य भगवतो वेदव्यासस्यामृतस्यन्दिमीमांसव्याख्यानविषयकटाक्षेणाभिवृद्धिं गतस्य मम का वा शक्तिर्न भवेत्। सर्वाऽपि भवेदेव। न हि स्वकृतमीमांसाग्रन्थव्याख्याने साक्षान्नियोजनमन्येषामस्तीति भावः। तत इतरव्यावृत्तमहाप्रसादभाक्त्वं ममैवेत्यत्र

नाश्चर्यं कार्यमित्यर्थः। तस्मात् सङ्ग्रहस्तद्व्याख्यानं चात्यादरणीयमिति सिद्ध-मिति। अत एव भगवत्कृतत्वानुसन्धानेन कृतविवरणस्य भगवति समर्पणाय प्राप्तम्।

'विद्याविद्ये सुखं दुःखमशक्तिः शक्तिरेव च।
उत्पत्तिस्थितिनाशाश्च विशेषाश्चापरेऽखिलाः।
चेतनाचेतनस्यास्य समस्तस्य यदिच्छया।
स मम स्वकृतेनैव प्रीयतां पुरुषोत्तमः॥'

इत्यन्तं विवरणं भाष्येण सहावतारयति- **यथास्थितमिति**॥ गुणगणार्णव-तयेत्यनेन यदिच्छया अखिला विशेषा भवन्तीत्यस्य, यच्छिष्यतया चेत्यनेन यत्कटाक्षैधितोऽहं भगवान् व्यास इत्यस्य, यस्मिंश्चाऽत्मनि इत्यनेन मम प्रीयतामित्यस्य, देवतात्वेन गुरुत्वेन चेत्यनेन पुरुषोत्तम इत्यनेन कोऽप्यर्थ उक्तो वेदितव्यः। स्वमाहात्म्यप्रकटनपरं, तथा स्वमहिमोत्त्यवसाने पर्यवसानमनिच्छता भगवन्नमनेन तच्छरणप्रार्थनपरं च,

'यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलम्
बट्तद्दर्शतमित्थमेव निहितं देवस्य भर्गो महत्।
वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपुः
मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे॥
नमोऽजभवभूर्यक्षपुरःसरसुराश्रय।
नारायणारणं मह्यं मापते प्रेयसां प्रिय।'

इति विवरणं भाष्येण सहावतारयति- **अथ स्वभाषितभाष्यस्येति**॥ लक्षणवत्वाद्विवरणमपि भाष्यशब्देन ग्राह्यम्। एवमग्रेऽपि। हे नारायण मह्यमरणं शरणं भवेत्यर्थः। मा महालक्ष्मीः।

'सत्योच्चानन्दभुङ्मुक्तसंसेवितपदद्वयम्।
अत्यन्तं प्रीयतां कृत्या सत्या मे शेषमश्नगम्।
मदीयपूर्वाचरितप्रतुष्टश्रीप्राणनाथेन हृदि स्थितेन।
सेव्या कृतिः श्रीहरिणा प्रणीता स्वार्थेषु मात्सर्यमिदं कुतो वः।

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्याणां सर्वतन्त्रस्वतन्त्राणां श्रीलक्ष्मीनारायणतीर्थपूज्यपादानां शिष्येण श्रीमद्रघुनाथयतिना कृतायां शिष्टतात्पर्यचन्द्रिकायां चतुर्थाध्यायस्य चतुर्थः पादः ॥

॥ ग्रन्थश्चायं सम्पूर्णः ॥

॥ श्रीकृष्णार्पणमस्तु ॥

॥ श्रीरस्तु ॥